आयुर्वेदीय महाकोशः

अर्थात्

आयुर्वेदीय शब्दकोशः

(पूरणिका)

संस्कृत - संस्कृत - द्वितीयः खण्डः

संपादकौ

आयुर्वेदाचार्य वेणीमाधवशास्त्री जोशी

आयुर्वेदविशारद नारायण हरि जोशी

१९६८

महाराष्ट्र राज्य साहित्य आणि संस्कृति मंडळ

मुंबई

आयुर्वेदीय महाकोशः

अर्थात्

आयुर्वेदीय शब्दकोशः

संस्कृत--संस्कृत द्वितीयः खण्डः

(पूरणिका)

संपादकौ

आयुर्वेदाचार्य वेणीमाधवशास्त्री जोशी

आयुर्वेदविशारद नारायण हरि जोशी

१९६८

महाराष्ट्र राज्य साहित्य आणि संस्कृति मंडळ

मुंबई

पूरणिका – निवेदनम्

वयमत्र आयुर्वेदीय शब्दकोशस्य महाकोशात्मकस्यान्ते परिशिष्टात्मिकां पूरणिकां संपाद्य वाचकेभ्यो समर्पयामः।आयुर्वेदीय शब्दकोशे सर्वेभ्य आयुर्वेदतंत्रेभ्यः मानवाधिष्ठितां चिकित्सां अवलंब्य प्रणीतेभ्यः परिभाषां संग्राह्यात्र समावेशयामः। हस्त्यश्वादि वैद्यकतंत्रेषु प्रयुक्तानां पारिभाषिक शब्दानां मानवाधिष्ठित चिकित्साश्रित पारिभाषिक शब्दातिरिक्तानां अपि अस्यां पूरणिकायां संग्रहः कृतोऽस्ति। अन्यच्च आयुर्वेदशब्दकोशे असमाविष्टानां केषांचित् मानववैद्यकीय पारिभाषिकशब्दानामपि अस्यां पूरणिकायां उद्धारः कृतोऽस्ति न्यूनतापरिहाराय।

इयं हि पूरणिका वंगदेशे पंचाशद्वर्षेभ्यः प्राक् मुद्रितस्य सद्यः पुस्तकापणे कुत्रापि अनुपलभ्यमानस्य प्रसिद्धग्रंथालयेष्वपि क्वचिदेव संगृहीतस्य वैद्यकशब्दसिंधुरिति प्रख्यातस्य आलोडनं कृत्वा ते शब्दाः अत्र संगृहीताःये आयुर्वेदीय शब्दकोशे नोपलभ्यन्ते। अत्र तु इदमप्यवधातव्यं यत् वंगदेशीय वर्णोच्चारणव्यत्यासः व–ब– इत्यादि वर्णविषये उपलभ्यमानः तथैवानुसृतः। वैद्यकशब्दसिन्धौ संगृहीतानां बहूनां शब्दानां अन्यत्र प्रसिद्धार्थातिरिक्तार्थविवरणं विस्मयावहं भवति तदपि विवरणं अस्यां पूरणिकायां संगृहीतमास्ति। इत्यादयो बहवो अस्याः पूरणिकाया विशेषा विदुषां संतोषाय भवेयुः इत्याशास्महे।

लक्ष्मणशास्त्री जोशी

अध्यक्षः

महाराष्ट्रराज्य साहित्य संस्कृति मंडलस्य

आयुर्वेदशब्दकोशः अर्थात् आयुर्वेद महाकोशः

पूरणिका (सङ्केतसूचिः)

आधारग्रंथाः	संकेताः	आधारग्रंथाः	संकेताः
अध्यायः	अ.	आमावतः	आम. वा., आ. वा.
अगुर्वादितैलं	अगु. तैलं	आमातीसारः	अमातीसा
अग्निमान्द्य	अग्निमा.	आम्रवर्गः	आ. व., आम्र. व.
अरोचकः	अ. च., अरो.	इन्द्रियस्थानं	इ. (न्द्रिय)
अपची	अ. ची.	उत्तरखण्डः	उ.
अजीर्णं	अजी.	उत्तरतन्त्रम्	उ.
अमरटीकानीलकण्ठः	अ. टी. नी.	उदरम्	उ.
अमरटीकाभरतः	अ. टी. भ.	उणादिः	उणा.
अमरटीकाभानुदत्तः	अ. टी. भा.	उत्कलः	उत्
अमरटीकामथुरेश	अ. टी. म.	उपदंशः	उ. द.
अमरटीकारमानाथः	अ. टी. र.	उदावर्त्तः	उदा., उ. व.
अमरटीकारायमुकुटः	अ. टी. रा.	उन्मादः	उन्मा.
अमरटीकारामाश्रमः	अ. टी. रामा.	उपरसवर्गः	उ. रसव.
अमरटीकासारसुन्दरी	अ. टी. सा.	ऊरुस्तम्भः	ऊ. स्त
अमरटीकासुभूतिस्वामी	अ. टी. सुभूति. स्वा.	एकार्थवर्गः	एकार्थः
अमरटीकाक्षीरस्वामी	अ. टी. स्वा. (मी.)	एकाक्षरकोषः	ए. को.
अत्रिसंहिता	अत्रि.	एलादिवर्गः	एलादि.
असृग्दरः	अ. दर.	ओष्ठरोगः	ओ. रो.
अनुपानं	अनु. (पा.)	कर्णाटः	कं.
अनेकार्थवर्गः	अने. व.	कटिवातः	कटिवा.
अन्नद्रवशूलं	अन्नद्र (व) शू.	कण्ठगत मुखरोगः	कण्ठ. मु. रो.
अपस्मारः	अप (स्मा)	कर्णरोगः	कर्णरो.
अम्लपित्त	अ. पि.	कल्पस्थानं	कल्प.
अभिन्यासज्वरः	अभि. (न्या). ज्व.	कर्पूरवर्गः	क. व.
अमरकोषः	अम.	काण्डः	का.
अरुणदत्तः	अरुणः, अरु. द.	काङ्कायनगुटी	काङ्काय. गु.
अर्कप्रकाशः (रावणकृतः)	अर्कः (रावणः)	कालिकापुराणम्	का. पुराणम्
अर्कप्रकाशचिकित्सा	अर्क. चि.	कामला	काम.
अर्कादिवर्गः	अर्कादिः	कुम्भकामला	कु. काम, कुम्भ.
अर्धावभेदकः	अर्द्धा. द. (अर्द्धा)	कुसुमावलीटीका	कु. टी., कुसुमा.
अलसकः	अल.	कोङ्कणः	कों.
अन्त्रवृद्धिः	अ. व.	क्लीबलिंगं	क्ली.
अश्मरी	अश्म. (री)	खण्डः	ख.
अतीसारः	अ. (अति, ती) सा.	गणः	ग.
आरवीयः	आ.	गलगण्डः	ग. ग.
		गजवैद्यकः	गज, वै.

आधारग्रंथाः	संकेताः	आधारग्रंथाः	संकेताः
भारतम्, भावप्रकाशः	भा.	रोगः	रो.
भावप्रकाशपूर्वभागः	भा. पू.	वर्गः	व.
भावप्रकाशमध्यभागः	भा. म.	वटादिवर्गः	वटा. वं.
भूतोन्मादः	भू. उन्मा.	वम्यार्ह	वम्
भूरिप्रयोगः	भूरि. प्र.	वाग्भटः	वा.
भैषज्यरत्नावली	भैष.	वाजीकरणं	वाजी. क.
महाराष्ट्र	मं.	वातज्वरः	वा. ज्व.
मध्यखण्डः	म.	वातपित्तज्वरः	वा. पि. ज्व.
मदनपालः	मदः	वातरक्तः	वा. र. (रक्त)
मधुमतीटीका	मधु.	वातव्याधिः	वा. व्या.
मधुमेहः	मधु. मे., म. मे.	विमानस्थानं	वि., विमा.
मसूरिका	मसू.	विश्वप्रकाशकोषः	वि., विश्व.
भाषा.	भा.	विजयरक्षितः (व्याख्यामधुकोषः)	विज. र., वि. र.
माधवनिदान	मा. नि.	विषमज्वरः	वि. ज्व.
मिश्रकाध्यायः	मिश्र.	विदग्धाजीर्णः	विदग्धाजी.
मुखरोगः	मु. रो.	विद्रधिः	विद्र.
मूत्रकृच्छ्रः	मू. कृ.	विलम्बिका	विल.
मूत्राघातः	मू. घा.	विसूचिका	वि. सू.
मूत्ररक्तः	मू. र.	वृद्धिचिकित्सा	वृ. चि.
मेदिनी	मे.	बृहत्सुश्रुतम्	बृह. सु.
योगरत्नाकरः	योग. र., यो. (रत्न. रत्ना.)	वैद्यकचन्द्रिका	वै. चन्द्रिका.
योनिव्यापत्	यो. (नि) व्या. रो.	वैद्यजीवनं	वै. जी.
रक्तिका	र.	वैद्यकनिघण्टु	वै. निघ.
रक्तातिसारः	रक्ताति.	वैद्यकसंग्रहः	वै. सं.
रसेन्द्रचिन्तामणिः	र. चि., रस. चि.	अव्ययं	व्य.
रत्नावली	रत्ना.	व्याकरणम्	व्याक.
रक्तपित्त	र. पि.	व्रणशोथः	व्र. (ण) शो.
रसमञ्जरी	र. म., रस. म.	शरावः	श.
रत्नमाला	र. मा.	अर्धशरावः	॥० श.
रत्नमालासंग्रहः	र. मा. सं. (ग्रहः)	शब्दचन्द्रिका	श. च.
रसकौमुदी	रस. कौ.	शब्दचिन्तामणिः	श. चि.
रसप्रदीपः	रस. प्र.	शब्दकल्पद्रुमः	शब्दकल्प.
रसरत्नाकरः	रस. र.	शब्दमाला	श. मा.
रसायनाधिकारे	रसायना.	शब्दरत्नावली	श. र.
रसेन्द्रसारसंग्रहः	र. सा. सं.	शारीरस्थानं	शा.
रसेन्द्रचिन्तामणिः	रसे. चि., रसेन्द्र. चि.	शार्ङ्गधरः	शा. ध., शार्ङ्ग
राजवल्लभः	राज.	शाकवर्गः	शा. व.
राजयक्ष्मा	राज. य., रा. य.	शारीरव्रणः	शा. व्र.
राजतरङ्गिणी	रा. तर.	शिरोरोगः	शि. रो., शिरोगे.
राजनिघण्टुः	रा. नि.		

आधारग्रंथाः	संकेताः
गण्डमाला	ग. मा.
गुटी (डी)	गु.
गुज्जरी, गुजराटी	गु. गुर्ज्जः
गुदभ्रंशः	गुदभ्रं.
गुडूच्यादिवर्ग	गु. व.
ग्रहः	ग्र.
ग्रहणी	ग्रह.
चरकसंहिता	च. (चर.)
चक्रपाणिदत्तद्रव्यगुणः	चक्र. द.
चक्रपाणिदत्तकृतसंग्रहः	च. द. (सं.)
चन्दनादितैलम्	चन्द. तैल.
चरकविमानस्थानम्	च. वि.
चातुर्थकज्वरः	चातु. ज्व.
चिकित्सास्थानं	चि.
चिकित्साक्रमकल्पवल्ली	चि. क्र. क. (वल्ली)
चूर्णम्	चू.
जटाधरः	जटा.
जयदत्तः	ज. (जय.) द.
ज्वरः	ज्व.
ज्वरातिसारः	ज्वराति.
टीका	टी.
डल्वण	ड.
तामिळः	ता.
तालुगतमुखरोगः	तालु. मु. रो.
तृष्णा	तृ.
तेलुगुः, तैलङ्गः	तें.
तैलम्	तै.
अर्द्धतोलकः	॥० तो.
तोलकः	तो.
तोडनानन्दः	तोड.
त्रिलिङ्गं	त्रि.
त्रिकाण्डशेषः	त्रिका.
दन्तरोगः	दन्तरो.
दन्तगतमुखरोगः	द. मु. रो.
दधिवर्गः	द. व.
द्रव्यगुणः	द्र. (व्य.) गु.
द्रव्याभिधानं	द्रव्याभि.
द्विरूपकोषः	द्वि. (रूपः)
धन्वन्तरिनिघण्टुः	ध. निघ.

आधारग्रंथाः	संकेताः
धरणिः	धर.
धान्यवर्गः	धा. (न्य) व.
ध्वजभङ्गः	ध्व. भ.
नानार्थो	नाना.
नासारोगः	ना. रो.
नाडीव्रणः	ना. व्र.
निदानस्थानं	नि.
निदानम्	निदा.
नेत्रगतदृष्टिरोगः	ने. दृ. रो.
नेत्ररोगः	ने. रो.
नेत्रगतवर्त्मरोगः	ने. व. रो.
नेत्रगतशुक्ररोगः	ने. शु. रो.
नेत्रगतसन्धिरोगः	ने. सन्धि. रो.
पञ्जाबः	पं. पञ्जा.
पलं, परिच्छेदः	पं
पथ्यापथ्ये	प. प.
परिभाषाप्रदीप	प. प्र.
परमदः	प. म. (परमदः)
पर्य्यायमुक्तावली	प. मु.
पानाजीर्णः	पा. अजी.
पानात्ययः	पाना.
पित्तज्वरः	पि. ज्व.
पिप्पल्यादिवर्गः	पि. व.
पुलिङ्ग	पुं.
पुष्पवर्गः	पु. व.
पूर्वखण्डः, पूर्वभागः	पू.
प्रत्येकम् प्रयोगः, प्रसारणी	प्र.
प्रमेहः	प्रमे (हः)
प्रयोगरत्नाकरः	प्रयोगरत्न.
प्रयोगामृत	प्रयोगा.
प्रहरः	प्रह.
प्राकृतं	प्रा.
फलवर्गः	फ. व.
फारसी	फा.
भागः	भ.
भगन्दरः	भग.
भरतद्विरूपकोषः	भ. द्विरूपको.
भरतधृतरभसः	भ. रभसः
भल्लातकगुडः	भल्लागुडः

आधारग्रंथाः	संकेताः	आधारग्रंथाः	संकेताः
शिरोविरेचनम्	शिरोवि.		
शीतपित्तम्	शी. पि.	सूत्रस्थानं	सू.
शूकदोषः	शू. दो.	सूतिका	सूति.
शेषः	शे.	सूर्यसिद्धान्तः	सूर्यसि.
श्लोकः	श्ल.	स्तवकः	स्त.
श्लीपद	श्ली.	स्त्रीलिङ्गं	स्त्री.
संग्रहः	सं.	स्थानं	स्था.
संग्रहग्रहणी	सं. ग्रहणी.	स्वरभेदः	स्व. भे (द).
सन्निपातः	स. सन्निपा.	हलायुधः	हला.
सन्न्यासज्वरचिकित्सा	सन्न्या. ज्व.	हलीमकाः	हली.
सर्वगतमुखरोगः	सर्व. मु. रो.	हरीतकीवर्गः	ह. व.
सद्योव्रणः	स. व्र.	हारीतः	हा.
साधारण, सान्निपातिक	सा.	हारितोत्तरे अत्रिः	हा. अत्रिः
सारकौमुदी	सा. कौ	हारावलिः (वली)	हारा.
सारसुन्दरी	सा.सु.	हिन्दी	हिं.
सिद्धिस्थानं	सि.	हिक्काश्वासः	हि. श्वा.
सिद्धयोगः	सि. यो.	हृद्रोगः	हृद्रो.
सुश्रुतं	सु.	हेमचन्द्रः	हे. च.
सुश्रुतटीकाडल्वणः	सु. टी. ड.	हेमाद्रिः, तत्कृतटीका	हेमा.
सुश्रुतनिदानस्थानम्	सुनि.	क्षारपाणिः	क्षार.
सुश्रुतमिश्रकाध्यायः	सु. मि.	H. H. WILSON	WIL.

आयुर्वेदीय - शब्दकोशः - पूरणिका

अंशल–त्रि., मांसलः
अंशुकाय–पु., प्रवालादिः
अंशुपर्णिका–स्त्री., शालपर्णी
अंशुपर्णी–(श. र.) शालिपर्णी
अंशुमतीफला–स्त्री., कदलीवृक्षः (भा. पू.) (१ भ. फ. ब.)
अंशुमत्फला–स्त्री., कदलीवृक्षः (रा. नि. व. ११)
अंशूदक–न. पु., हंसोदम्। तच्चाहोरात्रं रविचन्द्रकिरण- जुष्टत्वात् निर्मलं शैत्यगुणयुक्तं भौमं जलं शरदि प्रशस्तम्। शस्तं शरदि नादेयं नीरमंशूदकं परम्। दिवार्ककिरणैर्जुष्टं निशायामिन्दुरश्मिभिः॥ अरूक्ष- मनभिष्यन्दि तत्तुल्यं गगनाम्बुना॥' (सुसू. ४६ अ. वारिव.) (भा. पू.)
तस्य गुणा :– बल्यं रसायनं शीतलं लघु च (मद. ८ व.) श्रमघ्नं पित्तोष्णदाहविषमूर्च्छा- रक्तमदात्ययेषु हितम् (रा. नि. व. १४)
अंसपारिक–पु., महानिम्बवृक्षः (वै. नि.)
अंहति–स्त्री., रोगः (मे) पीडा (अम रा. नि)
अंह्रि–पु., पादः तरुमूलम् (अम.)
अंह्रिप–पु., वृक्षः (हला.)
अंह्रिस्कन्ध–पु., गुल्फम् (हेच.)
अकच–त्रि., केशशून्यम्
अकरा–स्त्री., आमलकीवृक्षः (श. च.)
अकराकरभ–पु., अकर्करः (शार्ङ्गः अकारादिचूर्ण ६ अ.)
अकराम्भक–पु., अकर्करः (वै. नि.)
अकर्कर–पु., स्वनामख्यातं पण्यद्रव्यम्
अकर्ण–त्रि., बधिरः (हे. च.)
अकर्तन–त्रि., वामनः
अकलकर–फा. अकर्करहा अकल्करा गुणाः—वीर्योष्णः बलकरः कटुः प्रतिश्यायशोथवातघ्नश्च (वै. नि.)
(मद) गुवाकशिरः– भेदनं मदकरं च (च. द.) स्वादु तिक्तं कषायं शुक्रलं मूत्ररोगघ्नं च (राज) निर्यासः–हिमो गुरुः विपाके उष्णः वातघ्नः पित्तकरः क्षारः अम्लः मोहनश्च (ता) हिमो गुरुः वातघ्नः कृमिहृत्पित्तलश्चेति (रा. नि. व. ११) पूगं सङ्कोचकं कृमिघ्नं च। आमं तत्–कषायं मुखकण्ठशोधनं रेचनं पाचनं रुचिकरं च। शुष्कं पूगं मुखकण्ठशोधनं सरमुदराध्मानहरं श्लेष्म- पित्तरक्तामशमनं च। पर्णेन विना खादितं तद्-पाण्डु- वातशोषादिरोगजनकं भवति (रा. नि. व. ११)
अकल्य–त्रि., रुग्णः
अकल्ल–पु., अकर्करः (अ. टी. सा. वै. नि.)
अकालकुष्माण्ड–पु., अकालजकुष्माण्डम्
अकालभोजन–न., अप्राप्ते काले अतिप्राक्. कालेऽतीते वा भोजनम्। तच्च गुणैरसामर्थ्यकरं शिरःपीडाविसूचि- कादिव्याधिजनकम्। यथा "अप्राप्तकाले भुञ्जानो ह्यसमर्थतनुर्नरः। तांस्ताव्याधीनवाप्नोति मरण- ञ्चाधिगच्छति" (भा. पू.)
अकालशयन–न., न यथायोग्यकाले शयनम् (वा. सू. ८) गुणाः– "अकालशयनात् श्लेष्मा प्रतिश्यायः प्रपीनसः। क्षयः शोफः शिरोऽर्तिश्च जायते चाग्निमन्दता" (हा. अत्रि. १ स्थाने २३ अ)
अकुप्य–न., स्वर्णम्। रौप्यम्। (हला)
अकुल–त्रि., निरस्थिद्रव्यम् (चचि. १) लम्बकर्ण- जटाहीनमध्यमाश्वः
यथा "लम्बकर्णोऽजटश्चैव अकुलः परिकीर्तितः।" (जयद. ६)
अकूट–पु., फलवृक्षविशेषः आगडफल इति लोके। (रत्ना)
अकूपार–पु., कच्छपः (त्रिका)
अकोट–पु., गुवाकवृक्षः, फलगुणाः– गुरु हिमं रूक्षं कषायं कफपित्तहरं मोहनं दीपनं रुच्यं मुखवैरस्यहरं च। आर्द्रं तत्-गुरु अभिष्यन्दि अग्निघ्नं दृष्टिघ्नं च। स्विन्नं नाम शुष्कमेव तत् त्रिदोषघ्नम्। पुष्पं-कषायं मधुरं गुरु च स एव निघण्टुः पूगस्याष्टभेदानङ्गी करोति। शैली-तैल्वण-गौल्य-घोण्टा-चेऊल-वल्लिगुल- चन्द्रापुरीयः चौल्यः इति। तेषु शैली-मधुरा रुच्या कटुकषायाम्ला। तैल्वणं मधुरं लघु दीपनं रसालं च। गौल्यम्-कटु कषायं पाचनं द्रावकं लघु च। घोण्टा कटु-कषायोष्णा दीपनी च। चेउलसंज्ञं कोंकणे

प्रसिद्धं-तच्च सुगन्धि दीपनं पाचनं पुष्टिकरं रसाढ्यं च। वल्लिगुलमपि कोंकण एव प्रसिद्धं त्रिदोषहरं ग्राम्यं दीपनं च। चन्द्रापुरीयं स्वादु कटु कषायं रुच्यं दीपनं पाचनं च। चोलीपूगं आन्ध्रदेशीयं कषायमधुरम्

अक्रान्ता—स्त्री. पु. बृहतीक्षुपे (र. मा.) तस्या गुणाः— उष्णवीर्या पाचनी सङ्ग्राहिणी च (चक्र. द. राज) कटु-तिक्तरसा उष्णा लघुः वातघ्नी ज्वरघ्नी अरोच-कामकासघ्नी श्वासहृद्रोगहरी च (रा. नि. व. ४)

हिं.—वरहण्टा, भटकटायी.

म.—क. डोरली, पांढरी वानभण्टी.

उत.—आक्रान्ति.

ते.—ब्राकुरुचेट्टु.

अक्लिका—स्त्री., नीलीवृक्षः (श. च. हिं—नीली.) सा द्विधा-नीली महानीली च गुणाः—कटुतिक्तोष्णा केश्या कासकफामघ्नी लघुः वातविषोदरगुल्मकृमि-ज्वरघ्नी च (रा. नि. व. ४) रेचनी मोहभ्रमाम-वातोदावर्तघ्नी च (भा. पू. १; भ. मद० १ व.)
" महानीली गुणाढ्या स्यात् रङ्गश्रेष्ठा सुवीर्यदा।
पूर्वोक्तनीलिका देश्या सगुणा सर्वकर्मसु
(रा. नि. व. ४)

अक्वथितक्षीर—न., आमदुग्धम् तत् श्लेष्मप्रकोपि गुरु च (वै. नि.)

अक्षकारका—स्त्री., घृतकुमारी (वै. नि.)

अक्षकाष्ठ—न., विभीतककाष्ठम् (च. द. पाण्डु. चि.)

अक्षगण—पु., श्रोत्रादीन्द्रियसङ्घातः

अक्षगन्धिनी—स्त्री., अतिबला (वै. नि.)

अक्षधर—पु., शाखोटवृक्षः (भूरिप्र.)

अक्षधूर्त (—र्तिल)—पु., हिं. वैला (हारा)

अक्षपाक—पु., संचललवणम् (वै. नि.)

अक्षपिण्ड—पु., शङ्खपुष्पी (वै. नि.)

अक्षपीड—पु., श्वेतवुन्हा श्वेतवुन्हामूलं (रसेन्द्र. चि. ९ अ)। दुरालभा (सु. चि. ९ अ)

अक्षपीडका(डा)—स्त्री., श्वेतवुन्हा (प. मु.) यवतिक्तलता (रा. नि. व. ३)

अक्षम—पु., स्थूलमूलकम्। वनचटकः (वै. नि.)

अक्षमा—स्त्री., अक्षान्तः। ईर्ष्या (श. र.)

अक्षर—पु., अपामार्गः (हे. च.)

अक्षर—नपुं., जलम्

अक्षरुचक—न., मृत्तिकालवणम् (वै. नि.)

अक्षवीर्यवत्—पु., श्वेतकरवीरः (वै. नि.)

अक्षशिरोधिजा—स्त्री., मन्यास्थशिरा (वै. नि.)

अक्षसस्य—न., कपित्थफलम् (वै. नि.) .

अक्षारलवण—न., अकृत्रिमसैन्धवादि। यथा—" गोक्षीरं गोघृतं चैव धान्यं मुद्गास्तिला यवाः। सामुद्रं सैन्धवं चैव अक्षारलवणं स्मृतम्। " (हारलता)

अक्षिक—पु., रञ्जनवृक्षः (रत्ना.)

अक्षिकूट—(कः) पु., ईषिकायाम् गजाक्षिपुटकम् (हे. च.)

अक्षिकूणित—न., अपाङ्गदृष्टिः

अक्षिगोल—पु., नेत्रतारकः

अक्षिच्छादन—न., अक्षिवर्त्म (रत्ना.)

अक्षिपक्ष्म—न., नेत्रलोमन्

अक्षिपञ्चक—न., श्रोत्रं त्वक् रसना नेत्रं नासा चेति (रा. नि. व. १८)

अक्षिपटल—न., नेत्रपटलम्

अक्षिपीलु—पु., महानिम्बः (वै. नि.)

अक्षिव—पु., शोभाञ्जनवृक्षः (हिं. शिग्रु) मरिचम् (रा. नि. व. ७) न., सामुद्रलवणम् (अ. टि. भ)

अक्षिविचूर्णित—न., अपाङ्गदृष्टिः (हे. च)

अक्षिहुण्डन—न., नेत्रव्युदासः (मा. नि. विज. र.)

अक्षेय—पु., रक्तार्कः। अर्कमन्दारः (वै. नि.)

अक्षोट—(कः) (की)—(पु., स्त्री.,) गिरिजपीलुः। आखोट इति हिमवति प्रसिद्धः

प्रा.—अक्रोड.

कों.—अखोड.

हिं.—खरोटनासपाती.

तत्पर्यायः—अक्षोटः, अक्षोटकः, आखेटः, पर्वत-पीलुः, कर्परालः, कन्दरालः, आक्षोडः (ख), आस्फोटकः इति (शा. र.)

गुणाः—मधुरः बल्यः स्निग्धोष्णः वातपित्तघ्नः रक्तदोषहरः शीतलः कफकोपनश्च (रा. नि. व. ११) मधुरं बल्यं गुरु उष्णं सारकं वातघ्नं च (मद. व. ६) अक्षोटकोऽपि वातादसदृशः कफपित्तकृत् (भा. मि.)

अक्षोडक—पु., अक्षोटवृक्षः (र. मा.)

अक्षोहार—पु., मधुखर्जूरी (वै. नि.)

अक्ष्य—न., सौवर्चललवणम्

अखट्ट—पु., पियालवृक्षः (हिं. चिरोञ्जी। **म. चारोळी**) गुणाः—कफपित्तास्रघ्नः, तत्फलगुणाः—मधुरं स्निग्धं बृंहणं वातपित्तघ्नं गुरु सरं ज्वरदाहतृष्णाहरं च।

तन्मज्ज– मधुरं हृद्यं वृष्यं वातपित्तहरं दुर्जरं स्निग्धं विष्टम्भि आमवर्धनं च। अस्य पक्वं फलम्-वृष्यं गौल्यं अम्लकं गुरु च। तद्बीजं–मधुरं वृष्यं पित्तदाहघ्नं च (रा. नि. व. ११) "चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु। स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम्। पियालमज्जा मधुरो वृष्यः पित्तानिलापहः। हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्धनः॥" (भा. आम्रादि-व.)

अखरोट–पु., अखोटः

अखल–पु., उत्तमवैद्यः (वै. नि.)

अखात–न., देवखातम् (हे. च. का. ४) पुष्करिणी (अम.)

अखिलिका–स्त्री., क्षुद्रकारवेली (हिं. करेली छोटी) कारवल्ली

अग–पु., पर्वतः (हिं. पहाड) अगो द्विविध आग्नेय-सौम्यभेदेन। तयोर्विन्ध्य आग्नेयः, हिमालयः सौम्यः। आग्नेयगिरिजान्यौषधानि अग्निगुण-भूयिष्ठानि, सौम्यगिरिजानि च सोमगुणभूयिष्ठानि। "आग्नेयाः विन्ध्यशैलाद्याः सौम्यो हिमगिरिः स्मृतः। अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः" (भा.) वृक्षः। सर्पः। सूर्यः (हे. च.)

अगज–पु., तुम्बुरुः। आर्द्रधान्यम् (हिं. आर्द्रधनिया) (मद.) विशेषस्तुम्बुरुशब्दः द्र० वन्दा

अगज–न., शिलाजतु (र. मा.)

अगदङ्कर–(ङ्कार) पु., वैद्यः (रा. नि. व. २०)

अगदनस्य–न., सर्पदष्टादौ नस्यविशेषम् (सु. कल्प.)

अगदाञ्जन–न., विषमूर्च्छितादौ अञ्जनम् (सु. कल्प.)

अगन्धिक–न., सौवर्चललवणम् (भा. मद.) द्र० सौवर्चलम्

अगरा (री)–स्त्री., देवदाली (अ. टी. भ) पीतदेवदाली (भा. रा. नि. व. ३) द्र० देवदाली

अगस्तिकुसुम–पु., बकपुष्पम् (त्रिका)

अगस्तिद्रु – पु., बकवृक्षम् (त्रिका.)

अगस्तिद्रुम ,, ,, ,,

अगस्त्यरस–पु., उदररोगघ्नरसः रस–गन्धक–जैपाल-बीज–लौह–शिलाजतु–ताम्र–हरिद्राणां प्रत्येकं सम-भागः एकत्र त्रिकटुभृङ्गराजार्द्रकनिम्बनिर्गुण्डी-स्वर्णुलीकाथैरेकवारं मर्द्यः। अनुपा. गुडहरीतकी, कम्पिल्लचूर्णं वा (र. सा. सं.)

अगाध–न., जलम् (हे. च. ४. का.) छिद्रम् (मे)

अगिर–पु., चित्रकवृक्षः। द्र० चित्रकः

अगुरुगन्ध–न., हिङ्गुः

अगुरुशिंशपा–स्त्री., शिंशपावृक्षः (हिं. शीसव) (अ. टी. स्वामी)

अगुरुसार–पु., कृष्णागुरुवृक्षः। द्र० कृष्णागुरुः। लौहम् (रत्ना. एकार्थः)

अगुरुसारा–स्त्री., शिंशपावृक्षः (भा.)

अगूढ–पु., श्वेतैरण्डः (हिं. एरण्ड) वैनि. द्र० एरण्डः

अगूढगन्ध–न., हिङ्गुः (रा. नि. व. ६) द्र० हिङ्गुः। पलाण्डुः। मृगनाभिः। लशुनः।

अगृद्धि–स्त्री., अनभिलाषः (वा. चि. ७; अ. १०८)

अगौकस्–पु., शरभः। पक्षी। सिंहः (मे.)

अग्निक–पु., इन्द्रगोपकीटविशेषः (सुमिश्र) (हेच ४ का) चित्रकवृक्षः (वा. चि. ७. अ.) भल्लातकवृक्षः (भा. पू. १; भ. ह. व.)

अग्निकर्णी–स्त्री., वृक्षविशेषः (वै. नि. २; भ. अभिन्यासज्वरचि.)

अग्निकाष्ठ–न., अगुरुः। अग्निकाष्ठं करीरे स्यात् (रा. नि. व. २३) शमीकाष्ठम् (रा. नि. व. १२)

अग्निकुमारलौह–न., प्लीहाधिकारः रसयोग०। रामठं हिङ्गु। तुत्थहिङ्गुटङ्कणसैन्धव-धान्यजीरकयमानी-मरीचशुण्ठीलवङ्गैलाविडङ्गानां प्रत्येकं १ तो. लौहं सर्वसमं, रसस्य ४ तो, गन्धकस्य च ४ तो,। अनु-पानं घृतं मधु च (र. सा. सं ३३४ योग०)

अग्निगर्भ–पु., अग्निजारवृक्षः (रा. नि. व. ६)

अग्निघृत–न., अग्निमान्द्ये घृतम्। घृतं ४ श. पिप्पल्यादि कल्कद्रव्यं प्रत्येकं ४ तो. दधि ४ श. काञ्जिकं ४ श. शुक्तं ४ श. आर्द्रकरसः ४ श। एभिः यथा-विधि घृतं पचेत् (च. द. अग्निमा. चि.) पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली। हिङ्गु चव्याज-मोदे च पञ्चैव लवणानि च, द्वौ क्षारौ हपुषा चैव दद्यादर्धपलोन्मितम्। दधिकाञ्जिकशुक्तानि स्नेह-मात्रासमानि च। आर्द्रकस्य रसप्रस्थं घृतप्रस्थं विपाचयेत्। इति पाठः

अग्निचूड–पु., ताम्रचूडपक्षी (दा. हिं. कोमडा, हिं—मुर्गा) स द्विविधः वन्यग्राम्यभेदेन। तयोर्ग्राम्यः– बृंहणः, वृष्यः, बल्यः, गुरुः, शुक्रकफकृत्, स्निग्धः, उष्ण-वीर्यः, कषायरसश्च। आरण्यः— स्निग्धः, बृंहणः,

श्लेष्मलः, गुरुः, वातपित्तक्षतवमिविषमज्वरनाशकश्च (भा.) तन्मासम् हृद्यं श्लेष्मघ्नं लघु च (रानिव ११) रूक्षं स्वादु कषायं शीतलं च (राज.)

अग्निज-पु., अग्निजारवृक्षः (रा. नि. व. ६) भल्लातकः सुवर्णम्। मांसधातुः

अग्निजननी-स्त्री., भैषज्यमेतदग्निमान्द्योपशमनम् (रस. चि) "पलैकं मूर्छितं सूतं मरिचं हिङ्गुजीरकम्। प्रतिकर्षं वचां शुण्ठीं तत्सर्वं मार्कवद्रवैः। दिनं पिष्ट्वा लिहेन्माषं मधुना वह्निदीप्तये। कर्षैकं भक्षयेच्चानु दाडिमं नागरं गुडैः" मार्कवद्रवैः भृङ्गराजरसैः (प्रयोगा.)

अग्निजातज-पु., अग्निजारवृक्षः (रानिव. ६)

अग्निजिह्विका-स्त्री., लाङ्गलीवृक्षः (रत्ना.) (हिं.-करिहारी) गुणाः-सरा, तिक्ता, कटुका, तुवरा, तीक्ष्णा, उष्णा, पित्तला, सक्षारा, गर्भपातिनी, कुष्ठशोफार्शोव्रणशूलश्लेष्मकृमिजित्, कफवातघ्नी अन्तःशल्यनिष्कासनी च (भापू. १ भगुव)

अग्नितुण्डीरस-पु., अजीर्णाधिकारे रसयोग०। "शुद्धसूतं विषं गन्धमजमोदा फलत्रिकम्। सर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम् सौवर्चलं विडङ्गानि सामुद्रं त्र्यूषणं तथा। विष-मुष्टिसमं सर्वं जम्बीराम्लेन मर्दयेत्। मरिचाभां वटीं खादेत् वह्निमान्द्यप्रशान्तये॥" अत्र वह्निश्चित्रकः, अजमोदा यवानी। विषमुष्टिः, महानिम्बः, अस्य त्वक् पत्रं वा सर्वसमम् (रसासं. १३३ योगः) द्वितीयः-अमृतवरावटकमरिचैर्द्विपञ्चनवभागिकैः कृतैः क्रमशः। वटिका मुद्गसमाना कफपित्ताग्निमान्द्याजीर्णहरा॥ अत्र लिम्पाकरसैर्वटिका कार्या। प्रयोज्या अजीर्णे। अमृतवटीति (भैष.)

अग्निदमनक-पु.,

अग्निदमनी-पु., स्त्री., क्षुद्रकण्टकवृक्षविशेषः। गणिकारीति प्रसिद्धा। दुरालभाभेदः (म. धमासाभेद. अग्निदवणा) (वै. नि.) अस्याः पर्यायाः- वह्निदमनी बहुकण्टका, वल्लिकण्टकाडिका, गुच्छफला, क्षुद्रफला, क्षुद्रकण्टकारी, क्षुद्रदुस्पर्शा, क्षुद्रकण्टकारिका, मर्त्येन्द्रमाता, दमनी। गुणाः-कटूष्णरूक्षत्वं, रुचिकरत्वं, अग्निदीपकत्वम् (रानिव ४) वातगुल्मकफघ्नत्वं प्लीहघ्नत्वं च (वै. नि)

अग्निदीपन-पु., वरुणवृक्षः (भापू १ भ)

अग्निपत्री-स्त्री., अग्निवती इति लोके

अग्निपाली-पु., चित्रकक्षुपम् (मद. २ व)

अग्निप्रस्तर-पु., अग्निजनकपाषाणः म.—गारगोटी

अग्निबलवृद्धि-स्त्री., जठरानलस्य वृद्धिः (च. द. अर्श चि.)

अग्निबीज-न., सुवर्णम् (त्रिका)

अग्निबीज-पु., अग्निमन्थः

अग्निभ-पु., सुवर्णम् (रानिव. १३)

अग्निभा-स्त्री., ज्योतिष्मतीलता (हिं.-कवुइ) द्र० ज्योतिष्मती

अग्निभु-न., स्वर्णम् जलम्

अग्निमणि-पु., सूर्यकान्तमणिः

अग्निमय-पु., श्वेतवृद्धदारकः (वैनिं.) श्वेतबुह्रा

अग्निमुखचूर्ण-न., अग्निमान्द्ये हितम्। हिङ्गु १ भा. वचा १ भा. पिप्पली ३ भा. शुण्ठी ४ भा. यमानी ५ भा. हरीतकी ६ भा. चित्रकः ७ भा. कुष्ठं (भा. च. द. अग्निमा. भि. प्रयोगा.। अजीर्णे। भैष.। सा. कौ.) अन्यत्स्वल्पं बृहच्च उदरे (सा. कौ. रस. र)

अग्निमुखताम्र-पु., रसोऽयमम्लपित्ताधिकारे प्रशमनः। "गन्धकेनाक्षमात्रेण सूततुल्येन निर्मिता। कज्जली या तया लेप्यं ताम्रपत्रं तु तत्समम्। अर्जुनत्वग्रसैः साधं पक्वोदुम्बरपल्लवे। आच्छाद्य कृष्णलवणैश्चूर्णैश्चापि च मृण्मये। अन्धमूषागतं ध्मातं तत्सिद्धं भक्षयेन्नरः। शाणकं रक्तिकावृद्ध्या मासमात्रं प्रयोगतः। अम्लपित्तं क्षयं शूलं जरत्पित्तं सुदारुणम्। सप्तरात्रप्रयोगेण शरीरं निर्मलं भवेत् (रस. र.) पञ्चलवणैरिति प्रयोगः

अग्निमुखमण्डूर-न., शोथाधिकारे। मण्डुरस्य १२ प गोमूत्रस्य १२ श.। प्रक्षेपार्थं-पञ्चकोलं देवदारु मुस्तकं त्रिकटु त्रिफला विडङ्गश्च। प्रत्येकं चूर्णं १ प.। मात्रा १ तो.। अनु० तक्रम् (भैष)

अग्निमुखरस-पु., रसोऽयं शूलरोगोपशमनः (र. स.। र. सा. सं. २८२; योगः)

अग्निमुखलवण-न., अग्निमान्द्ये हितम्। अत्र-चित्रकमूलं, त्रिफला, दन्तीमूलं, त्रिवृन्मूलं कुष्ठम्; एषां प्रत्येकं चूर्णं समं सर्वसमं सैन्धवमेकत्र स्नुहीक्षीरैः सम्भाव्य तत्काण्डमध्ये दत्वा पङ्केनालिप्य मृदावग्नौ क्षिपेत् (भैष)

अग्निमुखलौह–पु., न., अर्शसि हितः । त्रिवृन्मूलादीनां ८ पलम् (रसेन्द्र. । च. द. अर्शः चि)
द्र० 'अग्निलौह'
अग्निरजस्–पु., इन्द्रगोपकीटः
अग्निरज्जु– (हे. च. ४)
अग्निरुहा–स्त्री., मांसरोहिणी (रानिव १२)
अग्निलौह–पु., अग्निमुखापरनामकोऽर्शोघ्नोऽयं रसः (रस. र. अर्शःचि.)
अग्निपक्त्र–पु., भल्लातकवृक्षः (मद. व. १) चित्रकक्षुपः
अग्निवती–स्त्री., आगिया इति लोकप्रसिद्धौषधिविशेषः
अग्निवर्धक–वि., अग्निदीपकं आग्नेयद्रव्यं अग्न्युद्दीपकम् आग्नेयद्रव्यमात्रे मरिचादौ (मरिचादि) (राज)
अग्निवल्ली–स्त्री., लताविशेषः (रसासं)
अग्निवाह–(हः, पु., धूमः (हे. च. ४ का)
अग्निविकार–पु., तन्नामकरोगभेदः स चतुर्भेदः (शार्ङ्ग. पू. ७ अ) द्र० अग्निः
अग्निवर्धन–वि., अग्निवर्धनं, यमानी
अग्निवृद्धि–स्त्री., अग्निदीप्तिः
अग्निशिख–न., सुवर्णम् (रा नि. व. १३)
कुसुम्भपुष्पम् । कुङ्कमम् (भा. पू., २. भ.; मद. व. ३)
अग्निशिखा–स्त्री., लाङ्गलिकौषधिः (हिं. करिहारी, भा. पू. १ भ. गु. व)
अग्निष्ठ–पु., तण्डुलादिभर्ज्जनार्थं निर्मितं लौहमयपात्रम् ।
अग्निसंस्कार–पु., अग्निदाहकर्म
अग्निसंस्पर्शा–स्त्री., पर्पटीनामसुगन्धद्रव्यम् । सा चोत्तरदेशे प्रसिद्धा (भा. पू. १ भ. क. व.)
अग्निसन्दीपन–वि., अग्निवर्धकं नाम अग्निदीपनम्
अग्निसन्दीपनरस–पु., अग्निमान्द्ये रसः (२ भा.; ४ भा.; भैष.)
अग्निसहाय–पु., वन्यपारावतः । (रानिव–१९) वायुः
अग्निसाध्य–वि., अग्निदाहसाध्यः (च. द. अर्शः-चि.)
अग्निसारा–स्त्री., फलशून्यशाखा (रानिव. २) मञ्जरी
अग्निसुन्दररस–पु., अजीर्णाधिकारे रसः । यथा–टङ्कणं भागमेकञ्च मरिचञ्च द्विभागिकम् । आर्द्रकस्य रसेनैव भावना चात्र दीयते '॥ अनु. लवङ्गम् । (प्रयोग०)
अग्निसेवन–न., अग्निसेवा । गुणाः–तदिदं शीतवातस्तम्भ-कफवेपथुघ्नं रक्तपित्तकरं आमाभिष्यन्दपाचनं च (मद. १३ व.)

अग्निहानि–स्त्री., अग्निमान्द्यम् (वा. नि. १३ अ.)
अग्निहोत्र–पु., घृतम् अग्निः च (मे)
अग्न्या–स्त्री., तित्तिरपक्षी गौः (हला.).
अग्न्याशय–पु., पक्वाशयः
अग्रकाण्ड– पु., काण्डाग्रम्
अग्रजङ्घा–स्त्री., जङ्घाग्रभागः (हे. च.)
अग्रधान्य–न., धान्यविशेषः
अग्रपर्णी–स्त्री., शूकशिम्बी (प. मु.) द्र० आत्मगुप्ता अजलोमवृक्षः (र.)
अग्रपाणि–पु., हस्ताग्रम्
अग्रपुष्प–पु., वेतसवृक्षः (प. मु.)
अग्रवीज–पु., वीजाग्रवृक्षमात्रम् । यथा कुरण्टादिः (हे. च.)
अग्रमांस–न., हृदयम् । बुक्क । हृदयान्तर्गतमांसवृद्धि-रूपरोगविशेषः (सु. शा.)
अग्रलोड्य–पु., चिञ्चोटकक्षुपः । सोऽयम् गुरुपाकः, शीतलः, अजीर्णकरश्च (राज.)
अग्रलोहिता–स्त्री., चिल्लीशाकम् (रानिव. ७)
अग्रव्रीहि–स्त्री., प्रसाधिका (र. मा)
अग्रहायण–पु., मार्गशीर्षमासः
अग्रिमा–स्त्री., लवलीवृक्षः । इति गौडे (श. च.)
अग्रु–स्त्री., अङ्गुली
अघन–न., दधि (हला)
अघविष–पु., सर्पः
अघाट–पु., अपामार्गः (रा.)
अघ्ना–स्त्री., गौः
अघ्न्या–स्त्री., स्त्रीगौः
अघोरनृसिंहरस–पु., सान्निपातिकज्वरे रसः । द्र० 'घोरनृसिंहरसः'
अङ्कतिः–पु., वायुः (त्रि) अग्निः, पु., (वि)
अङ्कन–पु., अङ्कोटवृक्षः
अङ्कपाली–स्त्री., धात्री । वेदिकाख्यगन्धद्रव्यविशेषः 'धात्रीवेदिकयोरपि' (मे. लचतुष्कम्) आलिङ्गनम् (मे.)
अङ्कलेख्य–पु., चिञ्चोडवृक्षः
अङ्कश–पु., क्रोडस्थबालकः
अङ्का–(ङ्क)–स्त्री., मृदङ्गविशेषः (शब्दर.)
अङ्कुर–पु., प्ररोहः (ता. उ. ३६ अ) अस्य पर्यायाः—अभिनवोद्भिद् (अ)। उद्भिदः, पुरोद्भः, अंकुरः

(रा) रोहः (ह)। जलम्। रुधिरम्। लोमन्। मुकुलम्। फलम् (सर्वत्र मे. रत्रिकम्) अभिनवोद्भिदम् (मे)

अङ्कुरक-पु., पक्षिवासस्थानम्।

अङ्कोटक-पु., स्वनामख्यातवृक्षः (हिं. ढेरा भा। रा. नि. व. ९) अस्य पर्यायाः—निकोचकः (अ) निकोठकः (भ), अङ्कोलकः, बोधः, नेदिष्ठः, (दीर्घकीलकः (ज) अङ्कोठः, रामठः (र) कङ्करोलः, धलण्डः दृढकण्टकः (श), कोठरः, रेची, गूढपत्रः, गुप्तस्नेहः, पीतसारः, मदनः, गूढ वल्लिका, पीतः; ताम्रफलः, दीर्घकीलः, गुणाढ्यकः, कोलकः, लम्बकर्णः, गन्धपुष्पः, रोचनः, विशालतैलगर्भः। अस्य गुणाः—कटुः, तीक्ष्णः, स्निग्धः उष्णः, तुवरः, लघुः, रेचनः, कृमिशूलामशोफश्लेष्मविषघ्नश्च। तत्फलगुणाः—शीतलं, स्वादु, श्लेष्मलं, बृंहणं, गुरु, बल्यं, विरेचनं, वातपित्तदाहक्षयास्रजिच्च (मद. व ११।) विषलूतादिदोषनुत् वातकफहरं शुद्धिकृच्च (रा. नि. व. ९।) (च. द. अ. सा. चि.)

अङ्कोठवटक-पु., रक्तातिसारे देयवटकः। यथा— पलमङ्कोठमूलस्य पाठां दार्वीञ्च तत्समाम् पिष्ट्वा तण्डुलतोयेन वटकानक्षसंमितान्॥ छायाशुष्कांश्च तान् कुर्यात् तेष्वेकं तण्डुलाम्बुना। पेषयित्वा प्रदद्यात्तं पानाय (भा. म. ख.)

अङ्कोलफलसङ्काश-पु., फलविशेषः इति लोके

अङ्गगौरव-न., शरीरगुरुत्वम् (वा. नि. १३ अ)

अङ्गघात-पु., अङ्गाघातः

अङ्गचय-पु., गुदवृषणयोर्मध्यभागः (वै. नि.)

अङ्गचेष्टा-स्त्री., अङ्गचालनम् (वा. नि. १५ अ)

अङ्गज-न., रक्तम्, मलम् (मे.)

अङ्गज-पु., केशः, रोगः मांसधातुः मदः (वि.)

अङ्गज्वर-पु., राजयक्ष्मा

अङ्गण-न., अङ्गनभूमिः

अङ्गताप-पु., शरीरोष्णता

अङ्गति-पु., वायुः। अग्निः (श.)

अङ्गदरण-न., पित्तजन्यपीडा

अङ्गदाह-पु., गात्रदाहः

अङ्गना-स्त्री., नारी (मे. नत्रिकम्) प्रियङ्गुः (भा.)

अङ्गनाप्रिय-पु., अशोकतरुः (र. मा.) द्रुमोत्पलम् (प. मु.)

अङ्गनाप्रिया-स्त्री., प्रियङ्गुनामगन्धद्रव्यम् (भा. पू. १ भ. क. व.)

अङ्गपाकता-स्त्री., पितजन्यरोगः तल्लक्षणम्

अङ्गपीडा-स्त्री., वायुजन्यरोगः तल्लक्षणम् वा

अङ्गपूजित-पु., अश्वतरः (मद. व. व. १२)

अङ्गप्रसारण-न., कायविस्तारः (वा. नि. ४ अ)

अङ्गवली स्त्री., त्रिबली

अङ्गभङ्ग-पु., शरीरस्य भङ्गः (वाउ २ अ) गुदवृषणयोर्मध्यभागः, रोगः, वायुरोगः

अङ्गभेद-पु., वायुरोगः

अङ्गमर्दन-न., गात्रमोटनम्

अङ्गमेजयत्व-न., अङ्गकम्पनम्

अङ्गरक्त-पु., कम्पिल्लके (अम)

अङ्गरक्षिणी-स्त्री., अङ्गत्राणम्

अङ्गरुहा-स्त्री., लोमन्, केशः

अङ्गलाघव-न., कायलघुत्वम् (वा. उ. १९ अ.)

अङ्गलेप-पु., चन्दनादिद्रव्यम्

अङ्गलोड्य-पु., आर्द्रकः, चिञ्चोटकतृणम्

अङ्गव-पु., शुष्कफलम् (श. च)

अङ्गवस्त्रोत्था-स्त्री., श्वेतयमानी

अङ्गविकृति-पु., अपस्माररोगः (रानि व २०)

अङ्गविक्षेप-पु., अङ्गहारः। अङ्गचालनम् (वा. उ. २ अ.)

अङ्गविभ्रंश-पु., कायशैथिल्यरूपवायुजरोगः (भा.)

अङ्गशोथ-पु., कायशोफः

अङ्गशोष-पु., वायुजरोगविशेषः

अङ्गशोषण-न., अङ्गस्य शुष्कता (वा. उ. ३ अ.)

अङ्गसङ्ग-पु., मैथुनम्

अङ्गसुन्दर-पु., दद्रुघ्नवृक्षः (अम.)

अङ्गसुप्ति-स्त्री.. कायस्पर्शाज्ञता, शरीरस्वापः

अङ्गसेन-पु., अगस्तिद्रुमम् (रत्ना.)

अङ्गहर्ष-पु., रोमाञ्चः (वा. नि. ३ अ.)

अङ्गहार-पु., अङ्गचालनम्

अङ्गहीन-वि., विकलाङ्गः काणादिः।

अङ्गारक-पु., कुरुण्टकः। अङ्गारः (मे. कचतुष्कम्) भृगराजः (रा. नि. व. ४; भा. पू. १ भ. गु. व.)

अङ्गारकतैल-न., स्वनामख्यातविषमज्वरघ्नतैलविशेषम् (रस. र. च.द.; च. द. व्रणशो. चि)

अङ्गारकमणि-पु., प्रवालम् (रा. नि. व १३)

अङ्गारकर्कटी-स्त्री., रोटिका (अगाकडी, रोटी, लिटी इति हिन्दी) (वै. नि, भा.)

अङ्गारकुष्ठका–स्त्री., हितावली
अङ्गारधानिका–स्त्री., अङ्गारधारणपात्रम्
अङ्गारधूप–पु., अङ्गारेण यो धूपो हिङ्ग्वादिना प्रसिद्धः (वा. चि. ८ अ)
अङ्गारपरिपाचित–न., शूलादिपक्वमांसम् (वि.) अङ्गारपक्वम्
अङ्गारपर्णी–स्त्री., भार्गी (र सा सं)
अङ्गार–(क) पुष्प (पु.) जीवपुत्रद्रुमम् । जियापुता-इति लोके (श. र.)
अङ्गारपूरिका–स्त्री., रोटकः
अङ्गारमञ्जरी–स्त्री.,
अङ्गारमञ्जी–स्त्री., करञ्जविशेषः (श. र.) महाकरञ्जः (रा नि व. ९)
अङ्गारमणि–पु., प्रवालम्
अङ्गारवर्णी–स्त्री., भार्गी
अङ्गारवल्लरी–स्त्री., करञ्जविशेषः
अङ्गारवल्ली–स्त्री., महाकरञ्जः रक्तकरञ्जश्च । भार्गी (वा. सू. १५ अ) सुरसादि (भा. पू. १. भ) गुञ्जा (भा. पू. अने. व.) कटुकरञ्जः । करञ्ज वल्ली रक्तगुञ्जा (भा. पू. १ भ. गु. व.)
अङ्गारवृक्ष–पु., इङ्गुदीवृक्षः (भा. पू. १ भ. वटा. रत्ना.) पूतञ्जिया इति च
अङ्गारवेणु–पु., रक्तवर्णविशेषः
अङ्गारशकटी–स्त्री., चुल्ली
अङ्गारा–स्त्री., हितावली इङ्गुदीवृक्षः (प. मु.)
अङ्गारिका–स्त्री., इक्षुकाण्डम् किंशुककोरकम् (मे. कचतुष्कम्)
अङ्गारित–न., कंञ्चुक । पलाशकलिकोद्गमः (हारा.)
अङ्गारिता–स्त्री., लतामात्रम् । चुल्ली (मे. तचतुष्कम्)
अङ्गिका–स्त्री., कञ्चुकः
अङ्गुण–पु., वार्ताकी (श. र.)
अङ्गुरि (री)–स्त्री., अङ्गुली पाणिपादाङ्गुली (अ. टी.)
अङ्गुरीय–पु., न., अङ्गुरीयकः
अङ्गुलिकण्टक–पु., नखम्
अङ्गुलितोरण–न., ललाटे चन्दनाद्यङ्कितोऽर्द्धचन्द्रचिह्न-विशेषः
अङ्गुलिपञ्चक–न., कराङ्गुलिपञ्चकं-यथा, अङ्गुष्ठतर्जनी-मध्यमानामिकाकनिष्ठम्
अङ्गुलिफला–स्त्री., श्वेतनिष्पावः (रा. नि.)

अङ्गुलिमान–न., अङ्गुल्या योजनपर्यन्तमानम् । ८ यवैः १ अङ्गुलिः । २४ अङ्गुलिभिः १ हस्तः । ४ हस्तैः १ दण्डः । २००० दण्डैः १ क्रोशः । ४ क्रोशैः १ योजनम् । इति
अङ्गुलिमुख–न., अंगुल्यग्रभागः
अङ्गुलिमोटन–न., अङ्गुलिमर्दनजशब्दः (त्रिका.)
अङ्गुलिसंज्ञा–स्त्री., यवागुः
अङ्गुलिसम्भूत–पु., नखम् (रा. नि. व. १८)
अङ्गुष–पु., नकुलः । बाणः
अङ्गुष्ठाना–स्त्री., अङ्गुष्ठम् अङ्गुलित्राणकम्
अङ्घालजी–स्त्री., अन्धालजीरोगः । द्र० अन्धालजी
अङ्घ्रिग्रन्थिक–न., पिप्पलीमूलम्
अङ्घ्रिजिह्विक–पु., दमनकवृक्षः
अङ्घ्रिनामक–(नामन्)–पु., दमनकवृक्षः । वृक्षमूलम् (रा. नि.व. २ । अम)
अङ्घ्रिप–पु., वृक्षः (रानिव. २ । हला)
अङ्घ्रिपर्णिका–स्त्री., पृश्निपर्णी
अङ्घ्रिपर्णी (भा.पू. १ गु. व)
अङ्घ्रिवल्लि (का)–स्त्री., पृश्निपर्णी (अ.टी.र.)
अङ्घ्रिवल्ली ,, ,, ,, ,,
अङ्घ्रिष–पु., तन्नामकतालुरोगः द्र० अध्रुष
अङ्घ्रिसन्धि–पु., पादगुल्फः
अङ्घ्रिस्कन्ध–पु.,गुल्फः (हे. च)
अङ्घ्य–पु., पादगुल्फः
अचलत्विद्–पु., कोकिलः (श. च)
अचिकुर–पु., चिकुराभावो नाम निष्केशता; खालित्यम्ः
अचिन्त्यज–पु., पारदः (रानिव. १३)
अचिन्त्यशक्तिरस–पु., रसोऽयं नवज्वरे प्रयोज्यः (भैष. ज्व. चि.)
अचिन्त्यात्मन्–पु., परमात्मा
अचिरपल्लव–पु., सप्तपर्णवृक्षः (प. मु.)
अचिरप्रभा–स्त्री., चपला
अचेल–वि., वस्त्रहीनः
अचैतन्य–वि., चैतन्यरहितः
अच्छभल्ल (ल्लुकः)–पु., भल्लकः (रा. नि. व. १९ रत्ना)
अच्छर्दिका–स्त्री., वान्तिः (रा. नि. व २०)
अच्छल–पु., तिलकल्कः
अच्छिन्नपत्र–पु., शाखोटवृक्षः युक्तपत्रवृक्षमात्रः
अच्छुक–पु., तन्नामकरञ्जनपुष्पवृक्षः, तिनिशवृक्षः (प. मु.)

अजका–स्त्री., अजागलस्तनम् । छागपुरीषम् । तन्नामककृष्णगतशोणितजनेत्ररोगविशेषः । आताम्रपिच्छिलास्रस्रुदाताम्रपिटिकातिरुक् । अजाविट्सदृशोच्छ्रायकार्ष्ण्या वर्ज्यासृजाऽजका (वा. उ. १० अ)

अजकेशी–स्त्री., नीलीवृक्षः (वै. नि. ।)

अजक्षीर–न., छागदुग्धम् (वा. उ. १६ अ) द्र० 'छागदुग्धम्'

अजक्षीरनाश–पु., शाखोटवृक्षः (रा. नि. व. ९)

अजगन्धिका–स्त्री., वनयमानी । क्षेत्रयमानी (अम. रत्ना.) तत्पर्यायाः–बस्तगन्धा, खरपुष्पा, अविगन्धिका, उग्रगन्धा, ब्रह्मगर्भा, ब्राह्मी, पूतिमयूरिका । गुणाः–कटुः, तीक्ष्णा, रूक्षा, हृद्या, अग्निवर्धनी, दृष्टिह्रासकरी, लघुः, शुक्रवातकफघ्नी च (मद. व. १) वनतुलसी । हिं–ववरी, ववइ । तिलौणि (मद.) रानतुळस, तिळवण, (रा. नि. व. ४) गुणाः–लघुः, रूक्षा, हृद्या, वातकफघ्नी च (मद. व. १) वनयमानी (च. द. वि. ज्व.) " नीलिनीमजगन्धाञ्च।" फोफान्दी, वनयमानीति (च. सू. ४ अ- च. सू. २ शिरो वि. । वाचि. १५ अ.; उ. २२ अ)

अजगन्धिनी–स्त्री., मेषशृङ्गी (र. मा.)

अजघोष–पु., त्रयोदशविधसन्निपातज्वरान्यतमसन्निपातज्वरः । लक्षणम्–छगलकसमानगन्धः स्कन्धरुजावान्निरुद्धगलरन्ध्रः । अजघोषसन्निपातादाताम्राक्षः पुमान्भवति (भा. म. १ भ)

अजडाफल–न., शुकशिम्बीफलम् (चचि २ अ) कपिकच्छुः (भा. पू. गु. व.) कुमरिचम् (अत्रि.)

अजथ्या–स्त्री., स्वर्णयूथिका । छागसमूहः

अजनामक–न., माक्षिकम् (हे. च.)

अजन्तुजग्ध–त्रि., अकीटभक्षितः (च. द. अ. सा. चि.

अजप्रिया–स्त्री., बदरीवृक्षः (भा. पू. १ भ. फ. व)

अजबला–स्त्री., कृष्णतुलसी

अजभक्ष–पु., बर्बुरीवृक्षः (रा. नि. क्षा.) क्षुद्रदुरालभा (रा. नि. व. ४)

अजमल–पु., गोधूमः (प. मु.)

अजमांस–न., छागमांसम् । द्र० छागमांसम् (वा. सू. ६ अ.)

अजमोदाख्या–स्त्री., वनयमानी । क्षेत्रयमानी (रत्ना.) बृहल्लवङ्गादिचूर्णम् । यमानी (रा. नि.)

अजमोदाद्यवटक–पु., आमवाते हितः । अत्रयमान्यादिचूर्णं प्रत्येकं १ पलं, शुण्ठ्याः १० पलानि, वृद्धदारकस्य १० पलानि, हरीतक्याः ५ पलानि, सर्वचूर्णसमं च गुडं दत्वा एकत्रं विमिश्रयेत् (च. द. आ. वा. चि.)

अजम्भ–पु., भेकः (श. र.)

अजया–स्त्री., विजया (भङ्गा, सिद्धिरिति भाषा) (रा. नि.)

अजर–न., स्वर्णम् (रा. नि. व १३) (–वि.,) जरारहितः

अजरक–न. अजीर्णम् (सि. यो. कास-चि. वृद्धः । च. द. पाण्डु-चि. योगराजे)

अजलम्बन–न., यामुनस्रोतोऽञ्जनम् (श. च.)

अजलोमा–(मी)–पु., शूकशिम्बी (र. मा.) द्र० आत्मगुप्ता । महौषधिविशेषः द्र० औषधिः ।

अजवल्ली–स्त्री., मेषशृङ्गी

अजशृङ्गिका–स्त्री., (भा. पू. १ भ. गु. व. ३७१) तिक्तशाकगणीयस्वनामख्यातवृक्षः (रा. नि. व. ९ । सु. सू. ३८अ। मद. व. १। भा. पू. १ भ. गु. व. । सु. सू. ३७ड। भा. ४भ. रेवती ग्रह-चि । सु. सू. ३८ अ) वल्लीपञ्चके (वाचि. ८अ । भा. पू. २भ अने. व.)

अजश्री–स्त्री., फटिकारिका (मा. नि)

अजहा–स्त्री., शुकशिम्बी (अ. टी)

अजाक्षी–स्त्री., काकोदुम्बरिका (रा. नि. व. ११)

अजागर–पु., भृङ्गराजवृक्षः । (श. र) महासर्पः

अजाजिक(का)–पु., पीतजीरकः (रा. नि. व ६)

अजातक्र–न., छागीतक्रम् गुणाः–अजातक्रं लघु स्निग्धं दाहगुल्मार्शोनाशनम् । त्रिदोषशोथग्रहणीपाण्डुरोगहरं परम् (वै. नि)

अजातदन्त–स्त्री., मासषट्कातीतेऽपि यस्य शिशोर्दन्तोद्गमो न भवति

अजादुग्ध–न., छागदुग्धम्

अजानय–पु., उत्तमाश्वः (जयदत्तः)

अजानेय–पु., उत्तमाश्वः (जयदत्तः)

अजापक्व–न., पक्वघृतविशेषः

अजापञ्चकम्–न., यक्ष्मरोगे घृतम् । छागघृतं ४ श. छागविष्ठारसः ४ श. छागीदुग्धं ४ श. छागदधि ४ श. छागमूत्रं ४ श. तत्र प्रक्षेपः यवक्षारः ८ पलं, यथाविधि च सर्वमिदं पाच्यम् (च. द. यक्ष्म-चि. ; भैष.)

अजाप्रिया–स्त्री., बदरीवृक्षः (भा. फ. व.)

अजामांस-न., छागमांसम्; गुणाः-लघुः स्निग्धं किञ्चिच्छीतं रुचिप्रदं मधुरं पुष्टिकृद्बल्यं वातपित्तघ्नं च (वै. नि.)

अजाविष्-स्त्री., छागविष्ठा (वा. उ. १० अ.)

अजाह्वा-स्त्री., आत्मगुप्ता (अ. टी. भ.) द्र० अजहा

अजिततैल-न., नेत्ररोगे हितं तैलम्। तिलतैलम् अर्धशरावकं मतान्तरे शरावकम्। आमलकीरसः (४ श. दुग्धं ४ श.) कल्कार्थं यष्टिमधु पलमितम् (च. द. नेत्ररोग-चि.) "अकल्कोऽपि भवेत्स्नेहः यः साध्यः केवले द्रवे। स्नेहपाकविधौ यत्र प्रमाणं नेरितं क्वचित्। स्नेहस्य कुडवं तत्र पचेत् कल्कपलेन तु॥" इति (प. प्र.)

अजिनपत्रा-स्त्री., चर्मचटी (रा. नि. व. १९)

अजिनपत्रिका-स्त्री., चर्मचटी (हे. च.) पेचकः

अजिनपत्री-स्त्री., जतुका (रा. नि. व. १९)

अजिनयोनी-पु., हरिणः (प. मु.)

अजिह्म-पु., भेकः (त्रिका)

अजीगर्त-पु., सर्पः

अजीर्णकण्टकरस-पु., रसोऽयमजीर्णे प्रयोज्यः (र. स. र. । र. सा. सं.) (सा. कौ. । भा. । भैष)

अजीर्णजरण-पु., कर्चूरः द्र० कर्चूर

अजीर्णिन्-त्रि., अजीर्णरोगयुक्तः

अजेय-पु., अर्जुनवृक्षः (वै. नि.)

अज्झटा-स्त्री., भूम्यामलकी (हिं-भुइ आम्बरा) (भा. पू. १ भ. गु. व.)

अज्झल-पु., कोकिलः

अञ्चक-न., नेत्रम् (रा. नि. व. १८)

अञ्जन-पु., गृहगोधिका

अञ्जन-पु., ज्येष्ठी नाम प्राणिविशेषः

अञ्जनकर्मन्-न., नेत्रप्रसाधनम्। शुर्मा इति पश्चिमदेशे। "अञ्जनं क्रियते येन तद्द्रव्यं चाञ्जनं स्मृतम्" (भा. पू. ख. २ भ) कज्जलं (हे. च. । सि. यो. कामलाचि. रक्तपित्तचि) स्रोतोऽञ्जनं (भा। सुचि. २५अ) रसाञ्जनं (च. द. अ. सा. चि प्रियङ्ग्वादिः (रक्तपित्ता चि. च ३ अ) प्रदेहषट्के, स्तम्भनयोगे च। (भा बालचि) सौवीराञ्जनं (वा. सू. १५ अ) अञ्जनादिः (सु सू. ३८ अ) द्र० अञ्जनविधि

आ. को. पू. २

अञ्जनकेशिका-स्त्री., हट्टविलासिनीनामकगन्धद्रव्यम् उत्तरदेशे प्रसिद्धं नालिकानामगन्धद्रव्यम् (भा. पू. १; भ. क. व.)

अञ्जनकेशी-स्त्री., नलिका नाम गन्धद्रव्यम् (भा. पु. १ भ. क. व.)

अञ्जनगुडिका-स्त्री., विसूचिकायामौषधविशेषः। गुडपुष्परसः, अपामार्गबीजं, अपराजितामूलं, हरिद्रा-त्रिकटु च। ततः अञ्जनं कर्तव्यम् (च. द. अग्निमान्द्यचि.)

अञ्जनत्रय(त्रितयम्)-न., कालाञ्जनस्रोतोऽञ्जनरसाञ्जनं च "कालाञ्जनसमायुक्तं स्रोतोऽञ्जनरसाञ्जनेषु" (रा. नि. व. २२)

अञ्जनभैरव-पु., सांनिपातिकज्वरे रसः। यथा, "सूततीक्ष्ण-कणा-गन्धमेकांशं जयपालकम्। सर्वैस्त्रिगुणितं जम्भवारिणा च सुपेषितम्। नेत्राञ्जनेन हन्त्याशु सर्वोपद्रवमुद्धतम्॥" (भैष.) अत्र एकांशमिति प्रत्येकमेकांशम्। तीक्ष्णं तीक्ष्णलौहम् (र. सा. सं. सान्निपाति. ज्व.)

अञ्जनरस-पु., सान्निपातिकज्वरे नस्यम्। इह ईशः पारदः। मरिचचूर्णं समम् (र. सा. सं. ज्व. चि.) अन्यः सान्निपातिकज्वरदाहे। तत्र बाह्लिकं हिङ्गु। रसकं स्फटिकारी

अञ्जनाधिका-स्त्री., कृष्णकार्पासक्षुपः। द्र० कालाञ्जनी अञ्जनी। अञ्जनी लेपकारिणी (हेच. ४ का) क्षुद्रमूषिका

अञ्जनाम्भस्-न., अञ्जनजलम्

अञ्जलिनी-स्त्री., लज्जालुका

अञ्जिष्ठ-पु., सूर्यः (उ)

अञ्जीर-पु., स्वनामख्यातवृक्षः (हिं.-आँजीर) तत्पर्यायः मञ्जुल काकोदुम्बरिकाफलम्। फलगुणाः-शीतलं स्वादु, गुरु, रक्तपित्तवातघ्नं क्रिमिशूलहृत्पीडा-कफमुखवैरस्यनाशकं च (मद. व. ६)

अटरूष-पु., वासकवृक्षः (रसासं), सूतिकारिरसे, कन्दर्पसारतैले च प्रयुज्यते (वा. चि. २ अ) द्र० वासकः

अटरूष-पु., वासकवृक्षः (र. मा. । च. द)

अटवी-स्त्री., अरण्यम्

अटवीलता-स्त्री., कुम्भाटवृक्षः। कुम्भाड्या इति (रत्ना)

अटि-पु., शरारिपक्षी (हला)
अट्ट-न., अन्नं शुष्कं च (मे. ट द्विकम्)
अट्ट-पु. क्षौमम्। द्वितल-इष्टकगृहम्
अट्टन-न., अस्त्रभेदः (त्रिका)
अट्टालक-पु., उपरितलगृहम्
अट्टालिका-स्त्री., राजोचितगृहम्
अडगज-पु., चक्रमर्दः । द्र० चक्रमर्दः
अडङ्ग-पु., गोधूमः
अडहु-पु., लकुचवृक्षः
अणुव्रीहि-पु., सूक्ष्मधान्यम् (रा. नि. व. १६)
तत्पर्यायः- प्रसातिका (र)
अण्डक-पु., अण्डकोषे (हे. च.) क्षुद्रडिम्बे
अण्डकोटरपुष्पा-स्त्री., अजाघ्री नीलवुन्हा इति लोके (रत्ना)
अण्डकोष-पु., कुड्मलः वृषणम् (रा. नि. व. १८) तत्पर्यायाः- मुष्कः, वृषणः (अ) अण्डं, पेलं, अण्डकः (हे) सीमा (ज) फलकोशकः (त्रि) फलं (के) बीजपेषिका (रा) अण्डकोषलक्षणम्-रेतःसूत्रसमाबद्धं कोशगर्भेऽवतिष्ठते। रेतःस्रावाण्डयुगलं ग्रन्थ्याभं चाण्डवर्तुलम् भ्रूणस्योदरवेष्टन्याः पण्या उदरगह्वरे। तिष्ठेत्प्राक्स्पर्शनाद्भूमेः कोषमायाति तद्द्वयम्। दक्षिणस्मात्स्थूलतरं वामाण्डं निम्नलम्बिच। वामं रैतसिकं सूत्रं यतो दीर्घतरं परात्। उपर्युपरसंस्थानस्तरद्वन्द्वेन निर्मितः। कोषो रैतसिके सूत्रे धत्तेऽण्डयुगलं तथा
तनोराभ्यन्तरो रक्तः सङ्कोचनगुणान्वितः। तनोर्बाह्यश्चर्ममयो लोमभिः कतिभिश्चन। तनोस्तिरष्करण्यान्तरेकया भिद्यते द्विधा। तद्भेद्वयमध्यान्ते पुंसोऽण्डयुगलं ननु। उदराद्रेतसः सूत्रे पश्चाद्भागमवाण्डयोः। नियतं समनुप्राप्ते धरास्नाय्वादिनिर्मिते, अत्रिरिति कश्चित्।
अण्डकोषक-पु., अण्डकोषः (श. र.)
अण्डग-पु., गोधूमः
अण्डजा-स्त्री., शरटः (वि.) सर्पः। मत्स्यः। पक्षी (मे. जत्रिकं) मृगनाभिः (वा. हेमा.)
अण्डपर्ण-पु., मलाण्डतरुः अत्रि.
अण्डपेशी-स्त्री., कोष.। मुष्कम् (हे. च.)
अण्डस्कन्द-पु., अण्डेषु स्कन्द इव, अश्वस्याण्डरोगविशेषः (जयदत्तः ५० अ)
अण्डालु-पु., मत्स्यः। श. च.

अण्डिनी-स्त्री., सान्निपातिकयोनिरोगविशेषः। लक्षणम्-
"अतिकायगृहीतायास्तरुण्यास्त्वण्डिनी भवेत्. (सुचि)
अण्डीर-पु., पुरुषः (मे. रत्रिकं)
अण्वस्थि-न., मणिबन्धादिस्थं सूक्ष्मास्थि (सु. शा.)
अण्वी-स्त्री., अङ्गुली
अतन्द्रा-स्त्री., काफि इति ख्यातफलम् (अत्रि.)
अतरुणदार (कः)
हिं.—विधारा.
अतरुणदारुरास्नापुराः (भा. म. १ भ. सन्धिकज्व. चि.)
अतरुणदारु-पु., वृद्धदारकः
अतलस्पृक्-न., जलम् (हे. च. ४ का.)
अतिकटु-वि., निम्बादिद्रव्यम्
अतिकण्ट (कः)-पु., लघुगोक्षुरकः। दुरालभा (मद. व. १)
अतिकृश-वि., अतिदुर्बलः
अतिक्षिप्तसन्धि-पु., सन्धेरतिशयविश्लेषः। सन्धिच्युतं सदुच्चैरवस्थानम्। तेन सन्ध्यस्थ्नोरुभयोरेवातिक्रान्तता वेदना च (सु. नि. १५ अ.)
अतिगण्ड-पु., न., स्त्री., बृहद्गण्डः (मे. डचतुष्कम्)
अतिगन्धक-पु., हस्तिकर्णपलाशवृक्षः। चम्पकवृक्षः (रा. नि. व. १०)
अतिघूर्णता-स्त्री., अतिनिद्रा (भा. म. ४ भ.) मसूरिकानि (" तृष्णा-दाहातिघूर्णता) "
अतिचर-पु., पक्षिभेदः। वृक्षविशेषः
अतिचरणा-स्त्री., तन्नामकफजयोनिरोगविशेषः। अतिव्यवायेन शोथयुक्ता योनिरतिचरणोच्यते। "सैवातिचरणा शोफसंयुक्तातिव्यवायतः। "
(बा. उ. ३३ अ.) द्र० अचरणा
अतिच्छत्र-पु., रक्तकोकिलाक्षः (प. मु. रत्ना) छत्रा स्थूलतृणविशेषः
अतिच्छत्रिका-स्त्री., शताह्वा (रा. नि. व. ४; म. द. व २; वा. उ. ६ अ) " अतिच्छत्रा पलङ्कषा " (सि. यो. उन्मादचि. महापैशाचघृते) मधुरिका (च. चि. अ.) छत्रवृक्षः। यस्य मूले पत्रे वा वचाकारः कटुरसश्च। भूततृणम् (रा. नि) विषाणिका (वा. सू. २९ अ) तन्नामकमहौषधिः
अतिजागर-पु., नीलक्रौञ्चः (रा. नि. व. १९)
अतिजृम्भ-पु., वायुरोगविशेषः (वै. नि)

अतितपस्विनी-स्त्री., गोरक्षमुण्डी (भा. पु. १ भ. गु. व)

अतितीक्ष्ण-वि., मरिचादिः

पु., शोभाञ्जनवृक्षः न., अजमोदा

अतितेजिनी-स्त्री., त्रिपर्णी (मद. व. १)

अतिदीप्य(क)-पु., रक्तचित्रकः (रा. नि. व ६)

अतिदुष्ट-पु., गोक्षुरकः (वै. नि)

अतिपक्वमांस-न., पाकाधिकसिद्धमांसम्। गुणाः-अति-पक्वन्तु यन्मांसं विरसं वातलं गुरु (वै. नि)

अतिपक्वक्षीर-न., अतिशृतघनदुग्धम्। इदमतिगुरु। "भवेद्गरीयोऽतिशृतम्"। (वा. टी. हेमाद्रौ; क्षारपाणिः)

अतिपत्रा-स्त्री., बला (हिं-खरेली)

अतिपिच्छ-पु., श्वेतरक्तालुकः (वैनि.)

अतिपिच्छला-स्त्री., कुमारी (वै. नि.)

अतिपिञ्जर-पु., च., दुष्टव्रणः

अतिपीडक- दुष्टव्रणः (च)

अतिबलिका-स्त्री., वाट्यालकः (रानिव ४) अतिबली

अतिभारग-पु., अश्वतरः

अतिभी-स्त्री.; क्षणप्रभा

अतिभोजन-न., अतिमात्रया भोजनम् गुणाः—तच्च आलस्यगौरवाटोपसादांश्च कुरुतेऽधिकम् (सु. सू. ४६ अ.)

अतिमङ्गल्य-पु., बिल्ववृक्षः (रा. नि. व. ११)

अतिमञ्जुला-स्त्री., कण्टकसेवतीवृक्षः (हिं-सेवती गुलाब भा. पू. १ भ. पु. व. मद व. ३) द्र० सेवती

अतिमण्डल-पु., भूधामनवृक्षः (वै. नि.)

अतिमन्थ-(क) पु., अग्निमन्थक्षुपः

अतियुक्त-त्री., वारंवारं प्रयुक्तम् (भा. म. ख. १; भ. अ. सा.) "स्नेहाद्यैरतियुक्तैः।"

अतिरक्त-पु., हिङ्गुलः (वै. नि.)

अतिरक्ता-स्त्री., जवापुष्पवृक्षः (वै. नि.)

अतिरस-पु., पौण्ड्रकः (श. मा.)

अतिरूक्ष-त्रि., स्नेहशून्यम् (कङ्गुकोद्रवादौ)

अतिरेचक-पु., काकोली (वै. नि.)

अतिरोग-पु., क्षयरोगः। राजयक्ष्मा (रा. नि. व. २०)

अतिरोमश-पु., वन्यच्छागः (हारा.)

अतिरोमशा-स्त्री., नीलवुन्हा ((प. मु.)

अतिलङ्घित-वि., कृतातिलङ्घनः अत्युपवासः। तल्लक्षणम्-पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च। क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः। मनसः सम्भ्रमोऽभीक्ष्णमूर्ध्ववातस्तमो हृदि। देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत् (चद)

अतिलम्बी-स्त्री., शताह्वा (भा. पू. १ भ.)

अतिलोहितगन्ध-पु., दमनकवृक्षः (प. मु.)

अतिवर्तुल-पु.,कलायविशेष (र. मा.)

अतिविदाहिन्-स्त्री., राजसर्षपादिः

अतिविद्धा- स्त्री., दुष्टव्यधनविशेषः प्रमाणातिरिक्तविद्धा (सु. शा. ८)

अतिबीज-पु., बब्बूलवृक्षः (वै. नि)

अतिबृहत्फल-पु., पनसवृक्षः (भा.पू. १ भ)

अतिव्यथा-स्त्री., अतिशयितयन्त्रणा। पीडा

अतिव्यायाम-पु., व्यायामाधिक्यम् अतिव्यायामो न पथ्यः। अतिव्यायामतः कासो ज्वरश्छर्दिः श्रमः क्लमः। तृष्णा क्षयः प्रतमकः रक्तपित्तञ्च जायते (भा. पू. १ म)

अतिशष्कुली-स्त्री., तिलकृतरोटिका तस्या गुणाः- रूक्षा श्लेष्मपित्तास्रघ्नी गुरुः विष्टम्भिनी अचक्षुष्या च (भा. पू. कृतान्नवर्गः)

अतिशारिवा-स्त्री., अनन्ता (र. मा)

अतिशूक-पु., यवः (प. मु)

अतिशूकज-पु., गोधूमः

अतिश्रृतक्षीर-न., अतिक्वथिते दुग्धे कवलभोज्यवत् सञ्जातः। तत् गुरुतरम्। 'स्यान्निर्जलं श्रृतं द्वित्रिचतुरष्टांशशेषितम्। तथा शृततमं सारं गुरु बल्यतमं पयः' (वा.सू.५ अ. अरु. टी. खरनाद)

अतिशोष-पु., क्षयरोगः

अतिसख्या-स्त्री., वल्लीयष्टिमधु

अतिसर्जन-न., वेधः (मे. नपञ्चकम्)

अतिसान्द्र-पु., राजमाषः (रत्ना)

अतिसाम्या-स्त्री., कृष्णमुखगुञ्जावल्ली, लतायष्टिमधु

अतिसार-किन् त्रि., अतिसाररोगी

अतिसारघ्न-पु., क्षेत्रपर्पटकः (वै. नि)

अतिसारघ्नी-स्त्री., अतिविषा (वै नि)

अतिसारभेषज-न., लोध्रः तद्रोगनिवारक औषधिः

अतिसारवारणरस-पु., अतिसारे प्रयोज्यो रसः। अत्र कृतकर्पूरं पक्वकर्पूरं। खाखसी क्षीरं अहिफेनम् इति ज्ञेयम् (र सा स)

अतिसारस्या—स्त्री., रास्ना (वै. नि.)
अतिसूक्ष्म—वि., अतिशयसूक्ष्मम्
अतिसेवन—न., अधिकमात्रया सेवनम्
अतिसौम्या—स्त्री., वल्लियष्टिमधुकम् (रा नि व. ६)
अतिस्कन्धा—स्त्री., रक्तकुलत्थकः (वै. नि.)
अतिस्थूलवर्त्मन्—पु., दुष्टव्रणविशेषः (च)
अतिस्निग्ध—त्रि., अत्यन्तस्निग्धम् तत्र लक्षणम्—कफप्रसेकः ? शिरसो गुरुतेन्द्रियविभ्रमः लक्षणं तदतिस्निग्धे रूक्षं तत्र प्रदापयेत् (वै. नि.)
अतिस्रवा—स्त्री., मयूरवल्ली (वै. नि.)
अतुल—पु., कफः । तिलकवृक्षः (श. च.)
अतेजस्—स्त्री., छाया (रा. नि. व. २१)
अत्क—पु., अङ्गम् (उणा.)
अत्न—पु., सूर्यः (वै. नि.)
अत्य—पु , अश्वः
अत्यग्नि—पु., क्षुधाधिक्यम् (चद.) भस्माकः (विजर)
अत्यन्तपद्मा—स्त्री., कमलिनी (वै. नि.)
अत्यन्तशोणित—त्रि., अतिरक्तम् (न.) सुवर्णगैरिकम् (वै. नि.)
अत्यन्तसुकुमार—पु., कन्दलीवृक्षः । कङ्गुनी (रानि. व. १६)
अत्यम्बुपान—न., मात्रातिरिक्तवारिपानम् । लक्षणं यथा—अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः । तस्मान्नरो वह्निविवर्धनार्थं मुहुर्मुहुर्वारि पिबेदभूरि । इति जलपानलक्षणम् (रा. व. १४)
अत्यम्ल—पु., न., वृक्षाम्लम् (रा. व. ६) वनमातुलुङ्गम् त्रि., अत्यन्ताम्लरसयुक्तम्
अत्यम्लपर्णी—स्त्री., वल्लीशूरणः लताविशेषा । अम्ललोणिका । गुणाः—अत्यम्लपर्णी तीक्ष्णाम्ला प्लीहशूलविनाशिनी । वातहृद्दीपनी रुच्या गुल्मश्लेष्मामयापहा (रा. नि. व. ३)
अत्यम्ला—स्त्री., मातुलुङ्गवृक्षः वनबीजपूरः (रा. व. ११ रत्ना.) तिन्तिडी (श. र.)
अत्यय—पु., नाशः । दोषः । कृच्छ्रम् (रत्ना. अने. व. मे. यत्रिकम्)
अत्यारक्ता—स्त्री., जपापुष्पवृक्षः
अत्युदीर्णा—स्त्री., दुष्टव्यधनविशेषः यत्र तीक्ष्णमहामुख शस्त्रेण वेधो भवति (शा. ८अ)
अत्यूहा—स्त्री., नीलशेफालिका नीलिका (मे. हत्रिकम्)
अदन—न., भक्षणम्
अदन्त—त्रि., दन्तहीनः
अदल—पु., हिज्जलवृक्षः (श. च.) घृतम्
अदला—स्त्री., घृतकुमारी (रा.)
अदंश—पु., महामूलकम्
अदारिका—स्त्री., वृक्षकमलम् वृक्षोत्पलम् (वै. नि.)
अदृढ—स्त्री., अस्थिरः न., तृणविशेषम् (वै. नि.)
अद्य—न., धान्यम्
अद्यश्विना—स्त्री. आसन्नप्रसवा गौः
अद्यश्वीना— ,, ,, ,,
अद्रक—पु., महानिम्बवृक्षः (वै. नि.)
अद्रि—पु., पर्वते शैलवृक्षः (मे. रद्विकम्)
अद्रिका—स्त्री., धान्यकम् महानिम्बः (भा. पू. १ गु. व.)
अद्रिभू—स्त्री., आखुपर्णीलता (रा. व. ३)
अद्रिमाषा—स्त्री., वनमाषः (वै. नि)
अद्रिसानुजा—स्त्री., त्रायमाणा (वै. नि)
अद्रिसार—पु., लौहम् (रत्ना)
अद्रेष्क(ष्का)—पु., स्त्री., निम्बविशेषः (भैष. कुष्ठचि.)
अधः—(अव्ययम्) अधोभागः । योनिः (वै. नि.)
अधःकुन्तल—पु., अन्तर्लोमन्
अधःपातन—न., पारदस्य यन्त्रमार्गेणाधःक्षेपणम् (र. सा .सं.)
अधःपुट—पु., चारोलीवृक्षः (वै. नि)
अधःपुष्पी—स्त्री., गोजिह्वाक्षुपः (रा. व. ४) चोरपुष्पीतृणविशेषः । ब्रह्मदण्डी (वै. नि. २ भ)
अधःप्रस्तर—पु., तृणासनम् (वै. नि.)
अधःशल्य—पु., अपामार्गक्षुपः (रा.व. ४; भा.पू. १ भ) श्वेतापामार्गः
अधःशाख—पु., संसाराश्वत्थवृक्षः
अधःशेखर—पु., श्वेतापामार्गः
अनामय—न., आरोग्यम् (रा. व. २०)
अनार्जव—न., रोगः (रा. व. २०)

अधम–पु., अम्लवेतसम्
अधमाङ्ग–न., चरणः (श. च)
अधर–पु., ओष्ठम् (रा. नि. व. १८) न. स्त्रीयोनिः
अधरकण्टक–पु., दुरालभा (वैं. नि.)
अधरकण्टिका–स्त्री., क्षुद्रशतावरी (वैं. नि)
अधरा–स्त्री., नीचदिक् (वै. नि.)
अधामार्ग–पु., अपामार्गः
अधामार्गव–धामार्गववृक्षः (अ. टी.)
अधिकप्रिय–न., त्वग् (वै. नि.)
अधिकारिन्–पु., पुरुषः (वै. नि.)
अधिजिह्वक–पु., जिह्वागत रोगविशेषः
अधिजिह्वा–स्त्री., जिह्वारोगविशेषः कफशोणितजे। अत्र जिह्वोपरि जिह्वाग्रवत् शोथो जायते। पक्वश्चेदसाध्यः उपजिह्वा जिह्वानिम्नतो भवतीत्यनयोर्भेदः। अश्वस्य जिह्वागतरोगे जिह्वोपरि शोफरूपः (ज. द. २८ अ.)
अधिमुक्तक–पु., माधवीलता (वै. नि.)
अधिमुक्तिका–स्त्री., मुक्तागृहम्। शुक्ति. (वै. नि.)
अधिरूढा–स्त्री., प्रौढा अधिरोहिणी–स्त्री., वंशकाण्डादिनिर्मितरोहणमार्गः
अधीर–पु., अयोग्यवैद्यः (वै. नि.)
अधोंऽशुक–न., परिधेयवस्त्रम् (अम.)
अधोगत–पु., अस्थिभङ्गरोगः (वै. नि.)
अधोघण्टा–स्त्री., अपामार्गः (रत्ना.)
अधोऽङ्ग–न., मलद्वारम्
अधोमर्मन्–न., गुदम्। गुह्यद्वारम् (हे. च.)
अधोजिह्विका–स्त्री., तालुमूलस्थक्षुद्रजिह्वा (हारा) जिह्वाधःशोथरोगः। कफादधस्तादधिजिह्विका चेति (च)
अधोद्वार–न., मलद्वारम्। योनिः (हे. च)
अधोयन्त्र–न., बकयन्त्रम्
अधोवायु–पु., अपानवायुः
अधोरेचन–पु., आरग्वधवृक्षः
अधोऽस्रपित्त–न., अधोगतरक्तपित्तरोगः
अध्यक्ष–पु., क्षीरिकः वृक्षः (श. र.) महार्कवृक्षः। वि.,–प्रत्येकं कर्षार्धमानम् (सि. यो. र. पि. चि.) एलादिगुटिकायाम्
अध्युषित–पु., सर्वाक्षिरोगः। (वि.,) उपविष्टः
अध्वग–पु., उष्ट्रः। अश्वतरः (हेच.)
अध्वगक्षमिन्–पु., खेचरः। पक्षी (वै. नि.)
अध्वगभोज्य(ग्य)–पु., आम्रातकवृक्षः (त्रिका.)
अध्वगवृक्ष–पु., आम्रातकवृक्षः
अध्वजा–स्त्री., स्वर्णुलीक्षुपः (रा. व. ४)
अध्वनिषेवण–न., अध्वचलनम् (वै. नि.)
अध्वरा–स्त्री., मेदा (भा. पू. १ ह. व.)
अध्वसिद्धक–पु., सिन्धुवारवृक्षः (रा. व. ४)
अध्वाण्डशात्रव–पु., श्योणाकवृक्षः हिं--नाऊया श्योनाल. (श. च.)
अनंशुमत्फला–स्त्री., कदलीवृक्षः (जटा.)
अन–न., अन्नम् (उणा.)
अनघा–स्त्री., कार्पासी (वै. नि.)
अनघ–पु., गौरसर्षपम् (रा. व. १६)
अनघ्न–पु., गौरसर्षपम् (वै. नि.)
अनङ्ग–(क–न., मनस् (शर.)
अनङ्गसुन्दररस–पु., वाजीकरणाधिकारे रसः (र. सा. सं.)
अनडुज्जिह्वा–स्त्री., गोजिह्वा (रा. व. ४)
अनडुही–स्त्री., गौः
अनड्वत्–पु., वृषः (भा. पू.। रत्ना.)
अनड्वाही–स्त्री., गौः (हला.)
अनणु–पु., न., सूक्ष्मधान्यम् (वै. नि.)
अनन्तक पु., मूलकम्। नलतृणम् हिं. नरकट (मद. व. १)
अनन्तमूल–न., करालाख्यौषधिः। सुगन्धा वचाभेदः (श. चि.) अनन्ता
अनन्तमूली–स्त्री., दुरालभा। रक्तदुरालभा (वै. नि.)
अनन्तरन्ध्रका–स्त्री.,खर्परपोलिका (वै. नि.)
अनभिलाष–पु., अन्नविद्वेषः। अरोचकम् (रा. व. २०)
अनलनामन्–पु., चित्रकवृक्षः
अनलविवर्धनी–स्त्री., कर्कटिका
अनलिन्–लि–पु., वकवृक्षः (त्रिका.)
अनाक्रान्ता–स्त्री., कण्टकारी (र. मा.)
अनागतार्तवा–स्त्री., (कन्या) अजातरजस्का (रा. व. १८)
अनाचार–पु., असत्कर्म (वै. नि.)
अनातङ्क–वि., अरोगी
अनातप–पु., आतपाभावः
अनातुर–वि., अरोगी
अनामक–न., अर्शोरोगः (श. र.)
अनार्तवजल–न., पौषादिमासचतुष्टयभवे वृष्टिजलम् तच्च वातादिदोषत्रयकोपनम् (भा. पू. वारिवर्गः)

अनार्तवा–स्त्री., रजःशून्या । तन्नामकयोनिव्यापदि
अनार्तवाऽस्तनी षण्डी खरस्पर्शा च मैथुने (मा. नि)
अनार्यज–न., अगुरुः
अनार्यतिक्त–(क)–पु., भूनिम्बः (अम.)
अनासिक–वि., नासिकाहीनः
अनाह–पु., आनाहरोगः
अनाहार–पु., आहाराभावः
अनिच्छ–त्रि., तृप्तः (वै. नि.)
अनिमिष–पु., मत्स्यः (त्रिका. मे. षचतुष्कम्)
अनिमेष–वि., निमेषशून्यम्
अनिर्माल्या–स्त्री., पिण्डिका । पृक्का (रत्ना.)
अनिर्वाण–पु., कफः (वै. नि.)
अनिलकपित्थक–पु., स्थूलाम्रातकः (वै. नि.)
अनिलकारक–पु., काञ्जिकाभेदः (वै. नि.)
अनिलनिर्यास–पु., प्रियालवृक्षः म–बिबला
म.—बिबला (वै. नि.)
अनिलपर्य्यय–पु., न., वायुरोगः
अनिलभुक्–पु., सर्पः (वै. नि.)
अनिलरस–पु., रसोऽयं पाण्डुरोगे हितः (रस. र.)
अनिलरिपु–पु., एरण्डवृक्षः (वै. नि. २ भ. सन्धि.
ज्व. चि. रास्नादिः)
अनिलहर–न., कृष्णागरुः (वै. नि.)
अनिला–स्त्री., नदी । खटिका (र. मा.)
अनिलाजीर्ण–न., वाताजीर्णम् (वा. सू. ८ अ.)
अनिलाटिका–स्त्री., रक्तपुनर्नवा
अनिलामय–पु., वायुरोगः । वातव्याधिः
अनिलारिरस–पु., वातव्याध्यधिकारे रसः (र. सा. सं.)
अनिलोचित–पु., नीलमाषकः (वै. नि.)
अनिष्टा–(ष्ठा)–स्त्री., नागबला (रा.)
अनिःसारा–स्त्री., कदलीवृक्षः (रा. व. ११; वै. नि.)
अनीकस्थ–त्रि., हस्तिशिक्षाविचक्षणः (मे. थचतुष्कम्)
अनीली–स्त्री., काशतृणम् (र. मा.)
अनुकदली–स्त्री., कदलीविशेषः
म.—लोखंडी केळ
अनुकर्षण–न., पानपात्र (हारा.)
अनुकल्प– अभावे तद्गुणद्रव्यान्तरग्रहणम्
अनुकूलका–स्त्री., लघुदन्ती
अनुकूलिनी–स्त्री., क्षुद्रदन्ती
अनुजा–स्त्री., त्रायमाणलता (रा. व. ५;
भा. पू. १ भ. गू. व.)

अनुतक्र–न., तक्रानुपानम् 'जग्ध्वा तक्रं पिबेदनु'
(सि. यो. पाण्डचि. वृन्द)
अनुत्क्लेश–पु., उत्क्लेशाभावः (च. सं. विसूचि.)
अनुत्थितविद्धा (शिरा)–स्त्री., दुःस्थानबन्धनात् वेपमानायाः यस्याः शिरायाः शोणितसम्मोहो भवति
(सु. शा. ८ अ.)
अनुपज–वि., अनुपदेशजातः ते च कूलेचरकोषस्थमत्स्यप्लवपादिनो भवन्ति
अनुपदीना–स्त्री., उपानत् (हला.)
अनुपालु–पु., पानीयालुकः (रा. व. ७)
अनुपुष्प–पु., शरतृणम् (श. च.) खञ्जतृणम् । वेतसः
अनुबन्धिन्–पु., तृष्णा, हिक्का (मे.)
अनुभास–पु., काकविशेषः (वै. नि.)
अनुभूति–स्त्री., त्रिवृता
हिं.—निसोत्तर.
अनुरुहा–स्त्री., नागरमुस्ता (रा. व. ६)
अनुरेवती–स्त्री., क्षुद्रदन्ती
अनुलास–पु., मयूरपक्षी
अनुलास्य–पु., मयूरपक्षी
अनुल्की–स्त्री., हिक्का । तृष्णा (मे.)
अनुवास–पु., न., सौरभ्यम् स्नेहबस्तिः । स्नेहनम् ।
धूपनम् (मे.) 'यः स्नेहो दीयते स स्यादनुवासन नामकः' तस्य मात्रा च पलद्वयं तदर्धं वेति (भा.)
अनुवासन–पु., न., सौरभ्यम् स्नेहबस्तिः । स्नेहनम् ।
धूपनम् (मे) 'यःस्नेहो दीयते स स्यादनुवासन नामकः'। तस्य मात्रा च पलद्वयं तदर्धंवेति (भा)
अनुवासनक–पु., न., सौरभ्यम् स्नेहबस्तिः । स्नेहनम्
धूपनम् (मे) 'यः स्नेहो दीयते स स्यादनुवासननामकः' । तस्य मात्रा च पलद्वयं तदर्धं वेति
(भा.)
अनुवासनबस्ति–पु., स्नेहबस्ति । मात्राबस्तौ
अनुवासाख्य–पु., अनुवासनम् (वै. नि.)
अनुष्णवल्लिका–स्त्री., नीलदूर्वा (रा. व. ८)
अनुष्णवल्ली– ,, ,, ,,
अनुसार्थक–न., सुगन्धद्रव्यविशेषः
म.—छडीला.
अनूचा–न., पु., उत्तमवैद्यः साङ्गवेदाध्यायी
अन्तरापत्या–स्त्री., गर्भिणी
अन्तरि(री)क्ष–न., आकाशः (रा. व. १३)

अन्तरुहा–स्त्री., श्वेतदूर्वा।
अन्तर्जठर–न., कोष्ठः। कुक्षिमध्यः (अम.)
अन्तर्दधन–न., सुराबीजम् (श. च.)
अन्तर्धूम–वि., बद्धमुखहण्डिकाभ्यन्तरे अग्निदग्धे (च. द. ग्रहणी चि.) चित्रकक्षारे
अन्तर्मल–पु., मलान्तर्वृक्षः (कदश्चित्रि)
अन्तर्वमि–स्त्री., अपरिपाकः
अन्तर्विद्रधि–पु., जठरान्तरस्थविद्रधिरोगः (भा.)
अन्तर्वृद्धि–पु., अन्त्रवृद्धिरोगः
अन्तर्वेध–पु., मर्मवेधः। मर्मपीडा
अन्तशय्या–स्त्री., मरणम् (मे.)
अन्तःस्नेहफला–स्त्री., श्वेतकण्टकारि।
अन्तावसायिन्–पु., नापितः (मे.)
अन्तिका–स्त्री., सातला (मे. कत्रिकम्)
अन्त्य–पु., मुस्ता (मे.)
अन्त्यपुष्पा–स्त्री., धातकीवृक्षः (वै. नि.)
अन्त्रवल्ली–स्त्री., सोमवल्लीलता
अन्त्री–स्त्री., वृद्धदारकलता (अ. टी.)
अन्थक–न., अङ्गारः (रत्ना.)
अन्धक–पु., तुम्बुरी (भा. पू. १ भ. ह. व.)
अन्धकाक–पु., काकाकारः पक्षी (त्रिका.)
अन्धकार–पु., आलोकाभावः तस्य गुणाः–' भयदृष्टितेजोऽवरोधकरः रोगजनकश्च (राज.)
अन्धकूप–पु., मोहः
अन्धता–स्त्री., पित्तरोगः
अन्धमूषिका–स्त्री., देवताडवृक्षः। तृणविशेषः (श. च.)
अन्धाहुली–स्त्री., आहुल्यनामक-शिम्बीफलवनस्पतिविशेषः
अन्धिका–स्त्री., सर्षपः (मे कत्रिकम्) नेत्ररोगविशेषः (श. र.)
अन्धु–पु., कूपम् (त्रिका.)
अन्धुल–पु., शिरीषवृक्षः (श. च.)
अन्नकोष्ठ–पु., तण्डुलधान्यादिरक्षणाधारः
अन्नगन्धि–पु., अतिसाररोगः (त्रिका. (म. हगवण)
अन्नज–न., त्रैदिवससिकान्नमण्डः (म. तीन दिवसांची शिळी पेज)
अन्नजा–स्त्री., हिक्काभेदः (भा.)
अन्नद्रवशूल–पु., न., परिणामशूलम्
अन्नद्रवाख्यशूल–पु., अन्नद्रवशूलम् (मानि.)
अन्ननाडी–स्त्री., अन्नपाकनाडी सा च २० हस्तमिता कलापेशीविनिर्मिता। तदुक्तम्–'हस्तविंशतिप्रमाणा कलापेशीनिर्मिता। अन्नपाकक्रियार्था च पाकनाडी प्रकीर्तिता। ऊर्ध्वांशो मुखनामास्य अधोंऽशो गुदनामकः। कण्ठादामाशयं यावदन्ननाडी तु कथ्यते। ततश्चामाशयस्तस्मात् स्थूलान्तः स्थूलमस्तकः। आमाशयात् समारभ्य भागः प्रथम आन्त्रिकः। ग्रहणी चाग्न्यधिष्ठानं बुधैराद्यैः प्रकीर्तितः। ततः पक्वाशयः प्रोक्तः पक्वान्नपरिधारणात्। स्थूलान्त्रस्याप्यधोभागः सरलो गुदसंज्ञकः। अन्नकिट्टं मलं, सर्वं बहिर्निःसारयत्ययम्। श्वासनाड्याः स्थिता पश्चादन्ननाड्यन्नवाहिनी। अधस्तात् कुण्डलीभूता नाडी चोदरमध्यगा। कण्ठादधोगतिर्नाडी भित्त्वा वक्षःस्थलाश्रयाम्। पेशीमुखद्वयवतीं प्रविष्टेयमधोगुहाम्। इत्यादि (आत्रेय.)
अन्नमण्ड–पु., भक्तमण्डः। तस्य गुणाः-क्षुद्बोधनो बस्तिविशोधनश्च प्राणप्रदः, शोणितवर्धनश्च। ज्वरापहारी कफपित्तहन्ता वायुश्चयेदष्टगुणो हि मण्डः (च. द. अग्निमांद्य चि.)
अन्नमयकोश–पु., शरीरम्
अन्नमल–न., पुरीषम्। मद्यम्
अन्नरस–पु., भक्तमण्डः
अन्नलिप्सा–स्त्री., अन्नभोजनेच्छा। क्षुधा (वै. नि.) प्रकृतिगामिनोऽन्नलिप्सा
अन्नवहा–स्त्री., धमनीयुगलम् याभ्यां धमनीभ्यां भुक्तमन्नमुदरं नीयते (सु. शा. ९) तयोर्मूलमामाशयः, अन्नवाहिधमन्यश्च।
अन्नवाहिस्रोतस्–न., गलनाडी
अन्नविकार–पु., भुक्तविकृतिः
अन्नविपाकनाडी–स्त्री., अन्ननाडी। विचित्रविधिना पक्वमन्नं सत्वानि जीवयेत्
अन्नग्रासो रसैः पिष्टो लालाक्लिन्नोऽन्ननाडिकाम्। श्वासरन्ध्रं नासारन्ध्रञ्चातिक्रम्य सुखं विशेत् निरुणध्युपजिह्वा सा सर्वथा श्वासनाडिकाम्। जिह्वा प्रयाति पश्चाच्च पाकनाडीं ततोऽभितः। किंचिदूर्ध्वमुखी भूत्वा पिण्डं ग्रसति यत्नतः। श्वासरन्ध्रप्रविष्टं चेदन्नं कासैर्विनिर्दिशेत्। द्वितीयगं क्षवथुना क्षणेन प्रकृतेर्बलात्। अतो नैवातित्वरणं श्रेयः पानान्न कर्मणि (आत्रेयः)
अनुबन्धी–पु., तृष्णा हिक्का (मे.)

अन्नाजीर्ण–न., अन्नं भुक्तं तदजीर्णं अन्नाजीर्णम् (भा.म.१ भ.) अन्नातिसारलक्षणे। तन्नामकशूलरोगे

अन्नाद्य–न., अन्नम् (रा. व. २०) धान्यम्

अन्नाशय–पु., उदरम्

अन्यकारुक–पु., शकृत्कीटः (हारा.)

अन्यपुष्ट–पु., कोकिलः

अन्यभृत्–पु., कोकिलः (हला.) काकः (हे. च.)

अन्यभृत–पु., कोकिलः (रत्ना.)

अन्यलोह–न., कांस्यधातुः (वै. नि.)

अन्या–स्त्री., हरीतकी (वै. नि.)

अन्वासन–न., कर्मशाला (हला.) स्नेहबस्तिः ।

अपक्व–वि., आमः । अशृतः । तैले विपर्ययं विद्यात् पक्वे चापक्व एव च (प. प्र.)

अपक्वकदली–स्त्री., अपक्वरम्भाफलं । गुणाः–अपक्वकदलञ्चैव मलस्तम्भकरं मतम्। तिक्तं कषायं रूक्षश्च रक्तपित्ततृषाहरम् । मेहाक्षिरोगरक्तातिसारज्वरविनाशकृत् (वै. नि.)

अपक्वमांस–न., असिद्धमांसगुणाः–अपक्वन्तु भवेन्मांसं रक्तदोषकरं मतम् । वातादिदोषजनकमिति मांसविदां मतम् (वै. नि.)

अपक्ववस्तु–न., असिद्धं अशृतं च वस्तु (र. मा.)

अपक्वक्षीर–न., अपक्वदुग्धम् गुणाः–अभिष्यन्दि गुरु च

अपघन–पु., शरीरावयव । अङ्गम् (अ. म)

अपचार–पु., अजीर्णम्

अपटु–त्रि., रोगी (रा. व. २०)

अपतन्त्र–पु., स्वनामख्यातवातव्याधि

अपतन्त्रक–रोगः (मा. नि)

अपतान –पु., वातव्याधिविशेषः (मा. नि)

अपतानक– ,, ,, ,,

अपत्यशत्रु–पु., कर्कटः (श. च)

अपत्यसिद्धिकृत्–पु., पुत्रजीववृक्षः (वै. नि.)

अपत्रा–स्त्री., पुष्पवृक्षविशेषः नेवती इति महाराष्ट्रादौ ख्यातम् (वै. नि.)

अपथ–न., योनिः (श. र.)

अपथ्यज्वर–पु., कुपथ्यजन्यज्वरः । अपथ्यजे मद्यभवे च हेतुर्हेतुर्ज्वरे पित्तमुदाहरन्ति। दाहश्च शैत्यञ्च शिरोव्यथा च कोष्ठाभिवृद्धिः कथितोदकण्डूः। मलातिपातस्त्वतिबद्धता च अपथ्यदोषेण भवेज्ज्वरे च (वै. नि. २ भ. ज्व.)

अपद्–त्रि., पादहीनः । पङ्गुः ।

अपदरुहा–स्त्री., वन्दा वादांगुल (वै. नि.)

अपदरोहिणी–स्त्री., वन्दा वादांगुल (वै. नि.)

अपदेवता–स्त्री., पिशाचादिः

अपयाचित–पु., रोगगः

अपर–न., गजपश्चादर्धम् (मे. रत्रिकम्)

अपराजितधूप–पु., धूपोऽयं सर्वज्वरघ्नः स च गुग्गुलुगन्धतृणवचासर्जनिम्बार्काग्रुरुदेवदारुकृतः (च. द. ज्व. चि.)

अपलाषिका–स्त्री., पिपासा (हे. च.)

अपवन–न., कृत्रिमवनम् (हे. च.)

अपवरक–पु., गर्भगृहम् (हला.)

अपविषा–स्त्री., निर्विषतृणम् (रा.)

अपस्कर–पु., मलद्वारम् । पुरीषम् (धर.)

अपस्तम्भ (स्व) मर्मन्–स्त्री., तन्नामकशिरामर्म। तस्य स्थानं वक्षस उभयत्र वायुवाहिनी नाडी (सु. शा. ६ अ.)

अपस्तम्भिनी–स्त्री., शिवलिङ्गिनीलताविशेषः (वै. नि.)

अपस्मारनाशिनी (वटिका)–स्त्री.,अपस्मारे हिता वटिका

अपस्वर–(अव्ययं) स्वभावादपगतः स्वरो यस्मिन् कर्मणि यथा स्यात्तथा हीनस्वरमिति यावत् (वा. शा. ५ अ.)

अपांधातु–पु., रसजलमूत्रस्वेदःकफपित्तरक्तादयः (भा. म. १ भ. अतिसार चि.)

अपांपित्त–न., चित्रकवृक्षः (अम.)

अपाक–पु., अजीर्णम् पाकाभाव उदरामयः

अपाकशाक–न., आर्द्रकम् (रा. व. ६)

अपाङ्क्त–पु.. अपामार्गक्षुपः (श. र.)

अपाटव–न., रोगः जाड्यम् (रा. व. २०)

अपानदेश–पु., गुददेशः (वै. नि.)

अपामार्गजटा–स्त्री., अपामार्गमूलम् (सि. यो.) तृतीयकज्वर (श्रीकण्ठः)। एतत् बन्धनं तृतीयकज्वरे हितम्। अपामार्गस्य मूलञ्च सम्यगक्षालिताननः बध्नीयाद्वामहस्तेन सर्वज्वरविमोक्षणम् (वैद्यकम्)

अपामार्गतैल–न., शिरोरोगहितम् (च. द.)

अपामार्गक्षार–पु., अष्टविधक्षारान्यतमक्षारः । एष गुल्मशूलघ्नः (भा. पू. १ भ. ह. व.)

अपामार्गक्षारतैल–न., कर्णरोगे हितम् (च. द. ; भैष.)

अपालापमर्मन्–न., पृष्ठवंशवक्षःस्थलयोरन्तरालभागः। तथा तयोरेव च पृष्ठोरसोर्ये पार्श्वे, तयोरुपरिभागयोरंसकूटयोरधोऽपालापाख्ये द्वे मर्मणी इति ज्ञेयम् (वा. शा. ४अ.)
अपासन–न., मारणम् (अम)
अपुच्छा–स्त्री., शिंशपावृक्षः (श. र.)
अपुष्ट–त्रि., अपरिपक्कम्
अपूप्य–पु., गोधूमः गोधूमचूर्णम् (ज. टा.)
अपूरणी–स्त्री., शाल्मलीवृक्षः (श. च.) कार्पासवृक्षः
अपेक–पु., दुरालभा
अपोगण्ड–त्रि., वलिभः। विकलाङ्गः
पु., शिशुः (मे डचतुष्कम्)
अपोदिका–स्त्री., पूतिकाशाकः (अ. टी.)
अप्प (स्)–न., जलम्।
अप्पित्त–न., चित्रकवृक्षः (अम.)
अप्रकाण्ड–पु., काण्डरहितो वृक्षः (झिण्ठिकादौ) (अम.)
अप्रकृष्ट–पु., काकः (श. र.) त्रिः अधमः
अप्रतिकार्य–त्रि., दुश्चिकित्स्यः
अप्रसवधर्मिन्–त्रि., यः पुरुषः प्रसवधर्मी न भवति सः (सु. शा. १ अ.)
अप्रहत–वि., मालक्षेत्रम्। मालभूमिः। खिलभूमिः (रा. नि. व. २)
अप्रिया–स्त्री., शृङ्गिमत्स्यः। वोदालीमत्स्यः
अप्रेतराक्षसी–स्त्री., तुलसीवृक्षः (र. मा.)
अप्रोट–पु., भारद्वाजपक्षी (वै. नि.)
अफेनफल–न., अहिफेनफलम् (भैष. स्त्री. रोग. चि.)
अफेल–न., आफूकम्। हिं–अफीम्। (वै. नि.)
अबर–न., अन्तर्बंस्त्रम् (मे. र. त्रिकम्)
अबल–पु., वरुणवृक्षः (श. च.)
अबालुक–पु., पानीयालुकः (रा. नि.)
अबिला–स्त्री., मेषी
अब्जकर्णिका–स्त्री., कमलबीजकोशः (वै. नि.)
अब्जकेशर–पु., पद्मकेशरम् (च. द.)
अब्जभोग–पु., कमलकन्दः (श. च.)
अब्दनाद–पु., मेघनादक्षुपः (स्त्री.) शङ्खिनी। भेकी म.तान्दुलजा (वै. नि.)
अब्दसार–पु. कर्पूरभेदः (रा. नि.)
अब्धिज–पु., समुद्रफेनः। (रत्ना जौ) अश्विनी कुमारौ
अब्धिफल–न., समुद्रजातफलम्। महाराष्ट्रादौ ख्यात औषधविशेषः। समुद्रफल इति लोके। गुणाः–फलं समुद्रस्य कटूष्णकारि वातापहं भूतनिरोधकारि त्रिदोषदावानलदोषहारि कफामयश्रान्तिनिरोधकारि। (रा. नि.)
अब्भ्र–न., अभ्रधातुः। मुस्ता (रा. नि.)
अभयदा–स्त्री., भूम्यामलकी (वै. नि.)
अभयनृसिंहरस–पु., रसोऽयं अतीसारग्रहणीगदयोर्हितः (भैष.)
अभयाद्यमोदक–पु., विरेचनाधिकारे हितः (च. द. विरेचनाधिकारे)
अभयारिष्ट–पु., अर्शोधिकारे हितः (भैष.)
अभयालवण–न., औषधमिदं यकृत्प्लीहाधिकारे देयम् (सा. कौ. रस. भैष.)
अभयावटी–स्त्री., गुल्माधिकारे हिता (र. सा. सं.) एषा वटी भैषज्यरत्नावल्यामुदरे धृता
अभयाष्टक–न., अष्टहरीतकीभक्षणम् (प्रयोगा. रसायन.)
अभिघातज्वर–पु., आघातजन्यागन्तुकज्वरः। अत्र ज्वरे दोषा नारम्भकाः, परन्तु पश्चादनुबन्धिनः स्युः (च.)
अभिज्ञ–त्रि., कुशलः
अभिनवकामेश्वर–पु., वाजीकरणमिदं भेषजम् (रस. र)
अभिन्यास(क)–पु., सन्निपातज्वरविशेषः (मा. नि. ज्वर)
अभिपीडन–न., अभिचारः
अभिमन्थ(मन्युः)–पु., नेत्ररोगः (त्रिका)
अभिमर्द–पु., अवमर्दः
अभिमर्षण–न., यक्षपिशाचादिभूतकृतपीडा (र. मा.)
अभिमानित–न., मैथुनम् (त्रिका)
अभिरूप–पु., बुधः (मे) पचतुष्कम्। वि., रम्यम् (मे)
अभिलकपित्थ–पु., आम्रातकवृक्षः
अभिलाव–पु., छेदः (अम.)
अभिषुविक्रान्त–न., माधवीसुरा (वै. नि.)
अभिष्यन्दिन्–त्रि., दोषधातुमलस्रोतसां क्लेदजननम् (कुसुमा. टी. ज्वरे) स्रोतःस्राविद्रव्यम् (वा. टी. हेमा.) कफकृत्पदार्थः दध्यादि (भा. मि.)
अभिसार–पु., शकुलिमत्स्यः मत्स्यः (मद. व. १२) बलम् (धर)
अभीक–पु., कामुकः (मे. क त्रिकम्)
अभीरणी–स्त्री., दुन्दुभसर्पः (वै. नि.)
अभीरुपत्री (त्रिका)–स्त्री., शतावरी (अम.)
अभीशु–(षु)–पु., प्रग्रहः (मे)

अभीष्टगन्धक–पु., माधवीलता। (मदव ३)
अभीष्टा–स्त्री., रेणुकगन्धद्रव्यम् (श. च)
अभुक्त–त्रि., कृतोपवासः। 'अभुक्तस्य दिवा निद्रा पाषाणमपि जीर्यति (वै. नि.)
अभुग्ण–त्रि., अरोगी
अभोजन–न., उपवासः, अमात्रभोजनम् 'अजीर्णे भोजनं येषां जीर्णे येषामभोजनम्। रात्रावभोजनं येषां तेषां नश्यन्ति धातवः (संग्रह)
अभ्यन्त–त्रि., आतुरः (अम.)
अभ्यूष–पु., ईषत्पक्वकलायादिः (अम.)
अभ्रनामक–पु., मुस्ता (श. र)
अभ्रपटल–पु., न., अभ्रकम् (वै. नि)
अभ्रपुष्प–पु., वेतसलता (भा. पू. १ भ. गु. व.) वारिवेतस् (अम.) न., जलम्
अभ्रमांसी–स्त्री., आकाशमांसीलता (रा. नि.)
अभ्ररोह–पु., न., वैडूर्यमणी (रा. नि. व. १३)
अभ्रवटिका–स्त्री., रसविशेषोऽयं ज्वरातिसारगदे प्रयोज्यः (रस. र.। र. सा. सं.) भैषज्यरत्नावल्यामियमेव ग्रहण्यां महाभ्रवटिका उक्ता, इयमेव प्रयोगामृते ग्रहण्यां रसाभ्रवटी
अभ्राह्व–न., कुङ्कुमम् (मद. व. ३)
अम–पु., रोगः त्रि.,। पक्वफलादिः (श. र.)
अमङ्गल–पु., एरण्डवृक्षः (श. च.)
अमण्ड–पु., एरण्डवृक्षः (प. मु. हारा)
अमध्यस्थधर्मिणी–स्त्री., चेतनजडोभयधर्ममध्यवर्तिनी न भवति। तस्याः केवलं जडमयत्वात् (सु. शा. १ अ.)
अमरकणा–स्त्री., गजपिप्पली (वै. नि. २ भ पाण्डु चि. भूनिम्बादिगुटी)
अमरकन्द–पु., कन्दविशेषः (वै. नि)
अमरकुसुम–न., लवङ्गम् (वै. नि. क्षयरो. त्रैलोक्यचि. रसे)
अमरज–पु., दुष्खदिरः (रानि.) देवदारुः, नदीवटः (वै. नि. २ म. ग्रन्थ्यादिज्व०)
अमरद्रु–., पु., विट्खदिरवृक्षः
अमरपुष्प–पु., न., पूगफलम् काशतृणम्। आम्रः। केतकः (मे. पपञ्चकम्)
अमरपुष्पक–पु., काशतृणम् (प. मु.) काशभेदः (र. मा.)

अमरपुष्पिका–स्त्री., चोरपुष्पीतृणम् (र. मा.) काशतृणम्
अमरपुष्पी–
अमर (ल) रत्न–न., स्फटिकम् (रा. नि.) काचः
अमरवल्ली–स्त्री., आकाशवल्ली
म.—अमरवेल.
हिं.—अमरवेलि.
(भा. पू. १ भ. गु. व. मद. व. १) सालशेतिख्यातलता गुणाः-वृष्यवल्ली बलकरी परं वृष्या रसायनी। मूत्रकृत्स्वेदजननी पुष्टिदा कार्श्यवारिणी। औपदंशिकरोगांश्च रक्तदोषं हरेदियम् (वैद्यकनि.)
अमरसर्षप–पु., देवसर्षपः (वै. नि.)
अमरसुन्दरी–स्त्री., ज्वराधिकारे रसः
अमराह्व–न., देवदारुकाष्ठम् (वा सू १५; एलादि. अरुणः)
अमरुफल–न., उत्तरदेशप्रसिद्धफलम्, गुणाः-'अमरोश्च फलं शीतं मलद्रवकरं मतम्। सरं दाहं रक्तपित्तं कामलां मूत्रकृच्छ्रकम्। मूत्राश्मरीञ्च हन्तीति ऋषिभिः परिकीर्तितम् (वै. नि.)
अमरेन्द्रतरु–पु., देवदारुवृक्षः (वै. नि. २ भ ज्व निर्गुण्डीधूपे.)
अमलदीप्ति–पु., कर्पूरः (च. द.)
अमलपतत्री–पु., हंसः
अमलमणि–पु., स्फटिकम् (रा. नि. व १३) कर्पूरमणिः।
अमलरत्न–न., स्फटिकम् (रा. व. १३)
अमलाज्झटा–स्त्री., भूधात्री (अ. टी. भ.)
अमस–पु., रोगः (उ.)
अमानस्य–न., पीडा, दुःखम्
अमूला–स्त्री., अग्निशिखावृक्षः (वै. नि.) अर्कपत्री
अमृतकल्परस–पु., अजीर्णाधिकारे रसविशेषः (र. सा. सं.)
अमृतगुडिका–स्त्री., भैषज्यमिदम् अजीर्णे हितम् (र से. चि.)
अमृतजा–स्त्री., हरीतकी (वै. नि.)
अमृतप्राशावलेह–पु., अयं राजयक्ष्माधिकारे उक्तः (भा. म. ख २ भ.)
अमृतबन्धु–पु., अश्वः (वै. नि.)
अमृतभल्लातकावलेह–पु., कुष्ठाधिकारेऽवलेहः (भा. म. ४ भ. कुष्ठ. चि.)

अमृतभल्लातकी-स्त्री., रसायनोऽयं योगः (रसर. सा. कौ. भैष. कुष्ठाधिकारे च. द. रसायने च. द. विविधाधिकारे)

अमृतमञ्जरी-स्त्री., गोरक्षदुग्धीक्षुपम्। सामान्यज्वरे रसविशेषः। अन्या च कासाधिकारे (र. सा. सं)

अमृतमण्डूर-पु., परिणामशूले देयः (र. स. र.)

अमृतमन्थ-पु., दुग्धादिपरिगोलितः मन्थः (प. मु. २० व)

अमृतयोग-पु., नक्षत्रयोगविशेषः। (अभि० २स्थ ६ अ)

अमृतलतादिघृत-न., पाण्डुरोगाधिकारे घृतम् (भा. म. २ भ)

अमृतवर्तिका-स्त्री., मृत्युञ्जयतन्त्रोक्तरसायनवर्तिः (भैष.)

अमृतवल्लरी-स्त्री., गुडूची (भा. पू. १ भ. गु. व) उपोदकी

अमृतसङ्कम-पु., खर्परिका म.—कलखापरी. (वै. नि.)

अमृतसञ्जीवनी-स्त्री., गोरक्षदुग्धी (रा. नि. व. ५)

अमृतसहोदर पु., घोटकः (जय. द.)

अमृतसारज-पु., गुडः (रा. नि. व. १४) तवराजखण्डः (रा. नि. व. १४) गुणाः—तृष्णाज्वरदाहरक्तपित्तघ्नः

अमृतसारजा-स्त्री., शर्करा

अमृतसारताम्र-न., रसायनाधिकारे

अमृतसोदर-पु., घोटकः (रा. व. १९)

अमृतहरीतकी-स्त्री., अजीर्णे हिता (सा. कौ.)

अमृतक्षार-पु., नवसागरः (वै. नि.)

अमृताख्यगुग्गुलु-पु., वातरक्ते हितः (च. द. वात. रो. चि.)

अमृताख्यलौह-पु., न., रक्तपित्ताधिकारे लौहः (रस. र. रक्तपित्तचि.)

अमृतागुग्गुलु-पु., राजयक्ष्मणि हितः (चद. । भा. म. ३ भ.)

अमृताङ्कुरलौह-पु., न., उपदंशे लौहविशेषः (र. सा. सं. । रस. र. । प्रयोगा उपदंश. चि. रसे चि. कु. । साकौ)

अमृतादि-पु., कषायद्रव्यसमूहः। अयं विसर्प-विस्फोटके हितः (रस. र. । च. द. विसर्प. चि. भैव. सा. कौ.)

अमृतादिवटी-स्त्री., इयं कफे त्रिदोषेऽग्निमान्द्ये च हिता (भा. म. १ भ. ज्वर चि.)

अमृताद्यघृत-न., वातरक्ते हितम् (भा. म. २ भ.)

अमृताद्यचूर्ण-न., आमवाते हितम्। गुडूचीनागर गोक्षुरमुण्डितिकावरुणचूर्णानि प्रत्येकं समभागानि ग्राह्याणि। (भा. म. २ भ.)

अमृतारिष्ट-न., अरिष्टमिदं विषमज्वरादौ हितम् (भैष.)

अमृतार्णव-पु., रसोऽयम् अतिसारे ज्वरातिसारे च हितः (र. सा-सं. अतिसारचि.)

अमृतार्णवरसा-पु., कासहरोऽयं रसः (रस. र. भैष. र. सा. सं. रसायने)

अमृतार्णवलौह-न., कुष्ठाधिकारे हितम्

अमृतावटिका (**गुग्गुलुः**)-स्त्री.. सद्योव्रणघ्नी वटिका। व्रणशोथे इति (च. द.)

अमृताष्टक-पु., न., गुडूच्याद्यष्टद्रव्यसिद्धकषायः। एष श्लेष्मपित्तज्वरे हितः (च. द. चि. सा. कौ.)

अमृताह्व-न., अमृतफलम् नास्पाति इति लोके (मद. व. ६) गुणाः-गुरु वातघ्नं स्वादु त्रिदोषघ्नं च। नास्पाति मुद्गलदेशे प्रचुरं लभ्यते (भा.) खर्बूजम् (मद. व. ६)

अमृताह्वयतैल-न., वातरक्ते समुपयोज्यं तैलम् (भा. म. २ भ. वातरोगचि.)

अमृतेश्वररस-पु., अयं रसो यक्ष्मणि हितः

अमृतोत्था-स्त्री., सुधामूला सालम्मिछरीति भाषा (अत्रि.)

अमृतोत्पन्न-न., तुत्थम्। खर्परीतुत्थम् (रा.नि.व.१३)

अमृतोत्पन्ना-स्त्री., गृहमक्षिका (रा. नि. व.)

अमृतोपम-न., खर्परीतुत्थम् (वै. नि.) म. मोरचूद.

अमृतोपहिता-स्त्री., तोपचिनी इति ख्याते द्रव्यम्

अम्बक-पु., बकुलवृक्षः (जटा) न., नेत्रे (हे. च.) ताम्रम् (रा. नि. व. १३)

अम्बरद-पु., कार्पासवृक्षः (वै. नि.)

अम्बरा-स्त्री., कार्पासवृक्षः (प. मु.)

अम्बरातक-(**रीय**) पु., अम्रातकवृक्षः (जटा.)

अम्बरि-(**री**) ष पु., न., आम्रातकवृक्षः। भर्जनपात्रम् (अम.)

अम्बष्ठ-पु., देशविशेषः। वैश्यायां ब्राह्मणाज्जातं अपत्यम्

अम्बष्ठादि-पु., पाठादिगणविशेषः (सु. सू. ३८ अ.)

अम्बुक-पु., श्वेतार्कमन्दारः। रक्तैरण्डः

अम्बुकण्टक-पु., नक्रम् (त्रिका.)

अम्बुकन्द-पु., शृङ्गाटकः (वै. नि.)
अम्बुकिरात-(ट)-पु., नक्रम् (त्रिका.)
अम्बुकीश-पु., गोधा । शिशुमारः (त्रिका.)
अम्बुकूर्म-पु., गोधा (वै. नि.)
अम्बुकृष्णा-स्त्री., जलपिप्पलिः (वै. नि.)
अम्बुकेशर-पु., छोलङ्गवृक्षः (र. सा. सं)
अम्बुचामर-पु., शेवालम् (जटा.)
अम्बुचारिणी-स्त्री., स्थलपद्मिनी (हिं स्थलपद्म) (वै. नि.)
अम्बुजामलकी-स्त्री., पानीयामलकः (वै. नि.)
अम्बुट-पु., अश्मन्तकः (रा. नि. व. ९)
म.—आपटा.
अम्बुताल-पु., शैवालम् (त्रिका.)
अम्बुधि-पु., सागरः
अम्बुधिफेन-पु., समुद्रफेनम् (भा.)
अम्बुनामन्-न., ह्रीबेरम् (भा.) वालकम् (भा.)
अम्बुपत्रा-(त्रिका) (पत्री) स्त्री., उच्चटा (र. मा.)
अम्बुमयूरक-पु., जलापामार्गः (वै. नि.)
अम्बुमात्रज-पु., शम्बूकम् (हे. च.)
अम्बुयष्टिका-स्त्री., भार्गी (र. मा.)
अम्बुवल्ली-स्त्री., क्षुद्रकारवेल्ली । जलपिप्पलिः (वै. नि-)
अम्बुवारिणी-स्त्री., स्थलकमलिनी (वै. नि.)
अम्बुवाह-पु., मुस्तकः (चि. क. क. वल्ली. प्रदर. चि.)
अम्बुवेतस-पु., जलवेतस्
म.—लव्हाळे.
अम्बुशिरीषिका-स्त्री., जलशिरीषः (वै. नि.)
अम्बुशिरीषी- ,, ,,
अम्बुशुक्ति-स्त्री., जलशुक्तिः (वै. नि.)
म.—जलशिंपी.
अम्बुसर्पिणी-स्त्री., जलौका
अम्बुसादन-न., निर्मलीबीजम् (वै. नि.)
अम्बुसारा-स्त्री., कदलीवृक्षः (भा. पू. १ भ. फ. व.)
अम्बुसाह्व-पु., कुन्दपुष्पक्षुपः (वै. नि.)
अम्भःपा-पु., चातकपक्षी
अम्भःसार-पु., मुक्ता (वै. नि.)
अम्भःसूः-स्त्री., शम्बूकः (म. धुके) धूमः (हे)
अम्भोजनाल-पु., पद्मनालः (वै. नि.)
अम्भोजा-स्त्री., वल्लीयष्टिमधु (वै. नि.)

अम्भोरुहकेशर-न., पद्मकेशरम् (च. द. रक्तपित्तचि.)
अम्र-पु. आम्रवृक्षः रा. नि. (माचिका) हिं. मोहुया अम्लवेतसम् (रा.)
अम्रगन्धहरिद्रा-स्त्री
अम्रहरिद्रा- हिं. आमहलदी
अम्रवेतस-पु., अम्लवेतसम्
अम्रसार-पु., अम्लवेतसम् (रा. नि .व.)
अम्रात-(क.)-पु. आम्रातकवृक्षः हिं. अम्बाडा. म. अंबाड्याचे झाड. (श. मा. त्रिका)
अम्लकरञ्ज-पु., करञ्जविशेषः । तत् फलगुणाः—पिपासाघ्नं गुरु रुचिकरं पित्तकरञ्च (राज.)
अम्लका-स्त्री., पालङ्कः (शाकः) (प. मु. पलाशीलता रा. नि व. ४)
अम्लकूचि-पु., वृक्षविशेषः
अम्लकेशर-पु. मातुलुङ्गम् (पमु.) दाडिमवृक्षः
अम्लकेसरी-पु., अम्लरसनिम्बुकवृक्षः (वै. नि.)
अम्लकोश-(शाक):-पु., तिन्तिडीवृक्षः (मद. व. ६)
अम्लगोरस-पु., अम्लतक्रम् (वै. नि.)
अम्लचाङ्गेरी-स्त्री., चाङ्गेरीभेदः (चचि. ३ अगुरुतैले)
अम्लजम्बीर-पु., अम्लरसनिम्बुकवृक्षः (रा. नि. व ११)
म.—इडनिंबू.
अम्लटक-पु., अश्मन्तकः
अम्लत्वक्-पु., प्रियालः
म.—चारोळी
अम्लदोलक-पु., चुक्रम् (वै. नि.)
म.—अंबोती.
अम्लद्रव-पु., बीजपूरादिरसः । (भा. म. १ भ. जिह्वकज्वरचि.
अम्लद्रव्य-न., बीजपूरादिः । तक्रम् (वै. नि.)
अम्लनिम्बुक-पु., महाम्लनिम्बुकः (वै. नि.)
म.—मोठे इडनिम्बू.
अम्लनिशा-स्त्री., शठी (रा. नि. व. २१)
अम्लपत्र-पु., दण्डालुकः (वै. नि.) अश्मन्तकः (रा. नि. व. ९) क्षुद्रपत्रतुलसीवृक्षः (र. मा.)
अम्लपत्र-न., चुक्रशाकम् (रा. व. ७)
अम्लपत्रा-स्त्री., शुक्ला (प. मु.)
अम्लपनस-पु., लिकुचवृक्षः (वै. नि.)
म.—ओटीचे झाड.
अम्लपर्णिका-स्त्री., वृक्षविशेषः । सुरपर्णी (भा.)
गुणाः-अम्लपर्णी वातकफशूलस्य विनाशिका (वै.नि.)

अम्लपादप-पु., वृक्षाम्लः (वै. नि.)
म.—कोकंबी.
अम्लपित्तान्तकमोदक-पु., अम्लपित्ते योगविशेषः (भैष.)
अम्लपित्तान्तकरस-पु., रसोऽयम् अम्लपित्तघ्नः (रस. चि. र. सा. सं. भैष.)
अम्लपुष्पिका-स्त्री., आरण्यशणवृक्षः (वै. नि.,)
म. रानताग.
अम्लपूर-न., वृक्षाम्लः (रा. व. ६.)
अम्लफल-न., वृक्षाम्लम् (रा. व. ६.)
अम्लफला-स्त्री., कत्थारिका (वै. नि.)
म.—लघुकन्थारी
अम्लभेदन-पु., अम्लवेतसम् (रा. व.) चुक्रम्
अम्लमारीष-पु., अम्लशाकविशेषः हिं.—सारा. गुणाः-अम्लमारीषको दोषकोपनो मधुरः पटुः (वै. नि.)
अम्लमूलक-न., यूषितकाञ्जिकपक्वमूलकम् (प. प्र. ३ ख. च. द. संग्रहणीचि. बृहच्चुक.)
अम्ललोणिका-स्त्री., (अ. टी.) पालङ्कविशेषा (र. मा.)
म.—चुका.
अम्ललोणी-स्त्री., चाङ्गेरी
अम्लवाटा-स्त्री., नागवल्लीभेदः (रा. व. ११)
अम्लवाटिका-,, ,, ,,
अम्लवाटी- ,, ,, ,,
अम्लवातक-(वाडकः)-पु., आम्रातकवृक्षः
अम्लवाष्प-पु., चाङ्गेरी (वै. नी.)
म.—(घेणे.)
अम्लविदुल-पु., अम्लवेतसम् (वै. नि.)
अम्लवीज-न., वृक्षाम्लम् (रा. वै. ६.)
अम्लष्टा-स्त्री., चाङ्गेरी.
म.—आंबोती.
अम्लसरा-स्त्री., नागवल्लीभेदः (रा. व. ११)
अम्लसार-पु., अम्लवेतसम् (रा. व. ६.) निम्बुकः (रा. व. ११.) हिन्तालवृक्षः (रा. व. ९)
अम्लसार (कम्)-काञ्जिकचुक्रनामक काञ्जिकभेदः (रा. व. १५)
अम्लस्कन्ध-पु., अम्लगणः (वासू. १०.२२)
अम्लस्तम्भनिका-स्त्री., तिन्तिडी (वै. नि.)
अम्लहरिद्रा-स्त्री., शठी (रा. ब. ६)

अम्लाटन-पु., महासहावृक्षः (मे.) गुणाः—' कषायो मधुरस्तिक्त उष्णवीर्यः स्निग्धश्च भा. पू. १ भ. पु. व.)
अम्लाढ्य-पु., करुणनिम्बुकः (पमु.)
अम्लात-पु., अम्लाटनवृक्षः (भा.पू.,१ भ. पु. व.)
अम्लादान-पु., करण्टक (पीयावांसा इति प्रसिद्धे । बाणपुष्प इति गौडे)
अम्लादि-पु., तिंतिडी, (रा.व.६) चुक्र नामक पत्रशाकम् (रा. व. ७)
अम्लादि-पु., तिन्तिडी (रा. व. ६) चुक्रनामकपत्रशाकम् (रा. व. ७)
अम्लान-पु., बन्धुजीवकवृक्षः (त्रिका) झिण्टिकाभेदः अम्लाटनवृक्षः (भा. प. ४ भ. योनिरोगचि) महासहा (मे. नत्रिकम्) महाराजतरणीवृक्षः
अम्लान-पु., बन्धुजीवकवृक्षः, (त्रिका) झिण्टिकाभेदः अम्लाटनवृक्षः । (भा. म. ४ भ. योनि रोग. चि.) महासहा (मे. न. त्रिकम्) महाराज-तरणी वृक्षः
(रा. व. १०)
(रा. व. १०)
अम्लान-न., पद्मम् (श. र.)
अम्लाना-स्त्री., महासेवतीपुष्पवृक्षः (वै. नि.)
म.—थोररानशेवंती.
अम्लानिनी-स्त्री., पद्मसमूहः । पद्मिनी (त्रिका.)
अम्लाम्ना-स्त्री., चाङ्गेरी (रा. व. ६)
अम्लायनी-स्त्री., मल्लिकाभेदः (वै. नि.)
म.—नेवाळी.
अम्लिकापान-न., तिन्तिडीपानकम् (भा. पू. पानकवर्ग)
अम्लिकावटक-पु., वटकविशेषः (भा.)
अम्लीकाफल-न., तिन्तिडीफलम्, तद्गुणाः-शुष्कं सन्दीपनं भेदनं तृष्णाघ्नं कफवातयोः पथ्यञ्च (वा. सू. ६) अम्लो हि चाम्लफलमविपक्वं तदम्ल-पित्तामकरं विदाहि वातामये शूलगदे प्रशस्तं पक्वं तथा शीतगुणोपपन्नम् (अत्रि. १७ अ.)
अम्लीय-पु., अम्लवेतसम् (वै. नि.)
अम्लोटक-पु., अश्मन्तकवृक्षः असौ स्वनाम्नैव प्रसिद्धः (हि-आमरोडा) (रत्ना.)
अम्लोटज-पु., चाङ्गेरी (चद चातुर्थकज्वरचि.)
अम्लोत्तम-न., दाडिमः (प. मु.)
अयस्-न., लौहमात्रम् (रत्ना.)

अयस-(च. द. पाण्डुचि.) कान्तलौहम् (प. मु.) मुण्डलौहम् (रा. व. १३.)

अयस्कान्तशिला-स्त्री., लौहचुम्बकम् (वै. नि.)

अयस्कार-पु., जङ्घाग्रभागः (त्रिका.)

अयस्कीट-पु., लौहकीटः (वै. नि.)

अयान-न., स्वभावः (हारा.)

अयुग्मक-पु., सप्तपर्णवृक्षः (वै. नि.)

अयुग्मच्छद-पु., सप्तपर्णवृक्षः (अ. टी.)

अयोच्छिष्ट-न., लौहकिट्टम् (वै. नि.)

अयोमल-न., लौहमलम् (प. मु. सि. यो. पाण्डुचि. वृत. च. द. पाण्डुचि.)

अयोबस्ति-पु,, स्त्री., बस्तिकर्मविशेषः (भा.)

अरक्त-पु., लाक्षा (रा. व. ६)

अरग्वध-पु., महाकर्णिकारः

अरग्बध-न., स्वर्णालुफलम् (सि. यो. बृहदग्निमुखचूर्णे)

अरङ्ग-(गा) (गी) पु., स्त्री., मत्स्यविशेषः (वै. नि) वनस्पति० मधुशिग्रुः (रत्ना)

अरङ्गर-पु., कृत्रिमविषम्

अरङ्गदी-स्त्री., माधवीलता (वै. नि.)

अरजा-स्त्री., घृतकुमारी

अरडु-पु., अरलुः (अ. टी.)

अरण-पु., चित्रकः (वै. नि.)

अरणिका-स्त्री., अग्निमन्थः (वा. सू. १५)

अरणीकेतु-पु., महाग्निमन्थः (रा. ब. ९)

अरण्य-पु., कट्फलवृक्षः (श. च.) शालभेदः (वै. नि.)

अरण्य-न., काननम् उद्यानमहावनोपवनप्रमदवनभेदात् तच्चतुर्विधम् । तत्रोद्यानं यत्र राणिणः क्रीडन्ति । नृपालयेषु अन्तःपुरोचितं वनं प्रमदवनम् । उपवनं पुरस्य प्रान्तस्थवनम् (रा. व. २)

अरण्यक-पु., महानिम्बः (वै. नि.)
म.—बकाणनिम्ब.

अरण्यकणा-स्त्री., कटुजीरकम् (वै. नि.) वनपिप्पलिः

अरण्यकर्कटी-स्त्री., वनजातकर्कटी
म.—रानतवसे.
गुणाः— अरण्यकर्कटी चोष्णा रसे तिक्ता च भेदका। पाके कट्वीकफकृमीपित्तकण्डुज्वरापहा (वै. नि.)

अरण्यकाक-पु., वनकाकः (द्रव्यगुणः) (वै. नि.)

अरण्यकुक्कुट-पु., वनकुक्कुटः तन्मांसगुणाः—' हृद्यं लघु श्लेष्महरञ्च (रा. व. १७) बृंहणं स्निग्धं वीर्योष्णं वातघ्नं गुरु च (मद. व. १२)

अरण्यकोलि-स्त्री., वनबदरम्

अरण्यगवय-पु., वनगवयः । अयं कूलचरजातीयः (सुसू. ४६)

अरण्यघोली (लिका)-स्त्री., वनघोलीति प्रसिद्ध-पत्रशाकम् घोलीशाकम् (रा. व. ६) मन्थनदण्डः

अरण्यचटक-पु., वनचटकः, तन्मांसम्—लघु हितावहं चटकसमगुणञ्च

अरण्यचम्पक-पु., वनचम्पकः । गुणाः— शीतलं लघु शुक्रवृद्धिकरं बलकरञ्च (रा. ग. १०)

अरण्यछाग-पु., वनच्छागः

अरण्यज-पु., तिलकवृक्षः (हे.च.)

अरण्यजार्द्रक-स्त्री., वनार्द्रकम्, गुणाः— तत्र कटु अम्लं रुचिकरं बल्यं आग्नेयं च (रा. व. ६)

अरण्यतुलसी-स्त्री., बनतुलसी । कृष्णबर्बरी
म.—रानतुळस.
वैजयन्ती तुलसी । सा द्विधा ह्रस्वदीर्घभेदात् । गुणाः— ' अरण्यतुलसी चोष्णा कटुका च सुगन्धिका । वात-त्वग्दोषवीसर्पविषञ्चैव विनाशयेत् ' । ' अरण्यतुलसी क्षुद्रा कट्वी-चोष्णा च तिक्तका । रुच्यग्निदीपनी हृद्या विदाही-लघु-पित्तला । रूक्षा कण्डुविषच्छर्दि-कुष्ठज्वरविनाशिनी । वातं कृमीन् कफं दद्रुं रक्त-दोषं च नाशयेत् । बीजञ्चास्या दाहशोषनाशकं परि-कीर्तितम् ' (वै. नि. द्र. व्य. गु.)

अरण्यत्रपुसक-पु., वन्यत्रपुषम् (वै. नि.)
म.—गोडशेंदनी.

अरण्यत्रपुसी-स्त्री., इन्द्रवारुणी महाकाललता (वै. नि. अपस्मारचि. नस्यम्)

अरण्यधेनु-स्त्री., वनजाता गौः

अरण्यपलाण्डु-पु., वनजातपलाण्डुः । गुणाः—मूत्र-वैरेचनः, श्लेष्महरणोऽत्युग्र एव च । मात्रातिरेका-द्भवति वान्तिकृत्मलभेदनः । अतिमात्रं प्रयुक्तोऽसौ विषवन्मारयेन्नरम् । शोथे श्वासे कासे च मूत्रसङ्गे प्रयुज्यते (अ. त्रि.)

अरण्यपिप्पली-स्त्री., बनपिप्पलीनाम क्षुपः (र. व. ६)

अरण्यमक्षिका-स्त्री., वनमक्षिका (श. र.)

अरण्यमेथी-स्त्री., वनमेथिका (वै. नि.)
म.—रानमेथी.

अरण्यरजनी-स्त्री., वनहरिद्रा (वै. नि.)
म.—रानहळद. बाणपुष्प इति गौडे

अरण्यवायस-पु., अरण्यकाकः (रा. व. १९)
म.—डोमकावळा.
अरण्यशालि-पु., नीवारधान्यम् (रा. व. २३)
म.—देवभात.
अरण्यशुन-पु., वनकुक्कुरः
अरण्यशूरण-पु., वनजशूरणः (रा. व. ७)
म.—गोडा सूरण.
अरण्यश्वा-पु., कपिः । चित्रकव्याघ्रः
अरण्यसम्भूत-पु., कर्कटकः ।
अरण्यहलदीकन्द-पु., (अरण्यहरिद्रा)-स्त्री., वनहरिद्रा गुणाः—कुष्ठघ्नः वात-रक्तघ्नश्च (भा. पू. १ अ.) इयं कटुः मधुरा रुच्या अग्निदीपनी तिक्ता कुष्ठवातहा सती रक्तदोषविषश्वासकासहिक्काश्च नाशयेत् (वै. नि.)
अरम-पु., नेत्ररोगविशेषः
अरल-पु., शोणाकवृक्षः
अरलुपुटपाक-पु., शोणाकत्वक्कृतपुटपाकः (शार्ङ्ग. म. ख. १ अ.)
अरविन्ददलप्रभ -न., ताम्रम् (वै. नि.)
अरविन्दिनी-स्त्री., पद्मसमूहः (र. मा.)
अराल-पु., सर्जरसः शालवृक्षः मत्तदन्ती (वै. मे.)
अरिपूरिम-पु., विट्खदिरः (वै. नि.)
म.—गन्धी हिंवर.
अरिम-पु., विट्खदिरः (रत्ना, भैष. मुखरो. चि.)
अरिमेदाद्यतैल-न., तदिदं मुखरोगे हितम् (च. द. मुखरोगचि.)
अरिष्टत्रय-न., स्वस्थारिष्टं वेधारिष्टं कीटारिष्टञ्चेति अश्वारिष्टत्रयम् (जयदत्त २३-२५ अ.)
अरिष्टफल-पु., कटुनिम्बवृक्षः (रा. व. ९)
अरिष्टलक्षण-न., मृत्युलक्षणम् । रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते । तल्लक्षणमरिष्टं स्याद्रिष्टञ्चापि तदुच्यते
अरिष्टाह्व-पु., रीठाकरञ्जः (वै. नि. २ भ. उन्मा. चि.)
अरुः (रु)-पु., आरग्वधः रक्तखदिरः
न., क्षतव्रणः । मर्म । सन्धिस्थानम् (उ.)
अरुज्-त्रि., सुस्थः
अरुग्ण-त्रि., सुस्थः
अरुङ्निर्निमेष-स्त्री., नेत्ररोगविशेषः
अरुणकपिश-पु., द्राक्षाभेदः (वै. नि.)
म.—फकीरीद्राक्षा.

अरुणकमल-न., कोकनदम् (रा. व. १०)
अरुणचूड-पु., ताम्रचूडः (बै. नि.)
अरुणतण्डुलीय-न., रक्ततण्डुलीयकः (च. द.)
अरुणनाग-पु., मुद्राशङ्खः (अत्रि.)
अरुणनेत्र-पु., पारावतः (वै. नि.)
अरुणपुष्पी-स्त्री., बन्धुजीवकः (वै. नि.)
म.—रक्तदुपारी.
अरुणमक्षिका-स्त्री., रक्तमक्षिका (वै. नि.)
अरुणलोचन-पु., पारावतः (रा. व. १९)
हिं.—कबूतर.
अरुणसर्प-पु., तक्षकसर्पः (वै. नि.)
अरुणक्षार-पु., हिङ्गुलः (वै. नि.)
अरुणात्मिका-स्त्री., कुमरिचम् (वै. नि.)
म.—लाख.
अरुणाभ-न., वज्रलौहम्
अरुणार्क-पु., रक्तार्कः (प. मु.) (रा. व. १०)
म.—मन्दारु.
गुणाः— सरः वातकुष्ठकण्डूविषव्रणघ्नः प्लीहगुल्मार्शःकफोदरमलकृमिहरश्च । कटुतिक्तोष्णः कफघ्नो मेदोघ्नो विषघ्नः वातकुष्ठव्रणघ्नः शोथकण्डूविसर्पहरश्च । पुष्पगुणाः पुष्पं मधुरं तिक्तं धारकं कृमिकुष्ठकफार्शोविषरक्तपित्तघ्नं गुल्मशोथहरं च (भा. पू. १ भ.)
अरुणोपल-पु., अरुणवर्णमणिविशेषः; पद्मरागः (हे. च.)
अरुष्कर-न., भल्लातकफलम् (च. द. अर्श. चि. भैष. कुष्ठचि. पञ्चतिक्तघृते चसू. ४ कुष्ठघ्नवर्गे)
अरुषा (टा)-स्त्री., भूम्यामलकी (रा. व. ५)
अरोकदन्त-त्रि., कृष्णदन्तम् (वै. नि.)
अर्ककान्ता-स्त्री., आदित्यभक्ता (रा. व. ४. मदव. १.)
अर्कगन्धिका-स्त्री., क्षीरविदारी (प. मु.)
अर्कच्छत्र-न., अर्कमूलम्
अर्कतैल-न., कुष्ठाधिकारे प्रोक्तमिदम् (च. द. कुष्ठचि.)
अर्कदल-पु., आदित्यपत्रक्षुपः (रा. व. ४)
अर्कनामन्-पु., रक्तार्कः (भा.)
अर्कपत्र-पु., आदित्यपत्रक्षुपः (रा. व. ४.)
अर्कपत्रा- स्त्री., (त्रिका)-स्त्री., ईश्वरमूलवृक्षः (प. मु. र. मा.)
अर्कपर्ण-पु., रक्तार्कवृक्षः (भा. पू. १ भ.)
म.—सूर्यमन्दार.
अर्कपाद-पु., सूर्यकान्तमणिः । निम्बवृक्षः (वै. नि.)

अर्कपादप–पु., निम्बवृक्षः (त्रि. का.) अर्कक्षुपम्
अर्कपुष्पा–स्त्री., क्षीरकाकोली
अर्कप्रभागुडिका–स्त्री., रसायन० रसायनाधिकारे
अर्कमूर्तिरस–पु., रसोऽयं सान्निपातिकज्वरे प्रयोज्यः (भैष. ज्वरचि.)
अर्कमूल–न., तन्नामकवृक्षमूलम् (च. द. अग्निमान्द्य चि. क्षारगुडे प्रयोज्यम्)
अर्कमूला–स्त्री., ईश्वरमूली (रत्ना.)
अर्कलवण–न., अर्कक्षारः (वै. नि.)
अर्कवल्ली–त्री., आदित्यभक्ता (वै. नि.)
अर्कवेद–(ध)–न., तालीशपत्रम् (रा. व. ६.)
अर्कसुता–स्त्री., कृष्णापराजिता (वै. नि.)
अर्कसुधा–स्त्री., अर्कोत्थसुधा । गुणाः–असौ गुल्मरोगस्य नाशनी (वै. नि)
अर्कक्षीर–न., अर्कवृक्षनिर्यासः । गुणाः–कृमिघ्नं व्रणघ्नं कुष्ठार्शोदरेषु च हितम् (रा०) तिक्तलवणमुष्ण-वीर्यं लघु स्निग्धं गुल्मोदरकुष्ठहरं विरेचने हितं च (भा. पू. १ भ.; च. द. अर्शचि.)
अर्काश्मन्–पु., सूर्यकान्तमणिः (हला.)
अर्काह्व–पु., तालिशपत्रम् । सूर्यकान्तमणि, अर्कवृक्षः (अ. म.)
अर्की–पु., मयूरः (वै. नि.)
म.—मोर.
अर्केश्वररस–पु., रसोऽयं वातव्याध्युपशमनः द्विविधश्च । तृतीयो रक्तपित्ते । चतुर्थः कुष्ठाधिकारे प्रोक्तः
अर्कोपल–पु., सूर्यकान्तमणिः (रा. व. १२)
अर्गट–पु., आर्तगल इति प्रसिद्धः कण्टकवृक्षविशेषः । गुणाः– शीतः व्रणशोधनरोपणश्च (मद. व. ५) तथा 'अर्गटस्तुवरः शीतवीर्यो व्रणशोधनः । व्रण-रोपणश्चैव पुष्पमस्य मधु स्मृतम् । तिक्तश्च ज्वर-पित्तघ्नं कफरक्तरुजापहम् ' (वै. नि.)
अर्गल–न., मांसम् (वै. नि.)
अर्घट–न., भस्म (हारा.)
अर्घ्य–न., मधुविशेषभूतः आर्घ्यमधु द्र० ' मधु '
अर्घ्याट(ल)–पु., शुक्ला । शुक्ला चालुपत्रः स्यादर्घ्या-टोऽर्घ्याटलो मतः (द्रव्याभि.)
अर्घ्यात–पु., अर्घ्याटः (द्रव्याभि.)
अर्चिस्–स्त्री., न., कान्तिः । अग्निज्वाला
अर्जकर्ज–पु., असनवृक्षः

अर्जुन–पु., नेत्रशुक्लगतरोगः । लक्षणम् एको यः शशरुधि-रोपमश्च बिन्दुः शुक्लस्थो भवति तमर्जुनं वदन्ति . (मा. नि.)
अर्जुन–न., कासतृणम् (र. मा.)
अर्जुनघृत–न., हृद्रोगे हितम् (च. द. हृद्रोगे चि. भेष. भा. रस. स.)
अर्जुनत्वक्–स्त्री., अर्जुनवल्कलम् (च. द. अतिसार. चि.)
अर्जुननामाख्या–स्त्री., अर्जुनवृक्षः
अर्जुनसुधा–स्त्री., अर्जुनोत्थसुधा गुणाः–सुधा ह्यर्जुनजा प्रोक्ता कफस्य च विनाशिनी (वै. नि. द्रव्यगुणे)
अर्जुनाख्य–पु., काशतृणम् (र. मा.) अर्जुनवृक्षः
अर्जुनाद–वि., दर्भकाशखादकः (च. चि. २ अ.)
अर्जुनाद्यघृत–न., इदं प्रमेहे घृतम् उपयोज्यम् (र. मा. ३ भ. मेहचि.)
अर्जुनी–स्त्री., गौः (मे. नचिकं.)
अर्जुनोपम–पु., शाकद्रुमम् (र. मा.) शालवृक्षः (रत्ना.)
अर्ण–पु., शाकवृक्षः (श. च.)
अर्णभव–पु., शङ्खः (वै. नि.)
अर्णव–पु.,-समुद्रः (रत्ना.)
अर्णवज–पु., समुद्रफेनम् (रत्ना.)
अर्णवजमल–पु., समुद्रफेनम् (रत्ना.)
अर्णस्–न., जलम् (रा. व. १४)
अर्णोद–पु., मुस्तकम् (रा. व. १४)
अर्त्तगल–पु., नीलझिण्टी (सु. द्रव्यस. आगरु इति ख्याते फलवृक्षे । रत्ना.)
अर्थचम्पिका–स्त्री., कर्कटशृङ्गी (वै. नि.)
अर्थप्रसाद–स्त्री., धामनवृक्षः (वै. नि.)
अर्थसाधक–पु., पुत्रजीववृक्षः (मद. व. १ भा.)
अर्थसिद्ध–(कः)–पु., पुत्रजीववृक्षः । श्वेतनिर्गुण्डी । कृष्णनिर्गुण्डी (रा. व. ४)
अर्दनि–पु., अग्निरोगः (अ. टी. मा. नि.)
अर्धक–पु., जलसर्पः (वै. नि.)
अर्धचोलक–पु., कुर्पासः । (हारा.)
अर्धधारक–न., अस्त्र० । तच्च छेदनभेदनार्थम् (सुसू. ८)
अर्धनारीश्वररस–पु., रसोऽयं सान्निपातिकज्वरे गुञ्ज-मात्रं नस्यकर्मणि योज्यः । अपरे जीर्णविषमज्वरे नस्यमित्याहुः । तेन तत्क्षणमेव वामाङ्गो ज्वरो नश्यति (भेष.)
अर्धपल–न., कर्षद्वयम् । ४ तो. (प. प्र. १ ख)
अर्धपादा–स्त्री., भूम्यामलकी ।

अर्धपारावत–पु., वनकुक्कुटः । चित्रकण्ठपारावतः । तित्तिरः (अत्रि.)
अर्धपुष्पा–स्त्री., महाबला
अर्धभोजन–न., अर्धाशनम्
अर्धमात्रिक–पु., निरूहणाधिकारे तन्नामकबस्तौ (च. द.)
अर्धवीरच्छा–स्त्री., कृष्णदूर्वा
अर्धश(स)फर–पु., दण्डपालाख्यमत्स्यविशेषः (हारा.)
अर्धशराव–पु., प्रसृतिद्वये । ३२ तो. (प. प्र. १ ख.भा.)
अर्धसह–पु., पेचकः (वै. नि.)
म.—घुबड.
अर्धांशोनजल–न., अर्धांशेन हीनं पक्वं जलम् (रा. व. १४)
अर्धालिंग–पु., जलसर्पः
अर्धाशन–न., अर्धभोजनम् (श. च.)
अर्धेन्दु–पु., अतिप्रौढस्त्रीयोनौ अङ्गुलीयोजनम् (मे. दत्रिकं)
अर्धेन्दुशलाका–स्त्री., नासाकपालओष्ठअर्बुदगल-तालुकर्णरोगेषु उपयुज्यते (वै. नि.)
अर्धोदकक्षीर–न., अर्धोदकशृतदुग्धम् 'अर्धोदकं पयः शिष्टमामाल्लघुतरं स्मृतम्' (हेमाद्रौ क्षारपाणिः)
अर्भ–(क)–पु., बालकः (रा. व.१८) कुशः (मे. कत्रिक) पक्षजातशिशुः (रा. व. १८)
अर्भा–स्त्री., गुग्गुलः । अर्भाचूर्णं सहयुतम् (प्रयोगा. भग्न. चि.)
अर्यमार्य–ःपु., अर्कवृक्षः (रा. व. १०) सूर्यः
अर्व्वण–पु., अश्वः (भा. पू.)
अर्वन्–पु., अश्वः (भा. पू.)
अर्व्वती–स्त्री., वडवा कुम्भदासी (मं.)—मे तत्रिकम्
अर्व्वुद–पु., न., पुरुषः। दशकोटिपरिमाणं, (मे.—तत्रिक) मांसकीलकाकाररोगविशेषः (मा. नि. सुनि. ११; मा. म. ४; भ. मुखरोगचि.)
अर्व्वुदाकार–पु., बहुवारवृक्षः (वै. नि.)
अर्व्वुदाद्रिज–पु., मेषशृङ्गी (वै. नि.)
म.—मुरदाशिंग.
अर्व्वुर–न., आहुल्यनामक्षुपः । काश्मीरे तडवड इति प्रसिद्धः (वै. नि. २ भमसंग्रहणी चि. तालिशादिचूर्णे)
म.—तडवड.

अर्श–न., अर्शोरोगः (श. र.)
अर्शकुठाररस–पु., रसोऽयं अर्शसि हितः (रस. र. प्रयोगाः)
अर्शःसूदन–पु., शूरणः
अर्शिन्–त्रि., अर्शोयुक्तः (श. र.)
अर्शोघ्नवल्कला–स्त्री., तेजवलो (वै. नि.)
अर्शोघ्नी– तालमूली (रत्ना. मे. नत्रिकं) भल्लातकः (वै. नि.)
अर्शोज–पु., भगन्दररोगः
अर्शोहररस–पु., रसोऽयं अर्शसि हितः रसवैक्रान्तशुद्धा-भ्रकान्तभस्मसगन्धका । तुल्यांशं मर्दयेच्चार्द्रदाडि–मोत्थैः रसैस्ततः (रस. र.)
अर्शोहित–पु., भल्लातकवृक्षः (त्रि. का.)
अर्ह–न., सुवर्णम् (वै. नि.)
अर्हा–स्त्री., त्रायमाणालता (वै. नि.)
अलकप्रिय -पु., कृष्णभल्लातकः (मद व.)
अलह्वकाय–पु., कटुनिम्बः (वै. नि.)
अलगण–पु., नेत्ररोगविशेषः (वै. नि.)
अलगर्ध–पु., अलगर्धः (अम.)
अलङ्कारसुवर्ण–न., शृङ्गीकनकम् (हारा)
अलम्बमुष्कक–पु., मुष्ककवृक्षः
अलम्बा–स्त्री., तिक्ताला (सुक. २) द्र० पत्रविषम्
अलम्बुजा–स्त्री., गोरक्षमुण्डी (वै. नि.)
अलम्बुद–न., वालकम् (वै. नि. क्षयचि. शिवगुटी.)
अलम्बुष–पु., वान्तिरोगः (मे. षचतुष्क) भूकदम्बः (र. मा. रत्न.)
अलम्बुषा–(सा)–स्त्री., लज्जालुकाभेदः (भा. पू. १ भ गुव.) महाश्रावणी (रा. व. ५ वै. नि. वा. व्या. षडशीति) गुग्गुलुः त्र्युषणाद्यलौहः च । लौहमलम् (च. द. १ भ. आमवाते अलम्बुषाचूर्णे)
अलम्बुषाद्यचूर्ण–न., चूर्णम्। आमवाते देयम् (च. द. आमवातचि. भा. रस. र.)
अलम्बोर्ध्वस्तनी–त्रि., यस्याः स्तनौ न लम्बौ नोर्ध्वमुखौ च सा (सु. शा. १०)
अलम्बौष्ठी–त्रि., यस्याः ओष्ठौ लम्बमानौ न भवति सा (सु. शा. १०)
अलमोस–पु., मत्स्यभेदः (वै. नि.)
अलसा–स्त्री., हंसपदीलता (मे. सत्रिकं.)
अलसी–स्त्री., अतसी (वै. नि.)
अलसेलुका–स्त्री., रक्तलज्जालुः (वै. नि.)

अलात–न., अङ्गारकः (रत्ना.)
अलाबुक–पु., अश्वस्य मुखरोगः अत्र मुखदौर्गन्ध्यं तालुशोफः ग्रासग्रहणे विद्वेषश्च भवति (ज. द.)
अलाबुका–स्त्री., कटुदुग्धालाबुनि (भा.)
अलाबुनी–स्त्री., कटुदुग्धालाबुः कटुतुम्बी । मिष्टतुम्बीलता (मदव. ७)
अलाबुविधि–पु., अलाब्वारक्तमोक्षणम् (सुसू. १३)
अलाबुयन्त्र–न., यन्त्रविशेषः । लक्षणम्–स्याद्द्वादशाङ्गुलाऽलाबुर्नाहे त्वष्टादशाङ्गुला । चतुरुयङ्गुलवृत्तास्यदीक्षान्तश्लेष्मरक्तहृत् (कश्चित्. अत्रि.)
अलाबुसुहृत्–पु., अम्लवेतसम् (वै. नि.)
अलास–पु., जिह्वास्फोटम् । जिह्वागतमुखरोगः (सु. नि. १६)
अलि–(इन्)–पु., वृश्चिकः । भ्रमरः (मे)
अलिक–न., ललाटम् (हे. च.)
अलिक–पु., न., कपोलः (रा. व. १८) ललाटम् (रत्ना.)
अलिकमत्स्य–पु., अङ्गारः । भिन्नतिलतैलभृष्टमांसम् पिष्टकम्
अलिकुलप्रिया–स्त्री.. काष्ठशेवन्ती (वै. नि.)
अलिकुलसङ्कुला–स्त्री., कण्टकशेवती । कुब्जकावृक्षः (रा. व. १०. भा. पू. १ भ.)
अलिगर्द–पु., जलसर्पः (श. र.)
अलिजिह्वा–(ह्विका)–स्त्री., क्षुद्रजिह्विका (श. र.)
अलिञ्जर–न., फलविशेषः
म.—चिरफोटी.
अलिता–स्त्री., अलक्तकम् । गुणाः–अलितोष्णा तिक्तका स्यात्कफवातव्रणापहा । व्यङ्गारुचिकण्ठरुजं व्रणदोषञ्च नाशयेत् । अन्ये गुणाश्च लाक्षावत्प्रोक्ताः पूर्वमहर्षिभिः (वै. नि.)
अलिपक–पु., भ्रमरः । कोकिलः । कुक्कुरः (सर्वत्र. मे. कचतुष्कम्)
अलिपत्रिका–स्त्री., वृश्चिकाली (रा. व. ५)
अलिप्रिय–न., रक्तोत्पलम् (त्रिका.)
पु., धाराकदम्बवृक्षः । आम्रवृक्षः (श. र.)
अलिप्रिया–स्त्री., पाटलावृक्षः (पमू.)
कदम्बवृक्षः (भा. पू. ११)
भूजम्बूवृक्षः (वै. नि.)
अलिमक–पु., भेकः । कोकिलः । भ्रमरः । पद्मकेश । मधूकवृक्षः (मे. कचतुष्कम्)
अलिमोदा–स्त्री., गणिकारा (रा. व. ९)

अलिम्पक–(म्बक)–पु., कोकिलः । मधुमक्षिका । कुक्कुरः । पद्मकेशरम् (वै. नि.)
अलिवल्लभा–स्त्री., रक्तपाटला भा. पू. १ थ.)
अलिवाहिनी–स्त्री., कोकणदेशप्रसिद्धे केरिका वृक्षः । केवेर इति भाषा (रा. व. १०)
अलिसमाकुल–पु., पुष्पवृक्षविशेषः । दवणसेवन्तीति महाराष्ट्रादौ (वै. नि.)
अलीकमत्स्य–पु., अङ्गारस्विन्नतिलतैलभृष्टमाषपिष्टकः (भा. पू. २ भ)
अलीनक–न., वङ्गम् (हे. च.)
अलीष्ट–पु., तिलकवृक्षः (वै. नि.)
अलु–पु., स्त्री., गलन्तीका आलौ । तुलसी (न) मूलम् (मे. कद्विकम्)
अलुक–न., आलुकसाधारणम् । एतच्च राजालुरक्तराजालुश्वेतकृष्णवन्यकांस्यालुभेदेन बहुविधम् । आलुबोखार इति प्रसिद्धे काबेलदेशीयफलम्, आमिषम्
अलोमशा–पु., मत्स्यविशेषः (रा. व. १७)
अलोहित–न., रक्तपद्मम्, ईषद्रक्तपद्मम्
अल्क–पु., वृक्षविशेषः । शरीरावयवः
अल्पकेशिका–स्त्री., भूतकेशी (र. मा. प. मु. रत्ना.)
अल्पकेशी– ,,
अल्पक्षुपा–स्त्री., ह्रस्वलज्जालुका (वै. नि.)
अल्पगन्ध–न., रक्तकैरवम् । रक्तकमलम् (वै. नि.)
अल्पगोधूम–पु,, तृणगोधूमः (प. मु. मद. व १०)
अल्पघण्टिका–न., ह्रस्वशणपुष्पी
म.—लघु ताग.
अल्पतनु–त्रि., खर्वः (अम.)
अल्पनायिकाचूर्ण–न., औषधमिदं ग्रहण्यां हितम् (र. चि.)
अल्पपत्र–पु., क्षुद्रपत्रतुलसी (र. मा.)
न., रक्तपद्मम् (र. मा.)
अल्पपत्रक–पु., गिरिजमधूकवृक्षः (रत्ना.)
अल्पपत्री–स्त्री., मिश्रेया मुषली (वै. नि.)
अल्पपद्म–न., रक्तपद्मम् । रक्तोत्पलम् (वै. नि. द्रव्यगुण.)
अल्पपर्णिका–स्त्री., मुद्गपर्णी (वै. नि.)
अल्पपर्णी– ,,
अल्पपुष्पिका–स्त्री., पीतकरवीरः (वै. नि.)
अल्पप्रमाणक–पु., लतापनसः (र. मा.)
अल्पमस्तक–पु., चित्रकक्षुपः (वै. नि.)

अल्पमक्षिका–स्त्री., मक्षिकाविशेषः (वै. नि.)
अल्पमारिष–पु., क्षुद्रमारिषः (भा. पू. १ भ)
अल्परसा–स्त्री., हैमवती (रा. व २३)
अल्पवर्त्तक–पु., तित्तिरः (म. द. व. १२)
अल्पशोफ–पु., सर्वाक्षिरोगः (वै. नि.)
अल्पास्थि–न., परूषकफलम् (रा. व. ११ भा. पू. १ भ)
अल्पिका–स्त्री., वनमक्षिका (हे. च. ४) मुद्गपर्णी (भा. पू. १ भ.)
अल्लक–पु., कक्कोलविशेषः । धान्यकम् (वै. नि.)
अल्ला–स्त्री., माता । धान्यकम्
अल्लु–न., अल्लकः (म. द. व ६.)
अवकुन्थन–न., आर्तनादः
अवकूलन–न., अङ्गावुष्णीकरणम् (च. द. अतिसारचि.) अङ्गारेष्ववकूलयेत्
अवकेशिन्–त्रि., अफलवृक्षः (हे. च.)
अवक्र–पु., सरलवृक्षः
अवक्षिप्तसंधि–पु., सन्धिविश्लेषः । सन्धिच्युतं सत् नीचमुखेनावस्थानम् । सन्ध्यस्थ्नोरतिक्रान्तता वेदना च
अवक्षेपणी–स्त्री., (वल्गा हेच) (सु. नि. १५ अ)
अवगण्ड–पु., गण्डदेशस्थव्रणः (त्रिका.)
म.—पुटकुळी.
अवगथ–पु., प्रातःस्नानम्
अवगाह–पु., स्नानम् । स्नानगृहम्
अवगाहनस्नानम् । मज्जनपूर्वकस्नानम्
अवगाहस्वेद–पु., अवहगाहनेन स्वेदः (वा. सू. १७)
अवगीर्ण–त्रि., अपानान्निर्गतम् ।
अवगुण्ठन–न., योषितः शिरःप्रावरणम् स्त्रीमुखाच्छादनम् ।
अवगुण्ठित–न., चूर्णितम् (त्रिका.)
अवग्रह–पु., गजललाटदेशः (हा. रा.)
अवग्राह–पु., अवहारकः
अवचूर्ण–न., स्थूलचूर्णम्
अवचूर्णित–त्रि., चूर्णितम्
अवञ्चक–त्रि., भक्तिमान् (रोगी) (वै. नि.)
अवट–(टी)–पु., नाडीव्रणः, कूपपः (मे.)
अवटीट–त्रि., नतनासिका (अम.)
अवड–पु., मन्यापृष्ठभागः (वै. नि.)
अवताप–पु., अजाविज्वरः (गजवै.)
अवतारण–न., भूतादिग्रहः वस्त्राञ्चलम् (मे. णपञ्चकम्)
अवतोका–(दा)–स्त्री., स्रवद्गर्भा गौः; पतितगर्भा गौः (हला.)

अवदंश–पु., सुरापानरुचिजनकभक्ष्यद्रव्यम् (हला.) शिग्रुवृक्षः । कृष्णशिग्रुः (वै. नि.)
अवदान–न., उशीरम् (अ. टी.)
अवदान्त–पु., शिग्रुवृक्षः (वै. नि.)
अवदाह–(कम्)–न., लामज्जकतृणम् (भा. पू. १ भ.) वीरणमूलम् (वै. नि.)
म.—पिवळा वाळा.
अवदाहेष्ट–न., वीरणमूलम् (अ. टी.)
अवदाहैष्टकापथ–न., उशीरभेदः (अ. टी. भ.)
अवदोह–पु., दुग्धम् (त्रिका.)
अवध्वंस–पु., अवचूर्णनम् (मे.)
अवध्वस्त–पु., अवचूर्णितम् (मे. तचतुष्कं)
अवना (नी)–स्त्री., त्रायमाणा (रा. व. ५)
अवनाट–त्रि., नतनासिका (अम.)
अवनि–वि., अशुष्कम् अशुष्कफलादौ (श. र.)
अवनीसारा–स्त्री., कदली (वै. नि.)
अवन्ति (न्ती) सोम–न., काञ्जिकम् (प. मु.) (हारा.) राव १५१ वर्णच्छायाप्रकाशिका त्वक् ।
अवभासिका (नी) स्त्री., सा च व्रीहेरष्टादशभागप्रमाणा (सु. शा. ५ अ.)
अवभ्रट–त्रि., नतनासिका
अवमर्द–(न)–पु., न., पीडनम् (अम.)
अवमोटन–न., आमोटनम् (मा. नि. वातव्या)
अवयवस्थान–न., शरीरम् । अवयविन् (पु.,) पक्षी (वै. नि.)
अवर–न., गजपश्चाज्जङ्घादि (अम.)
अवरदारुक–न., तन्नामकस्थावरविषान्तर्गतपत्रविशेषः (सुक. २)
अवरिका–स्त्री., धान्यकम् (रा. व. ६)
अवरोहक–पु., अश्वगन्धा (मद. व. १)
अवरोहशाखिन्–पु., प्लक्षवृक्षः (रा. व. ११)
अवरोहिका–स्त्री., अश्वगन्धा (रा. व.)
अवरोहिन्–पु., वटवृक्षः (रा. व. ११)
अवलग्न–पु., मध्यप्रदेशः (हलायुधः)
अवला–स्त्री., नारी (रत्ना) प्रियङ्गुः, गलगण्डे प्रयोज्येयम् । ' मधुलोध्रावलासर्जं ' ।
अवलुञ्चन–न., मुण्डनम् । शैथिल्यम् (सुसू. २५)
अवलेप–पु., गर्वः । लेपनम् । भूषणम् (म. प. चतुष्कं)
अवलेहन–न., लेहनम् ।
अवल्क–पु., मेषश्रृङ्गी (वै. नि.)
अवल्गुजबीज–न., सोमराजीबीजम्

अवल्गुजा-स्त्री., कृष्णसोमराजी (भैष. भल्ला. गुडे)
अवशाकुथिका-स्त्री., जानुदेशः
अवश्य-पु. स्त्री., तुषारः (भा. म. ४ भ)
अवश्या-पु. स्त्री., ,, ,,
शिरोरोग० अर्धावभेदकः। प्राग्वातावश्यायमैथुनैः जातः (भल्ला गुडे)
अवश्याय-पु., शिशिरम् (च. द. पि. ज्व.) मृद्वीकादि ' अवश्यायस्थितं पाक्यम् तुषारः (भा. म. ४ भ. नासारोगे)
अवष्वाण-न., भक्षणम् (हे. च.)
अवसित-न., मर्दितधान्यम्
अवसेकीम-पु., वटकिः (वै. नि.)
अवस्कंद-पु., अवगाहनस्नानम्
अवस्कयणी-स्त्री., बहुदिनानन्तरप्रसूता गौः
अवस्कर-पु., विष्ठा, गुह्यदेशः (मे. र. चतुष्क)
अवहस्त-पु., हस्तपृष्ठम् (हे. च.)
अवहार-क. पु. ग्राहारण्यजलजन्तुः (मे. र. चतुष्क)
अवाचीन-विपर्यस्तः (मे न चतुष्क)
अवाच्यदेश-पु., योनिः (त्रिका)
अवि-पु., मेषः (भा पू.) स्त्री. कुलत्थिका (र. म.)
अविक-न., हीरकम् (रा.)
अविकमांस-न., मेषमांसम् (वै. नि.)
अविगन्धनी-स्त्री., अजगन्धा तिलोणीबर्ब्बरीति लोके (रा. व. ४)
अविगन्धिनी- ,, ,, ,, ,,
अविगन्धिनीका- ,, ,, ,, ,,
अविघ्न-(घ्न)-पु., पानीयामलकः
अवितक्र-न., मेषीतक्रम्। गुणाः— अवितक्रमपथ्यं स्याद्वम्लदुर्गन्धकारकम्। दीपनं कटुकञ्चोष्णं लेखनं लघु पित्तकृत्। रक्तदोषकरञ्चैव कफवातविनाशकम् (द्रव्यगुणः)
अवित्यज-पु., पारदः। शब्दकल्पद्रुमः (रा. व. १३)
अविदुग्ध-न., आविकक्षीरम् मेषीदुग्धम् (हला)
अविदु (दू) ष्य-न., आविकक्षीरम्
अविद्धकर्णा-स्त्री., पाठा (अ.टी. सा. कौ.) जातीफलावटी। भृङ्गराजः (अ. टी.)
अविद्धकर्णिका-स्त्री., पाठा (अ. टी,) जातीफलावटी
अविद्धा-स्त्री., दुष्टशिराव्यधनम् (सु. शा. ८)
अविपक्ति (त्ति) करचूर्ण-न., अम्लपित्ते उपयोज्यम् (र. सा. सं. । भैष)

अविपट-पु., ऊर्णामयवस्त्रम्। कम्बलादिः
अविभुज्-पु.,व्याघ्रः (वै. नि)
म.—लांडगा.
अविमरीष (स)-न., अविक्षीरम् (हला)
अविमुक्तक-पु., माधवीलता (वै. नि.)
अविमुक्तका-स्त्री., तिन्दुकवृक्षः काकतिन्दुकः (वै. नि.)
म.—टेंभुरणी.
अविमोच-न., आविकक्षीरम्
अविला-स्त्री., मेषी (हे. च.)
अविवृक्ष-पु., मेषशृङ्गी (वै. नि.)
अविशिर-न., सूर्यावर्तफलम् (वै. नि,)
अविश्वासा-स्त्री.,चिरप्रसूता गौः (श. च)
अविषा-स्त्री., अतिविषा (रा. व. ६)
अविसोढ-न., अविक्षीरम् (हला.)
अविस्र-त्रि., पूतिगन्धरहितः (च. चि. २ अ.)
अवी-स्त्री., वनकुलत्थः (र. मा.) ऋतुमती स्त्री (हेच.)
अवीजधर्मिन्-त्रि., यो बीजधर्मी न भवति (सुशा.१)
अवीजा-स्त्री., गोस्तनीसदृशगुणद्राक्षा (भा.)
अवीदुग्ध-(न.) मेषी दुग्धम् (च. द.)
अवीमूत्र-न., मेषीमूत्रम् (च. द.)
अवुक- पु., छागः (श. र.)
अवेद्य-पु., गोवत्सः (श. र.)
अवोद-न., आर्द्रकम् (जटा)
अव्यक्ता-स्त्री., कृष्णगोकर्णी
म. काळी-गोकर्णी (वै. नि.)
अव्यङ्ग-त्रि., अविकलाङ्गम् स्त्री., शूकशिम्बी
अव्यजन-त्रि., शृङ्गहीनः (हला.)
अव्यण्ड-पु., स्त्री., भूम्यामलकी, कपिकच्छुः (च. चि. ३. अ)
अव्यथि-पु., अश्वः
अव्यथ्या-स्त्री., हरीतकी (भा. पू. १ भ.)
अव्यया-स्त्री., गोरक्षमुण्डी (वै. नि.) (च) (सु. नि. १५ अ)
अव्रणशुक्र-पु., नेत्रस्य कृष्णभागगतरोगविशेषः अभिष्यन्दजः ज्वालायुक्तः शङ्खेन्दुकुन्दुसदृशवर्णः नभःस्थतनुमेघाकृतिश्च सुसाध्यः (सु. उ. ५ अ. मानि)

अशकुम्भी-स्त्री., पानीयोपरिजवृक्षः (रमा.)
अश(स)नक-पु., असनपुष्पाकारधान्यविशेषः (सु. सू. ४६ अ.)
अशनपर्णी-पु., स्त्री., विजयसार इति प्रसिद्धवृक्षः (माराटी इति च पश्चिमदेशे) गोकर्णलता (अम.)
अशनपुष्प-पु., अशनपुष्पाकारशालिः (सुसू. ४६)
अशनमल्लिका-स्त्री., आस्फोता (च. द.)
अशना(या)-स्त्री., क्षुधा (हला) शुक्लनिष्पावः (रा. व. ७)
अशनि--पु., हरिकम् (वै. नि.)
अशान्तगन्धाढ्या-स्त्री., आम्रहरिद्रा
अशितलता-स्त्री., नीलदूर्वा (वै. नि.)
अशिशिम्बी-स्त्री., स्वनामख्यातशिम्बीविशेषः (रा. व.७)
अशिश्विका-स्त्री., अनपत्या (श. र.)
अशीता-स्त्री., भूमिकूष्माण्डः (वै. नि.)
अशुक्ला-,, ,, ,,
अशुक्लजा-स्त्री., वोरोधान्यम् (वै. नि.)
अशूकज(क)-पु., मुण्डशालिः (रा. व. १६)
अशृत-न., क्षपक्कम्
अशोकघृत-न., प्रदराधिकारे प्रयोज्यम् (भैष. प्रयोगः असृक्दरचि.)
अशोका-स्त्री., कटुरोहिणी (भा. पू. १ भ.)
अशोकारि-पु., कदम्बवृक्षः (श. च.)
अशोथनेत्रपाक-पु., विनाशोथनेत्रपाकः (मा. नि.) अयं कण्डूपदेहाश्रुयुक्तः पक्कोदुम्बरनिभः संरम्भी च भवति
अश्मकर-न., स्वर्णम् (रत्ना.)
अश्मकृच्छ्रहा-स्त्री., वेलन्तरवृक्षः (म. वेलतूर). (वै. नि.)
अश्मगर्भक-पु., तिनिशवृक्षः (मद. व. ५)
अश्मपुष्प-न., शैलजः (अम.)
अश्मभाण्ड-न., लौहभाण्डविशेषः (श. च.) खल्लः इति भाषा
अश्मयोनि-(नी)-स्त्री., नीलमणिः (अ. टी.) अश्मन्तकवृक्षः (मद. व. १०)
अश्मरीघ्न-पु., वरुणवृक्षः (त्रिका.)
म.—वायवरणा.
अश्मरीप्रिय-पु., महाशालीधान्यम् (प. मु.)
अश्मरीभेद-पु., पाषाणभेदवृक्षः (मद. व. १)
अश्मरीभेदन-पु., पाषाणभेदकः (वै. नि.)

अश्मरीशर्करा-स्त्री., तन्नामकरोगविशेषः, शर्करा सिकता मेहो भस्माख्योऽश्मरिवैकृतम् (सु. नि. ३ अ.)
अश्मरीहर-पु., देवधान्यम्, वरुणवृक्षः (र. मा.)
म.—वायवरणा.
अश्मर्याहरणयन्त्र-न., तदाहरणयन्त्र०। 'अश्मर्याहरणं सर्पफणावद्यन्त्रमग्रतः' (कश्चिदत्रिः)
अश्मसम्भव-न., शिलाजतुः (र. सा.)
अश्मसुता-स्त्री., पाठा (वै. वि.)
म.—पहाडमूळ.
अश्म (हन्)-पु., पाषाणभेदः
अश्महृत्-पु., न., कवाटवक्रक्षुपः (रत्ना) शिलाजतुः
अश्मीर-पु., मूत्रकृच्छ्रः (उणा.)
अश्यामा-स्त्री., श्वेतत्रिवृता
अश्र-न., रुधिरम् (अ. टी.)
अश्रुनाली-स्त्री., भगन्दररोग० (वै. नि.)
अश्वक-पु., कुलिङ्गपक्षी
अश्वकन्दक-पु., अश्वगन्धा (रत्ना)
अश्वकन्दिका-स्त्री., वनस्पतिविशेषः। अश्वगन्धा (र. मा)
अश्वकातरा-स्त्री., हयकातरा
म.—घोडेकाथर.
गुणाः—असौ तिक्ता वातघ्नी दीपनी। काथराह्वयपर्यायैः कथरा वै प्रकीर्तिता। (रा)
अश्वकाथरि-स्त्री., ,,
अश्वक्षुरा (रिका) री- स्त्री., श्वेतापराजीता कृष्णापराजिता (वै. नि.)
अश्वखरज-पु., अश्वतरः (रा)
अश्वगन्धाघृत-न., बालरोगाधिकारे देयम्। पादकल्केऽश्वगन्धायाः क्षीरे दशगुणे पचेत्। द्वितीयं वातव्याधौ देयम्। (च.द. वातव्याधिचि.)। तृतीय चतुर्थे बृहदभिधाने वातव्याधौ वृष्ये च उक्तम् (र. स. र. भैष.)
अश्वगन्धातैल-न., प्रथमं वातव्याधौ हितम् (च. द. प्रयोगा) द्वितीयं रसायनाधिकारे (च. द.)
अश्वगन्धाद्यचूर्ण-न., स्वरभङ्गनाशनमिदम् (र स र)
अश्वगोष्ठ-न., वाजिशाला.
अश्वजीवन-पु., चणकः (वै. नि.)
अश्वतर-पु., अश्वखरजः। स च अश्वायां गर्दभाज्जातः तन्मांसं बल्यं बृंहणं कफपित्तकरञ्च (म द व १२)
अश्वत्थक-न., मल्लिका पुष्पदलम् (वै. नि.)

अश्वत्थफलका-ला. (स्त्री.) हपुषा (हिं. हौ हबर; म. लघुशेरणी) (भा. पू. १ भ)

अश्वत्थभित्-(भेदः) पु., नन्दीवृक्षः (हिं. वालिया-पीपर) (भा. पू. १ भ. वटादिवर्गः)

अश्वत्थिका-(त्थी) (स्त्री.,) क्षुद्रपयोश्वत्थवृक्षः (रा. व. ११) श्रीवल्लीवृक्षः (रा. व. ८)

अश्वदंष्ट्रक-पु., गोक्षुरकः (वै. नि.) हिंस्रजन्तुविशेषः

अश्वदंष्ट्रका-स्त्री., गोक्षुरकः (भा. पू. भ.)

अश्वपर्णिका-(र्णी) स्त्री., भूतकेशीलता

अश्वपाल-पु., अश्वरक्षकः

अश्वपुच्छका-पु., खड्गलता

अश्वपुच्छा-स्त्री., पृश्निपर्णी (रा. व.)

अश्वपुटभावना-स्त्री., द्वात्रिंशत्पलपरिमितद्रव्यस्य भावना (वै. नि.)

अश्वपुत्री-स्त्री., शल्लकीवृक्षः (रत्ना) द्रवन्ती (वै. नि.)

अश्वबल-स्त्री., मेथिका नारीशाकम्, गुणाः-शाकमाश्वबलं रूक्षं बद्धविण्मूत्रमारुतम् (सु.)

अश्वबाल-पु., काशतृणम् (स्त्री. का.)

अश्वमाराख्य-पु., श्वेतकरवीरवृक्षः (रा. व. १०)

अश्वमाल-पु., सर्पविशेषः (वै. नि.)

अश्वयान-न., अश्वेन भ्रमणम्। ' घोटकारोहणं वातपित्ताग्निश्रमकृन्मतम्। मेदोवर्णकफघ्नञ्च हितं तद्बलिनां वरम् (दिनचर्या)

अश्वरक्षक-पु., अश्वपालः

अश्वरिपु-पु., करवीरवृक्षः । महिषः (भा.)

अश्वरोहका-(हा)-स्त्री., अश्वगन्धा

अश्वल-न., क्षुद्रतृणविशेषः । ' अश्वलञ्चतृणं बल्यं रुच्यं पशुहितावहम् (वै. नि.)

अश्वलोमन्-पु., सर्पविशेषः (त्रि. का.)

अश्ववराह-पु., वाराहीकन्दः (वै. नि.)

अश्ववह-(वाह)-पु., अश्ववाहकः (जटा.)

अश्ववारण-पु., गवयः (हे. च.)

अश्ववैद्य-पु., अश्वशास्त्रप्रणेता शालिहोत्रादिः

अश्ववैद्यक-न., अश्वचिकित्साशास्त्रम्। तच्च बहुविधं शालिहोत्रनकुलजयदत्तादिप्रणीतम्

अश्वशाला-स्त्री., मन्दुरा (हला.)

अश्वहा-स्त्री., श्वेतकरवीरवृक्षः (म. द. व. १)

अश्वाक्ष-पु., देवसर्षपः । अम । वृक्षभेदे (रा.)

अश्वातक्र-न., घोटकीतक्रम् । तस्य गुणाः-अश्वातक्रं तु तुवरं किञ्चिद्वातकरं मतम् । अग्निदीप्तिकरं रूक्षं नेत्र्यं मूर्च्छाकफापहम् (वै. नि.)

अश्वानादिखुरा (री)-स्त्री., श्वेतापराजिता (रा.व. ३)

अश्वान्तक-पु., श्वेतकरवीरः (रा. व. १०)

अश्वारि-पु., करवीरवृक्षः (भेष. कुष्ठचि.) मरिच्याद्यतैलम् । महिषः (जटा.)

अश्वासना-स्त्री., ऋद्धिः । घोटका (वै. नि.)

अश्वाह्वा-स्त्री., अश्वगन्धा (वै. नि.) वातव्याधि० शतावरीतैलं, नारायणतैलं

अश्विज-पु., अश्विनीकुमारौ

अश्विनी-स्त्री., जटामांसी (वै. नि.)

अश्विन्-पु., अश्विनीकुमारद्वये (रत्ना.)

अश्विभेषज-न., लघुमेषशृङ्गी (वै. नि.)

अश्वीघृत-न., घोटकीक्षीरोत्थनवनीतजघृतम् । गुणाः-तच्च कटु मधुरं कषायम् ईषद्दीपनं गुरु मूर्च्छाहरं वाताल्पत्वकरञ्च (रा. व. ६)

अश्वीदधि-न., घोटकीदुग्धजातदधिगुणाः-मधुरकषायरूक्षं कफरोगमूर्च्छाहरं इषद्वातलं दीपनं नेत्रदोषघ्नं च (रा. व. १६)

म.—घोडीचे दही.

कं.—कुदिरेयसोसरु.

अश्वीनवनीत-न, घोटकीजातनवनीतम् । गुणाः-कषायं कफवातघ्नं चक्षुष्यं कटु उष्णं ईषद्वातलञ्च (रा. व. १६)

अश्वीय-न., अश्वसमूहः (वि.,) अश्वहितम् (मे. यत्रिक.)

अश्वीक्षीर-न., घोटकीदुग्धम् गुणाः-उष्णं रूक्षं बल्यं वातकफघ्नं-एकशफक्षीरमात्रं लवणाम्लं लघु स्वादु च (मद व. ८)

अश्वेता-स्त्री., कृष्णापराजिता । कृष्णातिविषा (वै. नि.) गम्भारीवृक्षः (रा.)

अष्टकट्वरतैल-न., तैलमिदं वातरक्ते ऊरुस्तम्भे च हितम् (च. द. उ. स्त. चि.) अस्नेहदधि अघृततक्रं ग्राह्यम् (रस. र)

अष्टकर्म-न., अष्टादशरसकर्मणां मध्ये स्वेदनादि दीपनपर्यन्ते सूतस्याष्टविधसंस्करणम्

अष्टका-स्त्री., वृक्षभेदः

अष्टगाध-पु., ऊर्णनाभिः

अष्टगुणमण्ड-पु., भृष्टमुद्गतण्डुलान् चतुर्दश गुणे तोये पक्त्वा, तत्र हिङ्गुसैन्धवधान्यशुण्ठीमरिचपिप्पलीचूर्णानि आसिक्थः गृहीतः मण्डः ।

गुणाः-क्षुधावर्धनः बलकरः, बस्तिशोधनश्च (वै. नि.) अत्र तण्डुलस्याष्टभागः मुद्गस्य च चत्वारः ग्राह्याः

अष्टधातु-पु., स्वर्णरौप्यताम्रसीसपित्तलरङ्गकान्तलौह-मुण्डतीक्ष्णलौहेषु (र. सा. स. टी.)

अष्टफल-न., शरावमानम् (भा.)

अष्टपलघृत-न., ग्रहणीरोगे उपयोज्यम् (च. द.)

अष्टपात्-(द्)-पु., काश्मीरदेशीयशरभः (मदव. १२) ऊर्णनाभिः (हे. च. ४ का.)

अष्टपादप-पु., वृक्षभेदः (वै. नि.)

अष्टपादिका-स्त्री., शारदमल्लिका (रत्ना) आस्फोता (प. मु. व. ११)

अष्टभाव-पु., स्तम्भ-स्वेद-रोमाञ्च-स्वरभङ्गवैस्वर्य-कम्प-वैवर्ण्याश्रुपातेषु (वै. नि.)

अष्टमङ्गल-पु., पुच्छोरःखुरकेशास्यैः शुक्लः वाजी (हे. च.) 'यस्य पादाः सिताः सर्वे पुच्छं वक्षो मुखं तथा । मूर्द्धजाश्च सिता यस्य तं विद्यात् अष्टमङ्गलम् (ज. द. ३ अ) ब्राह्मणगवाग्निस्वर्ण-घृतसूर्याश्वनृपचारुचर्याः (वै. नि.)

अष्टमङ्गलघृत-न., बालरोगशमनसर्पिः तच्चाष्टौषधि-पक्वं बालानां हितम् । वचाकुष्ठब्राह्मीसर्षप शारिवा-सैन्धवपिप्पलीकल्केनाष्टमं घृतं घृतपाकविधिना पाच्यम् ।

अष्टमधुजाति-स्त्री., माक्षिकभ्रामरक्षौद्रपौत्तिकछात्र-कार्ध्यौद्दालदालेषु मधुप्रकारेषु इयं प्रसिद्धा (वै. नि.)

अष्टमी-स्त्री., क्षीरकाकोली (वै. नि.)

अष्टमूत्र-न., गोच्छागमेषमहिषाश्वहस्त्युष्ट्रगर्दभीमूत्राणि (वै. नि.)

अष्टमूल-न., त्वङ्मांसशिरास्नाय्वस्थिसन्धिकिट्टामर्ममूलेषु (सु. चि. १)

अष्टमौक्तिकस्थान-न., शङ्खहस्तिसर्पमत्स्यमेघवंश-शूकरशुक्तिषु (वै. नि.)

अष्टलौहक-न., लौहसमूहः (रा. व. २२)

अष्टवर्गप्रतिनिधि-पु., मेदादीनामभावे तत्तुल्यगुणद्रव्यं ग्राह्यम्, तच्च मेदामहामेदाभावे शतावरी, जीवकर्ष-भकस्थाने भूमिकूष्माण्डमूलं, काकोलीक्षीर-काकोल्यभावे अश्वगन्धामूलं, ऋद्धिवृद्धिस्थाने वाराहीकन्दं तत्तुल्यगुणं क्षिपेत् (भा. पू. १ भ)

अष्टविधान्न-न., चर्व्यचौष्यलेह्यपेयखाद्यभोज्यभक्ष्य-निष्पेयरूपं भोजनद्रव्यम्

अष्टाङ्ग-न., आयुर्वेदस्य स्थानाष्टकानि तद्यथा-शल्यं, शालाक्यं, कायचिकित्सा, भूतविद्या, कौमारभृत्यम्, अगदतन्त्रं, रसायनं, वाजीकरणञ्चेति । कायबाल-ग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान् । अष्टावङ्गानि तस्याहुः (वा. सू. १ अ.) द्रव्याभिधानगदनिश्चयशल्य-कायभूतनिग्रहविषनिग्रहरसायनबालचिकित्सा च (वैद्यकम्)

अष्टाङ्गघृत-न., वाजीकरणमिदं घृतम्

अष्टाङ्गधूप-पु., ज्वरघ्नोऽयं धूपः (च. द.)

अष्टाङ्गयोग-पु., योगविशेषः । तद्यथाकट्फलं पौष्करं शृङ्गी व्योषं यासश्च (कारवी) । इति (संग्रहः)

अष्टाङ्गरस-पु., अर्शोऽधिकारे देयम् (र. सा. सं)

अष्टाङ्गवैद्यक-न., शालाक्यकायभूतागदबालविषवाजी-रसायनम अष्टाङ्गवैद्यकम्

अष्टाङ्गावलेह-(हिका)-पु., स्त्री., सन्निपातज्वरहिक्का-श्वासादौ हितः (भेष. ज्वर चि.)

अष्टादशधान्य-न., कलायगोधूमाढकीयवयावनालशालि चणकमसूरातसीमुद्गतिलकुलत्थश्यामाकमाषराज-माषवर्तुलहरिकककुङ्गुतेरणीः (वै. नि.)

अष्टादशमूल-न., बिल्वाग्निमंथ शोणाकगम्भारीपाठा-पुनर्नवावाट्यालकमाषपर्णी जीवकैरण्डर्षभकजीवन्ती शतावरीशरेक्षुदर्भकासशालिधान्यमूलानि (वै. नि.)

अष्टादशशतिकमहाप्रसारणीतैल-न., इदं वात-व्याधौ देयम् (च. द. वा. व्या. चि.)

अष्टादशाङ्ग-पु., सन्निपातज्वरे कषायविशेषः स चतु-र्विधः, दशमूल्यादिः, भूनिम्बादिः, द्राक्षादिः, मुस्तकादिश्च (च. द. भेष.)

अष्टादशाङ्गलौह-न., पाण्ड्वधिकारे लौहम् (भा. म. २ म.)

अष्टावक्ररस-पु., रसायनाधिकारे रसः (भेष)

अष्टि-(ष्टी) स्त्री. अष्ठ्याम्

अष्टौषधी-स्त्री., ब्रह्मसुवर्चलाऽऽदित्यपर्णानारीकाष्ठगोधा-सर्पासोमपद्माजनील्य इत्यष्टौ ओषधयः (च. चि. १ अ)

अष्ठि-(ष्ठी) वत् पु., शूकरोगविशेषः (सुनि. १४) जानुष्ठी (रा व १८)

असंक्लिन्न-त्रि., नसम्यगार्द्रम् (भा. पू. १ भ). पिण्डी कृतमसांक्लन्नम्

असन-छागकर्णवत्पत्रशालवृक्षविशेषःपीतशालइतिप्रसिद्धः (प. मु.) विजयसार इति प्रसिद्धः (भा. पू. १ भ वटादि व) असन इति प्रसिद्धः (र. मा. रत्ना)

असनपर्णिका–(र्णी.) स्त्री. अपराजिता
असरु–पु. भूकदम्बः (श. च.)
असल–न., लौहम् अस्त्रम् (वै. नि.)
असात्म्य–त्रि., प्रकृत्यसुखावहम् (न.,) सात्म्यवैपरीत्यम्
असारदधि–न., गृहीतनवनीतदधि । गुणाः– असारं दधि संग्राहि शीतलं वातलं लघु । विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् (भा. पु दधिव)
असारा–स्त्री., कदलीवृक्षः (वै. नि.)
असिक–न., चिबुकौष्ठमध्यभागः (हे. च.)
असिक्निका–(क्नी) स्त्री., अवृद्धान्तःपुरःप्रेषी (मे. नत्रिकन्) दासी (जटा.)
असिगण्ड–पु., क्षुद्रोपधानम् (चटा.)
असितक–न., काष्ठागुरुः (भा. भ. २ भ. आ. वा.)
असितकादिचूर्ण–न., आमवाते चूर्णम् । असीतकं मागधिका गुडूची श्यामा वराही गजकर्णशुण्ठौ । समा धृताः कृत्स्नमिदं तु चूर्णं पिबेत्तदुष्णोदकमण्डयूषैः (भा. नि. म. २ भ.)
असितजफल–पु., नारिकेलवृक्षः (वै. नि.)
अतसितफल–पु., मधुनारिकेलम् ।
असितवेन–न., श्यामलता (वा. र.) अमृतादिकषायः । रसायनकरी, गुणाश्चान्ये जयन्तीवत् (वै. नि.)
असिताबलमोटा–स्त्री., कृष्णजयन्ती ।
असिवल्ली–स्त्री., नीलदूर्वा (वै. नि.)
असितसार–(क)–पु., तिन्दुकवृक्षः (वै. नि.)
असिताञ्जन–स्त्री., कृष्णकार्पासी (रा. व.) द्र० कालाञ्जनी
असिताभ्रशेखर–पु., नीलीवृक्षः
असितालता–स्त्री., नीलदूर्वा श्यामालता (वै. नि.)
असिदंष्ट्र–(क)–पु., मकरः (त्रिका)
असिधेनु–(का)–स्त्री., छुरिका (हला. हे. च.)
असिन्दत–पु., मकरः कुम्भीरः (वै. नि.)
असिपत्रतृण–न., गुण्डतृणम् (रा. व. ८) गुणाः–शीतं मधुरं कफवातनुत् । रक्तदोषातिसाराणां नाशकं दाहनुत्परम्, द्विप्रकारं दीर्घलघुभेदात्, दीर्घं गुणाधिकम् (वै. नि.)
असिपुच्छा–(क)–पु., जलचरविशेषः (ह. रा.)
असिमेद–पु., खदिरक्षुपः, विट्खदिरः (श. र.)
असुख–न., दुःखम् (हे. च.)
असुधारण–न., जीवनम्, जीवनधारणम् (अम.)
असुभृत्–पु., प्राणिमात्रम्
असुरग्रह–पु., भूतग्रहविशेषः (मा. नि.)
असुरसा–स्त्री., बर्बटी (र. मा.)
असुरा–स्त्री., रजनी । हरिद्रा (मे. रत्रिकम्)
असुराह्व(ह्वा)–न., स्त्री., कांस्यम् (हे. च.)
असुराह्वपतङ्ग–पु., तैलपायितपतङ्गः
असुराह्वविद्–पु., कांस्यमलः (वै. नि. २ भ. ज्व. असुराद्यञ्जने)
असुरी–स्त्री., राजिका (अ. टी. म.)
असुस्थ–वि., रोगयुक्तः
असृक्कर–पु., शरीरस्थरसधातुः (हे. च.)
असृक्प–(पा)–पु., स्त्री., जलौका (अ. टी. भ.)
असृक्मद–पु., कोष्ठम् (वै. नि.)
असृगुत्थ–पु., स्त्री.; केसरम्
असृग्दरशैलेन्द्ररस–(सर्वाङ्गसुन्दर)–पु., रक्तप्रदरोक्तरसे हितः (प्रयोगा अ. दर. चि.)
असृण–न., स्वर्णगैरिकम् वै. नि.)
हिं.—सोनगेरु.
असृत–स्त्री., असिद्धम् अपक्वम् (रत्ना.)
असृपाटी–स्त्री., रक्तधारा (अ. टी. सा.)
अस्त–पु., न., मृत्युः (हे. च.)
अस्तमती–स्त्री., शालपर्णी (श. र.)
अस्त्रघात–पु., अस्त्रप्रयोगः (वै. नि.)
अस्त्रचिकित्सक–पु., अस्त्रवैद्यः (सु.)
अस्थिकृत्–पु., मेदोधातुः (हे. च.)
अस्थिगतज्वर–पु., तदाश्रितज्वरः । 'भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च । विक्षेपणञ्च गात्राणां विद्यादस्थिगते ज्वरे' (वै. नि.) वान्तिश्चौषधं, बस्तिकर्म, अभ्यङ्गोद्वर्षणे चेति तत्र प्रतीकारः ।
अस्थिजननी–स्त्री., वसा, मेदोधातुः (वै. नि.)
अस्थितुण्ड–पु., पक्षिविशेषः (श. मा.)
अस्थिपञ्जर–पु., कङ्कालम् (रा. व. १८)
अस्थिफल–पु., पनसवृक्षः
अस्थिभक्ष–पु., कुक्कुरः । शृगालः (हा. रा.)
अस्थिभक्षा–स्त्री., ओषधिविशेषः । घायमारी इति महाराष्ट्रादौ (वै. नि.)
अस्थि ङ्खला–(लिका)–स्त्री., अस्थिसंहारा । गुणाः– वृष्या, श्लेष्मला, मधुरा, पित्तरक्तानिलघ्नी च (म. द. ७)
अस्थिसन्धानकर–पु., लशुनः (वै. नि.)

अस्थिसन्धानजननी—स्त्री., अस्थिसंहारः (वै. नि.)
अस्थिसन्धिक—पु., अस्थिसंहारा (भेष.)
अस्थिसमुद्भव—पु., मज्जा (वै. नि.)
अस्थिसंहति—स्त्री., अस्थिसंहारा (मंदव. ७)
अस्थिसंहार(कः)—पु., स्वनामख्यातवृक्षः । गुणाः—शीतलः वृष्यः वातघ्नः अस्थिसन्धानकृच्च (मद. व. १) अस्थियोजनः वातश्लेष्महरः उष्णः सरः कृमिघ्नः अर्शोघ्नः नेत्ररोगघ्नः रूक्षः स्वादुः वृष्यः लघुः पित्तलश्च (भा. पू. १ भ.)
हिं.—हरसङ्करी, हरजोडी, हरसङ्कारि.
अस्थिसंहारिका-(री)—स्त्री., अस्थिसंहारः (भा. पू. १ भ.)
अस्थिसंहृत्—पु., अस्थिसंहारः (च.द.)(भेष.भग्न. चि.)
अस्थिसारास्थिता—स्त्री., मज्जा
अस्थिस्नेह—पु., मज्जा (रा. व. १८)
अस्थिस्नेहसंज्ञ—पु., मज्जा (रा. व. १८)
अस्पर्शा—स्त्री., आकाशवल्ली (रा. व. ३)
अस्फोत—पु., काञ्चनवृक्षः (वै. नि.)
अस्मन्त—न., चुल्ली (अ. टी. भ.)
म.—चूल.
अस्मित—वि., विकसतम् (वै. नि.)
अस्रघ्न—पु., तेजबलः (वै. नि.)
अस्रज—न., मांसम् (रा. व. १७)
अस्रजित्—पु., वनस्पतिविशेषः (र. मा.)
अस्रप—पु., जलौका, मत्कुणः (रा. व. १३)
अस्रपत्र-(क)—पु., भेण्डावृक्षः (रा. व. ४)
अस्रपा—स्त्री., जलौका (मे.)
अस्रफला-(ली)—स्त्री., शल्लकीवृक्षः (रा. व. ११)
अस्रमातृका—स्त्री., रसधातुः (रा. व. १८)
अस्ररेणु—पु., सिन्दुरम् (मे.)
अस्रबिन्दुच्छदा—स्त्री., लवणाकन्दम् (रा. व. ५)
अस्रवैद्य—पु., अस्रचिकित्सकः ।
अस्रशिम्बी—स्त्री., रक्तशिम्बी (वै. नि.)
अस्रस्रुति—स्त्री., रक्तस्रावः (वै. नि.)
अस्रार्जक—पु., रक्ततुलसीवृक्षः । श्वेततुलसी (वै. नि.)
म.—पांढरी तुळस.
अस्राह्व—पु., न., कुङ्कुमम् (मद. व. ३)
अस्रु—न., नेत्रवारिः अस्रुनिरोधात् पीनसाद्युत्पत्तिः पीनसादीनामुत्पत्तिः (वा. सू. ४ अ.)
अस्रुक—पु., अक्षीरवृक्षः (रत्ना.)
अस्रुवाहिनी—स्त्री., अश्रुवहधमनीद्वयम् (सु.शा. ८) आ. सं. पू. ५

अहङ्कार—पु., क्षेत्रज्ञपुरुषस्य चेतने इन्द्रियादिनिखिलशरीरव्यापी योऽहंभावस्तद्विशिष्टप्रवृत्तिरेव । वैकारिकतैजसभूतभेदेन स च त्रिविधः (सु.शा. १)
अहत—न., नवाम्बरम्, नूतनवस्त्रम् (हला.)
अहरदृक्—पु., गृध्रः (वै. नि.)
अहर्पण—पु., मांसम् (हारा.)
अहर्बान्धव—पु., अर्कवृक्षः (हे. च.)
अहर्मणि—पु., अर्कवृक्षः (हे. च.)
अहर्मुख—न., प्रातःकालः ।
अहस्कर—पु., अर्कवृक्षः (हे. च.)
अहस्पति—पु., अर्कवृक्षः । सूर्यः (अम.)
अहिंस्रा—स्त्री., कण्टकपालीवृक्षः (रत्ना.) आमवातप्रलेपे उपयुक्तः; गुणः—विषशोथहरत्वम् (रा.)
अहिक-(का)—पु., स्त्री., शाल्मलीवृक्षः (श. च.)
म.—सावरी.
अहिकाण्ड—पु., वायुः (हे. च.)
अहिकुटी—पु., भारद्वाजपक्षी (वै. नि.)
अहिगन्धफला—स्त्री., शल्लकीवृक्षः (रा. व. ११)
अहिगन्धा—स्त्री., सर्पगन्धा (वै. नि.)
म.—सापगंध.
अहिच्छत्रा—स्त्री., शताह्वाक्षुपः (रा. व. ४) शर्करा (रा. व. १४)
अहिजाहक—पु., कृकलासः (वै. नि.)
अहिजिह्विका—स्त्री., महाशतावरी (वै. नि.)
अहितद्रव्य—न., स्वभावत एवाहितद्रव्यम् । यथा—शिम्बीधान्येषु ग्रीष्मे माषकलायः फलेषु डहुकः, शाकेषु सर्षपशाकम्, मांसेषु गोमांसम्, वसासु महिषीवसाम्, दुग्धेषु मेषीदुग्धम्, तैलेषु कुसुम्भतैलम्, इक्षुविकारेषु फाणितञ्च (भा. पू. १ भ.)
अहितपदार्थ—पु., वृद्धरमणी, पूतिमांसम्, प्रभातनिद्रा, मैथुनम् ।
अहिताहार—पु., अहितकरद्रव्यभक्षणम्, तस्य गुणः—पीडाजनकत्वम् (वा. सू. ७)
अहितथ—पु.; वनमेथिका (मद. व. २)
अहिपुत्रक—पु., तरालुः (हारा)
अहिपुष्प—न., नागकेशरपुष्पम् (च. द.) कुम्भीकातैलम् (सु. चि. १७)

अहिफल-(ला)-पु., दीर्घकर्कटिका ।
म.—टरकाकडी.

अहिफेनबीज-न., खसखसबीजविशेषः

अहिफेनवटिका-स्त्री., योगोऽयं रक्तातिसारे उपयुज्यते (र. सा. सं)

अहिफेनासव-पु., आसवोऽयमतीसारविसूच्योर्हितः (भेष.)

अहिभयदा-स्त्री., भूम्यामलकी (रा. व. ५)

अहिभुज्-पु., मयूरः (रा. व. १८) तार्क्ष्यः क्षुद्र-सापसंद इति प्रसिध्दः वृक्षः । नाकुलीनामकमहा-कन्दशाकम् (रा.व . ७) गन्धनाकुली (रा. व. ७)

अहिमर्दनी-स्त्री., गन्धनाकुली । अहिलताविशेषः। सापसंद इति पाश्चात्ये (रा. व. ७. १५४ पृ. १५५)

अहिरणि-पु., द्विमुखसर्पः (हा. रा.)

अहिरिपु-पु., मयूरः (रत्ना.)

अहिलोकिका-स्त्री., भूम्यामलकी (वैनि.)

अहिल्या-स्त्री., वनमेथिका (वैनि.)

अहिवल्ली-स्त्री., नागवल्ली (भेष. ध्व. भ. चि.)

अहिविषापहा-स्त्री., अहिलता, म० सापसंद (वैनि.)

अहिस्कन्ध-पु., गुल्फः

अहीन्द्र-पु., शारिवा (च. द यक्ष्म. चि.) (लवङ्गादिचूर्णे)

आ

आकरज-न., रत्नम् (वैनि.)

आकर्णन-न., श्रवणम्

आकर्ष-पु., इन्द्रियम् (मे.)

आकर्षक-पु., शिलाभेदः (श. मा.)

आकली-स्त्री., चटका (वै. नि.)

आकल्प-पु., रोगः (हे. च.)

आकल्पक-पु., तमः मोहः । ग्रन्थिः उत्कलिका (मे. कचतुष्कम्)

आकल्ल-क., पु., अकर्करा (वै. नि.) (र. भ. अरो. चि. आकल्लकादिचूर्णे.)

आकष-पु., निकषप्रस्तरः (श. र.)

आकारकरभ-(भा.) पु., स्त्री., अकराम्भकः (भा. भ. १ भ. ज्वरघ्नी वटिका (शार्ङ्ग.)

आकाशपटल-न., अभ्रधातुः (वै. नि.)

आकाशमूली-स्त्री., जलौषधम्

आकुला-स्त्री.; तप्तापक्वगोधूमादिः (रा. व. १६)

आकूलकृत्-स्त्री., अकर्करा (भा. भ. १ भ. जिह्मक ज्वरचि.)

आकृतिच्छत्रा-त्री. स्त्री. जलौषधम् कोषातकीलता (र. मा.)

आक्रीड-पु., ग्रामान्तोद्यानम् (अ. म.)

आक्रोश-(नम्)-पु., न., अभिषङ्गः शापः (हे. च. अम.)

आक्लेदीभाव-पु., आर्द्रकारित्वगुणहेतुः (चद. विदग्धाजीर्ण चि.)

आक्षारणा-स्त्री., मैथुनं प्रत्याक्रोशः (अम)

आक्षिकशीधु-पु.,बिभीतकगुडकृतं धातकीपुष्पकृततीक्ष्ण-मद्यम्; गुणाः——आक्षिकः पाण्डुरोगघ्नः बल्यः संग्राहको लघुः । कषायमधुरः शीधुः पित्तघ्नोऽसृक्-प्रसादनः (सु.सू. ४५.१८६)

आक्षिकी-सुरा-स्त्री., बिभीतकत्वक्शालितण्डुलकृतसुरा । साच पाण्डुशोफार्शःपित्तास्रकफकुष्ठघ्नी किञ्चिद्वातकरी रूक्षा दीपनी रेचनी लघुश्च । (मद. व.८) तिनिश-कृतसुरेति केचित् ।

आक्षिव-पु., शोभाञ्जनवृक्षः (अ. टी. रा.)

आखुक-पु., मूषिकः । (रत्ना) वन्यमूषिकः (मद. व. १२) शूकरः (हे.च.) देवताडवृक्षः । (र. मा.)

आखुकर्णपर्णिका-स्त्री., क्षुद्रमूषिककर्णी (म.–लघु उंदीरकानी) (वै. नि.)

आखुकर्णी-स्त्री., जलजमूषिककर्णी (रा. व. ३) द्रवन्तीक्षुपः (रा. व. ५) दन्तीभेदः (भा. पू. १भ । वै. नि । रा । सी. यो. कृमि. चि. कृमिघ्न-पूपिकायां श्रीकण्ठ)

आखुगन्धी-स्त्री., कर्पूरहरिद्रा (वै. नि.)

आखुजित्-स्त्री., भूम्यामलकी

आखुपाषाण (कः)–(पु.,) लौहचुम्बकः (रा. व. १३.१९) गुणाः—स्निग्धः पारदस्य नियामकः । लौहभेदकरश्चैव वीर्यकृत् कान्तिवर्धनः । त्रिदोष-सर्वव्याधीनां नाशकः परिकीर्तितः। अशुद्धः स तु विज्ञेयः सप्तधातुविनाशकृत् । दाहं चित्तभयञ्चैव लालास्रावं तथा मृतिम् । अनेकवेदनाश्चैव बहु-व्याधिं तृषां तथा । करोत्यतो मूर्खहस्ते न दातव्यः कदाचन । तत्समीपे नैव वाच्यः प्राणघातकरो ह्यसौ (वै. नि)

आखुफला-स्त्री., ह्स्वदन्ती (वैनि.)

आखुभुज्-पु., रक्तापामार्गः । बिडालः (मदव. १२)

आखुमांस-न., मूषकमांसम्
आखुविष-न., दारुमोचम् (प. मु.)
आखुविषजित्-पु., सप्तपर्णवृक्षः ।
आखुश्रुति-स्त्री., क्षुद्रमूषिककर्णी
आखेट-(क)-पु., मृगया; व्याधः (अमाशर)
आखोट-(ड)-अक्षोटवृक्षः (रा. व. ११)
आगन्तुकज्वर-पु., अभिघाताद्युत्पन्नः ज्वरः
(भा. म. १. भ. ज्व. चि.)
आगन्तुव्रण-पु., सद्योव्रणः
आगारधूमाद्यतैल-न., इदम् उपदंशे हितम् ।
(च. द. उ. द. चि.)
आगारलोमिका-स्त्री., गृहलोमिका
आग्नेयवायु-पु., अग्निकोणस्थसमीरणः ।
आग्रमास-पु., चित्रकवृक्षः
आग्रहायणिक-पु., अग्रहायणमासः (अम.)
आघाट-पु., अपामार्गः (रा. व. ४)
आघातज्वर-पु., अभिघातजन्यज्वरः ।
आघार-पु., घृतम् (हला.)
आघ्रात-त्रि., शिंघितः (मे.) तृप्तः (हे. च.)
आङ्ग-त्रि., कोमलाङ्गः (त्रिका.)
आङ्गार-न., अङ्गारसमूहः (अ. टी. रा.)
आङ्गिक-पु., अश्वत्थवृक्षः (रा. व. ११)
आचमनक-पु., निष्ठीवनपात्रम्
आचान्तः-वि., कृताचमनम्
आचाम-पु., आचमनम् (श. र.) भक्तमण्डः (रत्ना)
आचारी-स्त्री., हिलमोचिका हुरहुर इति लोके । गुणाः- असौ शोथकुष्ठकफपित्तघ्नी (भा. पु. १ भ)
आचु-पु., आच्छुकवृक्षः (भेष. कन्दर्पसारतैले)
आच्छक-पु., रञ्जनद्रुमम् (र. मा.)
आच्छानफला-स्त्री., रक्तकार्पासः
आच्छादनी-स्त्री., कार्पासी
आच्छुक-पु., स्वनामख्यातवृक्षः हिं.-आल (र. मा.)
आच्छोदन-न., मृगया (अ. म.)
आजनवनीत-न., छागदुग्धजातनवनीतम् गुणाः-मधुरं कषायं त्रिदोषघ्नं चक्षुष्यं दीपनं बल्यं च (रा. व. १५) नवोत्थं नवनीतं क्षयकासघ्नं बल्यं नेत्ररोगघ्नं कफघ्नं दीपनं च (अत्रि. ८ अ)
आजमूत्र-न. छागमूत्रम् (मद व ८)
आजरस-पु., छागमांसक्काथः (च. द. यक्ष्म चि.
आजवल्ल-पु. वनतुलसी
हिं.-**श्वेतबर्बरी.**
म.-रानतुळसभेद.
प्रा. आजबला. आजवल्लः कटुश्चोष्णः शीतो दाहकरः प्रियः । रूक्षो रुच्यो दीपकः स्याल्लघुः पाके च पित्तलः तिक्तश्च मधुरश्चैव सुखप्रसवकारकः । व्रण्यो वातहरश्चैव कफनेत्ररुजापहः । मूत्रकृच्छ्रारुचिविषकामलाकुम्भकामलाः । आनाहवातशूलाग्निमांद्यत्वग्विषरुक्क्रिमीन् । रक्तदोषश्वासकासदद्रुहृत्पार्श्वरुग्ज्वरान् । कण्डूकुष्ठवमींश्चैव नाशयेदिति कीर्तितः । सुगन्धाजवल्लः प्रोक्तः कटुश्चोष्णश्च तृप्तिकृत् । सुगन्धः पित्तकृन्निद्राजनको वान्तिवातनुत् । ग्रहबाधापार्श्वशूलकासश्वासकफाञ्जयेत् । शोथश्चाङ्गस्य दौर्गन्ध्यं नाशयेदिति कीर्तितः (वै. नि.)
आजक्षीर-न., छागदुग्धम् आजं गव्यगुणं ग्राहि दीपनं लघु क्षयार्शोऽतीसारप्रदरास्त्रभ्रमज्वरघ्नम् । एतच्च दुग्धं सर्वरोगघ्नम् (मद. व ८) छागं कषायं मधुरं च शीतं ग्राहि लघु पित्तक्षयापहारि । कासज्वराणां रुधिरातिसारे हितं पयश्छागलजं त्रिदोषजित्
(अत्रि. ८ अ । वा. टी. हेमाद्रि)
आजानेय-पु., कुलीनाश्वः (शालिहोत्रः)
आञ्जिनेय-पु., जन्तुविशेषः (श. मा.)
आटि-(टी)-पु., स्त्री., शरारिपक्षी (मदव. १२)
म.—बगली पक्षीण
आटीकर-पु., वृषः (वै. नि.)
आडम्बर-पु., नेत्रच्छदम्
आडि-पु., शरारिपक्षी; गुणाः—गुरुः स्निग्धः वातश्लेष्मकोपनः बलकरः शुक्रमेधाग्निवर्धकश्च (रा.)
आडिका (डी) (डीकी) -स्त्री., शरारिपक्षी (मदव. १२) आडी वातविकारकासहन्त्री बल्या वृष्या दीपनी (अत्रि २२ अ)
आढकिक-(कीन)-त्रि., आढकमितवपनयोग्यक्षेत्रम् (अम.)
आढकिका-स्त्री., आढकी
आढकीयूष-पु., न., तुवरीयूषः । गुणः—बल्यम् (रा. व. १६) भवेदाढक्या मधुरञ्च यूषं विशोषणं वातनिवारणञ्च । श्लेष्मापहं पित्तहरं नराणाम् ।
(अत्रि. १३ अ)
आतञ्चन-न., तर्पणम् (अम.) उपद्रवः निक्षेपः (सु) प्रतीवापः ।
आतन-न., दर्शनम्

आतप-पु., रौद्रः । एतत्सेवनं स्वेदमूर्च्छारक्ततृष्णा-दाहश्रमकरं पित्तवैवर्ण्यकरञ्च (मद व. १३) असौ कटुः रूक्षः नेत्ररोगकोपनश्च (रा. २१.३८; पृ. ४१६)
आतपतण्डुल-पु., असिद्धतण्डुलः
आतपर्णिका (र्णी)-स्त्री., क्षीरिका
आतपशुष्क-वि., रौद्रशुष्कः
आतर्पण-न., तृप्तिः (मे.)
आतपाभाव-पु., छाया
आतापि-(पी)-पु., चिल्लपक्षी (हला.) (म. शशमारी)
आति-पु., शारिपक्षी (हला.)
आतृप्य-पु., आता इति प्रसिद्धफलवृक्षः
हिं.-सरीफा.
म.-सिताफळीचे झाड
न., तत्फलम् । फलगुणाः-तृप्तिजनकं रक्तवर्धकं स्वादु शीतलं हृद्यं बल्यं मांसकरं दाहरक्तपित्त-वातघ्नञ्च (रा)
आत्मगंधक-पु., गन्धबोलः
म.-रक्त्याबोळ (वै. नि.)
आत्मगन्धिहरिद्रा-स्त्री., कर्पूरहरिद्रा
म. कापूरहळदी (वै. नि.)
आत्मग्राहिन्-वि., कुक्षिम्भरः स्वोदरपूरकः
आत्मघोष-(षा) (पु. स्त्री.) काकः (हारा) कुक्कुटः (श. च.)
आत्मन्-पु., शरीरम् (मे.लत्रिकम्) जीवः । वायुः । अग्निः (हे. च.) मनस् (मे)
आत्मनीन-स्त्री., पथ्यम् आत्महितम् (रा. व. २०; पृ. ३१०) पु. प्राणाधारः । पुत्रः
आत्ममूली-स्त्री., दुरालभा (श. मा.) (म. धमासा)
आत्मम्भरि-त्रि., आद्यूनम् (अम.)
आत्मवत्-त्रि., यत्नवान्, धृतिमान् ।
आत्मविज्ञान-न., योगाभ्याससमाधिना परमात्मस्वरूप-विज्ञानम् (वा. सू. १ अ; रा. व. ४)
आत्माशिन्-पु., मत्स्यविशेषः (त्रिका)
आत्यूक-पु., वङ्गम्
आत्यूह-पु., दात्यूहः
आत्रेय-पु., शरीरस्थरसधातुः (हे. च.)
आत्रेयिका-(यी)-स्त्री., ऋतुमती स्त्री (हला मे. यत्रिकम्)

आदिकारण-न., निदानम् (अम.)
आदित्यतेजस्-स्त्री., आदित्यभक्ता; ब्राह्मीशाकम् ।
आदित्यपत्र-(क)(त्रा)-पु., स्त्री., आदित्यभक्ताभेदः । गुणाः-कटुः उष्णवीर्यः कफघ्नः वातरोगघ्नः दीपनः जाठरगुल्मघ्नः, अरोचकघ्नश्च (रा. व. ४) अर्कवृक्षः ।
आदित्यपुष्पा-स्त्री., धातकीपुष्पवृक्षः
आदित्यपुष्पिका-(ष्पी)-स्त्री., अर्कवृक्षः (र. मा.)
आदिबलप्रवृत्त-त्रि., शुक्रशोणितान्वयजः । ये रोगाः शुक्रशोणितान्वयाः कुष्ठार्शःप्रभृतयः तेऽपि पुनर्द्वि-विधा मातृजाः पितृजाश्चेति (सुसू. २४.५) एते आध्यात्मिका इति कथ्यन्ते ।
आदिमा-स्त्री., भूमिः
आदिवृक्ष-पु., अश्मन्तकवृक्षः (म. आपटा)(वै. नि.)
आदीनव-पु., दोषः । (हारा.) क्लेशः (अम.)
आद्यधातु-पु., शरीरस्थरसधातुः । (वै. नि.)
आद्यपुष्प-न., त्रिभागकुङ्कुमोपेतह्रीबेरचन्दने । (रा. व २२)
आद्यमाषक-पु., पञ्चगुञ्जापरिमितमाषः (अ. म.) ८० गुञ्जाः (वै. नि.)
आद्यमाषा-स्त्री., माषपर्णीलता
आद्या-स्त्री., भूमिः
आद्यून-वि., औदरिकः (अम)
आधानिक-न., गर्भधारणसंस्कारः (त्रिका.)
आधिभोग-पु., अश्वगवाद्युपभोगः ।
आधिमन्यु-पु., ज्वराग्निः (हारा.)
आधिशमी-स्त्री., शमीभेदः (वै. नि.)
आधोरण-पु., हस्तिपकः (हला.)
आध्मान-पु.न.,वातव्याधिविशेषः-आनाहः उदरस्फीतः । स्वरूपं यथा साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् । आध्मानमिति जानीयात् घोरं वातनिरो-धजम् । आध्माने लङ्घनं पूर्वं दीपनं पाचनं ततः । फलवर्तिक्रियां कुर्यात् बस्तिकर्म च शोधनम् (सु. नि. १.८८)
आध्मानी-स्त्री., नलिका नाम वणिग्द्रव्यम् (रा. व. १२)
आध्या-(न)-स्त्री., न., स्मृतिः चिन्ता (अम. शर.)
आनन्दपट-न., नवोढावस्त्रम् (हारा.)
आनन्दप्रभव-न., रेतः । वीर्यम् (हे. च.)
आनन्दभैरव-पु., शीताङ्गसन्निपाते रसः (र. सा. सं.)
आनन्दमयकोष-पु., कारणशरीरम् । सुषुप्तिः
आनन्दा-स्त्री., विजया
हिं.—भाङ्ग.

वार्षिकीपुष्पवृक्षः ।
हिं—वेला.
(भा. पू. १ भ मुव.) आरामशीतला
(रा. व. १०-५२; पृ. ३७२) मुद्गपर्णी (वै. नि.)

आनन्दी–स्त्री., आरामशीतला (रा. व. १०)

आनन्दोदयरस–पु., पाण्डुरोगरसः
(भैष. पाण्डुरोगचि.)

आनय–पु., उपनयनम् ।

आनर्त्त–पु., जलम् (मे. तत्रिकम्)

आनाखु–पु., इक्षुतुली (प. मु.)

आनुलोमन–वि., अनुलोमनकरः (च. द. अर्शचि.)

आनूपजल–न., अनूपदेशस्थजलम् । गुणाः– स्वादु स्निग्धं गुरु पित्तहरं पामाकण्डूवातकफज्वरकरञ्च (रा. व. १४-३३२; पृ. २५९)

आनूपजाङ्गलसाधारणमांस–न., रुरुहरिणमृगक्रोड-सारङ्गाणां मांसानि । तच्च लघु स्वादु बल्यं वृष्यं रुच्यञ्च (रा. व. १७-३; पृ. ३९१)

अनूपपक्षिमांस–न., सारसहंसचक्रवाकादिमांसम् गुणाः– शीतलं स्निग्धं वातकफघ्नं गुरु च
(रा. व. १७-४; पृ. ३९१)

आन्त्रिक–वि., अन्त्रसम्बन्धिनि

आन्दोलन–न., कम्पः

आन्ध्रदेशपूग–न., तद्देशीयपूगफलम् । गुणाः–पाके मधुरं किञ्चिदम्लं तुवरं वातकफघ्नं मुखजाड्यकरञ्च (वै. नि.)

आप–न., जलसमूहः (पु.,) अष्टवस्वन्यतमम् (स्त्री.,) बालकः (अम.)

आपक्क–वि., ईषत्पक्काः कलायादयः (अम) रोटिका इति केचित् ।

आपगाजल–(वारि)–(सलिलम्)–न., नदीजलम् गुणाः–' नादेयं दीपनं रूक्षं वातलं लघु लेखनम् '
(मदव. ८)

आपण–पु., हट्टः । पण्यविक्रयस्थानं (अम)

आपतिक–पु., श्येनः

आपन–न., मरिचम् (श. च.)

आपनिक–पु., इन्द्रनीलमणिः

आपन्नसत्वा–स्त्री., गर्भवती

आपस्तम्भिनी–स्त्री., लिङ्गिनीलता (रा. व. ३)

आपाक–पु., पोंयान इति कुम्भकारस्य आर्द्रशुष्कमृत्पात्र-दाहस्थानम् (जटा.)

आपालि–पु., केशकीटः (अम.)

आपीन–न., ऊधः (हला) सुवर्णमुखी (अम.) (पु.,) कूपः ।

आपुप–(पूप)–पु., पिष्टकः (रत्ना.), आनूपजन्तु-मात्रः (रा.)

आपूप्य–पु., शक्तुकम् । चूर्णम् (त्रिका.)

आपूर्यमाण–पु., शुक्लपक्षः

आपूष–न., रङ्गम् (रा. व.१३)

आप्ता–स्त्री., जटा (हारा.)

आफु(फू)**क**–न., अहिफेनः (भा. पु. १भ)

आब्दिका–स्त्री., तिन्तिडी (श. र.)

आभागुग्गुलु–पु., भग्नाधिकारे, भग्नसन्धाने च हितः । आभाबब्बूलः । ' आभाफलत्रिकव्योषैः सर्वै-रेभिः समीकृतैः । तुल्यो गुग्गुलुरायोज्यो भग्नस-न्धिप्रसाधकः (च. द. भग्न. चि.)

आभील–न., शरीरपीडा (वै. नि.)

आमक–पु., कूष्माण्डः (अम.)

आमगन्धि–वि., विस्रगन्धयुक्तः (अम.)

आमगन्धिहरिद्रा–स्त्री., आमहरिद्रा (हिं–आमहलदी) (वै. नि)

आमचणक–पु., अपक्कचणकः (कच्चे हरभरे)
गुणाः—शीतलः रुच्यः सन्तर्पणः तृष्णादाहहरः गौल्यः अश्मरीशोषघ्नः कषायः ईषत्कटुवीर्यश्च (रा. व.१६.१५८,पृ.२२८)

आमण्ड–(क)–पु., एरण्डवृक्षः (प.मु) शुक्लैरण्डः (रा. व. ८, भा. पू. भ)

आमण्डवास–पु., आसवः (वै. नि.)

आमतिन्तिडि–(डी)–स्त्री., अपक्कतिन्तिडी

आमनस्य–न., वैमनस्यम् दुःखम् पीडा (अम.)

आमपत्रिका–स्त्री., चिल्लीशाकम् (चिविला)(वै.नि)

आमपीनस–न., कफः । कफाक्रमणम्

आमय–पु., न., कृष्णागुरुः (र. मा.) कुष्टम् (रा. व. ११ सि. यो. अप. चि.) ' शिरीषलशुनामयैः ' (भा. म. १भ. ज्वर. चि.) शाल्मलपर्ण्यादिमूलाम-यमधुल्लुता । रोगः । उष्ट्रः । (रा. व. २०)

आमरक्त–न., रक्तामाशयरोगः (मा. नि.) द्र० अति-सारः

आमरस–पु., अपक्करसः । (सि. यो. अती. चि. श्रीकण्ठः)

आमलकशुण्ठ–पु., काष्ठामलकः । 'मुद्रामलक शुण्ठ्याः' (च. द. ज्वरपञ्चमुष्टिः)

आमलकायस–न., रसायनविशेषः । इदं ब्रह्मरसायन-मपि कथ्यते (च. चि. १ पा. उ. ३-६)

आमलक्यादि-पु., तदादिवर्गः । आमलकी हरितकी पिप्पली बिभीतकश्चेति । 'आमलक्यादिरित्येष गणः सर्वज्वरापहः । चक्षुष्यो दीपनो वृष्यः कफारोचकनाशनः' (सुसू. ३८;६०-६१)

आमलक्यादिचूर्ण-न., सर्वज्वरे हितम् भेदि दीपनं च । 'आमलं चित्रकं पथ्या पिप्पली सैन्धवं तथा । चूर्णितोऽयं गणो ज्ञेयः सर्वज्वरहरः परः ।' (भा. म. १ भ ज्वरचि.)

आमलच्छद-पु., तालिशपत्रम् (वै. नि.)

आमलाद्यलौह-न., रक्तपित्ते रसविशेषः, अत्र लौहं सर्वचूर्णसमम् । 'आमला पिप्पलीचूर्णं तुल्यया सितया सह । रक्तपित्तहरं लौहं योगराजमिदं स्मृतम् ।' (र. सा. सं.)

आमली-स्त्री., भूम्यामलकी

आमवातगजसिंहमोदक-पु.,प्रयोज्योऽयम् आमवाते । (र. सा. सं.)

आमवातारिगुडिका-(वटिका)-स्त्री.,आमवाते रसयोग० । (रस. र.)

आमवातेश्वररस-पु., आमवाते रसः (र. सा. सं.)

आमानुबन्ध- पु., आमसातत्यम् सर्वदा आमसञ्चयः (च. द. ग्रहणी. चि. शुंठ्यादि.)

आमान्न-न., अपक्वान्नम् ।

आमाम्र-न., बालाम्रः । गुणाः— 'कषायमम्लरसं रुच्यं वातपित्तवर्धकञ्च' (भा. पू. १ भ)

आमावस्था-स्त्री., अपक्वावस्था

आमिषकर-न., शोणितम्

आमिषगन्धिनी-स्त्री., पूतना ।

आमिषप्रिय-पु., कङ्कः (रा. व. १८)

आमिषभुज्-वाशिन्-वि., मांसभक्षकः मत्स्यमांसभक्षकः

आमिषस्नेह-पु., वसा

आमिषी-स्त्री., जटामांसी

आमि (मी) क्षा-स्त्री., क्षीरसा तक्रचूर्चिका सान्तानिका तप्ते पक्वे च पयसि दधियोगेन जाता दुग्धविकृतिः शृते क्षीरे दधि क्षिप्तमामिक्षा कथ्यते बुधैः' (हला.)

आमिक्षीय-न., दधि

आमुप-पु.; कण्टकयुक्तवंशविशेषः ।

आमोदक-पु., यमानिका (वै. नि.)

आमोदा-स्त्री., शतावरी शुल्फा

आमोदिन्-वि., मुखवासनम् । कर्पूरादिवटिकाकृतमुखगन्धम् (अ. टी)

आम्बोली-स्त्री., रक्तकुरुण्टकभेदः । कोङ्कणदेशे स्वनाम्ना ख्यातः ।

आम्भसिक-पु., मत्स्यः । वि., जलसम्बन्धीयः

आम्र-पु., स्वनामख्यातवृक्षः । आंबा फल, आम्रः पञ्चविधः साधारणाम्र-कोशाम्र-राजाम्र-महाराजाम्र-रसालाम्राश्च । एषां विशेषाः स्वपर्याये मृग्याः । बालाम्रादिगुणाः—कषायाम्लरसं सुगन्धि कण्ठरोगघ्नम्ग्निकरञ्च । ग्राहि मेहरक्तकफपित्तव्रणघ्नं च (म. द. व. ६) पित्तप्रकोपवातरक्तकरं लवणादिना रुचिकरञ्चेति । बद्धास्थिपित्तानिलकफकरं बालवदेव । पक्वं तत् त्रिदोषशमनं स्वादु पुष्टिकरं गुरु धातुवृद्धिकरं सन्तर्पणं कान्तिकारि तृष्णाश्रमघ्नञ्च (रा. व. १८; वा. सू. १५) न्यग्रोधादिः । तरुपक्वाम्रं गुरुवातहरं मधुराम्लं पित्तप्रकोपनञ्च । कृत्रिमपक्वं पित्तघ्नम् । पर्युषिताम्रं रुच्यं बल्यं वीर्यकरं लघु शीतलं वातपित्तहरं सारकञ्च । गालिताम्ररसः बल्यः गुरुः वातहरः सारकः अहृद्यः अतितर्पणः बृंहणः कफवर्धनश्च । आम्रखण्डम्—गुरु अतिरोचनं दुर्जरं च । दुग्धाम्रं वृष्यं वर्ण्यं स्वादु गुरुशीतलं रुच्यं बृंहणं बल्यञ्च । आम्रातियोगे मन्दाग्नित्वं विषमज्वरं रक्तामयं बद्धगुदोदरं नेत्रामयं च करोति । शुण्ठ्यम्भसोऽनुपानं स्यादाम्राणामतिभक्षणे । जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च (भा. पू. १ अ.) आपक्वमाम्रं फलमेव शस्तं संग्राहि पित्तासृजि कोपनञ्च । तथा विपक्वं मधुरञ्च चाम्लं भेद्यं सपित्तामयनाशनञ्च (अत्रि. १७ अ)

आम्रगन्धा-स्त्री., कर्पूरहरिद्रा (भा. पू. १ भ)

आम्रत्वचा-स्त्री., आम्रवल्कलम्; गुणः—कषायः (रा. व. ११)

आम्रनिशा-स्त्री., आम्रहरिद्रा (वै. नि.)

आम्रपल्लव-पु., आम्रकिसलयम् (चसू. ४.२) प्रयोज्योऽसौ छर्द्याम् । गुणः—रुच्यः कफपित्तघ्नश्च (भा. पू. १ भ)

आम्रपुष्प-न., आम्रमुकुलम् । गुणाः—रुच्यं दीपनञ्च (रा. व. ११) अतिसारकफपित्तप्रमेहघ्नं रक्तदुष्टिहरं शीतं वातलञ्च (भा. पू. १ भ)

आम्रपेशिका (शी)-स्त्री., शुष्काम्रखण्डः (आंबोशी) गुणाः—अम्ल-मधुरा कषायरसा भेदिका वातकफघ्नी च (भा. पू. १ भ)

आम्रफल–न., आम्रः ।

आम्रफलपानक–न., आम्रफलपानकविशेषः 'आममाम्रजले स्विन्नं मर्दितं दृढपाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितं, प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्मितं । सद्योरुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ।' (भा. पू. १ भ)

आम्रमय–वि., आम्रकृतः ।

आम्रमूल–न., आम्रशिफागुणाः–सुगन्धि रुच्यं संग्राहि शीतलञ्च (रा. व. ११–१५)

आम्ररसाकृति–पु., रसालाभेदः ।
किंचित्कुङ्कुमसंयुक्ता विमस्तुदधिगालिता । सशर्करं भवेत्पीता पक्वाम्ररससन्निभा । पीता शिखरिणी या सा लघ्वी वर्णवती हि सा । सुरुच्या मधुरा बल्या वातपित्तहरा परेति ।

आम्रलेह–पु., आम्रकृतलेहः । 'तरुणाम्रं भर्जयित्वा मर्दयेत् गुडशर्करे । सैन्धवं मरिचं हिङ्गु भर्जितं तत्र निक्षिपेत्; रुचिकृत् चाम्रलेहोऽयं मधुरस्तृप्तिकारकः । हृद्यः स्निग्धो गुरुश्चोक्तः पाकविद्याविशारदैः (वै. नि.)

आम्रवन्द–पु., आम्रवन्दा (वै. नि.)

आम्रव (वा)ट–पु., आम्रातकः (मद. व. ६)

आम्रबीज–न.,आम्रास्थिः; गुणाः—कषायं छर्द्यतीसारघ्नम् ईषदम्लं मधुरं हृद्यं दाहघ्नञ्च (भा.)

आम्रहरिद्रा–स्त्री., आम्रनिशा गुणाः............तिक्ता चाम्ला रुचिप्रदा ।
लघ्वग्निदीपनी चोष्णा तुवरा च सरा मता । कफघ्नोग्रव्रणं कासं श्वासं हिक्कां ज्वरं तथा । मुखरोगं रक्तदोषं नाशयेत् ।

आम्रावर्त–पु., आम्रातकः । विधिः—' पक्वाम्ररसः पटे विस्तारितः रौद्रशुष्कः आम्रावर्त उच्यते । गुणाः–तृष्णाच्छर्दिवातपित्तघ्नः सारकः रुच्यः लघुश्च (भा. पू. १ भ.)

आम्ल–पु. तिन्तिडी । अम्लवेतसम्
(मद व. ६ । वै. नि. २ भ वाव्या. प्रत्यष्ठीलाचि.) त्रि., अम्लरसः । अम्लस्तु पाचनो रुच्यः लघुः पित्तकफप्रदः । लेखनोष्णः क्लेदनश्च बाह्ये शीतलताकरः । स्निग्धोषणः सारकश्च भ्रूसङ्कोचनकारकः । द्विजरोम्णां हर्षदश्च वातनाशकरो मतः । अस्यातिसेवनेनैव तिमिरं दाहतृड्भ्रमाः । ज्वरकण्डूपाण्डुरोगविसर्पस्फोटकुष्ठहृत् (वै. नि.)

आम्लका–स्त्री., नागरदेशप्रसिद्धपलाशीलता (वै. नि.)

आम्लटक–पु., चुक्रक्षुपः (र.मा.)

आम्लपञ्चक–न., अम्लरसयुक्तफलपञ्चकम् यथा–कोलदाडिमवृक्षाम्लचुक्रिकाम्लवेतसैः पञ्चाम्लफलम् । जम्बीरनारिङ्गाम्लवेतसतिन्तिडीबीजपूरकमिति वा फलाम्लपञ्चकम् (रा. व. २२)

आम्लपत्रक–पु., चुक्रम् (वै. नि.)

आम्लपत्री–स्त्री., पलाशीलता ।

आम्लपित्त–न., स्वनामख्यातरोगविशेषः

आम्लफल–न., कपित्थफलम् (वै. नि.)

आम्ललोटिका–स्त्री., क्षुद्रचिञ्चा (वै. नि.)

आम्ललोणिका–स्त्री., अम्ललोणिका

आम्लवक्त्रत्व–न., पित्तजन्यरोगविशेषः

आम्लवर्ग–पु., अम्लवर्गः

आम्लवल्ली–स्त्री., आंबटवेल इति महाराष्ट्रे प्रसिद्धलता । गुणाः–आम्लवल्ली दीपनी स्यात् तीक्ष्णाम्लरुचिदा मता । कफशूलगुल्मवातप्लीहनाशकरी मता (वै. नि.)

आम्लवास्तुक–पु., चुक्रिका (वै. नि.)

आम्लवेतस–पु., अम्लवेतसम्

आम्ला–स्त्री., तिन्तिडिकालिङ्गिनीलता (श. र.) श्रीवल्ली (रा. व. ८)

आम्लातक-पु., आम्रातकः (रत्ना.)

आम्लातकी–स्त्री., पलाशीलता (रा. व. ४)

आम्लानीका–पु., पीतझण्टी क्षुपः ।

आम्ली–(म्ली का) (स्त्री.,) आम्लिका अम्लोद्गारः (श. मा.)

आयतच्छदा–स्त्री., कदलीवृक्षः (म. द. ५)

आयतन–न., अधिष्ठान आश्रयं, हेतुः (भा.)

आयतपत्रा–त्रि., स्त्री., कदलीवृक्षः (त्रि. का.)

आयसमल–न., मण्डुरलौहम् (च. द. पाण्डु चि. । लोहमलः ।

आयस्त–वि., तेजितम् । क्षिप्तम् (मे. तत्रिकम्)

आयामकाञ्जिक–न., ग्रहण्यां हिता (च. द. ग्रहणीचि.) (भेष.)

आयास–पु., श्रान्तः (हे. च.)

आयुस–न., जीवितकालः (जटा) औषधम्, घृतम् (रा. व. १५) वसा (रा. व. १८)

आयुःशेष–पु., मृत्युः

आयुधदीर्घपृष्ठ–पु., सर्पः (हा. रा.)

आयुधधर्मिणी–स्त्री., जयन्तीक्षुपः (श. च.)

आयुर्द्रव्य–न., औषधम् । (र. मा.)

आयुर्योग–पु., औषधम् (रा. व. २०)
आयुर्वेद-पु., ऋग्वेदस्योपवेदविशेषः । अथर्ववेदोपाङ्गे शल्यादिस्थानाष्टकसम्पन्ने धन्वन्तर्यादिप्रणीतचिकित्साशास्त्रे । 'आयुर्हिताहितं व्याधेः निदानं शमनं तथा । विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते' (वैद्यशास्त्रे । (च. सू. १) (सु. सू. १)
आयुर्वेदमय–वि., आयुर्वेदाभिज्ञः ।
आयुर्वेदिन्–पु., वैद्यः (रा. व. २०)
आयुष्कर-वि.,परमायुर्जनकः ।
आयुष्मन्–पु., तृतीययोगे । जीवकमहाक्षुपः (रा. व. ५ वि., दीर्घजीवी
आयुष्य–वि.,पथ्यम् आयुर्हितकरः । (रा. व. २०)
आरक्त–न., रक्तचन्दनम् । वि. सम्यग् रक्तवर्णः
आरक्तपुष्पी–स्त्री., बन्धुजीवकवृक्षः
आरक्ष–गजकुम्भाधोभागः । (हला. । हे. च.) गजकुम्भसन्धिभागः (त्रिका.)
आरग्वधपञ्चक–न., वातकफज्वरे कषायविशेषः । आरग्वधस्तिक्तकरोहिणी च हरीतकीपिप्पलीमूलमुस्ताः (हा. अत्रि. २ स्थानं. २ अ)
आरग्वधादि–अयं द्रव्यवर्गविशेषः (वा. सू. १५ अ) (सु. सू. ३८.६-५)
आरग्वधाद्यतैल–न., योनिव्यापदधिकारे तैलम् (च. द. योनिव्या. चि) कुष्ठरोगे च तैलम् । आरग्वधत्वक् वटत्वक् कुष्ठं हरितालं मनःशिला हरिद्रा दारुहरिद्रा च एषां मिलितपादिककल्केन तैलप्रस्थं विपचेत् (च. द. कुष्ठ. चि)
आरट्टज–पु., तद्देशीयाश्ववि० (जटा.)
आरणाल-(क)–न., काञ्जिकम् (भा. पू. सन्धानव)
आरणि–पु., कुलहण्डके आवर्तः (हारा.)
आरण्यगोमय–पु., वन्यगोमयम् (च.चि. १)
आरण्यपशु–पु., वनजपशुः । स सप्तधा-ऋक्ष–महिष–वानर–सरीसृप–रुरु–पृषत–मृगाः
आरण्यमक्षिका–स्त्री., दंशकम् (रत्ना.)
आरण्यमुद्गा–स्त्री., मुद्गपर्णी (रा. व. ३)
आरण्यनिम्बिका–स्त्री., तुण्डिका (रा. व. १३)
आरण्योपलभस्म–न., वनकरीषभस्म (वै. नि. २ भ. ज्वरभस्मेश्वररसे)
आरति–स्त्री., स्वस्थचित्तत्वम्
आरम्भ–पु., उद्यमम् रलयोरभेदात् आरम्भोऽपि आलम्भसमानार्थकत्वात् वधे रूढो भवितुमर्हति । वधः । दर्पः (मे.)
आरस्य–न., विस्वादः ।
आराग्र–न., अर्धचन्द्राद्यस्त्रमुखम् । 'आराग्रन्तु मुखं तेषां पुष्पपत्रादिभेदतः' (हला)
आराधन–न., पचनम् (मे. नचतुष्कम्)
आरामघोलि-(लिका)–स्त्री., पत्रशाकविशेषः । पश्चिमदेशे प्रसिद्धः । गुणाः–आरामघोलिका चाम्लरूक्षा रुच्यानिलापहा । पित्तश्लेष्मकरी चान्या सूक्ष्मा जीर्णज्वरापहा (रा. व. ७)
आरामवल्लिका–स्त्री., मल्लिकाविशेषः । (रा. व. २३)
आरामुख–न., व्यधनार्थशस्त्रविशेषः । (सु. सू. ८)
आरालिक–पु., पाचकः (अम.)
आरि-(री)–पु., कण्टकवृक्षः । खदिरसारः । गुणाः–कटुः तिक्तोष्णः कफवातघ्नः व्रणकण्ठरोगघ्नः रुच्यः दीपनश्च (रा. व. ८)
आरु–पु., वृक्षविशेषः, कर्कटः (मे. रद्विकं) कूष्माण्डलता अलाबुः
आरुक–न., हिमालयदेशजाते स्वनामकौषधिविशेषः । पत्रपुष्पादिभेदेन तस्य चातुर्जात्यं, सर्वाण्येव गुणैः तुल्यानि । गुणाः–आरकं वातमेहार्शःकफघ्नञ्च (मद व. ६) मधुरं हिमम् अर्शःप्रमेहगुल्मरक्तदोषघ्नञ्च (रा. व. ११) पु., काबेलदेशे आलुबुखार इति ख्यातं खाद्यद्रव्यम् आरुको ग्राहितुवरो हृद्यः शीतो गुरुः स्मृतः । मलावष्टम्भको ग्राही भेदी चोष्णः कफापहः । पित्तहृत्पाचकश्चाम्लो मधुरश्च मुखप्रियः । मुखस्वच्छकरश्चैव मेहगुल्मार्शनुत्परः । रक्तवातरुजां हन्ता स पक्को मधुरो गुरुः । कफपित्तकरश्चोष्णो रुच्यो धातुविवर्धकः (वै. नि.)
आरोग्य–न., रोगनिर्मुक्तः । 'आरोग्यं वह्निवर्धनम्' (रा. व. २०) बलाधिष्ठानमारोग्यम् (चर.)
आरोग्यपञ्चक–न., पथ्यारग्वधतिक्तात्रिवृदामलकाः (भा. म. १ भ ज्व. चि.)
आरोग्यशाला–स्त्री., चिकित्सालयम्
आरोग्याम्बु–न., पादशेषोष्णजलम्, पादशेषन्तु यत्तोयम् आरोग्याम्बु तदुच्यते
आरोह–पु., अवरोहः । वरस्त्रियाः श्रोण्याम् । (रा. व. १८) परिमाणविशेषः (हे. च.) गजाद्यवरोहः (मे. हत्रिकम्)
आर्ग्वध–पु., आरग्वधवृक्षः
आदर्यशर्करा–स्त्री., आदर्यमधुकृतशर्करा इयं गुणैरादर्यमधुतुल्या (रा. व. १४)

आर्घ्या-स्त्री., मधुमक्षिकाविशेषः । सा च पीततुण्डा भ्रमरसदृशी (रा. व. १४)
आर्तवी-स्त्री., घोटकी (रा. व. १८)
आर्ति-स्त्री., पीडा, वेदना (रा. व. १८)
आर्द्र-(क) न., मूलविशेषः । (हिं-अदरख,) गुणाः--कफवातघ्नं स्वरकरं विबन्धानाहशूलघ्नं कटूष्णं रुच्यं हृद्यं वृष्यं च (सु.सू.४५ अ) (पु.,) जलमार्जारः
आर्द्र-स्त्री., सजलं वस्तु । तच्च सरसनीरसभेदेन द्विधा । तयोस्तु वास्तुकाद्यम् आर्द्रम् । नीरसमपि स दुग्धगुप्तरसभेदात् । तयोः वटाश्वत्थाद्यं नीरसम् । सदुग्धमपि द्विधा । मृदुतीक्ष्णभेदेन । तयोः सातलाद्यास्तीक्ष्णाः दुग्धिकाद्याः मृदवः इति । यथा ' आर्द्रं द्रव्यं द्विधा प्रोक्तं सरसं नीरसं तथा । वास्तुकं सार्षपं शाकं निर्गुण्ड्येरण्डमार्षरम् । धत्तूराद्यमिदं सर्वमार्द्रं स्वरसमुच्यते । वटाश्वत्थकरीराद्यम् आर्द्रद्रव्यन्तु नीरसम् । सदुग्धं तु द्विधा प्रोक्तं मृदुतीक्ष्णमिति क्रमात् । सातलावज्रशीहुण्डसौरिण्याद्यास्तु तीक्ष्णकाः । दुग्धिकार्कक्षीरिकाद्या मृदुदुग्धाः प्रकीर्तीताः (प. प्र.) क्लिन्नम् (मे०)
आर्द्रक-न., स्वनामख्यातकन्दशाकविशेषः; गुणाः—शुण्ठीसमगुणं कटुकमपि पाके मधुरं प्राग्भोजनं सलवणं सेवितम् अग्निदीपनं रुचिकरं जिह्वाकण्ठशोधनञ्च भवति । ग्रीष्मे शरदि च न सेव्यम् (भा. पू. १ भ. वा.) आर्द्रकं नागरगणं भेदनं दीपनं गुरु (म. द. व. १८)
आर्द्रचिक्कण-न., आमचिक्कणगुवाकम् (रा. व. २३)
आर्द्रकस्वरस-पु., आर्द्रकस्य स्वरसः (च. द. ज्व. त्रि. कवलधारणे)
आर्द्रज-न., शुण्ठी (रा. व. ६)
आर्द्रदाडिमनिर्यास- पु., आर्द्रदाडिमफलस्वरसः (सि. यो. अरोच. चि. श्रीकण्ठः)
आर्द्रमरिच-न., आममरिचम् । गुणाः--आर्द्रं तु मरिचं किञ्चिच्चोष्णं पाके रसे मधु । अपित्तलञ्च कटुकं गुरु चाग्निप्रदीपनम् । तिक्तञ्च रुचकं स्वादु कफवातहरं परम् । हृद्रोगञ्च कृमींश्चैव नाशयेत् (वै. नि.)
आर्द्रवटक-पु., भोज्यद्रव्यम् । (भा. पू. १ भ.)
आर्द्रास्य-न., आर्द्रकम्
आलगर्द-पु., अलगर्दः । जलसर्पः ।

आ. सं. पू. ६

आलदूषक-पु., तन्नामकप्रतुदः (सु. सू. ४६)
आलस्य-न., अलसता, सामर्थ्येऽपि कर्मण्यनुत्साहः (भा. म. १,भ. ज्व. चि.)
आलात-न., अङ्गारः (रा. व. २०)
आलान-न., गजबन्धनस्तम्भः (मे.)
आलाबु(बूः)-स्त्री., अलाब्वाम् (श. र.)
आलावर्त-न., वस्त्रव्यजनम् (हे. च.)
आलास्य-पु., कुम्भीरः (हे. च.)
आलि-पु., वृश्चिकः । भ्रमरः (मे.)
आलिङ्गन-न., आश्लेषः ।
आलिञ्जर-पु., अलिञ्जरः (त्रि. का.)
आलिम्पना-स्त्री., तृप्तिः (त्रि. का.)
आलिवल्ली-स्त्री., हालिम इति लोके । आशालबीज इति गुर्जरे (वै. नि. २ भ. वा. व्या. कटिवा. चि)
आली-स्त्री., कफोणिः ।
आलूकी-स्त्री., रक्तालुभेदः । या दीर्घा कठिना तन्वी च । गुणाः—बलकृत् स्निग्धा गुर्वी हृदयकफघ्नी विष्टम्भिनी तैलभर्जिताऽत्यन्तरुचिकरी । (भा. पू.१ भ शा. व)
आलेप-(नम्)-पु., न., जातमात्रशोथव्रणादौ यथोक्तौषधलेपः (सु. चि. १)
आलेय-न., पद्मकाष्ठम् (वै. नि.)
आलोक-(नम्)-पु., न., दर्शनम् । दीपः (मे.)
आलोल-पु., कम्पः । वि., कम्पितः । लम्बमानः
आल्लूक-न., आलुकः । हिं.-अलु, आलुबोखार, गुणाः-रसतः शीतं स्वाद्वम्लं वातपित्तकरञ्च (मदव. ६)
आवट्टज-पु., उत्तमाश्वः । पारसीकाश्वः (त्रिका.)
आवपन-न., भाण्डम्, बीजवपनम् (अम.)
आवरक-त्रि., आच्छादकः
आवर्त-पु., भ्रमः (भा. म. ३ भ, उदा. चि.) राजावर्तमणिः । (रा. व. १३) तन्नामकमर्मस्थानम् (सु. शा ६)
न., स्वर्णमाक्षिकम् (रा. व. १३)
आवर्तक-पु., कीटविशेषः, तद्दष्टे वायुजन्यरोगा जायन्ते (सु. क. ८ अ) राजावर्तमणिः । (रा. व. १३) न., स्थलपद्मम् । रौप्यमाक्षिकम् (रा. व. १३)
आवर्तकी-स्त्री., स्वनामख्यातलता कोकणादिदेशे आहुली तलाडवल्ली, भगतवल्ली इति च प्रसिद्धा । गुणाः-कषायोष्णा सरा तिक्ता रसायनी वृष्या वातामवातरक्तशोथमेहघ्नी (मदव. १) कषायाम्ला शीतला पित्तहा । (रा. व. ३) बृहद्दन्ती, भद्रदन्ती (रा. व. ६)

आवर्तन–न., आलोडनं दुग्धादीनाम्, धातुगालनम् (अ. टी.)
आवर्तनी–स्त्री-, (हिं.–मरफली) धातुगालनपात्रम् (श. र)
आवर्तपूलिका–स्त्री., पूलिकाभेदः
आवर्तमणि–पु., राजावर्तनामकोपरत्नम् (रा. व. १३)
आवर्तिनी–स्त्री., अजशृङ्गी (र. मा.)
आवलीकन्द–(क)–पु., मालाकन्दः । (रा. व. ७)
आव(ब)ल्य–न., दौर्बल्यम्
आवस्थिक–वि., अवस्थोचिते अवस्थानुसारीणि (सु. चि. ३८)
आबाधा–स्त्री., पीडा (श. र.)
आवारि–न., हट्टगृहम् (उणा.)
आवि–पु., पक्षिणि (वै. नि.)
आविक–पु., कम्बलम् (हे. च. । हला) वि., मेषसम्बन्धिनि–न., मेषमांसादि । मेषीदुग्धम्
आविकघृत–न., मेषीनवनीतजातघृतम्, गुणाः—तच्च मुखरोगे परं हितम्, दृष्टफलम् । आविकं पित्तकृद्वातशमनं कफकोपनं । गुल्मार्शःकुष्ठरोगे च रक्तपित्ते न शस्यते (अत्रि. ८ अ.)
आविकी–स्त्री., कम्बलम्, शल्लकी (वै. नि.)
आविट–पु., वृक्षविशेषः (म—आपटा)
आविध–पु., वेधनास्त्रम्
आवि–पु., प्रसववेदना–मूत्रकफप्रसेकादीनि (मा. नि. मूढगर्भे)
आविलकन्द–पु., मालाकन्दः (रा. व. १)
आविलमत्स्य–पु., मत्स्यविशेषः । तल्लक्षणम् यथा–शुभ्राङ्गः ताम्रपक्षः स्थूलाङ्गश्च । गुणाः–अतिरुच्यः मधुरः बल्यः वीर्यपुष्टिवर्धनश्च गुणाढ्यश्च
आविला–स्त्री., मत्स्यः, चाङ्गेरी (अम.)
आविवृक्ष–पु., मेषशृङ्गी (वै. नि.)
आविष्ट–वि., प्रेतादिभिर्गृहीतम् (हा. रा.)
आवेशनमन्त्र–पु., येन मन्त्रेण भूतादयः शरीरे विशन्ति (अत्रि. ३ स्था. ५ अ.)
आवेशिक–वि., आगन्तुकः (अम.)
आशन–पु., आसनवृक्षः (द्विरूपकोष)
आशय–पु., आधारः अभिप्रायः । पनसवृक्षः (मे.) अजीर्णम्, कोष्ठागारम्
आशयफल–न., पनसः (विश्वः)
आशयाश–पु., वायुः । अग्निः (अ. टी.)
आशा–स्त्री., तृष्णा (अम.)
आशाढ–पु., चतुर्थमासः (द्विरूप अ. टी.)
आशापूरसम्भव–पु., भूमिजगुग्गुलः (रा. व. १३)
आशाबन्ध–पु., मर्कटजालम् (मे.)
आशित–वि., भुक्तम् । आशितम् (जटा. न., भोजनम्)
आशितम्भव–न., अग्न्यादौ (पु.,) तृप्तिः (मे)
आशितृ–वि., अतिशयभोक्ता
आशुग–पु., वायुः (अम.)
आशुतीक्ष्णक–न., ताम्रम्
आशुप–पु., वंशविशेषः (श. च.)
आशुपत्री–स्त्री., शल्लकीलता
आशुमण्ड–पु., आशुभक्तमण्डम्; गुणाः–ग्राही मधुरः कफकरः तर्पणः क्षयदोषघ्नः शुक्रवर्धनश्च (अत्रि १. स्थान २३ अ.)
आशुव्रीहि–पु., बोरोधान्यम् (रत्ना.) आशुधान्यम् (अ. टी. भ.)
आशुशुक्षणि–पु., अग्निः (रत्ना).
आशोकुटी–पु., पर्वतः (श. मा.)
आश्रयाश–पु., चित्रकवृक्षः । अग्निः (अम.)
आश्रव–पु., क्लेशः (मे.)
आश्वत्थ–न., अश्वत्थफलम् (अम.)
आश्वयुज–पु., षष्ठमासः । आश्विनः
आश्विन–मासि, अत्र रवेः कन्याराशिस्थितिः
आश्विनेय–पु., अश्विनीकुमारौ (अम.)
आश्वीन–वि., एकेनाश्वेन एकदिनगम्यपन्थः(पथि)(अम.)
आषाढ–पु., स्वनामख्यातचतुर्थमासः । यत्र रवेः मिथुनराशिस्थितिः(अम.) पलाशदण्डः (मे.)
आषाढक–न., पलाशबीजम्
आसङ्गा–स्त्री., सौराष्ट्रमृत्तिका (रा. व. १३)
आसङ्गिनी–स्त्री., चक्रवायुः (त्रि.का)
आसङ्गिगम–पु., कर्णबन्धनाकृतिविशेषः । स चाभ्यन्तरदीर्घैकपालिः (सु. सू. १६)
आसनपर्णी–स्त्री., अपराजिता(म. गोकर्णवल्ली)(वै.नि.)
आसन्द–पु., खट्वाभेदः (मे. द. त्रिकम्)
आसन्दी–स्त्री., लघुखट्विका (हारा.)
आसन्नकाल–पु., मृत्युकालः ।
आसारण–पु., वृक्षभेदः (भेष.)
आसुति–पु., मद्यसन्धानम् (हे. च.)
आसुर–न., विड्लवणम् (रा. व. ६)(भा. पू. १ भ) सामुद्रलवणम् (म.द. व. २

आसुरी–स्त्री., चिकित्साविशेषः। आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता (श. च)
आस्कन्दन–न., संशोषणम् (मे. न.त्रिकम्)
आस्तर–पु., करिकम्बलम् (हे. च.)
आस्तिकमति–पु., उत्तमवैद्यः
आस्था–स्त्री., यत्नः। अपेक्षा, आलम्बनम् (मे.थ. द्विक) जलम् (हे. च.)
आस्थागम–पु., जलम् (हे. च.)
आस्पद–न., स्थानम् (हे. च.) प्रतिष्ठा (अम.)
आस्यन्दन–न., अतिकम्पः। स्पन्दनम्
आस्यदेश–पु., मुखमध्यः
आस्यपत्र–न., पद्मम् (श. च.)
आस्यपुष्प–पु., श्वेतकिणिहीवृक्षः (वै. नि.)
आस्यफल–पु., श्वेतधत्तुरवृक्षः (वै. नि.)
आस्यलाङ्गल–पु., शूकरः। वन्यशूकरः
आस्यलोमन्–न., श्मश्रुणि (मे.)
आस्यशाखोट–पु., गुल्मविशेषः। 'वट्टुश्चास्यशाखोटः स पित्तकफनाशनः। वातलश्च कृमिं हन्ति पाण्डुताज्वरकामलाः (अत्रि.)
आस्यासव–पु., लाला (हे. च.)
आस्रव–पु., प्रस्रावः
आहक–(ज्वर)–पु., नासाज्वरः। तल्लक्षणम्–'तनुना रक्तशोथेन युक्तो नासापुटान्तरे। गात्रशूलज्वरकरः श्लेष्मणा हि आहकज्वरः।' (वै. नि.)
आहर–पु., उच्छ्वासः। अन्तर्मुखनिःश्वासः (हे. च.)
आहलीव–न., आसलबीज इति गुजरातदेशे प्रसिद्धम्। गुणाः–आहलीव मतं चोष्णं तिक्तं त्वग्दोषनाशनं। वातं गुल्मं नाशयतीत्येवं प्रोक्तं चिकित्सकैः (वै.नि.)

इ

इ–पु., पुरुषोत्तमः (हला.)
इकट–पु., वंशाङ्कुरः
इक्कट–पु., तृणविशेषः (प. मु.) बदरवृक्षः (रत्ना)
इक्षुकण्डिका–स्त्री., इक्षुकाण्डम्। काकोली भूमिकूष्माण्डः (वै. नि. । वा. टी. हेमाद्रि)
इक्षुकाश–पु., काशतृणम् (मदव.)
इक्षुकीय–पु., इक्षुयुक्तदेशः
इक्षुगण्डिका–स्त्री., काशतृणम् (वै. नि.)
इक्षुजटा–स्त्री., इक्षुमूलम् (चि. क. क. प्रदरचि.)
इक्षुनेत्र–न., इक्षुमूलम्। येनेक्षुः पुनरुत्पद्यते (रा.व. १४)
इक्षुपत्र (क)–पु., यावनालः
इक्षुपत्री–स्त्री., वचा, शुक्लभूमिकूष्माण्डः
इक्षुपाक–पु., गुडः।
इक्षुपुङ्खा–स्त्री., शरपुङ्खा (रा. व. ४)
इक्षुप्र–पु., शरतृणम् (रा. वा. ८)
इक्षुभक्षिका–स्त्री., इक्षुरसनिष्कासने यन्त्रम्
इक्षुमद्य–न., इक्षुविकारजमद्यम् 'इक्षुदण्डं मरिचं बदरञ्च तथा दधि। शेषे तु लवणं दत्त्वा इक्षुमद्यं प्रकीर्तितम्' (वै. नि.)
इक्षुरवी (बी) ज–न., कोकिलाक्षबीजम्
इक्षुरसविकार–पु., इक्षुगुडः
इक्षुरालिका–स्त्री., इक्ष्वालिका (रत्ना। च. २ चि. अ.) बृंहणीवर्त्याम्)
इक्षुविदारिका (री)–स्त्री., भूमिकूष्माण्डः (प. मु)
इक्षुवेष्ट (लः) पु., मुञ्जतृणम् (भा. पू० १भ. गु. क)
इक्षूरक(बीज) न., कोकिलाक्षबीजम्
इक्ष्वालि (क) (का)–वि., इक्षुभक्षकः (च. चि. २)
इक्ष्वाद–पु., काशतृणम् (मद. व १)
इङ्ग–वि., जङ्गमम् (हे. च.)
इङ्गल–पु., इङ्गुदीवृक्षः (वै. नि.)
इङ्गुल–(ली) पु., स्त्री., इङ्गुदीवृक्षः (रा. व. ८ न., हिङ्गुलः (मा. नि. वि. जर.)
इच्छाभेदिन्–पु., भेदकरसविशेषः (र. सा. सं. विरेकाधिकारे)
इच्छुक–पु., मातुलुङ्गवृक्षः (श. च.)
इज्जल–पु., हिज्जलवृक्षः समुद्रफलं इति च लोके। 'शीतलः संग्राही वातकोपनः विशेषेण विषघ्नः (मद. व. ५) कुष्ठहृत् वातकोपनश्च (भा.पू. १ भ.)
इञ्चुक–पु., मत्स्यविशेषः (त्रि. का.)
इटचर–पु., षण्डः (अम.)
इडा–स्त्री., शरीरवामभागस्थनाडी वाममुष्काधःस्था धनुर्वक्रा वामनासिकापर्यन्तगता या नाडी, सा इडा इत्युच्यते (हे. च.)
इडाचिक–स्त्री., वरटा (श. च.) गन्धोली
इडिक–(कः) पु., वन्यच्छागः वानरः (हा. रा.)
इड्डर–पु., वृषः (अ. टी.) स्वामी
इत्कटा–स्त्री., सूक्ष्मपत्रिका– दीर्घलोहितयष्टिकाकाष्ठविशेषः (वा. सू. १५) वेल्लन्तरादिवर्गः
इत्किला–स्त्री., गोरोचनाख्यगन्धद्रव्यम् (श च)
इदङ्कार्या–स्त्री., दुरालभा (श. च.)
इध्म–न., अग्निदीपनकाष्ठम् (अम.)
इनानी–स्त्री., वटपत्रीवृक्षः (रा. व. ५)
इन्दीवर–न., नीलकमलम्। नीलपद्म (श. मा.)

इन्दिन्दिर–पु., भ्रमरः (त्रि. का)
इन्दिरा–स्त्री., लक्ष्मी (त्रिका)
इन्दिरामन्दिर–न., विष्णुः (रा.)
इन्दिरालय–पु., पद्मम् (श. र.)
इन्दिरावर–न., नीलपद्मम् (प. मु. श. र.)
इन्दीवरा (री) स्त्री., शतमूली (प. मु.) अजश्रृङ्गी (प. मु) कदलीवृक्षः (वै. नि.) इन्दीचिर्भटी (रा. व. ३)
इन्दुकान्त–पु., चन्द्रकान्तमणिः (रा. व. १३)
इन्दुचन्दन–न., हरिचन्दनम् (वै. नि)
इन्दुपत्र–पु., भूर्जवृक्षः (संग्रह)
इन्दुपोदकी–स्त्री., वेल्लिका (रा. व. ३२)
इन्दुफल–पु., आम्रातकः (वै. नि)
इन्दुमुखी–स्त्री., पद्मिनी (वै. नि)
इन्दुर–पु., मूषिकः अयं बिलेशयः बिलेशयत्वात् एतन्मांसं वातघ्नं मधुरं बृंहणं बद्धविण्मूत्रं वीर्योष्णञ्च (भा. पू. १ भा.)
इन्दुरकर्णिक (र्णी)–स्त्री., आखुकर्णीलता
इन्दुरसा–स्त्री., पिष्टकभेदः (वै. नि.)
इन्दुरा–स्त्री., सोमराजी (वै. नि)
इन्दुवल्लिका (ल्ली)–स्त्री., सोमलता गुडूची (जटा) सोमराजी यमानी (वै. नि.)
इन्दुशकला–स्त्री., सोमराजी (वै. नि)
इन्द्रकर्णक–पु., रक्तैरण्डः ।
इन्द्रकोष–पु., निर्यूहः । निर्यासः । तमङ्कम् (हे. च. हला.)
इन्द्रगुप्त–न., उशीरम् (अ. टी. भ.)
इन्द्रचन्दन–न., हरिचन्दनम् । रक्तचन्दनम् (रा. व. १२)
इन्द्रच्छन्द–न., सहस्रगुच्छहारः । (हे. च.)
इन्द्रज–पु., इन्द्रयवः । (वै. नि.) कुटजवृक्षः (वै. नि. अ. सा. चि. कुटजचूर्णे)
इन्द्रजतु–न., शिलाजतुः (वै. नि.)
इन्द्रजम्बूकवत्पात्रा–स्त्री., कृष्णसारिवा (भा. पू. १ भ.)
इन्द्रजिह्वा–स्त्री., लाङ्गलिवृक्षः
इन्द्रतरु–पु., अर्जुनवृक्षः । (वै. नि.)
इन्द्रतूल(क)–न., आकाशे उड्डीयमानसूत्रम् । कार्पासः । अर्कवृक्षतूलकः (त्रिका.)
इन्द्रद्युति–न., चन्दनम् (वै. नि.)
इन्द्रद्रु–(म)–पु., अर्जुनवृक्षः (श. र. अ. म.) कुटजवृक्षः (रा. व. ८) देवदारुवृक्षः (भा. पू. अने.)
इन्द्रपुष्प–न., लवङ्गम् (र. सा. सं. पूर्णचन्द्ररसे)
इन्द्रब्रह्मवटी–स्त्री., अपस्मारे हिता (र. सा. सं.)
इन्द्रभेषज–न., शुण्ठी (श. र.)
इन्द्रमद–पु., तरुगुल्मज्वरः (गजवै.)
इन्द्रमहाकामुक–पु., कुक्कुरः (त्रिका.)
इन्द्रलोहक–न., रौप्यम्
इन्द्रवचा–स्त्री., इन्द्रयवः (रा. व. ८)
इन्द्रवटी–स्त्री., प्रमेहाधिकारे प्रयोज्येयम् । मृतं सूतं वङ्गमर्जुनस्य त्वचान्वितं । तुल्यांशं मर्दयेत् खल्ले शाल्मल्या मूलजद्रवैः (र. सा. सं. का. सौ.)
इन्द्रवि(वृ)द्धा–स्त्री., वातपित्तजन्यक्षुद्ररोगान्तर्गतव्रणरोगविशेषः (मा. नि. ५५.८)
इन्द्रसुत–पुं., अर्जुनवृक्षः (रा. व. ८)
इन्द्रसुरस–(सा) (पु., स्त्री.,) निर्गुण्डीवृक्षः (रत्नाअ)
इन्द्रसुरिष–(स) (पु.,) निर्गुण्डीवृक्षः (र. मा. अ. म.)
इन्द्रस्वरस–पु., पुष्टिजलम् (च. द. अर्शचि. नागार्जुनयोगे)
इन्द्रार्धपादप–पु., क्रमुकवृक्षः (रा. व. ११)
इन्द्राशन–(क) पु., संविदावृक्षः (जातीफलादिवट्याम्) गुञ्जा कुष्ठौषधे (हा. रा.)
इन्द्रियकर्म–न., चक्षुरादीनां शब्दाकर्णनस्पर्शग्रहणरूपदर्शन–रसग्रहण – गन्धग्रहणवचनादानविसर्गमनानन्दाख्यानि (सु. शा. १)
इन्द्रियगोचर–त्रि., इन्द्रियविषयः
इन्द्रियग्राम–पु., शरीरम् (वै. नि.) इन्द्रियसमूहः
इन्द्रियघ्न–पु., चक्षुरोगविशेषः
इन्द्रियज्ञान–न., इन्द्रियजन्यज्ञानम्
इन्द्रियबुद्धी–स्त्री., इन्द्रियजन्यज्ञानम्
इन्द्रियवर्ग–पु., एकादशेन्द्रियाणि इन्द्रियसमूहः
इन्द्रियवैकल्य–न., इन्द्रियदुर्बलता
इन्द्रियसंताप–पु., इन्द्रियवैकृतिः
इन्द्रियस्वाप–न., प्रलयः, निद्राचेष्टानाशः (रा. व. २०)
इन्द्रियागोचर–स्त्री., अतीन्द्रियम्
इन्द्रियायतन–न., शरीरम् (हे. च.)
इन्द्रियार्थ–पु., इन्द्रियजन्यज्ञानविषयम् । यथा–रूपरसगन्धस्पर्शशब्दाः (अम.)
इन्द्रोपल–न., नीलहीरकः (प. मु.)
इभदन्ता–स्त्री., हस्तिशुण्डीवृक्षः । (रत्ना.) नागदन्ती (र. मा)
इभदन्ताह्वा–स्त्री., नागदन्ती (र. मा. रत्ना.)
इभपुष्प–न., नागकेशरम् (भेष. मु. रो. चि.) (बृहत्खदिरवट्याम्)

इभपोटा–स्त्री., करिशावकः
इभबला–स्त्री., नागबला (वै. नि. क्षय चि. वासाद्यघृते ।)
इभमज्जक–पु., पुत्रदात्री लता (वै. नि.)
इभमाचल–पु., सिंहः
इभमूलक–न., हस्तिमूलकम् । गन्धतृणम् (वै. नि)
इभषा–स्त्री., स्वर्णक्षीरी (र. मा.)
इभाख्य–पु., नागकेशरवृक्षः (त्रिका.)
इभावती–स्त्री., वटपत्रीवृक्षः
इभी–स्त्री., हस्तिस्त्री
इभोषणा–स्त्री., गजपिप्पली (श. च)
इभ्या–स्त्री., शल्लकीवृक्षः । करिणी (मे. यद्विकम्)
इरणम्–न., उषरभूमिः (अ. टी. र, रा. व. २)
इरिकील–पु., अङ्कोलवृक्षः (वै. नि)
इरिणम्–न., ऊषरभूमिः (अजय. रा. ब. २)
इर्म्म (म्)–न., व्रणः । क्षतम् (अम.)
इर्वारु–पु., स्त्री., कर्कटीनामफलशाकवि० (प. मु.) रोमशकर्कटीति (ड. सु. सू. ४२ अ. मधुरवर्गः)
इर्वारुशुक्ति (का)–स्त्री., फुटीति ख्यातनिर्भिन्नकर्कटी (हा. रा.)
इर्वालु–पु., स्त्री., कर्कटिका (अ. टी. रा.)
इली–स्त्री., करबालिका (अ. टी. रा.)
इल्लल–पु., पक्षिभेदः (श. च.)
इल्वल–पु., मत्स्यभेदः (मे. लत्रिकम्)
इशि (शी) का–स्त्री., गजाक्षिगोलकः । शरकाण्डम् (अ. टी. भ.)
इषिर–पु., अग्निः
इषुगोलक–पु., कोकिलाक्षवृक्षः
इषुपत्रिका–(त्री)–स्त्री., अर्कमूली (र. मा)
इष्ट–पु., एरण्डवृक्षः (श. च)(न) उशीरम् (अ.टी.भ.)
इष्टा–स्त्री., शमीवृक्षः (रा. व. ८)

ई

ईक्षणिक–पु., स्त्री., हस्तरेखाद्यवलोकनम् (नेन) शुभाशुभकथनजीवी
ईक्षा–स्त्री., दृष्टिः
ईज्या–स्त्री., भूमिः । गौः (वै. नि.)
ईडा–स्त्री., नाडी
ईड्या–स्त्री., भूम्यामलकी (वै. नि. ज्वरचि.)
ईप्सितफल–पु., नारिकेलवृक्षः
ईरिण–न., उषरक्षेत्रम् (मे. णत्रिकम्)
ईर्म–न.,व्रणः (हारा. क्षतम् (अम.)
ईर्वारु–पु. स्त्री.,कर्कटी (श. र.)
ईर्वारुशुक्ति–स्त्री., खर्भूज इति प्रसिद्धफललता (श. र)
ईश–पु., पारदः (अञ्जनरसः) (र. सा. स.) (पञ्चवक्त्ररसः) (वै. नि. ज्वचि.)
ईशलिङ्गिनी–(ङ्गी)–स्त्री., भवलिङ्गीलता (भा. म. ४ भ. यो. व्या. चि.)
ईशा–स्त्री., लाङ्गलदण्डम् (मे. शद्विकं)
ईशादन्त–पु., हस्तिदन्तः (शर) (न्तः न्ती) उदयदन्तिः (हे. च. त्रिका.)
ईशानवायु–पु., तद्दिग्भववातः । सच कटुकः (वै. नि.)
ईशावस–पु., कर्पूरभेदः । गुणाः–भेदी वृष्यो मदापहः अतिशुभ्रोन्मादतृषाश्रमकासकृमिक्षयान् स्वेदग्रैवाङ्ग-दाहञ्च नाशयेत्
ईशिर–पु., अग्निः (त्रिका.)
ईश्वरमल्लिका–स्त्री., वकवृक्षः (वै. नि.)
ईश्वरमूलक–पु. न., तरुभेदः (भेष.) (कुष्ठ.) (कन्दर्पसारतैले)
ईष–पु., आश्विनमासः (अ. टी. भ.)
ईषत्पाण्डु–पु., धूसरवर्णः (अम.)
ईषदुष्ण–त्रि., कवोष्णम्
ईषद्दीर्घ–न., वातामफलम् (वै. नि)
ईषद्बीजा–स्त्री., बेदाना इति ख्यातफलवृक्षः
ईषादन्त–पु., दीर्घदन्तराजः (हे. च.)
ईषिकास्त्र–न., अस्त्रविशेषः । येन वासवोऽश्वानां पक्ष-च्छेदं कृतवान् (नकुलः १ अ)
ईष्म–पु., वसन्तकालः (उणा.)
ईहामृग–(वृक)–पु., कोकः (रत्ना.) कुकुरवत् हरिण-घातिकपिलवर्णजन्तुविशेषः (रा. व. १८ वृकः) (श. र.)

उ

उकनाह–पु., पीतरक्तवर्णघोटकः (हे. च.) लक्षणम् रक्तपीतकषायोत्थवर्णजो यस्य दृश्यते । उकनाहः स विख्यातो वर्णो वाहस्य देहजः (ज. द. ३. अ)
उकुण–पु., शिरःकीटः
उत्क्लेद–पु., वमिः
उख (ष) र. न., क्षारभूमिः यत्रोप्तं बीजं न रोहति । क्षारमृत्तिका (वै. नि. रा. ब. २)
उख (ष) रज–न., पांशुलवणम् रोमकनाम अयस्का-न्तभेदम् लवणम् (रा. व. २०)

उखर्वल–पु., तृणविशेषम् (हिं--उखल) गुणाः–बलदः रुचिजनकः । पशूनां सदा हितश्च

उखल–पु., उखर्वलतृणम् (रा. व. ८)

उख्य–त्रि., उखासंस्कृतम् मांसादि (हिं–हाण्डि)

उग्रनासिक–पु., दीर्घनासिकः (ह. व.)

उग्रपत्रक–पु., महानीली (वै. नि.)

उग्रभा–स्त्री., गोनसवली (वै. नि.)

उग्रवीर्य–न., हिङ्गुः (रा. व. ६)

उङ्कुण–पु., उत्कुणः (श. मा.)

उच्च–पु., नारिकेलवृक्षः (रा. व. ११) सरलदेवदारः (त्रि.,) उन्नतः

उच्चट–पु., वङ्गम् (वै. नि.)

उच्चटापत्र–पु., क्षुद्रतालिशपत्रम् न., चिञ्चोटकपत्रम्

उच्चटाफल--न., रक्तगुञ्जा (भेष. कुष्ठ. चि. महाभल्लातकगुडे)

उच्चटामूल–न., चिञ्चोटकमूलम् (सु. चि. २६)

उच्चन्द्र–पु., निशाचतुर्थप्रहरः (श. र.)

उच्चल–न., मनः (हे. च.)

उच्चललाटा(टिका)–स्त्री., मरुण्डी (हारा) उच्चललाट-विशिष्टा (त्रिका)

उच्चाटन–स्त्री., उत्खातनम् । षट्कर्मान्तर्गताभिचारकर्म (तन्त्रम्)

उच्चिटिङ्ग–पु., उच्चिटिङ्गनामकीटः

उच्चूल–पु., ध्वजोर्ध्वमुखकूर्चम् (हे. च.)

उच्छिलीन्ध्र–न., गोमयच्छत्राकम् (भागवत)

उच्छिष्टमोदन–न., सिक्थकम् (रा. व.)

उच्छेद–पु., उन्मूलनम्

उज्जासन–न., मारणम् (अम.)

उज्झटा–स्त्री., भूम्यामलकी

उञ्छ–पु., उञ्छशिला (जटा)

उट–पु., शुष्कतृणम् (वै. नि.)

उट्टङ्क–न., मूत्रम् । अस्त्रभेदः ।

उडु–न., उदकम् (अ. टी. भ.)

उडुपप्रिया–स्त्री., कमलिनी (म. द. व. ३)

उडुम्बर–पु., स्त्री., उदुम्बरवृक्षः (अम.) कुष्ठरोगविशेषः (मे.) लक्षणम्–उडुम्बरफलाभासं कुष्ठमौडुम्बरं वदेत् (मा. नि.) ताम्रम् (प. मु.) कर्षमानम् (२ तो.) (प. प्र.)

उडुम्बरदला–स्त्री., दन्तीवृक्षः (रा. व. ६)

उडुम्बरपर्णी–स्त्री., दन्तीवृक्षः (श. च.)

उड्डामररस–पु., पित्तगुल्माधिकारे रसः (रसरगुल्मचि.)

उड्रू–(पुष्प)–पु., न., जपापुष्पवृक्षः । जपापुष्पम् (वै. नि.)

उढ्र–पु., न., जपापुष्पवृक्षः

उत्कट–पु., उष्णवारणः (हा. रा.)

उत्कण्टक–न., वृक्षभेदः (च. चि. ३)

उत्कलिका–स्त्री., उत्कण्ठा (हा. रा.)

उत्कुट–न., उत्तानशयनम् (हारा.)

उत्कुण–पु., केशकीटः (हे. च.)

उत्खला–स्त्री., सुरानाम गन्धद्रव्यम् (श. च.)

उत्तप्त–न., शुष्कमांसम् त्रि., तप्तः । स्नातः

उत्तमफलिनी–स्त्री., दुग्धिका (प. मु.)

उत्तमवारि–न., तण्डुलोदकम्

उत्तमवैद्य–पु., कृतसाङ्गवेदाध्ययनः वैद्यः

उत्तमाङ्ग–न., मस्तकम् (रा. व. १८ (त्रि.) उत्कृष्टाङ्गम्

उत्तरकाल–पु., भाविकालः

उत्तरङ्ग–न., द्वारस्योपरितिर्यक्काष्ठम् (हला.)

उत्तरायण–न., मकरसंक्रान्तितो मिथुनसंक्रान्ति-समाप्तिपर्यन्तकालः सवितुरुत्तरमार्गगतिरूपः वा कालः । तत्रादानं जानीयात् यतस्तदा नृणां प्रतिदिनं सारमादत्ते, आदित्यपवनयोः भुवः सौम्यगुणहरत्वात् (वा. सू. ३ अ)

उत्तरिणी–स्त्री., उत्तमारणी

उत्तानक–पु., मुस्ताभेदः; उच्चटा (र. मा. रत्ना.)

उत्तानशय–पु., स्तन्यपायिशिशुः अतिशिशुः (अम.)

उत्तानशायी–त्रि., उत्तानशायि (वै.नि.)

उत्ताप–पु., तेजः, उँष्णता

उत्तापन–न., उष्णताकरणम्

उत्तार–पु., वमनम्

उत्ताल–पु., मर्कटः (मे. लत्रिकं त्रि.) उत्कटः

उत्तुष–पु., लाजा (हा. रा.)

उत्तेजि (रि) त–न., अश्वस्य मध्यवेगगतिः; इयं चतुर्थ-पञ्चमगतिः

उत्तोलन–न., उत्क्षेपणम्

उत्थित–पु., सरलवृक्षः (रा. व. १२)(त्रि) उत्पन्नम् (मे. तत्रिकम्)

उत्थिताङ्गुलि–पु., चपटः (श. च.)

उत्पलकुष्ठक–पु., कुष्ठौषधिः (वै. नि.)

उत्पलकेसर–न., पद्मकेशरम् (भेष. क्षुद्र)(रो चि.) (कनकतैले)

उत्पलगन्धिक–न., अतिसुरभिचन्दनविशेषः
उत्पलगोपा–स्त्री., श्वेतसारिवा
उत्पलदल–न., तन्नामकारम् छेदने भेदने च । लक्षणं यथा "उत्पलाध्यर्द्धधाराख्ये भेदने छेदने तथा (अ. त्रि.)
उत्पलमृत्–स्त्री., सौराष्ट्रमृत्तिका (च. द. रक्तपित्तचि.)
उत्पलशारिवा–स्त्री., श्यामालता (प. मु)(र. मा.) अनन्तमूलम् (अम.)(भैष. ध्व. भ. चि.)
उत्पलषट्क–न., योगविशेष० । 'उत्पलं धान्यकं शुण्ठी पृश्निपर्णी बलायुतं । बालबिल्वं गवां तक्रेणात्युष्णे न च पेषयेत् । तेन लाजकृतं मण्डं देयमानीय शीतलम् । ज्वरातिसारशमनं हुताशनबलप्रदम् (हा. अत्रि. ३ स्था ३. अ.)
उत्पली–स्त्री., तुषचर्पटी (मे. लत्रिकम्)
उत्पादक–पु., शरभः (हे. च.)
उत्पादशयन–पु., टिट्टिभः (हे. च.)
उत्पादिका–स्त्री., उपजिह्विका (हारा.) हिलमोचिका उपोदिका (त्रिका.) देहिकानामकीटविशेषः (श. च.)
उत्पार–पु., शुद्धघृतम्
उत्पाली–स्त्री., आरोग्यम् (श. च.)
उत्पिञ्जल–त्रि., भृशमाकुलः (हे. च.)
उत्पीड–पु., सुरामण्डः फेनः
उत्प्राण–पु., श्वासः (वै. नि.)
उत्सङ्गपिडिका–स्त्री., नेत्रवर्त्मगतरोगविशेषः नेत्राधोवर्त्मनि सञ्जातपिडका । सा च स्थूला कण्डूमती अधोवर्त्मनि सोत्सङ्गा वर्त्माभ्यन्तरमुखी बहिस्ताम्रान्तःपूया च (मा. नि.)
उत्सर्जन–न., दानम् (अ. म.)
उत्सर्जनी–स्त्री., गुदस्य द्वितीया वली । उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता (भा.)
उत्सर्या–स्त्री., प्राप्तप्रजननकालायां गतिः (जटा.)
उत्सव–पु., इच्छाप्रसवः उत्सेकः उत्साहः । क्रोधः (मे. वत्रिकम्)
उत्साहयुक्त–पु., शरभः (मद व. १२)
उत्साही–पु., भक्तरोगी
उत्सिहन–न., नासया ऊर्ध्वश्वासधारणः (वा. सू.)
उत्सुक–त्रि., उत्कण्ठितः व्यग्रः
उत्सूर–पु., सन्ध्याकालः दिनावसानम्
उत्स्मय–पु., मन्दहास्यम् (वै. नि.)
उत्क्षिप्तिका–स्त्री., आतङ्कविशेष० (हे. च.)
उदकमञ्जरीरस–पु., रसोऽयं निरामज्वरे देयः, सूतो गन्धष्टङ्कणः सोषणः स्यादेतैस्तुल्या शर्करा मत्स्यपित्तैः । भूयो भूयो भावयेच्च त्रिरात्रं वल्लो देयः शृंगवेरस्य वारा । शर्करास्थाने मनःशिलादानेन चन्द्रशेखररसो भवति
उदकषट्पल(घृत)–न., अर्शोरोगे देयः (च. द. अर्शचि.)
उदकिका–स्त्री., बला नामक्षुपः (रा. व. ४)
उदकी–स्त्री., पाठा (वै. नि. ग्रह. चि. २, अतिविषादि.)
उदकोदर–न., जलोदरनामरोगः
उदक्या–स्त्री., रजःस्वला (अम.)
उदण्डपाल–पु., मत्स्यविशेषः (मे. लपञ्चकम्)
उदद्या–स्त्री., तैलपिपीलिका (रा. व. १८)
उदधिफल–न., समुद्रफेनः (वै. नि.)
उदधिलवण–न., सामुद्रलवणम् (भा. नि)
उदधिशुक्ति–स्त्री., मुक्तास्फोटः
उदधिसम्भव–न., सामुद्रलवणम् (भा. पू. १ भ)
उदन्तिका–स्त्री., तृप्तिः (हारा.)
उदन्या–स्त्री., पिपासा (रा. व. २०)
उदपर्णी–पु., कुधान्यविशेषः (सु.सू. ३८)
उदमन्थ–पु., उदकप्रधानमन्थः (च. सू. ६) आलोडितसघृतशक्तौ । स च ग्रीष्मे पेयः (भा.)
उदमान–न., वारिमानाढकः
उदम्बर–पु., शरीरजकृमिभेदः (शार्ङ्ग ७ अ)
उदयभास्करकर्पूर– पु., स्वनामख्यातकर्पूरः, स च पक्वः । सदलनिर्दलभेदेन द्विभेदः । गुणाः–पीतः सरः स्वच्छकः सम्प्रोक्तः कठिनः कटुः समुदितः स्याद्दीपकोऽग्नेर्लघुः । श्रीदः पित्तकरः कफकृमिविषान् वातञ्च नासाश्रुतिं लालास्रावगलग्रहौ च शमयेत् जिह्वाजडत्वापहः (वै. नि.)
उदरग्रन्थि–पु., अश्मरीरोगः । गुल्मरोगः (हे. च. अन्त्रम् प्लीहा)
उदरनाडी–स्त्री., अन्त्रनाडी
उदरपरीक्षा–स्त्री., जठरपरीक्षा
उदरपिशाच–पु., सर्वान्नभक्षकः (षे. च.)
उदरपीडा–स्त्री– उदरामयः
उदरभङ्ग–पु., अतीसाररोगः
उदररस–पु., उदरस्थपाचकरसः
उधरव्याधि–पु., उदरामयः
उदरस्फुटा–स्त्री., नागवल्ली (वै. नि.)

उदराग्नि-जठराग्नि; लघुतालीशपत्रम् (वै. नि.)
उदरानलपत्रक-पु.,
उदरामय-पु., अतिसाररोगः
उदरामयकुम्भकेशरी-पु., प्लीहाधिकारे रसः (र. सा. सं.)
उदरारिस-पु., उदराधिकारे रसः (र. सा. सं.)
उदरावर्त-पु., नाभिः (रा. व. १८)
उदरिणी-स्त्री., गर्भवती (हे. च.)
उदरिल-त्रि., महोदरयुक्तः
उदरी-त्रि., उदरिलः (हे. च.)
उदर्क-पु., धुस्तूरवृक्षः मदनकण्टकः (मे. कत्रिकम्)
उदर्चि-पु., अग्निः (मे.)
उदर्द्ध-पु., ज्वरविशेषः
उदलावणिक-त्रि., लवणोदकसिद्धव्यंजनम्
उदात्यूह-पु., जलकाकः (वै. नि.)
उदार-पु., दीर्घशालिः
उदित-पु., निवारः (प. मु.)
उदीक्षण-न., दर्शनम्
उदीच्यकाष्ठ-न., तोपचिनीति ख्यातद्रव्ये (दै. नि)
उदुम्बरच्छदा-स्त्री., ह्रस्वदन्तीवृक्षः (रा. व. ६)
उदुम्बरपर्णी-स्त्री., दन्तीवृक्षः (प. मु)(र. मा) लघुदन्तीवृक्षः (भा. पू. १ भ)
उदुम्बरमशक-पु., मूषिकः (वै. नि.)
उदूखलसन्धि-पु., उदूखलाकारग्रीवोर्ध्वगतसन्धि (भा) कक्षावङ्क्षणदशनसन्धिः । (सु. शा. ५)
उद्गम-पु., वान्तिः
उद्गमनी-न., धौतवस्त्रम् (अम.)
उद्गारकमणि-पु., प्रवालम् (पोवळे) (राव १३)
उद्गारण-न., उद्गारकरणम्
उद्गारशोधन-पु. न., श्वेतजीरकम् कृष्णजीरकम् (भा. पू. १ भ)
उद्गारशोधिनी-स्त्री., जीरकम् (वै. नि.)
उद्गाह-पु., उद्गारः (वै. नि.)
उद्घ-पु., देहस्थवायुः (मे. धाद्विकम्) हस्तपुटम् (हे.च.)
उद्घट-न., वार्ताकुपुष्पम् (वै. नि.)
उद्घस-न., मांसम् (हा. रा.)
उद्घाटक-न., घटीयन्त्रम् (हे. च.)
उद्घात-पु., पादस्खलनम् कालभेदः (मे.)(तत्रिकम्) पवनाभ्यासयोगाय कुम्भकादित्रयाणि (विश्व.) (तत्रिकम्) अस्त्रम् (त्रिका)

उद्दंश-पु., मत्कुणः (हे. च) दंशकीटः
उद्दण्डपाल-पु., मत्स्यविशेषः । सर्पविशेषः (मे.)
उद्दानक-पु., शिरीषवृक्षः (रा. व. ८), चुल्ल्याम् (विश्व.)
उद्दाला-स्त्री., आरी इति महाराष्ट्रे
उद्दिष्ट-पु., बदरवृक्षः
उद्दीप-प्र. पु. गुग्गुलः (अ. टी. भ.)
उद्देश-पु., गिरिगण्डकूपम् (हा. रा.) समासकथने । " समासकथनमुद्देशः, यथा शल्यमिति (सु. उ. ६५) उपदेशः " (हा. रा.)
उद्देहिका-स्त्री.; उत्पादिका ' वालवी ' इति ख्यातः महाराष्ट्रीये कीटविशेषः
उद्धम-पु., कष्टश्वासः
उद्धान्त-पु., निर्मदकारि (अम.)
उद्धारा-स्त्री., गुडूची (श. च.)
उध्दूषण-न., रोमाञ्चः (ह. ला.)
उद्धूत-त्रि., परिभुक्तोज्झितः (मे. तत्रिकम्)
उद्भट-पु., कच्छपः
उद्भूत-स्त्री., उत्पन्नः जातः
उद्भिद-पु., अङ्कुरः (रा. व. २)
उद्भ्रम-पु., उद्वेगः (अ.म.)
उद्याव-पु., मिश्रणम् । संयोजनम्
उद्योग-पु., चेष्टा
उद्र-पु., जलमार्जारः (हा. रा.) जलनकुलः (त्रि. का.)
उद्रथ-पु., वृक्षविशेषः ताम्रचूडः म. पाचकः (मे)
उद्राह्व-पु., रक्तचित्रकः (वै. नि.)
उद्रिक्तचित्तता-स्त्री., पानात्ययरोगः मत्तता (रा. व. २०)
उद्वत्सर-पु., संवत्सरः (हे. च.)
उद्वह-पु., पुत्रः । उदानवायुः (स्त्री.,) कन्या
उद्वान्त-पु., निर्मदगजः त्रि., उद्वमितः (मे तत्रिकम्)
उद्वाहनी-स्त्री., वराटकः
उद्विडाल-पु., जलविडालः
उधस्-न., (र.) म् न आपीनम् (हला.)
उध्मान-न., चुल्ली (अ. टी. भ.)
उन्दक-पु., धवलयावनालः (रा. व १६)
उन्दर-पु., मूषिकः
उन्दिरमारी-स्त्री., मूषिकारी तन्नाम्ना कोङ्कणे प्रसिद्धा । गुणाः-मूषकारी तु कटुका नेत्र्या चाखुविषापहा । व्रणदोषं नेत्ररोगं नाशयेदिति च स्मृतम् (रा. व. ४)

उन्दरुपर्णी–स्त्री., आखुकर्णी (रा. व. ३)
उन्दूवर–ताम्रम् (भा.)
उन्न–न., सुरतः । त्रि., क्लिन्नम् (मे. नद्विकम्)
उन्नाह–न., काञ्जिकम् (अम)
उन्मत्तकारिणी–स्त्री., दुग्धिका
उन्मत्ता(हिं–दुधियार)
उन्मत्तरस–पु., शीताङ्गसन्निपाते रसः (र. सा. सं. शीताङ्गसन्निपातज्वरः)
उन्मन–पु., उन्मादवायुः । द्रोणपरिमाणम् (प. प्र. १ भ)
उन्मनायित–न., उन्मादः (रा. व. २०)
उन्मन्थक–पु., कर्णपालीगतरोगविशेषः (सु. चि. २५)
उन्मादगजाङ्कुश–पु., उन्मादाधिकारे रसः (र. सा. सं.)
उन्मादपर्पटीरस–पु., उन्मादाधिकारे रसः (र.सा. सं.)
उन्मादभञ्जनरस–पु., उन्मादाधिकारे रसः (र. सा. सं.)
उन्मादभञ्जिनी–स्त्री., उन्मादाधिकारे रसविशेषः । (भेष. रसे. चि) उन्मादगजांकुश इति नामान्तरम् ।
उन्मादिनी–स्त्री., विजया
उन्मीलन--न., उन्मेषः (हे. च.)
उपकण्ठ--न., अश्वस्यास्कन्दितः । कण्ठसमीपः (हे. च.)
उपकर्णिका--स्त्री., मूषकर्णिका (वै. नि. २ भ. अर्श. चि. विडङ्गादिचूर्णलेहे)
उपकारिका--स्त्री., पिष्टकभेदः (मे. कपञ्चकम्)
उपकुम्भा--स्त्री., दन्तीवृक्षः (वै. नि.)
उपकूप--पु., दीर्घिका (हे. च.)
उपक्रोष्टा--पु., स्त्री., गर्दभः
उपघातक--पु., आरग्वधवृक्षः (वै. नि.)
उपघ्न--पु., निकटाश्रयः (अम)
उपचक्षु--न., चक्षुःप्रतिनिधिः चष्मा इति भाषायाम् ।
उपचर्या--स्त्री., चिकित्सा, सेवा
उपचार्य--पु., चिकित्सा (हे. च.)
उपचित--त्रि., दग्धम् (मे.)
उपचित्रका--स्त्री., ह्रस्वदन्ती
उपचिल्ली--स्त्री., श्वेतचिल्लीशाकम् (रा. व. ७)
उपतप्त--पु., रोगः (अ. टी. भ.)
उपदन्त--पु., कुस्तुम्बरी
उपदल--न., पुष्पदलम्
उपदी--स्त्री., वन्दाकः (रा. व. ५)
उपदीका--स्त्री., उपजिह्वाख्यकीटः (हे. च.)
उपदेवता--स्त्री., यक्षभूतपिशाचादि आ. सं. श. पू. ७
उपदेहिका--स्त्री., उपजिह्वाकीटः (हे. च.)
उपधूपित–त्रि., आसन्नास्तमयः (हा.रा.) आसन्नमरणम्
उपपुष्पिका–स्त्री., हाफीका (हा. रा.)
उपभूती–स्त्री., महानीली (वै. नि.)
उपभोग–पु., भोगः । भोजनाधिकभोगः
उपमाता–स्त्री.. धात्री
उपमेत–पु., शालवृक्षः
उपयोग–पु., औषधक्रिया औषधसेवनम् । आनुकूल्यम्
उपरन्ध्र--न., अश्वस्य उदरगह्वरोपरिभागः
उपरोधक–न., गर्भगृहम् (श. च.)
उपलवीरुत्–स्त्री., गुल्मिनी (हे. च.)
उपला–स्त्री., शर्करावालुका (मे.)
उपलाख्यक–पु., दद्रुघ्नवृक्षः
उपलासिता–स्त्री., तृष्णा (वै. नि.)
उपलालिका–स्त्री., खटीशर्करा (वै. नि.)
उपलिङ्ग–न., उपद्रवम् । अरिष्टम् (हे. च.)
उपलेपन–न., गोमयादिलेपनम् (त्रि. का.)
उपलौह–न., स्वर्णादिधातुविशेषः । यथा--स्वर्णं तारं ताम्रनागं रसं कान्तञ्च तीक्ष्णकं । मुण्डान्तमष्टधा लौहं कांस्यारं घोषकं तथा । उपलौहाः समाख्याताः ——(वै. संग्रहे)
उपवन–न., बहिरुद्यानम् (अम.)
उपवनस्थ–पु., तरुष्कः
उपवल्लिका–(ल्ली)–स्त्री., अमृतस्रवा लता (रा. व ३)
उपवर्ह–(ण)--पु., न., उपधानम्
उपवस्त–न., उपवासः (अम.)
उपवाह्य–पु., राजवाहकहस्ती
उपविषपञ्चक– न., स्नुह्यर्ककरवीरलाङ्गलिकुचेलकानि (रा. व. १२) करवीरार्कधुस्तूरलाङ्गलिगुञ्जाहिफेनं वज्रञ्च (प. मु) अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः । गुञ्जाहिफेनधुस्तूरश्चेति सप्त (भा) दुग्धपूर्णपात्रे दोलायन्त्रेण तत् सर्वं शोधितं भवति (र. सा. सं.)
उपविषाणिका–स्त्री., कृष्णातिविषा
उपविष्टक–पु., गर्भजरोगः
उपवीत–न., यज्ञसूत्रम् (अ. म.)
उपवेद–पु., आयुर्वेदः
उपवेश–पु., उपवेशनम्
उपव्याघ्र–पु., चित्रकः (रा. व. १८)
उपशमक्रम–पु., साधारणौषधम् (वै. नि).

उपशान्ति–स्त्री., आरोग्यम्
उपशायिता–स्त्री., रोगमुक्तिसाधनभूतपथ्यम्
उपसन्नवर्तन–न., दुष्टव्रणविशेषः
उपसम्पन्न–न., तृप्तिः (हला) त्रि., निहतः। सुसंस्कृतः (मे. नपञ्चकम्)
उपसंव्यान–न., परिधानवस्त्रम्
उपसत्ति–स्त्री., सेवा (मे. तचतुष्कम्)
उपसर–पु., प्रथमगर्भधारणा
उपसर्या–स्त्री., वर्षप्रसविनी गौः (हला.)
उपस्थपत्र–न., अश्वत्थपत्रकम् । पित्तश्लेष्मणि शस्यन्ते सूपे वा लेपेषु चेति (चरक)
उपाङ्ग--पु., चित्रकः (जटा.)
उपाङ्गचिकित्सा–स्त्री., छिन्नादिप्रतीकारः । यथा– ' छिन्नं भिन्नं तथा भग्नं क्षतं पिच्चितमेव च। तेषां दग्धप्रतीकारः प्रोक्तश्चोपाङ्गसंज्ञकः (अत्रि १ स्था. २ अ)
उपाञ्जन–न., अनुलेपनम्
उपानद्धारण–न., चर्मादिपादुकाधारणम् गुणः– उपानद्धारणं नेत्र्यमायुष्यं पादरोगहृत् । सुखप्रचारमोजस्यं वृष्यञ्च परिकीर्तितम् । पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणां । अनारोग्यमनायुष्यमिन्द्रियघ्नमदृष्टिदम् (वै. नि.)
उपाश्रय–पु., मत्तहस्ती
उपास–पु., उपवासः
उपासन–न., शुश्रूषा (अम.) आसनम् (मे.)
उपासना–स्त्री., सेवा (अम)
उपास्ति–स्त्री., सेवा (हे. च.)
उपास्थि–न., कोमलास्थि (अम.)
उपेक्षा–स्त्री., त्यागः। अनादरः
उपोदिकातैल–न., क्षुद्ररोगे हितम् (च. द. क्षुद्ररो. चि.)
उपोष–पु., उपवासः।
उपोषण–न., उपवासः।
उप्य–न., वपनक्षेत्रम् (रा. व. २)।
उभयकण्टका–स्त्री., बदरवृक्षः (भा.)
उभयलिङ्गिनी–स्त्री., लिङ्गिनी पञ्च गुडियेति लोके प्रसिद्धा। (चि. क. क. वन्ध्या. चि.)।
उमाकट–पु., उमाधूलिः।
उम्पा (म्पिका) (शालिः), (स्त्री.,) शालिधान्यविशेषः। (रा. व.१६) ।

उम्बर–पु., उदुम्बरवृक्षः। गुणाः–स्निग्धः स्वाद्वादिगुणयुक्तः उष्णवीर्यः कफपित्तकरो गुरुश्च। (वा)।
उम्बिका–(म्बा) स्त्री., यमानी। अर्धपक्वतृणानलसंभृष्टयवगोधूममञ्जरीगुणा :– कफकरत्वं बलकरत्वं लघुत्वं पित्तानिलापहारित्वञ्च; (भा.)
उम्य--न., अतसीक्षेत्रम्। हरिद्राक्षेत्रम् (भ. द्विरूपाक्षरकोषश्च)
उरःक्षतकास--पु., क्षयकासरोगः।
उरग--(ङ्ग)--पु., सर्पः। (न.) शीर्षकम् (म. द.व. १४) नागकेशरवृक्षः।
उरगगृह--न., सर्पगृहम्
उरगारि--पु., क्रौञ्चः
उरगाशन–पु., गरुडः। (जटा.)
उरगेन्द्रसुमन–न., नागकेशरम् (भा. म. ४ अ.)
उरच्छ–पु., गुन्द्रः (भा. पू. १ भ)
उरण–पु., मेषः। (अम.) (न.) रौप्यम्।
उरणा–स्त्री.- मेषी।
उरणाख्य–(क्ष)–(क)–पु., दद्रुघ्नवृक्षः। (अ. टी. स्वा. श. र.)
उरभ्र–पु., मेषपशुः (प. मु.)
उरभ्रमारिका–स्त्री., वातप्रकृतिकीटविशेषः। तद्दष्टे वायुजरोगा भवन्ति (सुकल्प ८ अ)
उरसिज–पु., स्तनम् (रा. व. ८)
उराह–पु., कृष्णजान्वीषत्पाण्डुवर्णाश्च। (ज. द. ३ अ)
उरीहा–स्त्री., कारवेल्लकम्।
उरुकाल–(क)–पु., महाकाललता (त्रिका.)
उरुमाल–पु., फलशाकविशेषः ' उरुमालं प्रियालं च बृंहणं गुरु शीतलं। स्वादुपाकरसं स्निग्धं विष्टम्भि कफशुक्रकृत् (वा.)
उरुस्तम्भा–स्त्री., कदलीवृक्षः।
उरोज–पु., स्तनम् (हे. चि.)
उरोघात–पु., हृद्रोगः।
उर्णनाभ–पु., ऊर्णनाभः।
उर्णा–स्त्री., ऊर्णा।
उर्णायु–पु., ऊर्णायुः।
उर्मीकफ–पु., समुद्रफेनः।
उर्वा–स्त्री., शीषकम्। (भा. म ३ भ. अश्म) (चि. वरुणगुडे)
उल(लु)प–पु., प्रतानवती लता, सा तु त्रपुषीद्राक्षाताम्बुलीप्रभृतिः।

उलु (लू) पी-पु., शिशुकः (अम.) तदाकारमीनः (श. र) उपल इति ख्यातः मत्स्यः । शिशुमाराकृतिमत्स्यभेदः, स कलिङ्गादिदेशेषु दृश्यते । शोषु इति ख्यातमत्स्यः । भाँगल इति च केचित् । शिशुमार इति सर्वस्वे । चुलपः शिशुमारः स्यात् उलुपी शिश्यकस्तथा (अ. टी. भ)

उलुम्बा-स्त्री., यमानी (वै. नि.)

उलूकपाद-पु., अश्वस्य पादरोगविशेषः लक्षणं-कूर्चमावृत्य यः शोशो जङ्घायामुपजायते । उलूकपादो विज्ञेयः (ज. द. ३८ अ)

उल्कामुखी-स्त्री., शृगालीविशेषः । (हा. रा.)

उल्मुक-न., ज्वलदङ्गारः (हा. रा.)

उल्लस-(नक)-पु., न., रोमाञ्चः (हे. च.)

उल्लाघ-पु., रोगमुक्तिः (रा. व. २०) मरिचम्

उल्लोच-पु., चन्द्रातप (हला.)

उशीरादि-पु., तृतीयकज्वरे कषायः ।

उशीरी-स्त्री., क्षुद्रकाशतृणम् । गुणाः—मधुरशीता पित्तदाहक्षयघ्नी च (रा. ब. ८)

उष-पु., गुग्गुलः । रात्रिशेषः । (मे. षद्विक) क्षारमृत्तिका (श. र)(न) पांशुजलवणम् (प. मु)

उषक-पु., टङ्कणक्षारः (रत्ना.) मृत्तिकालवणम् (प. मु.)

उषरा-स्त्री., क्षारमृत्तिका (रत्ना.)

उषर्बुध-पु., रक्तचित्रकः । (श. च)

उषस्-न. स्त्री., प्रत्यूष (मे. स. त्रिकम्)

उषाकल--पु., कुक्कुटः (त्रिका)

उषाक्षार--पु., टङ्कणम् । क्षारमृत्तिका । (रत्ना.)

उषित--त्रि., दग्धः । व्युषितम् (मे. तत्रिकम्)

उषीर--पुन., वीरणमूलम् (अ. टी. रा)(च. द. र. पि. चि. दूर्वाद्यतैले)

उष्ट्रकण्टक--पु., सकण्टकगुल्मविशेषः (च. द.) गोक्षुरः (मसू. वा. चि.)

उष्ट्रकाण्डिका--(ण्डी)--स्त्री., पुष्पवृक्षविशेषः । (म.- उट्कटारा) गुणाः----तिक्ता उष्णा रुच्या हृद्रोगहारी । तद्बीजं मधुरं शीतं वृष्यं संतर्पणञ्च । (रा. व. १०)

उष्ट्रधूसरपुच्छिका--स्त्री., वृश्चिकाली

उष्ट्रपादिका--स्त्री., मदनः

उष्ट्रप्रमाणः--पु., काश्मीरदेशीयशरभः । (मद. व. १२)

उष्ट्रप्रिय--पु., मरुभूमिजातकण्टकवृक्षविशेषः ।

उष्ट्रभक्ष्य--पु., वंशकरीरः । (प. मु)

उष्ट्रशिरोधर--न., उष्ट्रग्रीवभगन्दरः ।

उष्णक--पु., पूगवृक्षः । ज्वरः ग्रीष्मः (त्रि)

उष्णगन्धा-स्त्री., कुलिञ्जनवृक्षः (वै. नि.)

उष्णमल(मूत्र)त्व-न., पित्तजन्यरोगलक्षण०

उष्णवारण-न., छत्रम् (हा. रा.)

उष्णबाष्प-पु., नेत्रजलम् । स्वेदः (वै. नि.)

उष्णविदग्धदृष्टि-पु., दृष्टिगतरोगविशेषः

उष्णसुन्दर-पु., न., बिभीतकवृक्षः । बिभीतकः ।

उष्णस्निग्ध-त्रि., तत् यद्वातघ्नं वस्तु । (सुसू. ४१ अ.)

उष्णा-(ष्मा)-स्त्री., क्षयरोगः । सन्तापः । पित्तम् । (वै. नि. रा. व. २०)

उष्णा(भि)गम-पु., ग्रीष्मकालः । (अम.)

उष्णाङ्गत्व-न., पित्तजन्यरोगः ।

उष्णान्न-न., उष्णभक्तम् ।

उष्णाम्बु-न., सुखोदकम् ।

उष्णासह-पु., शरत्कालः ।

उष्णिका-स्त्री., यवागुः ।

उष्णोपगम-पु., ग्रीष्मकालः । (अम.)

उष्मः(कः)-पु., क्षारः (र. मा.) क्षयरोगः (रा. व. २०) ग्रीष्मऋतुः (अम.) वसन्तकालः । उष्णता आतुरः (मे. कत्रिकम्)

उष्मगम-न., लवणसाधारणम् ।

उष्मागम-न., ग्रीष्मकालः । उत्तापः ।

उस्र-(स्रा)-पु., स्त्री., वृषः । अर्जुनी उपचित्रा । आखुकर्णी (मे. रद्विकम्)

उक्ष-त्रि., धातः । सिक्तम् ।

उक्षण-न., सेचनम् ।

उक्षतर-पु., महावृक्षः (हे. च.)

उक्षा-न., पु., वृषभः (भा. पू. १ भ.) ऋषभकः (रा. व. ५) ।

उक्षाभद्र-पु., वृषः (वै. नि.)

उक्षाल-पु., वानरः (वै. नि.) ।

ऊ

ऊची-स्त्री., भृष्टद्रव्यम् ।

ऊर्ज्जः-पु., बलम् (चर.) ।

ऊध-आपीनम् । न., (अम.)

ऊधस्य-न., दुग्धम् (रा. व. १५)

ऊम्बी-स्त्री., यवगोधूमयोरपक्वमञ्जरी तृणाग्निना भर्जिता उम्बीत्युच्यते । गुणाः-कफदा बल्या लघ्वी पित्तानिलघ्नी च (भा. पू. वै. भ.)

ऊरण-पु., मेषः । (प. मु.)

ऊरुपर्वा-पु., न., जानुः (अ. म.) ।

ऊरुमाण-पु., मायीफलम् (सु. सू. ४६ अ.) उरुमालः।

ऊर्ज-(क.) पु., कार्तिकमासः। (हे. च.) न., जलम् (श. र.)

ऊर्णनाभ-पु., मर्कटकः (अ. म.)

ऊर्णा-स्त्री., मेषलोम्नि। भ्रूमध्यावर्तः। (मे. णद्विकम्)।

ऊर्णायु-पु., कम्बलम्। मेषः (प. मु.) ऊर्णनाभिः। (हे. च.)

ऊर्ध्वका-स्त्री., वायुजन्यरोगविशेषः।

ऊर्ध्वग-पु., अस्थिभङ्गरोगः।

ऊर्ध्वगुणभूयिष्ठ-त्रि., वमनद्रव्यमात्रम् (सु. सू. ४१ अ)

ऊर्ध्वगुद-पु., गुदोर्ध्वगरोगः।

ऊर्ध्वग्रह-पु., अश्वस्य ग्रहदोषजन्यरोगविशेषः। तस्य लक्षणं-जिह्वास्यकृष्णत्वं दर्शनस्मरणनाशश्चेति। 'श्यामं जिह्वामुखं यस्य नष्टदृष्टिस्मृतिर्भवेत्। ऊर्ध्वग्रहकृतं दोषं तस्य दीनस्य निर्दिशेत्। (ज. द. ५७ अ.) (सु. सू. ४१ अ.)

ऊर्ध्वजत्रु-न., स्कन्धसन्धेरूर्ध्वभागः।

ऊर्ध्वजानु-त्रि., ऊर्ध्वज्ञौ। उपरिस्थजानुकः (भा)

ऊर्ध्वतिक्त-(क)-पु., जेपालनिम्बः।

ऊर्ध्ववर्ति-पु., तन्नामकाश्वशूलरोगः। लक्षणम्-यवसच्छादनञ्चैव यो वाजी खादितं पुनः। मुखेन प्रोद्गिरत्याशु तं विद्यादूर्ध्ववर्तिनम् (ज. द. ४३ अ)

ऊर्ध्वस्थिति-पु., अश्वस्योदावर्तः (त्रि. क)

ऊर्ध्वासित-पु., कारवेल्लम् (त्रि. का)

ऊर्म्मण-पु., द्रोणपरिमाणम्

ऊर्मि-स्त्री., तरङ्गः। दुःखम् वेदना पीडा। वेगः। भङ्गः (मे. म. द्विकम्)

ऊर्मिका--पु., अश्वस्य पादरोगभेदः। 'ऊर्मिकश्चोर्मिसंस्थानैर्बलिभिः खुरसम्भवैः। (ज. द. ३८ अ)

ऊर्ध्वशोधन-न., अरिष्टकफलम् वमनम्।

ऊर्व-पु., वाडवाग्निः

ऊर्व्यङ्ग-न., गोमयच्छत्रिका।

ऊर्षा-स्त्री., देवताडवृक्षः।

ऊलूक-पु., पेचकः। अयं प्रसहजातीयः। एतन्मांसं उष्णवीर्यम्। एतद्भक्षणात् शोषभस्मकोन्मादाः क्षीणशुक्रता च जायन्ते (भा. पू. १ भ्) उलूकपललं भ्रान्तिकरं वातप्रकोपकरञ्च (मद. व)

ऊलूपी-पु., शिशुमारः (अ. टी.)

ऊषरक (ज)- न., औषरकं। पांशुलवणम्। औषरलवणम् रोमकनामायसकान्तभेदः। (रा. व. १३)

ऊषरतृण--न., स्वनामख्याततृणम्। घासविशेषः। गुणाः--- बलदं रुच्यं पशूनां हितं च (रा. व. ८)

ऊषवान्--त्रि., उषरम् (अम.)

ऊषसूत--न., मृत्तिकालवणम्। (सु. सू. ४६)

ऊषक्षार--पु., क्षारमृत्तिका। गुणाः---उष्णोऽनिलघ्नः प्रक्लेदी ऊषक्षारो बलापहः। (सु. सू. ४६)

ऊषाकर--पु., कुक्कुटः (श. र.)

ऊषापान--न., प्रत्यूषजलपानम् (भ.)

ऊष्मक--पु., पित्तम् (रा. व.) ग्रीष्मः जेष्ठाषाढौ ग्रीष्मऋतुः

ऊष्मा--उष्णता, क्षयरोगः (वै. नि.)

ऊहिनी--स्त्री., सम्मार्जनी

ऋ

ऋक्थ--न., स्वर्णम्। धनम्। (अम.) (सुसू. ३८)

ऋक्षगन्धा-स्त्री., वृद्धदारकवृक्षः। ऋषिजाङ्गला (र. मा. च. सू. ४ अ. बृहणे) श्वेतभूमिकुष्माण्डम्

ऋक्षगन्धिक-स्त्री., कृष्णभूमिकूष्माण्डम् वृद्धदारकलता (वै. नि.)

ऋक्षविट्-स्त्री., तैलपायीविष्ठा (वै. नि. २१) (अर्श. चि. कृष्णाशिरीषलेपे)

ऋक्षाह्वा-महामेदालताक्षुपः (रा. व. ५)

ऋची(जी)ष-न., भ्राष्ट्रम् (हे. च)

ऋजीक-पु., धूमः।

ऋजुश्रेणी-स्त्री., मूर्वा (रत्ना.)

ऋत-न., जलम् (मे.)

ऋतुजन्म-स्त्री., पुनर्नवा

ऋतुपरीक्षा-स्त्री., आवर्तपरीक्षा तद्यथा, ऋतौ कण्डूयनं योनौ क्वचिदङ्गेच वेदना। बाहुल्यं स्वल्पता वापि चानुबन्धित्वमस्य वा। संरोधः सर्वथा वापि वेद्यान्येतानि यत्नतः। आमयष्वखिलेष्वेव भिषग्भिर्योषितां सदा (अ. त्रि.)

ऋतुराज–पु., वसन्तऋतुः (रा. व. २१)
ऋतुविपर्यय–पु., ऋतुव्यापत् वसन्तादिस्थाने शरदादिधर्मप्रवृत्तिः ।
ऋतुवैषम्य–न., ऋतुचर्याविपरीताचारणम् (भा. म. ४ भ.)
ऋतुशूल–न., ऋतुकाले रजोरोधजन्यशूलरोगः । पुष्पस्य वातादिभिर्हतत्वं तस्य कारणम् । बहुलं पिच्छिलं स्निग्धं घनं स्रवति शोणितम् । योनौ नाभौ तु शूलानि कृतौ परमदारुणम् (रस. र. यो. व्या. चि.)
ऋतुषट्क–न., हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु ॥ 'चयकोपसमा यस्मिन् दोषाणां सम्भवन्ति हि । ऋतुषट्कं तदाख्यातं रवेराशिषु संक्रमात् (भा.)
ऋतुहरीतकी–स्त्री., ऋतौ ऋतौ हरीतकीभक्षणविधिः । यथा– सिन्धुत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात् । वर्षादिष्वभया सेव्या रसायनगुणैषिणा (च. द.) भट्टारस्तु ग्रीष्ममधिकृत्याह । ग्रीष्मे तुल्यगुडां सुसैन्धवयुतां मेघावनद्धाम्बरे सार्धं शर्करया शरद्यमलया शुण्ठ्या तुषारागमे । पिप्पल्या शिशिरे वसन्तसमये क्षौद्रेण संयोजितामित्थं प्राश्य हरीतकीमिव रुजो नश्यन्तु ते शत्रवः (प्रयोगा. वाजी)
ऋद्ध–न., सम्पक्वधान्यम् (अम.) पक्वमर्दितधान्यम् निर्बुषीकृतं धान्यम् (अ. टी.)
ऋषिजाङ्गलिक–(ला) (लिका) (की) (स्त्री.) ऋक्षगन्धा (रत्ना.)
ऋषिश्रेष्ठ–पु., पुण्डरीकवृक्षः ऋद्धिः ।
ऋषिश्रेष्ठा–त्रि., ऋद्धिः । वृद्धिः (वै. नि.)
ऋषिसृष्टा–स्त्री., ऋद्धिः (मद. व १)
ऋषीक–पु., काशतृणम् (मद व १)
ऋष्यगता–स्त्री., माषपर्णी (श. र)
ऋष्यपुष्पी–स्त्री., अतिबला (वै. नि.)
ऋष्याह्वा–स्त्री., नागबला । बला (वै. नि.)

ए

एककन्द–पु., पानीयालुकः । पाणशारु इति प्रसिद्धः कन्दशाकः । (प. मु.)
एकचर–पु., गण्डकः (त्रिका)
एकदृक्(ष्टि)–पु., काकः । (हला.) त्रिकोणम्(हे. च.)
एकपत्र(क)–पु., चण्डालकन्दविशेषः ।
एकपत्री–स्त्री., नागवल्लीलता (वै. नि.)
एकमूल–पु., पुण्डरीकवृक्षः । (वै. नि.)
एकमूला–स्त्री., शालपर्णी । अतसी (संग्रहः)
एकरज–पु., भृङ्गराजवृक्षः । (जटा.)
एकरन्ध्र–पु., नदीवटः । (वै. नि.)
एकवर्षीया–स्त्री., एकहायनी गौः ।
एकविंशतिगुग्गुलु–पु., कुष्ठरोगे उपयुक्तः (च. द. कुष्ठ. चि.)
एकवीरा–स्त्री., वन्ध्याकर्कोटी । गुणाः–एकवीरा स्मृता तिक्ता चात्युष्णा वातहा स्मृता । पक्षाघातं पृष्ठकटीशूलञ्चैव विनाशयेत् (वै. नि.)
एकवृक्ष–पु., गलरोगः । (वै. नि.)
एकशिखा–स्त्री., पाठा (प. मु.)
एकशृङ्ग–पु., गण्डकः (वै. नि.)
एकहस्ती–स्त्री., अश्वस्य शोभनवल्लगा भेदः । 'द्विहस्ती चैकहस्ती च शुभगा शोभना मता' । (ज. द.७ अ)
एकहायनी–स्त्री., एकवर्षीया गौः । (अ.म.)
एकाङ्गी–स्त्री., मुरामांसी-गुणाः—तिक्ता हिमा स्वाद्वी लघुः वातपित्तघ्नी ज्वरभूतरक्तरक्षोघ्नी कुष्ठकासघ्नी च (भा.पू. १ भ.) कटुः कषाया भ्रममूर्च्छातृष्णाविषदाहघ्नी च (रा. व. १२)
एकाण्ड–पु., तन्नामकदोषान्वितावश्वः । एकेन लम्बमानेन मुष्केणैकाण्डसंज्ञकः (ज. द. ३ अ)
एकादशशतिकमहाप्रसारणीतैल–न., वातव्याधौ उपयुज्यते (प्रयोगा. भेष.)
एकादशायस–पु., ब्रध्नवृध्यधिकारे उपयुक्तः (रस. र. ब्रध्न. चि.)
एकादिवीर–पु., एकवीरवृक्षः (वै. नि.)
एकाष्ठी–स्त्री., कार्पासी, कार्पासबीजकोषः (वै. नि.)
एकाष्ठीका–स्त्री., पाठा (वै. नि.)
एकाह्वा–स्त्री., एकवर्षीया गौः (अम.)
एकाक्ष–पु., काकः । त्रि., एकनेत्रम् (रा. च.)
एकैषी–स्त्री., पाठा (म.—पहाडमूळ) (वै. नि.)
एकोशि (षि) का–स्त्री., पाठा (र. मा.) बकवृक्षः इति केचित् ।
एड–त्रि., बधिरः (अम.)
एडकघृत–न., एडकनवनीतोत्थघृतम् । गुणाः—अतिगुरुत्वात् वर्ज्यं सुकुमाराणाम् । बुद्धिपाटवकरं बलकरञ्च (रा. व. १५)
एडमूक–त्रि., बधिरः वाक्श्रुतिवर्जितः ।
एडहस्ती–पु., चक्रमर्दः ।
एडुक–त्रि., बधिरः (मे.)
एणक–पु., हरिणः (श. र.) कृष्णसारः ।

एणीदाह-पु., सन्निपातज्वरविशेषः। लक्षणं-परिधावतीव गात्रे रुक्पात्रे भुजङ्गपतङ्गहरिणगणः। वेपथुमतः सदाहस्येणीदाहज्वरार्तस्य (भा. म. १ भ)

एत-पु., हरिणः। (श. र.) घोटकः।

एतन-पु., निश्वासः (हे. च.)

एता-स्त्री., हरिणी

एधतु-पु., पुरुषः।

एरङ्ग-(ङ्गी)-पु., स्त्री., मत्स्यभेदः। मंजिष्ठा (चरक.)

एरण्डक-पु., एरण्डः (भरत)

एरण्डज-न., एरण्डतैलम्

एरण्डतैलमूर्च्छा-स्त्री., मूर्च्छाद्रव्याणि--मञ्जिष्ठा मुस्तकं धान्यं त्रिफलाजयन्तीपत्रं

एरण्डमूल-न., एरण्डशिफा (च. द. विषमज्वरचि.)

एरण्डबीज-न., एरण्डफलम्

एरण्डशिफा-स्त्री., एरण्डमूलम् (भा. वा. व्या.)

एरण्डसप्त(द्वादश)क-पु., शूलरोगः।

एरण्डा-स्त्री., बृहद्दन्तीवृक्षः (म. द. व. १) पिप्पली। (श. च.)

एरण्डादि-पु., तदादिद्रव्यवर्गः। यथा एरण्डसारिवाद्राक्षा शिरीषश्च प्रसारणी। माषमुद्गाख्यपर्णिन्यौ विदारीकन्दकेतकी। एरण्डादिगणो ह्येष वातपित्तविकारनुत् (रसचन्द्रिका)

एर्वारुक-न., कर्कोटकफलम् (र. मा. भेष. क्षुद्ररोगचि.)

एलक-पु., मेषः। (रा. व. १८)

एलङ्ग-पु., मत्स्यविशेषः। गुणाः--मधुरो वृष्यः ग्राही कफवातघ्नः मेधाग्निपुष्टिकरः शीतलः गुरुश्च (रा. व. १८)

एलादिगुडिका-स्त्री., रक्तपित्ते हिता (च. द. (रस. र)

एलादिचूर्ण-न., छर्द्यधिकारे हितम्। (च. द. भैष) पाठः--एलात्वक् मरिचं शुण्ठी पिप्पली नागकेशरं। भागवृद्धया चूर्णं तु सितया समम् (रस. र. राजयक्ष्म चि)

एलादितैल-न., वातव्याधौ उपयुज्यते (च. द)

एलादिमन्थ-पु., यक्ष्मरोगः (च. द)

एलान-न., फलविशेषः (रा, व. ११) (म--हिरवे फल)

एलापर्णी-स्त्री., वृक्षविशेषः। रास्ना (भा. पू. १ भ)

एलीका-स्त्री., सूक्ष्मैला (रा. व. ६)

एलीय-पु., एलवालुकः (वै. नि)

एलुक-(काख्या)-न., स्त्री., एलवालुकः (सु. चि. १८ अ.)

एल्व-न., एलवालुकः (सु. चि. १८ अ.)

एषण-पु., शल्लकीवृक्षः वै. नि.)

एषणिका-स्त्री., स्वर्णादिपरिमाणतुला (अम.)

एष्या-स्त्री., आमलकीवृक्षः (रत्ना.)

ऐ

ऐक्षवी-(सुरा) स्त्री., इक्षुरसकृतमद्यम् तन्मद्यगुणाः--शीतलं अतिमादकंच (रा. व. १५)

ऐण-(णेय)- त्रि., एणमृगचर्मादिः।

ऐणेयक-न., एलवालुकम्

ऐन्द्रयव-पु., इन्द्रयवः (मद)

ऐन्द्रलुप्तिक-पु. इन्द्रलुप्तरोगः

ऐन्द्रवारुणी-स्त्री., इन्द्रवारुणीलता (मद. १)

ऐन्द्रि-पु., काकः (मे. रद्विकम्)

ऐन्द्रीफल-न., इन्द्रवारुणीफलम् (च. द. (उ. मा. चि.) पक्वैन्द्रीफलमूत्रजम्)

ऐभी-स्त्री., हस्तीघोषलता

ऐरावतक-पु., हस्तीशुण्डी (च. चि. ३ अ.) नागरङ्गवृक्षः (वै. नि.।)

ऐरावतपदी-स्त्री., काकजङ्घा (महाज्योतिष्मतीलतायाम्)

ऐरेय-न., मद्यम् (वै. नि.) एलवालुकम् (अम)

ऐलवालुक-न., एलवालुकम् (श. र.)

ऐलेय -न., नलुका एलवालुकम् (अ. म.)

ऐल्वालु-न., एलवालुकम् (मद. व. ३)

ऐशमूल-न., लाङ्गलीमूलम् (रस. र.) (बा. ल. चि)

ऐषिका-स्त्री., पाठा त्रिवृता (वै. नि.)

ओ

ओकण-पु., केशकीटः (श. र)

ओकणि-(नी)-पु., स्त्री., उत्कुणम् (श. र.)

ओकोदनी-स्त्री., यूका (श. र.)

ओक्कणी-स्त्री., उत्कणम् (श. र.)

ओडिका-(डी)-स्त्री., नीवारः (प.मु.) गुणाः--शोषणी रूक्षा कफवायुवृद्धिकरी, पित्तनाशिनी च (रा.)

ओड्र-(क)-पु., जपाकुसुमवृक्षः। (म--जासवन्द) गुणाः संग्राही केशहितश्च (भा. पू. १ भ. पुष्पवर्ग) मलमूत्रस्तम्भनरञ्जनश्च (रा.) कुटुरुणः इन्द्रलुप्तहरः विच्छर्दिजन्तुजनकः सूर्याराधनश्च (रा. व. १०। मात्रा ३ मा.)

ओड्रपर्याय-पु., सूर्यकान्तपुष्पवृक्षः स्वनामख्यातः (अम.)

ओड्रपुष्प-न., जवा (पा) कुसुमम् (प. मु)

ओड्रपुष्पा–स्त्री.. जपाकुसुमम् ।
ओढापलङ्कषा–स्त्री., गोरक्षमुण्डी (वै. नि.)
ओतु–पु., स्त्री., बिडालम् । (अम.) वनबिडालम् (वै. नि.)
ओद–पु., अन्नम् ।
ओल-(ल्ल)–पु., स्वनामख्यातकन्दशाकवि० (र. मा. भा. पू. १ भ.) गुणाः—अग्निकरः कफघ्नः रुचिकरः लघुः अर्शसि पथ्यः । ग्राम्यकन्दस्तु दोषल इति (रा.)
ओल(ल्ल)कन्द–पु., शूरणम् (र. मा.) वनौल्लः (पानीयभक्तवव्याम्)
ओषण-(णि)–पु., कटुरसः (हे. च.) (णी.) पुरातिशाकम् । गुणाः—कफवायुनाशित्वम् (रा.) पुनर्नवा
ओषधिगण–पु., रासायनिकौषधिगणः । ताः सोमसमवीर्या महौषधयः ख्याताः । तासाञ्च सोमवत् क्रियाशीः स्तुतयः शास्त्रे कथिताः (सु. चि. ३०)
ओषधीश–पु., कर्पूरम् (हे. च.)
ओष्ठधर–पु., ओष्ठः ।
ओष्ठप्रान्त–पु., सृक्कभागः (रत्ना.)
ओष्ठफला-(भा)–स्त्री., बिम्बीलता (म.—गोड तोंडली) (वै. नि.)
ओष्ठरञ्जनी–स्त्री., ताम्बूलम् (प. मु.)
ओष्ठा(ष्ठी)–स्त्री., बिम्बी (प. मु.)

औ

औख्य–स्त्री., स्थालीपक्कं अन्नादि ।
औड्रपुष्प–न., जपापुष्पम् (हे. च.)
औदखित(त्क)–न., अर्धजलयुक्तघोलम् (हे. च.)
औदुम्बरच्छद–पु., दन्तिवृक्षः (वै. नि.)
औदुम्बरी–स्त्री., कृमिभेदः ।
औद्दालकशर्करा स्त्री., औद्दालकमधुकृतशर्करा सा गुणैरौद्दालमधुसदृशी (रा. व. १४)
औद्भिद–न., औद्भिदलवणम् (रा.)
औद्भिदजल–न., उद्भिदजातं जलम् प्रस्तरसलिलम्–तस्य गुणाः—मधुरं पित्तशमनं अविदाहि च (रा.) लघु (रा. व. १४) विदार्य भूमिं निम्नां यत् महत्यां धारया स्रवेत् । तन्तोयमौद्भिदं नाम वदन्तीति महर्षयः । औद्भिदं वारि पित्तघ्नं अविदाह्यतिशीतलं । प्रीणनं मधुरं बल्यमीषद्वातकरं लघु (भा. पू. १. वारिव.) वर्षासु औद्भिदं पथ्यम् ।
औद्भिदद्रव्य–न., उद्भिद्य पृथिवीं जायते इत्युद्भित् । तच्च वनस्पतिलतावानस्पत्यौषधात्मकम् (च. सू. १ अ.)
औद्भिदलवण–न., पांशुलवणापरनामधेयलवणम् यद्भूगर्भतः स्वयमुत्पद्यते (च. द. महाषट्पलघृते) गुणाः—क्षारयुक्तं गुरु कटु स्निग्धं शीतं वातघ्नं च (भा. पू. १ भ. ह. व) रक्तलं सूक्ष्मं लघु वातानुलोमनञ्च (म. द. व. २) तीक्ष्णं उत्क्लेदजनकं क्षारयुक्तं कटु तिक्तं कोष्ठबद्धतानाहशूलघ्नञ्च (रा)
औधस्य–न., पशुदुग्धम् ।
औनीत–न., अश्वरोगविशेषः । (ज. द. ५१ अ.)
औन्दुम्बर–न., ताम्रम् (भा. म. १ अ.)
औपवस्त–न., उपवासः । लङ्घनम् (हे. च.)
औपस्थ्य–न., उपस्थेन्द्रियसुखम्
औपीन–न., उप्यक्षेत्रम् (रा. व. २)
औमीन–न., अतसीक्षेत्रम्
औरिण–न., मृत्तिकालवणम्, यवक्षारः । (वै. नि.)
औरुबुक–न., एरण्डतैलम् (च. द.)
औल–न., श्वेतसूरणम् (वै. नि.)
औलूक–न., उलूकसमूहः (ज. टा.)
औशीर–न., पु., वालकम् चामरदण्डः । आसनम् । (त्रि) उशीरजः (मे. रत्रिकम्)
औषण–न., कटुरसः ।
औषधालय–पु., औषधगृहम्
औषधिप्रतिनिधि–पु., यदौषधं न लभ्यते तस्य स्थाने तत्समगुणद्रव्यान्तरग्रहणम् । यथा मेदाभावे ह्यश्वगन्धा, महामेदे च शारिवा । जीवकर्षकाभावे गुडूची वंशरोचना इत्यादि । चित्रकाभावे दन्ती, अपामार्गक्षारो वा, धन्वयासाभावे दुरालभा, तगराभावे कुष्ठं, मूर्वाभावे जिङ्गिनीत्वक्, अहिंसालक्षणाभावे मानकमयूरपुच्छग्रहणम्, बकुलाभावे कल्हारोत्पलपद्मग्रहणम् नीलोत्पलाभावे कुमुदं, जातीपुष्पाभावे लवङ्गं,अर्कादि क्षीराभावे तत्पत्ररसः, पुष्करमूलाभावे कुष्ठं, लाङ्गलकी ग्रन्थिपर्णाभावे, कुष्ठञ्च ग्राह्यम् (भा. पू १ भ.) चविकाभावे गजपिप्पली, पिप्पलीमूलम्, सोमराज्याभावे चक्रमर्दफलम्, दार्व्याभावे हरिद्रा, रसाञ्जनाभावे दार्वीक्वाथः, सौराष्ट्रमृदाभावे फटिकारी, तालीशाभावे स्वर्णताली, भार्ग्यभावे तालीशं कण्टकारीमूलं वा, रुचकस्याभावे पांशुलवणं, यष्टिमध्वभावे धातकीपुष्पम्, अम्लवेतसाभावे चुक्रं, द्राक्षाभावे गम्भारीफलम्, तदभावे पीतशालपुष्पं, नखाभावे लवङ्गं, कस्तुर्यभावे काकोली, तदभावे जातीपुष्पम्, कर्पूराभावे ग्रन्थिपर्णी, सुगन्धिमुस्तकं वा, कुङ्कुमाभावे

कुसुम्भं, श्रीखण्डचन्दनाभावे कर्पूरम्, तदुभयाभावे रक्तचन्दनं ग्राह्यम्, मध्वभावे जीर्णगुडः, पुरातनाभावे यामचतुष्टयशुष्कः गुडः, क्षीराभावे मौद्गो मासूरश्च रसः, शर्कराभावे खण्डम्, शाल्याभावे षष्टिकं, दाडिमाभावे वृक्षाम्लं, सौराष्ट्रमृदभावे पङ्कपर्पटी, लौहाभावे तन्मलम्, चव्यगजपिप्पल्यभावे पिप्पलीमूलं, मुञ्जतिकाभावे तालमुस्तं ग्राह्यम्। माजुफलमिति केचित् (प. प्र. १ ख.)

औषधीपञ्चामृत—न., गुडूचीगोक्षुरमुसलीमुण्डीशतावर्यादि।

औष्ट्रतक्र—न., उष्ट्रीदुग्धजातघोलम्। गुणाः—औष्ट्रं तक्रन्तु विरसं गुरु हृद्यं च दोषलम् पीनसश्वासकासेषु शस्तमुक्तम् (वै. नि.)

औष्ट्रनवनीत—न., उष्ट्रीदुग्धजातनवनीतम्, गुणाः—लघुपाकं शीतलं व्रणकृमिकफरक्तदोषघ्नं वातघ्नं विषघ्नञ्च (रा. व. १५.११; पृ. ३८५)

औष्ट्रमूत्र—न., उष्ट्रमूत्रम्, गुणाः— उन्मादशोफार्शःकृमिशूलोदरघ्नम् (म. द. व. ८)

औष्ट्रक्षीर—न., उष्ट्रीदुग्धम्

औष्ट्रीघृत—न., उष्ट्रीनवनीतजघृतम्, गुणाः— मधुरं पाके कटुशीतलं कृमिकुष्ठहरं वातकफगुल्मोदरघ्नञ्च (रा. व. १५.२०९; पृ. २३७)

क

क—न., जलम् (रा. व. १४) मुखम् (मे.) केशः (धर.)

कंसक—न., पुष्पकाशीशम् इदं श्वेतवर्णम् (हे. च.)

कंसास्थि—न., कांस्यधातुः (त्रिका.)

कंसोद्भवा—स्त्री., सौराष्ट्रमृत्तिका (हे. च.)

ककन्द—पु., स्वर्णम् (उणा.)

ककरीमुख—पु., केशः (रा. व. १८.१८; पृ. ३९५)

ककारपूर्वद्रव्य—न., ककारपूर्वकद्रव्याणि तानि यथा—कटुकः, कालशाकं, कुष्माण्डं, कर्कटी, कर्कन्धुः, कर्कोटकः, कलिङ्गः, करमर्दः, करीरः, कतकः, कशेरुः, काञ्जिकञ्चेति रक्तपित्ते वर्ज्यम् (भा. म. रक्तपित्तचि.)

ककुङ्गिनी—स्त्री., ज्योतिष्मतीलता (भा. म. १ भ.)

ककुञ्जल-(ला)—पु., स्त्री., चातकः (रा.)

ककुण (न) क—पु., स्त्री., बालरोगविशेषः

ककुद्म—पु., ऋषभकक्षुपः (रा. व. ५.१५९)

ककुद्मती—स्त्री., कटिः (अम.)

त्रि., ककुद्विशिष्टः

ककुन्दर—न., नितम्बगर्ताधिष्ठाने वैकल्यकरपृष्ठसन्धिमर्मद्वयम्। मेरुदण्डोभयतः पार्श्वजघनबहिर्भागे ईषदधस्तस्य स्थानम्। तत्र स्पर्शज्ञानमधःकाये चेष्टोपघातश्च (सु. शा. ६.२६) ककुन्दरौ तु सर्वेषां स्यातां जघनकूपकौ (रा. व. १८.४२) वृक्षविशेषः। गुणाः— ककुन्दरः कटुस्तिक्तः ज्वरघ्नश्चोष्णकृन्मतः। रक्तरुक्कफदाहानां तृषायाश्च विनाशनः। अस्यार्द्रमूलञ्च मुखे धारितं मुखदोषनुत् (वै. नि.)

ककुप्—स्त्री., चम्पकमाला, प्रवेणी (मे. भत्रिकम्)

ककुभत्वक्—स्त्री., अर्जुनवृक्षवल्कलम् (च. द.। सि. यो. यक्ष्मचि. ककुभादौ)

ककुभशाखा—स्त्री., भार्गी (रत्ना)

ककुभादनी—स्त्री., नलीनाम गन्धद्रव्यम् (श. च.)

ककुणक—पु., न., शिशोर्नेत्रवर्त्मजरोगः।

कक्खट—त्रि., कठिनम् पु., खटिका (अ. म.)

कक्खटपत्रक—पु., वृक्षविशेषः। तच्छाकगुणाः—मधुरं दुर्जरं गुरुपाकी च (रा. शा. व.)

कक्खटी—स्त्री., खटिका

कगित्थ—पु., कपित्थम् (अ. टी.)

कङ्कट (क)—पु., कदरः (हा. रा.)

कङ्कटेरी—स्त्री., हरिद्रा (वै. नि.)

कङ्कति(ती)का—स्त्री., केशप्रसाधनार्थद्रव्यम्। (अ. म.) अतिबला नागबला (भा. पू. १ भ. गु. व.)

कङ्कत्रोट-(टि)—पु., स्वनामख्यातमत्स्यः। (त्रिका.) (हारा.। जटा.) खल्लीशमत्स्यः।

कङ्कदम्—न., सुवर्णम् (वै. नि.)

कङ्कपुरीषम्—पु., कङ्कविष्ठा इदं दारणम्। (सु. सू. ३६)

कङ्कभोजन—पु., अर्जुनवृक्षः

कङ्कर—न., कञ्जरः (हे. च.)

कङ्कराल—पु., पिस्ता इति प्रसिद्धः वृक्षः।

कङ्करोल—पु., निकोचकवृक्षः (श. च.)

कङ्कलोड्य—न., चिञ्चोटकमूलम् (रा.)

कङ्कशत्रु—पु., पृश्निपर्णी (श. च.)

कङ्कशाय—पु., कुक्कुरः।

कङ्का—स्त्री., गोशीर्षचन्दनम्, पद्मगन्धा "गोशीर्षचन्दनकृष्णताम्रमुत्पलगन्धिकम्। कङ्का" (श. मा.)

कङ्काल—पु., शरीरास्थि। समुदितशरीरास्थिसङ्घातः त्वङ्मांसरहितः।

कङ्काबीज—पु., गोशीर्षचन्दनबीजम्।

कङ्किरात—न., कुरुण्टकः (हला.)

कङ्कु-पु., कङ्कुतृणम् (द्विरूपकोश.)
कङ्केरु-पु., काकविशेषः । बकपक्षी (त्रिका.)
कङ्केल्ल-पु., वास्तुशाकः (श. मा.)
कङ्ग (क)-पु., क्षौमम् (हे. च.)
कङ्गु-स्त्री., कङ्गुधान्यम् (अ. टी.)
कङ्गुका-स्त्री., कङ्गुः । प्रियङ्गुः (रत्ना.)
कङ्गुल-पु., हस्तः (श. च.)
कचङ्गल-पु., समुद्रः (त्रिका.)
कचट-न., कच्चटशाकः (भा. पू. १ भ.) तृणम् । पत्रम् (उणा.)
कचदग्धिका-स्त्री., अलाबुः
कचद्रावी-पु., अम्लवेतसम् (प. मु.)
कचपक्ष-पु., केशसमूहः (अम.)
कचमाल-पु., धूमः । (हारा.)
कचा-स्त्री., हस्ती (मे. चद्विकम्)
कचाकु-पु., बिलेशयः । सर्पः (मे. कत्रिकं)
कचाटुर-पु., पक्षिविशेषः । दात्यूहः
कची-स्त्री., कुचायिबीजम् (रस. र. बालचि.)
कचूरक-न., कचूरम् (वै. नि. २ भ. अर्शचि.) (पिप्पीलीकातैले)
कचेरुक-पु., कशेरुः । (र. मा.)
कचोरा-स्त्री., शालिधान्यविशेषः सा पित्तघ्नी (अत्रि. १५ अ.)
कच्चटम्-न., जलपिप्पली
कच्चर-न., तक्रम् (मे. तत्रिकम्) (त्रि.) मलिनः
कच्चूर-पु., कचुनामककन्दशाकः ।
कच्चोर-न., शठी (प. मु.)
कच्वी-स्त्री., कचुवृक्षः, स्वनामकन्दविशेषः ।
कच्छ(क)-पु., जलप्रायदेशः । तुन्नकद्रुमम् (मे. छद्विक) नन्दीवृक्षः । परिधानाञ्चलः (हे. च.) जलप्रान्तः । (अ. म.)
कच्छकाण्डन-पु., अश्वत्थभेदः
कच्छ(च्छा)(च्छी)(टिका)-स्त्री., कच्छः (श. र.)
कच्छपि-पु., क्षुद्ररोगः । तालुरोगः ।
कच्छपोलि-(का)-स्त्री., जलवेतसम् (वै. नि.)
कच्छा-स्त्री., भद्रमुस्ता
कच्छालङ्कारक-पु., काशतृणम्
कच्छु(च्छू)मती-स्त्री., शूकशिम्बी (श. च.)
कच्छुराल-पु., शेलुवृक्षः ।
कच्छुरी-स्त्री., धातकी

कच्छेष्ट-पु., कच्छपः (रा. व. १९.४५६; पृ. २७४) स्त्री., भद्रमुस्ता
कच्छोर-न., शठी (र. मा.)
कञ्चट-(ड)-पु., न., गजपिप्पली (वै. नि.) जलतण्डुलीयापरनाम-स्वनामख्यातशाकम् (र. मा.) हिं.—चवडाईभेद.
कलोटिवाशाकम् (च. द.; सि. यो. कञ्चटादि; भा. म. १ भ. शाकवर्ग.)
कञ्चटपत्रक-न., कञ्चटच्छदम्
कञ्चटपल्लव-पु., कञ्चटः (सि. यो.; ग्रहणीची; जम्बादि)
कञ्चटादि-पु., अतिसारे कषायविशेषः (च. द. अतिसारचि.)
कञ्चटावलेह-पु., ग्रहण्याधिकारे उपयुज्यते (च. द. सा. कौ.)
कञ्चन-पु., काञ्चनवृक्षः (वै. नि.)
कञ्चिका-स्त्री., वेणुशाखा (श. च.) क्षुद्रस्फोटः (रा. व. २०)
कञ्चुकालु-पु., सर्पः । कालसर्पः (श. च.)
कञ्चुकि-पु., यवः (रा. व. १९)
कञ्चुलिका-स्त्री., अङ्गरक्षिणी कांचोलि इति भाषा (हे. च. नाना.)
कञ्जक-पु., पक्षिविशेषः (श. च.)
कञ्जन-(ल)-पु., कञ्जकः पक्षी (श. च.)
कञ्जमूल-न., कमलकन्दः (वै. नि.)
कञ्जयोनि-पु., शालुकः । कञ्जस्य पद्मस्य योनिरुत्पत्तिः (श. च.)
कञ्जर-पु., गजः । केशः ।
स्त्री., धातकी पाटला उदरम् (मे. रत्रिकम्)
कञ्जलिका-स्त्री., अङ्गरक्षिणी (हे. च.)
कञ्जार-पु., जठरम् । गजः (मे. रत्रिकम्)
कञ्जिक-न., काञ्जिकम् (अ. टी. भ.)
कञ्जिका-स्त्री., भार्गी (श. र.)
कटक-पु., न., सामुद्रलवणम् (रत्ना) परिहार्यः । (हा. रा.) हस्तिदन्तमण्डलम् (मे. कत्रिकम्)
कटकी-पु., गजः (श. र.)
कटकोल-पु., निष्ठीवनपात्रम् (त्रिका.)
कटखदिर-पु., काकः । शृगालः (मे)
कटखादक-पु., काचलवणम् । काचकलसः । बलिपुष्टः । जम्बुकः । (मे. कपञ्चकम्)
कटङ्कट-पु., अग्निः । दारुहरिद्रा (भैष. मुखरोगचि. । बृहत्खादिरवटी)

कटङ्कटा–स्त्री., आच्छुकवृक्षः (द्रव्याभि.)

कटङ्कटी–स्त्री., दारुहरिद्रा (वै. नि.)

कटपञ्चक–न., अश्वचालनाय पञ्चविधा भूमिः । एका मण्डलाकारा, द्वितीया चतुरस्रा, तृतीया गोमूत्रा, चतुर्थी अर्धचन्द्रा, पञ्चमी नागपाशा चेति । तदुक्तं नकुलेन । 'धनुरष्टादशे योज्यं वाजीनां मण्डलं क्रमात् । सङ्कोचयेजवं यावद्यावत्कटकपञ्चकम् । तदूर्ध्वं मण्डली योज्या गोमूत्रा तदनन्तरम् । ऋजुवर्त्मसु वर्ती च गोमूत्रा सर्वकर्मसु । युज्यमाना न दृश्यते प्रायशो हि विचक्षणैः (ज. द. ७ अ)

कटप्रोथ–पु., स्फिक् । कटिः (श. चि.)

कटभङ्ग–पु., हस्तेन शस्यच्छेदः (हा. रा.)

कटभीत्वक्–स्त्री., कटभीवल्कलम् (च. द. उन्मा)

कटमालिनी–स्त्री., मदिरा (श. च.)

कटसारिका–स्त्री., झिण्टीः (भा. पू. १ भ.)

कटाकु–पु., पक्षिविशेषः । (उणा)

कटाक्ष–पु., अपाङ्गदृष्टिः (अम. अश्वस्य शङ्खकर्णयोरन्तरभागः । (ज. द. २ अ.)

कटायन–न., वीरणम् (श. च.)

कटाहक–पु., मातुलुङ्गादेरभ्यन्तस्थान्त्रवत् भागः । (अत्रि. सू. १७ अ.)

कटाह्वय–न., पद्मकन्दः (रा. व. १०.२६०)

कटितट–न., नितम्बम्

कटिदेश–पु., कटिः

कटि-(टी) प्रोथ–पु., स्फिच् (रा. व. १८) कटिदेशस्थमांसपिण्डः (अम.)

कटिरोहक–पु., करिपश्चाद्भागारोहकः ।

कटिशीर्षक–पु., कटिदेशः (हला.)

कटिश्रृङ्खला–स्त्री., कटिकिङ्किनी (हारा.)

कटी (इन्)–पु., हस्ती । खदिरवृक्षः (रा. व. ८) श्रोणिफलकम् (अम.) पिप्पली (मे. टद्विकम्) स्फिक्प्रदेशः (रत्ना.)

कटीकपाल–न., कटीफलकः (विज. र.)

कटीर–पु., न., जघनस्थलम् (जटा.) कटिदेशः (हे. च.) कटिपार्श्वम् (अ. टी.)

कटीरक–पु., नितम्बस्थलम् (रा. व. १८)

कटुकन्दः–पु., शिग्रुवृक्षः । आर्द्रकम् लशुनः (मे. दचतुष्कम्) न., मूलकम् (प. मु.)

कटुकन्दरी–स्त्री., गोविन्दीति कोङ्कणे प्रसिद्धा (प्रा. वाघेंची) गुणाः–कटुकन्दरिका चोष्णा तिक्ता वातकफापहा विसूच्यादीन्नाशयति (वै. नि.)

कटुकशर्करा–स्त्री., पित्तश्लेष्मज्वरे कटुरोहिणीशर्करायोगः ।

कटुकाख्या–स्त्री., कटुकी (सु.)

कटुकाद्यलौह–न., शोथाधिकारे उपयुज्यते (भैष. रस. र. शोथचि.)

कटुकापाली–स्त्री., कण्टकपालीवृक्षः (रत्ना. प. मु.)

कटुकीट–(क)–पु., मशकः (जटा.)

कटुक्वाण–पु., टिट्टिभः । (हे च)

कटुक्ता–स्त्री., नित्यकर्मसमाचारनिष्ठुरत्वम् ।

कटुचतुर्जातक–न., समभागत्वगेलापत्रमरिचानि (रा. व. २२)

कटुच्छद्–पु., तगरवृक्षः । (श. र.) सुगन्धार्जकम् (वै. नि.)

कटुजीरक–पु., जीरकम् (रा व ६ पृ ८२)

कटुता(त्व)–स्त्री., न., तीक्ष्णता दौर्गन्ध्यम्

कटुतिक्त–स्त्री., कटुतुम्बी (रा. व. ३)

कटुतिन्दुक–पु., कुचेलकः (श. च.)

कटुतैलमूर्च्छा–स्त्री., सफेनतामतादिदोषनाशार्थमामतैलस्य पाकेन निष्फेनीकृतस्यावतार्य सजलहरिद्रादिवारिक्षेपेण शनैः शनैः शीतलीकरणम्, तेन पाककाले स्फीत्याद्युपद्रवो न जायते । मूर्च्छाद्रव्याणि यथा– आमलकी, हरिद्रा, मुस्ता, बिल्वत्वक्, दाडिमत्वक्, नागकेशरं, कृष्णजीरकं, वालकं, नलुका, बिभीतकञ्च । (भैष. ज्व. चि.)

कटुदुग्धिका–स्त्री., तिक्तालाबु (रा. व. ७)

कटुभङ्ग–पु., शुण्ठी (रा. व. ६)

कटुमञ्जरिक–(का)–पु., स्त्री., शुक्लापामार्गः ।

कटुमोद–न., गन्धराजः (रा. व. १२)

कटुम्भर–स्त्री., प्रसारणी (च. द. वातव्याधि. एकादशशतिकप्रसारणीतैले ।)

कटुर–न., तक्रम् (जटा.)

कटुरा–स्त्री., आर्द्रहरिद्रा

कटुरुणा–स्त्री., त्रिवृता (रत्ना.)

कटुलता–स्त्री., कटुकी (भैष.)

कटुवार्षिपका–स्त्री., महाराष्ट्री

कटुवीजा–स्त्री., पिप्पली (रा. व. ६)

कटुवीरा–स्त्री., कुमरिचम् हिं.—लालमरिच.

गुणाः– कटुर्वीराग्निजननी दाहिनी बलासघ्नी अजीर्णविसूचीव्रणक्लेदघ्नी । सन्निपातजडीभूतं हतेन्द्रियञ्च नरं जीवयति (अत्रि.)

कटुश्रृङ्गाट-(ल)–न., चित्रकूटदेशप्रसिद्धगौरसुवर्णशाकम् (रा. व. ७)

कटुत्कट-(क)–न., शुण्ठी । आर्द्रकम् (र. मा.)

कटूदरी–स्त्री., गोविन्दीति कोङ्कणे ख्यातं औषधम् । गुणाः–विषूचीघ्नी कटूष्णा कफवातहा ।

कटोर–न., मृत्पात्रम् (श. च.)

कटोरा–स्त्री., स्वनामख्यातपात्रम् (श. च.)

कटोल–पु., कटुरसः (उणा.)

कट्टरतैल–न., ज्वरे विदाहे च हितम् । सुवर्चिका नागरकुष्ठमूर्वालाक्षानिशालोहितयष्टिकाभिः । तैलं ज्वरे षड्गुणतक्रसिद्धमभ्यञ्जनाच्छीतविदाहनुच्च । (वै. नि.)

कट्तृण–न., गन्धतृणम् (सि. यो. वातव्याधिचि. माषबलादि) सुगन्धरोहिषतृणम् (वा. उ. ३७)

कट्फलादि–पु., कासरोगे कषायविशेषः (च. द. कासचि.)

कट्फलादिपान–न., दीर्घकालानुबन्धि ज्वरे देयम् (भा. म. १ भ. ज्वरचि.)

कट्वम्बरा–स्त्री., प्रसारणी (ज. द.)

कट्वरतैल–न., द्र० कट्टरतैलम् ।

कठर–त्रि., कठिनम् । (जटा)

कठा–स्त्री., करिणी (श. च.)

कठाकु-पु., पक्षी

कठाहक–पु., दात्यूहः (श. र.)

कठीक-त्री., तुलशीवृक्षः । खटिका (वै. नि.)

कठिनपृष्ठ-(क)–पु., कूर्मः (रा. व. १९)

कठिनिका–स्त्री., खटिका (हारा.)

कठिनी-(क)–स्त्री., पु., खटिका (र. मा. प. मु.; त्रिका; मे नत्रिकम्)

कठिनोपल–पु., कौसुम्भीशालिः (रा. व. १६)

कठोर-(ल)–त्रि., कठिनः (अ. टी.)

कडक–न., सामुद्रलवणम् (र. मा.)

कडङ्कर–पु., तुषः (वै. नि.)

कडङ्ग–पु., सुराविशेषः ।

कडम्ब-(क)–पु., कलम्बिशाकम् शाकनाडीका, द्र० कलम्बी ।

कडम्बी-(म्बुका)–स्त्री., कलम्बीशाकम् (श. र.)

कडुहुञ्ची–स्त्री., क्षुद्रकारवेल्लम् (रा. व. ७)

कणगुग्गुलु–पु., श्वेतजीरकम् स्वनामख्यातगुग्गुलः । गुणाः–कटूष्णः सुरभिः वातघ्नः शूलगुल्मोदराध्मानकफघ्नः रसायनश्च (रा. व. १२)

कणजिह्विका–स्त्री., महासमङ्गा । सारिवाबहुपुत्रिका (रा. व. २३)

कणनिर्यास–पु., गुग्गुलः (रत्ना.)

कणप्रिय–पु., सूक्ष्मचटकः (वै. नि.)

कणभक्षक–पु., श्यामचटकः । भारिटः (रा. व. १९)

कणमूल–न., पिप्पलीमूलम् (पञ्चतिक्तघृते.)

कणही–स्त्री., लताशिरीषः (प. मु.)

कणाजटा–स्त्री., पिप्पलीमूलम् (वै. नि. २ भ. अजीर्णवडवानलचूर्णे ।)

कणाटीन्-(र)-(क)–पु., खञ्जनपक्षी (त्रिका. श. र.)

कणादिगण–पु., पिप्पल्यादिगणः (च. द. कफज्वरचि.)

कणादिवटी–स्त्री., श्लीपदाधिकारे उपयुक्ता (र. सा. सं.)

कणादीप्य–पु., श्वेतजीरकम् (रा. व. ६)

कणाद्यलौह–न., अतिसाराधिकारे हितम् (यो. र.; र. मा. सं.; र. चि. ९ अ.)

कणिक–पु., पिप्पली । शुष्कगोधूमचूर्णम् (रा. व. १६)

कणित–न., आर्तनादः (हे. च.)

कणिश–न., शस्यमञ्जरी (अम. हे. च.)

कणी–स्त्री., हयकण्ठलता (श. र.) कणिका (अ.टी. भ.)

कणीची–स्त्री., गुञ्जा । किरांचीति ख्याता । पुष्पितलता शाटकम् (मे.चत्रिकम्)

कणेर–पु., कर्णिकारवृक्षः (उणा.)

कणेरा–स्त्री., हस्ती (श. च.)

कणेरु–पु., कर्णिकारवृक्षः (मे.)

कण्टक-करञ्ज पु., करञ्जभेदः (अ. टी. भ.)

कण्टककिंशुक–पु., कण्टकीपारिजातः । म.—पांगारा. (वै. नि.)

कण्टकच्छद–पु., श्वेतकेतकवृक्षः (वै. नि.)

कण्टकत्रय–न., कण्टकारीत्रयम् (रा. व. २२) बृहती, कण्टिकारी, गोक्षुरश्च । गुणाः–कण्टकत्रितयं प्रोक्तं त्रिदोषभ्रमनाशकम् । ज्वरं पित्तञ्च हिक्काञ्च तन्द्रालापञ्च नाशयेत् (वै. नि.)

कण्टकदला–स्त्री., केतकीवृक्षः (वै. नि.)

कण्टकपाली–स्त्री., स्वनामख्यातवृक्षः हिं.—हिनस.

कण्टकफल–(ला)–पु., स्त्री., पनसवृक्षः। (अ.टी.भ.) गोक्षुरः, (र. मा.) कण्टकारी, एरण्डवृक्षः धुस्तूर-वृक्षः। देवदाली। कुसुम्भवृक्षः। ब्रह्मदण्डीवृक्षः। करञ्जवृक्षः।

कण्टकभुक्–पु., उष्ट्रः।

कण्टकलता–स्त्री., त्रपुषा। कर्कटिका।

कण्टकवृन्ताकी–स्त्री., वार्ताकी (रा. व. ७)

कण्टकश्रेणी–स्त्री., कण्टकारी (श. च.)

कण्टका–स्त्री., कण्टकारिका। दुरालभा। वनमुद्गम्। कर्कटिका (वै. नि.)

कण्टकागार–पु., शरटः (रा. व. १९) शलकी

कण्टकारित्रय–न., कण्टकारीत्रयम्

कण्टकारीत्रय–न., बृहतीगणिकारी दुरालभा च (रा. व. २२) सिद्धयोगे तु गणिकारीस्थाने गोक्षुरमाह। गुणाः— कण्टकारीत्रयं तन्द्रा प्रलापश्रम-नाशनम्। पित्तं ज्वरं त्रिदोषञ्च नाशयेत् (वै. नि.)

कण्टकारीद्रु–(म)–पु., विकङ्कतवृक्षः (वै. नि.)

कण्टकारीद्वय–न., बृहतीकण्टकारीति द्वयम् (भा. म. सन्निपातज्वर.)

कण्टकारीफल–न., कण्टकारिकाफलम्। गुणाः— कण्टकारीफलं तिक्तं कटुकं दीपनं लघु। रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् (भा. पू. १ भ. शाकवर्गः)

कण्टकार्या–स्त्री., कण्टकारीवृक्षः। (रस. र. बालचि.)

कण्टकार्यादि–पु., पित्तश्लेष्मज्वरे कषायः (च. द. ज्वरचि.)

कण्टकाल–पु., पनसवृक्षः (श. च.)

कण्टकालिका–स्त्री., कण्टकारी (भा. पू. १ भ.)

कण्टकाशन–पु., उष्ट्रः (हे. च.)

कण्टकाष्ठील–पु., कुलिशमत्स्यः। (त्रि. का.)

कण्टकिल–पु., वंशविशेषः।

कण्टकिला–स्त्री., वेणुविशेषः।

कण्टकिद्रुम–पु., खादिरवृक्षः। (रत्ना.)

कण्टकिपारिजात–पु., पारिभद्रकः। हिं.—पांगारा. (वै. नि.)

कण्टकिशरपुङ्खा–पु शरपुङ्खाभेदः। इयं कटूष्णा कृमि-शूलघ्नी च।

कण्टकि (किं)शुक–पु., पारिभद्रवृक्षः। (वै. नि.)

कण्टकुरण्ट–पु., पीतझिण्टी (वै. नि.) झिण्टीवृक्षः। (रा. व. १०)

कण्टल–पु., बाबलवृक्षः (श. च. वै. नि.)

कण्टवल्लरी–स्त्री., श्रीवल्लीवृक्षः। वाघेण्टीति कोङ्कणे प्रसिद्धलता (वै. नि.)

कण्टसारका–स्त्री., श्वेतझिण्टी (वै. नि.)

कण्टाकुम्भाण्डु–पु., कण्टकलताविशेषः। कुमिरके इति भाषा (च. द.)

कण्टाफल–पु., धुस्तूरवृक्षः। (रा. व. १०) पनसवृक्षः (रा. व. ११)

कण्टारवी–स्त्री., वासा

कण्टारिका–स्त्री., अग्निदमनीवृक्षः। कण्टकार्या (रा. व. ४)

कण्टार्गल–(र्गला)–पु., स्त्री., नीलझिण्टी (रा. व. १०)

कण्टार्हलता–स्त्री., नीलझिण्टी।

कण्टाल–पु., मदनवृक्षः (रा. व. ८) पनसवृक्षः।

कण्टाह्वय–न., पद्मकन्दम् (रा. व. १०)

कण्टिका–स्त्री., अतिबला (वै. नि.)

कण्ठकूजन–न., गलकूजनम् (मा.)

कण्ठग्रह–पु., कण्ठकुञ्चकः (भा. म. १ ज्वर) इह द्वौ कर्णकण्ठग्रहौ।

कण्ठतलासिक–स्त्री., अश्वबन्धनरज्जुः (श. मा.)

कण्ठनीडक–पु., चिल्लपक्षी (त्रिका.)

कण्ठनीलक–पु., उल्का (श. मा.)

कण्ठपाशक–पु., करिगलवेष्टनरज्जुः (श. मा.)

कण्ठबन्ध–पु., करिकण्ठबन्धनरज्जुः (हे. च.)

कण्ठमणि–पु., ग्रैवेयमणिः (त्रिका.)

कण्ठलता–स्त्री., कण्ठभूषणम् अश्वबन्धनम्

कण्ठशुद्धी–पु., गलस्य कफाद्यलिप्तत्वम्

कण्ठाग्नि–पु., पक्षी (त्रिका.)

कण्ठाल–पु., शूरणम्, उष्ट्रः (मे.)

कण्ठालङ्कार–पु., कासः (रा. व. ८)

कण्ठाला–स्त्री., जालगोणिका (त्रिका.)

कण्ठालु–स्त्री., कण्ठपुङ्खा। त्रिपर्णी नाम कन्दशाकम्।

कण्ठिका–स्त्री., कण्ठमाला।

कण्ठी–स्त्री., गलः (अ. टी. भ.) अश्वकण्ठवेष्टनरज्जुः (चर्मादिः) (श. मा.)

कण्ठीरव–पु., प्रसहजातीयः सिंहः। (हारा.) पारावतः (रा. व. ४)

कण्ठीरवी–स्त्री., वासकपुष्पवृक्षः (रा. व. ४)

कण्ठील–पु., क्रमेलकः (मे. लत्रिकम्।)

कण्ठीला–स्त्री., द्रोणीभेदः (मे. लत्रिकम्।)

कण्डक–पु., कासामयवृक्षः (वै. नि.)

कण्डनम्–न., निस्तुषीकरणम् (हे. च.)
कण्डरव्रण–पु., व्रणरोगः ।
कण्डवल्ली–स्त्री., काण्डवल्ली (वै. नि.)
कण्डूका–स्त्री., काकतुण्डी (वै. नि.)
कण्डूयना–स्त्री., कण्डूतिः (अम.)
कण्डूया–स्त्री., कण्डूयनम् (रा. व. २०)
कण्डूर–पु., कारवेल्ललता । कुन्दरतृणम् । (रा. व. ३)
कण्डूर–पु., माणकः (प. मु.)
कण्डूरा–स्त्री., शूकशिम्बी ।
कण्डूरा–स्त्री., कपिकच्छुलता । कर्पूरकचोरकन्दः (रा. व. १०) अत्यम्लपर्णी (रा. व. ३)
कण्डोल–पु., उष्ट्रः (उणा.) गोणीभेदः । वंशादिनिर्मितधान्यरक्षणभाण्डम् (अम.)
कण्डोलक–पु., कण्डोलः (हे. च.)
कण्डोलवीणा–(ली)–स्त्री., चण्डालवीणा (अम.)
कण्ड्वोघ–पु., शूककीटः (श. च.)
कत–(क)–पु., निर्मलीफलवृक्षः कासमर्दः । कुचेलकः (र. मा. च. सू. ४ विषघ्न.) जम्बीरवृक्षः (त्रिका.)
कत्तोय–न., मद्यम् । मैरेयम् (त्रिका.)
कत्सवर–न., स्कन्दः (श. च.)
कथाप्रसङ्ग–पु., विषवैद्यः (हे. च.)
त्रि., वातुलः । (त्रिका)
कथिका–स्त्री., तक्रादिसाधितखाद्यद्रव्यविशेषम्, कढीति महाराष्ट्रे। प्रकरणं यथा-नात्यम्लं मधुरं तक्रं सैन्धवेन तथा युतम् । पिष्टं मरिचं चाणक्यं निक्षिप्य सुनिधाय च । तप्तस्थाल्यां घृतं वाथ तैलं तत्वा च निःक्षिपेत् । तस्मिन्निशां रामठं च पश्चात्स्थालीं पिधाय च । तक्रार्धं निक्षिपेत्तस्यां पिधाय च पुनः क्षिपेत्। बुद्बुदोत्पत्तिपर्यन्तं पक्त्वा सा क्वथिताभिधा। कथिता पाचनी रुच्या लध्वी च वन्हिदीपनी । कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिनी । (वै. नि.)
कदन–न., मारणम् (जटा.)
कदन्न–न., कुत्सितान्नम् कदर्यान्नम् (जटा.)
कदम्बका–स्त्री., कलहंसी (वै. नि.)
कदम्बद–पु., सर्षपः (श. च.)
कदम्बपुष्प–पु., हरिद्रुवृक्षः
न., कदम्बकुसुमम्
कदम्बवायु–पु., सुगन्धवायुः ।
कदम्बिका–स्त्री., कदम्बवृक्षः । (वै. नि.)
कदल–(क)–पु., कदलीवृक्षः । पृश्निपर्णी (मे. श. र.)
कदल–न., नराङ्कुरः कपालम् (मे. लत्रिक.)
कदला–स्त्री., कदलीवृक्षः पृश्निपर्णी शाल्मलीवृक्षः । डिम्बिका (मे. लत्रिकम्)
कदलि (ली) क्षता–स्त्री., कर्कटीभेदः (वै. नि.)
कदलीकन्द–पु., रम्भामूलम् । गुणाः–शीतलः कदलीकन्दो बल्यः केश्योऽम्लपित्तजित् ,वन्हिकृद्दाहहारी च मधुरो रुचिकारकः (मद. व. ६)
कदलीकुसुम–न., रम्भापुष्पम् । गुणाः– कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु । वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत् (वै. नि.)
कदलीजल–न., कदलीरसः, गुणाः– कदल्यास्तु जलं शीतं ग्राहकं मूत्रकृच्छ्रहृत् । मेहं तृषां कर्णरोगं चातिसारञ्च नाशयेत् । अस्थिस्रावं रक्तपित्तं विस्फोटं रक्तपित्तकं। योनिदोषञ्च दाहञ्च नाशयेत्।” सारः कदल्याः संग्राही चाप्रियो गुरुशीतलः । तृड्दाहमूत्रकृच्छ्रातिसारमेहांश्च सोमकम् । अस्थिस्रावं रक्तपित्तं विस्फोटांश्चैव नाशयेत् (वै. नि.)
कदलीदण्ड–(नाल)–पु., थोड इति ख्याते मोचावृक्षगर्भस्थकोमलदण्डवत् भागः (श. च.) गुणाः–योनिदोषहरो दण्डः कदल्योऽसृग्दरं जयेत् । रक्तपित्तहरः शीतः सुरुच्योऽग्निप्रवर्धनः ।
कदलीमूल–न., कदलीमूलम् । गुणाः– बल्यं वातपित्तघ्नं गुरु च ।
कदलीवल्कल–न., प्रसिद्धकदली त्वच् । गुणाः–तिक्तं कटु लघु वातहरञ्च । (वै. नि.)
कदलीसार–पु., कदलीरसः ।
कदलीक्ष्या–स्त्री., फललताभेदः ।
कदश्व–पु., कुत्सिताश्वः ।
कदाख्य–न., कुष्ठौषधम् (श. च.)
कनककन्दर्परस–पु., वाजीकरणे औषधम् (रस. र.)
कनकचम्पक–पु., चम्पकविशेषः ।
कनकजोद्भव–पु., रालः ।
कनकतैल–न., क्षुद्ररोगाधिकारे तैलम् । यथा-मधुकस्य कषायेन तैलस्य कुडवेन पचेत् । कल्कैः प्रियङ्गुमञ्जिष्ठाचन्दनोत्पलकेशरैः । कनकं नाम तत्तैलं सुखकान्तिकरं परम् । अभीरु नीलिकाव्यङ्गशोधनं परमार्चितम् (च. द.)
कनकपराग–पु., सुवर्णरेणुः ।
कनकपल–पु., सुवर्णादिमापकषोडशमापकाः (हारा.)
कनकप्रसून–पु., धूलिकदम्बः
कनकवतीरस–पु., अर्शोधिकारे रसः । (रस. र.)
कनकबीज–न.,धुस्तूरबीजम् । कनकसुन्दररसे उपयुज्यते ।

कनकसङ्कोचरस–पु., कुष्ठाधिकारे रसः। (रस. र.)
कनकसुन्दररस–पु., ज्वरातिसाराधिकारे रसः (र. सा. सं.)
कनकक्षार–पु., टङ्कणक्षारः। (रा. व. १३)
कनकान्त(र)क–पु., कोविदारवृक्षः। (रा. व. १०)
कनकालुका–स्त्री., सुवर्णभङ्गारः। (हला.)
कनकासव–पु., हिक्काश्वासे आसवः। (भैष.)
कनन–त्रि., काणः (श. च.)
कनिक्या–स्त्री., समिता (श. चि.)
कनीचि–स्त्री., सूरणम् (प. मु.) गुञ्जा।
कनिष्ठक–न., शूकतृणम् (श. च.)
कनी–स्त्री., कन्या (हे. च.)
कनीचि–स्त्री., गुञ्जालता (श. र.) सपुष्पलता (उणादिकोषः।)
कनीया–पु., सोमलताभेदः (सु. चि. २८) त्रि., अतुजः (त्रिका.) अत्यल्पम् (मे.)
कनेरा–स्त्री., हस्ती
कन्तु–पु., हृदयम् (वै. नि.)
कन्था–स्त्री., स्यूतकर्पटः (अम.) चीरम् तूलपूर्णगात्रवस्त्रम्
कन्थारी–स्त्री., स्वनामख्यातवृक्षः। फणीनिवडुंग कोङ्कणे। प्रसिद्धः। गुणाः—कटुतिक्तोष्णा वातकफघ्नी शोथघ्नी दीपनी रुचिकरी रक्तग्रन्थिरुजाघ्नी ज्वरघ्नी च (रा. व. ८.२०-२१; पृ. ३५८)
कन्दक–पु., मुखालुः (रा. व. ७-२२) वनशूरणम् (भैष. कुष्ठचि. कन्दर्पसारतैले।)
कन्दगुडूची–स्त्री., गुडूचीविशेषः। गुणाः— कन्दोद्भवा गुडूची च कटूष्णा सन्निपातहा। विषघ्नी ज्वरभूतघ्नी वलीपलितनाशिनी (रा. व. ३)
कन्दट–न., शुक्लोत्पलम्
कन्दतृण–न., तृणविशेषः (वै. नि.)
कन्दनालक–स्त्री., गोजिह्वा (वै. नि.)
कन्दपञ्चक–न., तैलकन्दा हि नेत्रकन्दसुकन्दक्रोडकन्दरुदन्तीकन्दाः। गुणाः—कन्दस्य पञ्चकं प्रोक्तं ताम्रादिरसमारकं। सर्वरोगहरं प्रोक्तमेतद्वै स्निग्धपञ्चकम् (वै. नि.)
कन्दपत्र–पु., क्षुद्रकारवेल्लकम्। विदारी (रा. व. ७)
कन्दबहुला–स्त्री., त्रिपर्णीनामकन्दः (रा. व. ७)
कन्दर–पु., श्वेतखदिरः। क्षुद्ररोगविशेषः न., आर्द्रकम्। शुण्ठी (रा. व. ९) गिरिगुहा
कन्दरूल–पु., कटुसुरणम् (वै. नि.)
कन्दरोग–पु., योनिरोगविशेषः (मा. योनिरोगः)
कन्दरोद्भवा–स्त्री., क्षुद्रपाषाणभेदवृक्षः (रा. व. ५)
कन्दर्पकूप–पु., योनिः।
कन्दर्पज्वर–पु., कामज्वरः
कन्दर्पमुशल–लिङ्गम् (त्रिका.)
कन्दर्पसारतैल–न., कुष्ठाधिकारे तैलम्। (भैष.)
कन्दलता–स्त्री., मालाकन्दः (रा. व. ७) क्षुद्रकारवल्ली
कन्दलीकुसुम–न., शिलीन्ध्रम् (श. च.)
कन्दवर्ग–पु., विदारीकन्दशतावरीकन्दमृणालबिसकशेरुशृंगाटकपिण्डालुमध्वालुहस्त्यालुकाष्ठालुशङ्खालुरक्तालुकेन्दीवरोत्पलकन्दादि (सु. सू. ४६)
कन्दवर्धन–पु., शूरणम् (रा. व. ७. ६) कटुशूरणम् (वै. नि.)
कन्दविष–न., कन्दजातविषम्। तच्चाष्टविधम्, यथा— शक्तुकं मुस्तकं कौर्मं दार्वीकं सार्षपं तथा। सैकतं वत्सनाभं च शृङ्गी चैव विशेषतः। इति। एतानि औषधार्थं ग्राह्याणि। अपराणि च दशनामानुरूपाणि न भैषज्यरसायने प्रयोज्यानि। तत् शुद्धिः— विषभागांश्चणकवत् स्थूलान् कृत्वा तु भाजने। तत्र गोमूत्रकं क्षिप्त्वा प्रत्यहं नित्यनूतनं। शोषयेत् त्रिदिनं पूर्वं धृत्वातीवातपे ततः। प्रयोगेषु प्रयुञ्जीत भागमानेन तद्विषम् (श. र.)
कन्दशाक–पु., द्र० कन्दवर्गः।
कन्दशालिनी–स्त्री., वन्ध्याकर्कोटकी
कन्दसंज्ञ–न., योन्यर्शः (त्रिका.)
कन्दाढ्य–पु., धारणी नाम महाकन्दशाकम् (रा. व. ७। वै. नि.)
कन्दिरी–स्त्री., लज्जालुका (श. चि.)
कन्दुपक्व–त्रि., जलोपसेकं विना केवलपात्रे अग्निना भृष्टतण्डुलादि। यथा— कन्दपक्वानि तैलानि पायसं दधि शक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपीति (स्मृतिः।)
कन्देक्षु–पु., कासभेदः (वै. नि.)
कन्दोट–पु., न., शुक्लोत्पलम्। कुमुदम् नीलोत्पलम् (श. र.)
कन्दोत–पु., कुमुदम् (त्रिका.) श्वेतपद्मम् (श. र.)
कन्दौषध–न., आर्द्रकम् (वै. नि.)
कन्धर–पु., मारिषशाकः। मेघः। न., ससारस्य दध्नः तक्रं कन्धरमिष्यते (कु. टी. श्रीकण्ठः) सस्नेहं दधि कन्धरम् (सि. यो. षट्कन्धरतैले।)

कन्धि–स्त्री., ग्रीवा (हारा.)
कन्धुक–पु., भूमिबदरम् । आरण्वबदरम् (वै. नि.)
कन्नम्–न., मूर्च्छा (श. मा.)
कन्यसा–स्त्री., कनिष्ठाङ्गुलिः ।
कन्याट–पु., लम्पटम् (हारा.) आभ्यन्तरगृहम्
कन्युष–न., बस्तपुच्छम् (हारा.) वन्ध्या कर्कोटकीफलम् (भा. पू. १ भ.)
कपटचीडा–स्त्री., चीडानामदेवदारुविशेषः ।
कपटिनी–स्त्री., चीडानामगन्धद्रव्यम् । देवदारुः वा (रा. व. १२)
कपटी–स्त्री., परिमाणभेदः (श. र.)
कपर्दकरस–पु., रक्तपित्ताधिकारे रसः । (र. स. र.)
कपर्दा–स्त्री., वराटकः (वै. नि.)
कपर्दि–स्त्री., कपर्दकः (रा. व. १२)
कपाटिनी–स्त्री., चीडानाम गन्धद्रव्यम्
कपालकुष्ठ–न., महाकुष्ठभेदः, "कृष्णारुणं कपालाभं यद्रुक्षं परुषं तनु । कपालं तोदबाहुल्यं तत्कुष्ठं विषमं स्मृतम् (भा. । सु. नि. ५)
कपालनालिका–स्त्री., तर्कुटी (त्रिका.)
कपालास्थि–न., स्वनामख्यातशरीरमध्यस्थकर्परसदृशास्थि (सु. शा. ५)
कपिकच्छुफल–न., शूकशिम्बी फलम्
कपिकच्छूरा–स्त्री., शूकशिम्बी (प. मु.)
कपिकन्दुक–न., शिरोऽस्थि (श. च.)
कपिका–स्त्री., नीलसिन्धुवारवृक्षः (रा. व. ४) अर्कवृक्षः (रत्ना)
कपिकोलि–पु., शृगालकोलिका (र. मा.)
कपिचूड–(डा)–पु. स्त्री., आम्रातकवृक्षः (रा. व. ११)
कपिजङ्घिका–स्त्री., तैलपिपीलिका (श. च.)
कपिञ्जला–स्त्री., शालिधान्यविशेषः । सा श्लेष्मकरी (अत्रि. १५ अ.)
कपित्थत्वक्–न., एलावालुकम् (रा. व. ४)
कपित्थपत्रा (र्णी)–स्त्री., वृक्षविशेषः । कपित्थालीति कंवठपत्रीति महाराष्ट्रे (रत्ना.)
गुणाः–कपित्थपत्रा तीक्ष्णोष्णा पाके कट्वी च तूवरा । रसे तिक्ता कृमिकफमेदमेहविषं जयेत् । स्नायुरोगं नाशयति । .... (वै. नि.)
कपित्थानी–स्त्री., कपित्थपत्री
कपित्थाम्र–पु., आम्रभेदे । (वै. नि.)
कपित्थार्जक–पु., श्वेतार्जकः तुलसीभेदः । (मद व. ३)
कपित्थास्य–पु., वानरविशेषः गोलाङ्गुलः । (त्रिक.)
कपित्थाष्टकचूर्ण–न., ग्रहण्याधिकारे उपयुज्यते (च. द. वा. टी.)
कपिनामा–पु., शिलारसः (रत्ना.)
कपिप्रभा–स्त्री., शूकशिम्बी (श. र.)
कपिभूत–पु., पारिशाश्वत्थः (वै. नि.)
कपिरस–पु., शिलारसः ।
कपिरसाढ्य–पु., आम्रातकवृक्षः (रा. व. ११)
कपिरोमा–स्त्री., कपिकच्छुः । रेणुका (रा. व. ९)
कपिलच्छाया–स्त्री., मृगनाभिः (भा. म.)
कपिलद्रुम–पु., काक्षीनाम सुगन्धकाष्ठम्
कपिललौह–न., पित्तलम् (हे. च. वै. नि)
कपिलाधिका–स्त्री., तैलपिपीलिका ।
कपिलार्जक–पु., कपिलवर्णतुलसीवृक्षः (वै. नि.)
कपिलोमफला–स्त्री., कपिकच्छुः (रा. व. ३)
कपिलोमा(ला)–स्त्री., रेणुकबीजम् (रा. व. ९)
कपिल्लक–पु., कम्पिल्लकः (वै. नि.)
कपिल्लिका–स्त्री., ओषधिविशेषः (र. मा.)
कपिवदान्य–पु., आम्रातकवृक्षः ।
कपिवल्लिका(ल्ली)–स्त्री., गजपिप्पली । (भा. पू. १ भ.) कपित्थवृक्षः ।
कपिवास–पु., पारिशाश्वत्थः ।
कपिविरोचन(विरोधि)–न., मरिचम् (रा. व. ९)
कपिबीज–न., शूकशिम्बीबीजम् (भेष. कामेश्वरमोदके)
कपिवृक्ष–पु., पारीशाश्वत्थः (वै. नि.)
कपिश–पु., सिल्हकनामगन्धद्रव्यम् । द्राक्षामद्यम् (वै. नि.) त्रि., श्यामवर्णः (मे. शत्रिकम्)
कपा (शी) शिका–स्त्री., सुरा (त्रिका) माधवीलता (मे. शत्रिकम्)
कपिशायन–न., मद्यविशेषः (त्रिका)
कपिशीर्षक–न., हिङ्गुलः (श. च.)
कपिहस्तक–पु., कपिकच्छुः (रस. र)
कपिकच्छु–पु., कपिकच्छुलता (श. र.)
कपीज्य–पु., क्षीरिकावृक्षः (जटा.)
कपीत–पु., श्वेतबुह्नावृक्षः (र. मा.)
कपीन्द्र–पु., हनुमान् (श. र.)
कपोत (क) न., सौवीराञ्जनम् (मे. तत्रिकम्)
कपोतकनिषादी–पु., अश्वस्य वातव्याधिभेदः, लक्षणं यथा–कृच्छ्रादुत्थापितश्चापि पुनर्यो याति मेदिनीं । कपोतकनिषादीति स ज्ञेयः कृच्छ्रजीवनः (जद. ५५ अ)

कपोतचक्र-पु., कवाटचक्रवृक्षः (रत्ना.)
कपोतपर्णी-स्त्री., एला (रा. व. १२)
कपोतवक्रा-वक्त्रा-स्त्री., काकमाची (च. द. अरोचक चि. कषाद्यतैले)
कपोतविष्ठा-स्त्री., पारावतपुरीषम्, इयं व्रणदारणी (सु. सू. ३७.१०.)
कपोताङ्घ्री-स्त्री., नलिका गन्धद्रव्यविशेषम् (अम)
कपोताञ्जन-न., नीलाञ्जनम्
कपोताण्डोपमफल-न., निम्बुभेदः (वै. नि.)
कपोतारि-पु., श्येनः (श. र.)
कपोतिका-स्त्री., चाणक्यमूलम् । कोमलमूलकः (वैनि)
कपोलफलक-न., प्रशस्तगण्डस्थलम्
कप्याख्य-पु., सिल्हकः
कप्यास-पु., वानरगुदम्
कफकूर्चिका-स्त्री., लाला (हे. च.)
कफकेतुरस-पु., कफरोगाधिकारे रसः । (र. सा. सं. भैष. कफज्वरचि.)
कफगण्ड-पु., गलरोगः (मा०)
कफगुल्म-पु., श्लेष्मजगुल्मः(च. चि. ५)
कफघ्न-त्रि., श्लेष्मनाशकम् ।
कफ(फो)णि-पु., स्त्री., भुजमध्यग्रन्थि (रा. व. १८)
कफनाडी-स्त्री., दन्तमूलगतरोगविशेषः ' दन्तमूलगता नाड्यः पञ्च यथेरिताः । ज्ञेया कफात् बहु-घनार्जुन-पिच्छिलाऽऽस्रा स्तब्धा सकण्डुररुजा रजनी प्रवृद्धा (मा. नाडीव्रणनि.)
कफप्रकृति-स्त्री., स्थिरचित्तता स्निग्धकेशत्वादि ।
कफमन्दिर-न., मण्डभेदः ।
कफरुहा-स्त्री., नागरमुस्ता
कफरोग-पु., कफजन्यरोगः
कफरोहिणी-स्त्री., कफजन्यगलरोगः, लक्षणम्—स्रोतोनिरोधिन्यपि मन्दपाका स्थिराङ्कुरा या कफसम्भवा सा (मा० गलरोग)
कफवर्धक-त्रि., श्लेष्मवर्धकः ।
कफवर्धन-पु., पिण्डितगरवृक्षः (त्रिका.) कफवर्धकः ।
कफसंशमनवर्ग-पु., कफशान्तिकरद्रव्यगणः (भा. पू. १ भ)
कफसंभव-त्रि., कफोत्थः ।
कफस्थान-न., कफाशयः
कफस्राव-पु., नेत्रसन्धिगतरोगविशेषः (मा.)
कफातिसार-पु., कफजन्यातिसारचिकित्सा— श्लेष्मातिसारे प्रथमं हितं लङ्घनपाचनं । योज्यश्चातिसारघ्नो यथोक्तो दीपनो गणः । तस्य लक्षणं यथा— शुक्लं सान्द्रं सकफं श्लेष्मयुक्तं विस्रं शीतं हृष्टरोमा मनुष्यः (मा.)
कफापहा-स्त्री., जीरकम्
कफी(इन्)-त्रि., कफयुक्तः (अम.) पु., गजः ।
कफेलु-त्रि., कफयुक्तः (उणा.)
कफोत्कट-त्रि., कफप्रधानः (च. द.; सान्निपातिकज्वर चि.)
कफोत्क्लिष्ट-पु., नेत्ररोगभेदः । ' कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च । सलिलप्लावितानीव परिजाड्यानि मानवः (मा.)
कफोत्क्लेश-पु., कफस्य वमनोपस्थितिः ।
कफोदर-न., कफजन्योदररोगः (सु. नि. ७)
कबित्थ-पु., कपित्थम् ।
कम्-अव्यय., मस्तकम्
कमठी-स्त्री., कच्छपी
कमण्डलु-(तरुः)-पु., प्लक्षवृक्षः (प. मु.) करकः (मे. चतुष्कं) अश्वत्थभेदः गजहुण्डसहोरा (भा. पू. १ भ वटा. व.)
कमन-पु., अशोकवृक्षः (मे नत्रिकम्) मदनः । (त्रि.,) कामुकः ।
कमनच्छद-पु., कङ्कपक्षी (हे. च.) क्रौञ्चपक्षी
कमन्ध-न., जलम् (अ. टी. रा)
कमलकन्द-पु., शालूकः, गुणाः—शालूकः कटुकश्चोक्तः तुवरो मधुरो गुरुः । मलस्तम्भकरो रुच्यो नेत्र्यो वृष्यश्च शीतलः दुर्जरो ग्राहको रक्तपित्तं दाहं तृषां कफं पित्तवातञ्च गुल्मं च पित्तं कासं क्रमींस्तथा । मुखरोगं रक्तदोषं नाशयेदिति च स्मृतः
कमलकर्णिका-स्त्री., पद्मबीजकोशः, गुणाः—बीजकोशस्तु मधुरः तुवरः शीतलो लघुः तिक्तो मुखस्वच्छकरो रक्तदोषतृषाहरः (वै. नि.)
कमलकेसर-पु., न., पद्मकिञ्जल्कम्, गुणाः— शीतलः ग्राही मधुरः कटुः रूक्षः गर्भस्थैर्यकरः रुच्यश्च (वै. नि.)
कमलच्छद-पु., कङ्कपक्षी, पद्मदलम्
कमलनाल-न., पद्मनाली (वै. नि.)
कमला-स्त्री., वरा स्त्री (मे. लत्रिकम्) निम्बुकविशेषः (तन्त्रसारः)

कमलाक्ष-पु., कमलबीजम् । गुणाः- स्वादुरुच्यश्च पाचनः कटुकः स्मृतः । शीतलस्तुवरस्तिक्तो गुरुर्विष्टम्भकारकः । गर्भस्थितिकरो रुच्यो वृष्यो वातकरो मतः । कफकृल्लेखनो ग्राही बल्यः पित्तविनाशनः । रक्तरुग्वमिदाहास्रपित्तनाशकरो मतः (वै. नि. छर्दिचि. वमनामृतयोगे)

कमलिनी-स्त्री., पद्मिनी । गुणाः- शीतला गुरुः मधुरा लवणा रूक्षा पित्तासृक्कफघ्नी वातविष्टम्भकारिणी च (भा. पु. १. पुष्प व०) तत्च्छदः- शीतस्तुवरो मधुरो मतः । तिक्तः पाकेऽतिकटुकः लघुर्वै ग्राहको मतः । वातकृत्कफपित्तानां नाशको मुनिभिः स्मृतः । (वै. नि.)

कमलोत्तर-न., कुसुम्भपुष्पम् (हे. च.)

कमोदपुष्प-न., जलपुष्पविशेषः

कम्पलक्ष्मा-स्त्री., वायुः (श. र.)

कम्पवायु-पु., वायुरोगविशेषः । सर्वाङ्गकम्पः शिरसो वायुर्वेपथुसंज्ञकः (मा. वातरोग)

कम्पित-न., चलनम् (शर.) (त्रि;) कम्पयुक्तम्

कम्पिला-स्त्री., कुमारी

कम्पिल्लमालक-पु., बकुलभेदः ।

कम्बलिवाह्यक-न.. वृषवाह्यशकटः । (अम.)

कम्बि-स्त्री., दर्वी (श. च.) वंशांशः । (मे. बद्विकम्) वंशाङ्कुरः ।

कम्बुककुसुमा-स्त्री., शङ्खपुष्पी

कम्बुका-स्त्री., अश्वगन्धावृक्षः (र. मा.)

कम्बुग्रीवा-स्त्री., शङ्खाकृतिरेखात्रयाढ्यग्रीवा (रा. व. १८)

कम्बू-स्त्री.. शङ्खः । वलयः ।

कम्बोज-पु., शङ्खविशेषः । हस्तिविशेषः (मे. जत्रिकम्)

कम्बवातायी (इन्)-पु., शङ्खचिल्लः ।

कम्भु-न., उशीरम् (रा. व. १२)

कम्र-त्रि., मैथुनेच्छायुक्तः । (अम)

कयस्थ-स्त्री., हरीतकी । काकोली । (अ. टी. स्वा.) सूक्ष्मैला । (च. द. उन्मादचि. महापैशाचघृते)

कयाह-पु., पक्वतालसदृशवर्णोऽश्वः । लक्षणं यथा-' पक्वतालनिभो वाजी कयाहः परिकीर्तितः (ज. द. ३ भ)

करकच-पु., नखम् (वै. नि.)

करकट-पु., भरद्वाजपक्षी (वै. नि.)

करकण्टक-पु., नखम् (त्रिका.)

करकशालि-पु., रसालेक्षुः ।

करकाजल-न., दिव्यजलभेदम् दिव्यवाय्वग्निसंयोगात्संहताः खात् पतन्ति याः । पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः । करकाजं जलं रूक्षं विशदं गुरु च स्थिरं । दारुणं शीतलं सान्द्रं पित्तहृत्कफवायुकृत् (वैद्यके)

करकाम्बु-न., करकजलम् (वै. नि)

करकाम्भा-पु., नारिकेलवृक्षः (त्रिका.) (न.,) करजलम्

करकुड्मल-न., कराङ्गुली ।

करकृष्णा-स्त्री., जीरकम् (वै. नि.)

करग्रह-पु., विवाहः (त्रिका.) करग्रहणम् ।

करघर्षण-पु., दधिमन्थनदण्डः (श. च.)

करघर्षी-स्त्री., क्षुद्रमन्थानदण्डः । हिं-छोटीरयी ।

करङ्क-पु., मस्तकम् (विश्व कत्रिकम्) अशस्यनारिकेलफलास्थिः (श. च) कङ्कालः (रा. व. १८)

करङ्कीभूत-त्रि., अस्थिमात्रेण स्थितः । (भा. म ४ गर्भचि.)

करजाख्य-पु., नखीनामगन्धद्रव्यम् । (रत्ना)

करज्योडि-पु., हस्तज्योडी महाकन्दशाकम् । (रा. व. ७) काष्ठपाषाणभेदः ।

करज्योडिकन्द-पु., तन्नामकवृक्षकन्दः । (रा. व. ७) रसबन्धकृत् वृष्यश्च ।

करञ्जी-स्त्री., महाकरञ्जवृक्षः (श. च.) गुणाः- स्तम्भनी तिक्ता तुवरी कटुपाका वीर्योष्णा पित्ताऽर्शोवमिकृमिकुष्ठप्रमेहघ्नी च (भा. पू. १ भ) करञ्जवल्ली हिं.—अरारि.

करणत्राण-न., मस्तकम् (हे. च.)

करणाधिप-पु., जीवः ।

करण्टक-पु., पद्मकन्दः ।

करण्टु-पु., लोणिकाशाकम् (प. मु.)

करण्ड-पु., मधुकोषः । दलाढकः । कारण्डी (मे. डत्रिकम्) कारण्डवपक्षी (हारा.)

करण्डफल-पु., कपित्थवृक्षः (रा. व. ११)

करण्डा-स्त्री., यकृत् । कालखण्डम्

करण्डी (इन्)-पु., मत्स्यः (त्रिका.)

करतल-पु., हस्ततलम् (रा. व. १८)

करतृण-न., श्वेतकेतकः ।

करतोय-न.. वर्षीयजलम्

करद्रुम-पु., कारस्करवृक्षः (रा. व. ९)

करपत्रवान्–पु., तालवृक्षः (श. च.)
करपल्लव–पु., अङ्गुली (शब्दकल्प)
करपात्र(त्रिका)–न., स्त्री., जलक्रीडा (हारा.)
करपा(बालिका)–स्त्री., एकधारास्त्रम् (अ. टी. सा.)
करबडावल्ली-.स्त्री, अत्यम्लपर्णी (रा. व. ३)
हिं.—वल्लीपूरण.
करबाल–पु., नखम् (श. मा.) खड्गः ।
करभञ्जि(ण्डि)का–स्त्री., महाकरञ्जः (भा. पू. १ भ)
लताकरञ्जः ।
हिं.—अरारि.
करभप्रिय–पु., क्षुद्रपीलुवृक्षः
करभवारुणी–स्त्री., उष्ट्रकण्टकगुल्मः (रस. र. वाजी)
करभीर–पु., सिंहः (श. र.)
करमट्ट–पु., गुवाकुवृक्षः (त्रि. का.)
करमध्य–न., कर्षः २ तो (प. प्र. १ ख)
करमर्दक–(का. पु. त्रि.) करमर्दवृक्षः (लताविशेषः)
करमर्दी–पु. स्त्री., करञ्जवृक्षः करमर्दवृक्षः (रत्ना.)
करमाल–पु., खतमालः धूमः (हे. च.)
करमूल–न., मणिबन्धः (रा. व. १८)
करम्बी–स्त्री., कलम्बीशाकम्
करम्भक–पु., श्वेतकिणिही
करी–स्त्री., करिदन्तमूलम् (हला)
करेखा–स्त्री., करस्थ रेखा (रा. व. १९)
करल–पु., कपित्थवृक्षः
करवालिका–स्त्री., करपालिका
करवी–स्त्री., हिङ्गुपत्री
करवीरका–स्त्री., मनःशीला
करवीरणी–स्त्री., करवीरुणी ककरखिरुणी इति कोङ्कणदेशे प्रसिद्धे पुष्पवृक्षविशेषः या रक्तपुष्पा ग्रीष्मे जायते । गुणाः-तिक्ता चोष्णा कटु च कफवातविषापहा । आध्मानवातं छर्दिञ्च ऊर्ध्व-श्वासकृमीञ्जयेत् (वै. नि. रा. व. १०)
करवीराद्यतैल–न., भगन्दराधिकारे तैलम् (च. द. रस. र.) अन्यत् नासारोगे (च. द.)
करवीरानुजा–स्त्री., आढकी
करवीरिका–स्त्री., मनःशिला (र. सा. स)
करशाखा–स्त्री., अङ्गुलिः (रा. व. १८)
करशीकर–पु., वमनम् । करिशुण्डनिर्गतजलकणः (हला.)
करशूक–पु., नखः (त्रिका.)

करशोथ–पु., हस्तशोथः ।
करसम्भव–न., रोमकलवणम् (रत्ना.)
करसाद–पु., हस्तदौर्बल्यम्
कराग्र–न., करिपुष्करम् (हला.)
कराग्रपल्लव–पु., अङ्गुलिः ।
कराघात–पु., वृद्धाङ्गुलिः ।
कराङ्गण–न., हट्टः (हारा.)
कराचीन–पु., खञ्जनः ।
करामर्द–पु., करमर्दवृक्षः ।
काराम्बुक–पु., पानीयामलकवृक्षः ।
करायिका–स्त्री., पक्षिभेदः । क्षुद्रबकः । (वै. नि.)
करालकलिका–स्त्री., कुन्दपुष्पवृक्षः (प. मु.)
करालत्रिपुटा–स्त्री.,लङ्कानाम शिम्बीधान्यम् । (रा.व.१६)
करालाङ्क–न., विडङ्गम् (वै. नि.)
करालास्य–त्रि., दन्तुरवदनः ।
करालिक–पु., वृक्षः । (हे. च.)
कराली–स्त्री., अग्निजिह्वा (पु.,)(लिन्) महादोषान्विताश्वः (यस्य नीचत ऊर्ध्वे वा एको दन्तुरो दन्तो जायते स कराली (ज. द. ३ अ.)
करिक–पु., विट्खदिरः ।
करिकणावल्ली–स्त्री., चविकालता ।
करिकवल–पु., विधानः (हारा.)
करिका–स्त्री., कारीवृक्षः (रा. व. ८) नखक्षतम्
करिकुम्भ–पु., गजकुम्भः
करिकुम्भक–पु., नागकेशरचूर्णम् (हारा.)
करिकुसुम्भ–पु., नागकेशरवृक्षः । नागकेशरचूर्णम् । (हला)
करिकृष्णा–स्त्री., गजपिप्पली ।
करिकेसर–न., नागकेसरम् (वै. नि. श्वासचि.) क्षुद्रावलेहः
करिचर्म–न. गजचर्म ।
करिज–पु., गजशावकः (श. मा.)
करिणी–स्त्री. हस्ती (अम.)
करिदन्त–पु., गजवदनम्
करिदन्ताभ–पु., मूलकम्
करिदमन–पु., नागदमनः । (भैष; स्त्रीरोगचि.)
करिदारक–पु.,सिंहः (श. र.)
करिनासिका–स्त्री., यन्त्रविशेषः ।
करिपर्णपलाश–पु., हस्तिकर्णपलाशः (भैष. अम्लपि. चि.सर्वतोभद्ररसे)
करिपिप्पली–स्त्री., गजपिप्पली (प. मु.) (भा. पू. १ भ.)

करिपोत–पु., करिशावकः । (हला.) ।
करिभ–पु., अश्वत्थवृक्षः । चैत्यवृक्षः (त्रिका.)
करिमाचल–पु., गजमाचलः । सिंहः (त्रिका.)
करियाद्–पु., जलहस्ती ।
करिशावक–पु., दशवर्षपर्यन्तः हस्तिशिशुः
करिस्कन्ध–पु., गजांसस्थलम्
करी (इन्) पु., हस्ती (रत्ना.)
करीरकुण–पु., करीरफलकालः
करीरफल -न., करीरबीजम् । 'टोंट' इतिख्यातफलम् ।
करीरा–स्त्री., हस्तिदन्तमूलम् क्षीरिका (उणा.) मनःशिला (हे. च.)
करीरिका–स्त्री., हस्तिदन्तमूलम् (त्रि. का.)
करीरी–स्त्री., हस्तिदन्तमूलम् क्षीरिका (मे. रत्रिकम्)
करीषाग्नि–पु., गोमयाग्निः (हा. रा.)
करुण–पु., फलितवृक्षः । करुणस्तु रसे वृक्षः (मे.) मल्लिकावृक्षः (हे. च.) स्वनामख्यातनिम्बुकवृक्षः (प. मु.) गुणाः– कफवाय्वाममेदोघ्नं पित्तकोपनञ्च (राज. ३. प.)
करुण (णा) मल्ली–स्त्री., नवमल्लिका (श. च.)
करुणा–स्त्री., दया, छगलाक्षः (वै. नि.)
करुणी–स्त्री., ग्रीष्मपुष्पी । पुष्पवृक्षविशेषः (रा व १०.)
करुषक–न., फलविशेषः
करेट–पु., नखम् (त्रिका.)
करेटव्या–स्त्री., धनेच्छूपक्षी
करेटु–(का) (पु.,) कर्कटेरी (रत्ना.) नखम् (त्रिका.)
करेडुक–पु., करेटुपक्षी । कर्कटः
करेणुक–न., कर्णिकारफलम् । तच्च विषमयमिति ज्ञेयम्
करेणुभू–पु., पालकाख्यमुनिः (त्रिका.)
करेणुसुत–पु., पालकमुनिः (त्रिका)
करेनर (वर)–पु., मूषिकः । सिल्हकम् (वै. नि.; रा. व. १२)
करोट–(टि)–(का)(टी)–पु., स्त्री., शिरोऽस्थि (रा. व. १८)
करोद्वेजन–पु., कृष्णसर्षपः (वै. नि.)
कर्कचिर्भिटिका(टी)–स्त्री., चिर्भिटा । कर्कटीभेदः (रा. व. ७)
कर्कटकास्थि–न., कुलीरकास्थि ।
कर्कटकी–स्त्री., कर्कटशृङ्गी (वा. चि. ३) कर्कटी ।
कर्कटचरण–पु., कुलीरकपादः (रस. र. बाल. चि.)
कर्कटच्छदा–स्त्री., पीतघोषा (वै. नि.)
कर्कटवल्ली–स्त्री., गजपिप्पली । शूकशिम्बी । अपामार्गः (वै. नि.)
कर्कटादिलेह–पु., बालरोगे उपयुज्यः (रस. र. बाल. चि. भैष.)
कर्कटीबीज–न., कर्कटीफलबीजम् (च. द. अश्म. चि. कुशावलेहे)
कर्कटु–पु., करेटुपक्षी (श. र.)
कर्कड–पु., खटिका (र. मा.)
कर्कन्धुकी–स्त्री., बदरीभेदः (मद. व. ६) क्षुद्रबदरवृक्षः (र. मा.)
कर्कफल–पु., कर्कटवृक्षः (रा. व. ११)
कर्कर–पु., कङ्करः । मुद्गरः (हारा.) अस्थि (न.) चूर्णजनकपाषाणखण्डः । घुटिं । दर्पणम् (हारा.) तरुणपशुः (हला.)
कर्करट–पु., पक्षिविशेषः
कर्कराङ्ग–पु., कालकण्ठपक्षी ।
कर्कराटु–(क)–पु., कटाक्षः (जटा.) कर्करेटुपक्षी (श. रा.)
कर्करान्ध (न्धु) क–पु., अन्धकूपः । (त्रिका.)
कर्कराल–पु., चूर्णकुन्तलः (हे. च)
कर्कराक्ष–पु., खञ्जनपक्षी (हारा.)
कर्करिका–स्त्री., चक्षुःखर्वा
कर्करी (रि) क–स्त्री., सनालजलपात्रम् (अम.)(उणा.) तण्डुलधावनपात्रम् । गलन्तिका । भाण्डविशेषः । दर्पणः (मे रात्रिकम्)
कर्करेटु–पु., करेटुपक्षी (रत्ना.)
कर्कवल्ली–स्त्री., अपामार्गवृक्षः । गजपिप्पली शूकशिम्बी (वै. नि.)
कर्कशच्छदा–स्त्री., घोषा । दग्धावृक्षः । (रा. व. ९)
कर्कशदल–पु., पटोलफलवृक्षः ।
कर्कशिका–स्त्री., वनकोली (र. मा.)
कर्कसार–न., दधिशक्तुः (हारा)
कर्काक–पु., कर्कटिका
कर्कारु–स्त्री., कुष्माण्डीलता
कर्कंधुकी–स्त्री., भूबदरी ।
कर्कोटकीफल–न., घोषाफलम् । वृत्तकुष्माण्डझिङ्गा-फलम् (वै. नि) कर्कोटकफलम् ।
कर्कोटपत्र–न., कर्कोटदलम् । एतद्वमने हितम् (वा. ज्व. चि. १ अ)
कर्कोटमूल–न., कर्कोटकमूलम् । (सि. यो. कास० चि) नस्यं कर्कोटमूलं स्यात् (च. द. पाण्डु. चि०)

कर्कोटिका-स्त्री., कुष्माण्डीलता कर्कोटकः (रा. व. ७)
कर्कोटिकाकन्दरज-न., खेकसामूलचूर्णम् । (भा. म. १भ शीतलाङ्ग सा. ज्वरचि०)
कर्कोल-न., कङ्कोलः (रा. व. १२)
कर्चरिका (री) स्त्री., कचुडीति प्रसिद्धः पिष्टकभेदः (पाकराजः)
कर्चु (र्चू) र-न., सुवर्णम् (मे. रत्रिकम्) हरितालविशेषः ।
कर्णकिट्ट-न., कर्णमलः
कर्णकीटा (टी)-कर्णजलौका शतपदी (हे. च.)
कर्णगूथ-पु., कर्णमलः (हारा.)
कर्णजलूका-स्त्री., कर्णजलौका (श. र.)
कर्णजलौका-स्त्री., पु., शतपदी (हिं-कान खजूरा) (हे. च. अ. टी. भ.)
कर्णजार्श-न., कर्णार्शोरोगः (सु. नि. २) 'प्रकुपिता दोषाः श्रोत्राक्षिघ्राणवदनेषु अर्शांस्युपनिर्वर्तयन्ति तत्र कर्णजेषु बाधिर्यं पूतिकर्णता च'।
कर्णजाह-न., कर्णमूलम्
कर्णजित्-पु., गुडाकेशः
कर्णजीरक-न., क्षुद्रजीरकम्
कर्णज्योति-स्त्री., कर्णस्फोटा (वै. नि.)
कर्णदुन्दुभि-स्त्री., शतपदी (श. मा.)
कर्णधारिणी-स्त्री., हस्ती
कर्णपात्रक--पु., कर्णबाह्यभागविशेषः
कर्णपुत्रिका-स्त्री., कर्णशष्कुली । मोरटलता
कर्ण (कीर्ण) पुष्प-पु., नीलझिण्टी मोरटम् (रा व ३)
कर्णपूर-पु., बालग्रहः (र. मा.) शिरीषवृक्षः नीलोत्पलम् (मे) अशोकवृक्षः (रा. व. १०) नदीवृक्षः (त्रिका)
कर्णफल-पु., मत्स्यविशेषः । गुणाः—अजीर्णकफकरः । (रा. ३ प.)
कर्णभूषण-(न. पु.) अशोकवृक्षः । नागकेशरः । (प. मु.)
कर्णमुद्गर-पु., मत्स्यविशेषः (वै. नि.)
कर्णमल-न. कर्णगूथः (हारा.)
कर्णमोचक-पु., कर्णस्फोटा (वै. नि.) (२ भ. रक्तपित्तचि. दूर्वाद्यतैले)
कर्णमोटा-पु., स्त्री., बबूरवृक्षः (वै. नि.)
कर्णमोरट-पु., कर्णस्फोटा (रसेन्द्र.) (चि. सूर्यपातक-ताम्रे) काणछिदाद्वयम्—जलस्थलभवः कर्णमोरटः (सा. कौ. दूर्वाद्यतैलम्)
कर्णलतिका-स्त्री., कर्णपाली (हे. च.)
कर्णवंश-पु., मञ्चः । (हारा.)
कर्णवर्जित-पु., सर्पः । (श. च.) (त्रि.) कर्णहीनः
कर्णवश-पु., मत्स्यविशेषः । तत्स्य लक्षणम्-वृत्तः गोलः कृष्णः शल्कवांश्च । तन्मांसगुणाः—दीपनं पाचनं पथ्यं वृष्यं बलपुष्टिकरञ्च (वैद्यकम्)
कर्णविधि-पु., कर्णस्वेदनादिः । तद्विधिः यथा-स्वेदयेत् कर्णदेशन्तु किञ्चिन्नुः पार्श्वशायिनः । मूत्रैः स्नेहैरसै-रुष्णैः श्रोत्ररन्ध्रं प्रपूरयेत् । कर्णं च पूरितं रक्षेत् शतं पञ्चशतानि वा । सहस्रं वापि मात्राणां श्रोत्र-कण्ठशिरोगदे । मूत्राद्यैः पूरणङ्कर्णे भोजनात्प्राक् प्रश-स्यते । तैलाद्यैः पूरणङ्कर्णं भास्करेऽस्तमुपागते (भा)
कर्णशष्कुली-स्त्री., कर्णगोलकः कर्णमध्यवर्ती । आका-शम् (हे. च.)
कर्णशूली-त्रि., कर्णशूलयुक्तः
कर्णशेखर-पु., शालवृक्षः ।
कर्णसमीप-पु., शङ्खदेशः (रा. व. १८)
कर्णसूटी-स्त्री., कीटविशेषः ।
कर्णाख्य-पु., श्वेतझिण्टी (वै. नि.)
कर्णाञ्जलि-पु., कर्णशष्कुली ।
कर्णान्दु-(न्दू)-स्त्री., कर्णपाली (हे. च)
कर्णारा-स्त्री., कर्णवेधनी ।
कर्णिकारिका-स्त्री., हारिद्रावृक्षः (वै. नि.)
कर्णिकी-(इन्)-पु., गजः (जटा.)
कर्णिन-त्रि., विवृद्धकर्णः ।
कर्णीरथ-पु., स्कन्धवाह्ययानम् (अ. टी. भ.)
कर्णीवान्-पु., आरग्वधवृक्षः ।
कर्णेजपमन्त्र-पु., विषनाशनमन्त्रविशेषः 'ॐ हर हर नीलग्रीवश्वेताङ्गसङ्गजटाग्रमण्डितखण्डेन्दुस्फूर्तमन्त्र-रूपाय विषमुपसंहर उपसंहर हर हर हर नास्ति विषं नास्ति विषं नास्ति विषं उच्छिरे उच्छिरे उच्छिरे ।' इति कर्णे जपमन्त्रेण वारं वारं तालुमुखं सिञ्चेत शीतवारिणा वारषट्कम् (अत्रि ३ स्थान अ.५६)
कर्णेन्द्रिय-न., श्रवणेन्द्रियम् (सुशा. १ अ.)
कर्णोर्ण (णा)-न., स्त्री., कर्णरोम (सु. शा. १)
कर्तन-न., छेदनम् (मे. नत्रिकम्) तर्कूटम् (त्रिका.)
कर्तरीयुग-न., सिन्धुवारद्वयम्
कर्द-पु., कर्दमम् (श. र.)
कर्दट-पु., करहाटः । पङ्कम् (मे. टत्रिकम्) मृणालम् । जलतृणमात्रम्
कर्दन-न., कुक्षिशब्दः । (हे. च.)

कर्दम–न., गन्धराजः (रा. व. १२)

कर्दमाटक–पु., विष्ठादिनिक्षेपस्थानम् (श. र)

कर्दमी–स्त्री., मुद्गरवृक्षः (रा. व. १०)

कर्पट (क)–पु., लक्तकः । लत्ता इति लोके ।

कर्परांश–पु., मृत्कपालखण्डम् (श. र.)

कर्परी–स्त्री., क्वाथोद्भवतुत्थम् । तुत्थाञ्जनम्

कर्परीतुत्थ–न., खर्परम् । कर्परिकातुत्थम् रसकम् । (हिं–खपरियाथोथा) कपरीतुत्थकं तुत्थादन्यत् तद्रसकं स्मृतं । ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः (वैद्यकम्)

कर्पास (क)-पु., स्वनामख्यातक्षुपः । (हे. च. मद. व १)

कर्पासफल–न., कार्पासबीजम् । गुणाः—कर्पासफलमित्युक्तं कषायं मधुरं गुरु । वातश्लेष्महरं रुच्यं विशेषेणास्थिवर्जितम्

कर्पासी–स्त्री., कर्पासवृक्षः (मद. व. १)

कर्पूरतुलसी–स्त्री., कर्पूरगन्धितुलसीभेदम् (वै. नि.)

कर्पूरतैल–न., कर्पूरस्नेहः । गुणाः–कटूष्णत्वं वातरोगघ्नत्वं कफामहरत्वं दन्तदार्ढ्यकरत्वं पित्तहरत्वं च (रा. व. १५)

कर्पूरनालिका–स्त्री., पक्वान्नविशेषः । घृताढ्या समितया कृत्वा लम्बपुटं ततः । लवङ्गोषणकर्पूरयुतं सितयान्वितं । पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका । संयावसदृशो ज्ञेया गुणैः कर्पूरनालिका ।

कर्पूरमणि–पु., पाषाणभेदः गुणाः–मणिः कर्पूरकस्तिक्तः कटुश्चोष्णो व्रणापहः । त्वग्दोषवातदोषादीन् नाशयेत् (रा. व. १३)

कर्पूररस–पु., रसविशेषक० (भैष. अतिसार चि.) रसकर्पूरतत्करणविधिः (भा.)

कर्पूरहरिद्रा–स्त्री., स्वनामख्यातद्रव्यम् । गुणाः–'शीतला वातला मधुरा पित्तघ्नी तिक्ता सर्वकण्डूघ्नी च (भा.. पू. १. भ.)

कर्पूरा–स्त्री., तरटी

कर्पूरादितैल–न., योनिरोगे हितम् । पाठः– कर्पूरभल्लातकशङ्खचूर्णं क्षारो यवानाञ्च मनःशिला च । तैलं विपक्वं हरितालमिश्रं रोमाणि निर्मूलयति क्षणेन ' कर्पूरादिभिः कल्कसिद्धे हरितालचूर्णं पादिकं प्रक्षेपम् ।

कर्पूराश्मा–पु., उपरत्नविशेषः (हिं–कर्पूरचीनी) स्फटिकम् (वै. नि)

कर्ब–पु., मूषिकः

कर्बर–पु., पुण्ड्रकेक्षुः । (रा व. १४) स्वर्णम् धुस्तूरवृक्षः, व्याघ्रः (मे. रत्रिकम्)

कर्बरी–स्त्री., शृगाली, व्याघ्रः (मे. रत्रिकम्) हिङ्गुपत्री (ज. टा.)

कर्मकरी–स्त्री., मूर्वा (वै. नि.) बिम्बीकालता (मे. रचतुष्कम्)

कर्मज–पु., वटवृक्षः (जटा.)

कर्ममूल–न., कुशः (श. च.) शरतृणम् ।

कर्मरङ्ग–पु., स्वनामख्यातवृक्षः । फलगुणाः– अम्लत्वं उष्णत्वं वातहरत्वं पित्तजनकत्वं । पक्वस्य मधुराम्लत्वं बलपुष्टिरुचिकरत्वं च (रा. व. ११.१४; पृ. ३७४) कटुपाकित्वं अम्लपित्तकारित्वं तीक्ष्णत्वञ्च (रा. ३ प.) कर्मारस्य फलञ्चामं ग्राह्यम्लं वातनाशनं । उष्णं पित्तकरञ्चैव तत्पक्वं मधुरं मतम् ॥ अम्लञ्च बलपुष्टीनां रुचेश्चैव तु वर्धकम् ' (वै. नि.) ' कर्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातहृत् ' (भा.)

म.—कर्मराचे झाड.

कर्मविपाक–पु., पूर्वजन्मकृतशुभाशुभफलभूतरोगादि ।

कर्मार्ह–पु., मनुष्यः ।

कर्मीरक–पु., शाखोटवृक्षः ।

कर्व–पु., मूषकः । कामम् (उणा.)

कर्वर–पु., व्याघ्रः (मे.)

कर्वरी–स्त्री., हिङ्गुपत्री ।

कर्श्य–पु., कर्चूरः (रा. व. ६) हिं.—कचूर.

कर्षिणी–स्त्री., अतसीवृक्षः (उणा.)

कर्षफला–स्त्री., आमलकीवृक्षः (रत्ना.)

कर्षार्ध–न., तोलकपरिमाणम् (प. प्र. १ ख.)

कर्षिका–स्त्री., काशबीजम् (वै. नि.)

कर्षिणी–स्त्री., क्षीरिणीक्षुपः (रा. व. ५; वै. नि.)

कलक–पु., शकुलमत्स्यः (हे. च.) वेतसवृक्षः

कलकण्ठ–पु., हंसः । पारावतः । कोकिलः (मे. ठचतुष्क) शूकः (प. मु.)

कलकफल–पु., दाडिमवृक्षः ।

कलकल–पु., सर्जनिर्यासः (मे. लचतुष्क)

कलघण्टिका–स्त्री., कृष्णशारिवा (भा. पू. १ भ,)

कलघोष–पु., कोकिलः (श. र.)

कलङ्क–पु., लौहमलम् क्रोडः । अपवादः (मे. कत्रिकम्) मत्स्यभेदः (वै. नि.)

कलङ्कष–पु., सिंहः (श. मा.)
कलङ्की–त्रि., लौहमलयुक्तम्
कलज–पु., कुकुटः (वै. नि.)
कलञ्ज–पु., ताम्रकूटम् (हिं.– तमाकू, सुरतौ) धूम्रपर्णी धूमपानगुणा :– कलञ्जसंवेष्टनधूमपानात् स्याद्दन्तशुद्धिर्मुखरोगहानिः । कफघ्नामज्वरहानिकृच्च गान्धर्वविद्याप्रणवैकसेव्यम् (इति विष्णुसिद्धान्तसारावली) संख्याविशेषे यथा :– सञ्चाली प्रोच्यते गुञ्जा सा तिस्रो रूपकं भवेत् । रूपकैर्दशभिः प्रोक्तः कज्जली नाम नामतः (युक्तिकल्पद्रुमः)
कलत्र–न., श्रोणी (रा, व. १८) भार्या (मे. रत्रिकम्) भगः (त्रिका.)
कलधूत–न., रौप्यम् (रा. व. १३)
कलध्वनि–पु., मयूरः । पारावतः । कोकिलः
कलन–पु., वेतसम् (रा. व. ९)
न., एकमासिकगर्भः । गर्भवेष्टनम् (हला)
कलनाद–पु., कलहंसः (वै. नि.)
कलन्धु–पु., घोलीशाकम् (रा. व. ७)
कलभवल्लभ–पु., पीलुवृक्षः (रा. व. ११)
कलभवल्लभा–स्त्री., पिकीम् (रा. व. २२)
कलम्बशाली–स्त्री., शालिधान्यविशेषः
कलम्बिक–पु., पक्षिविशेषः (वै. नि.)
कलम्बिका–स्त्री., कलम्बीशाकम् (श. र.) ग्रीवा पश्चान्नाडी
कलम्बिकी–स्त्री., पक्षिभेदः (वै. नि.)
कलम्बु–(म्बू), पु., स्त्री., कलम्बीशाकम् (श. र.)
कलम्बुका–स्त्री., जलजशाकविशेषः (भेष.) (शूलचि.शम्बूकादिगुडौ)
कलम्बुट–न.. हैयङ्गवीनम् । नवनीतम् (हारा.)
कलयञ्ज–पु., सर्जरसः । (वै. नि.)
कलरव–पु., गृहपारावतः (अम.) कोकिला (रा. व. १९) वनकपोतः (वै. नि.)
कललजोद्भव–पु., शालवृक्षः । (रा. व. ९)
कलह–पु. मुण्डी । (हिं.—मुण्डीरो) (वा. सू. १५) । खड्गम् । (मे)
कलहंसक–न., अरोचकाधिकारे कवलमात्रम् । अस्य कवले धृते मुखवैशद्यं रुचिश्च भवति । (च. द.) (अरोचकचि. । रस. र.)
कलहनाशन–पु., कुटजवृक्षः । पूतीकरञ्जः ।
कलहप्रिया–स्त्री., सारिका (रा. व. १९)
कलहाकुला–स्त्री., शारिका (वै. नि.)
कलाकुल–न., विषम् (रा. व. ९)
कलाङ्कुर–पु., सारसपक्षी (त्रि. का.)
कलाङ्गुलि–पु., शालिधान्यविशेषः । (च. सू. २७)
कलाचिका (**ची**) स्त्री., प्रकोष्ठः । कफोणेरधो मणिबन्धपर्यन्तम् (हे. च.) अश्वस्य जानुनोऽग्रिमः भागः । (ज. द. २ अ.)
कलाजाजी–स्त्री., कारवी । कृष्णजीरकः । (हिं–कलौंजी मंगरैला)
कलाटीन–पु., खञ्जनपक्षी (हा. रा.)
कलाद–पु., स्वर्णकारः । (त्रिका.)
कलाधिक–पु., कुकुटः ।
कलानुनादी–पु., कलविङ्कः । चटकः । चातकः । भ्रमरः । (मे. नषट्कम्)
कलापक–पु., करिकण्ठबन्धः ।
कलामक–पु., कलमधान्यम् । (हे. च)
कलायक–पु., कलमशालिः (रा. व. १६) गुणाः— किञ्चित्कषाया मधुरा प्रदिष्टा रक्तप्रशान्तिं जनयन्ति बल्याः । किञ्चित् सवातं विनिघ्नन्ति पित्तं कलायका मुद्गसमानरूपा (अत्रि. १५ अ)
कलायका–स्त्री., मत्स्याक्षी । गण्डदूर्वा । (वै. नि)
कलायसूप–पु., कलायकृतयूषः । गुणाः–कलायसूपः कथितो लघु ग्राही सुशीतलः । रुच्यो मेध्यः पाककाले स्वाद्वस्रगदपित्तनुत् । अरोचकहरश्वासौ कफनाशकरो मतः (वै. नि)
कलारुहा–स्त्री., स्वर्णकेतकीवृक्षः ।
कलालाप–पु., भ्रमरः (रा. व. ९)
कलाविक–पु., कुकुटः (त्रिका)
कलाविघल–पु., चटकः (श. र.)
कलिकार–पु., धूम्याटः । पीतमस्तकपक्षी । करञ्जवृक्षः (म.) जलपिप्पली (वै. नि.)
कलिकारक–पु., पूतिकरञ्जः । लट्वाकरञ्जः । (अम.)
कलिकारिका–स्त्री., लाङ्गलीवृक्षः (वै. नि.)
कलिकोत्तम–न., पु., लवङ्गम्, गन्धशालौ ।
कलिङ्गद्रु–पु., कुटजवृक्षः (भा. म. १ भ. कास चि) कलिङ्गद्रुफलं रजः ।
कलिङ्गशुण्ठी–न., तद्देशजशुण्ठीविशेषः । गुणाः— तिक्ता बलकरी अग्निदीपनी अजीर्णहरी बालकातिसारघ्नी। सा यवक्षारयुता गर्भिण्या वान्ति हरेत् (अत्रि)
कलिङ्गा–स्त्री., कर्कटशृङ्गी (र. मा.) श्वेतत्रिवृता (श. च.)

कलिङ्गादिकषाय-पु., 'कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणीं' इत्येतद्द्रव्यकृतकषायः । स च सन्ततादीनां शमनः (वा. चि. १ अ.) कषायोऽयं पित्तज्वरघ्नः (च. द. पित्तज्वर चि.)

कलिङ्गाद्यगुडिका-स्त्री., ज्वरातिसारे हिता (च. द. भैष.)

कलिञ्ज-पु., कुलिञ्जनः (वै. नि. २भ. जिह्वकज्वर. चि.)

कलिन्द-पु., सूर्यः । बिभीतकवृक्षः (रा. व. २३) भेलकवृक्षः । सरलदेवदारः (वै. नि.)

कलिन्दक-पु., कर्कारी । तरबुजः (वै. नि.)

कलिप्रद-पु., मद्यशाला (वै. नि.)

कलिप्रिय-पु., वानरः (श. र.)

कलिफल-न., बिभीतकफलम् (च. द.)

कलिम-पु., शिरीषवृक्षः (वै. नि.)

कलिमार-(कः)-पु., पूतिकरञ्जः । कण्टककरञ्जः (अ. टी. र.)

कलियुगालय-पु., बिभीतकवृक्षः (भा. पू. १ भ.)

कलियुगावास-पु., बिभीतकतरुः (भा.)

कलिवृक्ष-पु., बिभीतकवृक्षः (हे. च.)

कलिहारी-स्त्री., लाङ्गली (भा. पू. १ भ. वै. नि. वातव्याधि-महाविषगर्भतैले)
हिं.—करिहारी.

कली-स्त्री., कलिका (अ. टी. भ.)

कलुषमञ्जरी-स्त्री., जिङ्गिनी (वै. नि.)

कल्पक-पु., नापितः (श. मा.) कर्चूरः (भा. पू. १ भ.)

कल्पतरु-पु., कल्पवृक्षः । क्रमुकवृक्षः (रा. व. ११) तन्नामकज्वरघ्नरसः (भैष. ज्वरचि)

कल्पद्रु-(म)-पु., कल्पतरुः । न्हस्वारग्वधवृक्षः

कल्पनी-स्त्री., कर्तरी (हे. च.)

कल्पपादप-पु., कल्पवृक्षः । बिभीतकवृक्षः

कल्पवृक्ष-पु., बिभीतकवृक्षः । कल्पपादपः (अम. रत्ना.)

कल्पा-स्त्री., श्वेतजातीवृक्षः । मद्यम् (वै. नि.)

कल्पान्त-पु., प्रलयकालः (अम.)

कल्मष-न., पापम् । करपुच्छम् (त्रि. का.)

कल्य-न., सुरा (हला.)

कल्यजग्धि-स्त्री., प्रातर्भोजनम् (जटा.)

कल्यद्रुम-पु., बिभीतकवृक्षः (वै. नि.)

कल्यवर्त-पु., प्रातराशः (त्रि. का.)

कल्या-स्त्री., मद्यम् (मे. यद्विक.) हरीतकी (श. र.)

कल्याङ्ग-पु., पर्पटक्षुपः (रा. व. ५)

कल्याणलेह-पु., वातव्याध्यधिकारे हिक्कायां उपयुज्यते श्वासे च (च. द. वातव्याधिचि. रस. र. भैष.)

कल्याणसुन्दराभ्र-न., राजयक्ष्मणि रसः (भैष.)

कल्ल-पु., बधिरः (त्रिका.)

कल्लता-(त्व) न., बाधिर्यम् । स्वरभेदः (हे. च.)

कवचपत्र-न., भूर्जपत्रम् (श. च.)

कवचीयन्त्रम्-न., औषधपाकार्थं यन्त्रविशेषः । नातिन्हस्वां काचकूपीं न चातिमहतीं दृढां वाससा कर्दमाक्तेन परिवृत्य समन्ततः । संलिप्य मृदुमृत्स्नाभिः शोषयेद्भानुरश्मिना । निधाय भेषजं तत्र मुखमाच्छादयेत्ततः । कठिन्या दृढया वापि पचेद्यन्त्रविधानतः । कवचीयन्त्रमेतद्धि रसादिपचने मतम् (आत्रेय.)

कवड-पु., कवलः । (रत्ना.)

कवडग्रह-पु., कर्षः । (प. प्र. १ ख. च. द) (खदिरादिवटि)

कवयि-(यी)-स्त्री., मत्स्यविशेषः । गुणाः—मधुरा स्निग्धा कषाया रुच्या ईषत्पित्तकरी बल्या वातघ्नी च (भा. हारा.)

कवर-पु., स्त्री., कबरी (त्रिका.) लवणम् अम्लम् (मे. हे. च.) सामुद्रलवणम् (र. मा.)

कवरा (री)-स्त्री., बर्बरी (श. र.) बर्बूरवृक्षः वनतुलसी (अम.)। रक्तकरवीरः । मनःशिला । हिङ्गुपत्री । (रा. व. ९)

कवरीक-पु., सुगन्धपत्रवृक्षविशेषः ।
यथा—कस्तूरिकाक्ष्वेडगन्धः कवरीकः स्वनामकः । (इति द्रव्याभिधानम्)

कवरीकला-स्त्री., मनःशिला ।

कवरीकूटक-पु., कवरी (त्रिका.)

कवली-स्त्री., बदरीवृक्षः (हला.)

कवस-पु., कण्टकगुल्मः ।

कवाटच (ब) क्र-न., स्वनामख्यातवृक्षः ।

कवाडवक्र-पु., कवाटवक्रवृक्षः (र. मा)

कवार-न., पद्मम् (त्रिका.)(पु.;) पक्षिविशेषः (वै. नि.)

कविञ्जक-पु., पक्षिविशेषः ।

कवि (ग) त्थ-पु., कपित्थवृक्षः (अ. टी.)

कवेल-न., उत्पलम् (श. च.)

कशिपु-पु., भक्तम् । वस्त्रम् (रा. व. २०)

कश्मल-न., मूर्च्छा मोहः । (अ. म) पापम् (शब्दरं.)

कश्मीरज-(न्म)-न., पु., कुङ्कुमम् । (अ. टी. रा.)

कश्य–न., मद्यम् । पु., अश्वः । (मे यद्विकम् ।) कषार्होऽश्वः । (हे. च.) अश्वमध्यभागः । (वै. नि.)
कषण–पु., शलाटुः । कण्डूयनम् । (त्रि.) अपक्कम् । (श. च.)
कषपाषाण–पु., स्पर्शमणिः ।
कषायकृत्–पु., रक्तरोध्रः (जटा.)
कषायजल–न., प्लक्षाश्वत्थोदुम्बरं शिरीषवटसिद्धजलम्
कषायनित्य–पु., नित्यमतिमात्रककषायरससेवी (च)
कषायवृक्ष–पु., वटामलकादिकषायत्वक् फलवृक्षः । (च. चि. ४ अ.)
कषाया–स्त्री., रक्तदुरालभा । क्षुद्रदुरालभा (रा. व. ४) आम्रातकः । खर्जुरीवृक्षः (वै. नि.)
कषिका–स्त्री., पक्षिजातिः । (उणा.)
कषेरुका–स्त्री., कशेरुका । (अ. टी. रा.)
कष्टकारक–पु., पीडाकरः । (त्रिका.)
कष्टि–स्त्री., पीडा (वै. नि.)
कष्टीर–न., रङ्गम् । (रत्ना.)
कसका–स्त्री., कासमर्दः । (वै. नि. २ भ. कुलत्थादिघृते)
कसन–मर्दन–(पु., कासमर्दवृक्षः (वै. नि.)
कसनोत्पाटन–पु., वासकवृक्षः । (श. च.)
कसिपु–पु., अन्नम् (जटा.)
कसेरुका–स्त्री., कसेरुः । (रा. व. ८) पृष्ठास्थि (रा. व. १८)
कस्तीर–न., पिच्चटम् । वङ्गः । (हे. च.)
कस्तीर्ण–न., रङ्गम् (प. मु.)
कस्तूरि (री)क–पु., करवीरवृक्षः ।
कस्तूरिमृगाण्डज–पु., मृगनाभिः (रत्ना.)
कस्तूरीभैरवरस–पु., शीताङ्गसन्निपाते रसः (रसर. ज्वरचि. भैष.)
कस्तूरीमल्लिका–स्त्री., मृगनाभिः (वै. नि.) मल्लिका-पुष्पवृक्षभेदः (या मृगमदवासा भवति) गुणैः वार्षिकादितुल्या (रा. व. १०)
कस्तूरीमोदक–पु., प्रमेहाधिकारे हितः (र. सा. स.)
कस्तूरीहरिण–पु., मृगनाभिहरिणः (वै. नि.)
कस्य–न., सुरा (हला.)
कह्लक–न., कह्लारः (भा. पू. १ भ. गु. व.)
कह्लाराद्यघृत–न., हृद्रोगाधिकारे उपयुज्यते (र. स. र.)
कह्व–पु., बकपक्षी (अम.)
कांसिका–स्त्री., मुद्गपर्णी (रा. व. ३)
कांसी–स्त्री., सौराष्ट्रमृत्तिका (प. मु) कांस्यधातुः ।

कांसीय–न., कांस्यधातुः (रा. व. १३)
कांस्यपिष्टीरस–पु., पाण्डुधिकार उपयुक्तः (र. चि. ९)
कांस्यालुक–न., कासालुकः ।
काककङ्गु–पु., चीनक इति प्रसिद्धधान्यम् सर्जरसः (वै. नि.)
काककण्टक–पु., जलचरपक्षिविशेषः ।
काककर्कटी-स्त्री., खर्जूरीवृक्षः (भा)
काककला–स्त्री., काकजङ्घावृक्षः (जटा.)
काककुड्मल–न., नीलपद्मम् (वै. नि.)
काकचिञ्चा (ञ्चि)(ञ्ची)–स्त्री., गुञ्जा (त्रिका.) रक्तगुञ्जा (भा. पू. १ भ. गु. व)
काकच्छद–(दि)–(र्दि)–पु., खञ्जनपक्षी (श. र.) चाषपक्षी (त्रिका.)
काकजानुक–स्त्री., काकजङ्घा । (भैष. स्त्री. रोग. चि.- रस. र. प्रदरे)
काकडुम्बुर–पु., कृष्णडुम्बुरः ।
काकणघ्नवटी–स्त्री., कुष्ठघ्नौषधविशेषः (रस. र)
काकणन्तक–पु., सिन्दूरम् (वै. नि.)
काकण्डा–स्त्री., काकनासा (रा. व. ३)
काकनामा–पु., बकवृक्षः (र. मा.)
काकन्ती–स्त्री., कृष्णशिम्बी (र.मा)
काकन्दी–स्त्री., चिञ्चा
काकपर्णी–स्त्री., मुद्गपर्णी (भा.)
काकपक्ष–पु., शिखण्डकः (अ. म.)
काकपुच्छ–(ष्ट)–पु., कोकिलः (श. र.)(हे. च)
काकपुष्प–न., ग्रन्थिपर्णम् । सुगन्धतृणम् (वै. नि.)
काकबन्ध्या–स्त्री., एकमात्रप्रसवा नारी
काकभण्डी–स्त्री., श्वेतगुञ्जा (वै. नि.)
काकभाण्डी–स्त्री., महाकरञ्जवृक्षः (रा. व. ९) लघुरक्तमाचिका (वै. नि.)
काकभीरु–पु., पेचकः (रत्ना. त्रिका.)
काकमर्द–क–पु., महाकाललता (प. मु.)
काकमांस–न., वायसमांसम्
काकमाचीतैल–न., अरुंषिकादौ हितम्
काकयव–पु., शस्यहीनधान्यम् (महा. भा.)
काकयान–न., कोङ्कणदेशख्याते हासानामवृक्षविशेषः (वै. नि.)
काकरिपु–पु., उलूकः
काकरुहा–स्त्री., वृन्दावृक्षः (त्रि. का.)
काकरूक–पु., उलूकः निम्बवृक्षः (त्रि.,) भीतः स्त्रीजितः (मे. कचतुष्कन्)

काकलीरव–पु., कोकिलः (रा. व. १९)
काकवल्लभा–स्त्री., काकजम्बूवृक्षः (रा. व. ११)
काकवल्लरी–स्त्री., स्वर्णवल्ली (भा. पू. १ भ.) पीतकाञ्चनम् (वै. नि.)
काकविष्ठा–स्त्री., काकमलः
काकवृन्ता–स्त्री., रक्तकुलत्थः (वै. नि.)
काकशालि–पु., कृष्णशालिधान्यम् (वै. नि.)
काकशीर्ष–पु., बकवृक्षः (प. मु.)
काकसस्य–पु., तन्नामकपक्षिविशेषः (वै. नि.)
काकसादी–पु., अशुभलक्षणाश्वः (आग्नेय)
काका–स्त्री., श्वेतत्रिवृत् । काकोडुम्बरिका काकोली काकजङ्घा। गुञ्जालता मलपूवृक्षः। काकमाची (मे. कद्विकम्)
काकाङ्गा(ङ्गी)–स्त्री., काकनासा (भा. पू. १ भ.) काकजङ्घा (वै. नि.)
काकाञ्ची–स्त्री., काकजङ्घा (श. र.)
काकाण्ड–पु., काकतिन्दुकः । महानिम्बः (रा. व. ९)
काकाण्डफल–न., शूकरशिम्बीफलम्
काकानन्ती–स्त्री., रक्तगुञ्जा (भा. पू. १ भ.)
काकायु–पु., स्वर्णवल्ली (भा. पू. १ भ.)
काकारि–पु., पेचकः (हे. च.)
काकाल–पु., द्रोणकाकः। (श. र.) वत्सनाभविषम् (हे. च.)
काकास्या–स्त्री., महाश्वेतकाकमाची
काकाक्षा–स्त्री., काकनासा (रा. व. ३)
काकु–स्त्री., जिह्वा (त्रि. का.)
काकुद्(द)–स्त्री., तालु (रा. व. १८)
काकुदी–पु., काकुदावर्तः महादोषान्विताश्वः । 'आवर्ती यस्य काकुदि काकुदी स उदाहृतः ' (ज. द. ३ अ.)
काकुरुत–न., विकृतशब्दम् ।
काकेष्ट–पु., निम्बवृक्षः (रा. व. ९)
काकेष्टा–स्त्री., रेणुका काकमाची (वै. नि.)
काकोचिक-(ची)–पु., स्त्री., काऊचीति प्रसिद्धमत्स्य-विशेषः (हा. रा.)
काकोदुम्बरिकाफल–न., अञ्जीरम् (वै. नि.)
काकोनालक–पु., प्लवज्ञातीयपक्षी । गुणाः– प्लववत् ।
काकोल–पु., न., द्रोणकाकः (हला.) काकोली (धरणि) कृष्णवर्णस्थावरविषभेदः (रत्ना.) काकोलमुग्रतेजः स्यात् कृष्णच्छवि महाविषम् (वै. नि.) सर्पः । वनशूकरः । (श. र.)

काकोल्यादिघृत–(न.,) वातरक्ते घृतम् उपयुक्तम् (रस. र. ।)
काग–पु., काकः (जटा.)
कागद–पु., कागज इत्यारबीयभाषाप्रसिद्ध शणपत्रम् ।
काङ्कायनगुडिका–स्त्री., गुल्मरोगे दृष्टफलौषधम् (च. द. रस. र.)
काङ्कायनमोदक–पु., अर्शोरोगे हितः (च. द.) (अर्श.चि.)
काङ्गा–स्त्री., वचा (श. च.)
काङ्क्त्–पु., क्रौञ्चपक्षी । (वै. नि.)
काचक–पु., न., काचलवणम्, स्फटिकम्, काचमणिः, (वै. नि.)
काचज–पु., काचलवणम्; (वै. नि.)
काचतिन्तिडी–स्त्री., आमतिन्तिडी
काचभव–पु., काचलवणम् (वै. नि.)
काचभाजन–न., काचनिर्मितपात्रम् ।
काचमालिका–स्त्री., मद्यम् (त्रिका.)
काचलवण–न., स्वनामख्यातलवणम् । काचलवणं इति महाराष्ट्रकर्णाटदेशे ख्यातम् (म–बांगडखार) गुणाः–रुच्यं ईषत् क्षारं पित्तलं दाहकं कफवातघ्नं गुल्मशूलनुच (रा. व. ९)
काचबकयन्त्र–न., अर्कादिनिष्कासनार्थे काचनिर्मित-वकयन्त्रम्
काचबिन्दु–पु., नेत्ररोगविशेषः ।
काचस्थाली–स्त्री., काचपात्रम् । पाटलावृक्षः । (अम.) (प. मु.) श्वेतपाटलः । (वै. नि.)
काचा–स्त्री., काचमणिः । काचा तु सारका लघ्वी व्रण-नेत्रहितावहा । लेखनी शूलहृत्प्रोक्ता......।' (वै. नि.) वयोनिरूपिका अश्वस्य दन्तेषु पञ्चदशा-ब्दादारभ्य सप्तदशपर्यन्तं जाता सर्षपाकाराः शुभ्रा रेखाः (च. द. ४ अ.)
काचाह्वा–स्त्री., हरिद्रा (वै. नि. २ भ. अप. चि.)
काचि (जि घ)–पु., काञ्चनम् । मूषिकः (मे. घत्रिकम्) शिम्बीधान्यादि (वै. नि.)
काचिञ्चिक-(लिन्दि)–पु., काकचिञ्चा ।
काचित–त्रि., शिक्यारोपितम् (पदार्थम्) (अम.)
काचिम–पु., देवकुलोद्भववृक्षः (त्रिका.)
काजूत–पु., जांबीक्षुपः महाराष्ट्रादौ ख्यातः । गुणाः- तुवरः मधुरोष्णो लघुः स्मृतः । धातुवृद्धिकरो वातकफगुल्मोदरज्वरान् । कृमिव्रणाग्निमान्द्यानि कुष्ठञ्च श्वेतकुष्ठकम् । संग्रहण्यर्शसानाहान् नाशयेत् ...(वै. नि.)

काञ्चज–न., काचलवणम् (वै. नि.)
काञ्चनकारिणी–स्त्री., शतमूली (श. च.)
काञ्चनगुडिका–स्त्री., गलगण्डाधिकारे हिता (रस. र.)
काञ्चनपत्रिका–स्त्री., कृष्णमुशली (वै. नि.)
काञ्चनपुष्पिका–स्त्री., पीतजाती (रा. व. ४)
काञ्चनभूषा–स्त्री., स्वर्णगैरिकम् (वै. नि.)
काञ्चनमाक्षिक–पु., स्वर्णमाक्षिकम् महाद्रावकः ।
काञ्चनमोहनरस–पु., गुल्माधिकारे रसः (रस. र.)
काञ्चनसूप–पु., काञ्चननामकद्विदलधान्यसाधितं सूपम्
काञ्चनाभ्ररस–पु., यक्ष्माधिकारे रसः (र. सा. सं.)
काञ्चनारगुग्गुलु– पु., गण्डमालागलगण्डापच्यर्बुदादौ हितः (भा.)
काञ्चनाल–पु., श्वेतकाञ्चनवृक्षः (र. मा.) आरग्वध-वृक्षः (वै. नि.)
काञ्चनाह्वय–पु., नागचम्पकवृक्षः नागकेशरवृक्षः (अम.) पद्मकेसरम् (वै. नि.)
काञ्चनीया–हरितालः (श. चि.) गोरोचना (रा. व. १२)
काञ्चि–स्त्री., रसना (उणा.) गुञ्जा (वै. नि.)
काञ्चिक–न., काञ्जिकम् (हे. च.)
काञ्ची–स्त्री., गुञ्जा (हे. च.) रसना (अम.)
काञ्चीपद–न., जघनदेशः (हला.)
काञ्जिकवटक–पु,, खाद्यद्रव्यविशेषम् (भा.)
काञ्जिकषट्पलघृत–न., आमवाते घृतम् हितम् (च. द)
काञ्जितैलम्–न., काञ्जिकविशेषः (रा. व. १५)
काञ्जिपत्रक–स्त्री., कृष्णदन्तीक्षुपः
काञ्जी–स्त्री., महाद्रोणपुष्पी (रा. व. ५) काञ्चिकम् (अ. टी.) भार्गी (र. मा.)
काट्टुक–न., कटुता
काठ–पु., पाषाणः (त्रि. का.)
काठिन–पु., खर्जूरवृक्षः
काठिन्यफल–पु., कपित्थवृक्षः (रा. व. ११)
काठोडुम्बर–पु., काष्ठोदुम्बरिका (र. सा. स. कुष्ठ. चि)
काणभाग–पु., त्रिभागः (भैष. कालाग्निभैरवरसे)
काणु (णू) क–पु., करटः । हंसभेदः । कुक्कुटः । वायसः (उणा.)
काणेय–(र)–त्रि., काणः । एकनेत्रास्त्रेयः पुत्रः
काण्डकण्ट (क)–पु., अपामार्गक्षुपः (रा. व. ४) श्वेतापामार्गः (वै. नि.)
काण्डका–स्त्री., करालत्रिपुटा वालुकीनामकर्कटी । आलाबुः (रा. व. १६)
काण्डका (की) र–न., गुवाकः (श. मा.)
काण्डखेट–त्रि., अधमः (हला.)
काण्डणी–स्त्री., सूक्ष्मपर्णीलता
काण्डतिक्त–(क)–पु., किराततिक्तः । (रा. व. ९)
काण्डनी–स्त्री., रामदूती नागवल्ली
काण्डनील–पु., लोध्रम् । (रा. व. ६)
काण्डपट–पु., तिरस्करिणी (हे. च.)
काण्डपुष्प–न., 'दोना' इति प्रसिद्धः सुगन्धपुष्पविशेषः (श. च)
काण्डभङ्ग–पु., अस्थिभङ्गः
काण्डमध्या–स्त्री., काण्डवल्ली (वै. नि.)
काण्डव–पु., केमुकवृक्षकन्दः (वै. नि.)
काण्डहिता–स्त्री., लोध्रवृक्षः (वै. नि.)
काण्डा–स्त्री., मुषली (प. मु.)
काण्डिनी–स्त्री., हस्तिशुण्डीलता । (प. मु.)
काण्डीरा–(री)–स्त्री., मञ्जिष्ठा (र. मा.) कारवेल्लकः । अमृतस्रवा (वै. नि.)
काण्डेरी–स्त्री., नागदन्तीवृक्षः (र. मा.)
काण्डेरुहा–(स्त्री., कटुकी (र. मा.)
काण्डोल–पु., उष्ट्रः ।
कातर–(ल) पु., मत्स्यविशेषः (श. र.) गुणाः–मधुरो गुरुः त्रिदोषघ्नश्च (राज. १९)
कातोली–स्त्री., कोहलसुरा । यवमाषादिपिष्टोत्था कातोली कोहला सुरा (वाचस्पति)
कात्यायनी–स्त्री., काषायवस्त्रम् । (मे. नचतुष्कम्)
कादम्बकर–पु., कदम्बवृक्षः (वै. नि.)
कादम्बर–पु., न., नानाद्रव्यकदम्बकृतं मद्यम् 'नाना-द्रव्यकदम्बेन मद्यं कादम्बरं स्मृतम्। (राज) गुणाः—मधुरं पित्तभ्रममदघ्नञ्च (रा. व. १४) कदम्बपुष्पोत्थमद्ये (मे) न,. दधिसारः (हे. च.) शीधुः (विश्व.)
कादम्बरीबीज–न., सुराबीजम् (र. मा.)
कादिर–न., खदिरसारः (रा. व. ८)
काद्रवेय–पु., सर्पः । रङ्गम् (मे.)
कानक–न., जैपालबीजम्। धुस्तूरबीजम्। (द्रव्याभिधानम्)
कानकचूर्ण–न., मुखरोगे हितम्। "गृहधूमो यवक्षारः पाठा व्योषं रसाञ्जनम्। तेजोव्हा त्रिफला लौहं चित्रकश्चेति चूर्णितम्। सक्षौद्रं धारयेदास्ये (सा. कौ.)
काननारी–पु., शमीवृक्षः (श. च.)

काननौका-पु., कपिः। वानरः।
कानीन-पु., लोध्रवृक्षः (श. च.)
कान्तपक्षी-(इन्) पु., मयूरः। (श. च.)
कान्तपाषाण-पु., चुम्बकनामप्रस्तरः। गुणाः- शीतो लेखनो विषदोषहा। मेदं पाण्डुं क्षयं कण्डूं मोहं मूर्च्छाञ्च नाशयेत् (वै. नि.)
कान्ताङ्घ्रि(चरण)दोहद-पु., अशोकवृक्षः (त्रिका.)
कान्तारश्मज-न., कान्तलौहम् (वै. नि.)
कान्तारेक्षु-पु., इक्षुविशेषः (भा.)
कान्तालक-पु., नन्दीवृक्षः (वै. नि.)
कान्तिद-न., पित्तम् (श. च.)
कान्तिदायक-न., कालीयकचन्दनवृक्षः (जटा.) (त्रि.,) शोभादायकम्।
कान्तिवृक्ष-पु., महासर्जवृक्षः (वै. नि.)
कान्तोली-स्त्री., कुष्माण्डसुरा (वै. नि.)
कान्द-न., पक्वान्नविशेषः (श. च.)
कान्दर्पिक-न., वाजीकरणम् (श. च.)
कान्दविक-त्रि., आपूपिकः (अम.)
कान्दाविष-न., विषभेदः (श. च.)
कान्यजा-स्त्री., नलीनामगन्धद्रव्यम् (श. च.)
कापथ-न., उशीरम् (अ. टी. भ.)
कापाल-न., अष्टादशकुष्ठान्तर्गतवातिककुष्ठम् (पु.,) कण्टकलता। कालियाकडा इति लोके (र. मा.) कपालास्थि। कर्कटीभेदः (वै. नि.)
कापाला-स्त्री., रक्तत्रिसन्धिका (वै. नि.)
कापालि-पु., स्त्री., अहिंस्रा (रत्ना.)
कापाली-स्त्री., विडङ्गम् (रा. व. ६) कण्टकपाली (प. मु.)
कापिकेक्षण-पु., कोकिलाक्षक्षुपः (रा. व. ५)
कापित्थ-न., कपित्थफलम्
कापिश-न., द्राक्षामद्यविशेषः (हे. च.)
कापिशायन-न., मद्यविशेषः। मधु (हला. जटा.) द्राक्षाकृतमद्यम् (वै. नि.)
कापिशायन-त्रि., द्राक्षानिर्मितम्
कापिशायनी-स्त्री., द्राक्षा। (वै. नि.)
कापोतवक्रक-पु., कपोतवङ्का। अयं शिरीषसदृशस्वल्पपत्रः (च. द. वीरतरादौ)
कापोताञ्जन-न., सौवीराञ्जनम्। स्रोतोऽञ्जनम् (भा अम.)
काफल-पु., कट्फलवृक्षः (श. र. अत्रि) (२ स्थान २ अ)
काबाबशर्करा-स्त्री., विडङ्गवत् फलविशेषः। मुस्तकादिमोदकः)

कामकला (वटी)-स्त्री., वातरक्ते हिता। (रस. र)
कामकलाख्यरस-पु., वाजीकरणौषधम् (रस. र. वाजी. चि.)
कामगा-स्त्री., कोकिला (वै. नि.)
कामचारिणी-स्त्री-, सुगन्धलताविशेषः (वै. नि.)
कामचारी (इन्)-पु., कलविङ्कः (श. र)
कामजान-(नि)-पु., कोकिलः (त्रिका.)
कामतरु-पु., वन्दाकवृक्षः।
कामताल-पु., कोकिलः (त्रिका.)
कामदीपकरस-पु., वाजीकरणौषधविशेषः (रस. र.)
कामदूतरस-पु., वाजीकरणे हितः (रस. र.)
कामदूता-स्त्री., मनःशिला (वै. नि.)
कामदूति-(का)(ती)-स्त्री., मनःशिला पाटलावृक्षः (श. र) कोकिला। (का) नागदन्तीक्षुपः (प. मु.)
कामदेवघृत-न., रक्तपित्ते हितम् (रक्तपित्तचि.) (रस. र.)
कामना-स्त्री., वन्दाकः (वै. नि.)
कामनीडा-स्त्री., कस्तूरिका (वै. नि.)
कामपर्णिका (र्णी) स्त्री., आहुल्यक्षुपः (वै. नि.)
कामपा (फ) ल-पु., महाराजचूतः (रा. र. ११)
कामप्रियकरी-अश्वगन्धा (वै. नि.)
कामफला-स्त्री., कदलीवृक्षः (वै. नि.)
काममलोलुप (भ)-पु., सद्वैद्यः (वै. नि.)
कामयाना-स्त्री., गर्भिणी
कामराजमोदक-पु., बाजीकरणौषधम्
कामरूपी (इन्) पु., शूकरः
कामरूपोद्भवा-स्त्री., कृष्णकस्तूरी
कामलता-स्त्री., लताविशेषा। शिश्नम् (हे. च.)
कामलिका-स्त्री., कङ्गुधान्यम् (श. चि.)
कामली (इन्)-त्रि., कामलारोगी
कामवल्लभा-स्त्री., ज्योत्स्ना (रा व २१)
कामवृद्धि-पु., स्त्री., कामजा नाम महाक्षुपः
कामवृन्ता-स्त्री., पाटलावृक्षः (श. मा.)
कामसख-पु., वसन्तकालः (रा. व. २१)
कामाग्निसन्दीपनरस-पु., वृष्याधिकारे रसः (भेष.। रस. र.। प्रयोगा.। सा. कौ.)
कामाङ्कुश-पु., नखम्। शिश्नम् (त्रिका)
कामाङ्गनायकरस-पु., वाजीकरणौषधम् (रस. र.)
कामाची-स्त्री., लघुकाकमाची
कामान्ध-पु., कोकिलः (रा. व. १९)

कामान्धा--स्त्री., कस्तूरी (रा. व. १२)
कामायु--पु., गृध्रः (वै. नि.)
कामालिका--स्त्री., मद्यम् (वै. नि.)
कामालु--पु., रक्तकाञ्चनम् (श. च.)
कामाह्व--पु., राजाम्रः (भा.)
कामिक--पु., कारण्डवपक्षी (श. र.)
कामिनीदर्पघ्न--पु., ध्वजभङ्गे रसः (भेष. ध्वजभ.)
कामिनीपुष्प--पु., वृक्षविशेषः ।
कामिनीप्रिया--स्त्री., मद्यसामान्यम् (रा. व. १४)
कामिनीश--पु., शोभाञ्जनवृक्षः (श. च.)
कामीकजीव--पु., कामजवृक्षः (वै. नि.)
कामील-(ल)-पु., रामपूगः (त्रिका.)
कामुक--पु., अशोकवृक्षः । पुन्नागवृक्षः । माधवीलता (मे.) चटकः (रा. व. १९) चक्रवाकः । कपोतः (वै. नि) (त्रि.,) कामातुरः ।
कामुककान्ता--स्त्री., अतिमुक्तकलता (रा. व. १०)
कामुका(की)--स्त्री., रक्तमञ्जरी । अतिमुक्तकलता (च. सू. १५ अ.) बकः (त्रि.,) वृषस्यन्ती (अम.)
कामुद्रा--स्त्री., मुद्गपर्णी (रत्ना.)
काम्पिल्य--(ल्ल)-पु., न., गुण्डारोचनी नाम सुगन्धद्रव्यम् । गुणाः--कफपित्तरक्तदोषक्रमिगुल्मोदरव्रणप्रमेहानाहविषाश्मरीरोगघ्नः । रेचकः कटुरुष्णवीर्यश्च (भा. पू. १ भ.) म. कमिला, कपिला ।
काम्पिल्लिका--स्त्री., गुण्डारोचनिका (हा. रा.)
काम्पील--(क)-पु.,गुण्डारोचनी (श. र र. मा.)
काम्बुका--स्त्री., अश्वगन्धा (र. मा.)
काम्बोज--पु., तद्देशजघोटकः (ज. द.) श्वेतखदिरः । पुन्नागवृक्षः । कट्फलम् (मे. जत्रिकम्) वरुणवृक्षः। न., पद्मकाष्ठम् (वै. नि.)
काम्य--पु., असनवृक्षः (वै. नि.)
काम्यक--न., काष्ठविशेषः (वै. नि.)
काम्ल--त्रि., ईषदम्लम् ।
कायफल--न., कट्फलः । (वै. नि.)
कायमान--न., तृणकुटी (त्रिका.) देहपरिमाणम्
कायवाल--पु.; कृकलासः (वै. नि.)
कायसौख्य--न., शरीरसुखम्
कायस्थादिधूपन--न., शीतज्वरे हितम्। (भा. म. १ भ ज्वरचि.)
कायस्थाली--स्त्री., रक्तपाटलवृक्षः (वै. नि.)
कायस्थिका--स्त्री., काकोली (भा. पू. १ भ)

कायिक--त्रि., शारीरकः
कारज--पु., गजबालकः (वै. नि.)
कारञ्जसुधा--स्त्री., करञ्जचूर्णम् । गुणः--कारञ्जा तु रुचिप्रदा (वै. नि.)
कारणशरीर--न., सत्वप्रधाने अज्ञानम्
कारणा--स्त्री., गाढवेदना दुःखम् (अम.)
कारन्धमी (इन्)--त्रि., धातुपरीक्षकः (हारा.)
कारमिहिका--स्त्री., कर्पूरः (रा. व. १२)
कारव--पु., काकः (त्रिका.)
कारवारि--न., करकाजलम् । गुणाः--कारोदकं तु विशदं गुरु रूक्षं स्थिरं घनं । कफकृद्वातलं चातिशीतं पित्तविनाशकम् (वै. नि.)
कारव्यादि--पु., कषायभेदः । कषायोऽयं अग्निन्यासज्वरे हितः (भेष.)
कारस्कराटिका--स्त्री., कर्णजलौका (त्रि. का.)
कारा--स्त्री., पीडा । दुःखम् (हा. रा.)
कारायिका--स्त्री., सारसा । बलाका (जटा.)
कारिवेल्ल--पु., कठिल्लकवृक्षः (हे. च.)
कारी--स्त्री., स्वनामख्यातक्षुपः । कण्टकारी, आकर्षकारीति द्विधा (मः-- करीकार) गुणाः--कषाया मधुरा पित्तघ्नी दीपनी संग्राहिणी रुच्या गुरुः । कण्ठशोधनी (रा. व. ८.२५ पृ. ३५८) एतत्फलं तु तुवरं पट्वम्लं दोषघ्नं च । (वै. नि)
कारीरम्--न., करीरफलम् ।
कारुक--पु., कर्मरङ्गवृक्षः ।
कारुककर्म--न., सूपकारकर्म
कारुज--पु., हस्तिशिशुः । वामलूरः (मे) नागकेशरम् । फेनः । गैरिकम् (हे. च.)
कारुण्डिका(ण्डी)--स्त्री., जलौका (हारा. श. च.)
कारुण्यसागर--पु., ज्वरातिसाराधिकारे रसः (र. सा. सं.)
कारोत(त्त)र--पु., सुरामण्डः (अम.)
कार्कण--पु., वनकुक्कुटः (वै. नि.)
कार्ण--न., कर्णमलः (त्रि.,) कर्णसम्बन्धीयम् ।
कार्तिकशालि--पु., कार्तिकपक्वशालिधान्यभेदः ।
कार्तिकिक--पु., कार्तिकमासः (वै. नि.)
कार्पट--पु., जतुः (मे.)
कार्पासकी--स्त्री., कार्पासी (भा. पू. १ भ.)
कार्पासतैल--न., नाडीव्रणे हितम् । पाठः-- कार्पासमूलरजनीकल्कं दत्वा जले शृतं तैलं । पूरणमात्राच्चिरजं नाडीव्रणमाशु नाशयति (रस. र.)

कार्पासनासिका-स्त्री., तर्कः ।
कार्मरी-स्त्री., वंशरोचना (रा. व. ६)
कार्यद्वेष-पु., आलस्यम् (रा. व. २०)
कार्यपुट(ध्वनि)-पु., क्षपणकः (त्रि.,) उन्मत्तः । अनर्थकरः (हारा.)
काश्मरी-स्त्री., काश्मरीवृक्षः (अ. टी. भ.)
काश्मर्(र्ष्म)र्य-पु., गाम्भारीवृक्षः ।
कार्श्यहरलौह-पु., रसायनाधिकारे हितम् (र. सा. सं.)
कार्षापण-पु., न., कर्षपरिमाणम् (मे.)
कार्ष्ण-पु., कृष्णसारमृगः (न.,) कृष्णमृगचर्म (वै. नि)
कार्ष्णा-स्त्री., लघुशतावरी (वै. नि.)
कार्ष्णी-स्त्री., शतावरी (रा. व. ४ अम.)
कार्ष्यवन-न., शालवनम्
कार्ष्यु-पु., सर्जतरुः (अम.) कृष्णसारमृगः
कालक-पु., न., जलसर्पः (श. र.) जतुकम् (अम.) कालशाकः (भा. शाकवर्गः) यकृत् (हे. च.) नेत्रतारका । शस्यभेदः
कालकण्टक-पु., गिलोड्यफलवृक्षः (सु. सू. ४२)
कालकचु-स्त्री., कचुभेदः
कालकचूर्ण-न., मुखरोगे हितः (च. द.)
कालकण्टकरस-पु., वातव्याधौ रसः (र. चि. ९ अ)
कालकण्ठ (क) -पु., शीतशालः । मयूरः । खञ्जनः कलविङ्कः (मे.) जलकुक्कुटः । कासमर्दवृक्षः । अन्धकाकः (वै. नि.) (क) दात्यूहः (अम.)
कालकन्द-पु., महाकन्दः (रत्ना.)
कालकन्दक-पु., जलसर्पः (श. र.)
कालकन्या-स्त्री., जरा
कालकमुष्क-पु., कृष्णपुष्पघण्टापाटलिका (च. द. अर्शचि. क्षारविधाने)
कालकर्म (क्रिया) न., स्त्री., मृत्युः
कालकलाय-पु., कृष्णकलायः ।
कालकस्तूरी-स्त्री., कस्तूरीवृक्षविशेषः ।
कालकूटजोद्भव- पु., रालः (वै. नि.)
कालकृत् (त) पु., सूर्यः (त्रिका, शर.)
कालकेशी-स्त्री., नीली ।
कालकोठ-पु., पानशारु इति प्रसिद्धः कन्दशाकविशेषः (प. मु.)
कालक्लीतक-पु., नीलीवृक्षः ।
कालखञ्ज-(न)-न., यकृत् (हे. च)
कालखण्ड-न., यकृत् (रा. व. १८) यकृत्रोगभेदः (वै. नि.)
कालगन्ध-पु., सर्पविशेषः ।
कालग्रन्थि-पु., संवत्सरः (हा. रा.)
कालङ्कत-पु., सुवर्णमुखी (वै. नि.) कासमर्दः ।
कालज्ञ-पु., कुक्कुटः (रा. व. १९.४५८)
कालज्ञान-न., चिकित्साशास्त्रविशेषः येन कालो ज्ञायते रुग्विनिश्चयशास्त्रविशेषः शम्भुनाथकृतः ।
कालतिन्दुक-पु., कुपीलुः ।
कालतुण्ड-न., कृष्णागुरुः (वै. नि.)
कालत्रय-न., वर्तमानभूतभविष्याणि
कालदोला-स्त्री., नीलीवृक्षः (भा)
कालधर्म-(र्मन्)-पु., मृत्युः (अ. म)
कालपत्री-स्त्री., तालीशपत्रम्
कालपर्ण-पु., तगरवृक्षः (श. र)
कालपर्णिका (र्णी)-स्त्री., कृष्ण त्रिवृत् (भा. पू. ११ भ.)
कालपाशी-स्त्री., श्यामलता ।
कालपीलुक-पु., कुपीलुः (भा.)
कालपृष्ठ-पु., मृगविशेषः । कङ्कपक्षी (मेठचतुष्कम्)
कालपेषी-स्त्री., शामलता (रत्ना.)
कालप्रभात-न., शरदृतुः
कालप्रिया-स्त्री., अश्वगन्धा (रा. व. ४)
कालबाल-(लुक)-पु., कङ्कुष्ठः (प. मु.)
कालभण्डी-स्त्री., श्वेतगुञ्जा (वै. नि.)
कालभाण्डिका-स्त्री., मञ्जिष्ठा ।
कालभृत्-पु., सूर्यः ।
कालमान-(ल)(क)-पु., कृष्णपत्रक्षुद्रतुलसी (प. मु.) कृष्णमल्लिका । वर्बरिका इति लोके (सु. सू. ३७; भा. पू. १ भ.; च. चि. ३ अ. वा. सुरसादिः)
कालमारिष-पु., बृहत्पत्रतण्डुलीयशाकम् क्षुद्रमारिषः (भेष. च. द. अम्लपित्तचि. अभ्रशुद्धौ र. मा.)
कालमुख-पु., वानरः (रा. व. १९)
कालमेशिका-स्त्री., मञ्जिष्ठा (अ. टी. रा.)
कालवङ्क-पु., कालियालडा इति ख्यातः क्षुपः (रसेन्द्र चि. क्षुधावतीगुडौ)
कालवानर-पु., कृष्णमुखवानरः (रा. व. १९)
कालवाहन-पु., महिषः (वै. नि.)
कालविषाणिक-स्त्री., काकोलीक्षीरकाकोलीः (वा. उ.)
कालवीजक-पु., महानिम्बवृक्षः । काकतिन्दुकः (वै.नि.)
कालवृन्ताक-पु., पेटिका ।
कालवृन्ती-स्त्री., पाटलावृक्षः (रा. व. १०)
कालवेला-स्त्री., शनैश्चरवेला ।

कालसङ्कर्षा–स्त्री., नववर्षीयकन्या।
कालसर्प–पु., कृष्णसर्पः (त्रिका.)
कालसार–न., पीतचन्दनम् । कलंवक इति लोके। (भा. पू. १ भ.) पु., कृष्णसारमृगः कृष्णागुरुः तिन्दुकः (वै. नि.) हरितालकः।
कालस्कन्ध–पु., तिन्दुकवृक्षः गुणाः– कालस्कन्धश्च मधुरो बल्यो वृष्यो गुरुः स्मृतः । धातुवृद्धिकरः शीतः श्रमदाहकफापहः। पित्तशोथञ्च विस्फोटं पित्तञ्चैव विनाशयेत् (वै. नि.) विट्खदिरः। (रा. व. ८) जीवकद्रुमः तमालपत्रकवृक्षः (वै. नि.) काकतालः (मे.)
कालस्थाली–स्त्री., पाटलवृक्षः (भा पू १ भ)
कालहीन–पु., लोध्रवृक्षः ।
कालाग (गु) रु–न., कृष्णागुरुः (रा व १२)
कालाग्निभैरव–पु., ज्वरेरसः (भैष. ज्वरचि. रस. कौ.)
कालाग्निरस–पु., भगन्दरे रसः (रस. र.)
कालाग्निरुद्ररस–पु., कुष्ठाधिकारे रसः (रस. र. ज्वरचि.)
कालाजाजी–स्त्री., कृष्णजीरकम् । मङ्गरैला च (भा. म. १ आगन्तुज्वरचि.)
कालाण्डज–पु., कोकिलः
कालानुसारिणी–स्त्री., पिण्डितगरः । श्वेतशारिवा
कालान्तकरस–पु., कासाधिकारे रसः
कालान्तरविष–पु., न., मूषिकादिः। लूतादिः (हे. च.)
कालाप–पु., शिरःकेशः। सर्पफणा (धरणि)
कालाह्व–पु., काकतुण्डी, काकतिन्दुकः (वै. नि.)
कालि (ली) क–पु., जलकुक्कुटः । क्रौञ्चपक्षी (श. र.) (न.,) कृष्णचन्दनम्
कालिकाशाक–पु., कालशाकः (वै. नि.)
कालिकास्थि–न., नेत्रास्थिविशेषः। (वै. नि.)
कालिङ्कत–पु. कासमर्दवृक्षः। (प. मु.)
कालिङ्गिका–(ङ्गी)–स्त्री., त्रिवृत् (रा. व. ६) राजकर्कटी (मे गत्रिकम्)
कालिन्दीसू–पु., सूर्यः। (त्रिका.)
कालीक–पु., क्रौञ्चः (श. र.)
कालीची–स्त्री., यमविचारभूमिः (त्रिका.)
कालीतनय–पु., महिषः। (हे. च.)
कालीयका–स्त्री., दारुहरिद्रा। (भैष)
कालीयक्षोद–पु., कुङ्कुमम्
कालीयागुरु–न., कृष्णागुरु। कलम्बकटु इति लोके। (भा. उ. वाजी. च. चन्दनादितैले)
कालीरसा–स्त्री., कदलीवृक्षः (वै. नि.)
कालोड्य–न., कमलबीजम्
कालोल–पु., द्रोणकाकः । विषभेदः (मे.)
काल्प–(ल्य)–(क)–पु., गन्धशठी (प. मु.) व्याघ्रनखम् (वै. नि.) आमहरिद्रा (श. र.)
काल्य–न., प्रत्यूषः। (हे. च.)
काल्या–स्त्री., गर्भग्रहणप्राप्तकालायां रजःस्वला गौः। प्रतिवर्षप्रसवशीला गौः (हला.)
कावार–न., शैवालः। (हारा.)
कावारी–स्त्री., तृणादिच्छत्रम् (त्रिका)
कावृक–पु., कुक्कुटः । पीतमस्तकपक्षी
कावेर–न., कुङ्कुमम् (जटा)
कावेरी–स्त्री., पु., हरिद्रा (मे. रत्रिकम्) स्वनामप्रसिद्धा भारतवर्षीयदाक्षिणात्यनदी । एतज्जलं स्वादु श्रमघ्नं लघु दीपनं दद्रुकुष्ठघ्नं मेधाबुद्धिरुचिप्रदञ्च (रा.व१४)
काशनाशन–पु., कर्कटशृङ्गी (रत्ना.)
काशपुष्पक–न., स्थावरविषान्तर्गतकन्दविषम् (वाउ ३५ अ)
काशमर्द–पु., कासमर्दक्षुपः (अ. टी. रा)
काशा (शी)–स्त्री., काशतृणम् (अ. टी. भ)
काशाल्मलि–स्त्री., कूटशाल्मली (जटा)
काशि–धन्वन्तरिपिता सुहोत्रः
काशिकन्या–स्त्री., काशितनया
काशि(शी)काप्रिय–पु., दिवोदासः धन्वन्तरिः (श. र
काशिग्रह–पु., अश्वस्य दुष्टग्रहविशेषः। लक्षणं यथा— अकस्माद्यस्य लोमानि शीर्यन्ते यश्च लङ्घति। शूनपश्चिमपादस्य तस्य काशिग्रहं वदेत् (ज. द. ५७ अ)
काशिल–त्रि., काशतृणमयः। काशनिर्मितम्
काशी–त्रि., कासरोगी (राज.)
काशीशत्रितय–न., काशीशधातुः काशीशपुष्पम्, काशीशम् (भैष. प्लीहचि. महाद्रावके)
काशीशाद्यतैल–न., स्त्रीरोगे हितम् (च. द)
काशीसम्भूत–पु., पारदः (र. सा. सं. पार्वतीरसे)
काशूकार–पु., गुवाकवृक्षः (वै. नि)
काशेक्षुः–पु., काशः (भा. पू. १ भ)
काश्मीरजा–स्त्री., अतिविषा (मे.)
काश्मीरपुष्प–न., गाम्भारीकुसुमम् (सुचि. २५ अ.)
काश्मीरफल–न., गाम्भारीफलम् (च. द. रक्तपि. चि., शतावरीघृते)

काश्मीरा–स्त्री., कपीलद्राक्षा (रा. व. ११) अतिविषा (प. मु.) स्थलपद्मिनी (वै. नि.)

काश्य–पु., काशिराजः (न.,) मद्यम् (रा. व. १४)

काश्वरी–स्त्री., ह्रस्वगाम्भारीवृक्षः (द्विरूपकोषः भरतः)

काष्ठक–न., कृष्णागुरुः (वै. नि.) अगरुः काष्ठागुरुः (रा. व. १२)

काष्ठकीट–पु., घुणः (हे. च.)

काष्ठकु (कूटः) (टकः कुट्ट)–पु., पक्षिविशेषः (त्रिका.) गुणाः— तथा लघुर्वातहरः काष्ठकूटोऽग्निवर्धनः। वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्धनः। अश्मरीं हन्ति विशदो बलकृत् मांसलक्षणः (अत्रि. २१ अ.)

काष्ठतन्तु–पु., काष्ठकृमिः (हारा.)

काष्ठतक्षक–पु., काष्ठतन्तुः (श. र.)

काष्ठधात्रीफल–न., क्षुद्रामलकफलम्। गुणाः– कषायं कटु शीतलं रक्तपित्तघ्नञ्च (रा. व. ११)

काष्ठपुष्प–पु., केतकीवृक्षः (प. मु.)

काष्ठमल्लिका–स्त्री., स्वनामख्यातपुष्पवृक्षः।

काष्ठमार्जारिका–स्त्री., काष्ठबिडालिका (भैष.)

काष्ठलेखक–पु., घुणः (हारा.)

काष्ठवास्तुक–पु., वास्तुकशाकभेदः।

काष्ठविवर–न., तरुकोटरम् (श. चि.)

काष्ठशारिवा–स्त्री., उत्तरापथप्रसिद्धे शारिवाभेदः अनन्ता (मद. व. १)

काष्ठशालि–पु., रक्तशालिः (रा. व. १६)

काष्ठामलकी–स्त्री., काष्ठधात्री

काष्ठाशन–पु., घुणः

काष्ठील–पु., राजार्कः (रा. व. १०) कुलिशमत्स्यः (त्रिका.)

काष्ठीला (लिका)–स्त्री., राजार्कः (वै. नि.) कदलीवृक्षः (रा. व. १२)

काष्ठोदुम्बरिका–स्त्री., काकोदुम्बरिका

कासघ्नधूम–पु., पञ्चविधधूमपानान्यतमः धूमः। येन पीतेन कासो नश्यति, तस्योपकरणं बृहती कण्टकारीत्रिकटुकासमर्दहिङ्गिंगुत्वञ्जनःशिलाप्रभृतीनि कासहराणि द्रव्याणि, तैः कल्कीकृतैः धूम्रपानम् (सू. चि. ४०.४)

कासजित्–स्त्री., भार्गी (रा. व. ६)

कासनाशिका–स्त्री., अरुणत्रिवृत् (रा. व. ६) कर्कटशृङ्गी (प. मु.)

कासन्दीवटिका–स्त्री., कफघ्नौषधम्। वेशवारविशेषः। गुणाः—हृद्या रुच्याग्निजननी वातमलानुलोमनी वातश्लेष्मघ्नी च (राज.)

कासभञ्जन–पु., पटोलः (भा. पू. १ भ.)

कासमर्दकपत्र–न., कासमर्दकदलम्

कासमर्ददल–न., कासमर्दकदलम्

कासमर्दिका–स्त्री., कासमर्दः (वै. नि)

कासर–पु., महिषः (हारा.)

कासरोग–पु., रोगविशेषः

काससंहारभैरव–पु., कासाधिकारे उपयुक्तः (र. सा. सं.)

कासहा–पु., कण्टकारीकृतः पिप्पलीचूर्णसहितः कासहरक्वाथः। तन्नामकधूम्रपानम्। तत्र धूमनाडी १६ अङ्गुलिमिता। धूमद्रव्यं च क्षुद्रकोषणं भाव्यम् (भा.)

कासान्तकरस–पु., कासाधिकारे हितः (र. सा. सं.)

कासार–न., स्वनामख्यातपक्वान्नविशेषः (पु.,) सरोवरः (वै. नि.)

कासिका–स्त्री., कफः। वनमुद्गः (वै. नि.)

कासिमृत्तिका–स्त्री., सौराष्ट्रमृत्तिका (रा. व. १३)

कासीय–न., कांस्यम् (वै. नि.)

कासु(स्क)न्द–पु., कासमर्दः (भैष. कुष्ठ. चि. कन्दर्पसारतैले)

कासुम्भी–पु., कौसुम्भीशालिः (रा. व. १६)

कासूर–पु., महिषः (हला.)

कासू–स्त्री., विकलवाक्यम् (मे. सत्रिकम्) रोगः (हे. च.)

कासेक्षु–पु., ह्रस्वकासतृणम् (वै. नि.)

कासोली–स्त्री., अतिबला (वै. नि.)

कास्तीर–न., तीक्ष्णलौहम् (र. मा.)

काहलापुष्प–पु., श्वेतधुस्तूरवृक्षः (रा. व. १०)

काही–स्त्री., कुटजवृक्षः (रा. व. ९)

काक्ष–पु., न., अपाङ्गदर्शनम्।

काक्षी–स्त्री., गोपीचन्दनम्। सौराष्ट्रमृत्तिका (र. मा.) तुवरिका (हे. च.)

काक्षीरी–स्त्री., वंशलोचनाभेदः (रत्ना.)

काक्षीव–(क)–पु., शोभाञ्जनवृक्षः (अम., श. र.)

किंशा(सा)रु–पु., न., शस्यशूकम् (अम.) रोटकः। बाणः। कङ्कपक्षी (मे. रत्रिकम्)

किंशुकादिगण–पु., त्रिदोषहरद्रव्यसमूहः (र. सा. सं.)

किंशुलुक–पु., हस्तिकर्णपलाशः (श. र.)

किकि–पु., चाषः (श. मा.) नारिकेलवृक्षः (रा. व. ११)

किकि (की) दि (दी) (व) (वि)–पु., चाषः सुवर्णचातकः (भरत। श. मा) (अम.)

किकिदीधिति–पु., कुक्कुटः (हला.)
किकिर–पु., कोकिलः पक्षी । अश्वः (वै. नि.)
किकी (इन्) –पु., चाषः
किखि–पु., वानरः (स्त्री.,) लघुश्शृगालः (हे. च. त्रि. का)
किङ्किनि (नी)–(पु., स्त्री.,) विकङ्कतवृक्षः (रा. व. ९) (भैष. शिरोरोग चि. किङ्किनीतैले) आम्लद्राक्षा (वै. नि.)
किङ्किर–पु., विकङ्कतवृक्षः (रा. व. ९) कोकिलः घोटकः न., करिकुम्भ बृहत्कृष्ण मक्षिका (शब्दकल्प)
कङ्किरा–(री)–स्त्री., रक्तम् (सारस्वतः) विकङ्कत-वृक्षः
किङ्किराल (य)–पु., बर्बूरवृक्षः)
किङ्किरी–पु., विकङ्कतवृक्षः (जटा.)
किङ्किलास–पु., अशोकवृक्षः (प. मु.)
किञ्चन–पु., हस्तिकर्णपलाशः (श. र.) वस्तु (वै. नि.)
किञ्चित्–त्रि, चतुर्थांशः (वै. नि.)
किञ्चित्पाणि–पु., कर्षमितमानम्
किञ्चिदुष्ण–त्रि., ईषदुष्णम्
किञ्चिलिक–पु.,
किञ्चलिक–गण्डूपदः
किञ्चलुक–त्रिका.
किञ्जल–पु., पद्मकेसरम् (श. च.) किञ्जल्कमात्रम् ।
किञ्जवालुक–न. कङ्कुष्ठः । पार्वतीयमृत्तिकाविशेषः ।
किटि–(टी)–पु., वनशूकरः । (अम्) वाराहीकन्दः ।
किटिदंष्ट्रा–स्त्री., शूकरदंष्ट्रा (वै. नि.)
किटिमूलक–(लाभ)–पु., वाराहीकन्दः । शूकरकन्दः (वै. नि.)
किट्टवर्जित–न., शुक्रम् (हे. च.)
किट्टाल–पु., लौहगूथम् । ताम्रकलशः । (मे. लत्रिकन्) न., ताम्रम् (वै. नि.)
किट्टिभ–न., द्रवद्रव्यविशेषः ।
किणि–स्त्री., अपामार्गक्षुपः (श. र.)
किण्वमूलक–पु., बकुलवृक्षः । (वै. नि.)
किण्वी–पु., अश्वः ।
कितवराज–पु., धुस्तूरवृक्षः (वै. नि. २ भ) (तृष्णाचि.)
किनी–स्त्री., ह्रस्वबृहती ।
किन्तनु–पु., ऊर्णनाभिः (त्रिका.)
किन्दी (न्धी) (इन्)–पु., घोटकः (त्रिका.)

किम्भरा–स्त्री., नलीनामगन्धद्रव्यम्
कियाह–पु., शृगालः । रक्तवर्णाश्वः । ‘ पक्वतालनिभो वाजी कियाहः परिकीर्तितः । ’ (ज. द. ३ अ । हे. च.)
किर–पु., वराहः । (अम.)
किरटा–स्त्री., कुसुम्भबीजम् (वै. नि.)
किरमाल–पु., आरग्वधवृक्षः । (सु. चि. ९ अ)
किराटिक–स्त्री., सारिका
किरातकान्त–न., कोङ्कणप्रसिद्धे शबरचन्दनम् (रा. १२)
किराततिक्तादि–पु., वातपित्तज्वरे
किरातादि–
कषायविशेषः । ‘ किराततिक्तामृता द्राक्षामामलकीं शठीं । निष्क्वाथ्यं पित्तानिलजे क्वाथंतं सगुडं पिबेत् । अयं चतुर्भद्रकोऽपि उच्यते । (भा. म, १ अ.)
किरातादिचूर्ण–न., दुर्जलदोषजज्वरे हितम् (भा. म. १. भ. ज्वरचि.)
किरातिनी–स्त्री., जटामांसी (श. र.)
किरि–पु., शूकरः (रत्ना.) वाराहीकन्दः (वै. नि.)
किरीट–पु., कुसुम्भवृक्षः (वै. नि.)
किर्मी–स्त्री., पलाशवृक्षः (मे. मद्विकम्)
किर्मीर–(त्वक्)–पु., कर्वूरः । नागरङ्गवृक्षः (मे. त्रिका.)
किर्याणी–स्त्री., वनशूकरः
किलपादिका–स्त्री., क्षुद्रलज्जालुका (वै. नि.)
किलाटी (इन्) पु., वंशः । एरण्डवृक्षः (हा. रा.) स्त्री., क्षीरविकृतिः (हे. च.)
किलात–त्रि., वामनः । ह्रस्वः ।
किलाल–न., गोमूत्रम् (वै. नि.)
किलासघ्न–पु., कर्कोटकः (हे. च.)
किलासनाशन–पु., किलासघ्नः ।
किलि–व्य., कण्ठकूजितम्
किलिञ्ज–न., सूक्ष्मकाष्ठम् (जटा.)
किलिञ्जन–पु., गलः, मीनभेदः (वै. नि.)
किल्वी–पु., घोटकः (त्रिका.)
किशरा–स्त्री., कृशरा (द्विरूपकोष)
किशरोमा–पु., शूकशिम्बी (वै. नि.)
किशल(य)–पु., न., कोमलपल्लवम् (त्रिका.)
किशोर–पु., घोटकशिशुः (रत्ना.) तरुणावस्था । शिशुः । तैलपर्णी (मे. रत्रिकम्) सूर्यः ।

किष्कुपर्वा–पु., इक्षुः। वंशः। नलः (मे.)
किसर–न., सुगन्धद्रव्यविशेषः।
कीकट–(क)–पु., घोटकः (विश्व.) तद्देशजाश्वः।
कीकटी(इन्)–पु., वन्यवराहः (वै. नि.)
कीकश–(स)–., न., कृमिजातिः (मे.) अस्थिः (रा. व. १८)
कीकसमुख–(सास्य)–पु., पक्षी (हारा.)
कीकि–पु., चाषः (अ. टी.)
कीटगर्दभक–पु., सौम्यकीटविशेषः। तेन दष्टे श्लेष्मजन्यरोगा जायन्ते।
कीटज–न., ख्यातद्रव्यविशेषः।
कीटनामा–स्त्री., रक्तलज्जालुका (वै. नि.)
कीटपादिका(दी)–स्त्री., हंसपादीलता (रा. व. ५) रक्तलज्जालुका (रा. व. ५) रक्तलज्जालुका (वै. नि.)
कीटमणि–पु., पतङ्गम्। खद्योतः।
कीटमाता(री) स्त्री., हंसपादीलता (रा. व. ५) रक्तलज्जालुका (वै. नि.)
कीटमेष–पु., मृगचरा इति प्रसिद्धकीटः। अयं नदीतीरे सिकतामध्ये जायते।
कीटरिपु–(शत्रु)–(हारि)–(टारः)–पु., पु. न. विडङ्गः (वै. नि.) (संग्रहणीचि. कल्याणगुडे)
कीटारिरस–पु., कृमिघ्नमौषधम्।
कीटारिष्ट–न., अश्वस्य कीटवेधरोगः (ज. द. २५ अ)
कीडेर–पु., तण्डुलीयशाकम् (भा.)
कीतनीका–स्त्री., यष्टिमधु (वै. नि.)
कीन–न., मांसधातुः (वै. नि.)
कीनाश–पु., वानरविशेषः (अ. टी. स्वा.)
कीरक–पु., वृक्षभेदः। धरणिः।
कीरट–(टा)–पु. स्त्री., वङ्गधातुः (वै. नि.)
कीरतनुफल–स्त्री., तूलकवृक्षः (वै. नि.)
कीरनासा–स्त्री., शुकनासा (वै. नि.)
कीरमणि–पु., धूम्याटः (वै. नि.)
कीर्ति–स्त्री., यशम्। पङ्कः (विश्व.)
कीर्तिशेष–पु., मरणम् (जटा.)
कीलक–पु., कक्कोलः (वै. नि.)
कीलशायी–पु., कुक्कुरः (हे. च)
कीलसंस्पर्श–पु., तिन्दुकवृक्षः (श. च.)
कीश–पु., वानरः (हला.) पक्षी। (श. र) सूर्यः (वै. नि.)
कीशपर्ण–(र्णी)–पु., स्त्री., अपामार्गवृक्षः। (श. र. अ. म.)
कीशफल–न., कक्कोलः (वै. नि)

कु

कुक–पु., चक्रवाकपक्षी (वै. नि.)
कुकुभ–न., मद्यविशेषः। (श. च.)
कुक (कु) र–पु., ग्रन्थिपर्णीलता (त्रि.,) रोगादिना कुञ्चितहस्तः।
कुकाञ्चन–न., पित्तलम् (प. मु.)
कुकुट–पु., सितावरवृक्षः। शाल्मलीवृक्षः। (रा. व. ४)
कुकु (कू) टी–स्त्री., ऋषभकः। शाल्मलीवृक्षः (रा. व. ८)
कुकु (र) द्रु–पु., कुकुरद्रुमम् (वै. नि.)
कुकुन्दनी–स्त्री., ज्योतिष्मतीलता (वै. नि.)
कुकुन्दरमेचक–पु., गोरक्षतण्डुली (रस. र. स्तनरोगचि.)
कुकुभ–पु., कुक्कुभपक्षी (वै. नि.)
कुकुरजिह्वा–स्त्री., मत्स्यविशेषः
कुकुरुन्द–पु., कुक्कुरद्रुमम्। (वै. नि.)
कुकुवाक्–पु. कुकुभपक्षी (वै. नि.)
कुकूट–न., मयूरपिच्छम् (वै. नि.)
कुकूल (क)–न. पु. अपां बाष्पस्वेदः, गोशकृतादिचूर्णसन्ताप इत्यन्ये, अपूपपचनार्थं मृण्मयपात्रम् (अहसू. ६.४२ हेमाद्रिः)
कुकोल–न., कोलीवृक्षः। (श. च.)
कुकुटपादप–(पादी)–पु., देवसर्षपः, गुणाः– सरा कुक्कुटपाद्युक्ता मूले रक्ता च रूक्षदा। गन्धे चोग्रा सन्निपातकफवातनाशिनी (वै. नि.) कटूष्णः कफघ्नः कृमिदोषघ्नः रुच्यः मुखरोगघ्नश्च। (रा. व. ९)
कुक्कुटपुटभावना–स्त्री., मिलितपलद्वयरसेन भावनां दत्वा कुक्कुटपुटेन शोषणम्। (वैद्यकम्)
कुक्कुटमञ्जरी–स्त्री., चविका (रा. व. ९)
कुक्कुटमर्दका–(स्त्री.,) आरामशीतला (वै. नि.)
कुक्कुटमस्तक-न., चव्यम् (रा. व. ६) मरिचभेदः (वै. नि.)
कुक्कुटशिख–पु., कुसुम्भवृक्षः (श. च.)
कुक्कुटा–स्त्री., पीतझिण्टी (वै. नि.)
कुक्कुटाण्डसम–पु., तदाकारवर्णवार्ताकी (वै. नि.)
कुक्कुटाभ–(हि) पु., कुक्कुटसदृशवर्णचरणसर्पभेदः कुकुटाहिरिति लोके (हे. च.) (न) कुक्कुटडिम्बकपालः। व्रणोत्सादने हितम् (सु. सू. ३१ अ.)
कुक्कुटीमूल–न., शाल्मलीमूलम् (ज. द.)
कुक्कुटोरग–पु., गोणसर्पः

कुक्कुरद्र–पु., वृक्षविशेष; गुणाः– कटुत्वं तिक्तत्वं ज्वरशोणितकफघ्नत्वं (ज. द.) तन्मूलमार्द्रं मुखे धृतं मुखशोषहञ्च (भा.)

कुक्कुरमेञ्चुका–(ण्डुक) स्त्री., गोरक्षतण्डुली

कुक्कुरी–पु., कुक्कुरपत्नी (श. र.)

कुक्कुवाक–पु., सारङ्गमृगः (रा. व. १९)

कुक्ष–पु., कुक्षिः (उणा.)

कुक्षि–स्त्री., उदर (रत्ना.)

कुक्षिम्भरी– त्रि., स्वोदरपूरकः (अम.)

कुग्राम–पु., कुत्सितग्रामम्, धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः । पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ' ।

कुङ्कमरेणु–पु., स्त्री., कुङ्कमगुण्डकः

कुङ्कमशालि–पु., स्वनामख्यातशालिधान्यविशेषः । गुणाः— मधुरः शीतलः रक्तपित्तातिसारघ्नश्च । (रा. व. १९)

कुङ्कमा–स्त्री., शाल्मलिवृक्षः (वै. नि.)

कुङ्कमागुरुक– पीतरक्तं हरिचन्दनम् गुणाः– शीतस्तिक्तः पित्तश्रमापहः । शोषश्च दवथुश्चैव नाशयेदिति कीर्तितः । स्वर्गिभोग्यो मनुष्याणां दुर्लभः परिकीर्तितः (वै. नि.)

कुङ्कमाद्यतैल–न., नीलिकापिडकादौ हितम् । (च. द. रस. र.)

कुङ्गनी–स्त्री., महाज्योतिष्मतीलता (रा. व. ३)

कुचण्डिका (ण्डी) स्त्री., मूर्वा (श. च.)

कुचतटाग्र–न., चूचकम्

कुचमुख (चाग्र)–न., चूचकम् (अम.)

कुचाङ्गेरी–स्त्री., चुक्रम् (र. मा)

कुचि–पु., अष्टमुष्टिपरिमितमानम् (वै. नि.)

कुचिक–पु., मत्स्यविशेषः । एतद्दृष्टे गौर्म्रियते ।

कुचिकर्ण–पु., तन्नामककर्णरोगभेदः । तच्च वातादभ्यन्तरे शष्कुलौ सङ्कुचिता भवति (वा. उ. १७ अ)

कुचिल–न. कुचेलम् (वै. नि. २ भ. वा. व्या.) (समीरगजकेसरीरसे)

कुचुटक–पु., जलशाकविशेषः (वै. नि.)

कुचेलिका (ली)–स्त्री., पाठा (प. मु. रा. व. ९)

कुच्छ–न., कुमुदम् । श्वेतपद्मम्

कुच्छाया–न., शरीरम् (वै. नि.)

कुच्छुट–पु., बब्बूलवृक्षः (वै. नि.)

कुजि (ज्झ) श–पु., कुडिशमत्स्यः ।

कुज्झटि–(का)(टी)–स्त्री., कुज्झटिका (श. र.)

कुज्झिका (ज्झी) स्त्री., कुज्झटिका (श. र.)

कुञ्ज–पु., न., निकुञ्जः । हनुदेशः । हस्तिदन्तः (मे.जद्विकम्)

कुञ्जप्रिय–पु., जवा (पा) वृक्षः (वै. नि.)

कुञ्जरपादप–पु., कुन्दुरकवृक्षः (वै. नि.)

कुञ्जरपिप्पली–स्त्री., गजपिप्पली (वै. नि.)

कुञ्जरपुट–पु., गजपुटः (र. सा. स.)

कुञ्जरा(री)स्त्री., धातकीवृक्षः (र. मा.) पाटलवृक्षः (मे. रत्रिक.) (री) हस्तिनी (श. च.)

कुञ्जराराति पु., शरभः (हे. च.)

कुञ्जरालुक–न., आलुकविशेषः (श. च.)

कुञ्जराशन–पु., अश्वत्थवृक्षः (अम.)

कुञ्जरिका–स्त्री., सल्लकीवृक्षः (वै. नि.)

कुञ्जल–पु., लशुनभेदः (न.,) काञ्जिकम् ।

कुट–पु., न., कोटः । घटः (मे.) चित्रकवृक्षः (हे. च.)

कुटङ्क(क)–पु., गृहाच्छादनम्(क) (अ. टी.) कुटीरम् (अ. टी.)

कुटजक्षीर–न., रक्तातीसारे प्रशस्तम् (भा. म. १ भ. अतिसारचि.)

कुटजपुटपाक–पु., सन्निपातरक्तातिसारे हितः (भा. भ. १ भ. रक्तातिसारचि. सा. कौ. भैष.)

कुटजमल्ली–स्त्री., वृक्षविशेषः ।

कुटजलेह–पु., अर्शोरोगे हितः (च. द. अर्श. चि.)

कुटजसुधा–स्त्री., कुटजचूर्णम् । कौटजा शोषनाशिनी (वै. नि.)

कुटजादिक्वाथ–पु., रक्तातीसारे हितः (भा. म. १ भ. रक्तातीसारे भैष.)

कुटजाद्यघृत–न., अर्शोरोगे हितम् (च. द. अर्श. चि.)

कुटजावलेह–पु., अतीसारे हितः (च. द. अतिसार चि.)

कुटजाष्टक–न., अतीसारे औषधम् (च. द.)

कुटजाष्टकावलेह–पु., अतीसारे हितः (भा. म. १ भ.)

कुटनी–स्त्री., महाज्योतिष्मतीलता (मे.)

कुटम्बक–न.,सुगन्धरोहिषतृणम् (वै. नि.)

कुटरवाहिनी–स्त्री., श्वेतत्रिवृतम् (वै. नि.)

कुटरु–पु., पटगृहम् । कानात् (उणा.)

कुटल–न., पटलम् (हारा.)

कुटामोद–पु., गन्धमार्जाराण्डम् (वै. नि.)

कुटिचर–पु., जलशूकरः । (श. र.)

कुटि (ठि) ञ्जर–(पु.,) पत्रशाकविशेषः । वनवास्तुकः गुणाः—कुटिञ्जरः स्वादुपाकः क्षारी रूक्षणः

शीतलः । गुरुर्मलस्तम्भकरो दोषोत्पादनकारकः (वै. नि .)
कुटि (टी) र-न., क्षुद्रगृहम् (जटा.)
कुटिलपुष्पिका-स्त्री., तगरपादिकः । (प. मु.) स्पृक्का नामगन्धद्रव्यम् (रा. व. १२)
कुटीका-स्त्री., भूशयमृगः । (च. सू. ४ अ)
कुट्टल (क)-न., नीलोत्पलम् (रा. व. १०)
कुट्टार-न., सुरतम् (मे.)
कुट्टितमांस-न., मांसव्यञ्जनभेदः (श. चि.)
कुठ-पु., चित्रकक्षुपः (रा. व. ९) वृक्षः (अम.)
कुठर-पु., दण्डविष्कम्भः । (अम.)
कुठाकु-पु., पक्षिविशेषः (हिं. खुटक्बढ़ैया) (उणा. विश्व.)
कुठाटक-पु., कुठारः (जटा.)
कुठार-पु., कुठेरकवृक्षः (र. सा. स.) अस्त्रविशेषम्
कुठारकतैल-न., शारीरव्रणादौ तैलम् (रस. र.)
कुठारु-पु., कुठेरकवृक्षः । कोशः (मे.) वानरः
कुठि-पु., वृक्षः (उणा.)
कुठिक-पु., कुष्ठौषधम् (हारा.)
कुठिल्लक-पु., रक्तपुनर्नवा (वै. नि.)
कुठेरज-पु., श्वेततुलसी (श. र.)
कुठेरु-पु., चामरवातः (त्रि. का.)
कुडप-(व) पु., परिमाणविशेषः
कुडली-पु., काञ्चनारभेदः (मद. व. १)
कुडिश-पु. मत्स्यविशेषः; गुणाः- मधुरो वृष्यः कषायो दीपनः लघुः स्निग्धः वाते पथ्यः रोचनो बल्यः कोष्ठबन्धकरश्च (रा.)
कुड्य-न., विलेपनम् (मे)
कुड्यकीटक-पु., स्त्री., गृहगोधिका
कुड्यमत्सी (त्स्य) (श. र. । च. शा. ८ अ)
कुणक-पु., बालकः । सद्योजातशिशुः (श. चि.)
कुणपा (पी) स्त्री., विट्शारिका (हा. रा.)
कुणारी-स्त्री., कुष्ठरोगविहितभक्ष्यद्रव्यम् यवपर्पटीति ख्यातम् (सु. चि. १० अ) कोणाडिकेति कश्चित् पठति ।
कुणाल-पु., पक्षिविशेषः
कुण्ट-न., अर्जकः गुण्ठतृणम् (वै. नि.)
कुण्टक-त्रि., स्थूलम् (श. मा.)
कुण्टकुरण्ट-न., झिण्टी (वै. नि.)
कुण्डगोलक-न., काञ्जिकम् (हे. च.)
कुण्डङ्ग-(क)-पु., कुञ्जः (हे. च.)
कुण्डलपत्र-पु., दना इति ख्यातवृक्षः (वै. नि.)
कुण्डलिका-नी (स्त्री.,) जिलेबी इति ख्यातमिष्टान्नम् तन्निर्माणविधिः—गोधूमप्रस्थद्वितयस्य कृत्वा सूक्ष्माः कणाः प्रस्थमिताः सुनिस्तुषाः दुग्धेन क्लिन्नास्तु तथैव भाण्डे यावदम्लत्वमुपेयुरीषत् । उद्धृत्य दुग्धेन द्रवं सुघृष्य सच्छिद्रपात्रेण च श्रीफलस्य । धारां घृते कुण्डलिकाकृतिं सृजन् पचेदथोद्धृत्य सुशर्करायाः । पाके निमज्जितामाहुः सर्वे कुण्डलिकाभिधां । सा शुक्रला हृद्यवृष्या इंद्रियाणां सुतृप्तिदा । पुष्टिकान्तिकरी बल्या द्वितीयास्याकृतिर्मता (वै. नि) (गुडूच्यां रा. व. ३)
कुण्डलिनायक-पु., पिङ्गलसर्पः ।
कुण्डलीचालन-पु., सर्पिणीवृक्षः ।
कुण्डिका-स्त्री., कमण्डलुः (हे. च) पिठरम् (श, च)
कुण्डी-स्त्री., शक्रयूथिका (वै. नि.) (इन्) पु., अश्वः
कुण्डीर-पु., मनुष्यः (धरणी)
कुतक-पु., रसाञ्जनम् (प. मु.)
कुतप-.पु, न., दर्भविशेषः छागकम्बलम् (मे.) वृषः । अग्निः । सूर्यः (हे. च.) दिवसस्याष्टममुहूर्तः । (त्रि.) ईषदुष्णम्
कुतपसप्तक-न., कृष्णतिलः । रौप्यम् । दर्भः । ऊर्णावस्त्रम् (वै. नि.)
कुतु-प-पु., न., चर्मपात्रम् ।
कुतुम्बा(म्बिका)-स्त्री., द्रोणपुष्पीक्षुपः (रा. व. ६)
कुतुम्बुरु-न., कुत्सिततिन्दुकीफलम्
कुतूणक-पु., बालरोगविशेषः ।
कुत्सला-स्त्री., नीलीवृक्षः (श. च.)
कुत्सशिम्बि(कुत्सा)-स्त्री., शिम्बीभेदः (वै. नि.)
कुत्सितशाल्मली-स्त्री., कृष्णशाल्मली ।
कुथित-त्रि., पूतियुक्तः (सू. चि.)
कुद्दलि-पु., अश्मन्तकवृक्षः ।
कुदेह-(क)-पु., कुत्सितदेहः ।
कुदल-पु., गिरिकाञ्चनम्
कुद्दार(ल)-अश्मन्तकवृक्षः । कोविदारवृक्षयः (र. मा. रा. व. ९,१०) आरग्धवृक्षः (वै. नि.) कोद्रवधान्यम् (प. मु.)
कुद्रव-(वल)-पु., कोद्रवः (वै. नि.)
कुधर-पु., पर्वतः (रा. व. २)

कुनट-पु., पृथुशिम्बश्योनाकवृक्षः (रा. व. ९) पीतलोध्रः (वै. नि.)
कुनली (इन्)-पु., वकवृक्षः (त्रिका.)
कुनाल-पु., कोकिलः ।
कुनालिक-पु., कोकिलः ।
कुनाशक-पु., दुरालभा रक्तयवासः (अम.)
कुन्तलोशीर-न., ह्रीबेरम् (रा. व. १०)
कुन्ती-स्त्री., गुग्गुलवृक्षः (मे. तत्रिकं शल्लकीवृक्षः ।
कुन्दम-पु., मार्जारः (त्रिका.)
कुन्दरिका-स्त्री., सल्लकी (रा. व. ११)
कुन्दसाह्वा-कुन्दा-स्त्री. श्वेतयूथिका (वै. नि.)
कुन्दाल-पु., महारग्वधवृक्षः । (वै. नि.)
कुन्दिनी-स्त्री., पद्मसमूहः (त्रिका.)
कुन्दु-स्त्री., कुन्दुरुस्त्री कुन्दुरु नाम गन्धद्रव्यम् ! (रा.व. १२) (च. द.वातव्याधि एकादशशती प्रसारणीतैल) पु., मूषिकः (श. र.)
कुन्दुकुन्दुक-पु., कुन्दरुस्त्री (रा. व. १२.)
कुन्दुखोटी-स्त्री. कुन्दुरुस्त्री (भैष)
कुप-पु., भारद्वाजपक्षी
कुपथ्य-न., अस्वास्थ्यकरं पथ्यम् ।
कुपनस-पु., पनसवृक्षः । (प. मु.)
कुपाणि-त्रि., कुकरः वक्रहस्तः (हिं. टुण्डा.) (जटा.)
कुपिनी-स्त्री., खालुई इति गौडभाषाप्रसिद्धायां स्वल्पमत्स्यधान्यम् । (श. र.)
कुपिन्द-पु., वस्त्रनिर्माता (वै. नि.)
कुपि (पी) लु-पु., काकपीलुः । कारस्करवृक्षः । (रा. व. ९)
कुप्यधौत-न., रौप्यम् (रा. व. १३)
कुप्यलवण-न., लवणविशेषः (च. वि. ८)
कुप्यशाल-पु., धातुद्रव्यनिर्माणशाला
कुबाहुल-पु., उष्ट्रः (श. च)
कुबेरनेत्र-(राक्ष) पु., पाटलावृक्षः लताकरञ्जः (वै. नि.)
कुब्जका-स्त्री., कुब्जकवृक्षः गुल्लावः (रा. व. १० म. द)
कुब्जकिरात-पु., } कुब्जः
कुब्जवामन- }
कुब्जपुष्प-न., पीतझिण्टी (र. मा.)
कुब्जप्रसारणी तैल-न., वातव्याध्यधिकारे हितम् (च. द्.)
कुब्जा-स्त्री., वनचटका (वै. नि.)
कुभुक्त-न., कदर्यान्नम्

कुमरिच-पु., मरिचवृक्षविशेषः (हिं-लालमरिच) उतनोकोमरिच
कुमारकल्याणकघृत-न., बालरोगाधिकारे हितम् (च.द.)
कुमारभृत्या-स्त्री., गर्भिण्याः परिचर्या । बालतन्त्रम् (त्रिका.)
कुमारललिता-स्त्री., शिशुक्रीडा
कुमारवाही (इन्) पु., मयूरः (श. र.)
कुमारीकन्द-पु., मयूर्याः कन्दः (वै. नि. २ कामलाचि. नस्ये)
कुमुख-.पु, शूकरः
कुमुदक-पु., प्रपौण्डरीकः (वै. नि.)
कुमुदघ्नी-स्त्री., तन्नामकस्थावरविषम् यस्य क्षीरे विषं वर्तते (सु. क. २ अ)
कुमुदप्रिय-पु., कर्पूरः । चन्द्रः । वै. नि
कुमुदबान्धव- ,, ,,
कुमुदसुहृत्-,, ,, ,,
कुमुदरागा-स्त्री., धानकीवृक्षः (वै. नि.)
कुमुदवीज-न., कुमुद्वतीबीजम् । हिं-मेढवेरा गुणाः— स्वादु गुरु रूक्षं हिमं च । (भा.)
कुमुदाभिख्य-न., रुप्यम् (हे. च)
कुमुदिका-स्त्री., कुमुदिनी (अम्) कट्फलवृक्षः (भा.पू. १भ)
कुमुदिनीबीज-न., कुमुदबीजम् (वै. नि.)
कुमुदेश्वररस-पु., यक्ष्माधिकारे हितम् (र. सा. सं)
कुमुद्वतीबीज-न., कुमुदबीजम् । भवेत्कुमुद्वतीबीजं स्वादु रूक्षं हिमं गुरु । (वैद्यकम्)
कुमुद्वान्-त्रि., कुमुदविशिष्टः ।
कुम्प-पु., बाहुकण्ठः (जटा.)
कुम्भकरेचना-स्त्री., जेपालवृक्षः । (वै. नि.)
कुम्भकार-पु., कुक्कुभपक्षी (हे. च.)
कुम्भकारकुक्कुट-पु., क्षुद्रकुक्कुटविशेषः ।
कुम्भकालुक-न., घोलः (वै. नि.)
कुम्भज-पु., वकवृक्षः (प. मु.)
कुम्बडिका-स्त्री., कूष्माण्डशालिः । (रा. व. १६)
कुम्भपर्णी-स्त्री., कूष्माण्डीलता
कुम्भपुटा-स्त्री., श्वेतत्रिवृत् (वै. नि.)
कुम्भपुष्पी-स्त्री., रक्तपाटलावृक्षः (वै. नि.)
कुम्भरेता-पु., अग्निः ।
कुम्भला-स्त्री., मुण्डिरी (र. मा.)
कुम्भवारुणी-स्त्री., मुण्डिरीभेदः (प. मु.)
कुम्भशालि-पु., स्वनामख्यातशालिधान्यविशेषः । गुणाः- मधुरा, स्निग्धा, वातपित्तघ्नी च (रा. व. १९)

कुम्भसन्धि-पु., करिकुम्भद्वयमध्यभागः (त्रिका.)
कुम्भा-स्त्री., उखा कट्फलवृक्षः । पृश्निपर्णी । पाटलावृक्षः (मे.) द्रोणपुष्पी (वै. नि.) श्वेतत्रिवृत् । तुम्बी (वै. नि.)
कुम्भाख्या-स्त्री., रक्तपाटला ।
कुम्भाट-.पु, कुम्भाडुया इति ख्यातः वृक्षः (रत्ना.)
कुम्भारी (द्रीं)(द्रीं)-स्त्री., कूष्माण्डी (वै. नि.)
कुम्भालाबु-स्त्री., महादुग्धालाबुः (वै. नि.)
कुम्भिकाद्यतैल-न., नाडीव्रणाधिकारे हितम् (रस.र.)
कुम्भितित्तिर-पु., तित्तिरपक्षिभेदः (वै. नि.)
कुम्भिपाकी-स्त्री., कट्फलवृक्षः (भा.)
कुम्भिल-पु., शालमत्स्यः (मे. लत्रिकम्)
कुम्भीपाक-पु., सन्निपातज्वरभेदः । घोणाविवरक्षरद्बहु शोणासितलोहितं सान्द्रम् । विलुठन्मस्तकमभितः कुम्भीपाकेन पीडितं विद्यात् (भा. म. १ भ.)
कुम्भीरमक्षिका-स्त्री., मक्षिकाविशेषः । (हा. रा.)
कुम्भीरवल्क-पु., कायफलवृक्षः । (वै. नि.)
कुम्भीवृक्षफल-न., कायफलम् (वै. नि.)
कुम्भोद्भवतरु-पु., अगस्तिवृक्षः । (भा. म. १ भ.) (चित्तविभ्रमज्वरचि.)
कुम्भोलु-(लूक)-पु., पेचकभेदः ।
कुम्भोलूखलक-पु., गुग्गुलुः । (वै. नि.)
कुयव-पु,, कुत्सित यवः ।
कुरका-स्त्री., सल्लकीवृक्षः (रा. व. ११)
कुरङ्क (ङ्कु) र-पु., सारसपक्षी (हे. च.) (हारा.) क्रौञ्चपक्षी (वै. नि.)
कुरङ्गम-पु., हरिणविशेषः । (त्रिका.)
कुरङ्गमांस-न., मृगविशेषस्य मांसम् एतन्मांसं रक्तपित्ते हितम् । तथा कफघ्नं मधुरं पित्तघ्नं मांसवर्धकं च। (सि. यो. रक्तपित्त) (चि. खण्डकाद्यघृते)
कुरङ्गी-स्त्री., कुरङ्गपत्नी
कुरचिल्ल-पु., कर्कटः (हे. च.)
कुरण्टमूल-न., पीतपुष्पझिण्टीमूलम् (भा. म. ४ अ योनिरोगचि.)
कुरण्टी-स्त्री., सिंहपिप्पली (वै. नि.)
कुरण्ड-पु., मुष्कवृद्धिरोगः (हे. च. । मा.) अक्षोटवृक्षः (वै. नि.) गुर्जरदेशख्यातं साकुरण्डवृक्षः । रा. व. ६)
कुरण्डक-पु., मदनवृक्षः । श्वेतमदनः । (वै. नि.) कुरण्टक वृक्षः । (अ. टी.) (च. द. माषतैले)
कुरण्ड(ण्डि)का-स्त्री., वृक्षविशेषः । गुणाः- सरा रुच्या गुर्वी चाग्निप्रदीपनी । नाशिनी कफवातानां वैद्यैस्तु परिकीर्तिता । बृहत्कुरण्डिका शीता .पाके माध्वी कटुः स्मृता । तिक्ता क्षारा च रूक्षा च सरा वृष्या जडा मता । वातला पित्तला बस्तौ वातकारी कफापहा । रक्तदोषं मूत्रकृच्छ्रं नाशयेदिति कीर्तिता (वै. नि.)
कुररव-पु., पारावतः (वै. नि.)
कुरल-पु., उत्क्रोशः (हला.) चूर्णकुन्तले (धरणी)
कुरस-पु., आसवम् । मद्यविशेषम् (हारा.) कुत्सितरसः त्रि., कुरसयुक्तः ।
कुरसा-स्त्री., गोजिह्वालता (श. च.)
कुराल-पु., कुलाहघोटकः । ईषत्पाण्डुकृष्णजङ्घघोटकः (हे. च.)
कुराह- ,, ,, ,, ,,
कुरीर-न., मैथुनम् (उणा.)
कुरुकन्दक-न., मूलकम् (श. मा.)
कुरुचिल्ल-पु., कर्कटः (वै. नि.)
कुरुटी(इन्)-पु., अश्वः ।
कुरुण्टका-स्त्री., पीतझिण्टी (च. द. अश्मरीचि.)
कुरुनाश-पु., उष्ट्रः (वै. नि.) पीतझिण्टी (सु. सू. ३८ अ.)
कुरुम्ब-न., पु., कुलपालकः । नागरङ्गविशेषः (श. च.)
कुरुम्बा(म्बिका)-स्त्री., द्रोणपुष्पी (रा. व. ५)
कुरुम्बी-स्त्री., सैंहलीवृक्षः (रा. व. ५)
कुरुरी-पु., } कुररपक्षी । भालस्थ-
कुरुल-पु., } चूर्णकुन्तल (हे. च) (वै. नि)
कुरुविल्व-(ल्ल)(क)—पु., नागरमुस्ता (ज.द.१२ अ.) पद्मरागमणिः (त्रिका.) वनकुलत्थः । (रत्ना.)
कुरुविस्त—पु., सुवर्णपलम् (अ. म.)
कुरुप्य—न., रङ्गम् (रा. व. १२)
कुर्कुट—पु., कुक्कुटः ।
कुर्कुर—पु., ग्राम्यमृगः । (अ. टी. रा.)
कुर्चिका—स्त्री., सूची । (त्रिका.)
कुर्णक—न., पटोललता । (श. चि.)
कुर्णज—पु., कुलिञ्जनवृक्षः । गन्धमूलम् (रा. व. ६)
कुर्पर-पु., कफोणिः (हे. च.)
कुर्पास—(क)—पु., स्त्रीणां स्तनाच्छादनवस्त्रम् (अम.)
कुल—न., बदरम् । देहः । कृष्णाञ्जनम् (त्रिका.)
कुलका—स्त्री., पटोललतिका (भैष. अम्लपित्त. चि० क्षुधावतीगुडौ) मनःशिला कन्दर्पसारतैलम्

कुलकृत्–पु., अकर्करः (वै. नि. जिह्वक. ज्वर. चि)
कुलक्षया–स्त्री., कर्पूरशठी (वै. नि.) कपिकच्छुः (श. च.)
कुलङ्ग–पु., कृष्णसर्पविशेषः (वै. नि.)
कुलङ्गी–स्त्री., मेषशृङ्गी (वै. नि.)
कुलटी–स्त्री., मनःशिला (र. मा.)
कुलतृण–न., दमनकः (प. मु.)
कुलत्थगुड–पु., हिक्काश्वासाधिकारे हितः (र. स. र.)
कुलत्थषट्पलघृत–न., हिक्काश्वासाधिकारे हितम् (रस. र.)
कुलत्थसूप–पु., भृष्टकुलत्थसिद्धयूषः गुणाः– कुलत्थसूपो वातघ्नः कटुः पाके कषायकः। कफाविरोधी शुक्राश्मकरोष्मश्वासकासनुत् । शुक्राश्मरीहरः पित्तकारकः कथितो नृभिः (वै. नि.)
कुलत्था–स्त्री., कुलत्थाञ्जनम् (रा. व. १३) वनकुलत्थिका (म. रानकुळीथ) गुणाः–कटुः तिक्ता अर्शःशूलघ्नी विबन्धाध्मानघ्नी चक्षुष्या व्रणरोपणी च (रा. व. ५)
कुलत्थाञ्जन–न., स्वनामख्याताञ्जनविशेषम् (हिं–कालासुर्मा खापरिआ) गुणाः– कुलत्थिका तु चक्षुष्या कषाया कटुका हिमा। विषविस्फोटकण्डूर्तिव्रणदोषनिबर्हिणी (रा. व. १३)
कुलत्थादिलेप–पु., कर्णमूलशोथे हितो लेपः। कुलत्थः कट्फलं शुण्ठी कृष्णजीरकञ्च समभागं जलेन पेषयित्वा ईषदुष्णो लेपः (भा. म. १. भ. ज्वरचि.)
कुलत्थान्न–न., तत्कृतभक्तम्, गुणाः–कुलत्थान्नन्तु मधुरं तुवरं रूक्षमुष्णकं। लघु तृप्तिकरं पाके कटुकञ्चाग्निदीपनम्। कफवातकृमिश्वासनाशनं परिकीर्तितम् (वै. नि.)
कुलनाश–पु., उष्ट्रः (हे. च.)
कुलपालक–न., कुरुम्बम् (श. च.)
कुलभृत्या–स्त्री., गर्भिणीपर्युपासना (जटा.)
कुलयी–स्त्री., वृक्षविशेषः। गुणाः—
कुली–शीतला स्वादुः वातकृत् गुरुश्च। 'कुलयी शीतला स्वादुः वातला कफकृद्गुरुः' (वै. नि.)
कुलवधूरस–पु., सन्निपातज्वरे हितम् (रसा. सं.) पारदशीषकताम्रमनःशिलातुत्थकानि द्रव्याणि। इन्द्रवारुणीरसेन चणकाभा वटी कार्या (वै. रत्नावली)
कुलराह–(क)–पु., सेराहापरनामा पीयूषवर्णाश्वः। 'कुलराहस्तु सेराहः सुरराहकः' (ज. द. ३ अ.)
कुलर्क–पु., तालमर्दनः। (हारा.)
कुलसौरभ–न., मरुबकवृक्षः। (हिं.–मरुआ) (श. मा.)
कुलहण्ट–(ण्डक)–पु., जलावर्तः (हारा.)
कुलहला–स्त्री., गोरक्षमुण्डीक्षुपः। (वै. नि.)
कुला–स्त्री., मनःशिला (वै. नि.) शूकशिम्बी
कुलाक्षिका(क्षता)–स्त्री., शून्या।
कुलाट–पु., क्षुद्रमत्स्यविशेषः। (श. मा.)
कुलाय–पु., पक्षिनीडम्। स्थानमात्रम् (मे.) (न.) शरीरम्।
कुलायस्थ–पु., पक्षी (श. च.)
कुलायिका–स्त्री., पक्षिशाला (त्रिका)
कुलासक–पु., दुरालभा (प. मु.)
कुलाह–(क)–पु., ईषत्पीतवर्णकृष्णजानुघोटकः (हे. च.) ईषत्पीतः कुलाहस्तु यो भवेत्कृष्णजानुकः (ज. द. ३ अ.) रक्तकोकिलाक्षः। गुणाः— आमवातघ्नः रक्तरोगघ्नश्च (रा.) कृकलासः (श. र.)
कुलि–(ली)–चविका (रत्ना.) कण्टकारी (मे.) पु., काञ्चनारभेदः (म. द. व. १) हस्तः (त्रिका.) चटकः (वै. नि.)
कुलिक–पु., कण्टकपालीवृक्षः (भैष.) अश्वकर्णशालः (रत्ना.)
कुलिकच्छ–पु., नन्दीवृक्षः (प. मु.)
कुलिका–स्त्री., मेषशृङ्गी।
कुलिङ्गा(ङ्गी)–स्त्री., कुलिङ्गपक्षिस्त्री, कर्कटशृङ्गीवृक्षः (प. मु. च. सू. ४ अ.)
कुलित्था–स्त्री., रक्तकुलत्थः (वै. नि.)
कुलित्थिका–स्त्री., वनकुलत्थः। त्रिवृता। मसूरिकादेवी (वै. नि.)
कुलिशतरु–पु., अश्वकर्णशालतरु (रा. व. ९)
कुलिशद्रुम–पु., स्नुहीवृक्षः (वै. नि.) हिं.—महूर.
कुलिशमत्स्य–पु., कुडिशमत्स्यः (रा.)
कुलीनक–पु., वनमुद्गम्। कर्कटः (प. मु.)
कुलीनस–न., जलम् (हे. च.)
कुलीयक–न., नेत्रसन्धिः (वै. नि.)
कुलीरविषाणिका(णी)–स्त्री., कर्कटशृङ्गी (भा. पू. १ भ.)
कुलीरात्–पु., कर्कटशिशुः (त्रिका.)
कुलुक–न., जिह्वामलः (..

कुलकगुञ्जा–स्त्री., उल्काग्निः (हारा.)
कुलूल–न., तुषानलः (मे.)
कुलोत्कट–पु., कुलीनघोटकः (श. च.)
कुलोत्थिका–स्त्री., कुलत्थः (वै. नि.)
कुल्फ–पु., कुल्फः । रोगः (उणा.)
कुल्मास–न., पु., कुल्माषः ।
कुल्य–न., अस्थि । द्रोणाष्टकपरिमाणम् । आमिषम् । कीकसः (मे.)
कुल्वक–न., जिह्वामलः (वै. नि.)
कुव–न., वारिजपुष्पमात्रम् । पद्मम् (हे. च.)
कुवकालुका–स्त्री., घोलीशाकम् (रा. व. ६)
कुवङ्ग–न., शीषकम् (रा. व. १३)
कुवञ्जक–न., वैक्रान्तमणिः (रा. व. १३)
कुवर–पु., तुवररसः (अ. टी)(च. सू. ४ अ.)
कुवलकी–स्त्री., शल्लकीवृक्षः (वै. नि.)
कुवलकुण–पु., कोलिफलकालः ।
कुवला–स्त्री., मुक्ताविशेषा ।
कुवली–स्त्री., कोलिवृक्षः (हे. च.)
कुविड–न., विड्लवणम् (रा. व. २३)
कुवृत्तिकृत्–पु., पूतिका करञ्जभेदः (श. च)
कुवेणी–स्त्री., मत्स्यधानिका (अ. म.)
कुवेल–न., कुवलयः (हे. च.)
कुवैद्य–पु., कुत्सितवैद्यः ।
कुशनामा–पु., उष्ट्रः (हे. च.)
कुशप–पु., पानपात्रविशेषः (उणा.)
कुशपुष्प–न., ग्रन्थिपर्णी (प. मु.)
कुशमुत्तोली–स्त्री., कुशमयी मुटिका कुशानां रचनाविशेषो मुत्तोलीत्युच्यते (वा. क. १ अ)
कुशमूल–न., दर्भमूलम् । गुणाः– हिमं रुच्यं मधुरं पित्तघ्नं रक्तज्वरतृष्णाश्वासकामलाहृच्च (रा. व. ८)
कुशरीर–पु., महाशालवृक्षः (वै. नि.) (त्रि.) कुत्सितशरीरम्
कुशल–त्रि., निपुणः (पु.,) कुक्कुरः (हे. च.) महाजलरेतस् । मत्स्यभेदः (वै. नि.) (न.,) पर्याप्तम् (अम.)
कुशली–त्रि., अश्मन्तकवृक्षः क्षुद्राम्लिका (भा. पू. १ भ. (शाकवर्ग) कुमारी (वै. नि.)
कुशस्त्र–न., कुत्सितास्त्रम्
कुशाक्ष–पु., वानरः (श. मा.)
कुशादिशालिपर्ण्य–न., तृणपञ्चकमूलम् विदारिगन्धादिगणे च (सि. यो. दाहचि.)
कुशाद्यघृत–न., अश्मर्यधिकारे हितम् (च. द. अश्मरीचि.)
कुशाद्यतैल (घृत)–न., दाहाधिकारे हितम् (च. द. दाहचि. रस. र.)
कुशाल्मली–(ली)–पु., स्त्री., रक्तरोहितकः । रोहिततकवृक्षः
कुशावलेह–पु., प्रमेहाधिकारे औषधविशेषः (च. द.)
कुशिंशपा–स्त्री., कपिलवर्णशिंशपा (रा. व. ९)
कुशि (षि) **त**–त्रि., जलमिश्रितम् (उणा.)
कुशिम्बि–(म्बी) पु., स्त्री., शिम्बीविशेषः, गुणाः– ज्ञेया विपाके मधुरा रसे च बलप्रदा । पित्तनिबर्हणा च (वैद्यकं)
कुशी–पु., फालः लौहविकारः (मे.)
कुशीद–न., फालरक्तचन्दनमुण्डमालातंत्रम्
कुशीपु–पु., अन्नम् (वै. नि.)
कुशूल–पु., तुषाग्निः (जटा) अन्नकोष्ठम्, धान्यकोष्ठम् (हला.)
कुशेशय–पु., न., पद्मम् (प. मु) कर्णिकारः (श. च.) सारसपक्षी (अम.)
कुषक–पु., बिभीतकवृक्षः (वै. नि.)
कुषाकु–पु., वानरः । अग्निः । (विश्वः) । अर्कः । (मे.)
कुष्ठकण्टक–पु., खदिरवृक्षः (वै. नि.)
कुष्ठकालानलरस–पु., कुष्ठे हितः (र. चि. ८ अ.)
कुष्ठगन्धा (**न्धिनी**)–स्त्री., अश्वगन्धा (भा. पू. १ भ.)
कुष्ठगन्धि–न., एलवालुकम् (अम.)
कुष्ठदलनरस–पु., कुष्ठाधिकारे रसः । (रस. र.)
कुष्ठनोदन–पु., रक्तखदिरवृक्षः (वै. नि)
कुष्ठवैरी (**इन्**)–पु., वृक्षविशेषः । चालमोगरा इति भाषा । गुणाः— कुष्ठवैरी शैलरोही महागदमहीरुहः । वैवस्वतद्रुमः स स्याद्बलकृत् च रसायनः । पामाविचर्चिकाकंडूसिध्मदद्रुविपादिकाः । हन्त्यामवातं वातामं कुष्ठानि च विशेषतः (अत्रि)
कुष्ठशैलेन्द्रवज्ररस–पु., कुष्ठाधिकारे रसः । (रस. र.)
कुष्ठहन्त्री–स्त्री., बाकुची (रा. व. ४)
कुष्ठहरतालेश्वर–पु., कुष्ठाधिकारे रसः । (र. सा. सं.)
कुष्ठहा–पु., पटोलवृक्षः (भा. पू. १ भ. शाकवर्ग)
कुष्ठहृत्–स्त्री., खदिरवृक्षः (त्रिका.)
कुष्ठाद्युद्वर्तन–न., कुष्ठरोगे उद्धर्षणम् (च. द.)
कुष्ठान्तकरस–पु., कुष्ठाधिकारे रसः (रस. र.)

कुष्ठिक-न., अश्वस्य किणाधोमध्यभागः । 'किणं तत्रैव मध्यस्थमधोभागे च कुष्ठिकम् ।' (ज. द. २ अ.)

कुष्णीष-पु., सरीसृपज्वरः (गज. वै.)

कुष्मल-न., छेदनम् (उणा.)

कुसिम्बी-स्त्री., रक्तशिम्बीलता (रा. व. १६)

कुसुमफल-न., जातीफलम् । (वै. नि.)

कुसुममध्य-न., भव्यफलम् । (श. च.)

कुसुमवती-स्त्री., रजःस्वला

कुसुमसार-पु., मधु । 'घृतकुसुमसारलीढः (च. द. यक्ष्मचि. गर्भचि.)

कुसुमा-स्त्री., मालीपुष्पवृक्षः । रक्तपाटला । जातीपुष्पवृक्षः । रक्तपाटला । (रत्ना.)

कुसुमाकर-पु., वसन्तसमयः ।

कुसुमात्मक-न., कुङ्कुमम् (हारा.) पु., केशः (वै. नि.)

कुसुमाधिप-पु., चम्पकवृक्षः (श. र.)

कुसुमाधिराज-(राट्)-पु., महानागकेशरचम्पकवृक्षः (त्रि. का.)

कुसुमावली-स्त्री., वृन्दकृतसिद्धयोगटीका

कुसुमोदर-न., भव्यफलम् (प. मु.)

कुसुम्भपत्र-न., कुसुम्भशाकम्

कुसुम्भला-स्त्री., दारुहरिद्रा (वै. नि.,)

कुस्वप्न-पु., कुत्सितस्वप्नम्

कुहकस्वन- / **कुहकस्वर**- } पु., वनकुक्कुटः (हे. च.)

कुहन-त्री., ईर्ष्यालुः (हारा.) पु., मूषिकः सर्पः (हे. च.) (न.,) मृद्भाण्डविशेषः काचपात्रम् (मे.)

कुहली-पु., सज्जितताम्बूलः पूगपुष्पिका (त्रिका.)

कुहा-स्त्री., गोपघोण्टा (वै. नि.) कुटुकी (श. च.) बदरवृक्षः (भा.)

कुहुक-न., ग्रन्थिपर्णी (श. चि.)

कुहूक-(कण्ठ)-(मुख)-(ख)- पु. कोकिलः (त्रि. का.) स्त्री., कोकिला (वै. नि.)

कुहेडिका (डी) लिका-स्त्री., कुब्झका (हारा. त्रिका)

कू

कूकुर-कुकुरः (वै. नि)

कूच-पु., कुचः । स्तनम् (उणा.)

कूची-स्त्री., तक्रकूर्चिका दुग्धकूर्चिका (वै. नि.)

कूटक-पु., न., मुरानाम गन्धद्रव्यम्

कूटगृह-न., जेन्ताकगृहम् (च. शा. ३ अ.)

कूटज-पु.,कुटजवृक्षः (भा. पू. १ भ.) श्वेतकुटजः (वै. नि.)

कूटजीव-पु., पुत्रजीववृक्षः (रा. व. ९)

कूटतूला-स्त्री., कुत्सिततूला ।

कूटपाक-पु., सन्निपातः । पैत्तिकज्वरः (वै. नि)

कूटपालक-पु., पित्तज्वरः । कुलालस्य पवनः (हाराः)

कूटप (पू) र्व-पु., हस्तिनस्त्रिदोषज्वरः (त्रिका.)

कूटमान-न., कुत्सितमानम् ।

कूटलमस्तक-पु., चविका । (वै. नि.)

कूटार्थसिद्धिकृत्-पु., पुत्रञ्जीववृक्षः

कूणि-त्रि., रोगादिना कुञ्चितकरः । (अ. टी)

कूणिका-स्त्री., पशुशृङ्गम् (हे. च.)

कूथन-न., कुन्थनम् (वै. नि.)

कूद्दाल-पु., कुद्दालवृक्षः । (अ. टी. र.)

कूपकच्छप-पु., कूपस्थकच्छपः ।

कूपज-पु., केशः, लोमन्

कूपजल-न., कूपसलिलम् । निर्झरजलम् ।

कूपदर्दुर-पु., कूपस्थभेकः ।

कूपमण्डूक-पु., ,,

कूपाङ्क(ङ्ग)-पु., रोमाञ्चः (श. र.)

कूपिका-स्त्री., नदीजलगतोपलम् (मे.)

कूपी-स्त्री. पात्रविशेषः, कपिकच्छुः (वै. नि.)

कूपोदक-न., कूपजलम् ।

कूप्य-न., रौप्यम् । माणिक्यम् ।

कूभ(म)-न., अल्पसरोवरः (जटा.)

कूर-पु., अन्नम् । भक्तम् (रा. व. २०)

कूर्चपर्णी-स्त्री., मेषशृङ्गी (वै. नि.)

कूर्चभाक्-न., भूर्जपत्रम् (वै. नि.)

कूर्चमर्म-न., तन्नामकस्नायुमर्मषट्कम् ।

कूर्चल-पु., प्राणिनां पुनर्दन्तोद्भेदकालः ।

कूर्चिकापिण्ड-पु., किलाटः (र. मा.)

कूर्दन-न., शिशुक्रिडा (अम.)

कूर्प-न., भ्रुवोर्मध्यभागः ।

कूर्पास-(क)-पु., स्त्री., अर्धतोलकः । चोलः । स्त्रीणां कञ्चुलिका (हे. च.)

कूर्मपृष्ठ-पु., अम्लानवृक्षः (श. च.) न., कूर्मपृष्ठदेशः ।

कूर्मपृष्ठक–न., शरावः (श. च.)
हिं.—सकोरा.

कूर्मपृष्ठास्थि–न., कच्छपास्थिः एतत्स्वेदः वातव्याधिहरः ।

कूल–न., तीरम् । तटम् (अम.) जलाशयः ।

कूलक–न., पु., पटोलपत्रम् (सि. यो. ज्वरचि.)
पटोलः (भा., पू. १ भ. शाकवर्ग)

कूला–स्त्री., ह्रस्व दन्तीवृक्षः (वै. नि.)

कूलाल–न., एलाकरवीरम् (रत्ना.)

कूलिका–स्त्री. औषधिविशेषः, तन्मूलनस्येन कालदष्टोऽपि जीवति (च. द.)

कूवर–पु., कुब्जकः

कूष्माण्डकघृत–न., अपस्माराधिकारे हितम्
(च. द. अपस्मारचि.)

कूष्माण्डकशिफा–स्त्री., कूष्माण्डमूलम् (वै. नि.)
(श्वा. चि.)

कूष्माण्डखण्ड–न., रक्तपित्ताधिकारे घृतम्
(वा. चि. ३ अ.)

कूष्माण्डगुडकल्याणक–न., ग्रहण्यधिकारे हितम्
(च. द. ग्रहणीचि.)

कूष्माण्डग्रह–पु., भूतग्रहविशेषः । लक्षणं— बहुप्रलापं कृष्णास्यं प्रविलम्बितयायिनम् । शूनप्रलम्बवृषणं कूष्माण्डाधिष्ठितं वदेत् ' (वा. उ. ४ अ.)

कूष्माण्डनाडिका(डी)–स्त्री., कुष्माण्डस्य नालम् गुणाः– कुष्माण्डनाडिका गुर्वी शर्कराश्मरिनाशिनी

कूष्माण्डवटक–पु., कुष्माण्डकृतवटकः, यथा– कूष्माण्डं कर्तयित्वास्य जलं निष्कास्य यत्नतः । कुस्तुम्बरुनिशामाषचूर्णं सतिलसैन्धवं । निक्षिप्य वटकाः कार्या आतपे शोषयेत्ततः । रुचिदा वातहन्तारस्तिलतैले सुपाचिताः (वै. नि.)

कूष्माण्डशालि–पु., स्त्री., स्वनामख्यातशालिधान्यविशेषः । गुणाः—मधुरा गुरुः सुगन्धा पीता दुर्जरा स्थूलतण्डुला कोमला च । (रा. व. १६)

कूष्माण्डसुरा–स्त्री., कुष्माण्डकृतसुराविशेषः
गुणाः—कुष्माण्डस्य सुरा गुर्वी धातुवर्धनकारिणी । अग्निमान्द्यकरी वृष्या प्रोक्ता दृष्टिप्रदा बुधैः । (वै. नि.)

कूष्माण्डक्षार–पु., कूष्माण्डभस्मोत्थक्षारः कूष्माण्डं तनु कृत्वा तु क्षिप्त्वा घर्मे विशोषयेत् । स्थाल्यां निक्षिप्य तत्सर्वं पिधानेन पिधाय च । चुल्ल्यां निवेश्य वह्निञ्च ज्वालयेत् कुशलो जनः । यदा तत्र भवेद्भस्म किन्त्वङ्गारो दृढो भवेत् । तदा निर्वापयेच्छीतं सर्वथा चूर्णितन्तु तत् । (भा. प्र. २ शूलचि.)

कूष्माण्डी–स्त्री., कर्कोटकी, कूष्माण्डलता (रा. व. ७)

कूष्माण्डोन्माद–पु., भूतोन्मादभेदः । स च कूष्माण्डग्रहजातः । (शार्ङ्ग. पू. ७ अ. वा. उ. ४ अ.)

कृ

कृकषा–स्त्री., कङ्कणहारिकपक्षी

कृकालिका–स्त्री., पक्षिभेदः ।

कृकुकुत्स्या–स्त्री., मर्कटः । (वै. नि.)

कृक्कर–पु., करीरः । (रा. व. ८)

कृच्छ्रहर–पु.. पाषाणभेदः (वै. नि.)

कृणञ्ज–पु., कुणञ्जरः ।

कृतक-(ण्टक)–न., रसाञ्जनम् (रा. व. १३)
बिडलवणम् (रा. व. ६)

कृतक–त्रि., कृत्रिमम् (उणा.)

कृतच्छाया–स्त्री., श्वेतकोषातकी (रा. व. ३)

कृतज्ञ–पु., कुक्कुरः (मे.)

कृतत्राणा–स्त्री., त्रायमाणा (रा. व. ५)

कृतपिण्डीत–(क)-(पु.,) शिलारसः (वै. नि.)

कृतफला–स्त्री., कोलशिम्बी (रा. व. ७)

कृतबन्धन–न., कोषातकफलम् (भा. म. ४ भ. प्रसूता चि.)

कृतरस–पु., स्नेहशुण्ठ्यादियुक्तः कृतः तद्विपरीतः च अकृतः मांसरसः । (वा. टी.)

कृतवेध-(क)–पु., कोषातकी (र. मा.)

कृताख्ययूषः–पु., लवणस्नेहकटुकादिकृतयूषः । अयं च गुरुगुणः (वैद्यके)

कृताञ्जलि–स्त्री., लज्जावती लता

कृतान्त–पु., यमः (अम.)

कृतान्ता–स्त्री., रेणुकानाम गन्धद्रव्यम्

कृतालय–पु., भेकः । मण्डूकः । (त्रिका.)

कृति–स्त्री., करणम् । हिंसा (मे.) (का)
–स्त्री., भूर्जवृक्षः । (नकुलः १२ अ.)

कृती (इन्)–त्रि., कुशलः ।

कृत्तिवास–पु., शिवः (अ. म)

कृत्योन्माद–पु., कृत्याजातभूतोन्मादः रोगः (शार्ङ्ग.)

कृत्रिमधूपक–पु., षोडशाङ्गधूपः (अम.)

कृत्रिमरत्न–न., काचम् (वै. नि.)

कृन्तन–न., छेदनम्
कृपणा–स्त्री., सविषकीटविशेषः । (सु. क. ८)
कृपाणिका (णी) स्त्री., कर्तरी । छुरिका (मे)
कृपीट–न., उदरम् । तोयम् (मे.) वनम् काष्ठम् (श. र.)
कृपीटपाल–पु., वायुः (श. र.)
कृपीटयोनि–पु., अग्निः (हे. च.)
कृमिक–न.; पूगफलम् (पु.,) क्षुद्रकृमिः ।
कृमिकण्टक–न., विडङ्गम् । उदुम्बरः । (हे. च.)
कृमिका–स्त्री., ग्रन्थिपर्णी । राजिका । शोथः (वै. नि.)
कृमिकालानलरस–पु., कृम्यधिकारे हितः (र. सा. स)
कृमिकुम्भा–स्त्री., महाकाललता
कृमिकोश (ष)–पु., फलविशेषः । तच्च संग्राहि तिक्तं रक्तरोधनं ज्वरार्शःप्रदरातीसारघ्नं कण्ठरोगघ्नं च (वै. चन्द्रिका)
कृमिगुहा–स्त्री., इन्द्रवारुणीलता
कृमिघातिनी–(गुडी)–स्त्री., कृमौ रसः (र. चि)
कृमिघ्नरस–पु., कृम्यधिकारे रसः । विडङ्गं पलाशबीजं; निम्बबीजं रससिन्दुरं, एषां चूर्णं समम् (र. सा. सं)
कृमिघ्ना (घ्नी) स्त्री., हरिद्रा लाक्षा विडङ्गम् (वै. नि.) धूमपत्रा (रा. व. ५) सोमराजी (श. च.)
कृमिद्रव–पु., लाक्षा (वै. नि.)
कृमिनाशनी–स्त्री., अजमोदा (वै. नि.)
कृमिपाना (मा)–स्त्री., लाक्षा (वै. नि.)
कृमिफल–पु., उदुम्बरवृक्षः
कृमिमक्षिका–स्त्री., कृमितुल्यमक्षिका
कृमिमुद्गर–पु., कृमिघ्नरसः (भैष.)
कृमिरिपु–पु., वि., विडङ्गम् (श. र.)
कृमिलक–कृमिविशिष्टः
कृमिला–स्त्री., अनेकप्रसवा बहुसन्तानप्रसवा (हे. च.) (स्त्री.,) कृमियुक्तः
कृमिविनाशरस–पु., कृम्यधिकारे रसः (र. सा. सं.)
कृमिवृक्ष–पु., कोषाम्रः (भा.)
कृमिशङ्ख–(पु., न.,) जीवशङ्खः अयं रसवीर्याद्यैः शङ्खसदृशः (रा. व. १८)
कृमिशत्रु–पु., विडङ्गम् (प. मु. वै. नि. २) (स्त्री. ज्वरसि) पारिजातकः ।
कृमिशात्रव–पु., विट्खदिरः
कृमिशुक्ति–(सूः) शु–स्त्री. जलशुक्तिः (रा. व. १३) मत्स्यभेदः (वै. नि.)
कृमिशल–(क)–पु. वल्मीकः (श. र.)
कृमिहन्त्री–(हा)–स्त्री विडङ्गम् (वै नि.)
कृमिहररस–पु., कृम्यधिकारे (र. सा. सं.)
कृशरोमा–स्त्री., शूकशिम्बी (वै. नि.)
कृशला–स्त्री., शिरःकेशः (श. च.)
कृशशाक–(ख)–पु., पर्पटकः (रा. व. ५)
कृशाकु–पु., उष्णकरणम् (वै. नि.)
कृशाङ्गी–स्त्री., प्रियङ्गुलता (श. च)
कृशाक्ष–पु., ऊर्णनाभिः (वै. नि.)
कृशीबल–पु., काकजङ्घागुल्मः (र. मा.)
कृशोदरी–स्त्री., श्वेतसारिवा (भा. पू. १ भ.)
कृष–पु.. अरण्यम् (हे. च.)
कृषक–पु.. फालकर्षकः (त्रिका.) वृषः (श. च.)
कृषिलौह–पु., मुण्डलोहम् (रा. व. १२)
कृष्णक–पु., कृष्णमुद्गः ।
कृष्णकदली–स्त्री., महाराष्ट्रप्रसिद्धः कदलीविशेषः। गुणाः– 'कृष्णा तु कदली रुच्या तुवरा मधुरा लघु । वायोर्धातोर्वृद्धिकरी मेहपित्ततृषाहरा ' (वै. नि.)
कृष्णकन्द–न., रक्तोत्पलम् (त्रिका.)
कृष्णकरवीर–पु., कृष्णपुष्पकरवीरवृक्षः, गुणः–करवीरतुल्यः (रा. व. १०)
कृष्णक(के)लि–पु., स्वनामख्यातपुष्पवृक्षः । गुलालफुल इति गौडीयाः । तस्याः शाखा रक्ततण्डुलीयनालवत् ग्रन्थियुक्ता च । पत्रं ताम्बूलवत् परं क्षुद्रं भवति । तत्पुष्पं श्वेतरक्तपाटलापीताभं युक्तपञ्चदलं षट्केसरमध्यं इषद्गन्धं सायाह्ने विकसति प्रायेण सुलभं । बीजञ्च तस्य कृष्णं मरिचाभञ्च (वै .नि.)
कृष्णका–स्त्री., राजिका (प. मु.)
कृष्णकाक–पु., द्रोणकाकः (हला.)
कृष्णकातरा–स्त्री., रक्तगुञ्जा । (वै. नि.)
कृष्णकाय–पु., महिषः (वै. नि.)
कृष्णकुटज–पु.; कृष्णपुष्पकुटजवृक्षः (वै. नि.) (अतिसार चि० कुटजपुटपाके)
कृष्णकुलत्थ–(क)–पु., कुलत्थभेदः गुणः–कृष्णकुलत्थको ग्राही रक्तपित्तकरो मतः। रसे च तुवरः पाके कटुकफहरो मतः । वातशुक्राश्मरीगुल्म पीनसश्वासजित् । आनाहगुदकीलार्शोमेदोधातुविनाशकः (वै. नि.)
कृष्णकुलथिका–स्त्री., वनकुलत्थकः (वै. नि)
कृष्णकुसुम–पु., कृष्णकरवीरः (वै. नि.)

कृष्णगर्भ-पु., कट्फलवृक्षः (रा. व. १०)

कृष्णगल-पु., कुक्कुभपक्षी (वै. नि.)

कृष्णगोकर्णी-स्त्री., कृष्णकुसुममूर्वालता (हिं.—काला सुरहरा म—सुपली) गुणाः—कृष्णा गोकर्णिका तिक्ता रसे स्निग्धा त्रिदोषहा। शीतवीर्या वातपित्तज्वरदाहश्रमापहा। अतिकासश्वासकफकुष्टजन्यक्षयापहा अन्ये गुणास्तु सुश्वेतगोकर्णीसदृशा मताः (वै. नि.)

कृष्णचणक-पु., कृष्णवर्णचणकक्षुपः। (म-करियाचणा) गुणाः—मधुरः कासपित्तघ्नः पित्तातिसारकासघ्नबल्यः रसायनश्च (रा. व. १९)

कृष्णचञ्चुक-पु., चणकवृक्षः (रा, व. १६)

कृष्णचटक-पु., श्यामाकपक्षीः

कृष्णचन्दन-न., पीतचन्दनम् (प. मु)

कृष्णचूडा-स्त्री., स्वनामख्यात पुष्पवृक्षः गुलतुरा इति यवनाः। तत् पुष्पं पीतरक्तवर्णं दीर्घवृन्तं दशदलमिषत्सुगन्धं वर्षास्वेव प्रचुरं भवति। काञ्चनशिम्बीतुल्यमिति। (कल्पद्रुमः)। रक्तगुञ्जा। (रा व. ३)

कृष्णचूरक-पु., चणकवृक्षः। (प. मु.)

कृष्णजटा-स्त्री., पिप्पलीमूलम् (वै. नि. २ भ.) (वातव्या. पक्षवध. चि.)

कृष्णजयन्ती-स्त्री. कृष्णजयन्ती क्षुपः। सा रसायनी। (रा. व. ४)

कृष्णजिह्व-पु., अश्वभाश्वः (ज. द. ३ अ.)

कृष्णजीर-(क) पु., स्वनामख्यातजीरकवृक्ष। (म-काळेजिरे) (हिं-मङ्गरइल) तद्विविधं स्थूलसूक्ष्मभेदेन। गुणाः—कृष्णजीरः च चक्षुष्यं रुच्यञ्चोष्णं सुगन्धिकं। ग्राहकं कटुकं रूक्षं दीपकं जीर्णजूर्तिनुत्। कर्फ शोथं शिरोरोगं कुष्ठञ्चैव विनाशयेत्। (वै. नि.) जरणा कटुरुष्णा च कफ शोफनिकृन्तनी रुच्या जीर्णज्वरघ्नी च चक्षुष्या ग्राहिणी परा (रा. व. ९) तैलं मूलकतैलवत् जीरकभेदे (हिं-सहाजीरा, कलोंजी) (भा. म. ४ भ) (नासारोगचि.)

कृष्णताम्बूलवल्ली-स्त्री., कृष्णनालनागवल्ली। गुणाः—तिक्तोष्णा कटुका मता। कषाया च मलस्तम्भकारिणी दाहकारिणी। मुखजाड्यकरी प्रोक्ता—(वै. नि.)

कृष्णताम्र-न., गोशीर्षचन्दनम् (शमा)

कृष्णतार-पु., हरिणः। (रा. व. १९)

कृष्णतिल-पु., स्वनामख्यातक्षुपः। (रा. व. १६)

कृष्णतीक्ष्णा-स्त्री., कृष्णजीरकः (वै. नि.)

कृष्णतुलसी-स्त्री., कृष्णपत्रतुलसी; गुणाः- 'कासवातकृमिवमिभूतघ्नी' (रा. व. १०)

कृष्णत्रिवृत्-(ता) स्त्री., कृष्णमूल त्रिवृत् गुणाः-श्वेताया ईषत् हीनगुणा विशेषस्तु तीव्रविरेचनी मूर्च्छादाहमत्तताभ्रान्तिकण्ठोत्कर्षता जननी च (भा. पू. १ भ.)

कृष्णत्वक्-पु., बकुलवृक्षः (वै. नि.)

कृष्णदन्ता-स्त्री., काश्मरीवृक्षः

कृष्णदेह-पु., भ्रमरः

कृष्णधान्य-कृष्णवर्णषष्टिकाधान्यः श्यामाकः (वै. नि. च. सू. २७)

कृष्णपर्णी-स्त्री., कृष्णतुलसी (र. मा.)

कृष्णपल्लवा-स्त्री., कृष्णकलंबी (प. मु.)

कृष्णपिण्डितक-(रु) पु., पियार इति प्रसिद्धः फलविशेषः (रत्ना.)

कृष्णपिपीलिका (**ली**) -स्त्री., कृष्णवर्णपिपीलिका (रा. व. १९)

कृष्णपुच्छ-पु., शृङ्गहीनः हरिणतुल्यवन्यजन्तुविशेषः कोङ्कणप्रसिद्धः (हिं.-लोमडी) (वै. नि.)

कृष्णपुष्प-न., कृष्णधुस्तूरकः (रा. व. १०)

कृष्णपुष्पी-स्त्री., प्रियङ्गुवृक्षः (श. च.)

कृष्णपूतिफला-स्त्री., सोमराजी (रत्ना.)

कृष्णप्रिय-स्त्री., कदम्बवृक्षः (वै. नि.)

कृष्णफल-(**फलपाक**) करमर्दवृक्षः (हिं-करोंदा) (अ. टी. पु.। द्विकोष)

कृष्णबीज-पु., रक्तशिग्रुः। (जटा.) (न) कालिङ्गम् (रा. व. ७)

कृष्णभस्म-न., पारदस्य भस्मीकरणेन कृष्णतापादनम् (र. सा. सं. दृश्या)

कृष्णभूकूष्माण्ड-पु., कृष्णवृन्तपत्रभूमिकूष्माण्डः (श. चि.)

कृष्णभूभवा-स्त्री., कारवेल्लिका (वै. नि.)

कृष्णभूम-(मि)-पु., स्त्री., कृष्णमृण्मयः देशः (हे. च. रा. व, २)

कृष्णभूषण-न., मरिचम् (वै. नि.)

कृष्णमदन-पु., कृष्णवर्णमदनवृक्षः। गुणाः—कृष्णः श्वेतस्तु मदनः शीतलो मधुरः स्मृतः कटुस्तिक्तश्च तुवरः वान्तिकृत् कफनाशनः। पक्वामाशयशुद्धेश्च कारकः पित्तनाशकः (वै. नि.)

कृष्णमधुरज्वर-पु., मधुरज्वरभेदः (वै. नि.)

कृष्णमक्षिका-स्त्री., मक्षिकाविशेषः (वै. नि.)

कृष्णमालुक-पु., कृष्णार्जकः (रा. व. १०)

कृष्णमाष–पु., कृष्णकलायः । गुणाः--कृष्णमाषो बलकरो रुच्यो दोषत्रयापहः (वै. नि.)

कृष्णमुख–पु., वानरः (वै. नि.)

कृष्णमुखा–स्त्री., कृष्णशारिवा (वै. नि.)

कृष्णमुखी–स्त्री., अलगर्दजलौका (सु. सू. १३)

कृष्णमृग–पु., कृष्णहरिणः (वै. नि.)

कृष्णमृत्तिक-पु., कृष्णभूमिः (हे. च.)

कृष्णमेह–पु., तन्नामकप्रमेहरोगः (भा. मा. नि.)

कृष्णरङ्ग–न., शीसधातुः (वै. नि.)

कृष्णरम्भा–स्त्री., रम्भाविशेषा (वै. नि.)

कृष्णरस–पु., पारदस्य कृष्णीकरणम् तत्प्रकरणम्— लौहपात्रेऽथवा ताम्रे पलैकं शुद्धगन्धकं । मृद्वग्निना द्रुते तस्मिन् शुद्धसूतं पलत्रयं। क्षिप्त्वा च चालयेत्किंचिल्लौहदर्व्या पुनः पुनः । गोमये कदलीपत्रं तस्योपरि च ढालयेत् । इत्येवंगन्धबद्धन्तु सर्वरोगेषु योजयेत् (अ. त्रि.)

कृष्णराज-पु., कृष्णशिग्रुवृक्षः ।

कृष्णराजिका-स्त्री., कृष्णसर्षपः (वै. नि.)

कृष्णरुहा–स्त्री., जतुकालता (वै. नि.)

कृष्णल-(क)-पु., रक्तिका । घुंघुंटी, चिरमुटी, इति च पाश्चात्ये । गुञ्जा । कृष्णगुञ्जा (वै. नि.)

कृष्णला–स्त्री., श्वेतजिह्वालता (भा. पू. १ भ.) जिव्हालता (रां. व. ३) भुजाढकी (प. मु.) कृष्णजिह्वा (वै. नि.)

कृष्णवक्त्र–पु., श्यामुखवानरः । (हला.)

कृष्णवनालुक–न., वनजकृष्णालुकविशेषः । गुणाः–कृष्णं वनालुकं रुच्यं महासिद्धिकरं परम् । मुखजाड्यहरं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः (वै. नि.,)

कृष्णवर्ण–पु., वाराहमदनवृक्षः । (रा. व. ८) कस्तूरिका । मुस्ता । रीठाकरञ्जः । कालशाकम् मत्स्यभेदः । न., जलम् । लवङ्गम् । कृष्णागुरुः (वै. नि.) स्त्री., (र्णा)-असाध्यसविषलूताविशेषा । (सु. क. ८. अ.)

कृष्णवर्त्मा–पु., अग्निः । चित्रकवृक्षः । (अम) भल्लातकवृक्षः । (वै. नि.)

कृष्णवल्मीकः–पु., न., कृष्णवर्णवल्मीकम्

कृष्णवानर–पु., गोलाङ्गुलः वानरः (रा व. १९)

कृष्णवार्ताकु–पु., कृष्णवर्णवार्ताकी । (रस. र. ज्वरातिसारे । ग्रहणीकवाटरसे)

कृष्णवालुक–न., कङ्कुष्ठम् (वै. नि.)

कृष्णवेत्र–पु., केलेलता । इति प्रसिद्धलता (भैष. महा भल्लातकगुडे । रस र. वज्रकघृते)

कृष्णवो(बो)ल–पु., कृष्णच्छविबोलभेदः । गुणाः–कृष्णबोलः कटुः शीतः भेदको रसशोधनः । शूलाध्मानकफान्वातकृमिगुल्मौ च नाशयेत् (वै. नि.)

कृष्णशठ–पु., दुर्लक्षणाश्वः (ज. द.)

कृष्णशार–पु., स्वनामप्रसिद्धः मृगः (अ. टीं. र.)

कृष्णशारिवा–स्त्री., कृष्णसारिवा ।

कृष्णशिखिक–न., अगुरुकाष्ठम् (वै. नि.)

कृष्णशिम्बा–स्त्री., कुलत्थभेदः (वै. नि.)

कृष्णशिम्बिका(म्बी)-स्त्री., कृष्णवर्णा शिम्बिका (र. मा.)

कृष्णश्वेता–स्त्री., पाटलवृक्षः । गाम्भारीवृक्षः

कृष्णसंज्ञक–न., सौवर्चललवणम् (वै. नि.)

कृष्णसख–पु., अर्जुनवृक्षः ।

कृष्णसखी–स्त्री., जीरकम् (श. च.)

कृष्णसर्जन–पु अश्वकर्णशालवृक्षः (वै. नि.)

कृष्णसारका–स्त्री., कृष्णशिंशपावृक्षः (हारा.)

कृष्णसारमांस–न., स्वनामख्यातमृगमांसम्; गुणाः–रक्तपित्ते हितम् । संग्राहि रुचिकरं बलकरं ज्वरघ्नं च (राज.)

कृष्णसारिवा–स्त्री., श्यामालता छलहेण्टापत्रसदृशच्छदा चन्दनगन्धा कालवेलि इति लोके (भा. पू. १ भ.) गुणाः– कृष्णा तु सारिवा शीता वृष्या तु मधुरावृता । कफघ्नी चैव सम्प्रोक्ता गुणाश्चान्ये तु पूर्ववत् (वै. नि.)

कृष्णसूक्ष्मफल–स्त्री., सारिवाभेदः । गुणाः– स्वादुः स्निग्धा गुरुः शुक्रजननी अग्निमान्द्यारुचिश्वासकासामविषनाशिनी दोषत्रयघ्नी रक्तदोषप्रदरज्वरातीसारघ्नी च (वै. नि.)

कृष्णस्कन्ध–पु., तमालवृक्षः (अ. टी. भ.)

कृष्णस्रोत–न., रसाञ्जनम् (रत्ना.)

कृष्णाङ्ग–न., जीरकभेदः (हिं. कलौंजी) (वै. नि.)

कृष्णाजाजी-स्त्री., कृष्णजीरकः (च. द. संग्रहणी) (चि.)

कृष्णाढकी–स्त्री., कृष्णपुष्पाढकी गुणाः– कृष्णा तु तुवरी बल्या चाग्निदीप्तिकरी मता। पित्तदाहप्रशमनी ऋषिभिः परिकीर्तिता (वै. नि.)

कृष्णातण्डुल-न., पिप्पलीबीजम् (सि. यो. छर्दि. चि)
कृष्णादिगण-पु., पिप्पल्यादिद्रव्यगणः (वा.)
कृष्णाद्यतैल-न., नेत्ररोगे हितम् (च. द.)
कृष्णाद्यमोदक-पु., श्लीपदाधिकारे हितम् (रस. र.) (सा. कौ.)
कृष्णाद्यलोह-न., शूललौहम् (र. चि. ९ अ.) (रस. र.)
कृष्णाभा-स्त्री., कालाञ्जनी । ष्णकार्पासः (रा. व. ४)
कृष्णाभ्र-न., नीलाभ्रम्
कृष्णामिष-न., लौहम् (हे. च.)
कृष्णामूल-न., पिप्पलीमूलम् (वै. नि.)
कृष्णार्चि-पु., अग्निः । चित्रकवृक्षः (वै. नि.)
कृष्णार्जक-पु., कृष्णपत्रक्षुद्रतुलसी (म. काळा-आजवला) (रा. व. १०)
कृष्णावास-पु., अश्वत्थवृक्षः (हे. च.)
कृष्णिका-स्त्री., राजिका (अम.)
कृष्णी-पु., रात्रिः
कृष्णीकरण-न., श्वेतादेः कृष्णतासम्पादनम् (सु.चि. १अ)
कृष्णेन्द्रिय-न., कदम्बः (वै. नि.)
कृसर-पु., तुल्यतिलान्नम् । तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते (हे. च.)
कृसरा (यवागू)-स्त्री., यवागुभेदः । लक्षणगुणाः—तिलतण्डुलमाषाणामथवा तिलतण्डुलात् षड्गुणञ्च जलं दत्त्वा साधनीया यवागुका । सा जरा दुर्जरा बल्या मदपुष्टिप्रदा मता । कफपित्तमलस्तम्भशुक्रकृद्वातनाशिनी । (वै. नि.)
क्लृप्तधूप-पु., सिह्लकः (जटा)

के

केकर-पु., निम्नोन्नताक्षिपुरुषः (हिं-ऐञ्चाताना)(अम.)
केका-स्त्री., मयूरवाणी (अम.)
केका (क)(का)(ण)-पु., तद्देशजाताश्वः ।
केकाबल-पु., मयूरः
केकिक-(की)-पु., स्त्री., मयूरः (रत्ना)
केचुक-पु., न., तन्नामकवृक्षः (त्रिका.) केमुकः
केचुकाकन्द-पु., केचुकः । (सु. चि. ९)
केतकफल-न., कुचेलकम् (च. द. अश्मरी.) (चि. कषा. घृते) केतकीफलम् । तच्च त्रिदोषविषघ्नम् (च. सू. २७ अ.)
केतकाद्यतैल-न., वातव्याध्यधिकारे उपयुक्तम् (च. द. वातव्या. चि.)
केतन-न., चिह्नम् । स्थानम् (हे. च.)
केतुग्रहवल्लभ-वैडूर्यरत्नम् (भा. पू. १ भ.)
केतुरत्न-पु., वैडूर्यमणिः (प. मु.)
केदारक-पु., केदारजातषष्टिकधान्यजातिभेदः (सु.सू.४६)
केदारजल-न., तद्देशस्थजलम् । गुणाः—विपाके स्वादु गुरु दोषदञ्च । तदेव बद्धमुक्तं विशेषेण दोषदं भवेत् (रा. व. १४)
केदारभूमि-स्त्री., मालक्षेत्रम्
केदारशालि-पु., केदारक्षेत्रजशालिधान्यम् गुणाः– मधुरा वृष्या बल्याः पित्तवर्धनाः । ईषत् कषाया अल्पमला गुर्व्यः कफघ्नाश्च । (रा.व.१६) धान्यं-मधुरं शीतलं रुचिकरं स्तन्यवर्धनम् । (वै. नि.) केदारप्रभवा रूक्षा वातपित्तविनाशिन्यः रक्तपित्तविकारघ्नाः वातलाः कफकारकाः । (अत्रि. १५ अ.)
केना (नी)-स्त्री., पत्रशाकविशेषः । गुणाः– मधुरा शीता रुच्या स्तन्यवर्धनी च । (वै. नि.)
केन्दु-(क)-(र)-पु., तिन्दुकः (श. र. । श. च.)
केमुक-का-त्रि., केबुककन्दः उत्तरदेशख्यातः (हिं-कोबी) केमुआ (र. प्र. त्रिकट्वाद्यमोदके) गुणाः—मधुरा वृष्या कटुपाका तिक्ता शीता लघुपाचिका दीपनी ग्राहिणी हृद्या वातला कफपित्तज्वरघ्नी प्रमेहकुष्ठकासघ्नी रक्तरोगघ्नी पित्तभ्रमं पिपासाञ्च नाशयेत् (वै. नि.) केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु । दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् : कुष्ठकासप्रमेहास्रनाशनं वातलं कटु (भा. पू. १ भ) कफपित्तघ्नं रोचनं अग्निदीपनं च (राज.) मधुरं रूक्षमच्छं शीतलं भेदकं ग्राहकं रुच्यं गुरु पित्तकफघ्नं वातघ्नं च (वै. नि.)
केलट-न., कुसुम्भबीजम् (वै. नि.)
केलटक-पु., केमुककन्दः (वै. नि.)
केलास-पु., स्फटिकमणिः (वै. नि.)
केलिक-(किल) पु., अशोकवृक्षः (वै. नि.)
केलिकिण-(कीर्ण)-पु., उष्ट्रः (वै. नि. हे. च.)
केलिपिक-पु., कोकिलः ।
केलिवृक्ष-पु., केलिकदम्बः ।
केवलद्रव्य-न., मरिचः (श. र.)
केवा(विका)-स्त्री., केवार इति कोङ्कणदेशे ख्यातः । पुष्पवृक्षविशेषः । गुणाः– मधुरा शीतला दाहपित्तश्रमघ्नी वातश्लेष्मघ्नी छर्दिघ्नी च (रा. व. १०)
केशकार-पु., इक्षुविशेषः ।
हिं.— कुशियार.

केशकारी-स्त्री., रोहिणी (वै. नि.)
केशकीट-पु., उकुणः ।
केशगर्भक-पु., कवरी (त्रिका.)
केशच्छित्-पु., नापितः (श. मा.)
केशट-पु., उकुणः । छागः (मे.) श्योनाकवृक्षः (त्रिका.)
केशधृत्-पु., मस्तकम् । भूतकेशः (श. च.)
केशनाम-न., ह्रीबेरम् (अम.)
केशपक्ष-पु., केशसमूहः (अम.)
केशपर्णी-स्त्री., अपामार्गवृक्षः । रक्तापामार्गः (भा.पू.१भ.)
केशपाश-पु., केशभारः (अम.)
केशपाशी-स्त्री., शिरोमध्यस्थशिखा ।
केशमार्जक (न)-न., कङ्कतिका ।
केशयन्त्र-न., उपविषादिशोधनार्थम् यन्त्रविशेषः । लक्षणं यथा- 'धान्यपूरितसुस्थाल्यां सुमुख्यायां मुखोपरि । सुदुग्धैर्नारिकेलस्य खर्परे विसमर्दयेत् । केशो दुग्धे प्लुतो यस्मात् केशयन्त्रं तथा स्मृतम् (वै. चन्द्रिका)
केशर-स्त्री., नागरमुस्ता (रा. व. ९)
केशरङ्गिनी-स्त्री., सहदेवीलता ।
केशरञ्जन-पु., भृङ्गराजः (रा. व. ४) नीलझिणझिण्टी (वै. नि.)
केशरपाक-पु., वाजीकरणपाकविशेषः
केशराग-पु., भृङ्गराजवृक्षः (भा. गण्डमालाचि)
केशराज-पु., स्वनामख्यातः शाकविशेषः (हिं-भेगरीय) गुणाः-तिक्तोष्णः चक्षुष्यः केशरञ्जनः कफामशोथ-श्वित्रघ्नः, तत्र नीली रसायनी । आग्नेयः केश्यः चक्षुर्हितः पाण्डुकफघ्नः रसायनश्च (राज. । भृंगराज)
केशराह्वय-न., वालकम् (सु. चि. ९ अ)
केशवप्रिया-स्त्री., गोरोचना (प. मु.)
केशवायुध-पु., आम्रवृक्षः (श. मा.)
केशवालय (वास) -पु., अश्वत्थवृक्षः (त्रिका. जय)
केशशौक्ल्य-न., पलितम् (रा. व. १८)
केशा-स्त्री., जटामांसी (वै. नि.)
केशाख्य-न., ह्रीबेरम् (रत्ना. भैष.) (अचिन्त्यशक्तिरसे)
केशापह-पु., शमीवृक्षः (वै. नि.)
केशारी-पु., नागकेशरः (वै. नि.,)
केशाली-पु., भृङ्गराजः (वै. नि.)
केशाह्व-न., बालकम् (वै. नि.)
केशिनी-स्त्री., जटामांसी (रा. व. १२) वन्ध्या (वै. नि.)

केसरीसुत-पु., हनूमान् (हे. च.)
केसरोच्चटा-स्त्री., मुस्ता । नागरमुस्ता
कैङ्कुक-पु., गरगण्ड इति ख्यातः वृक्षः (सुस्.· ३६)
कैटज-पु., कुटजवृक्षः (भा. पू. १ भ.)
कैतव-न., कुमुदम् । वैडूर्यमणिः । (रा. व. १३) राजिका । (त्रिका.)
कैपीला-स्त्री., कृष्णत्रिवृता । (वै. नि.)
कैरली-स्त्री., विडङ्गः । (रा. व. ६)
कैरविका-स्त्री., कुमुदिनी (भा. पू. १ भ.)
कैरविणीफल-स्त्री., कुमुदबीजम् (हिं-भेट) (भा.)
कैराट-(क)-पु., करवीरवृक्षः । स्थावरविषभेदः । (हे. च.)
कैरातचन्दन-पु., न., जातिपीतचन्दनम् कोङ्कणे ख्यातम् गुणाः-शीतलश्च तिक्तः क्रान्तिकरो मतः । विच-र्चिकाकुष्ठकण्डूकफदद्रुविषापहः । रक्तपित्तकृमि-व्यङ्गपित्ततृट्ज्वरदाहहाः (वै. नि.,)
कैराल-न., विडङ्गम्
कैराली-स्त्री., भूनिम्बः । विडङ्गम् (रा. व. ६)
कैवर्त-पु., महानिम्बः (वै. नि.)
कैवर्तम (मु) स्त (क)-न., कैवर्तिका जलजमुस्ता। गुणाः-हिमं तिक्तं कषायं कटु कान्तिकरं कफघ्न पित्तघ्नं रक्तदोषवीसर्पकुष्ठकण्डूघ्नञ्च । इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्तकाकृतिः । "मुस्तावत्पेलवपुटं शुक्राभं स्यात् वितुन्नकमिति' (भा. पू. १ भ.)
कैवर्तिका (र्ती)-स्त्री., मालवे स्वनामख्यातजलमुस्ता । गुणाः-लघु वृष्या कषाया कफघ्नी कासश्वासघ्नी मन्दाग्निहरी च । (रा. व. ३)
कैवल-न., विडङ्गः । (र. मा.)
कैशोर-न., एकादशाब्दात् पञ्चदशपर्यन्तम् वयः (रा. व. १८)
कैशोरको गुग्गुलु-पु., वातरक्ते हितः (च. द. सा. कौ.)
कैषि(षी)का-स्त्री., आम्रातकः । शरमूलमिति केचित् (च. चि. ३ अ.)
कैषी-स्त्री., पाठा (वै. नि.)

को

कोक-पु., खर्जूरीवृक्षः । जेष्ठिका । भेक :(मे.) ईहामृगः (रा. व. १९) चक्रवाकः (त्रिका.)
कोकड-पु., चमरपुच्छम्। बिलेशयमृगः कहुण्डारइतिभाषा कोकवाच ,, तन्मांस गुणाः -श्वासानिलकासहर पित्तदाहकरश्च (रा. व. १९)

कोकदेव–पु., कपोतः (रा. व. १९)

कोकाह–पु., पाण्डुवर्णघोटकः। कर्कः इति नामधेयः शुक्लाश्वः (ज. द. ३ अ.)

कोकिलनयन–पु., कोकिलाक्षक्षुपः (अ. टी. र.)

कोकिलावर्ति-(र्ती)– नेत्ररोगे वर्तिविशेष (च. द.)

कोकिलाक्षी–स्त्रीं., कोकिलाक्षबीजम् (श. र.)
हिं.— तालिमखाना,

कोकुराह–पु., मुखपुण्ड्रकयुक्तश्वेताश्वः (ज. द. ३ अ.)

कोङ्क(ङ्का)ण–पु., कोङ्कणदेशजोत्तमाश्वः।

कोचिला–स्त्री., कुचेलकम् (भैष. ज्वरचि. पानीयवव्याम्.)

कोट–पु., कोठरोगः। गुवाकवृक्षः (त्रिका.)

कोटज–पु., कुटजवृक्षः (रा. व. ९)

कोटरवासिनी–स्त्री., श्वेतत्रिवृता (वै. नि.)

कोट(ट्ट)वी–स्त्री., नग्नस्त्री (अम.)

कोटिबालिका–स्त्री., सरटः (वै. नि.)

कोटिर–पु., नकुलः। इन्द्रगोपकीटः (मे.)

कोटि (टी) वर्षा–स्त्री., पिण्डिङ्गशाकम् (श. र)

कोटिवृक्षक–पु., कुटजवृक्षः (मद. व. १)

कोटिश–पु., लोष्टभेदनः (भरत.)

कोटीर–पु., जटा (त्रिका.)

कोटोडुम्बर–पु., यज्ञोदुम्बरः (भैष. स्त्री.)(रोग. चि.)

कोट्टार–पु., कूपम् (हारा.) पुष्करिण्याः पाटकः (मे.)

कोठर–पु., अङ्कोलवृक्षः (रा. व. ९)

कोण–पु., अस्त्राद्यग्रभागः (अम.)

कोणकुण–पु., उत्कूणः (हे. च.)

कोदकार–पु., अश्वाकारमृगभेदः (वै. नि.)

कोदण्ड–पु., भ्रूः (मे.)

कोद्रवमण्ड–पु., कोद्रवधान्यकृतमण्डम्, गुणाः—मूर्च्छा ग्लानिजननः (वै. नि.)

कोद्रविक–न., सौवर्चललवणम् (वै. नि.)

कोद्रुभक्त–पु., कोद्रवान्नम् (म—हरकाचा भात.)
गुणाः—कोद्रुभक्तो रुचिकरो मधुरस्तु प्रमेहहा। मूत्रदोषतृषाच्छर्दिकफवातामदाहनुत्।

कोनफल–न., रक्तालुः (वै. नि.)

कोना (नी) ल--वर्तिकाख्यजलपक्षी (वै. नि.)

कोपना--स्त्री., रक्तकरवीरः (वै. नि.)

कोपलता--स्त्री., कर्णस्फोटलता (रा. व. ३)

कोपिन--(पी) -पु., जलकपोतः (रा. व. १९)

कोम--न., पिपासास्थानम् (अ. टी.)

कोमलक–न., मृणालम् (श. र.) पद्मकाष्ठम् (वै. नि.)

कोमलकदल–न., बालकदलफलम् (म. कोवळे केळे)
गुणाः– शीतमधुरकषायरुच्याम्लपित्तघ्नञ्च (वै. नि.)

कोमलदल–न., पद्मम् (वै. नि.)

कोमलनारिकेल–न., बालनारिकेलः

कोमलप्रसव–पु., श्वेतझिण्टी (वै. नि.)

कोमलवल्कला–स्त्री., लवलीवृक्षः (भा.)

कोमला–स्त्री., क्षीरिका (श. च.) क्षीरिणी। खर्जूरिका (वै. नि.)

कोमलेक्षु--पु., इक्षुविशेषः; गुणाः कोमलेक्षुर्मेदकफमेहकारी च कीर्तितः। तरुणस्तु मधु प्रोक्तः किञ्चित्कटुश्च वातहः। पित्तं नाशयत्येवं स वृद्धोवीर्यवर्धकः रक्तपित्तहरो बल्यो क्षतनाशकरो मतः (वै. नि.)

कोमासिका–स्त्री., जालिका [हारा.]

कोरकवृक्ष–इङ्गुदीवृक्षः (वै. नि.)

कोरङ्गी–स्त्री., सौराष्ट्रिका (वै. नि.)

कोरण्टी–स्त्री., बदरीवृक्षः (मद. व. ६)

कोरिमद–पु., कासमर्दः (प. मु.)

कोलकर्कटिका (टी)–स्त्री., मधुखर्जूरिका (रा. व. ११)

कोलका–स्त्री., शुकशुकशिम्बी [वै. नि.]

कोलगजिनी–स्त्री., गजपिप्पली [वै. नि.]

कोलङ्क–आमलकवृक्षः (वै. नि.)

कोलदल--न., नखीनामगन्धद्रव्यम्। (अम.)

कोलनाशिका--स्त्री., वह्निनीवृक्षः। (हारा.)

कोलपुच्छ--पु., कङ्कपक्षी (हा. रा.)

कोलबालुक--पु., कङ्कुष्ठः। (वै. नि.)

कोलशिम्बि--(म्बी)--स्त्री., कपिकच्छुः। (म. द. व. १)

कोलात्मज--पु., बदरफलम्। (वै. नि.)

कोलादिमण्डूर--न., परिणामशूले हितम्।

कोलास्थि--न., बदरास्थि। (सि. यो. छर्दितचि.)

कोलाहल--पु., भूकदम्बः। (वै. नि.)

कोलि--(ली) पु., स्त्री., बदरीवृक्षः (त्रिका.) (अ. टी. भ.)

कोलिका–स्त्री., घण्टाबदरः। (वै. नि.)

कोविद- पु., तिलकवृक्षः। (वै. नि.)

कोशकाली--स्त्री., जलचरपक्षिभेदः। (वै. नि.)

कोशकृत्--पु., कोषकारः। (वै. नि.) कृष्णेक्षुः (भा)

कोशफल--न., त्रपुषी। देवदाली घोण्टा (रा. व. २३) कक्कोलः। (अम.) बदरः। (वै. नि.)

कोशस्थमांस—न., शङ्खशुक्त्यादिमांसम्, गुणाः—मधुरं शीतलं स्निग्धं शुक्रकरं वृष्यं विड्वर्धकं बलवृद्धिकरं वातपित्तघ्नं च। (वै. नि.)

कोशा—स्त्री., मद्यम् (वै. नि.,)

कोशाङ्ग—न., इत्कटः (हा. रा.)

कोशिला—स्त्री., मुद्गपर्णी (वै. नि.)

कोष-(क)--पु., स्त्री., जातीकोषः। पात्रम् (मे) कुड्मशलः। वृषणः। (श. र.) शिश्नम्। अण्डम्। कृताकृतस्वर्णरौप्यम् (अम.) योनिः। शिम्बी (हे. च.) पनसादिफलस्यान्तम् (धरणि.)

कोषकारज--न., कौषेयः (रत्ना.)

कोषचञ्चु-- पु., सारसपक्षी (श. मा.)

कोषफल--न., कर्पूरगन्धिकक्कोलः (भा. पू. १ भ.) घोषकलता (जटा.)

कोषफला--स्त्री., पीतदेवताडवृक्षः (र. व. ३) पीतघोषा (प. मु.) लिम्पाकः।

कोषला (ह्ला)--स्त्री., जीवशाकम् (प. मु.)

कोषवृद्धि--कुरण्डः (श. र.) वृद्धिरोगः

कोषा (षिन्)--स्त्री., पु., पादुका (श. र.) शुङ्गा (हे. च.) आम्रवृक्षः (श. मा.)

कोषाम्बी--स्त्री., महाकोषातकी (प. मु.)

कोष्ठपुष्पा--स्त्री., क्षीरमूर्वा (वै. नि.)

कोष्ठसन्ताप--पु., अन्तर्दाहः (रा. व. २०)

कोष्ठाग्नि--पु., पाचकाग्निर्नाम योऽग्निर्जठरे अन्नं पचति। (निदानम्)

कोष्ण--न., ईषदुष्णम् (रत्ना.)

कोहली--स्त्री., कूष्माण्डसुरा गुणौ—बृंहणी गुर्वी च (वै.नि)

कौ

कौकिल्य--पु., कोकिलावृक्षः (वै. नि.)

कौकृत्य--न., अनुतापः (त्रिका.)

कौक्कुटिक-पु., अदूरप्रेरिताक्षः (मे.) पक्षिविशेषः(वै.नि.)

कौक्कटिकन्दलः-पु., सर्पविशेषः (त्रिका.)

कौङ्क(ङ्किण)--पु., कोङ्कणदेशः (श. र.)

कौककिक--त्रि., मांसविक्रेता (श. र.)

कौटजलेह--पु., अर्शोधिकारे लेहः (सा. कौ.)

कौटजबीज--न., इन्द्रयवः।

कौटिक-त्रि., मांसविक्रेता

कौटी--न., कुटजवृक्षः (वै. नि.)

कौणप--त्रि., कुणपगन्धः (च. इ. १ अ)

कौतुक-न.,भोजनकालः (हे. च.) हर्षः। विवाहसूत्रम् (मे.)

कौद्रविक--न., सौवर्चललवणम् (रा. व. ६)

कौबी(वी)रा--स्त्री., भूम्यामलकी।

कौबेरग्रह—पु.,अश्वजातेर्दुष्टग्रहविशेषः।लक्षणम्—स्विन्नाङ्गो वेपमानश्च जानुभ्यां यश्च तिष्ठति। कौबेरग्रहसंजुष्टं तं विद्यात्कष्टजीवनम् (ज, द. ५७ अ.)

कौमुद—पु., कार्तिकमासः (त्रिका.)

कौमुदीजीवन—पु., चकोरपक्षी (वै. नि.)

कौलत्थीन—पु., कुलत्थोत्पादकं (क्षेत्रम् अ. टी. भ.)

कौलीन—न., गुह्यम्। उपस्थम् (मे.)

कौलीरा—स्त्री., कर्कटशृङ्गी (रा. व. ६)

कौल्माषीण—त्रि., कुल्माषोत्पादकं (क्षेत्रादि. अ. टी. रा.)

कौवल—न., कोलीफलम् (द्विरूपकोषः)

कौशिकफल—पु., नालिकेरवृक्षः (शर.)

कौशिका—स्त्री., ग्रन्थिपर्णीक्षुपः। सुरा (वै. नि.) पानपात्रम् (हे. च.)

कौशिकाराति(कारि)—पु., काकः (रा. व. २९)

कौशिक्य(क्या)—पु., स्त्री., शाखोटवृक्षः (रा. व. ९) गुणाः— पित्तला चोष्णा तिक्ता वातविनाशिनी (वै. नि.)

कौशिर—न., नखीनामगन्धद्रव्यम्।

कौष—न., कमलम् (वै. नि.)

कौषिक—पु., कौशिकः। अहितुण्डिका (रत्ना.)

कौसिद्य—न., तन्द्रा आलस्यम् (हे. च.)

कौसुम—न., पु., पुष्पाञ्जनम् (रा. व. २२)

कौसुम्भतैल—न., कुसुम्भबीजोद्भवतैलम्। तच्च कटु सक्षारं वातघ्नं कफपित्तहरं च। (वा. टी.)

कौसुम्भशुण्डिका—स्त्री., स्वनामख्यातशालिः।

कौसुम्भीशाली——गुणाः— लघुपाकः वातपित्तघ्नश्च (रा. व. १९)

कौस्त—न., दशाब्दिकघृतम् (रत्ना.)

क्र

क्रकचपात् (पाद)—पु., कृकलासः (हारा.)

क्रकचपृष्ठी—स्त्री., कवयीमत्स्यः (हारा.)

क्रकण—पु., तित्तिरपक्षी। क्रकरपक्षी

क्रकराट्—पु., भरद्वाजपक्षी (वै. नि.)

क्रकौञ्च—पु., पक्षिविशेषः। (वै. नि.)

क्रतुपशु–पु., घोटकः। (हारा.)
क्रथनक-न., श्वेतागुरुकाष्टम् (श. च.)
क्रन्दन–पु., बिडालम् (श. मा.) न., रोदनम्। (श. र.)
क्रमण--पु., चरणम्। (हे. च.)
क्रमिकण्टक-न., विडङ्गः। उदुम्बरः। (मे.)
क्र (क्रि) मिज-न., अगुरुकाष्टम् (अम.)
क्र (क्रि) मिजा-स्त्री., लाक्षा (र. मा)
क्रमिरिपु-(शत्रु)-पु., विडङ्गम् (र. मा.) प्रवालतरुः (वै. नि)
क्रमीलक-पु., वनमुद्गः। (प. मु.)
क्रमु-पु., गुवाकवृक्षः। (भ.)
क्रमुकफल-न., गुवाकः (रा. व. ११) सन्धिबन्ध विश्लेषकरत्वात् विकाशि। (शार्ङ्ग)
क्रमुकी-स्त्री., गुवाकः। (श. र.)
क्रमेल-क-पु., उष्ट्रः (प. मु.। हला.)
क्रमोद्वेग-पु., वृषः (वै. नि.)
क्रयशीर्ष-न., कपिशीर्षम् (त्रिका.)
क्रयारोह-पु., हट्टः (त्रिका.)
क्रयिक-(क्रयी) पु., क्रेतरः (अम.)
क्रव्य-न., मांसम् (रा. व. १७)
क्रव्यघातन-पु., खगः (श. च.)
क्रव्यात्-पु., राक्षसः। मांसाशी (मे)
क्रव्याद-पु., राक्षसः (अम.) श्येनपक्षी सिंहः
क्रशिमा-पु., कृशता
क्रशीयान्-त्रि. अतिकृशम्। क्षीणम्
क्रान्ति-स्त्री., सूर्यगत्यर्थं खगोलमध्यस्थतिर्यग्गोलरेखा (सूर्यसि.)
क्रान्तु-पु., पक्षी (उणा.)
क्रामक-पु., क्रमुकमूलम् (र. सा. सं) लौहपुटपाकम्।
क्रिमिरिपु-(शत्रु) पु., (विडङ्गम्) (सा. कौ. बाहुशालगुडे) प्रवालम्। पालिधावृक्षः (श. च.)
क्रिमिशात्रव-पु., विट्खदिरः (श. च.)
क्रिमिशिरोरोग-पु., कृमिजशिरोरोगः (मा. नि.)
क्रिमिशैल-पु., वल्मीकं (त्रिका.)
क्रिमिहर-न., मरिचम्। विडङ्गम् कृष्णलवणम् (वै. नि.) (त्रि.,) क्रिमिघ्नम्)
क्रियातियोग-पु., वमनाद्यतियोगः (भा. म. ३. ख. कासचि.)
क्रियाबस्ति--स्त्री., वमनादिपञ्चकर्मसु प्रयोज्योबस्तिः (च) आ. सं. श. पू. १२
क्रियासाधन-न., चिकित्सासाधनम्
क्रियेन्द्रिय--न., कर्मेन्द्रियम् वाक्पाण्यादि (हे. च.)
क्रीडारत्न-न., मैथुनम् (त्रिका.)
क्रुङ (ञ्च)--पु., बकपक्षी (रत्ना.)
क्रुत् (धा) --स्त्री., क्रोधः(अम.)
क्रुश्वा-- पु., शृगालः (उणा.)
क्रूरक--पु., रक्तपुनर्नवा (रा.व. ९)
क्रूरदर्शना--स्त्री., श्वेतकाकमाची (वै. नि.)
क्रूरधूर्त--पु., कृष्णधुस्तूरः (रा. व. १०)
क्रूररव-पु., काकः। कर्कटपक्षी (वै. नि.) द्रोणकाकः
क्रूररावी--पु., ,, ,, (रा. व. १९)
क्रूरलोचन--पु., शनैश्चरः (हा. रा.)
क्रूरव-पु., शृगालः (वै. नि.)
क्रूरा-स्त्री., रक्तपुनर्नवा। (रा. व. ५)
क्रूरालापी-स्त्री., द्रोणकाकः (वै. नि.)
क्रोञ्च-पु., क्रौञ्चपक्षी (वै. नि.)
क्रोडकन्द-पु., वाराहीकन्दः (वै. नि.)
क्रोडकशे (से)(रु)(क)-पु., भद्रमुस्ता (वै. नि.)
क्रोडचूडा-स्त्री., मण्डूकपर्णी (रा. व. ५)
क्रोडपर्णी-स्त्री., कण्टकारिका (श. च.)
क्रोडपाद-पु., कच्छपः (हे. च.)
क्रोडपुच्छी-स्त्री., पृश्निपर्णी
क्रोडा (डी)-स्त्री., वाराहीकन्दः (रा. व. ७)
क्रोडाङ्घ्रि-पु., कच्छपः (त्रिका.)
क्रोडीकन्या-स्त्री., वाराहीकन्दः (वै. नि.)
क्रोडीमुख-पु., गण्डकः। (रा. व. १९)
क्रोथ-पु., हननः। (हे. च.)
क्रोधज-पु., मोहः (गीता)
क्रोधज्वर-पु., क्रोधजन्यज्वरः।
क्रोधना-स्त्री., ग्रन्थिपर्णीलता
क्रोधमूर्च्छित-पु., चोरानामकगन्धद्रव्यम् (श. र.) त्रि., अतिक्रुद्धः
क्रोधी-पु., महिषः (रा. व. १९) (त्रि.,) क्रुद्धम्
क्रोश-पु., ४००० हस्तपरिमाणम्
क्रोष्टा (ष्टुक) -पु., शृगालः, शृगालकोली
क्रोष्टुघण्टिका-स्त्री., अस्थिसंहारकः (मद. व. १)
क्रोष्टुविन्ना-स्त्री., पृश्निपर्णी (र. मा.) वृक्षविशेषः (अ. टी. भ.)
क्रोष्टुहित-पु., चोरानामगन्धद्रव्यम्
क्रोष्टू-स्त्री., वृश्चिकाली (प. मु.)

क्रोष्टेक्षु–पु., पुण्ड्रकेक्षुः श्वेतेक्षुः
क्रोष्ट्री–स्त्री., शुक्लभूमिकूष्माण्डः (अम.) लाङ्गलिका । शृगाली । पिप्पली (मे) वाराहीकन्दः (रा. व. ७) वृश्चिकाली (रत्ना.)
क्रौञ्चनायक–पु., पद्मबीजम् (वै. नि.)
क्रौञ्चलोहित–न., हिङ्गुलः (वै. नि.)
क्लमथ–पु., आयासः (अम.)
क्लान्ति–स्त्री., क्लमः
क्लिन्नाक्ष–त्रि., श्लेष्मादिना क्लिन्नचक्षुः न., (क्षि)–क्लिन्न-नेत्रम् (अ. म.)
क्लिशित–क्लिष्ट–त्रि–., क्लेशयुक्तः (अ. म.)
क्लिष्टि–स्त्री., क्लेशः सेवा (धरणि)
क्लेदा (दु)–पु., चन्द्रः सन्निपातः (उणा.)
क्लेश–पु., दुःखम् । क्रोधः । व्यवसायः (मे.)
क्लैतकिक–न., मद्यविशेषः (श. च.)
क्वङ्गु–पु., कङ्गुः (हे. च.)
क्वणन–पु., जलाधारविशेषः (त्रिका.)
क्वणितेक्षण–पु., गृध्रः (वै. नि.)
क्वथन–न., क्वाथकरणम्
क्वथिका–स्त्री., क्वाथः (वै. नि.)
क्वथित–त्रि., पक्वः । सृतः (पाचनादौ) (प. अ.)(न) माधवीमद्यम् । क्वाथः । कषायः ।
क्वथितजल–न., उष्णोदकम् पारिभाषिकं नाम
क्वथितद्रव्य–न., अरिष्टम् (वै. नि.)
क्वाथोद्भव–न., कर्परीतुत्थकम् कृत्रिमरसाञ्जनम् । कुलत्थाञ्जनम् (अ. म.)

क्ष

क्षणनिःश्वास–पु. शिशुमारः (श. र.)
क्षणरामी (इन्)–पु,. पारावतः (श. मा.)
क्षतकास–पु., पञ्चकासान्तर्गतकासरोगभेदः ।
क्षतकृत्–पु., भल्लातकवृक्षः (वै. नि.)
क्षतघ्न–पु., भूकदम्बः (श. च.)
क्षतविध्वंसी (इन्)–पु., वृद्धदारकलता (श. च.)
क्षतक्षीरी–स्त्री., तूलकः पु., इन् अर्कवृक्षः (वै. नि.)
क्षत्रपादप– (वृक्ष) पु., क्षीरिणीवृक्षः (वै. नि.) मुचुकुन्दवृक्षः (रा. व. १०)
क्षत्रिणी–स्त्री., मञ्जिष्ठा (रा, व. ९)
क्षपाकर–पु., } कर्पूरः (अम.)
क्षपापति– }
क्षमादंश–पु., शोभाञ्जनवृक्षः (रा. व. ७)

क्षयकास–पु., धातुक्षयजकासरोगः (मा. नि.)
क्षयज्वर–पु., धातुक्षयजन्यज्वरः । राजयक्ष्मज्वरः (च. द. ज्वरचि.)
क्षयतरु–पु., नन्दीवृक्षः (भा.)
क्षयथु–पु., क्षयरोगः
क्षयनाशिनी–स्त्री., जीवन्तीलता (प. मु.)
क्षर–न., जलम् (मे.)
क्षवका–स्त्री., सर्षपवृक्षः (वै. नि.)
क्षवतरु–पु., नन्दीवृक्षः (वै. नि.)
क्षवपत्र–न., क्षवकपत्रम् (च. द. परिणामशूलचि.) स्त्री., द्रोणपुष्पी (रा. व. ७)
क्षवस्तम्भ–पु., क्षवथुनिग्रहः (सा. कौ.)
क्षवा–स्त्री., सर्षपवृक्षः (वै. नि.)
क्षामदंश–पु., शिग्रुः (रा. व. ७)
क्षामास्य–न., अहितपथ्यादिः (श. च.)
क्षारदशक–न., दशविधक्षाराः, ते च शिग्रुमूलकपलाशा चुक्रिकाचित्रकार्द्रकनिम्बकेल्यापामार्गमोचाजाता इति (रा. व. १२)
क्षारदाह–पु., क्षारवृक्षभस्मजक्षारेण दाहः (ज. द. १४ अ)
क्षारद्रु–पु., घण्टापाटलावृक्षः (र. मा.)
क्षारद्वय (युग्म)–न., सर्जियवक्षारः । सर्जिका-यावशूकश्च क्षारद्वयमुदाहृतम् (भा.) ज्ञेयौ वह्नि-समौ क्षारौ सर्जिका यावशूकजौ (शार्ङ्ग. म. ६ अ.)
क्षारपत्र (क)–पु., न., बास्तुकशाकम् (भा. पू. १ भ. हे. च.) पालङ्कीशाकम् (वै. नि.)
क्षारमध्य–पु., अपामार्गवृक्षः (वै. नि.)
क्षारमृत्–पु., उषरभूमिः (रा. व. २)
क्षारराज–पु., टङ्कणक्षारः (र. सा. सं.)
क्षारबस्ति–पु. न. निरूहबस्तिभेदः (च. द. निरुह-बस्ति.)
क्षारसप्तक–न., सप्तक्षाराः सर्जिक्षारो यवक्षारष्टङ्कणश्च सुवर्चिका । पलाशसौर्यशिखरी क्षारसप्तकमीरितम् (रावण.)
क्षारसर्पि–न., क्षारपक्वघृतम्
क्षाराच्छ–न., सामुद्रलवणम् (हा. रा.)
क्षारिका–स्त्री., क्षुधा (हा. रा.)
क्षारोत्तम–पु., घण्टापाटलिका
क्षितिक्षम–पु., खदिरवृक्षः (रा. व. ८)

क्षितितलविधि-पु., पातालयन्त्रम् (प्र. र. सा. सं. शृङ्गाराभ्ररसे)
क्षितिनाग-पु., भूनागः (रा. व. १३)
क्षिप्त-त्रि., परस्मादस्थ उपरिगतम् अस्थि (भा. म. ३. भ. भग्नाधिकारे)
क्षीणकर-पु., कृशताजनकः
क्षीरक-पु., क्षीरमोरटलता
क्षीरकंचुकी-स्त्री., क्षीरीशवृक्षः (प. मु.)
क्षीरकण्ठ-(क) पु., शिशुः (हे. च. । त्रि. का.)
क्षीरकन्द-पु., क्षीरविदारी
क्षीरक्षव-पु., दुग्धपाषाणः (रा. व. १३)
क्षीरजल-न., क्षीरमिश्रजलम्(सि.यो.)(तृष्णाचि. श्रीकण्ठ)
क्षीरदल-पु., अर्कवृक्षः (रा. व. १०)
क्षीररस-पु., क्षीरसारः ।
क्षीरवान्-पु., क्षीरमोरटः (प. मु.)
क्षीरव्यापत्-स्त्री., अश्वस्यातिमात्रक्षीरभोजनजन्यविकारः लक्षणं यथा-क्षीरव्यापद् गृहीतोऽश्वो मन्दं पिबति खादति । निद्रालुर्वेदनार्तश्च ध्यायी गुरुशिरा भवेत् (ज. द. ६१ अ)
क्षीरशर-पु., दुग्धसरः । आमिक्षा (हे. च.)
क्षीरसन्तालिका-स्त्री., दुग्धविकारः, गुणाः- वृष्या स्निग्धा पित्तानिलघ्नी च (राज.)
क्षीरसार-पु., नवनीतम्; गुणाः- ईषत् श्लेष्मकरं गौल्यं पित्तघ्नं तर्पणं गुरु । पुष्टिश्चैवाभिधा तस्य क्षीरसारस्तु क्षीरसः । (रा. व. १५)
क्षीरस्फटिक-पु., स्फटिकविशेषः क्षीरतैलस्फटिकाभ्यामन्यौ च (स्फटिकाविमौ)
क्षीराङ्क-पु., सरलद्रवः (त्रिका.)
क्षीराब्धिज-न., सामुद्रलवणम् मुक्ता (मे.)
क्षीरामय-पु., स्तन्यदोषः (रस. र. बाल) चि.
क्षीराविका-(वी) स्त्री. दुग्धिका
क्षीराह्व-पु., सरलवृक्षः (त्रिका)
क्षीरिकन्द-पु., भूमिकूष्माण्डः (वै. नि.) (श्वासचि. राजिकादिगुटयाम्)
क्षीरिकषाय-पु., वटादिक्षीरवृक्षकषायः (सि. यो. दाहचि. श्रीकण्ठ.)
क्षीरीश-पु., स्वनामख्यातह्रस्ववृक्षः क्षीरकञ्चुकीति लोके (प. मु.)
क्षीरेयी-स्त्री., पायसम् (हला.)
क्षीरोदन-न., क्षीरपकान्नम् (नकुल ११ अ.)

क्षुज्जनिका-स्त्री., राजिका (भा. पू. १. भ. धा. व)
क्षुण-पु., रीठाकरञ्जवृक्षः (श. च.)
क्षुतक-पु., राजिका । रक्तसर्षपः (रा. व. १९)
क्षुतकरी-स्त्री., सर्पकङ्कालिका (श. च.)
क्षुता-स्त्री., छिक्किका (श र)
क्षुताभिजनन-(क) न. पु. कृष्णसर्षपः [भा. पू. १ भ. धा. व.)
क्षुद्र-पु., कैटर्यः (प मु) रक्तपुनर्नवा (वै. नि.) तण्डुलावयवः (उणा.) डहुकः (श. र.)
क्षुद्रक-श्वासरोगभेदः । कृमिशङ्खः (वै. नि.)
क्षुद्रकण्टकी-स्त्री., बृहती.
क्षुद्रकण्टिका-स्त्री., कण्टकारी (रा व ४) बृहती
क्षुद्रकन्द-पु. शृङ्गाटकः (प. मु.)
क्षुद्रकम्बु-पु. क्षुद्रकारवेली (वै. नि.) क्षुद्रशङ्खः (हे. च.)
क्षुद्रक्षुर-पु., क्षुद्रगोक्षुरः (रा. व. ४)
क्षुद्रखर्जूरी-स्त्री., भूखर्जुरीका
क्षुद्रगोधूम-पु., सूक्ष्मगोधूमः (वै. नि.)
क्षुद्रघोली-स्त्री., चिविल्लिका (रा. व. ७)
क्षुद्रचुञ्चु-पु., स्वनामख्यातह्रस्वक्षुपः । (म-लहानचञ्चु, नाड्चञ्चु) गुणाः-मधुरः कटुः उष्णः कषायः दीपनः शूलगुल्मार्शोविबन्धघ्नश्च (रा. व. ४)
क्षुद्रचूड-पु., सचूडक्षुद्रपक्षी (श. च.)
क्षुद्रजम्बू-स्त्री., जलजम्बुः (हिं-जामुनी नदीजामुनी) गुणाः -जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित् (भा.)
क्षुद्रजीर-पु., क्षुद्रजीरकम् ।
क्षुद्रतण्डुल-पु., विडङ्गः (वै. नि.)
क्षुद्रदंशिका (शी)-स्त्री., क्षुद्रदंशः (जटा.)
क्षुद्रद्रु-पु., कुमरिचवृक्षः (प. मु.)
क्षुद्रधान्य-न., कुधान्यापरनामतृणधान्यम् । तानि यथा श्यामाकः कोद्रवः कङ्गुर्मर्कटी कपिकच्छुरा क्षुद्रधान्यमिदं प्रोक्तम्... । (अत्रि.)
क्षुद्रधान्यमण्ड-पु., न., कुधान्यकृतमण्डः । गुणाः— अन्येषां क्षुद्रधान्यानां मण्डं वातहरं स्मृतम् (अत्रि. १२ अ.)
क्षुद्रधान्याम्ल-न., क्षुद्रधान्यकृतकाञ्जिकविशेषम् गुणाः —तद्वच्च क्षुद्रधान्याम्लं वातलं पित्तकारकं । करोति श्लीपदं गुल्मं प्रतिश्यायादिकोपनम् (अत्रि. १२ अ)
क्षुद्रनासिक-त्रि., नतनासिका । (हे. च.)
क्षुद्रपञ्चक-पु., स्वल्पपञ्चमूलम् (सू. चि. २४ अ.)
क्षुद्रपत्रा-स्त्री., चाङ्गेरी (हारा.) लघु ब्राह्मी (रा. व. ५)

क्षुद्रपत्रिका-स्त्री., श्वेतपुनर्नवा (वै. नि.)
क्षुत्रपत्री-स्त्री., वचा (रा. व. ९)
क्षुद्रपनस-पु., लकुचवृक्षः (भा.)
क्षुद्रपाटला-स्त्री., मुष्ककवृक्षः (वै. नि.)
क्षुद्रपाषाणभेद-(दा) पु. स्त्री. ह्रस्वपाषाणभेदक्षुपः। गुणाः-व्रणकृच्छ्राश्मरीघ्नः (रा. व. ५)
क्षुद्रफलक-पु, जीवनवृक्षः (श. च.)
क्षुद्रभण्टाकी-स्त्री., बृहतीक्षुपः (वै. नि.)
क्षुद्रमत्स्य-पु., मुरलादिमत्स्यः (वै. नि.)
क्षुद्रमूषिका स्त्री., अञ्जनिका (जटा.)
क्षुद्रमोरट-पु., क्षुद्रमोरटः (वै. नि.)
क्षुद्रमोरटक-पु., टङ्कद्वयम् (प. प्र. १ ख)
क्षुद्रवंशा-स्त्री., वराहक्रान्ता (शब्दकल्प)
क्षुद्रवज्रक-न., वैक्रान्तमणिः (प. मु.)
क्षुद्रवर्वणा-स्त्री., वराटा (रा. व. १९)
क्षुद्रवारुणी-स्त्री., तुषधान्यकृतवारुणीमद्यम् । यथा- सर्वं संक्षुद्य यत्नेन वितुषीकृत्य यत्नतः । तक्रे वा क्वचिदम्ले वा आकीटं तद्विनिःक्षिपेत् ! ततो निष्काशयेदर्कं भवेत् सा क्षुद्रवारुणी । गुणाः- क्षुधादिवर्धकं बलवर्धकञ्च (अर्कचि.)
क्षुद्रवार्ताकी-स्त्री., बृहती (अम.)
क्षुद्रशङ्ख-शङ्खविशेषः (रा. त्रि. व. १६)
क्षुद्रशार्दूल-पु., चित्रकव्याघ्रः (रा. व. १९)
क्षुद्रशीर्ष-पु., मयूरशिखा (श. च.)
क्षुद्रशुक्ति-स्त्री., ह्रस्वशुक्तिः (रा. व. १३)
क्षुद्रश्यामा-स्त्री., कृष्णकटभीवृक्षः (रा. व. ९)
क्षुद्रश्लेष्मान्तक-पु., ह्रस्वश्लेष्मातकवृक्षः (रा. व ११)
क्षुद्रस्फोटा-स्त्री., क्षुद्रस्फोटकाः (रा. व. २०)
क्षुद्रहिङ्गुलिका (ली)-स्त्री., कण्टकारी (श. च.)
क्षुद्राण्डमत्स्यसंघात-पु., पोताधानः (अम.)
क्षुद्रादि-पु., कण्टकार्यादिद्रव्यचतुष्टयकृतकषायः वात-श्लेष्मज्वरेहितः (च. द. ज्वरचि.) अन्यः सामान्य-ज्वरे हितः । यथा—क्षुद्रामृताभ्यां सह नागरेण सपौष्करञ्चैव किराततिक्तम् । पिबेत् कषायन्त्विह पञ्चतिक्तम् (सं.)
क्षुद्राफल-न., बृहतीफलम् (र. सा. सं.) (गन्धकयोगे)
क्षुद्रामलकसंज्ञ-पु., कर्कटवृक्षः (रा. व. ११)
क्षुद्राम्बुपणस-पु., डहुकफलः (त्रिका.)
क्षुद्राम्लपनस-पु., लकुचवृक्षः (त्रिका.)
क्षुद्रोदुम्बरिका-स्त्री., काकोदुम्बरिका

क्षुद्रापोदकनाम्नि-स्त्री., क्षुद्रोपोदकी
क्षुद्रोपोदकी-स्त्री.,क्षुद्रपत्रोपोदकी (रा. व. ७)
क्षुद्रोलूक-क्षुद्रपेचकः (रा. व. १९)
क्षुद्विबोधन-पु., क्षवकवृक्षः (वा. सू. १५ अ.) (सुरसादिगण)
क्षुधित-वि., जातक्षुधः (अम.)
क्षुप-पु.,क्षुद्रवृक्षः । गुल्मः (अम.)
क्षुपडोडमुष्टि-पु., विषमुष्टिः (रा. व. ४)
क्षुरकबीज-न., कोकिलाक्षबीजम् (प्र. भीमनाथरसे । भैष. वाजी. चि. रतिवल्लभमोदक)
क्षुरबीज-न., कोकिलाक्षबीजम्. शतावरीमोदकः (च.द. वातरक्तचि. अमृताद्यघृत)
क्षुरभाण्ड-न., नापितस्य क्षुररक्षणाधारः (शब्दकल्प)
क्षुरमर्दी (इन्)-पु., नापितः (हे. च.)
क्षुरिका-स्त्री., पालङ्कशाकम् (प. मु.)
क्षुरिणी-स्त्री., वराहक्रान्ता (श. च.)
क्षुरी (इन्)-पु., स्त्री., (णी) क्षौरकारः तत्पत्रञ्च (अम.) स्त्री., छुरिका (हे. च.)
क्ष्वेडकन्द-पु., करवीरवृक्षः [प. मु.]
क्षेत्रपर्पटी-स्त्री., पर्पटकः [शब्दकल्प]
क्षेत्रयमानिका-स्त्री., वनयमानी [त्रिका.]
क्षेत्रवित्-पु., परमार्थतत्त्वज्ञानी जीवात्मा [भागवतन]
क्षेत्रसंभूत-पु., कुन्दुरुतृणम् [रा. व. ८]
क्षेत्रामलकी-स्त्री., भूम्यामलकी [श. मा.] मुषली [प. मु.]
क्षेत्रिय-न., शाकम् । घासम् , परदेहचिकित्सा (मे.)
क्षेमङ्करी-स्त्री., शङ्करचिल्ली (शब्दकल्प)
क्षे (म) माफला-स्त्री., उदुम्बरवृक्षः [श. च.]
क्षेमिका-स्त्री., हरिद्रा (च. चि.) (३ अ. अगुरुतैले)
क्षोदित-न., चूर्णम् श. च. ((त्रि.) चूर्णितम्
क्षोम-न., अतसीवस्त्रम् (अम.) (सु. चि. १ अ.)
क्षौणीध्रज-न., शैलजः (भैष.) वातव्याधिचि. (गन्धद्रव्य-कथने)
क्षौद्र-पु., चम्पकवृक्षः । (ज. द. । श. च.)
क्षौद्रसाह्वय-न., वटमाक्षिकम् (वा. उ. ३५ अ.)
क्षौद्रेय-न., सिक्थम् (रा. व. १३)
क्षौमी-स्त्री., अतसी (र. मा.)
क्षौर-न., मुण्डनकर्म (हे. च.) गुणाः--केशश्मश्रुनखा-दीनां कर्तनं संप्रसाधनम् । (रा. ।)
क्ष्वेडन-न., वेणुघोषतुल्यस्वरः

ख

खक्खट-पु., खडिका (अ. टी. रा.)
खखास-पु., वृक्षभेदः (प्रयोगा. उ. मा. चि.)(मदनरसे)
खखोल्क-पु., सूर्यः (वै. नि.)
खगम-पु., पक्षी
खगवक्त्र-पु., लकुचवृक्षः (श. च.)
खगशत्रु-पु., पृश्निपर्णी (श. च.)
खगस्थान-न., वृक्षकोटरः (श. च.)
खगान्तक-पु., धूम्याटपक्षी । (वै. नि.) श्येनः (रा. व. १९)
खगेन्द्र-पु., गृध्रः (वै. नि.)
खगो (ग्ग) ड-पु., स्वनामख्याततृणविशेषम् (र.मा.)
खग्गट-पु., कोकिलाक्षवृक्षः (वै. नि.)
खङ्गाह-पु., खङ्गाहापरनाम्नः श्वेतपीताश्वः । खङ्गाहश्वेतपीतकः (ज. द. ३ अ.)
खचमस-पु., चन्द्रः (त्रिका.)
खचर-पु., न., पक्षी । वायुः । सूर्यः; । (वै. नि.)
खजप-न., घृतम् (उणा.)
खजल-न., तुषारः (त्रिका.)आकाशजलम् तत्तु अगस्त्योदयात् प्राक् न सेव्यम् । यथा-' वर्षासु चरन्ति घनैः सहोरगाः वियति कीटलताश्च । तद्विषजुष्टमपेयं जलमगस्त्योदयात् पूर्वम् (राज.)
खजाक-पु., पक्षी. (उणा.)
खज्योति-पु., खद्योतः (रा. व. १९)
खञ्जकारि-पु., सुस्रा शिम्बीधान्यविशेषः (रा. व. १९)
खञ्जखेट-(ल)-पु., खञ्जनपक्षी (श. मा. त्रि. का.)
खञ्जना(निका)-स्त्री., क्षुद्रखञ्जनतिः जाता हापुत्रिका (मे.)
खञ्जनाकृति-पु., खञ्जना (श. च.)
खट(टि)क-पु., कुञ्चितपाणि (श. मा.)
खटखादक-पु., काकः । काचपात्रम्, शृगालः (वै. नि.) (त्रि.,) भक्षकः ।
खटाल-पु., तण्डुलीयवृक्षः (वै. नि.)
खटी-स्त्री., कठिनी; गुणाः- मधुरा तिक्ता शीतला पित्तदाहव्रणदोषघ्नी कफरक्तनेत्ररोगहरी च (रा. व. १३) ' खटिका दाहजिच्छीता मधुरा विषशोथजित् । लेपादेतद्गुणा प्रोक्ता भक्षिता मृत्तिकासमा । खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्तिते (भा. पू. १ भ.)
खट्टन-पु., खर्वः (हे. च.)
खट्टा-स्त्री., खट्वा (श. च.)
खट्टाश(शी)स-पु., स्त्री., सुगन्धमार्जारः । यस्याण्डेन तैलं सुवासितं क्रियते (त्रिका. जटा.) तस्याण्डं खाटाशी इति उच्यते । शुद्धो मृगनाभिसमो भवति (च. द. भैष. वातव्याधि.चि.)
खट्टिक-पु., शाकुनिकम् (श. मा.) महिषीक्षीरफेनः ।
खट्टिका-स्त्री., क्षुद्रखट्टा (त्रिका.)
खट्टेरक-त्रि., खर्वः (श. मा.)
खट्वाबन्ध-पु., न., व्रणबन्धनाकृतिविशेषः (सु. उ.)
खडिका (डी)-स्त्री., खटिका (जटा.) शुक्लमृत्तिका (श. च.)
खड्ड-पु., मृतशय्या (उणा.)
खङ्गकोष-(पत्र)-पु., खङ्गलता (श. च.)
खङ्गट-पु., बृहत्काशतृणम् (हारा)
खङ्गधेनु-स्त्री., गण्डक छुरिका (मे.)
खङ्गमांस (ङ्गामिष)-न., गण्डकमांसम्
खङ्गिक-पु., महिषीक्षीरफेनः । (मे.)
खङ्गिमार-पु., खङ्गकोषलता (श. च.)
खडडक-पु., देवताडवृक्षः (प. मु.)
खण्डकर्ण-पु., आलुविशेषः । गुणाः-कटुपाकीखण्डकर्णः कफपित्तविनाशनः । (रा. ३ प.) शाकविशेषः (च.द.)
खण्डका-स्त्री., यवासशर्कराविशेषः । (वै. नि.)
खण्डकाद्यलौह-न., रक्तपित्ते हितम् । (रस. र.)
खण्डकालु (क)-न., खण्डकर्णालुकः । (श. च.)
खण्डकूष्माण्ड-न. पु., } रक्तपित्तेहितम् (भा.)
खण्डकूष्माण्डावलेह- } खण्डशः कृतं निष्कुलीकृतं पुराणकूष्माण्डशस्यम्
खण्डखर्जूर-न., स्वनामख्यातपक्वान्नविशेषः ।
खण्डज-पु., खण्डः । गुडः (जा) यवासशर्करा (रा. व. १४)
खण्डजोद्भव-पु., तवराजोद्भवखण्डः (रा. व. १४)
खण्डधारा-स्त्री., कर्तरी [श. मा.]
खण्डन-पु., छेदनम् । भेदनम्
खण्डनील-पु., खण्डकर्णालुकः (र. मा.)
खण्डपरशु-(पर्शु) पु., खण्डामलकभैषजम् ?
खण्डपाल-पु., मोदकः (हारा.)
खण्डपाश-पु., धातकीपुष्पशर्कराजातं मद्यम् (वै. नि.)
खण्डपिप्पली-स्त्री., अम्लपित्ते पिप्पलीखण्डः प्रशस्तः (भैष.)
खण्डर-पु., यवासशर्करा
खण्डराजी-स्त्री., बाकुची (वै. नि.)

खण्डवल्ली-स्त्री., काण्डवल्ली (वै. नि.)
खण्डविकार-पु., शर्करा (वै. नि.)
खण्डविन्दु-पु., सर्पजातिभेदः (अत्रि. ५६ अ ३ स्थान)
खण्डशाखा-स्त्री., महिषवल्ली [रा. व. ३]
खण्डशुण्ठी-[शुण्ठीखण्ड] स्त्री., अम्लपित्ते हिता (रस. र.)
खण्डाम्र-क न., वाजीकरणौषधभेदः (वै. नि.)
खण्डाली-स्त्रीं., तैलमानपात्रम् (वै. नि.)
खण्डितकर्ण-पु., खण्डकर्णालुः खारकोण इति ख्यात-शाकः (रसेन्द्रगुडो)
खण्डी-(इन्) पु., वनमुद्गः (हे. च.)
खण्डीर-पु., पीतमुद्गः (हे. च.)
खण्डोपल-पु., खडीशर्करा
खतमाल-पु., धूमः (मे.)
खदन-न., भोजनम्
खदिका-स्त्री., खधि ।
खदिरवल्लरी-स्त्री., अरिखदिरः। (हिं-मट्टिकफल । (ली) द्रुमोत्पलम् (वै. नि.)
खदिरा-स्त्री., लज्जालुकालता (रा. व. ५)
खदिरादिपञ्चतिक्तकघृत-न., कुष्ठे घृतम् हितम् (रसर.)
खदिराष्टक-पु., मसूराधिकारे कषायः । खदिरत्रिफला-रिष्टपटोलामृतवासकैः क्वाथोऽष्टकाङ्गो जयति रोमान्तिकामसूरिकाः । (च. द.)
खदिरिका-स्त्री., लाक्षा (रा. व. ९) लज्जालुका (वै. नि.)
खदिरी-स्त्री., वराहक्रान्ता (प. मु.)
खदिरीबीज-न., अशोकबीजम् (च. द.) 'जलेन खदिरीबीजम्'
खदिरोपम-पु., बर्बूरकवृक्षः (वै. नि.) कदरम् (र. मा.)
खदूरक-पु., वामनः ।
खनक-पु., मूषिकः (त्रिका.) वनमूषिकः । (वै. नि.)
खनिजौषध-न., रसोपरसधातुलवणरत्नानि पञ्चविधानि-खनिजद्रव्याणि । (वैद्यकम्)
खनित्र-न., अस्त्रविशेषम् (अम.)
खनिसम्भव-पु., स्वर्णम् (वै. नि.)खनिजम् ।
खपुष्प-पु., पनसवृक्षः (वै. नि.)
खभ्रान्ति-पु., चिल्लपक्षी (त्रिका.)
खमणि-पु., सूर्यः (वै. नि.)
खमीलन-न,, तन्द्रा (श. र.)
खमूलि-(का)-स्त्री., कुम्भिका (श. र.)
खरकुटि-(टी)-स्त्री., नापितशाला (त्रिका.)
खरको (क्का) ण-पु., तित्तिरपक्षी (हे. च.)
खरगृह (ग्रह)-न., गर्दभशाला (त्रिका) गेहम् (श. र.)
खरघातन-पु., नागकेशरवृक्षः (श. च.)
खरच्छद-पु., उलूकनामतृणम् इत्कटनामक्षुद्रक्षुपः (र. मा.) कुन्दुरुतृणम् (रा. व. ८) भूमीसहवृक्षः (भा.) शाकवृक्षः । शाकोटवृक्षः रक्तापामार्गः (वै.नि.)
खरच्छदा-स्त्री., त्रिपुरमल्लिका (प. मु.) चिविल्लिका (रा. व. ५)
खरटी-स्त्री., रङ्गधातुः (वै. नि.)
खरतुण्वक-पु., लज्जालुका (भा.)
खरत्वक्-स्त्री., अलम्बुषा लज्जालुकाभेदः (भा.)
खरदंष्ट्रा-स्त्री., गोक्षुरक्षुपः (ज. द.)
खरदण्ड-न., पद्मम् (धरणि)
खरदला-स्त्री., श्यामालता काष्ठोदुम्बरः । (श. च.)
खरदूषण-पु., न., धुस्तूरवृक्षः (फलम् च) (श. च.)
खरधन्विका-स्त्री., गोरक्षतण्डुला (प. मु.)
खरनादिनी-स्त्री., रेणुकः । (श. च.)
खरपत्रक-पु., तिलवृक्षः । (श. च.)
खरपल्लव-पु., शाखोटकवृक्षः । (प. मु.)
खरपाच्य-पु., कपित्थवृक्षः ।
खरपात्र-न., लौहपात्रः । (त्रिका.)
खरपादाढ्य-पु., कपित्थवृक्षः । (श. च.)
खरप्रिय-पु., पारावतः । (श. मा.)
खरराह-पु., मुखपुण्ड्रेकेण युक्तः खङ्गाहाश्वः । खरराहः खङ्गाहः (ज द ३ अ.)
खररोमा-पु., नागविशेषः ।
खरवल्लिका-स्त्री., } गोरक्षतण्डुला (रमा)
खरवल्लरिका- }
खरशब्द-पु. कुररपक्षी (रा. व. १९)
खरशाक-पु., भार्गी (भा.)
खरसोन्द-पु., लौहपात्रभेदः (त्रिका.)
खरस्पर्शा-स्त्री., पीतदेवदाली (भा.त्रि.) (शं.) गोजिह्वादि-वत्खरः (मा. नि.)
खरस्वरा-स्त्री., वनमल्लिका (र. मा.)
खरा-स्त्री., पीतदेवताडः । (भा.)
खरागरी-स्त्री., पीतदेवताडवृक्षः । (अ. टी. रा.)
खराग्नि-पु., अर्कनिष्कासनार्थं तीक्ष्णाग्निविशेषः । (रावण)
खरिका-स्त्री., नेपालजचूर्णाकृतिकस्तूरीभेदः (रा. व. १२) द्र० कस्तूरी ।
खरु-पु., घोटकः दन्तः (त्रि.,) श्वेतः (त्रिका.)

खरुवक-पु., श्वेतमरुवकवृक्षः (वै. नि.)
खर्जिका-स्त्री., अवदंशम् (श. च.)
खर्जु-र्जू पु., पिण्डीखर्जूरवृक्षः उणा. खर्जु. (रा. व. २०)
खर्जूरफलक-पु., गोधूमविशेषः (वै. नि.) खजूरीफलम्
खर्परतुत्थ-न., खर्परीतुत्थम् (वै. नि.)
खर्परवटिका-स्त्री., ग्रहण्यधिकारेहिता (र. कौ. मेष)
खर्पराल-पु., अश्वत्थविशेषम् [म. लाखी पिंपरी] (वै. नि.)
खर्परिका (री) तुत्थक-न., नेत्रप्रसाधनविशेषम् तुत्थाञ्जनम् कृत्रिमरसाञ्जनम्, गुणाः- कटु तिक्तं चक्षुष्यं रसायनं त्वग्दोषघ्नं दीपनं बलपुष्टिकरञ्च (रा. व. १३) खर्परम् (म. कलखापरी)
खर्परीयक-न., खर्परीतुत्थम् खर्परम् (वै. नि.)
खर्परीरसक-खर्परीतुत्थम् (रा.व.) खर्परम् (वै.नि.)
खर्बशाख-स्त्री., वामनः (हे.च.)
खर्बु [र्बू] रा-पु., न., नदीनिष्पावः [रा. व. १६]
खर्बु [र्बू] र-स्त्री., तरदीवृक्षः [रा. व. ८]
खर्बूज-न., तन्नामकफलविशेषः । गुणाः—मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु । स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम् । तेषु यच्चाम्लं मधुरं सक्षारञ्च रसाद्भवेत् । रक्तपित्तकरं तत्तु मूत्रकृच्छ्रकरं परम् (भा.)
खलकाम्बलिक-पु., तिलकल्कः (वै. नि.)
खलमूर्ति-पु., पारदः (श. च.)
खलयूष-पु.' खण्डयूषः ।
खलाधारा-स्त्री., तैलपायिका (जटा.)
खलिद्रुम-पु., सरलदेवदारुः (वै. नि.)
खलि (ली) न-पु., न., खली (अ टी रा)
खलिनी-स्त्री., कृष्णतालमूली (वै.नि.) खलसमूहः (अम.)
खलिश-पु., मत्स्यविशेषः (हारा.) गुणाः—ग्राहित्वं कषायत्वं वायुकोपनत्वं रूक्षत्वं लघुत्वं शूलहरत्वं किञ्चिदामघ्नत्वञ्च (राज. ३. प.) (रा. व. १९)
खलेशय- ,, ,, ,, ,,
खलुरेष-पु., मृगविशेषः (श. च.)
खलेधानी-स्त्री.,खले पशुबन्धनदारुः (जटा.)
खलेवाली-स्त्री., खले गोबन्धनकाष्ठम् (हे. च.)
खल्लकी-स्त्री., शर्करा (वै. नि.)
खल्लि (ल्ली) ट-त्रि., खली (श. र.) (त्रिका.)
खल्वट-पु., कासरोगः (वै. नि.)
खल्वाट-पु., खली (हे. च.)
खल्वुका-स्त्री., नाभिशङ्खः । (र. सा. सं.)

खवल्ली-स्त्री., अ.काशवल्ली (रा. व. ३)
खवारि-न., आन्तरिक्षोदकम् । (रा. व. १४)
खवास्प-पु., हिमम् । (हारा.)
खशब्दाङ्कुर-पु., न., वैदूर्यमणिः (रा. व. १३)
खशा-स्त्री., मुरामांसी । म-मरवा । (श. च.)
खशेट-पु., खलिसमत्स्यः (त्रिका.)
खश्वास-पु., वायुः (त्रिका.)
खस-पु., पामा । वीरणमूलम् (वै. नि. वातव्याधिचि.)
खसकन्द-पु., वाराहीकन्दः । (वै. नि.) क्षीरीशवृक्षः (प. मु.) क्षीरकञ्चुकीवृक्षः । (र. मा.)
खसगन्ध-पु., क्षीरकञ्चुकी (रमा.)
खसतिल-पु., खस्खसः । गुणाः-तिलभेदः खसतिलः कासश्वासहरः स्मृतः । (भा.)
खसफल-न., खस्खसम् (वै. नि.)
खसम्भवा-स्त्री., आकाशमांसी (रा. व. १२)
खसर्पणवटी-स्त्री., ग्रहण्यधिकारे हितम् द्र० खर्परवटिका।
खसबीज-न., खस्खसम् (हिं-खाखसदाना) गुणाः- बल्यं वृष्यं सगुरु कफकरं वातशमनञ्च (भा.)
खस्खससार-(क्षीर)-पु. न. अहिफेनम् (वै. नि.)
खस्फटिक-पु., चन्द्रकान्तमणिः । सूर्यकान्तमणिः । (वै. नि.)
खाखस-(तिल)-पु., खसतिलः ।
खाखसतिलोभ्दूत-न., खस्खसम् (वै. नि.)
खाजिक-पु., लाजा (हारा.)
खाटि-स्त्री., किणम् (मे.)
खाड (ण्ड) व-पु., मधुराम्ललवणनानासुगन्धिद्रव्यकृतखाद्यविशेषम् (शिवदास.) द्वीपान्तरखर्जूरम् (वै. नि.)
खादनकोष्ठक-न., अश्वस्य द्विहस्तोन्नतभोजनपात्रम् (नकुल. १८ अ.)
खादिरसार-पु., खदिरः । गुणाः—कटुत्वं तिक्तत्वं उष्णत्वं कफवातव्रणकण्ठामनाशित्वं रुचिकरत्वं दीपनत्वं च (रा. व. ८)
खाद्यपत्री-स्त्री., खदिरवृक्षः (रा. व. ८)
खानि-स्त्री., खनिः (हे. च.)
खानिक-न., कुड्यच्छेदः (त्रि. का.) रत्नम् (वै. नि.)
खानोदक-पु., नारिकेलः (त्रिका.)
खापगा-स्त्री., गङ्गा (हे. च.)
खार-पु., खारीपरिमाणम्
खार्जूरसुरा-स्त्री.,खर्जूरधातकीपुष्पकृतसुराविशेषा (वै.नि.) खर्जूरमद्यम्

खाश्मरी-स्त्री., गाम्भारीवृक्षः (वै. नि.)
खिखि-पु., शृगालविशेषः (मे.)
खिङ्खिर-पु., खिखौ (मे.) वारिवालकम् (विश्व. हे. च)
खिच्चा-स्त्री., खेचरिकान्नम् (वै. नि.)
खिदिर-पु., चन्द्रः (वै. नि.)
खिद्र-पु., रोगः (उणा.)
खिरहिट्टि-पु., महासमङ्गानाम क्षुपः । (रा. व. ४)
खिलाह-पु., पाण्डुकेसरपुच्छः कपिलवर्णाश्वः (ज.द.३ अ)
खुङ्गाह-पु., श्वेतपीतवर्णाश्वः खङ्गाहः श्वेतपीतकः (ज. द. ३ अ)
खुज्जा (ज्ञा) क-पु., देवताडवृक्षः (र. मा.)
खुडक-पु., गुल्फः (सु. नि. १ अ.)
खुड्डाकपद्मकतैल-न., वातरक्ते तैलम् (रस. र. । च. चि. २८ अ.)
खुरणस-त्रि., चिपिटनासः (अ. म.)
खुरसाना-स्त्री., खोरासनीयमानी (वै. नि.) पुं., खोरासानदेशीयोत्तमाश्वः ' ताजिकाः खुरसानाश्च तुषाराश्चोत्तमा हयाः (नकुल)
खुराक-पु., यवनालः पशुः (वै. नि.)
खुरालिक-पु., नापितभण्डी उपधानम् (मे)
खुरासनी-वचा-स्त्री., तद्देशीयवचा (म श्वेतवेखण्ड) (वै. नि.)
खुरासानी-यमानी-स्त्री., यमानीभेदः खुरमाण इति महाराष्ट्रादौ (वै. नि.)
खुरिकापत्र-पु., केनी नामकंपत्रशाकम् म. केनी (वै.नि.)
खुलक-पु., जङ्घापादयोः सन्धिः (सु. चि १८ अ.)
खुल(ल्व) का स्त्री., नाभिशङ्खः (र.सा. सं)
खुल्ल-न., नखीनामगन्धद्रव्यम् (श. च.)
खुल्लक-स्त्री., स्वल्पम् (अ. टी.)
खेगमन-पु., कालकण्ठपक्षी श. मा.
खेचरा-स्त्री., आकाशवल्ली (वै. नि.)
खेचराञ्जन-न., काशीषम् (वै. नि.)
खेचरान्न-न., खेचरिका (पाकराजः)
खेदिनी-स्त्री., अशनपर्णीवृक्षः (श. च.)
खेला-स्त्री., स्वनामख्यातक्षुपः । गुणाः—मधुरा शीता स्तन्यदा रुचिकृच्च (रा. व. ५)
खेसर-पु.,अश्वतरः (रा. व. १९)
खोङ्गा (ङ्गा) ह-पु., श्वेतपिङ्गलवर्णाश्वः (हे. च.)
खोटि. (टी)-पु., स्त्री., कन्दुरखोटी । (च. द. वातव्याधिचि.) पालङ्कीवृक्षः (श. च.)
खोड-र-(ल) -त्रि., खञ्जः (अम.)
खोरक-पु., गर्दभज्वरः (गजवै.)
खोलक-पु., वल्मीकम् । शिरस्त्राणम् (त्रिका.) पूगकोश (मे.)
खोली-स्त्री., तूणम् (श. मा.)

ग

गगनमारकगण-पु., अभ्रकमारकद्रव्यम् ।
गगनसुन्दर-पु., ग्रहण्यां रसः हितः (र. चि. भैष.)
गगनस्पर्श-पु., वायुः । (वै. नि.)
गगनादिलौह-न., सोमरोगे हितम् । (र. सा. सं.)
गगनादिवटी-स्त्री., वातरोगे हिता । (र. सा. सं.)
गङ्का (ङ्गा) का-स्त्री., स्वनामख्याता नदी । तजलगुणाः-शीतं स्वच्छं स्वादु अतिरोचकं पथ्यं पावनं तृष्णामोहघ्नं दीपनं प्रज्ञाकरञ्च । (रा. व. १४) लज्जालुका (वै. नि.)
गङ्गाचिल्ली-स्त्री., चिल्लविशेषः । (हारा.)
गङ्गाटेय-पु., चिङ्गटमत्स्यः (त्रिका.) द्र. चिङ्गटः ।
गङ्गाधरक्काथ-पु.,अतीसारे कच्चटाद्यपरनामकषायः ।(भा.)
गङ्गाधरचूर्ण-(बृहत्)न., अतीसारे औषधम्(भा.म.१भ.)
गच्छ-पु., वृक्षाः । (हे. च.)
गजकन्द-पु., हस्तिकन्द नाम महाकन्दशाकम्
गजकर्णा (र्णी)-स्त्री., करिकर्णवत्पत्रकन्दशाकविशेषम् (हिं-हस्तिकर्णा । गुणाः-तिक्ता उष्णा वातकफहरा पाके स्वादुः शीतज्वरघ्नी पाण्डुशोथक्रमिप्लीहगुल्मानाहोदरघ्नी वनशूरणवत् ग्रहण्यर्शोघ्नी च । (भा. पू. १ भ.) (शाकवर्गः) आखुकर्णी लता (रा. व. ३)
गजकुसुम-पु., न., नागकेशरवृक्षः तत्पुष्पं च (भेष. मुखरोगचि. अरिमेदागुडी)
गजकेश (स) र-पु., नागकेशरम् (सि.यो. छर्दिचि. एलादिगुडौ)
गजकेश (स) रीरस-पु., आमज्वरादौ रसः (रस. कौ.)
गजजाति-स्त्री., हस्तिजातिः सा त्रिधा भद्रः मन्द्रः मृगश्चेति
गजदन्त-पु.. करिदन्तः (वै. नि.) एतन्मशी श्वित्रघ्नी
गजदन्तवत्-न., मूलकम् (वै. नि.)
गजदन्तिका-स्त्री., हस्तिदन्ता (वा. उ. ३६ अ.)
गजद्रुम (पादप) पु., नन्दीवृक्षः (हिं. बालिया पिंपळ.)
गजप्रिया-स्त्री., शल्लकीवृक्षः (हे. च.)
गजबला-स्त्री., गोरक्षी
गजमदहरणी-स्त्री., शिवलिङ्गिनी लता (वै. नि.)
गजमाचल (मोटन)-पु., सिंहः (हारा. । श. मा.)
गजमुक्ता-स्त्री., करिगण्डस्थमुक्ता (वै. नि.)

गजल (ले) ण्ड-पु., हस्तिविष्ठा (भैष. कुष्ठचि । सु. चि. ९ अ)

गजवाजिप्रिया-स्त्री., भूमिकूष्माण्डम् (वै. नि.)

गजवैद्यक-न., पालकाप्य (व्य) कृत गजचिकित्सा-शास्त्रम् (चरकः)

गजादन-पु., अश्वत्थवृक्षः (र. मा.)

गजादिनामा-स्त्री., गजपिप्पली (सु. चि. १८ अ)

गजारि-पु., गजमादनशल्लकीवृक्षः चन्द्रः (हड्डु चन्द्रः)

गजाह्व-पु., न., नागकेशरवृक्षःतत्पुष्पञ्च (च. द. अर्शचि. बाहुशालगुडे)

गजाह्वया-स्त्री., यूथिकाक्षुपः (रा. व. १०) गजपिप्पली (भा. पू. १ भ.)

गजोपकुल्या-स्त्री., गजपिप्पली (वै. नि. २ भ. ग्रहणी. चि. । भैष. कुष्ठ. चि.)

गजोपम-पु., कुमारिः (वै. नि.):

गञ्जा (ञ्ज्ञा) (ञ्जिका)-स्त्री., मद्यभाण्डम् (श. र.) मदिरागृहम् (अम.) रत्नखनिः (मे.) गुञ्जा (वै. नि.) गांजा इति प्रसिद्ध वणिक्द्रव्यम्

गञ्जायिका-स्त्री., शक्राशनम्

गड-(क)-पु., मत्स्यभेदः (मे) गुणाः—मधुरः रूक्षः कषायः शीतः लघुश्च । (राज. ३ प.) (न.,) साम्भरलवणम् (रा. व. ६)

गडलवण-न., शाम्भरदेशजलवणम्, गुणाः—लवणं ईषदम्लं मलघ्नं उष्णं दीपनं कफवातार्शोघ्नं कोष्ठशोधनञ्च (रा. व. ६)

गडाख्य(आदि) लवण-न., शाम्भरलवणम् (रा. व. ६)

गडि-पु., तरुणवृक्षः (रा. व. १९)

गडिश-पु., तन्नामकमत्स्यविशेषः । गडिशो मधुरो ग्राही बल्यो वह्निप्रदो गुरुः (राज. ३ प.)

गडु-(डू.)-पु., पृष्ठग्रन्थिः (रा. व. २०) गलगण्डः । पृष्ठगुडः । स च घाटामस्तकयोर्मध्ये मांसवृद्धिः । (अम.) शल्यास्त्रम् (शर.) किञ्चुलुकः । (त्रिका.) मन्यास्तम्भरोगः । (वै. नि.) (त्रि.) कुब्जः । (मे)

गडूर-(ल)-त्रि., कुब्जः । (श. र.)

गड्या (द्या) ण (ल) क-न., ४८ अथवा ६४ रक्तिकामाने । लीलावती (वैद्यकम्) शाणषट्कम् शताधिकदिनवतिरक्तिकासु वा । 'त्रिभिः शाणैर्भवेत्तोलाषड्भिर्गद्याणकं विदुः' । (तोडनानन्दः)

गणकर्णिका-स्त्री., इन्द्रावारुणी (रा. व. ३)

गणपीठक-न., वक्षस् (श. च.)

गणरूपी (इन्)-पु., श्वेतार्कः । (रमा) अर्कवृक्षः (वै. नि.) रक्तार्कः । (रा. व. १०)

गणवतीसुत-पु., दिवोदासः । 'धन्वन्तरिर्दिवोदासः काशिराजः सुधोद्भवः । पालिकाख्या गणवती करेणरुचिरासुतः ।' पालकाप्ये । (त्रिका.)

गणेरुक-(का)-पु., स्त्री., गणिकारिपुष्पवृक्षः (वै. नि.)

गणेश (कुसुम)-पु., रक्तकरवीरवृक्षः । (रा. व. १०)

गणेशप्रिय-पु., रक्तकरवीरः । 'गणेशप्रियमूलानि' । (अर्कप्रकाशः)

गण्डकारी-स्त्री., वराहक्रान्ता । श्वेतलज्जालुका (र. मा.) खदिरीवृक्षः । (अम.) काकजङ्घा । शल्लकीवृक्षः । (श. च. ।)

गण्डकी-स्त्री., इक्षुदण्डः । (नकुल. १२ अ.)

गण्डकुसुम-न., गजमदः (हारा.)

गण्डगात्र-न., आतापिफलम् (हिं-शरीफा । म-शीताफल) गुणाः---गण्डगात्रं हिमं वृष्यं वातपित्तनिषूदनं । श्लेष्मलं तर्षशमनं वान्त्युत्क्लेशनिपीडनम् (अत्रि. । श.च.)

गण्डगोपालिका-स्त्री., आम्रवाटिकास्थकीटविशेषः (हिं--गण्डगुयारि)

गण्डफलक-पु., प्रशस्तगण्डस्थलम् (वै. नि.)

गण्डरोग-पु., अश्वस्य मुखरोगविशेषः गण्डाभ्यन्तरगो गण्डः गण्डरोग इति स्मृतः (ज. द. २९ अ.)

गण्डशैल-पु., ललाटम् (हे. च.)

गण्डस्थल-न., कपोलदेशः (वै. नि.)

गण्डाङ्ग-पु., खड्गी (श. च.)

गण्डारि-पु., कोविदारवृक्षः (भा.) मत्स्यविशेषः (वै.नि.)

गण्डि-पु., त्रपुषम् । कण्ठमणिः । तरुशाखा (वै. नि.) तरुकाण्डम् (हे. च.)

गण्डीराद्यतैल-न., मण्डलकिटिभादिकुष्ठरोगेषु हितम् (च. द.)

गण्डीरिका (री)-स्त्री., स्नुहीवृक्षः (रा. व. ८ । च. द. गण्डीराद्यतैल) मञ्जिष्ठा (प. मु.) शाकविशेषः (भा. म. प्रमेहचि.) इक्षुः । रक्तकाञ्चनवृक्षः (वै. नि. संग्रहणीचि.) चाङ्गेरीघृतम्

गण्डु-स्त्री., ग्रन्थिः (वै. नि.) उपधानम् (जटा.)

गण्डूपदभव-न., शीषकम् (हे. च.)

गण्डूपदाद्यतैल-न., व्रणरोगे हितम् (च. द.)

गण्डूपदी-स्त्री., जलपिप्पली (वै. नि.) क्षुद्रकिञ्चुलुका (अम.)

गण्डूली-स्त्री., गण्डदूर्वा (वै. नि.)
गण्डोल-पु., न., गुडः (त्रिका.) शर्करा ग्रासः (वै. नि.)
गतार्तवा-स्त्री., निवृत्तरजस्कावृद्धा स्त्री (रा. व. १८)
गदघ्न-पु., नन्दीवृक्षः (वै. नि.)
गदनिश्चय-पु., माधवीयरोगनिश्चयकग्रन्थः
गदमुरारि-पु., प्रौढामज्वरे रसः (र. सा. सं)
गदविनोदनिघण्टु-पु., वैद्यकनिघण्टुभेदः
गदहर- (री) इन्-पु., वैद्यः (वै. नि.)
गदाख्य-न., कुष्ठम् (र. मा.)
गदागदौ-पु., द्वि., अश्विनीकुमारौ (त्रिका.)
गदाग्रणी-पु., क्षयरोगः (रा. व. २०)
गदाराति-पु., औषधम् (रा. व. २०)
गदार्तिका-स्त्री., गोजिह्वा
गदाह्व (य) न., कुष्ठम् (श. र.)
गदी (इन्)-पु., रोगी (वै. नि.)
गन्ता-त्रि., संवरणशीलः (सु. शा. ३ अ.)
गन्धककज्जलि-पु., सन्निपातज्वरे देयः (रस. र.)
गन्धकली-स्त्री., प्रियङ्गुः (च. द. विषचि.) चम्पककलिका
गन्धकाष्ठ-न., अगरुकाष्ठम् (त्रिका.) शबरचन्दनम् । ईषत्पीतचन्दनम् (रा. व. १२) कृष्णागुरुः (वै. नि.)
गन्धकी-स्त्री., सल्लकी (च. द. वातव्याधि एकादशशती प्र. तैले)
गन्धकेलिका-स्त्री., कस्तुरी (रा. व. १२) गन्धमालती (वै. नि.)
गन्धकोलिका-स्त्री., गन्धमालतीतुल्ये गन्धद्रव्यविशेषम्, गुणाः- स्निग्धोष्णा कफहृत्तिक्ता सुगन्धा गन्धकोलिका । गन्धकोलिकया तुल्या विज्ञेया गन्धमालती (भा. क. व.)
गन्धखेड-क-न., गन्धवीरणः एतच्च सुगन्धि ईषत्तिक्तं रसायनं स्निग्धं मधुरं शीतलं कफपित्तश्रमहरञ्च (रा. व. ८)
गन्धगृहा-स्त्री., मुरामांसी (वै. नि.)
गन्धग्राही-स्त्री., नासिका (वै. नि.)
गन्धजात-न., तेजपत्रम् (श. र.)
गन्धज्ञा-स्त्री., नासा (हे. च.)
गन्धतुलसी-स्त्री., सुगन्धतुलसीक्षुपः (प. मु.)
गन्धत्वक्-स्त्री., एलावालुकः (रा. व. ४.)
गन्धद्रावक-न., अर्कौ कृतौषधविशेषः साधनविधिः यथा-काशीशं गन्धकं वापि सन्दहेद्यन्त्रयोगतः । सोरकञ्चापि सन्दह्य द्वयोर्धूमं विमिश्रयेत् । शीषपात्रेऽम्बुबाष्पेण द्रावकं तेन जायते । निर्जलं तन्न सेवेत परं दाहकरं हि तत् । चतुर्दशगुणैस्तोयैर्युतं बिन्दुमितं पिबेत् (अनि.)
गन्धधूलि-(ली)-स्त्री., कस्तूरी (हे. च.)
गन्धनकुल-पु., छुच्छुन्दरिः (हारा.)
गन्धनालिका (ली)-स्त्री., नासिका
गन्धनिलया-स्त्री., नवमल्लिका (म-बटमोगरा.)(श. च.)
गन्धपर्ण-न., काकपुष्पम्
गन्धपलाशजा (शिनी)-स्त्री., वंशलोचनभेदः (वै. नि.)
गन्धपलाशिका (शी)-स्त्री., गन्धशठी तन्नामकसुगन्धद्रव्यम् । गन्धपलाशी काश्मीरे प्रसिद्धा । (म-कापूरकाचरी, आंबेहळद)(रा. व. ६)
गन्धपल्लवा-स्त्री., गन्धपलाशी (वै. नि.)
गन्धपिण्डिका-स्त्री., गन्धकजारणमारणार्थं सगन्धकपिष्टी (र. चि. ५ अ.)
गन्धपिण्डीर-पु., कृष्णमदनवृक्षः (वै. नि.)(म-काळेगेळ)
गन्धपिशाचिका-स्त्री., धूपः (हे. च.) छुच्छुन्दरिः
गन्धपूतना-स्त्री., पूतनाभेदः
गन्धफणिज्जक-पु., रक्ततुलसीवृक्षः (र. मा.)
गन्धवधू-स्त्री., शठी (म-कापूरकाचरी, कचोरा) चिरानामगन्धद्रव्यम् चीडानाम देवदारुभेदः (रा.व.२२)
गन्धबन्धु-पु., आम्रवृक्षः (रा. व. २३)
गन्धभद्रा-स्त्री., प्रसारणी (म-गन्धलीलता)(श. च.)
गन्धभाण्ड-पु., गर्दभाण्डवृक्षः (श. र.) आम्रातकः (च. सू. ४ अ.)
गन्धभेदक-पु., कटकः । काचकः । लौहम् तिलकम् । (रा. व. २३)
गन्धमातृका-स्त्री., गन्धमात्रेति प्रसिद्धं वणिग्द्रव्यम् (भैष. स्त्रीरोग. उत्पलादि)
गन्धमार्जार-पु., लोमशमार्जारः । मार्जारी नामौषधी ।
गन्धमार्जारवीर्य-न., गन्धमार्जाराण्डोद्भवा कस्तूरिः । गुणाः-वीर्यकृत्कफवातहृत् कण्डूकुष्ठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत् (भा.)
गन्धमालती-स्त्री., गन्धकोकिलानामगन्धद्रव्यविशेषम् (भा.)
गन्धमुण्ड-पु., पारीषाश्वत्थः । (भा.)

गन्धमूषिक-(षिका) षी-पु., स्त्री., छुच्छुन्दरः । (त्रिका. । हे. च.)
गन्धमृग-पु., खट्टाशः । (म-जवादी मांजर)(श. मा.)
गन्धमृत्पुष्प-पु., कदम्बवृक्षः (वै. नि.)
गन्धमैथुन-पु., वृषभः । (त्रिका.)
गन्धराजतैल-न., वातव्याधौ तैलम् (रस. र.)
गन्धराजी-स्त्री., नखी (श. च.)
गन्धर्वगन्ध-(न्धा)-पु., स्त्री., अश्वगन्धा । (भा. म. ४ भ. स्नायुरोगे । उ. ख. वाजी)
गन्धर्वभूषण-न., सिन्दूरम् (वै. नि.)
गन्धर्वलता-स्त्री., प्रियङ्गुः । (भा. म. १ भ.) (रक्तष्ठीवीचि.)
गन्धर्वशाका-स्त्री., भार्गी (र. मा.)
गन्धर्वहस्तकतैल-न., ब्रध्नवृध्द्याधिकारे तैलम् । (रस. र.)
गन्धर्वा-स्त्री., कोकिला ।
गन्धलोलुपा-स्त्री., मक्षिका । (श. र.)
गन्धवर्णा-स्त्री., महाबला (वै. नि.)
गन्धव (वा) हा-स्त्री., नासिका (रा. व. १८ । हे. च.)
गन्धवासिनी-स्त्री., मुरामांसी (वै. नि.)
गन्धवाही-(इन्)-पु., वायुः (रा. व. २१)
गन्धविह्वल-पु., गोधूमः । (वै. नि.)
गन्धवीज-पु., कुलिञ्जनवृक्षः । (वै. नि.) (जा)-स्त्री., मेथिका (रा. व. ६)
गन्धवीरा-स्त्री., शल्लकीवृक्षः (वै. नि.)
गन्धवेधिका-स्त्री., कस्तूरी (वै. नि.)
गन्धव्याकूल-न., कक्कोलः (श. च.)
गन्धशटी-स्त्री., स्वनामख्यातौषधम् । गन्धपलाशी (श. र.)
गन्धशाक-न., गौरसुवर्णशाकम् (रा. व. ७)
गन्धशुण्डिनी-स्त्री., छुच्छुन्दरी । (रा. व. १९)
गन्धशेखर-पु., कस्तूरी (हारा.)
गन्धसम्भवा-स्त्री., सगन्धशालिः (रा. व. १६)
गन्धसारण-पु., बृहन्नखी (र. मा.)
गन्धसूत्री-स्त्री., आम्रातकः (म-आंबाडी)
गन्धसूयी-स्त्री., क्षुद्रछुच्छुन्दरी (वै. नि.)
गन्धसेवि-न., रोहिषतृणम् (वै. नि.)
गन्धसोम-न., कुमुदम् । श्वेतकमलम् (त्रिका.)
गन्धाखु-पु., छुच्छुन्दरी (हारा.)
गन्धागुरु-न., मङ्गल्यागुरुः (वै. नि.)

गन्धाजीव-पु., गन्धवणिक् (जटा)
गन्धादि-न., तृणकेशरम् (वै. नि.)
गन्धान्न-पु., गन्धशालिः (प. मु.)
गन्धामृतरस-पु., वाजीकरणाधिकारे हितः (रस. र.)
गन्धारि-(री)-स्त्री., दुरालभा रक्तदुरालभा । गन्धपलाशी आमहरिद्रा (वै. नि.)
गन्धाला-स्त्री., अग्निमन्थक्षुपः (वै. नि.)
गन्धाश्व-पु., अश्वगन्धा (भैष. कुष्ठचि.)
गन्धाष्टक-न., सुगन्धाष्टद्रव्यगणः तच्च नानाविधम् । तत्र मांसादियूषसुगन्धीकरणार्थं यथा-जातीपत्रलवङ्गत्वगेलानागकेसरमरिचमृगनाभयः (रावणः) देवतादितुष्ट्यर्थं यथा-चन्दनकर्पूरनागकेशरवालकनागरमुस्तादेवदारुगोरोचनाकुसुमानि । तथा चन्दनागुरुकर्पूररोचनाकुङ्कुममृगमदचन्दनह्रीबेराणि गणपतिप्रीत्यर्थम् । चन्दनागुरुकर्पूरतमालह्रीबेरकुङ्कुमकुशीदकुष्ठानि शिवस्य । चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः । जटामांसीकपियुता शक्तेर्गन्धाष्टकं विदुः । चन्दनागुरुह्रीबेरकुष्ठकुङ्कुमसेव्यकाः । जटामांसी मुरा चेति विष्णोर्गन्धाष्टकं विदुः ।
गन्धाह्वा-स्त्री., प्रियङ्गुः (सु. चि. ९ अ.)
गन्धि-न., तृणकुङ्कुमम् (रा. व. १२)
गन्धिक-पु., गन्धकम् (भा.)
गन्धिरस-पु., गोपकः ।
गन्धिला-स्त्री., मुस्ता । (रा. व. ६.)
गन्धी (इन्) पु., कस्तूरीमृगः (वै. नि.)
गन्धोग्रा-स्त्री., वचा (च. द. वातव्याधिचि.)
गन्धोतु-पु., सुगन्धमार्जारः (त्रिका.)
गन्धोत्तमा-स्त्री., मदिरा (अम.)
गन्धोलि-ली-स्त्री., शठी (श. र.) वराटी (अम.) मक्षिकाविशेषा । कर्कटीभेदः (वै. नि.)
गन्धौषध-न., सुगन्धिद्रव्यरूपौषधम् अगुरुकुष्ठादौ (सि. यो. वातव्याधिचि. । च. सू. ३)
गभोलिक-पु., मसूरः (हारा.)
गमूर्च्छा-स्त्री., मरुया इतिख्याततृणम् (र. मा.)
गम्भीरक-पु., फणिज्जकवृक्षः
गम्भीरज्वर-पु., अन्तर्वेगान्तर्दाहयुक्तज्वरः (मा.)
गम्भीरदृष्टि-पु., नेत्ररोगविशेषः (वै. नि.)
गम्भीरपाक-पु., अन्तःपाकः (वै. नि.)
गरघ्नी-स्त्री., मत्स्यविशेषः, गुणाः—मधुरा कषाया वातपित्तकफघ्नी रुचिबलवीर्यकरी दीपनी लघुश्च (भा.)

गरजध्वज–न., अभ्रकम्–(वाचस्पति.)
गरण–न., निगरणम् । वमनम्
गरद्–न., विषम् । गरलः (रा. व. ६.)
(त्रि.,) विषदायी ।
गरदिग्ध–त्रि., कृत्रिमविषलिप्तम् (च. सि. २ अ.)
गरनाशिनी–स्त्री., देवदालिका (म. देवडांगरी) (वै. नि.)
गरभ–पु., गर्भः (हे. च.)
गरला–स्त्री., मधुमक्षिका (वै. नि.)
गरव्रत–पु., मयूरः (श. र.)
गरहा–स्त्री., कालशाकम् (त्रिका.)
गरा (री)–स्त्री., देवताडवृक्षः (अ. टी. स्वा) निगरणम् (धरणी)
गरात्मक–पु., न., शोभाञ्जनवृक्षः तद्बीजं च (श. च.)
गराधिका–स्त्री., लाक्षा (र. मा.)
गरारिवटिका–स्त्री., कासे हिता । (प्रयोगा. कास. चि.)
गरुडवलि–पु., बालरोगशान्त्यर्थं बलिविशेषः । ॐ नमो भगवते गरुडाय त्र्यम्बकाय- -स्वाहा (च.द. बालचि.)
गरुडशालि–पु., स्वनामख्यातशालिधान्यविशेषम् (रा. व. १६) गुणाः—गरुडान्त्रा च वातघ्नी पित्तमूत्रमदापहा ।
गरुडाङ्कित–न., मरकतमणिः (जटा.)
गरुडी–स्त्री., गुडूची (रस. र. विषचि.)
गरुडोत्ती (द्गी) र्ण–न., मरकतमणिः (रा. व. १३)
गरुत्–पु., पक्ष्म (अम.)
गरुद्योधी (इन्)–पु., भारतीपक्षी (त्रिका.) लावः (वै. नि.)
गर्गरी–स्त्री., मन्थनी । दधिमन्थनपात्रम् (अम.) कलसः
गर्गाट–पु., गर्गरमत्स्यः (हारा.)
गर्जक–पु., मत्स्यविशेषः ।
गर्जरी–स्त्री., रक्तलशुनः (वै. नि.)
गर्त–पु., श्वभ्रम् (जटा)कुकुन्दरः । (मे.) रोगविशेषः । (श. र.)
गर्तकलम्बुका–स्त्री., गण्डदूर्वा मत्स्याक्षी (वै. नि.)
गर्ताटक–पु., वनमूषिकः । (वै. नि.)
गर्तिका–स्त्री., तन्तुशाला (हे. च.)
गर्दभगद–पु.,ज्वालागर्दभरोगः । (रा. व. २०)
गर्दभगन्धिका–स्त्री., भार्गी (वै. नि.)
गर्दभमांस–न., गर्दभस्य पिशितम् (रा. व. १७)
गर्दभाह्वय–पु., कुमुदम् । षण्डः । (हे. च.)
गर्द्ध–पु., गर्दभाण्डवृक्षः । (श. च.)
गर्भक–न., रजनीद्वयम् (हे. च.)
गर्भकण्टक–पु., पनसवृक्षः । (वै. नि.).
गर्भकर–पु., पुत्रजीववृक्षः । (भा.)
गर्भघातिनी–स्त्री., लाङ्गलीनाम क्षुपः (रा. व. ४)
गर्भचिन्तामणि–पु., गर्भाधिकारे रसः । स चतुर्विधः (१) सूतिकाविनोदरसे तुत्थस्थाने स्वर्णदानेन चिन्तामणिर्भवति । र. सा. सं. (२) यः–जातीफलं टङ्कणं त्रिकटु हिङ्गुल प्र. समभागः । जम्बीररसेन वटी कार्या । (३) यः–रसः रौप्यं लौहं प्र. २ तो. अभ्रं ६ तो. (मतान्तरे ४ तो.) कर्पूरं वङ्गं ताम्रं जातीफलं जयित्री गोक्षुरबीजं शतावरी बला गोरक्षतण्डुला प्र. १ तो. जलेन वटी कार्या । (४) चतुर्थः रसः गन्धकः स्वर्णं लौहं रौप्यमाक्षिकं हरतालं वङ्गं अभ्रं प्र. समभागः ब्राह्मीवासाभृङ्गराजक्षेत्रपर्पटी दशमूलानां प्रत्येकं रसेन ७ भावना देयाः (बृहत्-चिन्तामणिः)
गर्भचर्या–स्त्री., गर्भोपचारकर्म
गर्भनाश–पु., गर्भपातः
गर्भनाशना–स्त्री., अरिष्टकवृक्षः (वै. नि.)
गर्भनुत्–पु., लाङ्गलिका (म. कळलावी) (भा.)
गर्भपरिस्रव–गर्भवेष्टनम्
गर्भपाकी–इन्–पु., षष्टिकव्रीहिः (हे. च.)
गर्भपात–पु., गर्भपातः
गर्भपातक–पु., रक्तशोभाञ्जनवृक्षः (जटा.)
गर्भपीयूषवल्लीरस–पु., स्त्रीरोगाधिकारे रसः (भैष.) बृहत्गर्भचिन्तामणिः
गर्भपोषण–न., गर्भपुष्टिकरणम्
गर्भभाण्डक–पु., प्लक्षवृक्षः (म. द. व. ५)
गर्भविनोदरस–पु., सूतिकाधिकारे रसः (र. सा. सं)
गर्भविलासतैल–न., गर्भाधिकारे गर्भस्थापनतैलम् (भैष.)
गर्भविलासरस–पु., गर्भिणीज्वरे रसः (र. चि. ९. अ.)
गर्भविस्राविणी–स्त्री., एला (वै. नि,)
गर्भस्थान–न., गर्भाशयः । अन्तःपुरम् (वै. नि.)
गर्भागार–न. पु., शयनगृहम् अन्तर्गृहम् । गर्भाशय): (रा. व. १८)
गर्भाम्भ–पु., गर्भस्थजलं (वाउ. १ अ.)
गर्भारि–पु., सूक्ष्मैला (रा. व. ६)

गर्भाष्टम–पु., गर्भजननमासादष्टममासः (त्रिका.)
गर्भिण्यवेक्षण–न., कुमारभृत्या गर्भिणीपरिचर्या
गर्भी (इन्)–पु., पुत्रञ्जीववृक्षः
गर्मुत्–पु., तृणधान्यविशेषम् (अम.) सुवर्णम्। नलम्(मे)
गलक–पु., गडकमत्स्यः (श. र.)
गलकम्बल–सास्ना (अम.)
गलग्राह–पु., मकरः (वै. नि.)
गलत्कुष्ठारिरस–पु., कुष्टे रसः । (र. सा. सं.)
गलन्तिका–स्त्री., कर्करी (अम.)
गलमेखला–स्त्री., गलसूत्रम् (हा. रा.)
गलव्रत–पु., मयूरः (त्रिका.)
गलशोथ–पु., गलस्फोतः (भैष. ज्वरचि.)
गलस्तन–पु., गलगण्डरोगः (रा. व. २०) छागगलस्थ-स्तनम् (वै. नि.)
गल (ले)स्तनी–स्त्री., छागी (वै. नि.)
गला–स्त्री., अलम्बुषा (भा.)
गलाङ्कुर–पु., रोहिणीत्यपर्यायः गलरोगविशेषः
गलानि (वि) ल–पु., गङ्गाटेयमत्स्यः (त्रिका.)
गलायुक–पु., गलरोगभेदः (वा. उ. २१ अ.)
गलितकुष्ठ–न., गलत्कुष्ठम्
गलितदन्त–त्रि., दन्तहीनः ।
गलेगण्ड–पु., मर्कटपक्षी (त्रिका.) गलगण्डरोगः (रा. व. २०)
गलोद्भव–पु., रोचमानाश्वः (त्रिका.)
गल्लचातुरी–स्त्री., उपधानविशेषः (जटा.)
गल्लिर–पु., उन्मन्थनामकर्णपालीगतरोगः ।
गल्वर्क–पु.,वैदूर्यमणिः । इन्द्रनीलमणिः । (त्रिका.) सुरापानपात्रम्
गवराज–पु., महावृषः (श. च.)
गवाची (टी)–स्त्री., पङ्कालमत्स्यः । गुणाः—अजीर्ण-कारित्वं गुरुत्वं श्लेष्मकोपनत्वञ्च (राज. ३ प.)
गवादन–न., घासः (श. च.)
गवाल्लूक–पु., गवा ।
गवाषिका–स्त्री., लाक्षा (र. मा.)
गवाक्ष–पु., गोक्षुरकः (नै. नि.) वातायनम् (अम.)
गवाक्षिका–स्त्री., गवाक्षी (र. मा.)
गविन–पु., कोकडनामकबिलेशयमृगः। जविन इत्यपि पाठः (रा. व. १९)
गवेडु–स्त्री., धान्यविशेषः
गवेरि (रु) क–न., गैरिकम् (त्रिका.)
गवेश (शि) क–स्त्री., गोरक्षीवृक्षः (श. च.)
गव्यघृत–न., गव्यनवनीतजातघृतम्, गुणाः—बुद्धिकान्ति-स्मृतिदं बलमेधावर्धकं पुष्टिकरं वातश्लेष्मघ्नं पाक-मधुरं वृष्यं देहस्थैर्यकरञ्च । (रा. व. १५)
गव्यतक्र–न., गोदुग्धभवघोलम्। गुणाः– 'गव्यं त्रिदोष-शमनं पथ्ये श्रेष्ठं तदुच्यते। दीपनं रुचिकृन्मेध्यं अर्शोदरविकारजित्' (अत्रि. ८ अ.)
गव्यदधि–न., गोदुग्धजातदधिगुणाः- अतिपवित्रं शीतलं स्निग्धं दीपनं मधुरं बल्यं अरोचकघ्नं ग्राहि वातरोगघ्नं च (रा. व. १५) अम्लं स्वादुरसं ग्राहि गुरूष्णं वातरोगजित् । स्निग्धं विपाके मधुरं दीपनं रुचिवर्धनं । वातापहं पवित्रं च दधि गव्यं रुजाकरम् (अत्रि. ८ अ.)
गव्यनवनीत–न., गोदुग्धजनवनीतम् सर्वदोषघ्नं बल-कृत् पुष्टिवर्धनञ्च (रा. व. १५)
गव्यमांस–न., गोमांसम् (सु. सू. ४६)
गव्या–स्त्री., गोरोचना (रा. व. १२)
गव्यूति–पु., स्त्री., क्रोशद्वयम् (हे. च.)
गहन–न., वनम् । दुःखम्, पीडा (वै. नि.)
गाक्षीरी–स्त्री., क्षीरशुक्ला
गाङ्गट (क) पु., मत्स्यविशेषः (श. र.)
गाङ्गटेय–पु., गाङ्गटमत्स्यः (श. र.)
गाङ्गेरिका–स्त्री., नागबला (वै. नि.)
गाङ्गेष्ठी–स्त्री., कटशर्करालता (हारा.)
गाजर–न., गृञ्जनम् (भा. पू. १ भ. शाक (वर्गः)
गाञ्जि (ञ्जी) काय–पु., वर्तिकपक्षी
गाढ–न., बहुकालजातम् । बद्धमूलम् सान्द्रम् (सु. नि. ६ अ.)
गात्रघर्षण–न., शरीरमार्जनम्
गात्रभङ्गा–स्त्री., शूकशिम्बी (श. च.) गन्धशठी (वै. नि.)
गात्रमार्जनी–स्त्री., अङ्गमार्जनार्थवस्त्रम् ।
गात्रशोष–पु., पूतना नाम बालरोगविशेषः ।
गात्रसङ्कोची-(इन्)–पु., जाहकजन्तुः । कृष्णकृकालसः (रा. व. १९) गोनससर्पः । (वै. नि.)
गात्रसम्प्लव–पु., प्लवजातीयपक्षी हंसादिः । (वै. नि.)
गात्रानुलेपनी–स्त्री., गात्रानुलेपनयोग्ये घृष्टपिष्टसुगन्धि द्रव्यम् (अम)
गाधा–पु., स्थानम् । लाभेच्छा (हे. च.)
गानिनी- वचा । (वै. नि.)
गान्धार–न., गन्धरसः (त्रिका) पु. सिन्दूरः (मे.)

गान्धिक–पु,, कीटविशेषः । (श. र.) लेखकः । (नाना.)

गाम्भारिका (री) स्त्री., गम्भारीवृक्षः । (म–सीवनी तें-गम्भारी) (प. मु.)

गायत्र्य–पु., सोमलताभेदः (सु. चि. २९ अ.)

गारित्र–न., धान्यविशेषम् (वै. नि.) ओदनम् (उणा.)

गारुडिक–पु., विषवैद्यः (श. र.)

गार्जर–न., गर्जरमूलम् (रा. व. ७)

गार्ध्र–त्रि., आयूनम् । न., (र्ध्य) आयूनता

गार्भ–(र्भिक)– त्रि., गर्भसम्बन्धिः ।

गालफल–न., मदनफलम् (वै. नि.)

गाहित–त्रि., कम्पितम् । स्नातम् (वै. नि.)

गिरजातेज–न., अभ्रधातुः (वै. नि.)

गिरण–न., भक्षणम् (वै. नि.)

गिरिक–पु., गिरिनिम्बः (वै. नि.)

गिरिका–स्त्री., बालमूषिका (अम.)

गिरिकाण–त्रि., गिरिरोगेणैकचक्षुहीनः (उणा.)

गिरिकौटजफल–न., इन्द्रयवम् (वै. नि. २भ. अतिसार चि. मुस्तादिचूर्णम्)

गिरिगोचर–पु., श्वेतमर्कटः (वै. नि.)

गिरिजतु (न्म)–न., शिलाजतुः (रा. व. १३)(वै,नि.- क्षयचि. सूर्यप्रभागुडी.)

गिरिजामल–न., अभ्रधातुः (अ. टी. रा.)

गिरिजावीज–न., गन्धकम् (भैष.)(ग्रहणीकवाटरसे.)

गिरिजाह्वय -न., शिलाजतुः (वै. नि.)

गिरिज्वर–पु., वज्रम् (श. र.)

गिरिपत्र–न., गिरिनिम्बः (हिं.–बकाणनिम्ब)(वै. नि,)

गिरिपादिका–स्त्री., कपिकच्छुः (वै. नि.)

गिरिप्रिया–स्त्री., चमरीगौः (रा. व. १९)

गिरिभित्–न., पाषाणभेदक्षुपः (भा.)

गिरिमनोहर–पु., आरग्वधवृक्षः । (वै. नि.)

गिरिमान–पु., गजः (श. र.)

गिरिमाल–पु., आरग्वधवृक्षः (वै. नि.)

गिरिमालपञ्चक–न., आरग्वधाद्यपरनामयोगविशेषः (सि. यो. वातकफज्वरचि.)

गिरिमेद–पु., विट्खदिरः (र.मा.) इरिमेद इत्यपि पाठः

गिरिशान्तक–पु., लौहमारकत्रिफलादिगणः (र. सा. सं.)

गिरिशायी (इन्)–पु., पार्वतपक्षीविशेषः

गिरिशालाह्व–पु., प्रतुदः (सु. सू. ४६)

गिरि (श) **शालिनी**–स्त्री., अपराजिता (पुराणम्)

गिरिशेखर–पु., महाबकुलः (वै. नि.)

गिरिसानुगा–स्त्री., त्रायमाणा (वै. नि.)

गिरिसिन्दु (न्धु) **क**–पु., कृष्णनिर्गुण्डी (वै. नि.)

गिरिस्वेद–पु , शिलाजतुः (वै. नि.)

गिल–पु., जम्बीरवृक्षः (श. च.)

गिलग्राह–पु., नक्रः (वै. नि.)

गिलन–न., गलाधःकरणम् । भक्षणम्

गुग्गुलुवटक–(आदित्यपाक)–पु., वातव्याधौ हितः । (च. द. प. प्र.)

गुच्छक–पु., गुच्छकन्दः । तैलशारु इति लोके (गज. वै.) रीठाकरञ्जवृक्षः (रा. व. ९)(न.,) ग्रन्थिपर्णी (भा.)

गुच्छकच्छद–पु., ग्रन्थिपर्णी (वै. नि.)

गुच्छकन्द–पु., कन्दशाकम् तैलसारु इति लोके (म– कुलीहालु.) (क–मुकुलियागड्डे) गुणाः—मधुरः शीतलः वृष्यः दाहघ्नः तर्पणः (रा. व. ७)

गुच्छगुल्मिका–स्त्री., स्नुहीवृक्षविशेषः

गुच्छसंघा–स्त्री., क्षुद्रधातकी (वै. नि.)

गुच्छाल–पु., भूतृणम् (रा. व. ८) भूकदम्बम् (प.मु.)

गुञ्ज–पु., गुच्छः (श. र.)

गुञ्जकृत्–पु., भ्रमरः (श. र.)

गुञ्जरत्नमाला–स्त्री., वैद्यकग्रन्थभेदः

गुञ्जागर्भरस–पु., हृद्रोगे रसः (र. चि.)

गुञ्जातैल–न., कुष्टे, गण्डमालायां तैलम् (भा. सा. कौ.)

गुञ्जाभद्ररस–पु., ऊरुस्तम्भे हृद्रोगे रसः (र. चि.)

गुञ्जिका–स्त्री., गुञ्जात्रियवपरिमाणम् (श. च.)

गुटिक–पु., मत्स्यण्डी (ज. द. १२ अ.)

गुण्ठ–पु., तृणविशेषः (रा. व. ८) सुगन्धरोहिषतृणम् (वै. नि.) दाक्षिणात्याश्वः (ज. द. ६ अ.)

गुडक–पु., गुडपक्वौषधमात्रम् (प. प्र.)

गुडकाष्ठ–पु., इक्षुः (वै. नि.)

गुडकुष्माण्डक–न., वाजीकरणाधिकारे प्रशस्तम् (रस. र.)

गुडखण्ड–पु., गुडकृतखण्डः

गुडगडा–स्त्री., यावनालशर्करा (रा. व. १४)

गुडची–स्त्री., गुडूची (अ. टी. भ.)

गुडचुक्र–न., गुडकृतचुक्रविशेषः (भा.)

गुडत्वक्–स्त्री–स्वनामख्यातगन्धद्रव्यम् गुणाः– तच्च- लघूष्ण स्वादु तिक्तं रूक्षं पित्तवर्धकं अरुचिकण्डूहृद्- स्तिवातार्शःकृमिपीनसघ्नञ्च (भा.) कफशुक्रामवातघ्नं मधुरं कटु चेति । (राज.)

गुडत्वच्–न., गुडत्वक् । जातीकोषः । (श. च.)

गुडदारु-न., इक्षुः । (त्रिका.)
गुडपाक-पु., औषधस्य गुडपाकः । तल्लक्षणम्–' यदा दर्वीप्रलेपः स्यात् यदा वा तन्तुली भवेत् । तोयपूर्णे च पात्रे तु क्षिप्तौ न प्लवते गुडः । क्षिप्तस्तु निश्चलस्तिष्ठेत्पतितस्तु न शीर्यति । एष पाको गुडादीनां सर्वेषां परिकीर्तितः । सुखमर्दः सुखस्पर्शो गन्धवर्णरसान्वितः । पीडितो भजते मुद्रां गुडपाकः सुपाकतः । गुडवत् गुग्गुलोः पाकः रसगन्धविशेषतः । श्रेष्ठमध्यमहीनेषु द्वादशाष्टचतुष्टयैः । माषकैः गुग्गुलोर्मात्रां व्याधिं वीक्ष्य प्रयोजयेत् । रसक्रियाद्या ये लेह्या गुडाश्चैव प्रकीर्तिताः । तेषां बिन्दुर्जले न्यस्तो न शीर्येत् पाकलक्षणम् । (प. प्र. ३ खण्डः)
गुडपात्रक-पु., इक्षुः (वै. नि.)
गुडपिप्पली-स्त्री., जीर्णज्वरे शस्तम् । पिप्पलीचूर्णं १ भा. गुडस्यच भागद्वयं मर्दयित्वा गुडपिप्पलीकल्पः कार्यः । अन्यः कल्पः (भैष.)
गुडपुष्पसार-पु., मधूक पुष्प सारः (च. द.)
गुडफला-स्त्री., ह्रस्वकाकमाची । (वै. नि.)
गुडमण्डूर-न., अन्नद्रवशूले हितम् । पुराणगुडः १ प. आमलकीचूर्णं १ प. हरीतकीचूर्णं १ प. शुद्धमण्डूरं ३ प. घृतमधुभ्यां संमर्द्य २ तो. भोजनाद्यमध्यावसानेषु सेव्यम् । (रस. र.)
गुडमूल-पु., स्वल्पमारिषशाकम् (श. च.) इक्षुः (भा.)
गुडयोगफला-स्त्री., मधुरालाबुः (वै. नि.)
गुडल-न., गौडी मदिरा (श. च.)
गुडवीज-पु., मसूरः (रा. व. १९)
गुडशिग्रु-पु., रक्तशोभाञ्जनः (श. च.)
गुडशुक्त-न., सतैलगुडाम्बुना कन्दशाखादि एकत्र संहितमम्लरसं गुडशुक्तमुच्यते (प. प्र. ३ ख.) गुडाम्बुना सतैलेन सन्धानकाञ्जिकन्तु यत् । कन्दशाकफलैर्युक्तङ्गुडशुक्तं तदुच्यते (शार्ङ्ग.)
गुडाका-स्त्री., निद्रा ।
गुडाख्या-स्त्री., स्नुहीवृक्षः (रा. व. ८)
गुडादिवटिका-स्त्री., शोथे रसः (भा.)
गुडाम्बु-न., गुडकृतजलम् (वा. चि. ६) ' गुडयोगाद्गुडाम्बु स्यात् गुडवर्णरसान्वितम् (प. प्र. ३ ख.)
गुडाष्टक-न., उदावर्ते अजीर्णे च हितम् ।
गुडासव-पु., गुडकृतासवम् (च. सू. २७)
गुडी-स्त्री., स्नुहीवृक्षः ।
गुडूचीसत्व-न., गुडूची (भैष.)
गुडूच्यादिलौह-पु., वातरक्ते रसः (र. चि.)
गुडेर(क)-पु., घासः । ग्रासः (उणा.)
गुडोदक-न., गुडाम्बु ।
गुड्डुक-पु., गरुडशालिः (रा. व. १६)
गुणमहोदधि-पु., कासाधिकारे हितम् (र. कौ.)
गुणवतीवर्ति-स्त्री., व्रणरोगे हिता ।
गुणवत्तरा-स्त्री., जीवन्तीशाकम् (प. मु.)
गुणा-स्त्री., दूर्वा मांसरोहिणी । मद्यसामान्यम् (रा. व. ८।१२।१४
गुण्डक-पु., चूर्णम् (भैष.)
गुण्डता-स्त्री., यावनालशर्करा (रा. व. १४)
गुण्डस-पु., सर्पजातिभेदः (अत्रि. ३ स्थान.)
गुण्डा-स्त्री., काशतृणभेदम् (रा. व. ८)
गुण्डाफली-स्त्री., देवदाली (वै. नि.)
गुण्डारोचनिका (नी)-स्त्री., स्वनामख्यातगन्धद्रव्यम् (र. मा.)
गुण्डिक-पु., तण्डुलादिचूर्णम्)
गुत्थ-पु., गवेधुका (र. मा. भा. म.) (अश्म. चि.) गुडूची (च. द. अतिसारचि.)
गुत्थक-न., ग्रन्थिपर्णी (र. मा.)
गुत्स-पु., ग्रन्थिपर्णवृक्षः (मे.) गुच्छम्
गुत्सपुष्प-पु., सप्तच्छदवृक्षः (जटा.)
गुदजघ्न-पु., कटुशूरणः (वै. नि.)
गुदजारि-पु., देवताडवृक्षः (वै. नि.)
गुदवलि-स्त्री., शङ्खावर्तवत् गजतालुसवर्णाः पायुस्थवलित्रयम्
गुदामय-पु., अर्शः (र. सा. सं.)
गुदामयहर-पु., कटुशूरणम् (वै. नि.)
गुन्थफल-पु., नारिकेलवृक्षः (वै. नि.)
गुन्दगुच्छक-पु., गुच्छकरञ्जः (वै. नि.)
गुन्दा (द्रा) ल-पु., जीवञ्जीवः (हे. च.)
गुन्द्रक-पु., गुन्द्रशरः (प. मु. भा. म. अश्म. चि.)
गुन्द्रमूला-स्त्री., एरकातृणम् (भा.) मुस्तकतृणम् (वै.नि.)
गुप्तगन्धि-स्त्री., एलवालुकः ।
गुप्तपत्रक-पु., मध्वालुकः । (प. मु.)
गुप्तवीज-न., तृणम् (वै. नि.)
गुप्ताफल-न., शूकशिम्बीबीजम् (सु. चि. २६)
गुमृटी-स्त्री., तृणधान्यभेदः । गुणाः-श्यामकवत्, (च. सू. २७)
गुरुगन्धिक-न., अगुरुः (वै. नि.)

गुरुगुण–त्रि., यच्चिरेण पक्वं तद्गुरुगुणम् (वा. टी. हेमाद्रिः)
गुरुघ्न–पु., गौरसर्षपः । (रा. व. १६)
गुरुण्टक–पु., तिलमयूरः (त्रिका.)
गुरुपञ्चमूली–स्त्री., बृहत्पञ्चमूली–सा विल्वश्योनाकगाम्भारीपाटलागणकारिका इति पञ्चमूलात्मिका वातकफे हिता ।
गुरुपत्र–न., वङ्गम् (हे. च.)
गुरुपत्रा–स्त्री., तिन्तिडीवृक्षः । (श. र.)
गुरुपाक–त्रि., यः पक्वः विण्मूत्रे सृजति श्लेष्माणञ्च करोति स गुरुपाकः सृष्टविण्मूत्रतया कफोत्क्लेशेनानुमेयम्' (सु. सू. ४१–११.)
गुरुपुष्प–पु., क्रमुकवृक्षः (वै. नि.)
गुरुरत्न–न., पुष्परागमणिः । (रा. व. १३)
गुरुवर्चोघ्न–पु., लिम्पाकवृक्षः (श. च.)
गुरुवीज–पु., मसूरः । (रा. व. १६)
गुरुशिंशपा–स्त्री., शिंशपावृक्षः (वै. नि.)
गुरुश्रेष्ठ–न., वङ्गधातुः । (वै. नि.)
गुरुस्कन्ध–पु., क्षीरिणी वृक्षः (वै. नि.)
गुरुस्वेद–पु., अश्वस्यस्वेदविशेषः । ' यत्र क्राथेन यः स्वेदः गुरुस्वेदः स उच्यते । (ज. द. १८ अ.)
गुर्वर्चन–न., पूज्यार्चनम्, गुणाः– स्वर्ग्यं यशस्यमायुष्यं अलक्ष्मीकविनाशनम् । धनधान्यकरं नित्यं गुरुदेवद्विजार्चनम् (राज. २. प.)
गुर्विणी–स्त्री., गर्भवती (रा. व. १८)
गुर्वी–स्त्री., गुवाकवृक्षः । गर्भिणी (मे.)
गुल–पु., गुडः (मे.)
गुलक–पु., गुण्ठतृणम् (वै. नि.)
गुलञ्चकन्द–पु., गुच्छकन्दः (म. कुलीहाल) गुणाः– मधुरत्वं शीतलत्वं वृष्यत्वं तर्पणत्वं दाहघ्नत्वं च (रा. व. ७)
गुला–स्त्री., स्नुहीवृक्षः (मे.)
गुलिकालवण–न., गुटिकालवणम् (वै. नि.)
गुलुच्छ–पु., पुष्पस्तबकम् (त्रिका.)
गुलोरिका–गुम्फः (वै. नि.)
गुल्मकालानलरस–पु., गुल्माधिकारे रसः (र. सा. सं.)
गुल्मगण–पु., गुल्मवृक्षाणां वर्गः । यथा–बलाचतुष्टयं पर्णी पञ्चकञ्चाग्निमन्थकः । पाठायवासावार्ताकी कोकिलाक्षो गणो द्विधा । अपामार्गद्वयं मूर्वा त्राहिमान शरपुङ्खिका । काकनासा काकजङ्घा मेषशृङ्गी च भृङ्गकम् । वन्ध्याकर्कोटकी त्रेधा बर्बरी तुलसी द्विधा । वज्रदन्ती द्विधा जाली नाम्ना गुल्मगणस्त्वयम् (अर्कः)
गुल्मगवेधुका–स्त्री., गवेधुका (प. मु.) देवधान्यम् (र. मा.)
गुल्मघ्न–न., हिङ्गुः (रा. व. ६)
गुल्मशार्दूलरस–पु., गुल्मे रसः । रसगन्धकलौहगुग्गुलत्रिवृतापिप्पलीशुण्ठीशठीधान्यकजीरकानि प्र. ८ तो. जैपालबीजं ४ तो. संचूर्ण्य घृतेन वटी कार्या । मात्रा २ र. (र. सा. सं.)
गुल्मिक–पु., रक्तकरवीरः ।
गुल्मिनी–स्त्री., उलुपः । विस्तृतलता (अम.)
गुल्य–त्रि., मधुरः (हे. च.)
गुवाक–पु., स्वनामख्यातवृक्षः
हिं.—सुपारि.
गुणाः–कषायत्वं शीतलत्वं दीपनत्वं गुरुपाकित्वञ्च (राज.)
गु(गू)ष्टि–स्त्री., गाम्भारीवृक्षः (वै. नि.)
गुहिन–न., वनम् (श. र.)
गुहिल–न., धनः (उणा.)
गुहेर–पु., लौहकारः (उणा.)
गू–पु., विष्ठा
गूढकामी(इन्)–पु., काकः (वै. नि.)
गूढगर्भक–पु., गर्भजरोगविशेषः (वै. नि.)
गूढनीड–पु., खञ्जरीटपक्षी (श. मा.)
गूढपथ–पु., अन्तरात्मा (हे. च.)
गूढपात्(द्)–पु., सर्पः (अम. । श. र.) कच्छपः (वै. नि.)
गूढफला–स्त्री., गृध्रनखी (वै. नि.)
गूढमैथुन–पु., काकः (वै. नि.)
गूढवर्चा–पु., भेकः (त्रिका.)
गूढवल्लिका(ल्ली)–स्त्री., अङ्कोलवृक्षः (रा. व. २३)
गूढाङ्ग–पु., कच्छपः (रा. व. १९) उपस्थम् (वै. नि.)
गूढाङ्घ्रि–पु., सर्पः (रा. व. १९)
गूथ–न.,विष्ठा (अम.)
गूथलक्त–पु., पक्षिविशेषः (श. च.)
गून–त्रि., कृतपुरीषोत्सर्गः (अम.)
गूवाक–पु., गुवाकः (श. र.)
गूषणा–स्त्री., मयूरपिच्छचन्द्रका (श. च.)
गृञ्जर–पु., गर्जरम् (वै. नि.)

गृण्डीव–पु., महाशृगालः (हे. च.)
गृधू–पु., अपानः (उणा.)
गृध्रनखीद्वय–न., श्वेतलोहितपुष्पभेदौ अहिंस्राद्वयम्। कालीयकद्वयम् । 'द्वे गृध्रनख्यौ रास्ना च' (सि. यो. च. द. वा. व्या. वाजिगन्धाधिकषाये)
गृध्राकार–पु., भाषपक्षी (वै. नि.)
गृहकच्छप–पु., पेषणशिला (श. र.)
गृहकर्ता–पु., धूसरवर्णोऽतिसूक्ष्मचटकः (रा. व. १)
गृहाकरी(इन्)–पु., कीटविशेषः ।
गृहकूलक–पु., चिचिण्डी (भा. पू. १ भ.)
गृहचटक–पु., गृहपालितचटकः, गुणाः– गृहस्य चटको वृष्यः बलशुक्रविवर्धनः । सर्वदोषहरश्चापि दीपनो मांसवर्धनः (अत्रि. २३ अ.) रक्तपित्तहरो वेश्म-कुलिङ्गस्त्वतिशुक्रलः (सु. सू. ४६)
गृहचूलिमृत्–स्त्री., चुल्लीमृत्तिका (चि. क. क.)
गृहणी–स्त्री., पलाण्डुः (वै. नि.) काञ्जिकम् (त्रिका.)
गृहधूमाद्यतैल–न., नासारोगे तैलम् । गृहधूमकणा-दारुक्षारनक्ताह्वसैन्धवैः । सिद्धं शिखरिबीजैश्च तैलं नासार्शसां हितम् (रस. र.)
गृहनाशन–पु., कपोतः (रा. व. १९)
गृहनीड–पु., चटकपक्षी (हारा.)
गृहपुत्रिका–स्त्री., घृतकुमारिः (भैष.)(कुष्ठचि. कन्दर्प-सारतैल.) त्रायमाणा (सा. कौ.)
गृहबलिप्रिय–पु., चटकः । काकः (वै. नि.) बकः(श.र.)
गृहबलिभुक्–,, ,, ,, ,,
गृहमणि–पु., प्रदीपः (त्रि.का.)
गृहमाचिका–स्त्री., चर्मचटी (त्रिका.)
गृहमृग–पु., कुक्कुरः (हे. च.)
गृहशायी (इन्)–पु., पारावतः (वै. नि.)
गृहाम्बु (म्ल)–न., काञ्जिकम् (त्रिका)(च.द.गर्भचि.)
गृहा (हो) लिका–स्त्री., जेष्टी (हारा.) (हे. च.)
गृहाशया–स्त्री., ताम्बूलीलता (श. च.) पूगीवृक्षः (वै.नि.)
गृहाश्मा–पु., पेषणशिला
गृहिणी–स्त्री., काञ्जीकम् (त्रिका.) भार्या (हे. च.)
गृह्य–न., गुदम् (मे.)
गृह्यक–पु., गृहासक्तमृगादिः (अम.)
गेहपक्षी–पु., पारावतः (वै. नि.)
गैरी–स्त्री., लाङ्गलिकवृक्षः (रा. मा.)
गोकण्टी–स्त्री., गोपघण्टा (वै. नि)
गोकर्णा–स्त्री., अश्वगन्धा (वै. नि.)

गोकिरा (री) टिका (टी)–स्त्री., सारिका (हे. च. रा. व. १८)
गोकि (की) ल–पु., मुषलम् (हारा.)
गोकुलिक–स्त्री., काणः (वै. नि.)
गोकृत–न., गोमयः (श. च.)
गोखरी(खुर)–पु., गोक्षुरक्षुपः (श. र.)
गोग्रन्थि–पु., गोजिह्विकौषधम् (मे.) करीषम् । शुष्क-गोमयम् (त्रिका)
गोघृत–न., गव्यघृतम्, गुणाः–विपाके मधुरं शीतलं वातपित्तविषघ्नं चक्षुष्यं बल्यं श्रेष्ठं च (सुसू. ४६) वर्षोपलम् (त्रिका.)
गोचर्म–न., गोत्वक्
गोचर्मकण्टक–पु., पर्पटकः (वै. नि.)
गोच्छगल–पु., न., गोमयः (वै. नि.)
गोच्छाल–पु., अलम्बुषक्षुपः ।
गोच्छाला–स्त्री., गोरक्षमुण्डी (वै. नि.)
गोजागरिक–पु., कण्टकारीक्षुपः (मे.)
गोजीकाण–पु., मध्यमाश्वः ।
गोड–पु., नाभौ संवृद्धमांसगुडकः ।
गोडम्बी–स्त्री., भल्लातकबीजम् (वै. नि.)
गोडवास्तुक–पु., वास्तुकशाकविशेषः (वै. नि.)
गोडुम्ब–पु., कालिङ्गलता (मे.)
गोडुम्बा(म्बिका)–स्त्री., फलशाकलताविशेषः ।
गोणा–स्त्री., मनःशिला (रा. व. १३)
गोणी–स्त्री., द्रोणीपरिमाणम् (प. प्र.)
गोण्ड–पु., गोडः ।
गोतैल–न., गोवसा (भैष. क्षुद्र रो. चि.)
गोत्र–न., कुलम् । गव्यम् (त्रिका.) शरीरम् घत्रम् (वै. नि.)
गोत्रद्रुम–(पुष्प)(क)(विटपी)(वृक्ष)–पु., धन्वन-वृक्षः (वै. नि.)
गोत्रभृत्–पु., पर्वतः (रा. व. २)
गोत्रेष्ट–न., शीषकम् ।
गोद–पु., मस्तकस्नेहः । मस्तिष्कम् (हे. च.)
गोदन्ता–स्त्री., दारुमोचभेदः (प. मु.) तन्नामकहरितालः (भैष. प्लीहचि. शङ्खद्रावके.)
गोदावरी–स्त्री., विन्ध्यस्य दक्षिणप्रसिद्धभारतीयनद्याम् । तज्जलगुणाः– पित्तरोगहरं रक्तदोषहरं वातहरं पथ्यम् अतिदीपनं पापघ्नं कुष्ठादिदुष्टरोगघ्नं तृष्णाहरञ्च (रा. व. १४)

गोदुग्धदा–स्त्री., चणकाख्यतृणम् (रा. व. ८)
गोदुग्धा–स्त्री., गोडुम्बा । इन्द्रवारुणीलता । चिर्भटिका (वै. नि.)
गोद्रव–पु., गोमूत्रम् (रा. व. १५)
गोधज–पु., गोधा (वै. नि.)
गोधावल्ली–स्त्री., हंसपदीलता (प. मु.)
गोधासुत–पु., गोधेरः, अयं चतुष्पात् (वा. उ. १६ अ.)
गोधि–पु., ललाटम् (रा. व. १८) गोधा (श. र.)
गोधिका–स्त्री., गोधा (अम.)
गोधिकात्मज (सुत)–पु., गोधाशिशुवदाकारकोटरस्थ-स्थलगोधा (सा. सु.)
गोधिकासूदन–पु., गौधेरकः (वै. नि.)
गोधूमक्षीरिका -स्त्री., गोधूमपायसः । गुणाः–गोधूमपायसो बल्यः कफभेदकरो गुरुः । शीतलः पित्तशमनो वातकृच्छुक्रवर्धनः । (वैद्यकम्)
गोधूमचूर्ण–न., चूर्णीकृतगोधूमः गोधूमगुणम् ।
गोधूमफल–न., गोधूमः (वै. नि.)
गोधूममण्ड–पु., गोधूमकृतमण्डः । गुणाः–' तद्वद्गोधूमसंभूतं मधुरं पित्तवारणम् ' । (अत्रि. १२ अ.)
गोधूमसौवीर–न., गोधूमजातकाञ्जिकम् (वै. नि.)
गोधूमाद्यघृत–न., रसायनाधिकारे हितम् (च. द.)
गोधूमिका(मी)–लि., गोलोमिका (रा. व. ५)
गोनन्दी–स्त्री., सारसपक्षी (हारा.)
गोनिष्यन्द(नीर)–पु., न., गोमूत्रम् (रा. व. १५)
गोपति–पु., ऋषभकौषधम् (रा. व. ५) वृषः (मे.)
गोपदल–पु., गुवाकवृक्षः (त्रिका.)
गोपवधू–स्त्री., शारिवा कृष्णशारिवा (भा. पू. १ भ.)
गोपभद्र–न., शालूकः (श. च.)
गोपरस–पु., बोलः (श. र.)
गोपाङ्गना–स्त्री., श्वेतसारिवा
गोपानीय–न., गोमूत्रम् (वै. नि.)
गोपालप(पु)त्रिका–स्त्री., चिर्भिटा गोपालपत्रिकामूलम् (वै. नि. २ भ. विषमज्वरचि.)
गोपालिका–स्त्री., इन्द्रगोपकीटकभेदः (हे. च.)
गोपिका–स्त्री., कृष्णशारिवा (वै. नि.)
गोपित्तजा–स्त्री., गोरोचना (वै. नि.)
गोपिनी–स्त्री., श्यामालता (श. च.)
गोपीचन्दन–न., सौराष्ट्रमृत्तिका शुभ्रमृत्तिका (वै. नि.)
गोपीजल–पु., गुल्माधिकारे रसः । जैपालाष्टौ द्विको गन्धः शुण्ठीमरिचचित्रकम् । एकः सूतो ससौभाग्यो गोपीजल इति स्मृतः ॥ (र. सा. सं.)
गोपीवल्लभ–पु., प्रवालः । (प. म.)
गोपुच्छ–पु., वानरविशेषः । गवां लाङ्गुलम् (वै. नि.)
गोपुरीष–न., गोमयः (रा. व. १५)
गोपुष्ट–न., परिपेलवतृणम् (रा. व. ८)
गोप्रिय–न., पलालम् (वै. नि.)
गोप्रेरक–पु., पक्षिविशेषः । कालवट इति महाराष्ट्रे (वै.नि.)
गोबन्धना (नी)–स्त्री., गोवल्ली पीतपुष्पदण्डोत्पला (र. मा.)
गोबल्य–पु., श्वेतयावनालः (वै. नि.)
गोबालधी–स्त्री., चमरीमृगः (वै. नि.)
गोभण्डीर–पु., जलकुक्कुभपक्षी (त्रिका.)
गोभिरामा–स्त्री., रामतरणी (वै. नि.)
गोभी–स्त्री., गोजिह्वा (वै. नि.)
गोमत–न., रक्तबोलः (वै. नि.)
गोमतल्लिका–स्त्री., सुशीला गौः । गोश्रेष्ठा । (हला.)
गोमयचूर्णीय–त्रि., गोमयचूर्णमधिकृत्य कृतं चरकीयाध्यायः (च. इन्द्रिय. १२ अ.)
गोमयच्छत्र–न., करकम् (त्रिका.)
गोमयच्छत्रिका–स्त्री., गोमयच्छत्रम् (हारा.)
गोमयतैल–न.,नेत्ररोगे तिमिरे च तैलम् । गवां शकृत्क्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु नस्ततः (भैष.
गोमयप्रिय–न., भूतृणम् (र. मा.) बालकः (वै. नि.)
गोमयाद्यघृत–न., तिमिराख्यनेत्ररोगे घृतम् (रस. र.)
गोमयोत्था–स्त्री., गोमयजातकीटः ।
गोमयोद्भव–पु., आरग्वधः (श. च.)
गोमर्द–पु., सारसपक्षी (त्रिका.)
गोमल–न., गोमयः (रा. व. १५)
गोमाक्षी–स्त्री., कर्णस्फोटा (वै. नि.)
गोमी (इन्)–पु., शृगालः (मे.)
गोमीन–पु., मत्स्यविशेषः ।
गोमूत्रवीजक–पु.; रक्तबीजासनवृक्षः । (रा. व. ९)
गोमूत्राभ–पु., मन्दविषवृश्चिकभेदः । (सु. क. ८ अ.)
गोमूत्रिका–स्त्री., स्वनामख्याततृणम्, तांबडु, गोढवि इति पश्चिमदेशे । गुणाः—मधुरा वृष्या गोदुग्धदा (रा. व. ८)
गोमूत्री– स्त्री., रक्तकुलत्थिका (वै. नि.)
गोमेदसन्निभा–स्त्री., दुग्धपाषाणः । (प. मु.)

गोऽम्बु (म्भ)-पु., गोमूत्रम् (रा. व. १५)
गोरक-पु., विषधरसर्पविशेषः (अत्रि.)
गोरण्टक-पु., कोङ्कणदेशप्रसिद्धो निकण्टकवृक्षः ।
गोरसज-न., पादजलेन त्रिभागदधिकृततक्रम् (रा. व. १५)
गोरक्षजम्बू-स्त्री., घोण्टाबदरीवृक्षः (जटा) बला (वै. नि.) गोधूमः । गोरक्षतण्डुला (वै. नि.)
गोरक्षतण्डुला-स्त्री., नागबला (प. मु.)
गोरक्षदुग्धा (ग्धी)-स्त्री., गोरक्षीनाम क्षुद्रक्षुपः । गुणाः- मधुरा शीतला वृष्या यश्यकरो रसे सिद्धदा (रा. व. ५)
गोराटी (णिटका) (रिका) स्त्री., शारिकापक्षी (हे. च. । रा. व. १९)
गोरुची-स्त्री., गोरोचना (वै. नि.)
गोरोच-न., हरितालः (रा. व. १३)
गोर्द-न., शिरोमलः (अम.)
गोलवत-न., पुष्पप्रियङ्गुः (हिं.-फुलप्रियङ्गु)
गोलाङ्गुल-पु., कपिः (त्रिका.)
गोलास-पु., गोमयच्छत्रकम् (हा. रा.)
गोली-स्त्री., गोजिह्वा (वै. नि.)
गोवत्सारि-पु., ईहामृगः (रा. व. १९)
गोवर्णी-स्त्री., अश्वगन्धा (वै. नि.)
गोवशा-स्त्री., वन्ध्या गौः ।
गोवारि-न., गोमूत्रम् (वा. उ. ३६)
गोविट्-न., गोमय (अम.)
गोविन्दिनी-स्त्री., प्रियङ्गुः (रा. व. १२)
गोविराटी-स्त्री., सारिकापक्षी (वै. नि.)
गोविषाणाह्वा-स्त्री., बब्बुलवृक्षः (वै. नि. हिक्का. चि. धूमे)
गोविष्ठा-स्त्री., गोमयः (रा. व. १५)
गोवृष-पु., वृषः (श. र)
गोवेष्ट-न., शीषकम् (प. मु.)
गोषाड्वल-पु., ग्रन्थिपर्णी(वै. नि.)
गोष्ठकुक्कुट-(गोचर)-पु., भासः । काकविशेषः (वै. नि.)
गोष्ठीश्वर-पु., उष्ट्रज्वरः (गज. वै.)
गोस-पु., रक्तगन्धबोलः (मे.)
गोसङ्ग(र्ग)-पु., प्रभातम् (हारा. च. इन्द्रिय. ८ अ.)
गोसदृक्ष-पु., गवयमृगः (हे. च.)
गोसशश-पु., रक्तबोलः (अ. टी. रा.)
गोस्तना-स्त्री., द्राक्षा (अ. टी. च. द. सि. यो. रक्तपि. चि.) 'पथ्याखर्जूरगोस्तनाः'
गोस्तनाकारा-स्त्री., मधुखर्जूरीवृक्षः (वै. नि.)
गोस्तनीभव-पु., द्राक्षासवः (वै. नि.)
गोस्रव-पु., अनामिकाङ्गुष्ठयुतकरविस्तारः (रा. व. १८) गोमूत्रम् (रा. व. १५)
गोहन (ल्ल)-न., गोमयम् (र. मा.)
गोहरीतकी-स्त्री., बिल्ववृक्षः (प. मु.)
गोहित-घोषालता बिल्ववृक्षः (श. च.)
गोहिर-पु., अधमजातीयाश्वः (नकुल.) न., पादमूलम् (हे. च.)
गोक्षीर-पु., गोक्षुरकः (रा. व. ४) न., गोदुग्धम्
गोक्षुरादिगण-पु., लौहमारकवर्गभेदः । गोक्षुरः क्षुरको व्याघ्री सिंहपुच्छी कुशिम्बिका । गोक्षुरादिरिति प्रोक्तो वातश्लेष्महरोगणः (रस. च.)
गोक्षुराद्यघृत-न., मूत्राघाते घृतम् (च. चि. ८ अ.)
गोक्षुरी-स्त्री., गोक्षुरः (रा. व. ४ अ.)
गोक्षुरु-पु., गोक्षुरः । कृकलासः ।
गौ-पु., स्त्री., स्वनामख्यातपशुः (अम.) पु., स्वर्गम् (मे.) चणिकातृणम् (रा. व. ८) ऋषभकः (रा. व. ५) न., लोमन् (अ. टी. भानु.) स्त्री., नेत्रम् । वाक्यम् । रोहिणीजलम् (मे.) भूमिः । (त्रिका.)
गौड (र) वास्तुक-पु., न., चिल्लीशाकम् । बृहत्पत्र-रक्तवास्तुकम् (रा. व. ७)(भा.पू. १ भ. शाकव.)
गौडारस-पु., शूले रसः (रस. र.)
गौडासव-पु., गुडकृतासवः । धातकीरसगुडैर्मद्यभेदः गौडः प्रकीर्तितः (तोड. द्रव्यगुणमाला.)
गौडी-स्त्री., गुडकृतमद्यम् (त्रिका.) धातकीरसगुडादि-कृताम्लमद्यम् । गुणाः-तीक्ष्णा उष्णा मधुरा वातघ्नी पित्तजननी बलकरी दीपनी पथ्या कान्तिजननी तर्पणी च (रा. व. १४)
गौडी कषाया मधुराम्लशीता सन्दीपनी शूलमला-पहन्त्री । हृद्या त्रिदोषं शमयत्यजीर्णं पाण्ड्वाम-यार्शःश्वसनं निहन्ति (अत्रि. १९ अ)
गौणबिम्बी-स्त्री., बिम्बीभेदः (वै. नि.)
गौणी-स्त्री., लोणिकाशाकम् (प. मु.) मनःशिला (र. सा. सं.)
गौण्य-पु., कशेरुकः ।
गौधार-(धेय)-(धेर)-(क)-पु., गोधिकात्मजः । गोधा इति ख्यातम् (सु. क. ८ अ.)
गौरक-पु., गिरिमृत्तिका (वै. नि.) (ज्वरचि. लाक्षा-तैले) लावपक्षी (वै. नि.)

गौरकदम्ब(क)–पु., हारिद्रकः (भा. म. ४ भ.) (रेवतीग्रहचि.)
गौरखटी–स्त्री., श्वेतखटिका (वै. नि.)
गौरचणक–पु., धवलचणकवृक्षः
म.—**श्वेतचणा.**
गुणाः–मधुरः बल्यः रोचनः वातकरः पित्तघ्नः शीतलः गुरुः च (रा. व. १६)
गौरत्वक्–पु., इङ्गुदीवृक्षः (रा. व. ८)
गौरद्रु–पु., हरिद्रावृक्षः (वै. नि.)
गौरधान्य–न., शालिधान्यविशेषम् (च. सू. २७)
गौरपाषाण–न., श्वेतखटिका (वै. नि.)
गौरमाल्य–पु., गिरिजमधूकवृक्षः
गौरवर्णवती–स्त्री., हरिद्रा (वै. नि.)
गौरव्रीहि–पु., गौरशालिः (वै. नि.)
गौरशाक–पु., मधूकवृक्षभेदः (र. मा.)
गौरशाखी (इन्)–पु., जलमधूकः (वै. नि.)
गौरसुवर्णशाक–पु., न., चित्रकूटदेशे स्वनामप्रसिद्ध-शाकविशेषम्, गुणाः–शीतलं कफपित्तज्वरघ्नं दाहा-रुचिश्रान्तिरक्तश्रमघ्नं च (रा. व. ७)
गौराजाजी–स्त्री., श्वेतजीरकम् (रा. व. ६)
गौराट–पु.. श्वेतखदिरः । (वै. नि.)
गौराटिका–स्त्री., शारिकापक्षी (वै. नि.)
गौराद्यघृत–(तैलश्च)–न., व्रणे हितम् । (च. द.)
गौरार्द्रक–पु., स्थावरविषभेदः । (हे. च.)
गौराभ–पु., हरिद्रावृक्षः (वै. नि.)
गौरास्य–पु., नीलवानरः । (रा. व. १९)
गौरिका–स्त्री., जलमधूकः । (सु. चि. ३० अ.) (अलस. चि.) शारिकापक्षी (वै. नि.) अष्टवर्षीय-कन्या (श. र.)
गौरिणी–स्त्री., तेरणक्षुपः । (वै. नि.)
गौरि (री) ल–पु., राजिका, लौहकिट्टम् । लौहचूर्णम् (मे)
गौरीकेश–पु., न. अभ्रधातुः । (प. मु.)
गौरीरज–न., गन्धकम् (चि. क. कल्प)
गौर्जर–पु., मेषशृङ्गी
गौर्य–न., तमालपत्रम् (वै. नि. अर्कचि.) (गणसंख्या-शतके)
गौर्यश्मा–पु., शुक्रपाषाणः । (व. नि.)
गौर्यमल–न., अभ्रकम् (अ. टी. स्वा.)
गौलिक–पु., कालमुष्ककवृक्षः (रा. व. ११)
गौल्य–न., चिक्कणपूगफलम् (न.) मद्यविशेषम् । (स्त्री.,) बिम्बीलता (वै. नि.)

ग्रन्थिका–स्त्री., ग्रन्थिपर्णी, वचा (वै. नि.)
ग्रन्थिकोष–पु., ग्रन्थिपर्णी (च. द.) (वा. व्या. चि.)
ग्रन्थिखेटी–स्त्री., गन्धमात्रा
ग्रन्थितक–पु., शूकरोगः (वै. नि.)
ग्रन्थिनी–स्त्री., कदलीवृक्षः (वै. नि.)
ग्रन्थिभा–स्त्री., अस्थिसंहारवृक्षः (वै. नि.)
ग्रन्थिमत्फल न., क्षुद्रकण्टालिका
ग्रन्थिमान्–पु., अस्थिसंहारवृक्षः (प. मु.)
ग्रन्थिवर्ही (न)–पु., ग्रन्थिपर्णवृक्षः (श. च.)
ग्रन्थिसंवृता–स्त्री., नकुला (वै. नि.)
ग्रहजित्–पु., चीडानामदेवदारुभेदः (रा. व. १८)
ग्रहणीगजेन्द्रवटिका–स्त्री., ग्रहण्यधिकारे रसः (रस. र.)
ग्रहणीरुक्–स्त्री., संग्रहग्रहणी (अम.)
ग्रहणीवज्रकवाट–पु., ग्रहण्यां रसः (र. चि.)
ग्रहणीशार्दूलवटिका–स्त्री., ग्रहण्यां हिता (भैष.)
ग्रहणीहर–न., लवङ्गम् (श. च.) त्रि., ग्रहणीहरद्रव्य-मात्रा ।
ग्रहद्रुम–पु., शाकतरुः
ग्रहनाश (शन)–पु., सप्तपर्णवृक्षः (र. मा.)
ग्रहपति–पु., अर्कवृक्षः (अम.)
ग्रहभीतिजित्–पु., न., चीडानाम गन्धद्रव्यम् [रा. व. १२]
ग्रहागम–पु., भूतसञ्चारः [रा. व. २०]
ग्रहाङ्ग–न., स्वर्णरजतताम्रत्रपुकृष्णलोहम् [रा. व. २२]
ग्रहापहा–स्त्री., गोरोचना (वै. नि.)
ग्रहामय–पु., ग्रहपीडा (रा. व. २०)
ग्रहाशी(इन्)–पु., सप्तपर्णवृक्षः (श. र.)
ग्रहाह्वय–पु., भूताङ्कुशवृक्षः (रा. व. ९)
ग्राम(म्य)कन्द–पु., ग्रामजौल्लः । कचुरिति ख्यातं कन्दशाकम् (र. मा.)
ग्रामकोल–पु., ग्रामशूकरः (वै. नि.)
ग्रामक्रोड–पु., ग्रामशूकरः (वै. नि.)
ग्रामजनिष्पावी–स्त्री., नखनिष्पावी (रा. व. ७)
ग्रामजा–स्त्री., खर्जूरवृक्षः (प. मु.)
ग्रामणी–पु., नीली (हे. च.)
ग्राम(म्य)मद्गुरिका–स्त्री., शृङ्गीमत्स्यः (मे. हारा.)
ग्राम(म्य)मृग–पु., कुक्कुरः (श. र.) गवादिग्रामवासि-पशुवर्गः (सु. सू. ४६)
ग्रामिणी–स्त्री., नीलीवृक्षः (जटा.)

ग्रामीण–पु., ग्राम्यकुक्कुरः (रा. व. १९) काकः। कुक्कुरः (मे.)
ग्राम्यकर्कटी–स्त्री., कूष्माण्डम् (त्रिका.)
ग्राम्यकुङ्कुम–न., कुसुम्भः (त्रिका.)
ग्राम्यकोशा–स्त्री., हस्तिकोशातकी (रा. व. ७)
ग्राम्यवराह–पु., ग्रामशूकरः। गुणाः– तन्मांसं मेदोबलवीर्यवर्धकं वनवराहमांसाद्गुरु च (रा. व. १७)
ग्राम्यशूकर–पु., ग्राम्यवराहः (रा. व. १७)
ग्राम्याश्व–पु., गर्दभः (त्रिका.)
ग्राम्योदक–न., ग्राम्यजलम् (वै. नि.)
ग्रावारि–पु., पाषाणभेदः (प. मु.)
ग्राहलोमशा–स्त्री., वचा (रा. म. ६)
ग्राहिबस्ति–पु., निरूहबस्तिभेदः। सच अम्बष्ठादिप्रियङ्ग्वादिक्वाथेन क्षौद्रघृतयुक्तेन साध्यते (सु.)
ग्राह्य–पु., अम्लवेतसम् (प. मु.)
ग्रीवी (इन्)–पु., स्त्री., **विनी**–ऊष्ट्रः। (जटा.)
ग्रीष्मकर्कटी–स्त्री., ग्रीष्मजकर्कटीविशेषः। (वै. नि.)
ग्रीष्मका–स्त्री., पुष्पविशेषम् (वै. नि.)
ग्रीष्मसुन्दरक–पु., सूक्ष्मपत्रशाकविशेषः। गुणाः—तिक्तं रुचिकरं कफपित्तदोषघ्नञ्च (राज. ३ प.)
ग्रीष्महासा–स्त्री., इन्द्रतुलकः (त्रिका.)
ग्रीष्मा–स्त्री., लोध्रवृक्षः (वै.नि.) नवमल्लिका(रा.व. १०)
ग्लान–त्रि., रोगी (रा. व. २०)
ग्लाना–स्त्री., बलदीनता (हे. च.) रोगः (रा.)
ग्लास्नु त्रि., रोगी (रा. व. २०) ग्लानः (अम.)
ग्लौ–पु., कर्पूरः (अम.)

घ

घट–पु., कलसः। (अम.) द्रोणपरिमाणम्। (६४ श.) (प. मु.) करिगण्डस्थलम् (मे.) कुम्भपरिमाणम् द्रोणविंशतिः।
घटक–पु., विना पुष्पं फलवान् वृक्षः। उदुम्बरादिः।
घटदेशज–न., गडलवणम्। (रा. व. ६)
घटा–स्त्री., मधुरकर्कटिका। (मद. व. ६)
घटाभिधा–स्त्री., घटाकारशुक्लालाबूभेदः। कुम्भतुम्बी (वै. नि.)
घटालाबु-(बू)–स्त्री., कटुतुम्बी (रा. व. ७)
घटालिका–स्त्री., मधुरकर्कटी (मद. व.)
घटिक–न., नितम्बम् (श. च.)
घटिकालवण–न., बिडलवणम् (वै. नि.)
घटीयन्त्रग्रहणी–स्त्री., ग्रहणीरोगभेदः (मा.)
घट्टगा–स्त्री., दाक्षिणात्यनदीविशेषा। एतत् जलं गुणैः कृष्णासदृशम्। स्वादुतरं, पथ्यं कान्तिदञ्च। (रा. व. १४)
घण्ट–पु., शाकादिसिद्धव्यञ्जनविशेषम्। गुणाः–बल्यः रुचिकरः वातघ्नश्च। (राज.)
घण्टक–पु., क्षुद्रक्षुपविशेषः। (सा. कौ.) तस्य मूलम्) गुणाः–कफघ्नं कटुपाकि पित्तकरञ्च। (राज. - घण्टापाटलवृक्षः (ज. द.)
घण्टकर्ण–पु., क्षुद्रक्षुपविशेषः (भैष.)(अम्लपित्तचि.)
घण्टाक–पु., घण्टापाटलिवृक्षः (ज. द.) जालिनी (वै. नि.)
घण्टाकर्ण–पु., घण्टकक्षुपः (प. मु. ग्रहणी) (चि. नित्यानंदरसे)
घण्टापाटलि–स्त्री., स्वनामख्यातवृक्षः (हिं.—मोरवा.) (प. मु.)
घण्टारवा–स्त्री., वनशणवृक्षः (हिं.—झनझनिया.) (भ.)
घण्टालिका–स्त्री., मधुरमातुलुङ्गवृक्षः। (मद. व. ६)
घण्टाली–स्त्री., कोशातकी (रा. व. ३)
घण्टाशब्द–न., कांस्यधातुः (हे. च.)
घण्टाशीता–स्त्री., अतिबला (रा. व. ४)
घण्टाशीला–स्त्री., महाशणवृक्षः (वै. नि.)
घण्टिक–पु., पादिजलजन्तुविशेषः।
घण्टिका–स्त्री., सूक्ष्मजिह्वा (रा. व. १८) (गलशुण्डिकारोगे.) (रा. व. २०) शणपुष्पी (वै. नि. २ भ.)(अपस्मारचि. द्राक्षावलेहे.) कुमरिचम् (वै. नि.)
घण्टिनीबीज–न., जैपालबीजम् (रा. व. ६)
घण्डु–पु., करिकण्ठभूषणम् (उणा.) उष्णता (वै. नि.)
घण्ड–पु., मधुमक्षिका, भ्रमरः (उणा.)
घन–पु., मुस्ता। (रा. व. २३. सि. यो.)(कास. चि. पथ्यादिगुडौ.) नागरमुस्ता (च. द. पित्त. चि.) (विश्वादि.) शरीरम् (रा. व. १८) अभ्रकम्। मेघः (रा. व. २३) वङ्गम्। गुडः (वै. नि.) त्वक् (रा. व. १२) न., लौह (हे. च.) वल्कलम् (रा. व. २) त्रि., निबिडम् (अ. म.)
घनकाल–पु., वर्षाऋतुः (श. र.)
घनगोलक-पु.,स्वर्णं, रौप्यं च। संश्लिष्टरजतसुवर्णम्(हे.च)
घनचन्दनादि–पु., वातपित्तज्वरे कषायः घनचन्दनपर्पटकं कटुकं समृणालपटोलदलं सजलं, शृतशीतसितायुतपित्तहरं ज्वरछर्दितृषारुचिदाहहरम्। (सा. कौ.)

घनजम्बाल-पु., चुलुकः (त्रिका.)
घनता(तो)ल-पु., चातकपक्षी । सारङ्गपक्षी(जटा.त्रिका.)
घनत्वक्-पु., शुक्लरोध्रः (वै. नि.)
घनध्वनि-पु., मुस्ता (र. सा. सं. रसनियामके)
घनपल्लव-पु., शिग्रुवृक्षः (वै. नि.)
घनपाषाण्ड-पु., मयूरः (श. मा.)
घनप्रभ-पु., राजावर्तमणिः (वै. नि.)
घनप्रिया-स्त्री., काकजम्बूवृक्षः (रा. व. ११) नदीजम्बूः (वै. नि.)
घनफेनिला-स्त्री., काकमाची (वै. नि.)
घनमूला-स्त्री., काकमाची । क्षीरमूर्वाविशेषः (वै. नि.)
घनरूपा-स्त्री., खटीशर्करा (वै. नि.)
घनवास-पु., कूष्माण्डः (हारा.)
घनशृङ्गी-स्त्री., मेषशृङ्गी (वै. नि.)
घनसंज्ञा-स्त्री.,मुस्ता (वै. नि.)
घनसून-पु., मोरटलता (रा. व. ३)
घनस्कन्ध-पु., कोशाम्रवृक्षः (रा. व. १२)
घनाकर-पु., वर्षा (वै. नि.)
घनाग्निसह-न., उत्तमकांस्यम् (वै. नि.)
घनाघटा-स्त्री., काकजङ्घा (श. च.)
घनाघन-पु., मत्तहस्ती (अम.)
घनाघना-स्त्री., काकमाची (श. च.)
घनामय-पु., खर्जूरवृक्षः (त्रिका.)
घनामल-पु., पुनर्नवा । चन्दनवटः (वै. नि.) वास्तुकशाकम् (त्रिका.)
घनाराव-पु., चातकपक्षी (वै. नि.)
घनावहा-स्त्री., काकमाची । कर्णस्फोटा (प. मु.)
घनाश्रय-पु., आकाशम्
घनाह्वय-न., अभ्रधातुः (प. मु.)
घनोद्भव-पु., लौहकिट्टम् (वै. नि.)
घनोपल-पु., करका (हे. च.)
घरट्ट-पु., पेषणयन्त्रम्
घर्घट-पु., मत्स्यभेदः (श. र.)
घर्घर-पु., पेचकः (त्रिका.) तुषानलः (हे. च.) (क) नदविशेषः । तजलं रुच्यं शीतलं दीपनं पथ्यं बल्यं क्षीणाङ्गपुष्टिकरञ्च (रा. व. १४) त्रि. स्वरविशेषः
घर्घरिका-स्त्री,, घर्घरनदः । भृष्टधान्यम् क्षुद्रघण्टिका (हे. च.)
घर्घूर्घा (षा)-स्त्री., तन्नामककीटः । यमकीटः (र. मा)
घर्मचर्चिका-स्त्री., घर्मचिका 'स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा । ततः स्वेदः प्रवर्तते दुर्गन्धा चर्मचर्चिका । राजिकाकृतिरुष्णोत्थायतो घर्मविचर्चिका (प्रयोगा.)
घर्मज-पु., जवादिकस्तूरिका (वै. नि.)
घर्मपय-न., घर्मजलम् । उष्णोदकम् (वै. नि.)
घर्मविचर्चिका-स्त्री., घर्मचर्चिका
घर्मान्तकामुकी-स्त्री., पक्षिविशेषः
घर्माम्भ-न., घर्मः (रा. व. १८)
घर्षणाल-पु., मुशलम् । शिलापुत्रम् (त्रिका.)
घसि-पु., अन्नम् । आहारः (हे. च.)
घाट-पु., घाटा (श. र.)
घाण्टिक-पु., धुस्तूरवृक्षः ।
घातकृच्छ्र-न., मूत्रकृच्छ्ररोगः (नि.)
घा (ति) पक्षी (इन्)-पु., श्येनपक्षी (हारा.)
घार-पु., प्रोक्षणम् (हे. च.)
घार्तिक-पु., घृतपूरम् (हे. च.)
घास-पु., तृणम् । शष्पम् (अम.)
घु-स्त्री., नासा (वै. नि.)
घुघुकृत्-पु., वनकपोतः (वै. नि.)
घुघुलारव-पु., पारावतः (वै. नि.)
घुट-पु., पादग्रन्थिः (हे. च)
घुटि-(टी)(क)-(का)-पु., स्त्री., जङ्घांघ्रिसन्धिग्रन्थिः जङ्घाङ्घ्रिसन्धिग्रन्थौ तु घुटिका गुल्फ इत्यपि (हे. च. रा. व. १८.)
घुणदयिता-स्त्री., अतिविषा (वै.नि.) (ज्व. चि. अर्कादि.)' पञ्चोषणघुणदयिता ।
घुणवल्लभा-स्त्री., कृष्णातिविषा (भा.)
घुणा-स्त्री., कालातिविषा
घुण्ट-(क)-पु., गुल्फः (श. मा. हे. च.)
घुण्टा-स्त्री., क्षुद्रबदरः (वै. नि.)
घुण्टिक-न., वनकरीषम् (श. च.)
घुण्ड-पु., भ्रमरः (उणा.)
घुलञ्च-पु., गवेधुका (र. मा.)
घुलघुलाख-पु., पारावतभेदः (रा. व. १९)
घूक-पु., उलूकः (हे. च.)
घूकारि-पु., काकः (हे. च.)
घूर्ण-पु., ग्रीष्मसुन्दरकः (श. च.)
घूर्णि-स्त्रि., चूर्णनम् (हे. च.)
घृणावास-पु., कूष्माण्डः (त्रिका.)
घृणि-(णी)-पु., वनशूकरः (वै. नि.) अश्वरोगविशेषः । तेनाश्वस्य नासाभ्यन्तरे व्रणपिडकशोफा भवन्ति । " नासिकाभ्यन्तरे यस्य

पिडकानां समुद्भवः । व्रणं वा यदि वा शोथः तस्य विद्यात् घृणीरुजम् (ज. द. ३८. अ.)

घृतकरञ्ज-पु., करञ्जविशेषः । गुणाः कटूष्णः वातघ्नः ब्रणनाशनः त्वग्दोषघ्नः अर्शोघ्नश्च । (रा. व. ९.)

घृतका-स्त्री., घृतकुमारिः (वै. नि.)

घृतकुमारिका (री)-स्त्री., स्वनामख्यातक्षुपः

घृतपशु-पु., घृतम् (वै. नि.)

घृतमण्डा-स्त्री., मधूलिः (र. मा. श. च.) रक्तलज्जालुका (वै. नि.)

घृतवर-पु., घृतपूरः । मोहनभोगः (हे. च.)

घृता-स्त्री., काकजङ्घा (श. च.) काकतुण्डिका (वै. नि.)

घृताङ्क-पु., सरलद्रवः (त्रिका.)

घृताची (गर्भ) संभवा-स्त्री., स्थूलैला (रा. व. घ.)

घृताभ्यङ्ग-पु., घृतमर्दनम् । तत्र विधिनिषेधौ ।-वाते पित्ते कफे रक्ते सन्निपाते कृशाङ्गके । मदमूर्च्छाप्रलापेषु तृष्णादाहज्वरेषु च । सन्तप्ते सन्तते जीर्णे ह्यध्वश्रान्ते विशेषतः । बालमध्यमजीर्णानां घृताभ्यङ्गः प्रशस्यते । गुल्मप्लीहाग्निसदनकामलातिसारेषु । श्वासकासोदरच्छर्दिपाण्डुसर्वाङ्गशोषिषु । विद्रधौ पार्श्वशूलेषु गण्डमालार्बुदादिषु । शीतज्वरे प्रमेहे च घृताभ्यङ्गो न शस्यते (वृद्धाः ।)

घृताह्वा-पु., वृकधूपः कृत्रिमधूपः (त्रिका.)

घृतिला-स्त्री., पृश्निपर्णी (प. मु.)

घृतेली-स्त्री., तैलपायिका (हे. च.)

घृष्टतल-पु., अश्वस्य पादरोगविशेषः । लक्षणं यथा-घृष्टं भूमौ तलं यस्य ताम्रीभवति वाजिनः । तस्य घृष्टतलो नाम पादरोगः प्रकीर्तितः (ज. द. ३८ अ.)

घृष्टि-पु., शूकरः (प. मु.) ष्टी-स्त्री., वराहक्रान्ता । वाराहीकन्दः (अम.)
घर्षणम् अपराजिता (मे.)

घृष्टिला-स्त्री., पृश्निपर्णी (र. मा.)

घृष्वि-पु., वनवराहः (वै. नि.)

घेञ्चुलिका-स्त्री., क्रौञ्चादनः (र. मा.)

घोट-(क)-पु., अश्वः (प. मु.)

घोटकारि-पु., महिषः (वै. नि.)

घोटकीदुग्ध-न., अश्वीदुग्धम् । गुणाः-रूक्षमम्लं लवणं दीपनं लघु देहस्थैर्यकरं बल्यं गौरवकान्तिकृच्च (रा. व. १५)

घोटगल-पु., कासतृणम् (वै. नि.)

घोटिका-स्त्री., वडवा । बृहल्लोणीशाकम् । शाकगुणाः-कटूष्णं मधुरं वातव्रणकण्डूकुष्ठरक्तशोथघ्नं च .(रा. व. ५)

घोणक-पु., गोनससर्पः (वै. नि.)

घोणसा-स्त्री., लताविशेषः (वै. नि.)

घोणान्तभेदन-पु., आरण्यशूकरः (वै. नि)

घोणी(इन्)-पु., शूकरः, वनशूकरः (प. मु.)

घोण्टाख्य(स्थ)-पु., मदनवृक्षः (रा. व. ८)

घोनस-पु., गोनससर्पः । तिलित्ससर्पः । (हे. च.)

घोरकुष्ठहा-स्त्री., हितालीति ख्यातलता (वै. नि.)

घोरण्ट-पु., पूगवृक्षः (म. द. व. ६)

घोरदर्शन-पु., उलूकः । तरक्षुः । (रा. व. १९)

घोरनृसिंहरस-पु., सन्निपातज्वरे रसः (भैष.) विषमाख्यं कुचेलकः ।

घोरप्रदा-स्त्री., गोधा (वै. नि.)

घोररासन-(रासी)-पु., शृगालः (त्रिका.)

घोलवटक-पु., घोलकृतवटकः (वै. नि.)

घोषक-पु., कोशातकी । हस्तिघोषालता (भा. पू. १. भ. शाकव.)

घोषका-स्त्री., घोषालता (वै. नि.)

घोषकाकृति-पु., घोषा (र. मा.)

घोषण-पु., कोकिलः (श. र.)

घोषयित्नु-पु., कोकिलः (त्रिका.)

घोषवती-स्त्री., शताह्वा (वै. नि.)

घोषा-स्त्री., शताह्वाक्षुपः (रा. व. ४) कर्कटशृङ्गी (रा व ६) विडङ्गम् (वै. नि.)

घोषातकी-स्त्रीश्वेतघोषातकी (र. मा.)

घोषित-पु., शिशुमारः । (वै.नि.)

घोषिल-पु., वनशूकरः । (वै. नि.)

घ्राणतर्पण-त्रि., घ्राणेन्द्रियतृप्तिजनकः (अम.)

घ्राणदुःखदा-स्त्री., छिक्किनी (भा.) नासारोगः । (वै.नि.)

घ्राणेन्द्रिय—न., नासिका (वै. नि.)

घ्राणोदक—न., नासारन्ध्रेण प्रातः निशीथोदकपानम् । गुणाः-तार्क्ष्यनेत्रत्वं स्वर्गाचार्यसदृशबलशालित्वं बुद्धिमत्त्वमश्विनीकुमारसदृशत्वं शिरोरोगनाशित्वं वलीपलितविहीनत्वञ्च । (रा. व. १४.)

घ्राति-स्त्री., नासिका (श' च.)

च

च-पु., कच्छपः (मे.)

चक्रकर-पु., स्थलचक्रवाकः (वै. नि.)

चक्रकारक- पु., नखीनामगन्धद्रव्यम् (वै. नि.)
चक्रकुल्या-स्त्री., पृश्निपर्णी (श. च.) कृष्णतुलसी (वै. नि.)
चक्रगुच्छ-पु., अशोकवृक्षः (श. च.)
चक्रगुल्म-पु., उष्ट्रः (वै. नि.)
चक्रदन्ता (न्ती)-स्त्री., जैपालवृक्षः (प. मु.)
चक्रधर-पु., सर्पः (त्रिका.)
चक्रधार-न., अर्धधारास्त्रविशेषः (सु. सू. टी. उ. ८ अ)
चक्रनामा (न्)-पु., माक्षिकधातुः । नखीभेदः । (प. मु.)
चक्रपद्माट-पु., चक्रमर्दक्षुपः (श. च.)
चक्र-परिव्याध-पु., आरग्वधवृक्षः ।
चक्रपर्णा(र्णी)-स्त्री., कृष्णतुलसी (वै. नि.) पृश्निपर्णी (श. च.)
चक्रपाणि-पु., स्वनामख्यातप्रकृष्टसंग्रहादिकारः । स गौडराजस्य पाकशालाध्यक्ष आसीत् ' गौडाधिनाथ-रसवत्यधिकारिपत्रम् ' (च. द.)
चक्रबन्धना-स्त्री., वनमल्लिका (वै. नि.)
चक्रबाला-स्त्री., आम्रातकवृक्षः (वै. नि.)
चक्रवालिक-पु., अश्वस्य पादरोगभेदः । ' क्लिद्यन्ते वलयो यस्य खुरसन्धिसमुद्भवाः । अक्लिन्नावाथ सरुजः तं विद्याचक्रबालिकम् (ज. द.)
चक्रमण्डली (इन्)-पु., मण्डलिसर्पजातिभेदः (हे. च.)
चक्रमर्द-(क)-पु., स्वनामख्यातक्षुपः लघुः स्वादुः रूक्षः वातपित्तघ्नः हृद्यः हिमः कफश्वासदद्रुकुष्ठकृमिहरश्च। तत्फलम्-उष्णं कुष्ठकण्डूदद्रुविषवातघ्नं गुल्मकासकृमिश्वासघ्नं कटु च । तत्पत्रम्—अम्लं दद्रुघ्नं वातकफघ्नं कण्डूकासकृमिश्वासकुष्ठघ्नञ्च (भा.)(र्द) कच्चटभेदः (श. च.)
चक्रमुख-पु., शूकरः (वै. नि.)
चक्ररथ-पु., चक्रवाकपक्षी ।
चक्ररद(दंष्ट्र)-पु., शूकरः । वनशूकरः (वै. नि.)
चक्ररेणुका-स्त्री., रक्तकरवीरः (वै. नि.)
चक्रल-पु., रक्तकुलत्थः (वै. नि.)
चक्रला-स्त्री., उच्चटा (अम.) नागरमुस्ता (वै. नि.)
चक्रवल्लरी-स्त्री., स्नुहीभेदः (वै. नि.)
चक्रवीज-न., जैपालबीजम् (रा. व. ६)
चक्रश्रेणी-स्त्री., अजशृङ्गी (र. मा.)
चक्रसंज्ञ-न., वङ्गम् (हे. च.)
चक्राङ्का-स्त्री., नागरमुस्ता (रा. व. ६) सुदर्शना पद्मगुडूची (वै. नि.)
चक्राङ्ग-पु., हंसः (अम.)
चक्राट-पु., विषवैद्यः (मे.)
चक्राधिवासी-पु., नागरङ्गवृक्षः (त्रि. का.)
चक्रालु-पु., महारसालाम्रः (वै. नि.)
चक्रिक-पु., रक्तकुलत्थः (वै. नि.)
चक्रिपत्नी-स्त्री., चक्रवाकस्त्रीः । श्वेततुलसी (वै. नि.)
चक्रीवान्-पु., गर्दभः (अम.) चक्रवाकः (वै. नि.)
चक्रेन्द्रक-पु., देवसर्षपवृक्षः (वै. नि.)
चक्रेश्वरी-स्त्री., वत्सनाडीका (वै. नि.)
चक्रोत्थ-पु., कुक्कुटपादीलता (वै. नि.)
चङ्क (ङ्कु) र-पु., वृक्षः (मे)
चचण्डी-स्त्री., क्षुद्रजिह्वा (वै. नि.)
चचेण्डा-स्त्री., चिचिण्डागुणाः- शोषरोगे हितं पटोलाद्धीनगुणञ्च (मद.)
चञ्चत्कुठाररस-पु., अर्शसि हितः (र. सा. सं.)
चञ्चरी (इन्)-पु. स्त्री. लघुमक्षिका भ्रमर (वै. नि.)
चञ्चरीक-पु., भ्रमरः (त्रिका.)
चञ्चलतैल-न., शिलारसः (त्रिका.)
चञ्चला-स्त्री., पिप्पली (श. च.)
चञ्चिमूचि-पु., कारण्डवपक्षी (त्रिका.)
चञ्चुलु-पु., रक्तैरण्डः (वै. नि.)
चञ्चुसूचि (क)-पु., पक्षिविशेषः । कारण्डवपक्षी (त्रिका. हे. च.)
चञ्चू-स्त्री., पक्षितुण्डः (हे. च.)
चट (टि) काशि (शी) र-पु., पिप्पलीमूलम् (रा. व. ६)
चटाफल-पु., नारिकेलवृक्षः (श. र.)
चट्ट-पु., उदरम् (मे.)
चट्टिका-स्त्री., जलौका (वै. नि.)
चट्ट-पु., लौहपात्रविशेषम् ।
चण-(क)-पु., स्वनामख्यातशिम्बीधान्यम् । गुणाः—रक्तपित्ते हितम् (सि. यो. रक्तपि० चि.) रक्ते कफे पीनसके च कण्ठे गलामये वातरुजे सपित्ते । शीतप्रतिश्यायकृमीन् निहन्ति शुष्कस्तथार्द्रश्चणकः प्रशस्तः (अत्रि. १५ अ.) मधुरः रूक्षः मेहघ्नः वातपित्तकरः दीप्तिवर्णकरः बलकरः रुच्यः आध्मानकरश्च । तद्यूषगुणाः—मधुरः कषायः कफघ्नः वातविकारकरः श्वासोर्ध्वकासपीनसघ्नः बलदीपनश्च । (रा. व. १६) कषायः कटुकश्चोष्णो वातघ्न कफदोषकृत । रक्तपित्तं निहन्त्याशु चणानां यूष उच्यते।

अङ्गारभृष्टतैलभृष्टश्च तद्गुण एव । आर्द्रभृष्टः बल्यो रुचिकरश्च । शुष्कभृष्टस्तु रूक्षो वातकुष्ठप्रकोपनः । स्विन्नः पित्तघ्नः कफघ्नश्च । तत्सूपः क्षोभकरः । आर्द्रोऽतिकोमलः रुच्यः पित्तशुक्रहरः शीतलश्च (भा. पू. १ भ. धान्यव०) तत्शाकं रुच्यं दुर्जरं कफवातकृत् अम्लं विष्टम्भजनकं पित्तघ्नं दन्तशोथहरञ्च (भा. शाकव०) पर्युषितचणकजलगुणाः— शीतं प्रातःपीतं पित्तरसहरं पुष्टिदं सन्तर्पणञ्च (रा. व. १६)

चणकरोटिका–स्त्री., चणकचूर्णकृतरोटिका । गुणाः— रूक्षा विष्टम्भकरी गुरुः श्लेष्मपित्तरक्तघ्नी च (भा)

चणकलोणी–स्त्री., चणाकम्लम् (वै. नि.)

चणकशक्तु–पु., चणककृतशुक्तिः ।

चणकक्षार–पु., चणकपुष्पम् (रस. कौ. क्रव्यादरसे)

चणकपत्रक–(पत्री)–पु., स्त्री., रुदन्तीवृक्षः । रोदन्तीति उत्कलः (रा. व. ५) गोक्षुरकः (वै. नि.)

चणकाम्लक–न., पिप्पलीमूलम् । चणकक्षारः, गुणाः— चणकाम्लकमत्यम्लं दीपनं दन्तहर्षणं लवणानुरसं रुच्यं शूलाजीर्णविबन्धनुत् (भा. र. सा. सं.) (अम्लवर्गे)

चणकाम्लवा–न., क्षेत्रस्थफलवच्चणकपत्रशीतलजलम् (रत्ना.)

चणक्य–न., चाणक्यमूलम् (वैद्यकम्)

चण्डका–स्त्री., वचा

चण्डचुक्रा–स्त्री., तिन्तिडीवृक्षः (वै. नि.)

चण्डचन्द्रिका– स्त्री., रसजारणादिज्ञानम्

चण्डाख्या–स्त्री., दारुहरिद्रा

चण्डात–(क)–पु., करवीरः (अम.) रुदन्तीवृक्षः (वै. नि.)

चण्डाल–(क)–पु., रक्तकरवीरः । तण्डुलीयशाकम् (वै. नि.)

चण्डालिका–स्त्री., रक्तकरवीरः । चण्डालवल्लकी

चण्डी–स्त्री., चिडादेवदारुः । शिवलिङ्गी (रा. व. अ.)

चण्डीकुसुम–पु., रक्तकरवीरवृक्षः (रा. व. १०)

चण्डीलता–पु., ग्रन्थिपर्णभेदः (वै. नि.) हिं.—चोरा.

चण्डु–पु., मूषिकः (श. च.)

चण्डेश्वररस–पु., नवज्वरे रसः (रस. कौ.)

चतुर–पु., काकः (हे. च.)

चतुरङ्ग–पु., कलायभेदः (वै. नि.)

चतुरङ्गा–स्त्री., घोटिकावृक्षः (रा. व. ८)

चतुरङ्गावलेह–पु., ज्वरे अवलेहः । स. च समभागद्राक्षामलकशुण्ठीमधुकृतः (भा.)

चतुरूर्ध्वपात–पु., शरभमृगः (वै. नि.)

चतुरूषण–न., कणाम्लसहितम्, त्र्यूषणम् । व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे (वैद्यकम्)

चतुर्गति–पु., कच्छपः (हे. च.)

चतुर्थक–पु., विषमज्वरभेदः । चातुर्थिकज्वरः ।

चतुर्थिका–स्त्री., पलमानम् । ४ वा ८ तो (प. प्र.)

चतुर्दंष्ट्रा–स्त्री., गोक्षुरक्षुपः (वै. नि.)

चतुर्दल–पु., सुनिषन्नशाकः (भा.)

चतुर्दशाङ्ग–पु., सान्निपातिकज्वरे कषायभेदः (सा. कौ.)

चतुर्दशी–स्त्री., श्वेतनिर्गुण्डी (वै. नि.)

चतुर्द्रव–पु., चतुर्गुणद्रवद्रव्यम् (सि. यो.)

चतुर्धारी–स्त्री., चतुर्धारकाण्डवली (वै. नि.)

चतुर्भङ्गा–स्त्री., शुक्रवृद्धदारकः (वै. नि.)

चतुर्भद्रिकावलेह–पु., चातुर्भद्रावलेहः ।

चतुर्मुख–पु., वातव्याधौ रसविशेषः (र. सा. सं.)

चतुर्वर्ण–पु., कलायभेदः (वै. नि.)

चतुर्वीज–न., मेथिकादिबीजचतुष्टयम् । मेथिका चन्द्रसूरश्च कालाजाजी यवानिका । एकत्रचतुष्टयं युक्तं चतुर्बीजमिति स्मृतम् । तच्चूर्णभक्षितं नित्यं निहन्ति नयनामयम् । अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम् (भा.)

चतुश्छद–(दा)–पु., स्त्री., चाङ्गेरी सुनिषणकः (वै.नि.)

चतुष्की–स्त्री., मशकहरी

चतुष्कुवलय–न., कुवलयस्य नालकन्ददलकेसरम् (वा. उ. ३८ अ. सिद्धरसायनघृतम्)

चतुष्पदा–स्त्री., भेण्डा (वै. नि.) जलजपुष्पविशेषम् (अर्कचि.)

चतुष्पर्णी–स्त्री., क्षुद्राम्लिका (रा. व. च.)

चतुष्पुटोदर–पु., पीतपुष्पकरवीरवृक्षः (वै. नि.)

चतुस्सम–पु., आमज्वरयोगाविशेषः । हरीतकीलवङ्गसैन्धवयवानीसमभागेषु । मिलितचन्दनागुरुकस्तुरिकुङ्कमेषु (ह. च.) गुणाः–आमशूलविबन्धघ्नं पाचनं दोषशोषनुत् (च.) आमातिसारशूले जातीफलं लवङ्गं जीरकं टङ्कणं समभागचूर्णं माक्षिकसितासहितं लिह्यात् ।

चत्वाल–पु., दर्भभेदः । गर्भाशयः (वै. नि.)
चदिर–पु.,हस्ती । कर्पूरम् । सर्पः (उणा.)
चन्न–पु., भक्तम् (वै. नि.)
चन्दक–पु., मत्स्यविशेषः । गुणाः–तन्मांसं अनभिष्यन्दि मधुरं बलकरं च (रा. व. १९.)
चन्दनगोपी–स्त्री., शारिवाविशेषः (रा. व. १२.)
चन्दनद्रुम–पु., रक्तचन्दनवृक्षः, सर्जः (वै. नि.)
चन्दनपुष्प–न,. लवङ्गम् (रा. व. १२)
चन्दनमूल–न., चन्दनतरुमूलम् । इदं जङ्गमविषघ्नम् । (नकुलः १६ अ.)
चन्दनमूलिका–स्त्री., कृष्णसारिवा (वै. नि.)
चन्दनादिलौह–जीर्णज्वरहितः (र. सा. सं.)
चन्दनाम्बु–न., सुगन्धजलभेदः । (वैद्यकम्)
चन्दिर-पु., कर्पूरम् (उणा.) हस्तिनि (मे.)
चन्द्रक–पु., मत्स्यविशेषः । गुणाः–चन्द्रकस्त्वनभिष्यन्दो मधुरो बलवर्धनः । (राज. ३ प.) मेचकः । (अ. म.) नखम् (श. च.) न., श्वेतमरिचम् (रा. व. ६) चन्द्रकम् (स्त्री,.) मेथिका । कपिकच्छुः । (वै. नि.)
चन्द्रकवान्–पु., मयूरः । (वै. नि.)
चन्द्रकान्ति–न., रूप्यम् । (वै. नि.)
चन्द्रगोलिका–स्त्री., चन्द्रकमीनः । (वै. नि.)
चन्द्रचञ्चल–पु., खलिशमत्स्यः (त्रिका.) चन्द्रकमत्स्यः । (जटा.)
चन्द्रजोपल–पु., चन्द्रकान्तमणिः (रा. व. १३)
चन्द्रट–पु., त्रिंशच्छ्लोकी व्याख्याकारः ।
चन्द्रतरु–पु., महासोमवल्ली (वै. नि.)
चन्द्रद्युति–न., चन्दनम् (वै. नि.)
चन्द्रनामा (न्)–पु., कर्पूरम् । (वै. नि.)
चन्द्रपुष्प–न., रौप्यम् (वै. नि.)
चन्द्रभस्म–न., कर्पूरम् (त्रिका.)
चन्द्रभा–स्त्री., श्वेतकण्टकारी ।
चन्द्रभागा–स्त्री., भारतवर्षीयनदीविशेषः । तज्जलगुणाः- सुशीतलं पित्तदाहघ्नं वातकरञ्च (रा. व. १४)
चन्द्रमणि–पु., चन्द्रकान्तमणिः । (हे. च.)
चन्द्रमल्लिका(ल्ली)–स्त्री., मल्लिकाभेदः ।
चन्द्रमसी–स्त्री., योनिमध्यस्थनाडीविशेषः । या चापरा चान्द्रमसी च नाडी कन्दर्पगर्भे भवति प्रधाना । सा सुन्दरी योषितमेव सूते.........(भा.)
चन्द्रमा–पु., सोमलताभेदः । (सु. चि .२९)
चन्द्ररश्मिन्–पु., चकोरपक्षी (वै. नि.)
चन्द्रराजी–स्त्री., बाकुची (रा. व. ४)
चन्द्ररुक्–न., चन्द्रकमत्स्यः । (वै. नि.)
चन्द्रलता–स्त्री., एलालता (वै. नि.)
चन्द्रविहङ्गम–पु., बकपक्षी (त्रिका.) सारसपक्षी (वै. नि.)
चन्द्रशकला–स्त्री., बाकुची (वै. नि.)
चन्द्रशालिका-स्त्री., प्रासादशिरोगृहम् (हारा.)
चन्द्रशेखररस–पु., शीताङ्गसन्निपातज्वरे रसः । (र. सा. सं.)
चन्द्रसंज्ञ–पु., कर्पूरम् (अम.)
चन्द्रसम्भवा–स्त्री., सूक्ष्मैला (श. च.)
चन्द्रापुरपूग–न., तत्स्थानजातपूगफलम् (रा. व. ११)
चन्द्रामृतरस(लौहश्च)–पु., राजयक्ष्माधिकारे रसः (र. सा. सं.)
चन्द्राश्मा–(न्द्रिकाद्राव)–पु., चन्द्रकान्तमणिः (रा. व. १३.)
चन्द्रिकापायी(इन्)–पु., चकोरः (रा. व. १९)
चन्द्रिल–पु., नापितः । वास्तुकशाकम् (मे.)
चन्द्री–स्त्री., बाकुची (रा. व. ४)
चन्द्रेष्ट–न., कुमुदपुष्पम् (वै. नि.)
चन्द्रोदयमकरध्वज–(रस)–पु., रसायनाधिकारे रसः (रस. र.) तत् बृहद्ध्वजभङ्गाधिकारे हितम् स्वल्पः– ध्वजभङ्गे रसः (भैष.)
चन्द्रोदयवर्ति–स्त्री., नेत्ररोगे हिता ।
चन्द्रोपल–पु., चन्द्रकान्तमणिः (हे. च.)
चपलाजटा(मूल)–स्त्री., पिप्पलीमूलम् (वै. नि.) (२ भ. कासचि. मञ्जिष्ठाद्यचूर्ण.)
चपेट–पु., तलम् (रा. व. १८)
चमट–पु., स्थूलगोधूमः (वै. नि.)
चमत्कार–पु., अपामार्गः (श. र.)
चमरपुच्छ–पु., कोकडमृगः (रा. व. १९)
चमस–पु., पर्पटः । पिष्टभेदः । लड्डुकः । अजयपालः ।(सी) –स्त्री., मुद्गमसूरादिपिष्टके तच्चूर्णञ्च । चूर्णं यच्छुष्कमाषाणां चमसी साभिधीयते (भा.)
चमूरु–पु., हरिणभेदः (अम.)
चम्पककलिका–स्त्री., चम्पककोरकः (रा. व. १०)
चम्पकागद–पु., लूताकीटादिविषहरोऽगदभेदः । यथा– ' हरिद्राद्वयपत्तङ्गमञ्जिष्ठानतकेसरैः । सक्षौद्रसर्पिः ' (वा. उ. ३७ अ.)

चम्पकालु(सु)-पु., पनसवृक्षः (श. र.)
चम्पालु ,, ,, ,,
चम्पकुन्द-पु., मत्स्यविशेषः, गुणाः- चम्पकुन्दो गुरुवृष्यः मधुरो वातपित्तजित् । शुक्रलो बलकृत् प्रोक्तः स्नेहनः श्लेष्मकोपनः (रा. ३ अ.)
चम्पकोल-(ष)-पु., पनसवृक्षः ।
चम्पल-पु., महानागकेशरचम्पकः (त्रिका.)
चरट-पु., खञ्जरीटपक्षी (श. मा.)
चरणग्रन्थि-पु., पदगुल्फः (हे. च.)
चरतिपत्रिका-स्त्री., रास्ना (वै. नि.)
चरप्रिय-न., मरिचम् (अम.)
चरित्रा-स्त्री., तिन्तिडीवृक्षः (श. र.)
चरुका-स्त्री., तृणधान्यभेदः । गुणाः—श्यामाकवत् (च. सू. २७ अ.)
चरुव्रण-पु., चित्रपूपः । रोटिका (त्रिका.)
चर्चरीका- स्त्री., पु., शाकम् । महाकालः (मे.)
चर्चा-स्त्री., नियमापरित्यागः ।
चर्भट-पु., कर्कटिकालता (हला.)
चर्म (कण्टक)-पु., त्वक् (रा. व. १८) पर्पटकः (वै. नि.) (जिह्वकज्वरचि.)
चर्मकारतरु-पु., शुक्लमदनवृक्षः (वै. नि.)
चर्मकारालु-(क)-पु., वाराहीकन्दः (वै. नि.)
चर्मकारिका (री)-स्त्री., चर्मकषा (मे. ज. द.)
चर्मकी(इन्)-स्त्री., पु., चर्मपक्षी । (रा. व. १९)
चर्मघटिका-स्त्री., जलौका (वै. नि.)
चर्मचट (टि) का (टी)-स्त्री., चर्मचटी
चर्मचित्रक-न., श्वित्रकुष्ठम् (रा. व. २०)
चर्मज-न., रक्तधातुः । लोमन् (रा. व. २०)
चर्मजा-स्त्री., मसूरिकाभेदः । चामरगोटीति लोके (भा.)
चर्मटी-स्त्री., जलौका (वै. नि.)
चर्मण्वती-स्त्री., कदलीवृक्षः (मे.)
चर्मतरङ्ग-पु., त्वक्सङ्कोचम् (रा. व. १८) चर्मकीलरोगः (वै. नि.)
चर्मदूषिका-स्त्री., चर्मरोगविशेषः । (रा. व.) खर्जुः (वै. नि.)
चर्मद्रुम-पु., भूर्जवृक्षः (रा. व. २३)
चर्मनाशक-पु., चन्द्रशूरः (भा.)
चर्मपत्रा (त्री)-स्त्री., पु., (त्र) (क्ष)-चर्मचटिका (जटा. । रा. व. १९)
चर्मपिडका-स्त्री., मसूरिकारोगभेदः (मा. नि.)

चर्मप्रभेदिका-स्त्री., चर्मप्रभेदनाख्यम् (अम.)
चर्मबन्धन-न., मरिचम् (वै. नि.)
चर्मबिन्दुका-स्त्री., शीतपित्तोदर्दकोठरोगेषु उपयोज्या (वै. नि.)
चर्मव्रण-पु., चर्मरोगभेदः । लूतारोगादिः (वै. नि.)
चर्मसम्भवा-स्त्री., एला (हारा.)
चर्मसा-स्त्री., जलौका (वै. नि.)
चर्मसार-पु., शरीरस्थरसधातुः (रा. व. १८)
चर्महन्त्री-स्त्री., चन्द्रशूरः (भा.)
चर्माभ-पु., रसधातुः (रा. व. १८)
चर्मारक-पु., शुक्लहिङ्गुलम् (वै. नि.)
चर्माह्वय-पु., पर्पटकः (वै. नि.)
चर्मी (इन्) पु., भूर्जपत्रवृक्षः (अम.)भृङ्गरीटः (श. र.। चर्मचटकः (वै. नि.)
चर्वण-न., अष्टविधान्नान्यतमं अन्नम् (रा. व. २०) भक्षणम् । दन्तैर्भक्षणम् (हे. च.)
चर्वित-पु., दन्तैर्भक्षितम् (अम.)
चर्षिणी-पु., मनुष्यः (वै.नि.)
चलघ्नी-स्त्री., स्पृक्का (वै. नि.)
चलचञ्चु-पु., चकोरः (हे. च.)
चलत्पूर्णिका-स्त्री., चन्द्रकमत्स्यः (त्रिका.)
चलदङ्ग-क पु., मत्स्यभेदः ! गुणाः-' चलदङ्गोऽनभिष्यन्दी हितो वाते च रोचनः (राज ३ प.)
चलदल-पु., अश्वत्थवृक्षः (मद. व. ५) (रा. व. ११)
चलद्रुम-पु., गोक्षुरक्षुपः (वै. नि.)
चलन-न., कम्पनम् । भ्रमणम् (मे.) पु., हरिणः (जटा. पादः (हे. च.)
चलपुच्छ-पु., खञ्जरीटः (वै. नि.)
चला-स्त्री., सिल्हकम् (र. मा.)
चलाचला-स्त्री., काकः (रा व १९) त्रि चञ्चलः (अम)
चलातङ्क-पु., वातव्याधिः (रा व २०)
चलापह-पु., वरुणवृक्षः । रक्तकुलत्थः (वै. नि.)
चलु-पु., गण्डूषः (हे. च.)
चलुक-पु., प्रसृतिमानम् (मे.)
चवि-(वी) स्त्री., चविका (श. र.)
चव्या-स्त्री., कार्पासी (रा. व. ४) चव्यम् (रा. व. ६) वचा (मे.) पिप्पली (वै. नि.)
चषति-पु., जीर्णता । भक्षणम् (उणा.)
चक्षण-न., अवदंशः (हे. च.)

चक्षु-न., नेत्रम् (रा व १८) मेषशृङ्गी (र. मा.)
चक्षुपुष्प-पु., पाठा (प. मु.)
चक्षुक-पु., तिनिशवृक्षः (प. मु.)
चक्षुर्धावन-न., नेत्रधावनम् ।
चक्षुर्बहुल-पु., न., मेषशृङ्गी (र. मा.)
चाकचिचा-स्त्री., श्वेतवुह्ना (र. मा.)
चाक्षुक-पु., तिनिशवृक्षः (प. मु.)
चाङ्ग-पु., चाङ्गेरी (अटी. रा.)
चाङ्गेरीसदृशपत्र-पु., सुनिषण्णशाकम् (भा. पू. १ भ. शाकवर्गः)
चाटकैर-पु., चटकशिशुः (वै. नि.)
चाटुकर्ता-पु., पारावतः (वै. नि.)
चाणक्य (मूलक)-न., चणकमूली, मूलकभेदः
म.—थोर मुळा.
गुणाः-उष्णं कटुकं रुच्यं दीपनं गुरु ग्राहि कफवातक्रिमिगुल्मघ्नम् (रा. व. ७)
चाण्डाला (लिनी)-स्त्री., लिङ्गिनी (रा. व. ३ र. सा. सं. रसमारकवर्गे)
चातक-पु., तन्नामकपक्षी
हिं.—तोका.
गुणाः-तन्मांसं लघु शीतलं रक्तपित्तकफघ्नं अग्निकरञ्च (राज.) वृष्यं बलपुष्टिदञ्च (रा. व. १९)
चातुर्भद्रपञ्चमूल-न., तत्पञ्चमूलः किराततिक्तादिगणे सान्निपातिकज्वरे योगविशेषः (सि. यो.)
चातुर्भद्रावलेहिका-स्त्री., कासश्वासहरे कफघ्नेऽवलेहभेदः, कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह । ' घनकृष्णारुणाशृङ्गीचूर्णं क्षौद्रेण संयुतं । शिशोर्ज्वरातिसारघ्नम् (च. द.)
चान्द्र-न., रौप्यम्
पु., चन्द्रकान्तमणिः (हे. च.)
चान्द्रक-न., शुण्ठी (रा. व. ६)
चान्द्रा-स्त्री., अतिविषा (रा. व. घ.)
चान्द्राख्य-न., आर्द्रकम् (रा. व. घ.)
चामरपुष्प-(क)-पु., गुवाकवृक्षः । आम्रवृक्षः । केतकवृक्षः (क) काशः (मे.)
चामली-स्त्री., अन्नमण्डः (प. मु.)
चारणी-स्त्री., करवीरपुष्पवृक्षः । स्थलपद्मिनी (वै. नि.)
चारवायु-पु., शीतलसुरभिवातः (त्रिका.)
चारबीज-न., पियालबीजम् (हिं-चारदाना रा व ११)
चारिणी-स्त्री., करुणीपुष्पवृक्षः (रा. व. १०.)
चारित्रा-स्त्री., तिन्तिडीवृक्षः (श. र.)
चारिल-पु., शशघाती (सु. सू. ७ अ.)
चारिवाक्-स्त्री., अजशृङ्गी (वै. नि.)
चारी-स्त्री., हिलमोचिका (भा. पू. १ भ.) शाकवर्गे
चारुक्-पु., शरबीजम् । गुणाः-चारुको मधुरो रूक्षो रक्तपित्तकफापहः ।
चारुकेशा-स्त्री., वनमल्लिका (वै. नि.
चारुदारु-पु., प्लक्षवृक्षः (वै. नि.)
चारुधाम-न., आम्रहरिद्रा (वै. नि.)
चारुनालक-न., रक्तपद्मम् ।
चारुपत्रिका-(त्री)-स्त्री., प्रसारिणी (रा. व. ५ मद. न. १)
चारुयूथी-स्त्री., शुक्लयूथिका (वै. नि.)
चारुलोचन-पु., हरिणः (त्रिका.)
चारुवर्तिनी-स्त्री., लाक्षा (वै. नि.)
चारुवृक्ष-पु., प्लक्षवृक्षः (मद. व. ५)
चारुशिला-स्त्री., रत्नम् (त्रिका.)
चिक(क)-पु., छुछुन्दरी (त्रिका.) (क) न., गुवाकः (वै. नि.)
चिक (कु) र-पु., केशः (रा. व. १८) वृक्षभेदः (त्रिका.)
चिकित्साकलिका-स्त्री., वैद्यकसंग्रहविशेषः ।
चिकित्साञ्जन-न., वैद्यकग्रन्थभेदः विद्यापतिकृतः ।
चिकित्सादीपक-पु., धन्वन्तरिकृतचिकित्साग्रन्थः ।
चिकित्सादीपिका-स्त्री., वङ्गसेनकृतचिकित्सासंग्रहः ।
चिकित्सामृत-न., चिकित्सासंग्रहभेदः ।
चिकित्सार्णव-पु., सदानन्दशुक्लकृतचिकित्साशास्त्रम् ।
चिकित्स्य-त्रि., चिकित्सार्हः । तद्गुणाः- ' निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा । चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः (भा.)
चिकूल-पु., दन्तीवृक्षः (वै. नि.)
चिक्किणा-स्त्री., पूगवृक्षः (वै. नि.)
चिङ्गट(ड)-पु., मत्स्यभेदः । गुणाः— ' चिङ्गटस्तु गुरुर्ग्राही मधुरो बलवर्धनः । मेदःपित्तास्रजिद्वृष्यो रोचनः कफवातलः (राज. ३ प. श. मा.)
चिङ्गटी-स्त्री., क्षुद्रचिङ्गटा, गुणाः—मधुरा हृद्या वातघ्नी गुरुः श्लेष्मकरी च (राज. ३ प.)
चिचण्ड (ण्डा) (ण्डिका)-पु., स्त्री., फलशाकविशेषः गुणाः---वातपित्तघ्नः बल्यः पथ्यः रुचिप्रदः शोषे हितः गुणैः पटोलत ईषद्धीनश्च (भा. पू. १ भ.) (शाकवर्गे) शोषरोगे हितं पटोलान्न्यूनगुणः (मद.)

चिचि-पु., चित्रकवृक्षः। गुणाः--दीपनः पाचनः आमपाचनश्च (शार्ङ्ग.)
चिच्चिटिङ्ग-पु., वायव्यकीटविशेषः। (सु. कल्प. ८ अ.)
चिञ्चातैल-न., तिन्तिडीबीजभवंतैलम्, गुणाः--कटुपाकं लेखनं वातकफघ्नं रुच्यं नातिशीतलं कषायञ्च (रा. व. १५)
चिञ्चितिका-स्त्री., तिन्तिडीवृक्षः (च. सू. २६ अ.)
चिञ्ची-स्त्री., गुञ्जा।
चिञ्चोट (क)-पु., मुस्ताकृतिलघुकेसरी मूलशाकविषः। गुणैः—कसेरुतुल्यः (भा. पू. १ भ. शाकवर्गे.) गुणाः—गुरुत्वं अजीर्णकरत्वं शीतलत्वञ्च (राज३प)
चिटिका-स्त्री., आरामशीतला (वैं. नि.)
चित्तभ्रमसन्निपात-पु., स्वनामख्यातसन्निपातज्वरविशेषः, यथा-गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते मुह्यतिच। दाहव्यथाभयार्तो नरस्तु चित्तविभ्रमे ज्वरे भवति। (भा. म. १ भ.)
चित्तविप्लव-पु., उन्मादः (हे. च. अम.)
चित्रकजीवी-पु., जीवकः (वै. नि.)
चित्रकण्टक-पु, गोक्षुरकः (वै. नि.)
चित्रकण्ठ-पु., पारावतः। जटा.। सारसपक्षी (वै. नि.)
चित्रकन्धर-पु., पक्षिविशेषः (वै. नि.)
चित्रकर्मा-पु., तिनिशवृक्षः (श. च.)
चित्रकाण्डाली-स्त्री., गोनसवल्ली (वै. नि.)
चित्रकाद्यलौह-न., शोथाधिकारे (सा. कौ.)
चित्रकाय-पु., चित्रकव्याघ्रः (रा. व. १९)
चित्रकूला-स्त्री., ह्स्वदन्तीवृक्षः (वै. नि.)
चित्रकृत्-पु., तिनिशवृक्षः (अम.)
चित्रकोल-पु., आञ्जनेयः (त्रिका.)
चित्रगन्धा-स्त्री., शुकनासा (वै. नि.)
चित्रगुडिका-स्त्री., वातग्रहणी (च. द. भा.)
चित्रग्रीव-पु., सारसपक्षी (वै. नि.)
चित्रट-न., वङ्गम् (वै. नि.)
चित्रतनु-पु., लावपक्षी (वै. नि.)
चित्रदण्डक-पु., शूरणक्षुपः (र सा. सं.) वनशूरणः। कार्पासवृक्षः (वै. नि.)
चित्रदेवी-स्त्री., महेन्द्रवारुणीलता (रा. व. ३)
चित्रदेह-पु., लावपक्षी (वै. नि.)
चित्रनेत्रा-स्त्री., सारिका (हारा.)
चित्रपत्रक-पु., मयूरः (वै. नि.)
चित्रपत्री-स्त्री., महाराष्ट्रीनामक्षुपः जलपिप्पलिः (रा. व. ४) पृश्निपर्णी (वै. नि.)
चित्रपदा-स्त्री., गोधापदी लता (श. मा.)
चित्रपाठी (लि)-पु., चित्रकः (वै. नि.)
चित्रपादा-स्त्री., शारिका (हारा.)
चित्रपिच्छ (क)-पु., मयूरः (त्रिका.) (च. चि २७ अ.)
चित्रपुङ्ख-पु., शरः (त्रिका.)
चित्रप्रिया-स्त्री., हरितालः (वै. नि.)
चित्रमृग-पु., चित्रवर्णमृगः (च.)
चित्रमेखल-पु.,मयूरः (त्रिका.)
चित्ररञ्जक-न., वङ्गम् (वै. नि.)
चित्रलेखिनी-स्त्री., तूलिका (हारा.)
चित्रलोचना-स्त्री., शारिकापक्षी (जटा.)
चित्रवदाल-पु., मत्स्यभेदः (जटा.)
चित्रवर्तिनी-स्त्री., रेणुकबीजम् (वै. नि.)
चित्रवीज-पु., रक्तैरण्डः (रा. व.)
चित्रवीर्य-पु., रक्तैरण्डः (रा. व.)
चित्रव्याघ्र-पु., चित्रकव्याघ्रः (रा. व. १९)
चित्रशोक-पु., अशोकवृक्षः (वै. नि.)
चित्रसर्प-पु., मालुधानसर्पः (श. र.)
चित्रसारा-स्त्री., हरितालः (वै. नि.)
चित्रक्षुप-पु., द्रोणपुष्पी (रा. व. ५)
चित्रांशु-पु., गुग्गुलुः (ज. द. १२ अ.)
चित्राक्षी-स्त्री., शारिका (त्रि. का.)
चित्रान्न-न., खेचरान्नम् (वै. नि.)
चित्रापूप-पु., अपूपविशेषः (त्रि. का.)
चित्राम्बररस-पु., ग्रहण्यां हितः।
चित्राली-स्त्री., तिलकुसुमम्।
चित्रिक-पु., चैत्रमासः (श. र.)
चित्रौदन-न., विचित्रान्नम्
चिन्तामणिचतुर्मुख-पु., वातव्याधौ रसः। (भैष.)
चिन्तामणिरस-पु., जीर्णज्वरे रसः (र. सा. सं.)
चिन्तिडा (डी)-स्त्री., तिन्तिडी (द्वि. कोषः)
चिन्न-पु., चीनधान्यम् (श. च.)
चिपिटक-पु., पृथुकः (हिं.-चूडा) (त्रिका.) गुणाः—गुरुः स्निग्धः बृंहणः कफवर्धनश्च (राज.)
चिपुट-पु., चिपिटकः (रुद्रकोष.)
चिप्पट-न., वङ्गम् (वै. नि.)
चिम-पट्टशाकम् (श. मा.)
चिमि (क)-पु., तिमिमत्स्यः पट्टशाकम् (श. मा.) शुकपक्षी (श. र.)

चिमचिमी–स्त्री., वातपीडा झिनझिनीति लोके।
चिरजीवक–पु., असनवृक्षः। जीवकवृक्षः (वै. नि.)
चिरज्वर–पु., दीर्घकालानुबन्धी ज्वरः
चिरन्तन–स्त्री., पुष्करमूलम् (वै. नि.)
चिरपत्रा (त्री)–स्त्री., भूमिजम्बूवृक्षः (वै. नि.)
चिरपत्रिका–स्त्री., चञ्चुकशाकम् (वै. नि.)
चिरपर्ण–पु., सर्जवृक्षः (वै. नि)
चिरपोटा–स्त्री., वासुकभेदः (वै. नि.)
चिरमेही–स्त्री., गर्दभः (त्रिका. हे. चं.)
चिरम्भण–पु., चिल्लपक्षी (त्रिका.)
चिरा–स्त्री., स्वनामख्यातगन्धद्रव्यम्, जलौका (वै. नि.)
चिराटिका–स्त्री., श्वेतपुनर्नवा (रा. व ९) लौहचटका (भैष. शूलचि. विद्याधराभ्रे) घटिका (वैद्यकसंग्रहः)
चिरातच्छद–स्त्री., कदलीवृक्षः (वै. नि.)
चिरातिक्त–पु., चिरतिक्तकः
चिरायु–पु., तालवृक्षः (रा. व. ९) काकः (वै. नि.)
चिरि–पु., चिल्लपक्षी (वै. नि.) शुकपक्षी (त्रिका.)
चिरिण्टी–स्त्री., शङ्खपुष्पी (रा. व ३)
चिरिपत्र–पु., क्षुद्रकारवेल्लम् (वै. नि.)
चिरिल्ला–पु., महामत्स्यभेदः (वै. नि.)
चिरिबिल्व–पु., करञ्जवृक्षः (अ. टी. भ.)
चिरु–न., बाहुसन्धिः (च. श.)
चिर्भटी–स्त्री., राजसुषवी (प. मु.) फलशाकविशेषम्। गुणाः–बाल्ये तिक्ता ईषदम्ला च, पाके दीपनी। शुष्का रूक्षा श्लेष्मवातारुचिघ्नी जाड्यघ्नी रोचनी दीपनी च (रा. व. ७) चिर्भिटं मधुरं रुच्यं गुरु पित्तकफापहम्। अनुष्णं ग्राहि विष्टम्भि पक्वन्तूष्णं च पित्तलम् (भा. पू. १ भ. शाकवर्ग.) पुष्पञ्च चिर्भटश्चैव दोषत्रयकरं स्मृतम्। अपक्वं जीर्णकफकृत् पक्वं किञ्चिद्विशिष्यते (अत्रि. १६ अ.)
चिलमीलिका–स्त्री., खद्योतः (मे.)
चिलि(ली)चि(ची)म(मि)–पु., मत्स्यभेदः।
चिलिमीलक–(लिका)–पु., स्त्री., चिलिचिममत्स्यः। (अ. टी. भ.)
चिलिम्ब–पु., प्लक्षवृक्षः। (वै. नि.)
चिल्लका–स्त्री., झिल्लिका (श. च.)
चिल्लभक्ष्या–स्त्री., वखीनामकद्रव्यम् (श. रा.)
चिवि(बु)–चिवुकः (ज. टा. । भ.)
चिविट–पु., चिपिटः (अ. टी.)
चिविल्लिका–स्त्री., पत्रशाकविशेषः।
म–चिविली
गुणाः–कटुः कषाया ज्वरे अतीसारे च हिता रसायनी च (रा. व. ५.)
चिवुक–पु., मुचुकुन्दवृक्षः (रा. व. १०.)
न., ओष्ठाधरभागः (रा. व. १८)
चीडागन्ध–पु., श्रीवेष्टनामकगन्धद्रव्यम् (रा. व. १२)
चीनवङ्ग–न., शीषकम् (रा. व. १३)
चीनाकर्कटी–स्त्री., चित्रकूटदेशप्रसिद्धस्वनामख्यातकर्कटिका, गुणाः– रुच्यं शीतलं पित्तदाहशोषघ्नं मधुरं तृप्तिदं हृद्यञ्च (रा. व. ७)
चीनीचोप–पु., तोपचीनी इति ख्यातवणिग्द्रव्यम् (भैष. वाजी.)
चीरि–स्त्री., नेत्रांशुकः (श. र.)
चीरिका (री)–स्त्री., झिल्ली (हे. च.)
चीरितच्छदा (पत्रिका)–स्त्री., पालङ्कशाकम् (भा.)
चीरुक–न., चे ऊर इति ख्यातफलम्। गुणाः–रुचिकरं, दाहकरं कफकरं पित्तकरं अम्लञ्च। (राज. ३प.)
चीर्णपर्ण–पु., निम्बवृक्षः। खर्जूरवृक्षः (मे.)
चीलिका–स्त्री., चीरिका (श. र.)
चील्का–स्त्री., झिल्ली (श. र.)
चील्लिका–स्त्री.,–चिल्लीशाकम् (वै. नि.)
चीवर–स्त्री., शाकविशेषः। (उणा.)
चुक्रक–न., चुक्रम् (प. मु.) गुणाः– दुर्जरं भेदि वातघ्नं पित्तकरं गुरु च (राज. ३प.) पु., अम्लवेतसम् (वै. नि.)
चुक्रकेतु–पु., अम्लवेतसम् (वै. नि.)
चुक्रचण्डिका–स्त्री., तिन्तिडीवृक्षः। (मद. व. ६)
चुक्रवेतस–पु., अम्लवेतसम् (वै. नि.)
चुक्रवेधक–न., काञ्जीविशेषम् (रा. व. १०)
चुक्रशाक–पु., चुक्रपालङ्कः (वै. नि.)
चुचुन्दर–पु., छुछुन्दरः (वै. नि.)
चुञ्चुपत्र–पु., चुञ्चुक्षुपः (रा. व. ४)
चुञ्चुर–पु., चुञ्चुक्षुपः (रा. व. ४)
चुण्टा (ण्टी)–स्त्री., कृत्रिमजलाशयभेदः (हे. च.) कूपम् (त्रिका.)
चुत–(ति)–पु., स्त्री., अपानद्वारम्ः (श. र.)
चुरी–स्त्री., उपकूपम्। स्वल्पजलाशयः (हे. च.)
चुलुम्प–पु., बाललालनम् (जटा.)
चुलुम्पा–नी., छागिः (त्रिका.)

चुलुम्पी-पु., शिशुमाराकृतिमत्स्यः। उत्पलमत्स्यः (श.र.)
चुल्ल-पु., क्लिन्ननेत्रतारोगः।
चुलकी-स्त्री., शिशुमारः। कीलीभेदः (मे.)। (श. र.)
चुल्लि-स्त्री., पाकार्थमग्निस्थानम् (अ. टी.)
चुल्लिकालवण-न., लवणविशेषः (वै. नि.)
चुल्ली-स्त्री., गुवाक् पुष्पम् (च. द. वा. व्या. महाराजप्र तैले) चिता (मे.)
चुबुक-पु., अधरोष्ठाधोभागः, मुखम् (वै. नि.)
चुस्त-पु., न., स्थालीपक्वमांसम्—पनसफलस्यासारभागः (लिङ्ग सं. भः) कूपः। त्रिका) मयूरशिखा (अम.)
चूडा-स्त्री., मस्तकम्। श्वेतगुञ्जा (वै. नि.)
चुडाल-न., मस्तकम् (श. र.)
स्त्री., श्वेतगुञ्जा (रा. व. २) उच्चटा (अम. ज. द. अ.) नागरमुस्ता (रा. व. ६)
चूर्णकील-पु., अश्वस्य पादरोगभेदः। सूक्ष्मचूर्णतलश्चैव चूर्णकीलः (ज. द. ३८ अ.)
चूर्णकुन्तल-पु., अलकः (अम.)
चूर्णखण्ड-पु., स्त्री., कङ्करः (हारा.)
चूर्णमशी-स्त्री., मसीविशेषा। कृष्णसर्पो दह्यमानो यदा कृष्णत्वं गच्छति तदा चूर्णमसीत्युच्यते (सु. चि. ९ अ.)
चूर्णशाकाङ्क-पु., गौरसुवर्णशाकः (रा. ७)
चूर्णि-(र्णी)-स्त्री., कपर्दकः (उणा. मे.)
चूर्णिका-स्त्री., सक्तुः।
चूर्धर-पु., ऋषभकः (रा. व. ५)
चूल(क)-पु., केशः।
चूलिक-न., लोचिका (श. च.) गुणाः— ग्राहि वात-श्लेष्मघ्नं पाके किञ्चिदम्लकारि रूक्षं आमग्रहणी-कासघ्नम् (वैद्यचन्द्रिका.)
चूषा-स्त्री., चूषणम्। कक्षा (अम.)
चेउलपूग-न., कोङ्कणदेशख्यातं पूगफलविशेषम् (रा. व. ११)
चेतनिका-स्त्री., चेतकीहरीतकी (रा. व. ११)
चेदार-पु., सरटः (वै. नि.)
चेलकत्वक्-स्त्री., गुवाक्पुष्पत्वक् (च. द. वा. व्या. चि.)
चेलान(ल)-पु., लतापनसः। गुणाः— गुरु मधुरं विष्टम्भि कफवातकरञ्च (राज. ३ प.)
चेलीम-पु., मत्स्यविशेषः (वै. नि.)
चेष्टक-पु., तपस्विमत्स्यः (वै. नि.)
चेष्टानाश-पु., इन्द्रियस्वापः। प्रलयः (रा. व. २०)

चैतसघृत-न., उन्मादे घृतविशेषः, गुणाः—सर्वचेतोविकाराणां शमनं परमं मतम्। (सा. कौ.) भैष. (च. द.। भा.।)
चैत्यद्रु-पु., अश्वत्थवृक्षः (प. मु.। रा. व. ११। र. मा.)
चैत्र-(क)-पु., चित्रानक्षत्रयुक्तमासः।
चैत्रवृक्ष-पु., आम्रवृक्षः (वै. नि.)
चोक-(ख)-न., स्वर्णक्षीरीमूलम्। 'कटुपर्णी हैमवती हेमक्षीरी हिमावती हेमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते' (भा.)
चोचक-न., वल्कलः (श. र.)
चोदनी-स्त्री., दुरालभा (वै. नि.)
चोरकण्टक-पु., शङ्खिनीवृक्षः (वै. नि.)
चोरका-स्त्री., चोरपुष्पी (च. द.; उन्मादचि. महापैशाचघृते.)
चोरपुष्पिका-(ष्पी)-स्त्री., शङ्खिनी (श. र। वा. व्या. महाप्र. तले.)
चोरभण्टि(ण्डि)का-स्त्री., वार्ताकी (वै. नि.)
चोरशुण्ठी-स्त्री., श्वेतकिणिही।
चोरस्नायु-स्त्री., श्वेतकाकजङ्घा, काकनासा (रा. व. ३)
चोरा-स्त्री., चोरपुष्पी (श. च.)
चोलक-स्त्री., वल्कलम् (श. र.)
चोलकी-पु., शङ्खिनी (वै. नि.) करीरः। नारङ्गम्। किष्कुपर्व (मे.)
चोलण्डुक-पु., शिरोवेष्टनम् (त्रिका.)
चोलीपूग-न., आन्ध्रदेशभवपूगफलम् (म.—चोली पोफळ)(रा. व. ११)
चोष्य-न., अष्टविधान्नान्यतममन्नम्। (रा. व. २०)
चौरिक-पु., चोरानामगन्धद्रव्यम्। चोरपुष्पी (च. द.-वा. व्या. चि. अष्टादशशतीप्र तैल.)
चौरी-स्त्री., ग्रन्थिपर्णवृक्षः (वै. नि.)
च्युति-स्त्री., भगः (हे. च.) पायुः (श. र.)
च्युरव-पु., कफजकृमिभेदः (च. वि. ७)

छ

छग-पु., छागः (त्रिका.)
छगला-स्त्री., वृद्धदारकलता (श. र.)
छगलाङ्घ्री (ण्डी)-स्त्री., वृद्धदारकलता। (र. मा. सु.-सू. ३९ अ.) छगलान्त्रीलता (अ. टी. र.)
छगली-स्त्री., वृद्धदारकः (प. मु.) छागिः (विश्व.)
छच्छिका-स्त्री., सनवनीततक्रम् (वै. नि.)

छटाफल-पु., नारिकेलवृक्षः । तालवृक्षः । (वै. नि.) गुवाकवृक्षः (त्रिका.)

छत्र-(क)-पु., रक्तकोकिलाक्षवृक्षः । मूलेन पत्रेण वचाकारवृक्षः (र. मा.) अलकाकः । मत्स्यरङ्गपक्षिणि (श. च.) भूतृणे (रा. व. ८)

छत्रपत्र (क)-न., स्थलपद्मम् (त्रिका.) पु., भूर्जपत्रवृक्षः (र. मा.) सप्तपर्णवृक्षः । मानकम् ।

छत्रपर्पटी-स्त्री., सौराष्ट्रमृत्तिका (प. मु.)

छत्रपुष्पी-स्त्री., स्थूलशताह्वा (वै. नि.)

छत्रवृक्ष-पु., स्वनामख्यातवृक्षः (र. मा.)

छत्राङ्ग-न., हरितालविशेषः (प. मु.)

छत्रातिच्छत्र-(त्रा)-पु., स्त्री., सुगन्धाख्यतृणविशेषः । स जलजः छत्राकारश्च भवति । काश्मीरस्थदिव्यसरसि दृश्यते (श. र.) (त्रे) - द्रोणपुष्पीद्वये (सि. यो. उन्मा. चि. पैशाचघृते । श्रीकण्ठः)

छत्रिका-स्त्री., शिलीन्ध्रः । सा नानास्थानभेदेन बहुधा । गुणाः--शीता कषाया स्वादुः पिच्छिला छर्द्यतिसारज्वरकफरोगकरी गुरुश्च । पलालजा तु स्वादुपाका रूक्षा च । तथा रेणुजगोष्ठजशुचिस्थानकाष्ठजश्वेतछत्रिकाश्च दोषकर्यः निन्दिताश्च (राज.)

छत्रि (इन्)-पु., सप्तपर्णवृक्षः (वै. नि.) नापितः (श. र.) (त्रि) छत्रविशिष्टम्

छदपत्र-पु., भूर्जवृक्षः (र. मा.)

छदवल्लभ-पु., ग्रन्थिपर्णमूलः (वै. नि.)

छद्मद्विज-पु., कङ्कपक्षी (मे.)

छद्वर-पु., दन्तः (वै. नि.)

छमि-पु., ऊर्णनाभिः (वै. नि.)

छरिषा-स्त्री., दारुहरिद्रा (वै. नि.)

छर्द-न., वमनवेगः । वमनम् (हे. च.)

छर्दिकारिपु-पु., सूक्ष्मैला (श. च.)

छर्दिघ्नरिपु- ,, (वै. नि.)

छर्द्यापनिका(नी)-स्त्री., कर्कटिका (वै. नि.)

छविपत्रक-पु., वृश्चिकाली (भेष. कुष्ठ.) (चि. कन्दर्पसारतैले.)

छागकण-पु., सर्जतरुः । शाकतरुः (वै. नि.)

छागघृत-न., छागीनवनीतजघृतम् । गुणाः- चक्षुष्यं दीपनं बलवर्धनं कासश्वासकफरोगराजयक्ष्मसु हितञ्च (रा. व. १५) (पृ. २३७)

छागण-पु., करीषाग्निः (त्रिका.)

छागदधि-न., छागीदुग्धकृतदधि गुणाः- वातकफघ्नं लघु उष्णं नेत्ररोगे हितम् अर्शः श्वासकासघ्नम् । रुच्यं दीपनं पाचनञ्च (रा. व. १५; २४० पृ. २४) आजं दधि भवेच्चोष्णं क्षयवातविनाशनं । दुर्नामश्वासकासेषु हितमग्निप्रदीपनम् । विपाके मधुरं वृष्यं रक्तपित्तप्रसादनं । शस्तं प्राभातिकं प्रोक्तं वातपित्तनिबर्हणम् (अत्रि. ८ अ)

छागदुग्ध-न., अजादुग्धम् (म. शेळीचे दूध) गुणाः- कषायं मधुरं शीतं ग्राही लघु पित्तक्षयापहारि कासज्वरघ्नं रुधिरातिसारे हितं त्रिदोषघ्नञ्च (अत्रि. ८ अ.) लघुकायत्वात् नानाद्रव्यनिषेवणात् नात्यम्बुपानात् व्यायामात् सर्वव्याधिहरं क्षीणाजदुग्धं गोदुग्धवीर्यादधिकगुणं क्षीणदेहेषु पथ्यतमम् (रा. व. १५।२१७)

छागनवनीत-न., छागीदुग्धोत्थनवनीतं । गुणाः- लघु मधुरं कषायं त्रिदोषघ्नं चक्षुष्यं दीपनं बल्यं सदा हितञ्च । प्रत्यग्रनवनीतंक्षयकासनेत्ररोगकफघ्नं बल्यं अतिदीपनम् (रा. व. १५; पृ. ३८५)

छागभोर्जा (इन्) पु., ईहामृगः । वृकः (रा. व. १९) त्रि. छागभक्षकः

छागमांस-न., छागलमांसम् (सि. यो.) गुणाः- लघु स्निग्धं नातिशीतं रुचिप्रदं निर्दोषं वातपित्तघ्नं मधुरं बलदं पुष्टिदञ्च छागपोतभवं मांसं लघु शीतलं प्रमेहघ्नम् । तृणचारिच्छागपोतमांसं ईषल्लघु बलदञ्च (रा. व. १७-४०५; पृ. २६८)
छागमांसं परं हृद्यं बृंहणं बलवर्धनं । स्निग्धं मृद्वनभिष्यन्दि नात्युष्णं धातुसाम्यकृत् (राज.) निष्कासिताण्डच्छागमांसगुणाः-कफकृत् गुरु स्रोतः-शुद्धिकरं बलकरं मांसवर्धकम् वातपित्तघ्नञ्च । वृद्धच्छागमांसगुणाः-वातलं रूक्षञ्च । तदण्डं रुचिप्रदम (भा.) शुक्रवर्धकमिति दृष्टफलम् ।

छागलान्त-रि.-पु., ईहामृगः (रा. व. १९)

छागलाक्ष-पु., मल्लिकाकुसुमम् (प. मु.)

छागशकृत्-न., छागविष्ठा

छागशत्रु-पु., ईहामृगः (वै. नि.)

छागशृङ्गी-स्त्री., अजशृङ्गी (भा. म.) (३ म. मूत्रकृच्छ्र चि.)

छागाद्यघृत-न., (यक्ष्मरोगे हितम् (सा. कौ. च. द)

छागिका (गी) स्त्री., छागस्त्रीमांसगुणाः-मधुरं शीतलं ग्राहि दीपनं रक्तपित्तहरं क्षयकासहरं कषायं लघु अतिसारज्वरघ्नञ्च । अप्रसूतामांसं पीनसघ्नं शुष्ककासेऽरुचौ शोषे च हितं अग्निदीपनञ्च (भा.)

छागीतक्र–न., छागीघोलः । गुणः– छागलं लघु सस्निग्धं त्रिदोषशमनं परं । गुल्मार्शोग्रहणीशूलपाण्ड्वामयविनाशनम् (अत्रि. ८ अ.)

छागीक्षीरविनाशन–पु., शाखोटवृक्षः

छात्रदर्शन–न., प्रत्यग्रघृतम् । हैयङ्गवीनघृतम् (श. च.)

छात्रशर्करा–स्त्री., छात्रमधुकृतशर्करा । गुणैः–छात्रमधुसदृशा (रा. व. १४. २७६ पृ. २४९)

छायातरु–पु., छायाप्रधानवृक्षः वटादिः (त्रिका.)

छायामित्र–न., छत्रम् (श. र.)

छायावृक्ष–पु., अश्वत्थवृक्षः (वे. नि.)

छिक्क (ण) का–न., स्त्री. क्षवथुः (वै. नि.)

छिक्कणी–स्त्री., छिक्किनी (भा.)

छिक्कर–पु., जाङ्गलजीवविशेषः ।
गुणाः–छिक्करो लघु बृंही च मधुरो दोषनाशनः ।
तुल्यो हरिणमांसेन ज्वरेष्वपि प्रशस्यते (अत्रि.२०अ)

छिक्किका–(नी)–स्त्री., स्वनामख्यातलता ।
(हिं–माकछिकनी) ।
गुणाः– कटुका रुच्या तीक्ष्णोष्णा वन्हिपित्तकृत् ।
वातरक्तहरी कुष्ठकृमि वातकफापहा च । (भा.)

छिक्किपत्रा–स्त्री., छिक्किनी (वै. नि.)

छिक्ति–पु., करञ्जवृक्षः (श. च.)

छिन्नपत्रिका (त्रि)–स्त्री., आम्रातकवृक्षः (वै. नि.)

छिन्नपुष्पा–स्त्री., तिलकवृक्षः (वै. नि.)

छिन्नरूढशाली–पु., रोपितशालिः

छिन्नवेशिका–स्त्रीं., पाठा (श. च.)

छिलिहिण्ट (ण्ड)–(ण्टी)–पु., स्त्री., पातालगारुडीलता (हिं–छिरिहिटा) (मद. । भा.)

छुर–न., कपिकच्छूमूलम् (वै. नि.)

छुरा–स्त्री., सुधा (हारा.)

छुरिक–पु., सप्तपर्णवृक्षः (प. मु.)

छुरिका–स्त्री., वन्ध्या गौः पालङ्कशाकः (भा.) अस्त्रभेदम् ।

छेक–पु., गृहासक्तपक्षी । मृगः (मे.)

छेलु–पु., सोमराजी

छोटिका–स्त्री., अङ्गुलिध्वनिः (भा.)
हिं.—चुटकी.

छोद–पु., चूर्णम् (सि. यो. दाह. चि.) 'चन्दनच्छोदवारिणा '।

छोलङ्ग–पु., मातुलुङ्गवृक्षः (प. मु.)

छोहारा–स्त्री., शुष्कमहाखर्जूरम् । ' खजूरी गोस्तनाकारा परदिपादिहागता । जायते पश्चिमे देशे सा छोहारेति कीर्त्यते (भा.)

ज

ज–पु., मृत्युञ्जयः (मे.) विषम् । तेजः (श. र.)

जकुट–न., वार्ताकुपुष्पम् (अत्रि. ३ स्थान ५६ अ.)

जक्षण–न., भक्षणम् (रा. व. २०.५५; पृ. ४१२)

जक्ष्म–(क्ष्मा)(न्)–पु., क्षयरोगः (अ. टी. भ.)

जगत्–न., सौराष्ट्रमृत्तिका

जगदुन्मादका–स्त्री., सुरा (वै. नि.)

जगन्नु–पु., अग्निः । कीटभेदः (विश्व. । श. र.)

जग्धि–स्त्री., भोजनम् (रा. व. २०)

जघनकूपक–पु., सन्धिखल्लद्वयम् (हला.)

जघनेफला–स्त्री., काकोदुम्बरिका (अम. ज. द. १२ अ.)

जङ्गमकुटी–स्त्री., तृणादिच्छत्रम् । (त्रिका.)

जङ्गल–न., मांसम् । निर्जनदेशः (त्रिका.)

जङ्गाल–न., रञ्जनद्रव्यभेदः । (अर्श. चि. ९ शतकं.)

जङ्गुल–न., विषम् । (त्रिका.) जालिनीफलम् (श. र.)

जङ्घापर्व–न., ऊरुमध्यस्थपर्वम् (वै. नि.)

जङ्घाशूल–न., वातव्याधिभेदः (नि.)

जटर–पु., उदरम् (द्विकोष.)

जटान्ता–स्त्री., जटामांसी । भूम्यामलकी (वै. नि.)

जटामांस्यादि–पु., कफरोगे तदादिसुरभिद्रव्यगणः ।
जटामांसी–नखी–पत्री– लवङ्ग –तगर –शिलारस–गन्धपाषाणानि (रा. व.)

जटायु–पु., गुग्गुलुः (प. मु.)

जड्ड (ड्डु) ल–पु., पिप्लुः (अम. हे. च.)

जठरघ्न–पु., जलोदरः (रा. व. २०)

जठरज्वाला-स्त्री., उदरशूलः (वै. नि.)

जठरनुत्–पु., आरग्वधवृक्षः (श. च.)

जठ (ड) री–स्त्री., गर्मोटिकातृणम् (रा. व. ८)

जडसम्भव–न., शीतलजलम् (वै. नि.)

जडा–स्त्री., शूकशिम्बी (प. मु.) भूम्यामलकी (र. मा.)

जतुक–न., हिङ्गुः (भा.)

जतुकारी–स्त्री., जन्तुकालता (रा. व. ३)अलक्तकः(वै.नि.)

जतुकाह्वा–स्त्री., लाक्षा (वै. नि)

जतु (न्तु) कृत्–स्त्री., जनीनामगन्धद्रव्यम् (अम.) लाक्षा (वै. नि.)

जतुकृष्णा–स्त्री., पर्पटीनामगन्धद्रव्यम् जन्तुकालता (भा.)

जतुनी–स्त्री., चर्मचटिका (त्रिका.)

जतुपत्रिका–स्त्री., चाङ्गेरी । क्षुद्रपाषाणभेदः (वै. नि.)
जतुरस–पु., अलक्तकः (रा. व. ६)
जतुशिला–स्त्री., शिलाजतु (वै. नि. २ भ; कृमि. चि. विडङ्गादितैले.)
जतूका–स्त्री., अजिनपत्रा (श. र.) जनीवृक्षः (अम.) वास्तूकभेदः (वै. नि.)
जत्रुक–न., स्कन्धकक्षयोः सन्धिः । (रा. व. ६)
जत्र्वस्थि–न., स्कन्धकक्षासन्ध्यस्थि । ते च द्वे (च. शा. ७ अ.)
जन–पु., लोकः । मनुष्यः (अम.)
जनकारी–(इन्)–पु , अलक्तकः (रा. व. ६)
जनत्रा–स्त्री., छत्रम् (वै. नि.)
जनन–न., जन्म । उत्पत्तिः (मे.)
जनप्रिया–स्त्री., कुस्तुम्बरी (रा. व. २२)
जनरञ्जक–पु., वनवास्तुकः (वै. नि.)
जनरञ्जनी–स्त्री., जन्तुकालता जनीनामसुगन्धद्रव्यम् (वै. नि.)
जनाशन–पु., ईहामृगः वृकः (रा. व. १९)
जनि–(नी)–स्त्री., वास्तुकः (वै. नि.) उत्पत्तिः (अम.) स्वनामख्यातगन्धद्रव्यम् (अ. टी. रा.) जन्तुका । कटुका (रा. व. ६) नी–स्त्री., सातला (वै. नि.)
जनिनीलिका–स्त्री., महानीली (रा. व. ४)
जनोत्रम–पु., शाकवृक्षः (प. मु.)
जन्तव–न., विडङ्गम् (वै. नि. २ भ. अर्श. चि.)
जन्तुक–पु., हिङ्गु; (ज. द. १२ अ.) जन्तुका (वै. नि.)
जन्तुका–स्त्री., लाक्षा (रा. व. ६) मालवदेशप्रसिद्ध-स्वनामख्यातलता (हिं.—पापडी) गुणाः—शिशिरा तिक्ता रक्तपित्तकफघ्नी दाहतृष्णावमीहरा रुचिकृत् दीपनी च (रा. व. ३) नाडीहिङ्गुः । पत्रदात्री । भ्रमरी त्वक् (रा. व. २३)
जन्तुतन्तु–पु., शणबीजम् । (वै. नि.)
जन्तुपादप–पु., कोषाम्रवृक्षः (रा. व. ११)
जन्तुमत्फल–पु., उदुम्बरवृक्षः । (वै. नि.)
जन्तुला–स्त्री., जन्तुकालता (वै. नि.) काशतृणम् (त्रिका)
जन्तुवृक्ष–पु., कोशाम्रवृक्षः । उदुम्बरवृक्षः । (वै. नि.)
जन्तुशत्रु–पु., विडङ्गम् (चि. क. क. केशरञ्जने)
जन्तुहनन (रण)–न., विडङ्गम् (वै. नि.)
जन्मवर्त्म–न., भगम् (त्रिका.)
जपाकुसुमसन्निभ–न., हिङ्गुलम् (वै. नि.)
जपापुष्प (प्रसून)–न., जवा । तत्र अगर्भसम्पादन-गुणम् । (चि. क.क. गर्भचिकित्सा)

जपारक्त–न., जवापुष्पम् पु., जपावृक्षः
जमन–न., भोजनम् (अ. टी. भ.)
जम्ब–पु., जम्बीरवृक्षः (र. सा. सं.)
जम्बा–स्त्री., जम्बूफलम् (अम.)
जम्बाल–पु., केतकवृक्षः । (श. र.) शैवालम् । पङ्कम् (त्रिका । हारा.) (न.) सुगन्धतृणम् (वै. नि.)
जम्बुडिका–स्त्री., स्विन्नः माषः । (रावणकुमारतन्त्रे)
जम्बु (म्बू) ल–पु , केतकवृक्षः ।
जम्बुवनज–न., श्वेतजवापुष्पम् ।
जम्भका–स्त्री., जृम्भा । (रा. व. २०)
जम्भला–स्त्री. सुखप्रसवस्मरण राक्षसीविशेषा । 'समुद्र-स्योत्तरे तीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत् ।'(राजमार्तण्डः) तुलकः (वै. नि.)
जम्भा–स्त्री., जृम्भा कश्चित् (रा. व. ११)
जम्भी(इन्)–जम्बीरवृक्षः (श. च)
जयकारिका–स्त्री., लज्जालुका (वै. नि.)
जयतरु–पु., नन्दीवृक्षः ।
जयद्रुम–पु., वन्दा (वै. नि.)
जयनाल–पु., यावनालः (वै. नि.)
जयमङ्गलरस–पु., विषमज्वरघ्न औषधविशेषः (सा. कौ. र. चि. रसकौ.)
जयाञ्जन(मल)–न., स्रोतोऽञ्जनविशेषम् जहरपाथर इति पश्चिमदेशे । 'स्रोतोञ्जनं नदीजञ्च कृष्ण-स्रोतोजयाञ्जनम्' (प. मु.)
जयापुष्प–न., जपापुष्पम् (वै. नि.)
जयावटी–स्त्री., ज्वराधिकारे हिता (र. चि. रस. कौ.)
जयाश्रया –स्त्री., गर्मूटिकातृणम्
जरक–न., पु., हिङ्गुः ।
जरठ–पु., पाण्डुः । कठिनः (मे.) जीर्णः (हे. च)
जरडी–स्त्री., गर्मूटिकातृणम् (रा. व. ८) हिं.—जहूर.
जरती–स्त्री., वृद्धा (रा. व. ८)
जरत्पित्तशूल–न., परिणामशूलम् । 'वान्तमात्रे जर-त्पित्ते शूलमाशु प्रशाम्यति,' (रस. र.)
जरन्त–पु., महिषः (उणा.)
जरमान–., पु., मनुष्यः(उणा)
जराक्लैब्य–न., जराजन्यक्लैब्यरोगविशेषः (च. चि. ३०-१७६-१८०)
जरायुदोष–पु., गर्भजरोगभेदः वै. नि.)

जरालक्ष्म-न., पलितम्- (रा. व. १८)
जरूथ-न., मांसम् (त्रिका.)
जर्जरीक-त्रि., बहुच्छिद्रद्रव्यम् (मे.)
जर्ण-त्रि., जीर्णः (हे. च.)
जर्त-(र्तु)-पु., करिणि । योनिः (उणा.)
जलकण्टक-पु., शृङ्गाटकः (कुम्भीरः (हारा.)
जलकदली-स्त्री., स्वनामख्यातजलजकन्दविशेषः (प. मु.)
जलकन्द-पु., श्रृङ्गाटकः (न्दा)-स्त्री., जलकदली (प. म.)
जलकपि-पु., शिशुमारः (हारा.)
जलकपोत-(क)-पु., जलपक्षी (वै. नि.)
जलकरङ्क-पु., नारिकेलफलम् । पद्मम् । शङ्खः (त्रिका. । हारा.)
जलकर्णा-स्त्री., कर्णमोटा (च. द. यक्ष्म. चि.) (रशेन्द्रगुडौ)
जलकल्क-पु., जम्बालः (हारा.)
जलकाक-पु., जलपक्षिविशेषः । तन्मांसगुणाः—स्निग्धं गुरु हिमं वातहरम् (रा. व. १७)
जलकाङ्क्ष-(ङ्क्षि)-पु., स्त्री., हस्ती (हारा.)
जलकामा-स्त्री., अन्धाहुली (वै. नि.)
जलकिराट-पु., नक्रः । शिशुमारः (हारा.)
जलकुक्कुट-पु., डहुकाः । कारण्डवः (वै. नि.)
जलकुक्कुभ-पु., जलकुक्कुटः (हे. च.)
जलकुक्कुटी-स्त्री., गङ्गाचिल्लीपक्षी (हारा.)
जलकुण्डल-पु., शेवालम् (भूरिप्र.)
जलकुब्जका-स्त्री., शृङ्गाटकः । कुम्भीरः (वै. नि.)
जलकूपी-स्त्री., पुष्करिणी (हारा.)
जलकूर्म-पु., शिशुमारः (त्रिका.)
जलकेश-पु., शैवालम् (हारा.)
जलगुल्म-पु., क्षुद्रसरोवरः (मे) कच्छपः (हारा.)
जलगोजक-न., पिस्ता इति ख्याते काबेलदेशजेफलम् (वै. नि.)
जलङ्ग-पु., महाकालः (रा. व.)
जलजन्तु-पु., जलवासिप्राणिमात्रः (अभ.)
जलजन्तुका-स्त्री., जलौका (भ.)
जलजम्बूका-स्त्री., भूमिजम्बूवृक्षः (भा.)
जलजसुमना-स्त्री.,श ङ्खपुष्पी (वै. नि.)
जलजा-स्त्री., वल्ली, यष्टिमधु (वै. नि.)
जलजात-पु., जलवेतसम् (वै. नि.)
जलजाता-स्त्री., कुङ्कुमशालिः (रा. व. १६)
जलजिह्व-पु., शिशुमारः । कुम्भीरः (हारा.)
जलजीविनी-स्त्री., जलौका (वै. नि.)
जलडिम्ब-पु., शुक्तिः । शम्बूकः (हारा.)
जलतण्डुलीय-न., काचटः (भा.)
जलतापिक (तापी)-पु., मत्स्यविशेषः ।
जलताल-पु., इल्लीशमत्स्यः (त्रिका.)
जलतिक्त (क्ति) का-स्त्रीं., शल्लकीवृक्षः (रा. व. ११)
जलत्रा-स्त्री., छत्रम् (हारा.)
जलदागम-पु., वर्षाकालः (रा. व. २१)
जलदाशन-पु., शाकम् । शालवृक्षः (श. च.)
जलधर-पु., मुस्ता । (अम. । च. द. अति.) (चि. कच्चटादि-तिनिशवृक्षः (रा व ९.)
जलधराधर-पु., पीतोशीरम् (वै. नि.)
जलनकुल-पु., जलमार्जारम् (त्रिका.)
जलनेत्र-पु., जलमधुकः (वै. नि.)
जलपत्रिका-स्त्री., पद्मिनी (वै. नि.)
जलपक्षी-पु., हंसादिजलचरपक्षी, तन्मांसम् स्निग्धं हिमं, गुरु (रा. व. १७)
जलपाक-पु.. परिपाकः कर्षं गृहीत्वा द्रव्यस्य क्राथयेत्प्रास्थिकेऽम्भसि । अर्धं श्रृतं प्रयोक्तव्यं जलपाके स्वयं विधिः (वा. चि. २ अ.)
जलपादप-पु., हंसः (वै. नि.)
जलपारावत-पु., जलकपोतः (रा. व. १९)
जलपिप्पली-स्त्री., महाराष्ट्रीक्षुपः (हिं.—पाणिसगा जलपिपरी) (रा. व. ४) गुणाः- जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः । संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा कटुपाकरसा रुच्या कषाया वह्निवर्धिनी (भा. पू. गुणवर्गे) कटुः तीक्ष्णा कषाया मलशुद्धिकरी व्रणकीटादिदोषरसदोषघ्नी च (रा. व. ४)
जलपुष्प-न., जलजातपुष्पम् । यथा अष्टधा कमलानि स्युर्जलवासी चतुष्पदा जलजीवी च कुम्भीका जलपुष्पगणस्त्वयम् (अर्क.)
जलपृष्ठजा-स्त्री., शैवालः (श. च.)
जलप्रद-पु., न., पीतवालकः (वै. नि.)
जलप्राणी-पु., जलजन्तुः (वै. नि.)
जलप्राय-न., अनूपदेशः (अम.)
जलप्रिय-पु., धन्याकम् (रा. व. ६) चातकपक्षी (श र) मत्स्यः स्त्री., हिलमोचिका (प. मु.)
जलप्लव-पु., जलमार्जारः

जलफल–न., शृङ्गाटकः [भा.]
जलफेन–पु., समुद्रफेनः (वै. नि.)
जलब्राह्मी–स्त्री., वाकुची (वै. नि.) मोचिका (त्रिका.)
जलभू–पु., स्त्री., कच्चटः (श. च.)
जलमद्गु–पु., मत्स्यरङ्कपक्षी (हारा.)
जलमक्षिका–स्त्री., वारिमक्षिका, जलकृमिः (त्रिका.)
जलमार्जार–पु., जलबिडालम् (त्रि. का.)
जलमूर्तिका–स्त्री., करका (श. च.)
जलमीन–पु., मत्स्यभेदः (वै. नि.)
जलमोद–न., उशीरम् (रा. व. १२)
जलयष्टि–पु., वल्लीयष्टिमधु (वै. नि.)
जलरङ्क(ङ्ग)–पु., बकपक्षी (हे. च.)
जलरङ्कु–पु., हरिणः (वै. नि.) दात्यूहपक्षी (हारा.)
जलरण्ड–पु., जलसर्पभेदः । जलबिन्दुः (हे. च. । श. र.)
जलरस–पु., लवणम् (हा. रा.) सौवर्चललवणम् । क्षारलवणम् (हा. रा.)
जलरुद्(ह)–न., पद्मम् (हे. च.)
जलरुहा–स्त्री., कुङ्कुमशालिः (रा. व. १६)
जलरूप–पु., मकरः (त्रिका.)
जलवरण्ट–पु., जलवसन्तरोगः (हारा.)
जलवल्कल–पु., कुम्भिका (हारा.)
जलवायस–पु., जलकाकः (हे. च.)
जलविडाल–पु.,जलमार्जारः (हा. रा.)
जलबिन्दुजा–स्त्री., यावनालीशर्करा (रा. व. १४)
जलबिल्व–पु.; कर्कटः । पद्माङ्कम् । जलवल्कलम् (हारा.)
जलवृश्चिक–पु., इञ्चाकमत्स्यः (हारा.)
जलव्यध–पु., कङ्कत्रोटमत्स्यभेदः (हारा.)
जलव्याल–पु., जलसर्पः (अम.)
जलशिरीष–(षिका)–पु., स्त्री., शिरीषभेदः (हिं.—टिंटिनी) गुणाः—त्रिदोषविषकुष्ठार्शोहरी वारिशिरीषिकः (भा.)
जलशुचि–पु., शृङ्गाटकः ।
जलशूकर–पु., शिशुमारः (हारा.) कुम्भीः (हे. च.)
जलशूक–न., शैवालम्
जलश्यामाक–पु., तृणधान्यविशेषः
जलसर्पिणी–स्त्री., जलौका (हे. च.)
जलसूकर–पु., कुम्भीरः । वनशूकरः (वै. नि.)
जलसूचि–पु., क्रौञ्चपक्षी । कङ्कत्रोटमत्स्यः (जटा.) शृङ्गाटकः । शिशुमारः (मे.) काकः । (हे. च.) स्त्री., जलौका

जलहास–पु., समुद्रफेनः (त्रिका.)
जलाका–स्त्री., जलौका (श. र.)
जलाक्षी–स्त्री., जलपिप्पली (श. र.)
जलाखु–पु., जलमूषकः (त्रिका.)
जलाख्या–स्त्री., जलमधूकवृक्षः (वै. नि.)
जलाञ्चल–न., शैवालम् (मे.)
जलाटन–पु., कङ्कपक्षी (जलाटनी स्त्री., जलौका. मे.)
जलाटनी–स्त्री., जलौका (मे)
जलाण्टक–पु., शिशुमारः । नक्रराजः (हारा.)
जलाण्डक–न., रोहितादिशिशुः (हारा.)
जलात्मिका–स्त्री., जलौका
जलाबु (म्बु) का–स्त्री., जलौका (श. र.)
जलार्द्र–(र्द्रा) पु., स्त्री., आर्द्रवस्त्रम् (त्रिका.) (हे. च.) आर्द्रतालवृन्तम् (माघ.)
जलार्बुद–पु., वातकफजौष्ठरोगः । जलबुद्बुदवत् वातकफादोष्ठे जलार्बुदम् ' (वा. उ. २१. अ.)
जलालु (लो) का–स्त्री., जलौका (श. र.)
जलाशय–पु., सरोवरः शृङ्गाटकः । न., उशीरम् (अम.) लाभज्जकः (रा.व. ८)
जलाष्ठीला–स्त्री., पुष्करिणी (हारा.) जलाह्व (य) न., वालकम् । उत्पलम् (रा. व. १०)
जलि–(का)–स्त्री जलौका (अ. टी. भ.)
जलेच्छया–स्त्री., हस्तिशुण्डीवृक्षः (श. र.)
जलेजात (रुह)–न., पद्मम् (श. र.)
जलेवाह–पु., जलकुक्कुटः (वै. नि.)
जलोका–स्त्री., जलायुका (हारा. अम.)
जलोदरारिरस–पु., जलोदराधिकारे रसः ।
जलोरगी–स्त्री., जलौका (अ. टी.)
जलोलुका–स्त्री., पद्मबीजम् (रा. व. १०.)
जलौक–पु., जलवेतसम् (वै. नि.)
जलौकाविधि–पु., तया रक्तमोक्षणकार्यम्
जलौदन–न,. सजलान्नम् (भा. कुष्ठ. चि.)
जवन–पु., अश्वः श्रीकारिहरिणः (रा. व. १९)
जवनाल–पु., न., धान्यविशेषः तद्बीजगुणाः-स्वादु शीतलं वातलं कफपित्तघ्नञ्च (राज)
जवली–स्त्री., कषायफलवृक्षः । तस्याः फलगुणाः-कषायं कफपित्तघ्नं कचित्तिक्तं रुचिप्रदम् । हृद्यं सुगन्धि विशदं जवलीफलमुच्यते (सु.)
जवस–न., तृणम् । घासः (श. र.)
जवसाह्वा–स्त्री., यमानी (मद. व. २)

जवानी–स्त्री., यमानी (मद. व. २)
जवापुष्प–न., ओड्रपुष्पम् (श. र.)
जवाह्वा–स्त्री., यमानी (मद. व. २)
जविन–पु., बिलेशयमृगविशेषः ।
जवी(इन्)–पु., अश्वः । उष्ट्रः (रा. व. १९)
जसद–न., यशदम् (वै. नि.)
जहा–स्त्री., मुण्डितिका (श. च.)
जाघनी–स्त्री., ऊरुः (त्रिका.)
जाङ्गलयकृत्–न., जाङ्गलपशुयकृत् तच्च रक्तपित्तहरम् (वा. चि. २)
जाङ्गला(ली)–स्त्री., शूकशिम्बी (मे.)
जाङ्गुड–न., कुङ्कुमम् (त्रिका.)
जाङ्गुलि–पु., मन्त्रविशेषः (श. र.) **(ली)**–स्त्री., विषविद्या (हे. च.)
जाङ्घिक(काह्वया)–पु., श्रीकारिवृक्षः उष्ट्रः (रा. व. १९) त्रि., जङ्घाजीवी ।
जाजी–स्त्री., जीरकः (भा. म. ४ भ. प्रद. चि.)
जाटलि–पु., पटोललता (अम.)
जाठर–पु., जठरानलः (वै. नि.)
जाठरग्रन्थि–पु., गुल्मरोगः (रा. व. २०)
जातकध्वनि–पु., जलौका (वै. नि.)
जातरूप–न., सुवर्णम् धुस्तूरम् (रा. व १३; पृ. २०६)
जातरूपप्रभ–हरितालम् (वै. नि.)
जातापत्या–स्त्री., प्रसूता स्त्री (अम.)
जातिज–न., जातीफलम् (वै. नि.)
जातिपत्रिका(त्री)(र्णी)–स्त्री., जातिफलत्वक् । गुणाः– कटुतिक्तसुरभिः कफजाड्यहरी मुखवैशद्यजननी च (रा. व. १२) दुर्गन्धहरी (राज.) ‘ जातीफलस्य त्वक् प्रोक्ता जातीपत्री भिषग्वरैः । जातीपत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत् । कफकासवमिश्वासतृष्णाकृमिविषापहा (भा.)
जाति(ती)फलत्वक्–स्त्री., जातीपत्री (वै. नि.)
जाति(ती)सुत–पु., जातीफलम् (वै. नि.)
जातिहिङ्गुलक–न., हिङ्गुलम् (वै. नि.)
जातीकन्द–पु., जातीमूलम् (सु. सू. मिश्र. अ.)
जातीको(श)ष–न., जातीफलम् (वै. नि.)
जातीकोषफल–न., जातीपत्री जातीफलं च (वै. नि. अजीर्णचि. वहिरसे.)
जातीजात–न., जातीकोषफलम् (वै. नि.)
जातीतैल–न., कर्णरोगाधिकारे उपयोज्यम्, जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् (सा. कौ.)
जातीदल–न., जातीकोषः (वै. नि. २भ. रक्तपि. चि. कर्पूरादिचूर्णे जातीपत्रे)
जातीद्वय–न., जातीकोषफलम् । जीवकद्वयमिति तालिशादिचूर्णे (वृद्धोपदेशः ।)
जातीपत्रिकाप(त्री)(र्णी)–स्त्री., जातीकोषः (भा. उ. वाजीकरणे.)
जातीफला–स्त्री., आमलकीवृक्षः (रा. व. ११)
जातीफलादिवटी–स्त्री., अजीर्णे वटी (र. सा. सं.)
जातीफलाद्या(वटिका)–स्त्री., ग्रहण्यधिकारे हितम् (र. सा. सं.)
जात्युत्पल–न., श्वेतरक्तकमलम् (वै. नि.)
जामाता–पु., गजपिप्पली (प. मु.) सूर्यावर्तः (भैष. अम्लपित्त. चि. क्षुधावत्याम्.)
जाम्बवती–स्त्री., नागदमनी (रा. व. ५)
जाम्बौष्ठ–न., जम्बवौष्ठम् (सु. चि. १९ अ.)
जायक–न., कलिया इति ख्यातं पीतसुगन्धिचन्दनम्
जाया–स्त्री., शमीवृक्षः (वै. नि. २ भ. कर्णकज्व. चि.)
जायाघ्न–न., तिलकालकम् (वै. नि. २ भ.)
जायानुजीवी (इन्)–पु., बकपक्षी । (मे.)
जायु–पु., औषधम् (रा. व. २०)
जारगर्भा–स्त्री., क्षुद्ररोगविशेषः (वै. नि.)
जारणवीज–न., रसजारणार्थं बीजद्रव्यभेदः (र. चि.)
जारी–स्त्री., जाडीति ख्याते औषधविशेषम् (मे.)
जालकारक–पु., मर्कटः (हे. च.)
जालकिनी–स्त्री., मेषी (त्रिका.)
जालपात्–पु., हंसः (त्रिका.)
जालमोटा–स्त्री., शुक्रयूथिका (वै. नि.)
जालवर्बूरक–पु., बर्बूरकवृक्षभेदः । (रा. व. ८)
जालबब्बूलिका–स्त्री., बब्बूलवृक्षः (वै. नि.)
जालविन्दुजा–स्त्री., यावनालीशर्करा (रा. व. १४)
जालसंज्ञक–पु., शुक्रगतनेत्ररोगविशेषः। (सु. उ. ४ अ.)
जालि–स्त्री., खाद्यद्रव्यविशेषः (हिं.–जारी) ‘आममाम्रफलं पिष्टं राजिकालवणान्वितम् । भृष्टहिङ्गुयुतं पूतं घोलितं जालिरुच्यते । ’ गुणाः–जिह्वाकण्डूघ्नी कण्ठशोधनी रोचनी दीपनी च (भा.)
जालिका–की–स्त्री., कोषातकी (रा. व. ३.) जलौका, लौहम् वस्त्रभिदि (मे.)
जालिनीफल–न., घोषाफलम् (च. द.) पाण्डुचि, गुणाः– शिरोरोगपाण्डुरोगहरं क्षवकरञ्च (अत्रि.)

जाली–स्त्री., पटोललता (रा. व. ७) घोषा प. म ज्योत्मनी (अम.)

जावक–पु., अलक्तकम् (वै. नि.)

जाषक–न., कालीयचन्दनम् (अ. टी. सा.)

जाहकध्वनी–पु., घोङ्कः । जलौका (हारा.)

जिगतू–पु., उच्छ्वासः । प्राणवायुः (उणा.)

जिघत्सा–स्त्री., क्षुधा (हे. च.)

जिनयोनि–पु., हरिणः (श. र.)

जिम्भमोहन–पु., भेकः (श. र.)

जिम्भशल्य–पु., खदिरः (रा. व. ८; पृ., ११)

जिम्भा–म्भिका–स्त्री., जृम्भिका (रा. व. २०)

जिवाजिव–पु., जीवञ्जीवपक्षी (श. र.)

जिव्रि–पु., पक्षी (उणा.)

जिह्मग–पु., सर्पः । जिह्मकसन्निपातः

जिह्वाप–पु., बिडालः । कुक्कुरः भल्लूकः, (श. र.)

जिह्वमल–न., रसनामलः (त्रिका.)

जिह्वरद–पु., पक्षी (हारा.)

जिह्वालिट्–पु., कुक्कुरः (वै., नि.)

जीन–पु., वृद्धः (रा- व. १८-१२ पृ. ३९५)

जीमूतमूल–न., शठी (प. मु.)

जीमूताह्वा–स्त्री., देवदाली । जलमुस्ता (वै. नि.)

जीरकादिमोदक–पु., ग्रहण्यां हितः

जीरकाद्यघृत–न., व्रणशोथे हितम् (च. द.)

जीर्णफञ्जी–स्त्री., कृष्णवृद्धदारकः (रा. व. ३)

जीर्णवाल–(लुक)–पु., कृष्णवृद्धदारकः (रा. व. ३) स्थूलजीरकः (रा. व. ६)

जीर्वि–पु., शरीरम् । कायः (संक्षिप्त, उणा.)

जीवकद्रुम–पु., जियतषष्ठीति ख्यातः द्रुमः (प. मु.)

जीवकादि–पु., जीवनीयगणः (च. सू. ४ रा. व. २२.१४ पृ. ३०२)

जीवजी (श्री) व–पु., प्लवजातीयचकोरपक्षी (त्रिका.) वृक्षभेदः (मे.)

जीवत्तोका–स्त्री., जीवत्पुत्रिका

जीवथ–पु., मयूरः । कच्छपः । प्राणः (उणा.)

जीवद–पु., वैद्यः । जीवकः (वै. नि.)

जीवद्वन्द्व–न., जीवकः । ऋषभकश्च ।

जीवन–पु., वातः। जीवकक्षुपः (रा. व. ५-१५५ पृ. ३०) वैद्यः ।
न., अन्नम् (रा.व. २०-८५ पृ. ३११) जलम्। प्राणधारणम् (मे.) मज्जा (रा. व. १८.) सद्योघृतम् (श. च.) दुग्धम् शरीरजीवयोः संयोगः (त्रि.,) आयुर्वर्धनम्।

जीवनक–त., अन्नम् (हे. च.)

जीवनदशक–न., जीवनीयगणोक्तदशद्रव्याणि (वा. सू. १५ अ.)

जीवना–स्त्री., सिंहपिप्पली (रा. व. ६) मेदा (मे.) जीवन्तीलता (अम.)

जीवनाघात–न., वत्सनाभविषम् (श. च.)

जीवनार्ह–न., दुग्धं । धान्यम् (वै. नि.)

जीवनीया–स्त्री., स्वर्णजीवन्ती (रा. व. ३) हरीतकी (मद. व. १)

जीवनौषध–न., जीवनीयौषधम् (अम.) अन्नम् (वै. नि.)

जीवन्त्यादिवर्ग–पु.,जीवनीयगणः (वा. सू. १५)

जीवपुत्रक–पु., इङ्गुतीवृक्षः (श. र.) हिङ्गुवृक्षः (वै. नि.)

जीवपुष्पा–स्त्री., बृहत्जीवन्ती (रा. व. ७)

जीवमन्दीर–न., शरीरम् (श. र.)

जीवरत्न–न., पुष्परागमणिः (पमु.)

जीववती–स्त्री., क्षीरकाकोली (वै. नि.)

जीववत्सा–स्त्री., जीवत्पुत्री (च. शा. ८) (अ.)

जीववृक्ष–पु., जीवकवृक्षः । जीयापुता इति लोके। द्रव्याभिधानम् ।

जीवसंज्ञ–पु., कामवृद्धिक्षुपः (रा. व. ४. ५१; पृ. ३३९.)

जीवसाधन–न., धान्यम् (रा. व. ६)

जीवस्थान–न.,मर्म (रा. व. १८. ५३; पृ. ४००) हृदयम् (वै. नि.)

जीवागार–न. मर्मस्थानम् (रा. व. १८. ५३. ५४)

जीवातु–पु., जी॰नीयौषधम् । अन्नम् (मे.)

जीवात्मा–देहः (हे. च.)

जीवाधार–पु., क्षेत्रम् (हे. च.)

जीवापगम–पु., षड्धातुवियोगः । (चशा. ४ अ.)

जीवाला–स्त्री., सैंहलीपिप्पली (रा. व. ५)

जीवितकाल–पु., आयुः (अम.)

जीवितज्ञा–स्त्री., शरीरान्तःस्थनाडी शिरा (रा. व. १८)

जीविता–स्त्री., जलपिप्पली (वै. नि.)

जुगुप्सित–न., श्वेतलशुनम् (वै. नि.)

जुग्ध–पु., न., यवनालः (वै. नि.)

जुङ्गा–स्त्री., वृद्धदारकलता (प. मु.)

जुष्कक–पु., यूषः (श. च.)

जूटिका-स्त्री., कर्पूरविशेषः (रा. व. १२)
जूनाख्य-पु., उलूकतृणम् (प. मु.)
जूष-पु., न., क्वाथः (भ.)
जूषण-न., धातकीपुष्पम् (श. च.)
जेमन-न., लेपः (वै. नि) आहारः (अम.)
जैत्री-स्त्री., जयन्तीवृक्षः (श. र.)
जैवातृक-पु., कर्पूरः । चन्द्रः (अम.) दर्भम्, औषधम् (हे. च.)
त्रि., कृशः । दीर्घायुः (त्रिका.)
जोङ्गट-पु., गर्भिण्यभिलाषः (हारा.)
जोङ्गल-पु., कृष्णवृद्धदारकः (वै. नि.)
जोन्ताला-स्त्री., (ल)-पु., देवधान्यम् (हे. च.)
जोषिका-स्त्री., नवाङ्कुरः (वै. नि.) जालिका (श. र.)
ज्ञानेन्द्रिय-न., नेत्रादिषड्बुद्धीन्द्रियाणि ।
ज्येष्ठतोयाम्ल-न., काञ्जिकम् ।
ज्येष्ठामूलीय-पु., जेष्ठमासः (वै. नि.)
ज्येष्ठाम्बु(म्भ)-न., तण्डुलोदकः (च. द. उन्माद. चि.) " श्वेताजेष्ठाम्बुनिर्मितम् । " मण्डः (त्रिका. वा. उ. ३६ अ.)
ज्येष्ठी-स्त्री., गृहगोधा (त्रिका.)
ज्येष्ठीमधु-न., यष्टिमधु (वै. नि.)
ज्योतिःस्तोम-न., रक्तचन्दनम् (मद.)
ज्योतिरिङ्ग(ण)-पु., खद्योतः (श. र.) धूम्याटपक्षी (वै. नि.)
ज्योतिर्बीज-न., खद्योतः (त्रिका.)
ज्योतिष्मतीतैल-न., तत्फलोत्थतैलम्, गुणाः— तिक्तोष्णं वातघ्नं पित्तघ्नं मेधाप्रज्ञाबुद्धिवर्धनञ्च (रा. व. १५)
ज्योत्स्नाप्रिय-पु., चकोरः (हे. च.)
ज्वरकुञ्जरपारीन्द्ररस-पु., विषमज्वरे रसः (र. सा. सं.)
ज्वरघ्न-पु., वास्तूकभेदः (स्त्री.,) गुडूची (रा. व. ७-२३) मञ्जिष्ठा वास्तूकः (वै. नि.)
ज्वरघ्नी (वटिका)-स्त्री., ज्वरे रसः (रस. र.,)
ज्वरपत्रिशती-स्त्री., ज्वरनिदानचिकित्सासङ्ग्रहः शार्ङ्गधरकृतः ।
ज्वरनाशन-पु., पर्पटकः (स्त्री.,) (शिनी) मञ्जिष्ठा । गुडूची
ज्वराङ्गी-स्त्री., भद्रदन्ती (रा. व. ६)
ज्वरातङ्क-पु., ज्वररोगः (रा. व. २०)
ज्वराधिष्ठान-न., शरीरं मनश्च : केवलं समनस्कश्च ज्वराधिष्ठानमुच्यते (च. चि. ३ अ.)
ज्वरान्तकरस-पु., ज्वरे रसः (रस. कौ.)
ज्वरारि-पु., गुडूची (रा. व. २३) ज्वरे रसविशेषः (भैष. । रस. कौ.)
ज्वरारि (अभ्र)-न., जीर्णज्वरे रसः (र. सा. सं.)
ज्वराशनि-पु., विषमज्वरे रसः (र. सा. सं.)
ज्वरी (इन्)-त्रि., ज्वरयुक्तः
ज्वलत्प्रभा(न्ति)-स्त्री., कृष्णसर्षपः (वै. नि.)
ज्वलनात्मा (श्मा)-पु., सूर्यकान्तमणिः (प. मु. । रा. व. १२)
ज्वाला-स्त्री., धातकीवृक्षः । चित्रकवृक्षः (वै. नि.) दग्धान्नम् (श. च.)
ज्वालाखरगद-पु., जालगर्दभकरोगः (रा. व. २०)
ज्वालगर्दभक-पु., जालगर्दभकरोगः ।
ज्वालानलरस-पु., जीर्णाधिकारे रसः (र. सा. सं. भा.)
ज्वालामरिचक-पु., कटुवीरा
ज्वालानलरस-पु., जीर्णाधिकारे रसः (र. सा. सं. भा.)
ज्वालामरिचक-पु., कटुवीरा
ज्वालामुखरस-पु., ग्रहण्यधिकारे हितः (रस. कौ.)
ज्वालारासभक-पु., जालगर्दभकरोगः (रा. व. २०)

झ

झटा (आमला)-स्त्री., भूम्यामलकी (वै. नि. मा. नि.)
झम्पाक (रु) पु., वानरः । मर्कटः (वै. नि.; श. र.)
झम्पाशी (इन्) पु., जलकाकः (श. र.) जलरङ्कः (जटा.)
झम्पी (इन्)-पु., वानरः (श. र.)
झर्झरीक-पु., शरीरम् (उणा.)
झला-स्त्री., झिल्लिका (वै. नि.)
झलि-स्त्री., क्रमुकः (वै. नि.)
झल्लकण्ठ-पु.. पारावतः (हारा.)
झल्लिका-स्त्री., उद्वर्तनपटः मलश्च (मे.)
झष-पु., मत्स्य (अम.) जलचरभेदः (वा. उ. ५. अ.)
झषलोचना-स्त्री., मत्स्याक्षी (वै. नि.)
झषाशन-पु., शिशुमारः (त्रिका.)
झाट-पु., व्रणमार्जनम् (मे.)
झाटल-पु., घण्टापाटला (अम.)
झाटा (आमला)-स्त्री., भूम्यामलकी (श. च.) जातीपुष्पवृक्षः (वै. नि.)

झामक–न., दग्धेष्टका (हारा.)
झालि–स्त्री., व्यञ्जनभेदः (भा.)
झावु–(क)–(का)–पु., स्त्री., वृक्षविशेषः । (श. र.)
झिङ्गाक–न., कर्कटीभेदः । फलशाकविशेषः (राज. ३ प.)
झिङ्गिनी (ङ्गी)(ल्ली)–स्त्री., जिङ्गिनी (वै. नि.)
झिल्लिकण्ठ–पु., पारावतः (त्रिका.)
झूनि–पु., क्रमुकः (मे.)
झेण्डू–स्त्री., तन्नामकक्षुपः (रा. व. ५)
झोड–पु., क्रमुकवृक्षः (भूरिप्र.)

ट

टगर–पु., टङ्कणक्षारः (त्रि.) केकराक्षः । (मे.)
टङ्क (क)–पु., मान० डरणम्, शाणमानम् ।
टङ्कदेशज–(शीय)–पु., न., वास्तूकशाकविशेषः(प मु)
टङ्कनल–पु., आम्रम् (वै. नि.)
टङ्का–स्त्री., जङ्घा (मे.)
टङ्कानक–पु., वृक्षविशेषः । ब्रह्मदारुवृक्षः (श. च.)
टङ्कारी–स्त्री., स्वनाम्नैव प्रसिद्धः क्षुपविशेषः । टेकारीति भाषा गुणाः—टङ्कारी वातजित्तिक्ता श्लेष्मघ्नी दीपनी लघुः । शोथोदरव्यथाहन्त्री हिता पीठविसर्पिणाम् (भा.)
टङ्कण–(न)–पु., न., खनिजोपरसविशेषः (हिं.—म—टङ्कणक्षार) (र. स. र. ग्रहणीकवाटरसे)
टङ्काण–(क)–पु., वृक्षविशेषः (श. र.)
टङ्किणी–स्त्री., पाठा (श. च.)
टट्टनी–स्त्री., गृहगोधिका (त्रिका.)
टण्टुक–पु., पीतलोध्रः (वै. नि.)
टलन–न., हृद्रोगः (वै. नि.)
टार–पु., अश्वः (हे. च.)
टिटि (ट्टि) भ–(क)–पु., पक्षिविशेषः ।
टिण्टिनिका (नी)–स्त्री., जलशिरीषः (भा.)
टिण्डिश–पु., डिण्डिशः (हिं—ढेंडशी (भा.)
टीटिभक–पु., टिट्टिभपक्षी (श. र.)
टुण्टुका–स्त्री., पाठा । टङ्किणीवृक्षः (श. च.)
टुनाका–स्त्री., तालमूली (श. च.)
टेन्दुक–पु., श्योनाकवृक्षः (वैद्यकम्)
टेर–(क)–त्रि., काणः । वक्रनेत्रः (श. र.)
टोलाफल–पु., मधूकवृक्षः (वै. नि.)

ठ

ठ–पु., शिवः ।
ठक्कदेशीय–पु., वास्तूकः (त्रिका.)

ड

डण्डमत्स्य–मत्स्यविशेषः (वै. नि.)
डमरुयन्त्र–न., औषधपाकार्थं डमरुकारयन्त्रविशेषः
डलक–न., वंशनिर्मितपात्रम्
डल्वण–पु., निबन्धसंग्रहकारः ।
डहु–(हू)–पु., लकुचवृक्षः (श. र.) फलगुणाः गुरु विष्टम्भि त्रिदोषशुक्रदोषकरञ्च ।
डालिम–पु. दालिम्बवृक्षः (अ. टी. भ.)
डाहुक–पु., हरिणविशेषः (वै. नि.) दात्यूहपक्षी (जटा.)
डिण्ड–(ण्डिक)–पु., रक्तैरण्डः (वै. नि.)
डिण्डिम–पु., करञ्जवृक्षः (वै. नि.)
डिण्डि (ण्डी) र–पु., समुद्रफेनः (हे. च. नकुल १३अ)
डिण्डिश–पु., फलशाकविशेषः । (म—ढेंडशेफल) (वै. नि. २ भ. अतिसा. पथ्य । भा. पू. १ अ.) (शाकवर्गे.)
डितिका–स्त्री., बालरोगः (वै. नि.)
डिम्ब–(म्भ)–पु., शिशुः (रा. व. १८) उदररोगः । मूत्राशयः (वै. नि.) फुफ्फुसः । (हारा.) अण्डम् (मे.)
डिम्बिका–स्त्री., जलमक्षिका (वै. नि.) शोणाकवृक्षः । कामुकी । (श. र.)
डिम्भा–स्त्री., अतिबाला (रा. व. १८)
डुङ्गरी–स्त्री., अलाबूभेदः (वै. नि.)
डुण्डु–पु., द्विमुखसर्पः (त्रिका.)
डुण्डुभ–जलसर्पः (अम.)
डुण्डुल–पु., क्षुद्रपेचकः (रा. व. १९)
डुन्दुक–पु., हरिणभेदः । पक्षिभेदः (वै. नि)
डुलि–स्त्री., कच्छपी (अम.)
डुलिका–स्त्री., खञ्जरीटाकारपक्षिविशेषः ।
डुली–स्त्री., चिल्लीशाकः (रा. व. ७)
डोडी–स्त्री., जीवन्तीक्षुपम् । गुणाः–मलबद्धकारी वातला रुच्या दुर्बला च (राज.)
डोडि(ण्डि)का–स्त्री., फलशाकविशेषः गुणाः– पुष्टिलरी रुच्या दीपनी लघुः पित्तकफशोकघ्नी कृमिगुल्मघ्नी च (भा. पू. १ भ. शाकव.)
हिं.—करेरुका,
म.—हरणदोडी.
डोरडी–स्त्री., बृहती (रा. व. ४)
डोडाफल–न., फलविशेषः (वै. नि. २भ. वा. व्या.)

ढ

ढक्क–पु., अभिलाषः ।

ढङ्कण–न., शैवालम् (वै. नि)

ढ(ढा)मरा–स्त्री., हंसः ।

ढिण्ढिणिका(णी)–स्त्री.,जलशिरीषः (वै. नि.)

ढोलसमुद्रिका–स्त्री., ढोलसमुद्र इति ख्यात वृक्षविशेषः । सा कीटादिविषहरी (अत्रि.)

त

तकिल(ला)-न., स्त्री., औषधम् (वै. नि. उणा.)

तक्कोल–न., कक्कोलम् (वै. नि.)

तक्रपर्याया–स्त्री., तक्राक्षुपः (रा. व. ४)

तक्रभित्–पु., कपित्थवृक्षः (वै. नि.)

तक्रमास–न., यवनदेशप्रसिद्धव्यञ्जनविशेषः । 'एसनी' इति पारस्यभाषा । तत्साधनावधिः पाकपात्रे घृतं दत्वा हरिद्राहिङ्गु भर्जयेत् । छागादेः सकलस्यापि खण्डान्यष्टौ च भर्जयेत् । सिद्धयोग्यं जलं दत्वा पचेन्मृदुतरं यथा । जीरकादियुते तक्रे मांसखण्डानि धारयेत् । गुणाः– तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदं कफघ्नं पित्तलङ्किंचित्सर्वाहरास्य पाचनम् (भा.)

तक्रा–स्त्री., स्वनामख्यातक्षुपा । गुणाः– कटुः कृमिघ्नी व्रणघ्नी च (रा. व. ४)

तज्वी–स्त्री., हिङ्गुपत्री (रा. व. ६.)

तडागज–पु., कालकोष्ठः (प. मु.)

तडित्वान्–पु., मुस्तकः (अम.)

तण्डक–पु., फेनः । खञ्जनपक्षी (मे.) रोगः (वै. नि.)

तण्डुरीण–पु., कीटसामान्यः (वै नि.) तण्डुलजलम्

तण्डु (न्दु) लधावन–न., तण्डुलोदकम् (रा. व. १५; वै. नि.)

तण्डु (न्दु) ला–स्त्री., विडङ्गा (रा. व. ६) महासमङ्गा

तण्डुलु–स्त्री., विडङ्गा (श. र.)

तण्डु (न्दु) लेर (क) –पु., तण्डुलीयशाकः (भा. पू १ भ. शाकव.)

तण्डुलौघ–पु., वेष्टकवंशः (श. च.)

तत–पु., वायुः (वै. नि.)

ततपत्री–स्त्री., कदलीवृक्षः (श. च.)

तत्काललवण–न., सौवर्चललवणम् (वै. नि.)

तत्पद -पु., अश्वत्थवृक्षः (वै. नि.)

तत्फल–पु., श्वेतपद्मम् । चौरानामगन्धद्रव्यम् (धरणि) रोहिषतृणम् (वै. नि.)

तद्भुव्य–न., दधिद्रवः (रा. व. १५. २४५;)

तनय–पु., पुत्रः । (स्त्री) कन्या कृष्णतुलसी (श. च.) पृश्निपर्णी (वै. नि. तनुक–न., धातकीपुष्पम् । विभीतकः । त्वक् (वै. नि.)

तनुकूप–पु., रोमकूपः (वै. नि.)

तनुच्छाय–पु., ज्वालावर्बूरकवृक्षः

तनुपत्र–पु., इङ्गुदीवृक्षः ।

तनुभस्त्रा–स्त्री., नासिका (श. र)

तनुरस–पु., स्वेदः (हारा.)

तनुवीज–पु., राजबदरम् (रा. व. ११.)

तनुव्रण–पु.,वल्मीकनामरोगः (श. र.)

तनु (नू) ह्रद्–पु., पायुः । गुदम् (त्रिका.)

तनून–पु., वायुः (वै. नि.)

तनूनप–न., घृतम् (श. च.)

तनूनपात्–पु., चित्रकवृक्षः । अग्निः (अम.)

तनोनु–पु., षष्टिकशालिः (वै. नि.)

तन्तुकी–स्त्री., शिरा । शरीरान्तर्नाडी (रा. व. १८, १९) नाडीशाकभेदः । राजिका । (वै. नि.)

तन्तुकीट–पु., कीटविशेषः (जटा.)

तन्तुण–(नाग)–पु., ग्राहः (हे. च.)

तन्तुनाभ–पु., ऊर्णनाभिः

तन्तुनिर्यास–पु., तालवृक्षः (श. र.)

तन्तुभ–पु., श्वेतसर्षपक्षुपः (प. मु.)

तन्तुर (ल)–न., मृणालम् (श. र.) (हे. च.)

तन्तुवाप (य)–पु., लूता (अम.)

तन्तुविग्रह–स्त्री., कदलीवृक्षः (त्रिका.)

तन्तुसार–पु., गुवाकवृक्षः (त्रिका.)

तन्त्रवाय–पु., लूता (अ. टी.)

तन्द्राकफ–पु., तज्जनक श्लैष्मिक रोगभेदः (मा.)

तन्नि (न्वि)–स्त्री., चक्रकुल्यावनस्पतिः (र. मा.)

तपःकर–पु., तपस्विमत्स्यः ।

तपनकर–पु., शालिधान्यभेदः (वा. सु. ६.)

तपनच्छद–पु., आदित्यपत्रक्षुपः (रा. व. ४.)

तपनतनया (येष्टा)–स्त्री., महाशमीवृक्षः (रा. व. ८ । वै. नि.)

तपनमणि–पु., सूर्यकान्तमणिः (रा. व. १३)

तपनी–स्त्री., पाठा

तपस्विपत्र–पु., मदनकवृक्षः (रा. व. १०)

तपा-पु., ग्रीष्मर्तुः (अ. टी.) माघमासः (मे.) शरद् (च. सू. १ । च. द.)

तपात्यय-पु., वर्षाकालः (हे. च.)

तप्तखल-पु., छागशकृन्मिश्रतुषाग्नौ उष्णीकृतखलः । तद्यथा-' अजाशकृत्तुषाग्निञ्च चालयित्वा भुवि क्षिपेत् । तस्योपरि स्थितः खल्वः तप्तखल्व इति स्मृतः (अत्रि.)

तप्तराजतैल-न., शिरोरोगे तैलम् (भैष.)

तप्ताम्भ-न., उष्णसलिलम्

तभ-पु., छागः (अ. टी.)

तमका-स्त्री., भूम्यामलकी (वै. नि.)

तमर-न., शीषधातुः । वङ्गम् (हे. च.)

तमराज-पु., शर्कराविकारः । ' नवात् गुड ' इति भाषा गुणाः-तृष्णाज्वरदाहरक्तपित्तघ्नः (राज.)

तमस्विनी-स्त्री., निशा । हरिद्रा (अम.)

तमा-स्त्री., भूधात्री । काकोली (हे च.)

रात्रि- तमालवृक्षः (श. च.)

तमालका (की)-स्त्री., भूधात्री (वै. नि.)

तमालच्छद्- न., तेजपत्रम् (वै. नि.)

तमाह्वय- न., तालीशपत्रम् (वै. नि.)

तमिस्रा-स्त्री., हरिद्रा

तमोज्योति (भित्)-पु., खद्योतः (वै. नि.) (श र.)

तमोमणि-पु., गोमेदरत्नम् (वै. नि.) खद्योतः (वै. नि.)

तमोविकार-पु., रोगः (रा. व. २०)

तमोव्रण -पुं., वल्मीकम् (त्रि. का.)

तम्पा-स्त्री., गौः (हे. च.)

तम्बुरु-पु., तुम्बुरुः (रा. व. ११)

तर-पु., वृक्षः (भूरिप्र.)

तरणि-पु., अर्कपत्रवृक्षः (अ. म.) ताम्रम् स्त्री., कण्टकसेवती (रा. व. १०) घृतकुमारिः (अ. म.)

तरणिरत्न-न., माणिक्यम् (रा. व. १३)

तरणी-स्त्री., घृतकुमारी (प. मु) ह्रस्वदन्तीक्षुपः (रा. व. ६) पद्मचारिणी (श. च.) स्वनामख्यातपुष्पवृक्षः (म—तरणी) (क-चेंवडे) गुणाः— शीतला स्निग्धा पित्तदाहज्वरघ्नी मधुरा मुखपाकहरी तृष्णाच्छर्दिघ्नी च। राजातरणी कषाया कफकरी चक्षुष्या हृद्या सुगन्धिश्च (रा. व. १०)

तरणीवल्ली-स्त्री., कण्टकशतपुत्रीपुष्पवृक्षः (वै. नि.)

तरन्-पु., कारण्डवपक्षी

तरत्सल-पु., तृणाग्निः

तरदी-स्त्री., तरटी (रा. वै. ८)

तरन्त-पु., पक्षिविशेषः । भेकः ।

तरम्बुज-न., पु., तरभुज इतिख्यातफलम् (हिं.—तरमूजा) (प. मु.) तद्वृक्षः (वै. नि.) बीजं शैत्यकरम् ।

तरल-पु., माणिक्यम् (रा. वै. १३) श्वेतधुस्तूरकः । हारमध्यमणिः (वै. नि.) (ला) स्त्री., यवागुः (त्रिका.) काञ्जिकम् । मद्यविशेषः (मे) मधुमक्षिका (हे. च.)

तरस-(तर) (स्)-न., मांसम् । बलम् । वेगः (त्रिका.)

तरिता-स्त्री., रसोनः । तर्जनी (श. च.) गृञ्जनः । ' तारिका तरिता तथा ' (कुलार्णवतन्त्रे)

तरी-स्त्री., धूमः (त्रिका)

तरुकूणि-पु., वाग्गुदपक्षी (त्रि. का.)

तरुज-पु., श्वेतखदिरः (प. मु.)

तरुजीवन-न., तरुमूलम् (श. च.)

तरुट-पु., नीलोत्पलमूलम् । (राज. ३ प.)(च.सू. २७अ.)

तरुणज्वराररिस-पु., ज्वरे मलशुद्धिकरज्वरलाघवकररसविशेषः पारदगन्धकविषजैपालबीजानि समभागानि कुमारीरसेन एकत्र मर्द्यानि (सा. कौ.)

तरुणदारु-पु., घृद्धदारुः (वै. नि. सन्धिक.) (ज्वरचि.)

तरुणपीतिका-स्त्री., मनःशिला (वै. नि.)

तरुणाभास-पु., कर्कटी (वै. नि.)

तरुणीकटाक्षमाल-पु., तिलकक्षुपः (रा. वै. १०)

तरुतू (दू) लिका-स्त्री., वादुली (हारा.)

तरुनख-पु., कण्टकः (हारा.)

तरुभुक्-पु., वन्दाकः (वै. नि.)

तरुमालिनी-स्त्री., भूम्यामलकी (वै. नि.)

तरुमृग-पु., वानरः (वै. नि.)

तरुराग-न., कोमलपत्रम् (हारा.)

तरुशायी (इन्)-पु., पक्षी (हारा.)

तरुसार-पु., कर्पूरः (हारा.)

तरूट-पु., कमलमूलम् । उत्पलकन्दः : गुणाः—गुरुः विष्टम्भिः शीतलश्च (राज.)

तर्किण-(ला)-पु., चक्रमर्दक्षुपः (प. मु.) (वै. नि.)

तर्कुपीठी-स्त्री., वर्तनी (त्रिका.)

तर्कुशाण-पु., शाणकः (त्रिका.)

तर्जनी-स्त्री., प्रदेशिन्यामङ्गुलिः (रा. वै. १८) सा तु गर्भस्य चतुर्थमासि भवति ।

तर्ण-(क)-पु., शालिधान्यविशेषः। काश्मिरे आजव इति प्रसिद्धः। तूर्णकः इति अरुणदत्तः, गोवत्सः (अम.)

तर्दक-पु., काष्ठदर्वी (ज. द. १३अ.)

तर्दू-स्त्री., काष्ठदर्वी (अम.)

तर्पणकषाय-पु., पञ्चमांशावशिष्ठकषायः। तर्पणपञ्चमांशके' (रा. वै. २०) यत्र यत्र तर्पणकषायविधिस्तत्र तत्रैव कल्पनीयम्।

तर्पिणी-स्त्री., पद्मचारिणी (श. च.)

तर्वट-पु., चक्रमर्दः (रा. वै. २३)

तर्क्षु-पु., तरक्षुमृगः (श. र.)

तर्क्ष्य-पु., यवक्षारः (र. मा.)

तलक-न., पुष्करिणी (हिं-ताहाव) (वै. नि.)

तलसारक-न., अश्वस्य वक्षःस्थलरज्जुः। तङ्ग इति भाषा (हे. च.)

तला-स्त्री., गोधा (अम.)

तलामणि-पु., प्रवालः (त्रिका.)

तलिका-स्त्री., तलसारकः (हे. च.)

तलित (मांस.)-संतलितमांसम्। यथा 'शुद्धमांसविधानेन मांसं सम्यक् प्रसाधनम्। पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः। गुणाः-तलितं बलमेधाग्निमांसौजःशुक्रवृद्धिकृत्। तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम् (भा.)

तलिन (म)-न.,-शय्या (त्रि.,) तुच्छः (हारा.) दुर्बलम् (हे. च, म.)

तलेक्षण-पु., शूकरः (वै. नि.)

तल्पकीट-पु., कीटभेदः।

तल्पन-न., पृष्ठवंशमांसम् (हारा.) हस्तिपृष्ठम् (वै. नि.)

तल्ल-पु., तडागः (वै. नि.)

तवराज-पु., यवासशर्करा 'मेना' इति भाषा (रा. व. १४. वै. नि. क्षय. चि. तवराजचूर्णं)

तवराजखण्ड-पु., यवासशर्कराजातखण्डः (म. खण्डतवराज मैनारखाण्ड) गुणाः-दाहहरः तापशान्तिकरः तृप्तिजनकः मूर्च्छामोहहरः श्वासघ्नः इन्द्रियतर्पणः शीतलः सुमधुरश्च (रा. व. १४.)

तवराजोद्भव-पु., तवराजखण्डः, नवात् इति ख्याते मिष्टान्ने (वै. नि.)

तवराजोद्भवखण्ड-पु., तवराजखण्डः। (रा. व. १४.)

तवर्णकृत्-पु., शरटः (वै. नि.)

तवक्षीर्यैकपत्रिका-स्त्री., आमहरिद्रा

तवीष-पु., सुवर्णम् (मे.)

तसर-पु., सूत्रवेष्टनम् (उणा.)

तस्करस्नायु-पु., काकनासा (रा. ब. ३)

तस्करी-स्त्री., काकनासिलता

तक्षण-न., कृशीकरणम्।

तक्षणी-स्त्री., अस्त्रविशेषम् (त्रिका.)

ताड-पु., कृष्णतालः। हिन्तालः। श्रीतालः। कण्टकतालः (वै. नि.)

ताडाकाफल-न., स्थूलैला (प. मु.)

ताडि-(डी)-स्त्री., तालरसः। गुणाः-तालजं तरुणं तोयमतीव मदकृन्मतम्। अम्लीभूतं तदा तु स्यात्पित्तकृद्वातदोषहृत् (भा.) (आसव.) वृक्षविशेषः (अ. टी. भ.)

ताण्डव-न., तृणविशेषः (मे.)

तातन-पु., खञ्जरीटपक्षी (त्रिका.)

तातल-पु., रोगः। पाकः (मे.)

तानीयक-पु., यावतालवृक्षः (वै. नि.)

तानूर-पु., बहुवारवृक्षः (वै. नि.)

तापक-पु., ज्वरः (श. र.)

तापसतरु-पु., इङ्गुदीवृक्षः (अम.) पुत्रजीववृक्षः (सु. सू. ३८)

तापसद्रुमसन्निभा-स्त्री., पुत्रदात्रीक्षुपः (रा. व. ४)

तापसा-स्त्री., द्राक्षा (वै. नि.)

तापसेष्ट-पु., प्रियालवृक्षः (रा. व. ११)

तापसेक्षु-पु., इक्षुविशेषः (सु. सू. ४५ अ.)

तापहरी-स्त्री., व्यञ्जनविशेषः। तत्साधनविधिः- घृते हरिद्रासंयुक्ते माषजा मज्जयेद्वटीः। तण्डुलांश्चापि निर्धौतान् सहैव परिभर्जयेत्। सिद्धयोग्यं जलं प्रक्षिप्य कुशलैः पचेत्। लवणार्द्रकहिङ्गूनि मात्रया तत्र निक्षिपेत्। एषां सिद्धिसमायाता प्रोक्ता तापहरी बुधैः। भवेत्तापहरी बल्या वृष्या श्लेष्माणमाचरेत्। बृंहणी तर्पणी रुच्या गुर्वी पित्तहरी स्मृता (भा.)

तापिनी-स्त्री., भारतवर्षीयनदीविशेषः, साच पश्चिमदेशे प्रसिद्धा। तज्जलं वेत्रवतीजलतुल्यगुणम् (रा. व. १४; पृ. ३८३)

ताप्युत्थसंज्ञक-न., माक्षिकधातुः (रमा.)

तामर-न., घृतम्। जलम् (भ. रुद्र)

ताम्बूलकरङ्क-पु., ताम्बूलपात्रम् (हे. च.)

ताम्बूलपत्र (र्ण) कन्द्-पु., कन्दशाकः । पिण्डालुः (रा. व. ७) गुणाः- शुक्लो विशदः लघुश्च (अत्रि.)

ताम्बूलपर्णिका(र्णी)-स्त्री., नागवल्लीलता (वै. नि.)

ताम्बूलराग-पु., मसूरः (हारा.)

ताम्रकल्प-पु., प्लीहाधिकारे कल्पविशेषः (र. सा. सं)

ताम्रकिलि-(कृमि)-पु., इन्द्रगोपकीटः (हारा.)

ताम्रकुट्टक (कूट)-पु., कलञ्जः । ताम्रकूटः (तन्त्रम्) हिं.—तमाकु.

ताम्रचक्षु-पु., कपोतः (वै. नि.)

ताम्रतुण्ड-पु,, श्वेतमर्कटः (वै. नि.)

ताम्रत्रपुज-न., कांस्यधातुः (भा.)

ताम्रदुग्धा-स्त्री., गोरक्षदुग्धीनामक्षुपः ।

ताम्रद्रु-पु., रक्तचन्दनवृक्षः (वै. नि.)

ताम्रधातु-पु., गिरिमृत्तिका (वै. नि.)

ताम्रपत्रक-पु., आवर्तकीलता (वै. नि.)

ताम्रपत्री-स्त्री., हंसपादीनामक्षुपः (रा. व. ५)

ताम्रपर्णी-स्त्री., गन्धमुण्डः (प. मु.) मञ्जिष्ठा (वै. नि)

ताम्रपल्लव-पु., अशोकवृक्षः (रा. व. १०)

ताम्रपाकी (इन्)-पु., प्लक्षवृक्षः, गर्दभाण्डवृक्षः (र. मा.)

ताम्रपादी-स्त्री.,रक्तलज्जालुका । हंसपादी (रा. व. ३)

ताम्रप्रयोग-पु., उदरे हितः । (रस. र.)

ताम्रमृग-पु., हरिणः (वै. नि.)

ताम्ररसायनी-स्त्री., दुग्धिका (वै. नि.)

ताम्रवर्णा-स्त्री., जपावृक्षः ।

ताम्रवृन्त-पु., स्त्री.,(न्ता) रक्तकुलत्थः ।(त्रिका. । हे. च.)

ताम्रवृक्ष-पु., कुलत्थः । रक्तचन्दनम् (र. मा.)

ताम्रशालि-पु., रक्तशालिः । (प. मु.)

ताम्रशिखी (इन्)-पु., स्त्री., ताम्रचूडः । (जटा.)

ताम्रसार (क)-न., रक्तचन्दनम् (प. मु.) रक्तखदिरः (रा. व. ८)

ताम्रार्ध-न., कांस्यम् (त्रिका.) (वै, नि.)

ताम्राक्ष-पु., कोकिलः । (त्रिका.) (रा. व. १९) चकोरपक्षी, कोकिला । (वै. नि.)

ताम्रोपधातु-पु., तुत्थकम् । (भा)

तारकेश्वररस-पु., प्रमेहाधिकारे रसः । (रस. र.)

तारज-न., रौप्यमाक्षिकम् (वै. नि.)

तारतालकीबीज-न., रसजारणार्थं बीजभेदः। (र. चि. ३ अ.)

तारबीज-न., रौप्यादिकृतरसनिबन्धनबीजम् (र. चि. अ.)

ताराभ-पु., यशदभेदः । (वै. नि.)

तारारि-पु., माक्षिकधातुः । विडमाक्षिकम् (हे. च.)

तारारिष्ट-न., रौप्यारिष्टम् (र. चि. ३ अ.)

तारिका-स्त्री., ताडी (तन्त्रम्)

तारिणी-स्त्री., माता । अक्षिमध्यभागः (त्रिका.)

तारीष-न., पु., स्वर्णम् (वै. नि. । मे.)

तारुण्य-न., यौवनम् (अम.)

तारुण्यपिडका-स्त्री., मुखदूषिका (भैष क्षुद्ररोगचि.)

तारेश्वररस-पु., राजयक्ष्मणि रसः । (रस. कौ.)

तार्क्ष्यनायक-पु., गरुडः (रा. व. १९)

तालकन्द-पु., तालवृक्षस्य कन्दः ।

तालकरीर-पु., तालाङ्कुरम् (च. द. अमृतसारलौहे)

तालकाफल-न., स्थूलैला (ज. द. १२ अ.)

तालकाभ-न., नीलरङ्गम् (वै. नि.)

तालकी-स्त्री., ताडी (त्रिका.)

तालजटा-स्त्री., तालवृक्षस्य जटा (चि. क.क. सोमरोगचि.)

तालती-स्त्री., तालसूरा (त्रिका.)

तालपत्र-न., तालच्छदः: । मेथिका (वै. नि.)

तालपत्रिका-स्त्री., तालमूली (रा. व. ७)

तालपर्ण-न., मुरानाम गन्धद्रव्यम् (श. च.)

तालपुष्प (क)-न., तालजटा प्रपौण्डरीकः (श. र.)

तालमण्डिका-स्त्री., तालरसमद्यम् । गुणाः– 'श्लेष्मदोषकरी वृष्या वातला श्लेष्मवर्धनी । कासहृल्लासविध्वंसकरणी तालमण्डिका । पूर्णे कषायपित्ते च योगयुक्ता सुरा हिता । बहुदोषहरा चैव श्लेष्मरोगे विशेषतः (अत्रि. १९ अ.)

तालर (ल) ण्ड-पु., तालजटा (र. सा. सं.)

तालसत्व-न., हरितालभस्म (रस. चि.)

तालाख्या-स्त्री., मुरामांसी (श. च.)

तालाङ्क-पु., शाकभेदः (हे. च.)

तालि-स्त्री., तालभेदः (वै. नि.) भूम्यामलकी (र. मा.)

तालिशादिमोदक-पु., यक्ष्माधिकारे हितः (सा. कौ.)

तालुजिह्व-पु., कुम्भीरः (हे. च.)

ताल्वर्बुद-न., पु., तालुशोथरोगः । लक्षणम्-पद्माकारं तालुमध्ये तु शोफं विद्याद्रक्तार्बुदं पित्तलिङ्गम् (भा.)

तिक्तकर्कोटकी-स्त्री., तिक्तकर्कटिका (श. चि.)

तिक्तका-स्त्री., तुम्बी । कुटुतुम्बी (प. मु.) काकजङ्घा करञ्जलता चञ्चुशाकः (वै. नि.)

तिक्तगन्धा-स्त्री., राजिका (वै. नि.)

तिक्तगन्धिका-स्त्री., वराहक्रान्ता (श. मा.)

तिक्तगुञ्जा-स्त्री., करञ्जवृक्षः (हारा.)
तिक्ततुम्बी-स्त्री., कटुतुम्बी (प. मु.)
तिक्तधातु-पु., पित्तम् (रा. व. २१)
तिक्तनित्य-त्रि., तिक्तभक्षणशीलः (च. द.)
तिक्तपत्र-(त्री)-पु., स्त्री., कर्कोटकवृक्षः (हे. च.) (भैष. उपदंशचि.)
तिक्तपर्वा-स्त्री., गुडूची । यष्टिमधु । हिलमोचिका (मे) ब्राह्मीभेदः । दूर्वा (जटा.)
तिक्तभद्र-(क)-पु., पटोललता (श. च.)
तिक्तवर्ग-पु., तिक्तरसद्रव्यगणः (सु. सू. ४६ अ)
तिक्तवल्ली-स्त्री., मूर्वा (र. मा.)
तिक्तवार्ताकु-पु., वार्ताकुभेदः (हिं.--तीत् भण्टा) (ज. द. १२ अ)
तिक्तशाकद्रुम-पु., वरुणवृक्षः (वै. नि.)
तिक्ताख्या-स्त्री., कटुतुण्डीलता (रा. व. ३)
तिक्ताङ्गा-स्त्री., पातालगारुडीलता (रा. व. ३)
तिक्तामृता-स्त्री., गुडूची (वै नि.)
तिक्तोत्तमा-स्त्री., पटोलः (वै. नि.)
तिङ्गुद-पु., इङ्गुदीवृक्षः (वै. नि.)
तिण्टी-स्त्री., श्योणाकः । त्रिवृता (श. च.)
तितिभ-पु., इन्द्रगोपकीटः (हे. च.)
तितिल-न., तिलपिच्चटम् (वै. नि.)
तिदिश-पु., डिण्डिशः (वै. नि.)
तिनाशक-पु., तिनिशवृक्षः (श. र.)
तिन्दिश-पु., टिण्डिशवृक्षः (रा. व. ७.)
तिन्दुकाकृतिफल-पु., द्वीपान्तरखर्जूरी । (वै. नि.)
तिन्दुकाभफल- ,, ,, ,,
तिन्दुकास्थि-न., तिन्दुकबीजम् ।
तिन्दुज-(क)-पु., लोध्रवृक्षः । (र. मा. । श. र.)
तिन्दुल-पु., तिन्दुकवृक्षः (श. र.)
तिन्दुवीज-न., केवुकबीजम् (र. चि. कृमि. चि.)
तिमिङ्गिलगिल-पु., राघवमत्स्यः । अयं तिमिङ्गिलभक्षकः
तिमिरा-स्त्री., हरिद्रा (भैष. वातरक्तचि.)(विषतिन्दुकतैल)
तिमिरि-पु., मत्स्यभेदः (वै. नि.)
तिमिरी (इन्)-पु., इन्द्रगोपकीटः (वै. नि.)
तिमिष-पु., कूष्माण्डलता (त्रिका.) ग्राम्यकर्कटिका(त्रिका). तरम्बुजलता । नाटाम्रः (हारा.)
तिमी-स्त्री., तिमिमत्स्यः (द्विरूपकोष.)
तिमीरक-पु., नखरञ्जकवृक्षः (प. मु.)
तिरिजह्निक-पु., पारिजातवृक्षः (प. मु.)

तिरिट-पु., इक्षुदण्डः (वै. नि.)
तिरिटि-पु., इक्षुग्रन्थिः (श. मा.)
तिरिणीकण्ठ-पु., पारिजातवृक्षः (वै. नि.)
तिरिम-(रिय)-पु., शालिधान्यभेदः । गुणाः—मधुरः स्निग्धः शीतलः दाहपित्तघ्नः त्रिदोषघ्नः रुच्यः पथ्यश्च (रा. व. १६)
तिरीट-पु., लोध्रवृक्षः (प. मु. रा. व. ६.)(भैष. नेत्ररोगचि.)
तिरीपशालि-पु., मासत्रयपक्वशालिधान्यम् । (वै. नि.)
तिर्यग्गा-स्त्री., पूतनीशाका (प. मु.)
तिर्यग्गामी (इन्)-पु., कर्कटः (वै. नि.)
तिर्यग्यवोदर-न., यवधान्यम् (वै. नि.)
तिर्यग्यान-पु., कर्कटः (त्रिका.)
तिलकट-पु., तिलपुष्परेणुः । तिलचूर्णम् (वै. नि.)
तिलकत्वक्-स्त्री., तिलवल्कलम् । गुणाः-कषाया उष्णा पुंस्त्वघ्नी दन्तदोषहरी कृमिशोफव्रणघ्नी । (रा. व. १०)
तिलकाश्रय-पु., ललाटम् (शब्दार्थकल्पतरुः)
तिलकिट्ट-न., तिलकल्कः । गुणः- लेखनं रूक्षं विष्टम्भि दृष्टिदोषकरञ्च (भा. पू. १ भ.)
तिलच्छक-पु., ईहामृगः (वै. नि.)
तिलजटा-स्त्री., तिलमञ्जरी । दुग्धेनैतत् क्वाथः आखुविषहरः (वा. उ. ३८ अ.)
तिलजा-स्त्री., तिलवासिनी शालिः (रा. व. १६)
तिलतण्डुलक-न., आलिङ्गनम् (श. मा.)
तिलनामा-स्त्री., तिलवासिनी शालिः (रा. व. १६.)
तिलनालभूति-स्त्री.; तिलनालक्षारः । गुणः-अश्मरीघ्नः (च. द. अश्मरीचि.)
तिलनी-स्त्री., तिलवासिनी शालिः (रा. व. १६.)
तिलपर्ण-पु., न., श्रीवेष्टम् (रा. व. १२.)
तिलपिच्चिट-न., तिलपिष्टकः । (कश्चित्)
तिलपिञ्ज-पु., श्वेततिलकवृक्षः निष्फलतिलवृक्षः (अम.)
तिलपिण्डी-स्त्री., तिलकल्कः (प. मु.)
तिलपुष्पक-पु., बिभीतकवृक्षः (वै. नि.)
तिलपेज-पु., तिलपिच्चम् (वै. नि.)
तिलभाविनी-स्त्री., जातीपुष्पवृक्षः (रा. व. १०)
तिलमयूर-पु., पक्षिभेदः (त्रि.का.)
तिलमोदक-पु., तिललड्डुकम् (वै. नि.)
तिलरस-पु., तिलतैलम् (वै. नि.)

तिलवासिनी(सी)-स्त्री., पु., स्वनामख्यातशालिधान्यविशेषः (रा. व. १६)
तिलशालि-पु., तिलवासीशालिः ।
तिलश्राणा-स्त्री., कृषरा (प मु.)
तिलस्नेह-पु., तिलतैलम् (शब्दकल्पद्रुम.)
तिलाङ्कितदल-पु., तैलकन्दः (रा. व. ७)
तिलापत्या-स्त्री., कृष्णजीरकः (श. च.)
तिलित्स-पु., गोनाससर्पः (अम.)
तिलौदन-न., तिलान्नम् (हारा.)
तिल्य-न., तिलक्षेत्रम् ।
तिल्व(ल्व)(क)-पु., मरुवकवृक्षः (र. मा.) रोध्रवृक्षः (अम.) अधःसंशमनम् । इङ्गुदीवृक्षः (वै. नि.)
तिल्वकतरु-पु., लोध्रवृक्षः (वै. नि.)
तिल्वनी-स्त्री., कर्णस्फोटा (वै. नि.)
तिष्यपुष्पा(फला)-स्त्री., आमलकीवृक्षः (श.च. अम.)
तिष्या-स्त्री., आमलकीवृक्षः (श. र.)
तिस्रा-स्त्री., शङ्खपुष्पीलता (वै. नि.)
तिहा(न्)-पु., तण्डुलः (त्रि., रोगी (उणा.)
तीर-पु., न., वङ्गम् (मे.)
तीरण-पु., करञ्जिका (वै. नि.)
तीर्णपदी-स्त्री., मुशलीकन्दः (श. च.)
तीर्थ-न., स्त्रीरजः (मे.) योनिः (हे. च.) अग्निः । निदानम् (उणा.)
स्त्री., कदलीवृक्षः (रा. व. ११)
तीर्थवाक्-केशः (हे. च.)
तीर्थसेवी(इन्)-पु., वकपक्षी (रा. व. १६)
तीव्रवेदना-स्त्री., अतिवेदना
तीव्रसन्ताप-पु., श्येनपक्षी (वै. नि.)
तीक्ष्णक-पु., सिद्धार्थः (रा. व. १६)
तीक्ष्णकल्क-पु., रेचनाख्यधूमपानकल्कः सच चूषणादिः (भा.) कुस्तुम्बुरुवृक्षः (रा. व.)
तीक्ष्णकील-क-पु., अकर्करः । शुक्रमदनवृक्षः
तीक्ष्णगन्धोग्रा-स्त्री., शुक्लवचा (वै. नि.)
तीक्ष्णगुणकर्म-न., तीक्ष्णद्रव्यगुण क्रिया तत् दाहपाककरं स्रावणं मृदु च (सु.)
तीक्ष्णतरु-पु., पीलुवृक्षः (वै. नि.)
तीक्ष्णतैल-न., मद्यम । सर्जरसः । स्नुहीक्षारम् (श. र.) ज्योतिष्मतीतैलम् (रस. र.)
तीक्ष्णत्वक्-पु., तुम्बुरी (वै. नि.)
तीक्ष्णदंष्ट्र-(क)-पु., व्याघ्रः । चित्रव्याघ्रः (रा. व. १९)
तीक्ष्णदग्धा-स्त्री., कोङ्कणेख्याते यावनालवृक्षः
तीक्ष्णद्रु-पु., पीलुवृक्षः (वै. नि.)
तीक्ष्णप्रिय-पु., यवः (वै. नि.)
तीक्ष्णरस-पु., यवक्षारः (र. मा.)
तुङ्क-पु., पुन्नागवृक्षः (श. र.) वृद्धदारकवृक्षः । पद्मकेसरम् (वै. नि.)
तुङ्गकेशर-पु., पुन्नागवृक्षः (प. मु.)
तुङ्गभद्रा-स्त्री., दक्षिणदेशप्रसिद्धनदी
तुङ्गवृक्ष-पु., नारिकेलवृक्षः (वै. नि.)
तुङ्गस्कन्धफल-पु., नारिकेलवृक्षः (भा. आम्रवर्ग)
तुङ्गाक्षीरी-स्त्री., वंशलोचना (वै. नि.)
तुच्छद्रुं-पु., एरण्डवृक्षः । (श. च.)
तुच्छधान्यक-न., नीवारधान्यम् । पुलाकः । (वै. नि.)
तुच्छा-स्त्री., नीलीवृक्षः । तुत्थकम् । (भा.)
तुडुम-पु., मूषकः । (त्रिका.)
तुडी-स्त्री., आढकी (रमा.)
तुण-(णि)-(क)-पु., नन्दिवृक्षः । (अ. टी. खा.)
तुण्डकी-स्त्री., करञ्जवल्ली । (वै. नि.)
तुण्डाहतदष्टक-न., अदंष्ट्राकृतदंशः । (वा. उ. ३६ अ.)
तुण्डिकेरुफला-स्त्री., तन्नामकगलरोगविशेषः । (वै.नि.)
तुण्डिकेशी-स्त्री., बिम्बिका । (अ. टी.)
तुण्डिभ-(ल)-त्रि., पुष्टः । बृहन्नाभियुक्तः । (अम.)
तुत्थनी-स्त्री., एला । शिवलिङ्गिनी । (वै. नि.)
तुन्तुभ-पु., सर्षपवृक्षः । (भापू१ भ. धान्य व.)
तुन्दकूपिका (पी) स्त्री., नाभिः (हे. च. त्रिका.)
तुन्दपरिमार्ज-(मृज)-स्त्री., अलसः । (अ. टी. र.)
तुन्दि-न., उदरः । स्त्री., नाभिः (त्रिका.)
तुन्दिक-पु., पृथूदरमानुषः । (स्त्री.,) नाभिः । (श. र.)
तुन्दिकर-पु., नाभिः (त्रिका.)
तुन्दिभ-(ल)-स्त्री., हृष्टपुष्टः । (श. र.)
तुन्दी-स्त्री., नाभिः (श. र.)
तुन्न-(क)-पु., वृक्षविशेषः । तूणीवृक्षः । हिं.-महानीम, तुन् उत्महालिम्बु । पं-द्रावी । (अम.) (त्रि.) पीडितः ।
तुन्नकारिका-स्त्री., भूम्यामलकी (वै.. नि.)
तुभ-पु., बर्करः (वै. नि.)
तुमुल-पु., बिभीतकवृक्षः ।
तुम्बक-न., धन्याकम् । कन्दर्पसारतैलम्
तुम्बा-स्त्री., आलाबुः (प. मु.) तिक्ततुम्बी (वै. नि.)
तुम्बीतैल-न., गलगण्डाधिकारे तैलम् । (च. द.)

तुम्बीपुष्प-न., अलाबुपुष्पम् । लताम्बुजः । (हारा.)
तुम्बुक-पु., न., अलाबुः । (हड्डचन्द्रः ।)
तुम्बुर-(री)-पु., स्त्री., तुम्बुरुवृक्षः (र. मा.) आर्द्र-धान्यकम् (त्रिका.) कुकुरस्त्री (मे.)
तुरग(ङ्ग)द्विष(द्वेषि)णी-स्त्री., महिषी (रा. व. १९ वै. नि)
तुरगशिफा-स्त्री., अश्वगन्धामूलम् (च. द. वा. व्या. चि.)
तुरङ्ग(म)-पु., घोटकः (अम.) चित्तम्. (श. र.) न., गन्धकः (र. सा. सं.)
तुरङ्गक-पु., हस्तिघोषा (र. मा.)
तुरङ्गरिपु(ङ्गारि)-स्त्री., अश्वगन्धा (वै. नि. । म.द.व. १ । प. मु.) घोण्टा (रा. व. ८)
तुलसीच्छद(पत्र)-न., बृहत्तालीशपत्रम् (वै. नि.)
तुलसीद्वेषा-स्त्री., बर्बरी (र. मा.)
तुलाकोटि(टी)-स्त्री., परिमाणभेदः । अर्बुदम् । (हे. च.) कोटिसंख्या (वै. नि.)
तुलाबीज-न., गुञ्जा (त्रिका.)
तुलिका-स्त्री., हापुत्रिकापक्षी (त्रिका.)
तुल्यार्थता-स्त्री., एकसामान्यरूपार्थानुयोगिता (च. सू. १ अ.)
तुवरीमृत्-स्त्री., सौराष्ट्र मृत्तिका (रा. व. १३)
तुबरीशिम्ब-पु., चक्रमर्दवृक्षः (श. च.)
तुवि-स्त्री. तुम्बी (श. मा.)
तुषजल-न., तुषोदकम् । अभावे काञ्जिकम् । (सी. यो. बृहच्चुक्रसन्धाने)
तुषधान्य-न., तुषः (र. मा.) रक्तशाल्यादिः (वै. नि कङ्ग्वादिकुधान्यवर्गे) 'कङ्गुश्चीनः कोद्रवश्च श्यामाको वनकोद्रवः । शणबीजं वंशबीजं गवेधुश्च प्रसाधिका तावन्त्येतानि चोक्तानि तुषधान्यानि वै नव ।
तुषसौवीरक-न., सतुषयवकाञ्जिकम् । तुषोदकम् (वै. नि.)
तुषस्वेद-पु., वातव्याधौ अश्वस्य स्वेदविशेषः 'सुतस-काञ्जिकैः स्विन्नं बुसं बध्द्वा पू तं भिषक् । तुपस्वेदं तुरङ्गस्य धान्यैर्वापि प्रदापयेत्' (ज. द १८ अ.)
तुषानल-पु., तुषाग्निः (वै. नि.)
तुषारकाल-पु., शरत्कालः (वै. नि.)
तुषारगौर-पु, कर्पूरः । भीससेनी कर्पूरः । चीनकर्पूरः (वै. नि.)
तुषाराम्बु-न., नीहारजलम्
तुषोली-न., तुषोदकम् । सौवीरकाञ्जिकः (रा. व. १५)
तुषोदक-न., सतुषयवकाञ्जिकम् (हारा.) सौविर-काञ्जिकम् (रा. व. १५).
तुस-पु., तुषः (अ. टी. रा.)
तुहिनांशु-पु., कर्पूरः (रा. व. १२)
तुहिनांशुतैल-न., कर्पूरतैलम् (रा. व. १५)
तूण-पु., तूणीकवृक्षः ।
तूतक-न., तुत्थम् (श. च.)
तूरी-स्त्री., शुक्लधुस्तूरकः (भा.)
तूर्णि-स्त्री., विष्ठा (उणा. । मनसि. । वै. नि.)
तूलक-न., कार्पासः (हे. च.)
तूलग्रन्थिसमा-स्त्री., ऋद्धिनामकौषधिः (वै. नि.)
तूलनालिका (ली)-स्त्री., पिञ्जिका
तूलपिचु-पु., कार्पासः । तूलम् (अ. टी. भ.)
तूल (लि) फला-स्त्री., शाल्मलीवृक्षः (र. मा.)
तूलवती (शय्या)-स्त्री., तूलशय्या (भा.)
तूलशर्करा-स्त्री., कार्पासबीजम् (श. मा.)
तूला (ली)-स्त्री., रक्तकार्पासी (रा. व. ४) नीली-वृक्षः (भा.) वर्तिः (श. र.)
तूलि-(लि (ली) का)-स्त्री., नीली । रक्तकार्पासी (वै. नि.) चित्रलेखनी (अम.) वीरणादिशलाका शय्योपकरणम् (मे.) वर्तिः (श. र.)
तुवर-पु., तुवरकः ।
तूस्त-न., धूलिः (मे.) सूक्ष्मम् (श. र.)
तृस्व-न., जातीफलम् (श. च.)
तृणकतैल-न., कुष्ठाधिकारे तैलम् (रस. र.)
तृणकूर्म-पु., श्वेतालाबुः (वै. नि. श. मा.)
तृणकेतकी-स्त्री., वंशलोचनविशेषः (वै. नि.)
तृणकेसर-न., तृणकुङ्कुमम् (रा. व. १२)
तृणगन्धा-स्त्री., वृद्धदारकलता (वै. नि.)
तृणगोधा-स्त्री., सरटः । कृकलासः (मे.) तृणजलौका (शब्दकल्पः)
तृणगोधूम-पु., स्वनामख्यातगोधूमः (प. मु.)
तृणग्राही (इन्)-पु., नीलहीरकः (प. मु.) नीलमणिः (रा. व.)
तृणचर-पु., गोमेदमणिः (वै. नि.)
तृणद्रुम-पु., तालवृक्षः । केतकीवृक्षः । पूगवृक्षः । खर्जूरीवृक्षः । ताडीद्रुमः । नारिकेलवृक्षः । हिन्ताल-वृक्षः । एषां मज्जानिर्यासाः लघवः शीतला वृष्या मोहना हृद्या तृषातापहराश्च (रा. व. ९)

तृणध्वज-पु., बल्वजा (रा. व. ८) वंशः (अम.)
तृणपञ्चमूलाद्यघृत-न., अश्मर्यधिकारे घृतम् (भा.)
तृणपर्ण-न., पु., चीनाखड इति प्रसिद्धतृणम् (रसा. र. महाभल्लातकगुडे)
तृणमणि-पु., नीलहीरकः (हारा.)
तृणमुद्ग-पु., श्यामाकधान्यम् (प. मु.)
तृणमुस्तिका-स्त्री., मुस्ततृणम् । मुस्ता (रस. र. रसमारणे)
तृणराजाह्व(य)-पु., तालवृक्षः (रा. व. ११)
तृणवल्ल (ल्व) जा-स्त्री., बल्वजा (रा. व. ८)
तृणवृक्ष-पु., नारिकेलवृक्षः । तालवृक्षः । पूगवृक्षः केतकीवृक्षः । खर्जूरीवृक्षः (रा. व. ९ वै. नि.)
तृणशिम्बी-स्त्री., निष्पावः (प., मु.)
तृणशीत-पु., देवताडवृक्षः (वै. नि.) न., कत्तृणम् । गन्धतृणम् (र. मा.)
तृणशोणित-न., तृणकुङ्कुमम् (रा. व. १९)
तृणषट्पद-पु., कीटविशेषः । वरोलः (त्रिका.)
तृणसारा-स्त्री., कदली (हारा.)
तृणाख्य-(ह्व)-न., पर्वततृणम् (रा. व. ८)
तृणाङ्घ्रिप-पु., मन्थानकतृणम् (रा. व. ११)
तृणाञ्जन-पु., कृकलासः (त्रिका.)
तृणाधिप-पु., मन्थानकतृणम् (रा. व. ८)
तृणान्न-न., देवधान्यम् । नीवारधान्यम् (भा. पू. १ भ. धान्यव.)
तृणारि-पु., पर्पटकः (वै. नि.)
तृणावर्त-पु., गुण्डासिनीतृणम् (वै. नि.)
तृणोलुप-न., उपलतृणम् (वा. उ. ३७ अ.)
तृणौक-पु., तृणच्छादितगृहम् (हे. च.)
तृणौषध-न., एलवालुकः (श. च.)
तृण्मान्-त्रि., तृष्णायुक्तः (वा. चि. ६ अ,)
तृतीय(या)प्रकृति-पु., नपुंसकः (अ. टी.)
तृप(फ)ला-स्त्री., लता । त्रिफला (उणा. त्रिका.)
तृप्र-पु., घृतम् (उणा.)
तृफु-पु., सर्पः (उणा.)
तृवृता-स्त्री., त्रिवृत् शुक्लत्रिवृता (वा. चि. २ अ.)
तृषती-स्त्री., शूकशिम्बी (प. मु.)
तृषाभू-स्त्री., मूत्राशयः । क्लोमन् (श. च.)
तृषा(ह)क-न., जलम् (श. च. वै. नि.)
तृषाह्वा-स्त्री., शताह्वा । मधुरिका (श. च.)
तृषितोत्तरा-स्त्री., गोकर्णीनामलता (वै. नि.) अशनपर्णीलता (श. च.)

तृष्णक्-त्रि., तृष्णावान् (वा. ज्व. चि. १ अ.) लुब्धः (अम.)
तेजन (क) शरः (प. मु.) (वंश. भा.) मुञ्जातृणम् उपलतृणम् (ज. द. १२ अ । रा. व. ८) न., भोजनम् (रा. व. २०)
तेजपत्र-न., स्वनामख्यातपत्रम् (प. मु.)
तेजल-पु., कपिञ्जलपक्षी (रा. व. १९)
तेजसाह्वय-न., मुञ्जतृणम् (वै नि.)
तेजस्कर-त्रि., तेजोवर्धकः
तेजोमन्थ-पु., ह्स्वाग्निमन्थक्षुपः (प. मु.)
तेजोमय-न.. पित्तम् (वै. नि.)
तेजोवीज-न., मज्जा (वै. नि.)
तेमन-न., आर्द्रीकरणम् (मे.) व्यञ्जनम् व्यञ्जनं सूपशाकादिमिष्टान्नं तेमनं स्मृतम् (रा. व. २०)
तेमनी-स्त्री., चुल्लीभेदः (हे. च.)
तैजसावर्धिनी-स्त्री., स्वर्णादिपाकमूषा (अम.)
तैतील-पु., खड्गी (मे.)
तैत्तिर-पु., तित्तिरपक्षी (रा. व. १९) गण्डकः (मे.)
तैलक-न., अल्पपरिमाणतैलम्
तैलकल्कज-पु., तैलकिट्टः (रा. व. १६)
तैलकिट्ट-न., पिण्याकः । गुणाः-कटुकं गौल्यं कफवातप्रमेहघ्नञ्च (रा व १९)
तैलचो (चौ) रिका-स्त्री., तैलपायिका (श. र.)
तैलधान्य-न., तिलादिवीजवर्गः । यथा ' तिलातसी च तोरी च त्रिविधश्चापि सर्षपः । द्विधा राजी खाखसश्च बीजं कौसुम्भसंभवम् । एतानि तैलधान्यानि पठितानि च पूर्ववत् (अर्क.)
तैलनी-स्त्री., तिलकिट्टम् (वै. नि.)
तैलपञ्चक-न., द्रव्यपञ्चकसिद्धतैलम् । यथा- 'तैलं प्रसन्नागोमूत्रमारनालं यवाग्रजः । गुल्मजाठरमानाहपीतमेकत्र साधयेत् (च.)
तैलपर्ण-(क)-पु., न., ग्रन्थिपर्णवृक्षः (भा.) चन्दनवृक्षः । (वै. नि.)
तैलपर्णिक-न., तैलचन्दनम् । तत्तु शीतलं धवलं तिलपर्णतरुजातञ्च (भ.) हरिचन्दनम् (अम.)
तैलपर्णी-स्त्री., लवणखोटी । देवदारुनिर्यासः (प. मु.) रक्तचन्दनम् । चन्दनम् । शिलारसः (मे.)
तैलपा-स्त्री., पेचकः । तैलपायी (रा. व. १९)
तैलपातन-न., सर्वबीजात्तैलनिःसारणम् । यथा-'सपक्वतालपत्राणां रसमादाय भावयेत् । समस्तबीजचूर्णं

यदुक्तानुक्तं पृथक् पृथक् । आतपे मुञ्चेत् साध्यासाध्यं न संशयः । (र. चि. ७ अ.)

तैलपायिका–स्त्री., तैलपायी (अम.)

तैलपिञ्ज–पु., अरण्यतिलकवृक्षः । (वै. नि.)

तैलपिपीलिका–स्त्री, तैलपायिपिपीलिकाभेदः (रा.व.११)

तैलपोत–पु., तैलपिचुः । (च. द.)

तैलमाली–स्त्री., वर्तिः (शमा.)

तैलमूर्च्छा–स्त्री., तैलस्य मूर्च्छना । (भैष.)

तैलसाधन–न., कस्तूरिका । (वै. नि.) काकोली (श. च.)

तैलस्फटिक–पु.. तृणमणिः । (हे. च.)

तैलस्यन्दा–स्त्री., भूमिकूष्माण्डः । काकोली । श्वेतापराजिता । (वै. नि.)

तैलाङ्ग–पु., बकुलवृक्षः । (प. मु.)

तैलाटी–स्त्री., तृणषट्पदम् । वरटा । (हे. च.)

तैलाम्बुका–स्त्री., तैलचोरिका (जटा.)

तैलिनी–स्त्री., तैलपायिका (रा. व. १९ दशवर्तिः श. मा.)

तैलिशाला–स्त्री., तैलिकगृहम् (हे. च.)

तैलिन–न., तिलक्षेत्रम् (रा. व. २.)

तैल्वणपूग–न., पूगफलविशेषः (रा. व. ११)

तैष–पु., पौषमासः (अम.)

तोक–पु., बालकः (त्रिका.)

तोकक–पु., चाषपक्षी (वै. नि) चातकपक्षी (अम.)

तोका–(क्य)–पु., अपक्वयवः । हरितनिःशूकक्षुद्रयवः (भा. पू. १ भ. धा. व.) पल्लवाद्यङ्कुरः (भागवतम्)

तोक्ष–न., कर्णमलः । (त्रिका.)

तोडिमत्स्य–पु., मत्स्यविशेषः (वै. नि.)

तोमरधर–पु., अग्निः (वै. नि.)

तोमरिका–स्त्री., सौराष्ट्रमृत्तिका (श. र.)

तोयकुम्भा–पु., नारिकेलवृक्षः (वै. नि.)

तोयगर्भ–स्त्री., शैवालः (वै. नि.)

तोयज–पु., उशीरम् । लामज्जकः (वै. नि.)

तोयडिम्ब–पु., घनोपलम् (हारा.)

तोयधर–पु., मुस्ता । नागरमुस्ता सुनिषण्णशाकः । मेघः (मे.)

तोयधिप्रिय–न., लवङ्गम् (श. च.)

तोयपाषाणजमल–न., खर्परम् (वै. नि.)

तोयपुष्पी–स्त्री., पाटलवृक्षः (श. मा.)

तोयप्रष्ठा–स्त्री., पाटलवृक्षः (वै. नि.)

तोयप्रसादन(फल)–न., कतकफलम् (र. मा.)

तोयमञ्जरी–स्त्री., जलापामार्गः (वै. नि.)

तोयमल–न., समुद्रफेनः (वै. नि.)

तोयवती–स्त्री., अमृतवल्ली (वै. नि.)

तोयवृत्ति–पु., जलापामार्गः (वै. नि.)

तोयवृक्ष–पु., शैवालः (वै. नि.)

तोयशाला–स्त्री., वारिशाला

तोयशुक्तिका–स्त्री., जलशुक्तिः (रा. व. १९)

तोयशूक–पु., शैवालः (वै. नि.)

तोयसर्पिका–स्त्री., भेकी (वै. नि.)

तोयसूचक–पु., मण्डूकः (शब्दार्थकल्प.)

तोयस्राव–पु., अश्वस्य नेत्रतो जलस्रावरोगः । अजस्रं पश्यतां व्यश्रु स्वच्छं स्रवति चक्षुषः । तोयस्रावीति तं विद्यात् विकारं मारुतात्मकम् (ज. द. ३० अ.) जलस्रावः ।

तोयाधिवासिनी–स्त्री., पाटलवृक्षः । (वै. नि.)

तोयापामार्ग–पु., जलापामार्गः । (वै. नि.)

तोयोद्भवा–स्त्री., जलापामार्गः । (वै. नि.)

त्रपुटी–स्त्री., सूक्ष्मैला (र. मा.)

त्रपुल–न.. रङ्गम् । वङ्गम् (भ. द्वि.)

त्रपुसिनी–स्त्री., कर्कटिका (वै. नि.)

त्रयी–स्त्री., सोमराजी (श. च.)

त्रयोदशाङ्गगुग्गुल–पु., वातव्याधौ । (सा. कौ.)

त्रसरेणु–पु., त्रिंशत्परमाण्वात्मकमागधमानम् । स जालान्तरगतरविकिरणेषु दृश्यते । त्रसरेणुस्तु विज्ञेयः त्रिंशता परमाणवः (प. प्र. २ ख.)

त्राण–न., त्रायमाणालता (मे.)

त्रायमाणादि–पु., पित्तज्वरघ्नसिद्धकषायभेदः (च. द. ज्वरचि.) ' त्रायमाणा च मधुकं पिप्पली मूलमेव च । किराततिक्तकं मुस्तं मधुकं सबिभीतकम्

त्रासदुष्ट–कुक्कुरदष्टरोगभेदः (वा. उ. ३८ अ.)

त्रिंशत्पत्र–न., कुमुदपुष्पम् (श. मा.)

त्रिक–न., त्रिफला । त्रिकटुः त्रिमदः (सुखबोधः) । कटिप्रान्तभागः (रा, व. १८.)

त्रिकट–पु., शृङ्गाटकः । गोक्षुरकम् (श. र.)

त्रिकटुगुडिका–स्त्री., प्रमेहपिडका 'त्रिकटु त्रिफला गुग्गुलुः प्रत्येकं समभागः । गोक्षुरक्काथेन मर्द्या ।

त्रिकट्वादिवर्ति–स्त्री., नेत्ररोगाधिकारे वर्तिः (र.स. र.)

त्रिकण्टका–स्त्री., त्रिवृता (ज. द. ११. अ.)

त्रिकण्टकादिघृत–मूत्रकृच्छ्राधिकारे घृतम् (भै. ष.)

त्रिकण्टकाख्य–(क)–पु., शृङ्गाटकः (वै. नि.)

त्रिकत्रय–न., समत्रिकटुत्रिफलात्रिमदाः

त्रिकत्रयादिलौह–न.. पाण्डुरोगे हितम् (सा. कौ.)

त्रिकर्ष (र्षिक)–न., नागरातिविषामुस्ता (रा. व. २२)

त्रिकसन्ध्यस्थि–न.. त्रिकास्थि (च. शा. ७ अ.)
त्रिकूटाह्वय–न., काचलवणम् (वै. नि.)
त्रिकोण–न., योनिः । शृङ्गाटकः ।
पु., त्रिधारतृणम् (वै. नि.)
त्रिकोणफल–न., शृङ्गाटकः (भा.)
पु.,–त्रिधारतृणम् (वै. नि.)
त्रिकोणा–स्त्री., योनिः । शृङ्गाटकः (वै. नि.)
त्रिक्षार–न., क्षारत्रयम् (रा. व. २१.) समयवक्षार-सर्जिकाक्षारटङ्कणक्षाराः । कामाग्निसन्दीपने रसे (च. द.)
त्रिक्षुर–पु.. श्वेतकोकिलाक्षवृक्षः (र. मा.)
त्रिक्षुरी–स्त्री., गोक्षुरः (वै. नि. २ भ. र. पि. चि.) (कूष्माण्डावलेहे)
त्रिख–न., कर्कटिका (वै. नि.) त्रपुषम् (श. च.)
त्रिगर्ता–स्त्री., मुक्ता (वै. नि.) घुर्घुरिका (मे)
त्रिगुणाख्यरस–पु., वातव्याधौ रसः (रस. कौ.) अन्ये शूले हितः (र. सा. सं.)
त्रिजटा–स्त्री., बिल्ववृक्षः । तन्त्रम् ।
त्रिण–न., तृणम् (श. र.)
त्रितय–न., सन्निपातः (भा. म. ४ भ.) (शिरोदो. चि.)
त्रिदला–स्त्री., गोधापदीलता (प. मु.) रक्तलज्जालुका (वै. नि.) यष्टिमधु (ज. द. १२ अ.)
त्रिद (दा) लिका–स्त्री., चर्मकषा (श. च.)
त्रिदशगोप–पु., इन्द्रगोपकीटः (वै. नि.)
त्रिदशदारु–न., देवदारुकाष्ठः (चि. क्र. क.) (स्त्रीरोग. चि.)
त्रिदशवरभोज्य–न., अमृतम् (चि. क्र. क.) (केशररसे)
त्रिदशसर्षप–पु., देवसर्षपवृक्षः (वै. नि.)
त्रिदशाहार–पु., अमृतम् (हारा.)
त्रिदिवा–स्त्री., एला । गङ्गा (वै. नि.)
त्रिदीप्य–न., यमानीत्रयम् । यमानी खोरामानी अजमोदा च (वै. नि. २ भ. अर्शचि.) भस्मकवटी
त्रिदोषज–त्रि., त्रिदोषजनितम् ।
त्रिदोषदावानलकालमेघ–पु , सन्निपातज्वरे रसः ।
त्रिदोषदावानलरस–पु., ज्वराधिकारे रसः (भैष.)
त्रिदोषरोहिणी–स्त्री., त्रैदोषिकगलरोगविशेषः (वै. नि.)
त्रिदोषसम–न., समदोषत्रयम् (रा. व. २२)
त्रिदोषसम्भव–पु., सन्निपातः (वै. नि.)
त्रिदोषहारी(रस)–पु., ज्वराधिकारे रसः (र. चि. ९)

त्रिधातु–पु., गणपती (त्रिका.)
न., धातुत्रयम् ।
त्रिधारकाण्डवल्ली–स्त्री., त्रिधारकारवेल्ली ।
त्रिधारस्नुही–स्त्री., त्रिधारवज्रीवृक्षः (रा. व. ८)
त्रिनेत्ररस–पु., पित्तकासे रसः (रस. र.) अपरः— परिणामशूले (रस. र.) अन्यः शोथे: वृष्याधिकारे अन्यः (र. चि. ९ अ.) अपरः सन्निपातज्वरे (र. चि. ९ अ.) अन्यश्च सन्निपातज्वरे (भा.) अपरः ऊरुस्तम्भे (रस. र.) अपरं मूत्रकृच्छ्रे (र. सा. सं.)
त्रिपत्रक–पु., पलाशवृक्षः हे. च.)
त्रिपदी–स्त्री., हंसपदीलता (प. मु. ; रा. व. ५)
त्रिपर्णा–स्त्री., वनकार्पासी । पृश्निपर्णी (र. मा.) वनगुञ्जा (वै. नि.,) तिलपर्णिकाकन्दः (रा. व. ७) शालपर्णी (भा. म. ख. १ भ.)
त्रिपला–स्त्री., त्रिफला (भ. द्वि.)
त्रिपात्–पु., ज्वरः (वैद्यकम्)
त्रिपाद–पु., ग्रन्थिपर्णमूलम् (वै. नि.)
त्रिपिबा (इन्) पु., लम्बकर्णछागः (वै. नि.)
त्रिपुटकी–स्त्री., श्वेतत्रिवृत् (वै. नि.)
त्रिपुटीफल–पु., एरण्डवृक्षः [हारा]
त्रिपुरभैरवरस–पु., ज्वरे रसः (भा. म. ज्वर. चि.)
त्रिपुरमल्लिका (मालिका)–स्त्री.. मल्लिका (रा. व २०)
त्रिपुषा–स्त्री., त्रपुषा । कृष्णत्रिवृत् (श. च.) (न.,) त्रपुषफलम् त्रपुषीबीजम् । कुशावलेहः
त्रिपुष्पा–स्त्री., अतिबला (वै. नि.)
त्रिफलाद्यघृत–न., नेत्ररोगाधिकारे घृतम् (सा. को.) इदं मध्यमम् । अपरं घृतम् (रस. र.) इदं बृहत् । स्वल्पं सन्ध्यायां तिमिरनाशार्थं पेयम् । अन्यत् योनिरोगे योज्यम् (भा.)
त्रिबलि–स्त्री., जठरावयवविशेषः (भूरिप्र)
त्रिबलिक–न., गुदद्वारम् । पायुः (हे. च.)
त्रिभङ्गी (ण्टी) (ण्डी)–स्त्री., त्रिवृता (प. मु.)
त्रिभण्ड–(ड्र)–न., मैथुनम् । सुरतः (त्रि. का.)
त्रिमद–पु., विडङ्गमुस्तचित्रकाः । विडङ्गमुस्तचित्रैश्च त्रिमदः (प. प्र. ३ ख. त्रिकत्रयलौह.)
त्रिमदद्वितय–न.. त्रिमदस्त्रिफला चेति द्वयम् । प्रयोगामृते (ग्रहणी. चि. कणादिलौहे.)
त्रिमल्लभट्ट–पु., योगतरङ्गिणीकारः ।
त्रियष्टि–स्त्री., पर्पटकः (प. मु.)

त्रियामा–स्त्री., हरिद्रा (रा. व. ६)
त्रिलिङ्गगति–स्त्री., त्रिदोषजनाडी (भा. म.४ मुखरोगचि.) त्रिलिङ्गगतिसौषिरी ।
त्रिवर्गद्वितय–न., त्रिफलात्रिमदः (रस. र. कणाद्यलौहे)
त्रिवर्णकृत्–पु., शरटः (वै. नि.)
त्रिवल्ली–स्त्री.. इन्दीवरी (वै. नि.)
त्रिविक्रमरस–अश्मर्यधिकारे रसः । (रस. र.)
त्रिविधायतन–न., इन्द्रियार्थातियोग कर्मातियोगकालातियोगरूपेषु रोगाणां त्रिविधकारणानि । (च.सू.११)
त्रिवीज–पु., श्यामाकः (रा. व. १६)
त्रिवृतादिगण–पु., तदाद्यधोभागहरद्रव्यसमूहः (सुसू.३८)
त्रिवृतिका–स्त्री., त्रिवृता (रा. व. ६)
त्रिवृतपत्र–न., वटपत्रम् (रस. र.) वह्निभल्लातके ।
त्रिवृत्पर्णी–स्त्री., हिलमोचिका (श. च.)
त्रिवृन्त–पु.. पलाशवृक्षः (वै. नि.)
त्रिशङ्कु–पु., चातकपक्षी । (त्रिका.) सुगन्धमार्जारः । (वै. नि.) बिडालः । शलभः । (मे.) खद्योतः । (श. मा.)
त्रिशतपत्र–न., पुण्डरीकम् । (वै. नि.)
त्रिशर्करा–स्त्री., गुडोत्पन्ना हिमोत्था मधुरा चेति मिलितशर्करा । 'गुडोत्पन्ना हिमोत्था मधुरा चेति मिश्रिता, त्रिशर्करा । (रा. व. २२)
त्रिशृङ्गी (इन्)–पु., रोहितमत्स्यः । (शब्दकल्पतरुः)
त्रिसन्धि–स्त्री., पुष्पवृक्षविशेषः । यस्य कुसुमानि सन्धिकाले एव विकसन्ति । सा रक्तसितासितकुसुमभेदात् त्रिधा । परन्तु गुणैस्तुल्या । गुणाः–कफकासहरा रुच्या त्वक्दोषघ्नी च ।
त्रिसन्धिपुष्पदा–स्त्री., त्रिसन्धिवृक्षः । (वै. नि.)
त्रिसन्धी–स्त्री.. शुक्लत्रिसन्धिः । (वै. नि.)
त्रिसन्ध्य–न., त्रिसन्धिपुष्पम् (राव. १०)
त्रिसन्ध्या–स्त्री.. त्रिसन्धिपुष्पवृक्षः । (वै. नि.)
त्रिसर–पु., तिलौदनः । (वै. नि. । हे. च.)
त्रिसरा–स्त्री., कृसरा । तिलतण्डुलमाषैश्च कृसरा त्रिसरेति (प. प्र. ३ ख.)
त्रिसरी–पु., यस्याश्वस्य सर्वाङ्गं भिन्नवर्णं केवलं शिरः कृष्णं स त्रिसरी । 'अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत् । त्रिसरी नाम स प्रोक्तः भर्तुः कुलविनाशनः । (ज. द. ३ अ.)
त्रिसवन–न., त्रिसन्ध्यस्नानम् (च. शा. ५ अ.)
त्रिसिता–स्त्री., त्रिशर्करा (रा. व. २२)
त्रुटिवीज–पु., कच्वीवृक्षः (श. म.)
त्रैकटु–न., त्रिकटुकम् (चि. क. क. स्त्री.) (चि. मकल्लशूले)
त्रैफल–न., त्रिफला (श. चि.)
त्रैलोक्यचिन्तामणिरस–पु., ज्वराधिकारे रसः (भैष.)
त्रैलोक्यविजयापत्र–न., विजयापत्रम् (मदनमोदके.) लक्ष्मीविलासरसे ।
त्रोटि-(टी)–स्त्री., पक्षिचञ्चुः । कट्फलम् । पक्षी । मत्स्यभेदः (वै. नि.)
त्र्यक्षफल-(ला)–पु., स्त्री., नारिकेलवृक्षः (वै. नि.)
त्र्यक्षर–पु., नागवीटः (त्रिका.)
त्र्यञ्जन–न., अञ्जनत्रितयम् (रा. व २२)
त्र्यूषणाद्यमण्डूर–न., पाण्डु रोगेहितम् । (भैष.)
त्र्यूषणाद्यलौह–न., स्थौल्याधिकारे । (रस. र.)
त्र्यूष्ण–न., त्र्यूषणम् (वै. नि.)
त्वक्कण्डूर–पु., व्रणः (हारा.)
त्वक्कन्द–पु., वनशूरणः (भैष. ग्रहणी. चि.)
त्वक्क्षीर–न., तवक्षीरम् । वंशलोचना (वै. नि. २ भ' कास. चि.)
त्वक्क्षीरी–स्त्री., क्षीरशुक्ला, वंशरोचना (रा. व. ६)
त्वक्छद–पु., क्षीरीवृक्षः (र. मा.)
त्वक्तरङ्ग-(क)–पु., बला (रा. व. १८)
त्वक्पञ्चक–न., न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलानि (रा. व. २२)
त्वक्पत्री–स्त्री., हिङ्गुपत्री हिङ्गुवृक्षः । तमालपत्रः (वै. नि.) कारवी (मे.)
त्वक्पुष्प–न., रोमाञ्चः (त्रि. का.) किलासः (हे. च.)
त्वक्पुष्पिका–स्त्री., शिम्बी । श्वित्रकुष्ठम् (त्रि. का.)
त्वक्पुष्पी–स्त्री., श्वित्ररोगः किलासम् (जटा.)
त्वक्शून्यता–स्त्री., स्पर्शाज्ञता स्पृश्यमाना त्वचा या तु शीतोष्णं मृदु कर्कशम् । न जानाति बुधैस्त्वक्सा शून्येति परिकीर्त्यते (निदा.)
त्वक्सारनिर्यासविष–न., स्थावरविषभेदः । यस्य त्वक्सारः निर्यासश्च विषम् । (सु. क. २ अ.)
त्वक्सारभेदिनी–स्त्री.. क्षुद्रचुञ्चुक्षुपः (रा. व. ४)
त्वक्स्वाद्वी–स्त्री., त्वक्सारः (वै. नि.)
त्वक्स्वाप–पु., स्पर्शाज्ञता (नि. दा.)
त्वगङ्कुर–पु., रोमाञ्चः (त्रिका.)
त्वगाक्षीरा(री)–स्त्री., वंशलोचना (जटा. । अम.)
त्वगूर्मि–स्त्री., बला । मांसललोलता (रा. व. १८)
त्वग्ज–न., रक्तधातुः । केशः । रोमन् (रा. व. १८)

त्वग्दोषापहा–स्त्री., सोमराजी (रा. व. ४)
त्वग्मी–स्त्री., चर्मचटकः (वै. नि.)
त्वचाङ्ग–पु., नागरङ्गवृक्षः (रा. व. ११)
त्वचापत्र–पु., हिङ्गुवृक्षः
न., त्वचा (श. र.)
त्वचिसार–पु., वंशः (म. द. व. ७)
त्वचिसुगन्धा–स्त्री., क्षुद्रैला (हारा.)
त्वच्यगण–पु., त्वक्प्रसाधनवर्गे तैलादिः । यथा–तैलन्तु नवधा प्रोक्तं बाकुची चक्रमर्दकम् । स्थौणेयं पर्पटी स्पृक्का त्वच्योऽयं गण उच्यते ।
त्वरारोह–पु., पारावतः (वै. नि.)
त्वष्ट (ष्ट्र)–न., ताम्रम् (वै. नि.)
त्वाच–न., त्वक्तैलम् । गुणाः —'वह्निमांद्यानिलहराध्माना- क्षेपनाशनम् । वान्त्युत्क्लेशप्रशमनं सङ्ग्राहि दशनार्तिभित् । त्वाचं तैलं रजःस्रावि तोये क्षिप्तं निमज्जति ' (अत्रि.)

थ

थ–पु., पर्वतः (मे.) रोगविशेषः भक्षणम् (श. र)
थुत्कार–पु., निष्ठीवनत्यागानुकरणशब्दः ।
थुथुकृत्–पु., पक्षिविशेषः (वै. नि.)
थोडन–न., आच्छादनम् (वै. नि.)
थौनेयक–पु., ग्रन्थिपर्णी (च. चि. ३ अ. अणुतैले; च. द. विष. चि.)

द

दंशक–पु., कर्कटः । कुक्कुरः (वै. नि.)
मक्षिका (हारा.)
दंशन–न., दन्तेन कर्तनम् (हे. च)
दंशनाशिनी–स्त्री.. तैलकीटम् (वै. नि.)
दंशभीरु(क)–पु., स्त्री., मत्कुणः । महिषः (त्रिका.)
दंशवदन–पु., कङ्कपक्षी (वै. नि.)
दंशिका–स्त्री., वनमक्षिकाविशेषा (वै. नि.)
दंशी(इन्)–पु., स्त्री., कुक्कुरः (वै. नि.) वनमक्षिका । क्षुद्रदंशः (अम.)
दंष्ट्र–पु., शूकरः (प. मु.)
दंष्ट्रक–न., सर्पदंशविशेषः ।
दंष्ट्रायुध(ष्ट्रास्त्र)–पु., वनशूकरः (वै. नि.)
दंष्ट्रिका–स्त्री., दाढिका (हे. च.)
दक्ष–पु.. कुक्कुटः (त्रि. का. । सि, यो) (कासचि, दशमूलघृते) वृक्षभेदः (विश्व.)
दक्षाण्डत्वक्–स्त्री., कुक्कुटाण्डत्वक् (भेष.) (नेत्र. चि. । भा. म. ४ भ. कर्णरो. चि.)
दक्षाय्य–पु., गृध्रः (वै. नि.)
दक्षिणदेशजा–स्त्री., लताकस्तूरी (श. चि.)
दक्षिणवायु–पु., मलयमारुतः (सु. सू.)
दक्षिणायन–न., रवेर्दक्षिणतो गतिः । यदा रविः कर्कटराश्यवस्थितो भवति तदा तदारभते । तच्च श्रावणादि मासषट्के भवति । कर्कटावस्थिते भानौ दक्षिणायनमुच्यते ' (सु. सू.)
दक्षिणावर्तकी–स्त्री., वृश्चिकाली (रा. व.) मेषशृङ्गी (वै. नि.)
दक्षिणावर्तफला–स्त्री., वृध्यौषधम् (वै. नि.)
दक्षिणावर्ता–स्त्री., मेषशृङ्गी (रा. व. ६)
दक्षेय–पु., गृध्रः (वै. नि.)
दग्धक–पु., महाशतावरी (रा. व. ७)
दग्धकाक–पु., डोमकाकः (हे. च.)
दग्धभूमिजशालि–पु., दग्धक्षेत्रजशालिः, गुणाः— दग्धायामवनौ जाताः शालयो लघुपाकिनः । किञ्चित्सतिक्ता मधुराः पाचना बलवर्धनाः (रा. व. १६) दग्धग्रामाचले जाताः शालयो लघुपाकिनः । सुपथ्या बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षिणः (अत्रि. १५ अ.)
दग्धमत्स्य–पु., अग्निदग्धमीनः । तस्य विवरणम्—पलाशैर्वेष्टितो मत्स्यः कर्दमेन च लेपितः । दग्धोऽङ्गारे सलवणो दग्धमत्स्यः प्रकीर्तितः । (वैद्यकम्) गुणाः– दग्धमत्स्यो गुरुर्वृष्यो बृंहणः प्राणवर्धनः । क्षीण शुष्काश्च ये केचित् भग्नजर्जरिताश्च ये । नित्यं स्त्री सेविनो ये च क्षीणतेजस एव च । दग्धमत्स्यो हितस्त्वेषां सतैललवणान्वितः । तस्माद्धीनगुणः किञ्चिद्दृष्टमत्स्य उदाहृतः (राज.)
दग्धवर्णक–पु., रोहिषतृणम् (वै. नि.)
दग्धहीर–न., वैक्रान्तमणिः (भेष. ज्वर. चि.) पानीय- भक्तवटी ।
दग्धास्य–(स्याह्व)–पु.. कुमरिचक्षुपः । (प. मु.)
दग्धाह्व–पु., तिलकपुष्पवृक्षः (वै. नि.)
दग्धेष्टका–स्त्री., अग्निदग्धेष्टका (हारा.)
दण्डकाक–पु., स्वनामख्यातकाकः (हे. च.)
दण्डपात–(ती)(इन्)–पु.. सन्निपातज्वरविशेषः । लक्षणम्–नक्तंदिवा न निद्रामुपैति गृह्णाति मूढधीर्नभसः । उत्थाय दण्डपाती भ्रमातुरः सर्वतो भ्रमति (भा. म.१ भ.)

दण्डपाल-पु., अर्धशफरमत्स्यविशेषः (हारा.)
दण्डपालक-पु., दण्डमत्स्यः । शकुलमत्स्यः (हारा.)
दण्डपाली-स्त्री.,-तुलायन्त्रम् (च. सू. १५)
दण्डबालाध-पु., हस्ती (श. र.)
दण्डमत्स्य-पु., स्वनामख्यातमत्स्यः (हिं.-दण्डारी)
गुणाः-दण्डमत्स्यो रसे तिक्तः पित्तरक्तकफं हरेत् । वातसाधारणः प्रोक्तः शुक्रलो बलवर्धनः [भा.] कफवायुपित्तघ्नः तिक्तः लघुश्च (राज. ३ प.)
दण्डमातङ्ग-पु., तगरः । पिण्डीतगरः (वै. नि.)
दण्डयाम-पु., दिवसः (वै. नि.)
दण्डहस्त-स्त्री., (इन्)-पु., तगरपुष्पम् (रा. व. १०; २२) पिण्डीतगरः (वै. नि.)
दण्डा-स्त्री., नागबला [वै. नि.]
दण्डालु-पु., स्वनामख्यातालुविशेषः (प. मु.)
ताम्बूलपात्रा दण्डालुरिति द्रव्याभिधानम् ।
दण्डिका-स्त्री., श्योणाकवृक्षः (वै. नि.)
दण्डोत्पल-न., वृक्षविशेषः [म. सहदेवी] (हि.-डानिकुनुहे] तच्च पीतश्वेतरक्तपुष्पभेदेन त्रिधा भवति (र. मा.) 'गुणाः-श्वासकासक्षयघ्नम् अग्निदीप्तिकरञ्च [राज.,)
दत्-पु., दन्तः [श. च,]
दद्रुघ्नपत्र-न,. दद्रुमर्दपत्रम् (श. चि.)
दद्रु (द्रू) ण-त्रि दद्रुरोगी (अम.) [अ टी र]
दद्रुनाशिनी-स्त्री., वृक्षविशेषः । तैलिनीकीटः (रा., व.)
दद्रुमर्दी (इन्)-पु., दद्रुघ्नवृक्षविशेषः (हिं.-दादमर्दन)
'अगदो दद्रुमर्दी स्यात् कीटारिश्चन्द्रसुन्दरः । इति किञ्चित्तन्त्रम् ।'
दद्रुरोगी (इन्)-पु.. दद्रुरोगः (अ. टी. भ.)
दधिक-पु., श्रीवेष्टकवृक्षः (हिं-शालाइ) (ज. द. १२ अ.)
दधिकूर्चिका-स्त्री., दध्ना सह पक्वे पयसि (र. मा.)
दध्नासह पयः पक्वं सा भवेत् दधिकूर्चिका । (प. प्र. ३ ख.) अत्र दधि दुग्धं समानं भाव्यम् । गुणाः—वातघ्नी ग्राहिणी रूक्षा दुर्जरा दधिकूर्चिका । (राज.)
दधिचार-पु., दधिमन्थनदण्डः (हारा)
दधिजल-न., मस्तु । नवनीतम् (रा. ब. १५)
दधित्थाख्य (ह्व)-पु., धूपविशेषः । सरलद्रवः । लोबान इति लोके (र. मा.)
दधिनाम (क)-न.. कपित्थफलम्
(सि. यो. हिक्काश्वास चि. 'काशीशं दधिनाम च ।
पु., (मा) कपित्थवृक्षः (च. द.)
दधिपूप (क)-पु., दधिवटकः (वै. नि.)
दधिमण्डातक-न., दधिमस्तु (च. चि. १८ अ.-पञ्चकोलघृते)
दधिलेह-पु., दधिसरः (र. मा.)
दधिवटी-स्त्री., शोथे हिता (भैष.)
दधिवास्तुका-स्त्री., गोदन्तहरितालः दुरालभाभेदः (वै. नि.)
दधिशोण-पु., शुक्लवानरः । दर्वीकरसर्पविशेषः (सु. कल्प ४ अ.) गोलाङ्गूलवानरः (त्रिका.)
दधिसक्तव-पु.. बहु. व.; दध्युपसिक्तसक्तुः (अ.म.)
दधिसक्तु-पु., रसाला ।
दधिसार-न., नवनीतम् (हे. च.)
दधिस्नेह-पु.. दध्नः स्नेहभागः । दधिसरः (वै. नि.)
दधिस्रद्धा-स्त्री., लवणखोटी (श. चि.)
दधिस्वेद-पु.. तक्रम् (जटा.)
दधिचा (च्य) स्थि-न., हीरकः (त्रिका.)
दध्यग्र-न., दधिसरः (वै. नि.)
दध्यङ्क-पु., सरलद्रवः (त्रिका.)
दध्यानि-स्त्री., कटुकी (वै. नि.)
दध्याली-स्त्री., सुदर्शनालता (हिं.-मदनमस्तु) (र. मा.)
दन्तकडमडि-पु., तन्नामकबालरोगः । यत्र बालकः निद्रितोऽपि दन्तशब्दं करोति (रस. र. बालचि.)
दन्तकराल-पु., दन्तरोगभेदः (वा. उ. २१ अ.)
दन्तकर्षण-पु., निम्बूवृक्षः (श. र.)
दन्तकेतु-पु., लघुनिम्बूवृक्षः ।
दन्तघर्षण-न., दन्तमार्जनम्
दन्तघात-पु.. निम्बूवृक्षः, शिशोः दन्तकडमडिरोगः (वै. नि.)
दन्तच्छदोपमा-स्त्री., कुन्दरुः । बिम्बी (वै. नि.)
दन्तपत्रक-न., कुन्दपुष्पम् (श. च.)
दन्तपातनयन्त्र-न., दन्तोत्पाटनयन्त्रम् 'शरपुङ्खमुखं दन्तपातनमुच्यते । (अत्रि.)
दन्तपाली-स्त्री., शिशोः दन्तरोगः । (वा. उ. २ अ.)
दन्तपीठक-न., दन्तवेष्टम् (ज. द, २ अ.)
दन्तपुष्प-पु., अश्वत्थवृक्षः । (वै. नि.) (न.,) कतकफलम् । (श. च.)
दन्तभाग-पु., हस्त्यग्रभागः । (अम.)
दन्तमल-न., दशनमलः । हारा.)
दन्तमूलिका-स्त्री., दन्तीवृक्षः । (श. र.)

दन्तरञ्जन-न., काशीषम् (र. सा. सं.)
दन्तरोगी (इन्)-पु., दन्तरोगयुक्तः
दन्तवल-पु., हस्ती (वै. नि.)
दन्तवस्त्र-(वास) न., पु., ओष्ठम् (रा. व. १८)
दन्तवीज-(क)-(जा)-पु., स्त्री., दाडिमवृक्षः ।
दन्तशट-पु., दन्तशठः । (अ. टी. भ.)
दन्तशब्द-पु., ग्रहजुष्टबालकस्य दन्तपीडनरोगः । लक्षणम् 'ऊर्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते ।(मा.)
दन्तशाण-न., दन्तघर्षणम् । दन्तनिश्चुकणद्रव्यम् । (त्रिका.)
दन्तशिरा-स्त्री., दन्तवेष्टम् । (श. र.)
दन्तशोफ-पु., दन्तार्बुदरोगः । (रा. व. २०)
दन्तहर्षक-(ण)-पु., जम्बीरवृक्षः । (त्रिका. । जटा.)
दन्तायुध-पु., वनशूकरः (त्रिका.)
दन्तार्बुद-पु., न., दन्तरोगविशेषः (रा. व. २०)
दन्तावल-पु,, करी (अम.)
दन्तिका(जा)-स्त्री., दन्तीवृक्षः (अम. शर.)
दन्तिला-स्त्री., नागदन्ती (सु. सू. ३७ अ.)
दन्तीफल-न., पिप्पली । दन्तीबीजम् (वै. नि.)
दन्तीफलासमाकृति-पु., पिस्तावृक्षः (वै. नि.)
दन्तीहरीतकीगुड-पु., गुल्माधिकारे हितः (रस. र.)
दन्तुर-त्रि., उच्चदन्तः । नतानतः (मे.)
दन्तुरच्छद(त्वक्)-पु., मातुलुङ्गवृक्षः (रा. व. ११
दन्तोज्ज्वला-स्त्री., श्वेतजातीपुष्पवृक्षः ।
दन्तोद्भेद-पु., बालदन्तोद्गमः । दन्तोद्भेदः शिशोः सर्वरोगाणां कारणं स्मृतम् । विशेषात् ज्वरविड्भेदकासच्छर्दिशिरोरुजाम् । अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते (भा. म. ४ ख. भ,)
दन्तोलूखल-न., दन्ताधिष्ठानास्थि तानि ३२; (च. शा. ७ अ.)
दन्दश-पु., दन्तः (वै. नि.)
दन्दशूल-पु., सर्पः (वै. नि.)
दमनी-स्त्रीं., अग्निदमनीनामक्षुपः (रा. व. ४.) नागदमनी (वै. नि.)
दम्भफल-पु., सेववृक्षः (वै. नि.)
दम्भीर-पु., लावपक्षी । महिषः (वै. नि.)
दम्य-पु., षण्डः । वृषः (वै. नि.)
दरकण्टिक-स्त्री.. शतावरी (रा. व. ४.)
दर्दराम्र-पु., मीनाम्लीनः । व्यञ्जनविशेषः (श. मा.)
दर्दरीक-पु.. भेकः । मेघः (उणा.)
दर्दुरच्छदा-स्त्री., ब्रह्मीक्षुपः (वै. नि.)
दर्दुरदला-स्त्री., मण्डूकपर्णी । सा च ब्रह्मी वरम्भीति महाराष्ट्रे ख्याता (भ. म. १भ. चित्तभ्रम ज्वरचि.)
दर्दुरपर्णी-स्त्री., ब्राह्मीक्षुपः (वै. नि.)
दर्द्रू (द्रु)-पु., लकुचवृक्षः (रा. व. ९) महाकुष्ठभेद (मनि.)-स्त्री., दद्रुरोगः (उणा.)
दर्द्रुघ्नपत्र-न., पत्रशाकविशेषः । चक्रमर्दपत्रम् ।
दर्द्रु (द्रू) ण-त्रि., दद्रुरोगी (अ. टी. भ.)
दर्द्रु (द्रू) रोगी (इन्)-त्रि., दद्रुरोगयुक्तः ।
दर्पपत्रक-पु., काशतृणम् (वै. नि.)
दर्पा-स्त्री., कस्तूरी (वै. नि.)
दर्भक-पु., अश्वस्य पादरोगविशेषः । लक्षणम्—' मण्डूक्या विवरं यस्य दर्भमुञ्जकरं भवेत् । तस्य दर्भक इत्युक्तो व्याधिः कष्ट चिकित्सितः (ज. द. ३८ अ)
दर्भर-पु., लावपक्षी (वै. नि.)
दर्भवट-न., अन्तर्गृहम् (त्रिका)
दर्भाह्वय-पु., मुञ्जतृणम् (रा. व. ८)
दर्विपत्रिका-स्त्री., गोजिह्वा (ज. द. १२)
दर्श-पु.. अवलोकनम् (मे.)
दर्शत-सूर्यः । चन्द्रः (उणा.)
दर्शनी-स्त्री., तैलकीटकः (वै. नि.)
दर्शनीय-पु., अर्कवृक्षः श्वेतार्कः । (वै. नि.)
दर्शनोज्ज्वला-स्त्री., श्वेतजातीवृक्षः (वै. नि.)
दर्शविपत्-पु.. चन्द्रः (हारा.)
दलकोमल-न., पद्मम् (वै. नि.)
दलकोष-पु., मल्लिकापुष्पवृक्षः (वै. नि.)
दलनिर्मोक-पु., भूर्जवृक्षः (श. मा.)
दलप-पु., सुवर्णम् (उणा.)
दल (अर्ध) लाङ्गलक-पु., तदाकारच्छेदविशेषः । यः एकस्मिन् पार्श्वे छेदः स दललाङ्गलकाख्यः (वा. उ. २८ अ.) ह्रस्वमेकतरं यश्च सोऽर्धलाङ्गलकः स्मृतः । (सु. चि. ८)
दलशालिनी-स्त्री., कञ्चुकशाकः (वै. नि.)
दलसायसी-स्त्री., श्वेततुलसीवृक्षः । (वै. नि.)
दलसारिणी-स्त्री.. केमुववृक्षः । (र. मा.)
दलसूचि-पु., कण्टकवृक्षः । कण्टकः (हारा.)
दलस्नसा-स्त्री., पत्रशिरा (हे. च.)
दलहीनफला-स्त्री., सुलेमानीखर्जूरी (भा.)
दला-स्त्री., नागवल्ली (प. मु.) अजमोदा (रा. व. ६)

दलाग्रलोहिता--स्त्री., चिल्लीनामपत्रशाकः (रा. व ७) पलाशलोहिताऽपि पठ्यते ।

दलाढक-पु., नागकेशरवृक्षः गैरिकः । समुद्रफेनः । आरण्यतिलकवृक्षः । काकः । पृश्निपर्णी । चक्रवाकः (मे.) करिकर्णः । कुन्दवृक्षः । शिरीषवृक्षः (हे. च.)

दलाढकी-स्त्री., फणीज्झकवृक्षः (वै. नि.) पृश्निपर्णी (मे.)

दलाढ्यक-पु., कुन्दपुष्पवृक्षः । (वै. नि.) पङ्ककर्वटः (त्रिका.)

दलामल-न., मूर्वा । वकवृक्षः । दमनकवृक्षः । मदनवृक्षः । (श. र.)

दलाह्व-न., तमालपत्रम् (म. द. व. ३)

दलिक-न., काष्ठम् (हे. च.)

दलेगन्ध-पु., सप्तपर्णवृक्षः (त्रिका.)

दवगन्धक-न., कतृणम् (रा. व. ८)

दशजटा-स्त्री., दशमूलम् (वै. नि. २ भ. वा. व्या. चि. रास्नादिचूर्णे)

दशनवास-न., ओष्ठः (अम.)

दशनवीज-पु., दाडिमवृक्षः ।

दशनाढ्या-स्त्री., चाङ्गेरी । चुक्रशाकः (श. च.)

दशनोच्छिष्ट-पु., निःश्वासः (मे.)

दशपु(पू)र-न., जलमुस्ता कैवर्तकमुस्ता (अम. अःटी. भ.)

दशमूत्रक-न., दशविधमूत्रम् । हस्तिमहिषोष्ट्रगवाजमेषाश्वगर्दभनरनारीणां मूत्रम् (रा. व. २२)

दशमूलतैल-न., कर्णरोगे तैलम् । (सा. कौ.)

दशरथ-पु., शरीरम् (वै. नि.)

दशशतकरदुग्ध-न., अर्कक्षीरम् (वै. नि. २ भ) (कर्णकज्वरचि.)

दशशताङ्घ्रि-स्त्री., शतावरी (वै. नि.)

दशशाक-पु,, त्वक्पत्रमूलफलदण्डाङ्कुरपुष्पकपिकच्छूपर्पटकुमारीषु ।

दशसारवटी-स्त्री., वातव्याधौवटी । (र. सा. सं.)

दशा-स्त्री., बालाद्यवस्था । बाल्य यौवन प्रौढवार्धक्यादिः । अश्वस्य क्षेत्रफलदशविधकालपरिमाणम् । सा च समाद्वयं सद्वादशदिनं वर्षत्रयं ज्ञेयम् । ' वासराः-सप्तति द्वौ च वर्षाणाञ्च तथा त्रयं दशाप्रमाणं वाहानां शालिहोत्रेण कीर्तितम् (ज. द. ५. अ.)

दशाङ्गगुग्गुलु-पु , मेदोरोगे हितः (भा.)

दशाङ्गधूप-पु., दशविधद्रव्यकृतधूपविशेषः (वा. उ. ३ अ.) अयं धूपः सर्वग्रहजित् ।

दशाङ्गुल-पु., खर्बूजा (भा.)

दशानिक-पु., दन्तीवृक्षः (श. च.)

दशारुहा-स्त्री., कैवर्तमुस्ता (रा. व. ६)

दस्रौ-पु., (द्वि) अश्विनीकुमारौ (अम.)

दहनकेतन-पु., धूमः (हे. च.)

दहनी-स्त्री., मूर्वा (रा. व. ३)

दहनोपल-पु., सूर्यकान्तमणिः (हे. च.)

दहर-पु., कुक्कुटः । बालकः । मूषिकः (मे)

दाक्षायण-न., स्वर्णम् (वै. नि.)

दाक्षाय (या) णी-स्त्री., दन्तीक्षुपः (र. मा.)

दाक्षिणात्य-पु., नारिकेलवृक्षः (रा. व. ११)

दाडक-पु., दन्तः (शब्दार्थकल्पतरुः)

दाडिमत्वक्-स्त्री., दाडिमफलवल्कलम् (सि. यो. अ. सा. चि. उत्पलादि.)

दाडिमपत्र (पुष्प) क-पु., रोहितकवृक्षः (रा. व. ८)

दाडिमप्रिय-पु., कीरः (श. र.)

दाडिमभक्षण पु., शूकपक्षी (श. च.)

दाडिमी-स्त्री., दाडिमवृक्षः । (वै., नि.)

दाडिमीरस-पु., दाडिमाम्बु । (च. द.)

दाडिमीविष-न., दारुमोचनामकविषभेदः । (प. मु.)

दाडि (डी) म्ब-पु., दाडिमवृक्षः । (प. मु.)

दाढा-स्त्री., दंष्ट्राभेदः । (हे. च.)

दाढिका-स्त्री., दाडी इति ख्यातः मुखावयवः । (हे. च.)

दात्यौह-पु., जलकाकः । दात्यूहः । (श. र.)

दात्र-न., अस्त्रविशेषम् । (भा. भ. ३ भ. अन्नद्रवशूलचि)

दाधिक-पु., दधिसम्बन्धि दधिसंस्कृतभक्ष्यम् (भा. भ. ३ भ. अन्नद्रवशूलचि.)

दामन-पु., दमनकवृक्षः । वै. नि.)

दामबन्ध-(न)--न., व्रणबन्धविशेषः लक्षणं ' दामाकृतिश्चतुष्पादो बन्धः स्यात् दामसंज्ञितः । (सू. सू. १८ अ.) दाम अनेकगोबन्धनी रज्जुः । तदाकार चतुष्पादयुक्तः दामबन्धः । (च. द.)

दामाञ्चल-न., अश्वादेः पादबन्धनरज्जुः । (हे. च.)

दामोदर-पु., व्याध्यर्गलाख्यवैद्यकग्रन्थप्रणेता

दाम्भिक-त्रि., वाचालः । पु., वक्रम् (रा. व. १९)

दायक-पु., बालकः । (मे.) पुत्रम् । (हे. च.)

दारकर्म-न., विवाहः । (त्रिका.)

दारद-पु., हिङ्गुलः (त्रिका.) पारदः (मे.) दरददेशीयं विषम् । विषमात्रम् (अम.)

दारबलिभुक्-पु., वकपक्षी (रा. व. १९.)

दारुक-न., देवदारुः (रा. व. १२) (वा. व्या. चि.) तैलदेवदारुः । शोणपित्तलम् (वै. नि.)

दारुगन्धा–स्त्री., चांडानामक देवदारुभेदः (रा. व.१२)
दारुफल–न., पेस्ता इति ख्यातफलम् (वै. नि.)
दारुमूषा–स्त्री., दार्मुज इति प्रसिद्ध स्थावरविषभेदः (भा. म. १भ. ज्वरचि.)
दारुमोच–पु., स्वनामख्यातविषभेदः (प. मु.)
दारुविष–न., दारुमोचविषम् । भवेदाखुविषं दारुविषं पाषाणसंज्ञकम् । तद्भेदाः शृङ्गगोदन्तदाडिमीस्फटिकादयः (प. मु.)
दारुसिता–स्त्री., दारुचिनीति ख्याता मधुरत्वग् (हिं–डालचिनी) गुणाः—उक्ता दारुसीता स्वाद्वी तिक्ता चानिलपित्तहृत् । सुरभिः शुक्ला वर्ण्या मुखशोषतृषापहा (भा. उ. वाजीचि.)
दारुहस्तक–पु., दर्वी (सु. सू. ७अ.)
दार्वण्ड–पु., मयूरः (वै. नि.)
दार्वाघाट (त)–पु., काष्ठकुक्कुटपक्षी (अम. । श. र.)
दार्विपत्रिका–स्त्री,, दार्वीशाकः (र. मा.)
दार्वीत्वक्–स्त्री., दारुहरिद्रात्वग् (सि. यो. कासचि. मण्डूरवटके 'दार्वीत्वक्त्रिफलाव्योष' त्वच एव प्राशस्त्यम् । अभावे काष्ठम् (श्रीकण्ठ)
दार्व्य–न., रसाञ्जनम् (वै. नि.)
दालशर्करा–स्त्री., दालकमधुकृतशर्करा सा तन्मधुतुल्यगुणा (रा. व. १४)
दालन–स्त्री., स्थावरविषभेदः (हे. च.)
दालिका–स्त्री., दाली, महाकालः (भा.)
दालिम–पु., दाडिमवृक्षः (अ. टी. भ.)
दास-पु., नीलझिण्टी उष्ट्रः (वै. नि.)
दासिक–स्त्री., दासीकुरण्टकम् (श. चि.)
दासेर-(क) पु., उष्ट्रः (मे.)
दास्यादि–पु., विषमज्वरे कषायभेदः (भैष.)
दाहकर्षित–त्रि., दाहपीडितः ।
दाहज्वर–पु., दाहपूर्वकज्वरः (मा.)
दाहदा–स्त्री., नागवल्लीलता (वै. नि.)
दाहनिःश्वास–पु., सुगन्धार्जकवृक्षः (वै. नि.)
दाहसर–न., श्मशानम् (त्रिका.)
दाहहरण–न., उशीरम् (श. व.)
दिक्क–पु., करिशावकः (श. र.)
दिक्पालसंख्या–स्त्री., अष्टसंख्या (भा. ज्व. कल्पतरौ)
दिग्धविद्ध–त्रि., बिषाक्तबाणविद्धम् । (च. द. विष. चि.)
दिङ्क–पु., लिख्या (शब्दकल्पतरु.)
दित–त्रि., छिन्नम् (अम.)
दिनकेशान्तक–पु., वटपत्रपाषाणभेदः (वै. नि.)
दिनदुःखित–पु., चक्रवाकः । स्त्री., तत्पत्नी (श. र.)
दिनमणि–पु., सूर्यः (त्रिका.)
दिनादि–पु., प्रभातम् (रा. व. ११)
दिनान्त–पु., सायंकालः (अम.)
दिनेश–पु., सूर्यः । अर्कवृक्षः (वै. नि. २ भ. वा. व्या. चि. शतपुष्पालेपे.)
दिनेशपुष्प–न.. कैरवपुष्पम् (चि. क. क. प्रदरचि.)
दिलीर–न., शिलीन्ध्रः (हारा.)
दिवस–पु., न., दिनम् ।
दिवसमुख–न., प्रभातम् (हला.)
दिवाकर–पु., काकः । सूर्यपद्मम् (श. च.) अर्कवृक्षः (अम.)
दिवाकीर्ति–पु., पेचकः । नापितः (हे. च.)
दिवाटन–पु., काकः (शब्दार्थकल्पः)
दिवान्ध–पु., पेचकः (रा. व. २३) त्रि., दृष्टिरोगयुक्तः । लक्षणम्–' प्राप्ते तृतीयं पटलञ्च दोषे दिवा न पश्येत् निशि वीक्षते सः । रात्रौ स शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत् ' (मा.) (**न्धा**)–स्त्री., वल्गुलापक्षी (रा. व. १९)
दिवान्धकी(न्धिका)–स्त्री., छुछुन्दरिः (वै. नि.)
दिवाभीत(ति)–पु., पेचकः (त्रिका. श. र.) न., श्वेतपद्मम् (वै. नि.)
दिवामध्य–न., मध्याह्नः । (हे. च.)
दिवास्वापा–स्त्री., पक्षिविशेषः । वल्गुला इति लोके (रा. व. १९)
दिवि–पु., चाषपक्षी (श. मा.)
दिवी–स्त्री., उपजिह्विकाकीटः (हारा.)
दिवोका–पु., चातकः (मे.) हरिणः । (वै. नि.)
दिवोद्भवा–स्त्री., एला (शब्दार्थकल्पतरुः)
दिव्यचक्षु–पु., वानरः (श. मा.) उपचक्षुः । सुगन्धभेदः (मे.)
दिव्यपञ्चामृत–न., समभागगव्यघृतदधिदुग्धमधुशर्कराच (रा. व. २२)
दिव्यपुष्पिका–स्त्री., देवद्रोणक्षुपः । महाद्रोणी (वै. नि.) रक्तार्कवृक्षः ।
दिव्यान्न–न., उत्तमान्नम् (वै. नि.)

दिष्ट–न., दारुहरिद्रा । (श. मा.)
दिष्टान्त–पु., मृत्युः (अ. म.)
दिष्टि–स्त्री., परिमाणम् (मे.)
दीधिका–स्त्री., त्रिशतधनुःपरिमितजलाशयः (त्रिका.)
दीदिवि–न., अन्नम् (प. मु.)
दीन–न., तगरपादिकः (रा. व. १०)
दीना–स्त्री., छुछुन्दरिः (वै. नि.) मूषिका । (त्रिका.)
दीपकर्पूरज–पु., कर्पूरः (वै. नि.)
दीपकिट्ट–न., दीपकज्जलम् (श. मा.)
दीपकूपी (खोरी)–स्त्री., दीपमतिः (च. मा.)
दीपतरु–पु., सरलतरुः, सरलदेवदारुः (रा. व. १२)
दीपध्वज–पु., कज्जलम् (जटा.)
दीपनीयौषध–न., आग्नेयौषधम्, पञ्चकोलादिः (सि. यो. मदा. चि. । च. द.)
दीपपुष्प–पु., चम्पकवृक्षः (रा. व. १०)
दीपशिखा–स्त्री., कज्जलम् (शब्दार्थकल्पः)
दीपसंज्ञ–पु., चित्रकवृक्षः (वै. नि.)
दीपास्यभस्म–न., दग्धदीपशिखा (रस. र. स्तनरोगचि.)
दीप्तकंस–न., शुद्धकांस्यधातुः (रा. व. १३)
दीप्तजिह्वा–स्त्री., उल्कामुखीशृगाली (त्रिका)
दीप्तपिङ्गल–पु., सिंहः (रा. व. १९)
दीप्तपुष्पा–स्त्री., लाङ्गलीवृक्षः (वै. नि.)
दीप्तरस–पु., किञ्चुलकः (श. च.)
दीप्तलोचन–पु., बिडालः (रा. व. १९)
दीप्तलोह–न., कांस्यधातुः (प. मु.)
दीप्ताङ्ग(क्ष)–पु., बिडालः (श. र.) मयूरः (श. र.)
दीप्तानल–न., सुवर्णम् (रा. व. १३)
दीप्तिक–पु., दुग्धपाषाणम् (वै. नि.)
दीप्तोपल–पु., सूर्यकान्तमणिः (प. मु.)
दीप्यका–स्त्री., यमानी, अजमोदा (भा. पू. १ भ.)
दीप्यवल्ली–स्त्री., अजमोदा (वै. नि.)
दीर्घक–न., पु, कृष्णजीरकः (मद. व. २) शरवृक्षः) श्वेतजीरकः । उशीरः उष्ट्रः । शाकवृक्षः (वै. नि.)
दीर्घकण्ठ–(क)–पु., बकपक्षी (श. च.)
दीर्घकन्धर–पु., बकपक्षी (रा. व. १९) बकस्त्री (वै. नि.)
दीर्घकेश–(शी)–पु., भल्लूकः (रा. व. १९)
दीर्घकोशा (षा)–स्त्री., पङ्कशुक्तिः (हारा.) गण्डूपदी (वै. नि.)
दीर्घकोशि(षी)का(शी)–स्त्री., पङ्कशुक्तिः गण्डूपदी(वै. नि.)
दीर्घखरच्छद–पु., इत्कटः (प. मु.)
दीर्घगति–पु., उष्ट्रः (रा. व. १९)

दीर्घगोधूम–पु., महागोधूमः (वै. नि.)
दीर्घग्रीव–पु., उष्ट्रः (हे. च.) नीलक्रौञ्चपक्षी (रा. व. ९)
दीर्घघाटिक–पु., उष्ट्रः । बकः (वै. नि.)
दीर्घचञ्चु–पु., पक्षिविशेषः (वै. नि.)
दीर्घजङ्गल–पु., मत्स्यविशेषः (श. मा.)
दीर्घजङ्घ–पु., उष्ट्रः (जटा.) बकपक्षी (वै. नि.)
दीर्घतन्वी–स्त्री., आलुकभेदः (वै. नि.)
दीर्घतिमिषा–स्त्री., कर्कटिका (श. मा.)
दीर्घदल–पु., मालाकन्दः । श्यामाकः (वै. नि.)
दीर्घद्रु–पु., तालवृक्षः (श. च.)
दीर्घपर्वा–पु., इक्षुः (वै. नि.)
दीर्घपलाण्डु–पु., विष्णुकन्दः । राजपलाण्डुः । तालवृक्षः (रा. व. ७.९) हरितकुशतृणम् । कुचेलवृक्षः (भा.)
दीर्घपक्ष–पु., मत्स्यविशेषः (वै. नि.)
दीर्घपात्(द्)–पु., क्रौञ्चबकः । कङ्कपक्षी (त्रिका. । हे. च.)
दीर्घपृष्ठ–पु., सर्पः (अम.)
दीर्घबाला–स्त्री., चमरीमृगः (वै. नि.)
दीर्घबालुक–पु., वृद्धदारकलता (रा. व. ३)
दीर्घमारुत–पु., हस्ती (त्रिका.)
दीर्घमूली–स्त्री., दुरालभा (श. मा.)
दीर्घरत(द)–पु., शूकरः (त्रिका.)
दीर्घरसन–पु., सर्पः (श. च.)
दीर्घरोमा–पु., भल्लूकः (वै. नि.)
दीर्घलता–स्त्री., व्याघ्रघण्टा (वै. नि.)
दीर्घलोहितयष्टिका–स्त्री., रक्तेक्षुः (वै. नि.)
दीर्घवंश–पु., नलः (रा. व. ८)
दीर्घवक्त्र–पु., हस्ती (श. मा.)
दीर्घवच्छिका–स्त्री., कुम्भीरः (शब्दार्थकल्पः)
दीर्घवर्षाभू–स्त्री., श्वेतपुनर्नवा
दीर्घवीजा–स्त्री., अलाबुः । शिम्बीभेदः (प. मु.)
दीर्घवृक्ष–पु., तालवृक्षः । लताशालवृक्षः (वै. नि.)
दीर्घवृन्तफला–स्त्री., दुग्धालाबुः । (वै. नि.)
दीर्घवृन्ता(न्तिका)–स्त्री., इन्दीवरालता (रा. व. ३) कपर्दकभेदः (र. सा. सं.) एलापर्णी (श. च.)
दीर्घशिम्बा–स्त्री., शिम्बीविशेषः (प. मु.)
दीर्घसमुश्रय–पु., नलतृणम् (प. मु.)
दीर्घसस्य–पु., तिन्दुकवृक्षः (वै. नि.)
दीर्घसुरत–पु., कुक्कुरः । शूकरः (त्रिका.)
दीर्घस्कन्ध–पु., तालवृक्षः (रा. व. ९)
दीर्घा–स्त्री., पृश्निपर्णी (रा. व. ४)
दीर्घाङ्कुर–पु., राजशालिः (वै. नि.)
दीर्घाङ्गी–स्त्री., शालपर्णी (भा. पू. १ भ.)

दीर्घाङ्घ्रि–स्त्री., शालपर्णी (वै. नि.)
दीर्घाध्वग–पु., उष्ट्रः (त्रिका.)
दीर्घायुध–पु., वनशूकरः (श. मा.)
दीर्घायुष्य–पु., जीवकः (मे.) श्वेतमंदारार्कः (रा. व. १०)
दीर्घालर्क–पु., महाश्वेतार्कवृक्षः (रा. व. १०)
दीर्घिका–स्त्री., हिङ्गुपत्री (रा. व. ६) गोजिह्वा। त्रिशतधनुपरिमितजलाशयम्, तज्जलं गुरु कटु क्षारं पित्तकरं कफवातघ्नञ्च (रा. व. १४)
दीवि–पु., चाषपक्षी (श. मा.)
दुःखकोद्रवा–स्त्री., मसूरिकाभेदः। किञ्चिदुष्मनिमित्तेन जायते राजिकाकृतिः। एषा भवति बालानां मुखं शुष्यति च स्वयम्।
दुःखत्रय–न., आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च इति। ' त्रिविधं दुःखम् (सु. सू. २४)
दुःखदर्शन–पु., गृध्रपक्षी (वै. नि.)
दुःखदिर–पु., विट्खदिरः (रा. व. ८.)
दुःसहा–स्त्री., नागदमनी (रा. व. ५.)
दुग्धकन्दगण–पु., दुग्धप्रधानः अश्वगन्धादिद्रव्यगणः। यथा अश्वगन्धा मुशली विदारी व शतावरी। क्षीरवातहरा
दुग्धकर्पिका–स्त्री., घृतदुग्धमिश्रिततण्डुलचूर्णकृत-पिष्टकविशेषः (भा.)
दुग्धक्षीरिका–स्त्री., दुग्धतण्डुलघृतशर्कराकृतपायसः। दुग्धाष्टमांशभागेन तण्डुलान् घृतसंस्कृतान्। शुद्धेऽर्धपक्वे दुग्धे तु क्षिप्ता सिद्धा हि क्षीरिका। पायसं शर्करायुक्तं घृतप्रक्षेपणाद्भवेत्। गुणाः—सा गुरुर्वातकृब्दल्या मलावष्टम्भका तथा। अरुचिं मेदवृद्धिञ्च कफमग्नेश्च मन्दताम्। कृत्वा च रक्तपित्तं हि वातपित्तञ्च नाशयेत् (द्रव्यगुणाः)
दुग्धताली–न., दुग्धसारः। दुग्धाग्रः। क्षीरफेनः (मे.)
दुग्धत्रय–न., गोमहिषछागदुग्धानि (र. सा. सं.)
दुग्धपाचन–त्रि., दुग्धपाककरः (न.,) दुग्धपाकपात्रम् (हारा.)
दुग्धपाषाण (क)–पु., खटिकाविशेषः (हिं–शिरगोला) गुणाः–रुच्य ईषदुष्णः ज्वरपित्तहृद्रोगकास-शूलाध्मानहरश्च (रा. व. १३)
दुग्धपाषाणिका–स्त्री., दुग्धपाषाणम् (रा. व. ३)
दुग्धपुच्छी–स्त्री., वृक्षविशेषः (श. च,)
दुग्धफेन (क)–पु., न., क्षीरफेनः (रा. व. १५) 'कृष्णगोऽश्वपयः फेनमज्जानां चेति शस्यते। मन्दाग्नीनां कृशानाञ्च विशेषादतिसारिणाम्। उत्साहः। दीपनं बल्यं मधुरं वातनाशनम्। सद्यो बलकरश्चैव तच्च क्षीरविलोडितम्। क्षीणज्वरातिसारे च सामे च विषमज्वरे। मन्दाग्नौ कफमाश्रित्य पयःफेनं प्रशस्यते। क्षीरं गवांक्षीरफेनं तक्रं वा हितमेव च। पक्वाम्रभक्षणाद्वापि ग्रहणी तस्य नश्यति। ताम्बूलं नैव सेवेत क्षीरं पीत्वा तु मानवः। यावत्तच्च द्रवेत् क्षीरं भुक्तान्ताद्वापि शस्यते (अत्रि.)
दुग्धवटी–स्त्री., शोथे वटी। विषं हिङ्गुलं धुस्तूरबीजं समभागं गृहीत्वा धुस्तूरपत्ररसेन प्रहरं मर्दयित्वा मुद्गमाना वटी कार्या (भैष.)
दुग्धसन्तनिका–स्त्री., दुग्धसरः (वै. नि.)
दुग्धाक्ष–पु., क्षीरस्फटिकः (शब्दार्थकल्पतरु.)
दुग्धा (ग्धी)–स्त्री., क्षीरिका (र. मा. भैष. क्षुद्ररो. चि.) काकोली। पलाशीलता। शारिवा (वै. नि.) दुग्धपाषाणः (रा. व. १३)
दुग्धाम्र–न., दुग्धताली, गुणाः—दुग्धाम्रंशीतलं स्वादु वृष्यं वर्णकरं गुरु। वातपित्तापहं रुच्यं बृंहणं बल-वर्धनम् (रा. व. १५)
दुग्धाश्मा–पु., दुग्धपाषाणः (रा. व. १३)
दुग्धिनि (नी) का (नी)–स्त्री., रक्तापामार्गक्षुपः (रा. व. ४) शुक्लदुग्धालाबुः (वा. उ. ३७ अ.)
दुच्छक–पु., मुरामांसी (मे.) तालीशपत्रम् (वै. नि.)
दुडि–(लि)–स्त्री., कच्छपिका (अ. टी. रा. । मे.)
दुण्डुभ–पु., सर्पभेदः। (उणा.)
दुद्रुम–पु., कन्दविशेषः। हरितपलाण्डुः। (अम.)
दुन्दुमार–पु., बिडालः। (वै. नि.)
दुम्बक–पु., स्वनामख्यातमेषः। (वै. नि.)
दुरिष्टकृत्–पु., अभिचारकर्तरि।
दुरूराह–पु., पुण्ड्रकयुक्तदुष्कुलाहाश्वः। (ज. द. ३)
दुरोह–पु., नागकेशरवृक्षः। (वै. नि.)
दुर्गकारक–पु., तरुभेदः (श. मा.)
दुर्गन्धास्य–पु., मुखरोगभेदः।
दुर्गन्धि–पु., आम्रवृक्षः। दुर्गन्धः। (न.,) सौवर्चललवणम् (वै. नि.)
दुर्गपुष्पी (इन्)–पु., वनस्पतिभेदः। केशपुष्टा इति लोके (श. च.)
दुर्गलङ्घन–पु., उष्ट्रः। (हे. च.)
दुर्गा–स्त्री., श्यामपक्षी। (रा. व. २३) कृष्णचटकः। कृष्णशारिवा। नीली (मे.) कोकिला। (वै. नि.) अपराजिता (श. च.)

दुर्गाह्व–पु., भूमिजगुग्गुलुः। (रा. व. १२)
दुर्ग्रहा–स्त्री., मुस्ता। (रा. व. २३) अपामार्गः। (भा. पू. १ भ.)
दुर्घटा–स्त्री., पृष्ठग्रन्थिः। (वै. नि.)
दुर्घोष–पु., भल्लूकः। (रा. व. १९)
दुर्जर–त्रि., दुष्पचः। (वै. नि.)
दुर्जरफल–न., कर्कटिका। (वै. नि.)
दुर्जलजेता (रस)–पु., ज्वरे रसः। (भा. म. १ भ.)
दुर्दर्प–पु., भल्लातकवृक्षः
दुर्द्रिता–स्त्री., लताभेदः।
दुर्द्रुम–स्त्री., हरित्पलाण्डुः (रा. व. ७)
दुर्नाम्नी–स्त्री., अर्शोरोगः (श. र.)
दुर्बला–स्त्री., जलशिरीषः (भा.)
दुर्भर–पु., पिप्पलवृक्षः (वै. नि.)
दुर्भरा–स्त्री., ज्योतिष्मतीलता (वै. नि.)
दुर्भिक्षा–स्त्री., काकजङ्घा (वै. नि.)
दुर्माषा–स्त्री., शुक्लगुन्जा (मद. व. २.)
दुर्मुख–पु., वानरः, घोटकः, सर्पः (त्रिका.)
दुर्मुखा–स्त्री., शुक्लगुन्जा (वै. नि.)
दुर्मोका–स्त्री., श्वेतगुञ्जा (वै. नि.)
दुर्मोहा–स्त्री., काकादनीलता (रा. व. ३.) रक्तगुञ्जा (वै. नि.)
दुर्लभ–पु., कर्चूरः (रा. व. ६ वै. नि. श्वासरोग चि. श्वासकालेश्वरे)
दुर्लभा–स्त्री., जीवन्ती (प. मु.) श्वेतकण्टका (रा.व.४.) रक्तदुरालभा (वै. नि. १२ मधुरज्वरचि मधुकादिः) शठी
दुर्वर्ण (क)–न., रौप्यम् (प. मु.) एलावालुकम् (रा. व. ४.)
दुर्विधेया–स्त्री., कर्पूरशठी (वै. नि.)
दुश्च (ष्क) र–पु., भल्लूकः (रा. व. १९) शम्बूकः (हारा.)
दुश्चर्मा–पु., त्वग्दोषरोगः ते च शीतपित्तोदर्दकोठरोगाः (रा. व. २०.)
दुष्कुलीन–पु., चोरकनामगन्धद्रव्यम् (रा. व. १२, श. र.)
दुष्खदिर–पु., अरिमेदः। गुणाः– कटुतिक्तोष्णः रक्तव्रणकण्डूविषवीसर्पज्वरकुष्ठोन्मादभूतघ्नश्च (रा. व. ८)
दुष्टान्न–न., विषादिदुष्टं अन्नम् (भा. अम्लपित्तचि.)
दुस्फोट–पु., दुष्टव्रणः। शस्त्रभेदः (हे. च.)

दू–पु., रोगः (वै. नि.)
दूतघ्नी–स्त्री., कदम्बपुष्पी (श. च.)
दूति (ती) का–स्त्री., सारिका (रा. व. १९) श्वेतकण्टका (वै. नि.)
दूती–स्त्री., रक्तपाटला। शारिकापक्षी (रा. व. १९; वै. नि.)
दूरग [म,]–पु., उष्ट्रः, गर्दभः (रा. व. १९) (वै. नि.)
दूरज–न., वैदूर्यमणिः (भा.)
दूरदर्शी (दृक्)–पु., गृध्रः (त्रिका.) पण्डितः (हे. च.)
दूरमूला–स्त्री., मुञ्जः। दुरालभा (वै. नि.)
दूरेरितेक्षण–त्रि., केकरः (श. मा.)
दूर्य–न., विष्ठा (वै. नि.)
दूर्वादिवर्ग–पु., अयं वर्गः पित्तघ्नः न्यग्रोधपद्यकादिवत् (वा. सू. १५ अ.)
दूर्वाद्यघृत–न., रक्तपित्ते घृतम् (भैष.। भा.)
दूलक–न., तूलकः (र. स. र. बाल. चि.)
दूलि (ली) का–स्त्री., नीली (श. र.)
दूष्यजल–न., विण्मूत्रादिदुष्टवारि (रा. व. १४)
दृक्–न., छिद्रम् (उणा.)
दृक्कट–पु., इस्कटः (त्रिका.)
दृक्कर्ण–पु., सर्पः (हे. च.)
दृक्प्रसाद–पु., स्त्री., कुलत्थः (रा. व. ५) कुलत्थाञ्जनम् (रा. व. १३)
दृक्श्रुति–पु., सर्पः (हला.)
दृक्सेक–पु., आश्चोतनम् (वै. नि.)
दृक्योनि–पु., ईर्ष्यकक्लीबः (निदा.)
दृक्-विष–पु., सर्पः (हे च.)
दृक्व्याधिहत–न., रक्ताञ्जनम् (वै. नि.)
दृढकण्टक-(का)–पु., खर्जूरवृक्षः (वै. नि.) अङ्कोटवृक्षः (श. च.)
दृढगर्भ–न., हीरकः (प. मु.)
दृढदंशक–पु., जलचरविशेषः (वै. नि.) (शब्दार्थकल्पतरुः)
दृढनीर–पु., नारिकेलवृक्षः (रा. ब. ११)
दृढपदी–स्त्री., वन्दाकः (रा. व. ५)
दृढपुष्पा–स्त्री., गुलुच्छकन्दः (वै. नि.)
दृढपृष्ठक–पु., कच्छपः (रा. व. १९)
दृढबन्धिनी–स्त्री., श्यामालता (श. च.)

दृढबालुक–न., एलबालुकः (रा. व. ४.) (वै. नि.)
दृढभार्गवक–न., हीरकः (रा. व. १३.)
दृढमाला–स्त्री., भूधात्री (वै. नि.) (भा.)
दृढरङ्गदा (ङ्गा)–स्त्री., स्फटिकारिका (रा. व. १३.)
दृढरजा–स्त्री., प्रौढस्त्री (वै. नि.)
दृढलोमा (न्)–पु., स्त्री., शूकरः (श. च.)
दृढवल्ल–पु.,मुञ्जतृणम् (वै. नि.)
दृढवीज–पु., बर्बूरवृक्षः । चक्रमर्दः (रा. व. ८.) नारिकेलवृक्षः । बदरवृक्षः (रा. व. ११.)
दृढवृन्त (क्ष)–पु., नारिकेलवृक्षः (वै. नि.)
दृढसूत्रिका–स्त्री., मूर्वा (श. च.)
दृढस्थिति–नारिकेलवृक्षः (रा. व. ११.)
दृढा–स्त्री., मुषली (प. मु.) भूधात्री (वै. नि.)
दृढाङ्ग–न., हीरकः (रा. व. १३.)
दृढारङ्गा–स्त्री., स्फटिकारिका (भा.)
दृढेक्षुर–पु., मुञ्जतृणम् (वै. नि.)
दृत (ता)–न., स्त्री., जीरकः (वै. नि.) (श. च.)
दृतिधारक–पु., तरुभेदः (श. च.)
दृतिहरि–पु., कुक्कुरः (व्याक.)
दृम्भू (म्फू)–स्त्री., सर्पः (मे.) वज्रः । सूर्यः (हे. चि.
दृशा–स्त्री., चक्षुः (श. च.)
दृशाकाङ्क्ष्य–न., पद्मम् (श. च.)
दृशि–(शी)–स्त्री., लोचनम् (श. च.)
दृशोपम–न., श्वेतपद्मम् (श. च)
दृश्या–स्त्री., कपिकच्छुः (वै. नि.)
दृष(द्भे)द–पु., करज्योडिपाषाणभेदः (वै. नि.) हिं.—हाथाजोडी.
दृष्टरजा–स्त्री., प्राप्तवयस्का मध्यमा स्त्री ।
दृष्टिकृत्(त)–न., स्थलपद्मम् (श. च. श. र.)
दृष्टिपूतना–स्त्री., बालानां स्त्रीग्रहविशेषः । अन्धपूतना (वा. उ. ३ अ.)
दृष्टिबन्धु–पु., खद्योतः (श. र.)
दृष्टियोनि–पु., ईर्ष्यकक्लीबः (सु.)
दृष्टिरोग–पु., नेत्ररोगः ।
दृष्टिवर्त्म–न., नेत्रवर्त्म ।
दृष्टिसन्धि–पु., नेत्रकोणः (वै. नि.)
देवकर्दम–पु., पञ्चसुगन्धिः । समभागश्रीखण्डचन्दनागुरुकर्पूरकुङ्कुमं च (रा. व. २२)
देवकुक्कुटक–पु., सुनिषण्णकशाकभेदः (वम् कुरडु) गुणाः– शीतो वृष्यः मूत्ररोगहरः अश्मरीनाशकः (वै. नि.)
देवकुतुम्बक–पु., महाद्रोणपुष्पी (वै. नि.)
देवकुम्भ(म्भा)(म्भी)–पु., स्त्री., स्वनामख्यातवृक्षविशेषः । गन्धप्रसारणी कुस्बेति कोङ्कणे (वम्–शेतवड) गुणाः– कटुः तिक्तः मेध्यः पारदशोधकः पिशाचबाधाकफघ्नः वाताग्निमान्द्यघ्नः द्रोणपुष्पीगुणश्च (वै. नि.)
हिं.—तुम्बा.
देवग्रह–पु., भूतग्रहविशेषः (निदा.)
देवचिकित्सकौ–पु., अश्विनीकुमारौ । (हला.)
देवजग्ध (क)–न., रोहिषतृणम् । कत्तृणम् (अम.)
देवट्टी–स्त्री., चिल्लपक्षिविशेषः (हारा.)
देवतरणी–स्त्री., राजतरणीपुष्पवृक्षः । (वै. नि.)
देवतरु–पु., अश्वत्थवृक्षः । चैत्यवृक्षः । (त्रिका.) विकङ्कतवृक्षः (वै. नि.) मन्दारवृक्षः । पारिजातवृक्षः । हरिचन्दनम् (अम.)
देवता–स्त्री., धुस्तूरवृक्षः (वै. नि.)
देवताकुसुम–न., लवङ्गम् । देवहुली इति ख्याते गन्धद्रव्यम् (च. द.)
देवताण्ड–पु., देवदालीवृक्षः (मद. व. १)
देवतामणि–पु., महामेदः (वै. नि.)
देवदग्ध–न., रोहिषतृणम् (श. चि.) रोहितकभेदः (वै. नि.)
देवदण्डोत्पला–स्त्री., नागबला (वै. नि.)
देवदानी–स्त्री., देवदाली, पीतघोषा । (र. मा.)
देवदीप–पु., नेत्रम् (वै. नि.)
देवद्रोणी–स्त्री., महाद्रोणपुष्पी ।
देवन (ना)ल–पु., महानलः । गुणाः– अतिमधुरः वृष्यः ईषत्कषायः रसकार्ये शस्तः नलादधिकगुणश्च (रा. व. ८)
देवपत्नी–स्त्री., रक्तालौ । मध्वालौ (त्रिका.)
देवपत्रिका–स्त्री., स्पृक्का (वै. नि.)
देवपुष्प–न., लवङ्गम् (वै. नि.)(जीर्णज्वरचि. लवङ्गादिकषाये.)
देवपुष्पी–स्त्री., वृक्षविशेषः । देवहुली इति लोके (च. द. वा. व्य. चि.)
देवभवन–न., अश्वत्थवृक्षः (श. च.)
देवमर्त्या–स्त्री., महामेदा (वै. नि.)
देवमातृका–स्त्री., वृष्टयम्बुपालितः देशः (रा. व. २)
देवमानक–पु., कौस्तुभमणिः (श. र.)
देवमास(क)–पु., गर्भाष्टमो मासः (त्रिका.)

देवमिस–., पु., अर्जुनवृक्षः (वै. नि.)
देवराजाशनाख्य–पु., संविदा (रस. र.)
देवरात–पु., सारसपक्षिभेदः (शब्दार्थकल्पः)
देवलता–स्त्री., वटपत्रवल्लिका
देववल्लभ–पु., पुन्नागवृक्षः (अम.)
देववृक्ष–पु., गुग्गुलवृक्षः (मे.) गोपघोण्टा (वै. नि.) सप्तपर्णवृक्षः (त्रिका.) मन्दारवृक्षः (मे.)
देवशालि–पु., शालिधान्यविशेषः । (वै. नि.)
देवसृष्टा–स्त्री., मदिरा (हे. च.)
देवा–स्त्री., अशनपर्णी पद्मचारिणी (श. च.)
देवात्मा–पु., अश्वत्थवृक्षः (श. च.)
देवाद्वय––न., एका सहदेवा, द्वितीया विश्वेदेवा । (वा. सू. १५ अ. विदार्यादौ)
देवानांप्रिय–पु., छागः (त्रिका.)
देवाभीष्टा–स्त्री., पूगवृक्षः (वै. नि.) ताम्बूली(श. च.)
देवावास–पु., अश्वत्थवृक्षः । चैत्यवृक्षः । (त्रिका.)
देविता–पु., धुस्तूरवृक्षः । (भा.)
देवीलता–स्त्री., अनन्तमूलम् (ज. द. १४ अ.)
देवीवीज–न., गन्धकः । (भैष. ज. चि.) (चक्रीरसे)
देव्या–स्त्री., मुरामांसी, ब्राह्मीक्षुपः । (वै. नि.)
देशसमाख्यवीज–न., इन्द्रयवः । (वै. नि.)
देशिनी–स्त्री., तर्जनी (श. र.)
देहकोष-(चर्म)–पु., त्वग् (वै. नि.) पक्षः । (श. च.)
देहक्षय–पु., रोगः (श. च.)
देहत्वक्–स्त्री., चर्म (वै. नि.)
देहदुर्गन्धता–स्त्री., शरीरदौर्गन्ध्यम् । तन्नाशकमौषधं यथा–अर्जुनपुष्पं जम्बूपत्रं लोध्रञ्चेति समभागं लिम्पेत् (पुराणम्)
देहधारक–न., अस्थि । (हे. च.) आहारम् (वै. नि.)
देहधि–पु., पक्षः । (श. च.)
देहधृक्–पु., वायुः । (वै. नि.)
देहभृत्–पु., जीवः । प्राणी (वै. नि.)
देहयात्रा–स्त्री., मृत्युः । अन्तम् । भोजनम् । (त्रिका.)
देहला–स्त्री., सुरा । (वै. नि.)
देहवल्कल–न., वसा । (रा. व. १८)
देहसार–पु., मज्जा । (रा. व. १८)
देहिका–स्त्री., उपजिह्विकाकीटः (त्रिका.)
दैत्य–पु., लौहम्।
दैत्यग्रह–पु., असुरग्रहः (वा. उ. उन्मादचि.)
दैत्यमेदज–पु., भूमिजगुग्गुलुः माहिषाक्षगुग्गुलुः (रा. व. १२.)

दैत्यरक्तक–न., हिङ्गुलम् (र. सा. सं.)
दैत्येन्द्र–पु., गन्धकम् (भैष. पञ्चाननरसे)
दैत्येन्द्ररक्त–न., हिङ्गुलम् (सा. कौ. त्रिदोषनीहाररसे)
दैवाच्छिद्र–न., कर्मच्छिद्रम् (वा. उ. १४ अ.)
दैवदारु–न., देवदारुः (र. मा.)
दैवदीप–पु., लोचनम् (त्रिका.)
दैवी–स्त्री., बलिपूजादिरूपे चिकित्साविशेषः, यथा –'आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता।' (वैद्यकम्)
दैवोदासि–पु., दिवोदासापत्यम् (श. चि.)
दो–पु., बाहुः (रा. व. १८)
दो (शिखर)–पु., स्कन्धम् (रा. व. १८)
दोण्डिका (ण्डि)–स्त्री., तरदीलता कोषातकी (वै. नि.)
दोध–पु., गोवत्सः । (छन्दःशास्त्रम्)
दोर्गडु–त्रि., बाहुकुण्ठः (त्रि. का .)
दोर्दण्ड–पु., बाहुः (भूरिप्र.)
दोर्मध्य–न., बाहुमध्यभागः (शब्दार्थकल्पः)
दोर्मूल–न., बाहुमूलम् (वै., नि.)
दोला(लिका)–स्त्री., नीलीवृक्षः (वै. नि.) क्रीडार्थं काष्ठादिमयः हिन्दोलकः । तत् भ्रमणगुणाः— वातकोपनत्वं अङ्गस्थैर्यबलाग्निकारित्वञ्च (रा. ज.)
दोलायन्त्र–न., रसस्वेदनार्थं यन्त्रविशेषम् (भा.)
दोषज्ञ–पु., वैद्यः । चिकित्सकः (हे. च.) (त्रि.) दोषवेत्ता
दोषत्र (त्रित) य–न., मिलितवातपित्तकफः (रा. व. २२)
दोषशमबस्ति–पु., निरूहबस्तिभेदः । यथा–'प्रियङ्गुः मधुकं मुस्ता तथैव च रसाञ्जनम् । सक्षीरं शस्यते बस्तिः दोषाणां शमनः परम् ' (भा.)
दोहरबस्ति–पु., तन्नामकनिरूहबस्तिः । 'शताह्वा मधुकं बिल्वं कौटजं फलमेव च । सकाञ्जिकः सगोमूत्रो बस्तिर्दोषहरः स्मृतः ' (भा.)
दोषा–स्त्री,, बाहुः (रा. व. १८)
दोषा (षो) त्क्लेशी–स्त्री., वनबर्बरिका (रा. व. १०)
दोषातिलक–पु., दीपः (त्रिका.)
दोषान्ध–पु., दृष्टिरोगभेदः (वा. उ. १२ अ)
दोषिक–पु., रोगः (श. च.)
दोह–पु., दोहनम् । दोहनपात्रम् । दुग्धम् (वै. नि.)
दोहज–न., दुग्धम् [शब्दार्थकल्पतरुः]
दोहदलक्षण–न., गर्भधारणम् । गर्भः वयःसन्धिः (मे.)
दोहदवती–स्त्री., गर्भवती स्त्री (हे. च.)

दोहनी-स्त्री., धातकीवृक्षः (वै. नि.) दोहनभाण्डम् (त्रिका.)
दोहलवती-स्त्री., दोहदवती (शब्दार्थकल्पतरुः)
दोहली-स्त्री., अशोकवृक्षः (रा. व. १०)
दोहापनय (पयन)-पु., न., गव्यदुग्धम् (त्रिका. । वै. नि.)
दौग्धिक-न., दुग्धिकामूलम् (वा. उ. ३७ अ.)
दौण्डिका-स्त्री., कोषातकी (वै. नि.)
दौर्वीण-न., इष्टपर्णम् । दूर्वारसः (मे.)
दौलेय-पु., कच्छपः (हे. च.)
दौष्कुलेय-न., ग्रन्थिपर्णमूलम् (वै. नि.)
द्युक-पु., पेचकः (वै. नि.)
द्युकारि-पु., काकः (वै. नि.)
द्युग-पु., पक्षी (रा. व. १९)
द्युतरु-पु., कल्पतरुः (वै. नि.)
द्यु(ति)मणि-पु., अर्कवृक्षः (अम. र. सा. सं. विद्याधररसे) मारितताम्रम् (भा. म. १ भ. ज्वरचि. त्रिपुरभैरवरसे.)
द्युतबीज-न., कपर्दकः (त्रिका.)
द्युम्न-न., बलम् (मे.)
द्योतन-न., दर्शनम् (हे. च.)
द्योत्र-न., बीजम् (उणा.)
द्योभूमि-पु., पक्षी (श. च.)
द्र(द्रा)प्स(प्स्य)-न., तरलदधि (अम. अ. टी. भ.)
द्रवज-पु., शर्करा (रा. व. १४)
द्रवत्पत्री-स्त्री., शिमृडीवृक्षः (रा. व. ४)
द्रवशूल-पु., अन्नद्रवशूलम् ।
द्रवा-स्त्री., मेदा (रा. व. ५)
द्रविण-न., सुवर्णम् । रत्नम्, बलम् (अम. मे.)
द्रविणनाशन-न., शिग्रुवृक्षः (श. र.)
द्रवीकरण-न., तरलतापादनम् ।
द्रव्यकल्क-पु., दृषदि पेषितद्रव्यम् ।
द्रव्यगुणाकर-पु., स्त्री., **द्रव्यरत्नावली** ,, ,, } द्रव्यसंग्रहविशेषः ।
द्रव्यसंग्रह-पु., करचरणहरीतक्यादिद्रव्यसंक्षेपः (च. सू. १ अ.)
द्रव्याभिधान-न., औषधादीनां नामसंग्रहः ।
द्राक्षाफल-पु., पियालवृक्षः (वै. नि.)
द्राक्षायणी-स्त्री., दन्तीवृक्षः (प. मु.)
द्राक्षारिष्ट-पु., यक्ष्माधिकारे अरिष्टविशेषः (भैष.)
द्राक्षासम्भूत-पु., द्राक्षासवः (वै. नि.)
द्राक्षासुरा-स्त्री., द्राक्षाकृतमद्यम् (चसू. २७ अ.)
द्राक्षोत्था-स्त्री., द्राक्षासवः (वै. नि.)
द्राण-त्रि., सुप्तः ।
द्राघिष्ठास्य-पु., भल्लुकः (रा. व. १९)
द्राप-पु., पङ्कः । (शब्दार्थकल्पः)
द्रावकर-न., श्वेतटङ्कणम् (रा. व. ६)
द्रावकवर्ग-पु., द्रवकरद्रव्यपञ्चकम् । गुञ्जाटङ्कणमध्वाज्यगुडा द्रावकपञ्चकाः (र. सा. सं.)
द्रावण (फल)-न., कतकफलम् (र. मा.)
द्राविका-स्त्री., लाला (श. र.)
द्राविडभूतिक-(मिज)-पु., आमहरिद्रा (श. र.)
द्राविडोद्भव-पु., सुगन्धतृणम् । सुगन्धप्रियङ्गुः । **(वा)**-स्त्री., एला (वै. नि.)
द्राविण-पु., टङ्कणम् (र. सा. सं.)
द्राविणी-स्त्री., काकजङ्घा । काकमाची (वै. नि.)
द्रु-स्त्री., स्वर्णम् (वै. नि.)
द्रुक-(का)-पु., (स्त्री.) निम्बवृक्षः (हिं.-बकाणनिम्ब) (भा. म. ४ भ. महाभल्लातके) ओकडा इति ख्यातः क्षुपः (च. द. दार्व्यादिकषाये) सरलाद्रेका स्मृता यासकैः ।
द्रुकिलिम-न., देवदारुः (प. मु.)
द्रु (द्रू)घन-पु., भूमिचम्पकवृक्षः (श. च.)
द्रु (द्रू)ण-पु., भ्रमरम् । वृश्चिकः धूम्याटपक्षी (हे. च.) मधुमक्षिका (वै. नि.)
द्रुणी-स्त्री., कर्णजलायुका । कच्छपिका (अम. भ.)
द्रुतमांस-न., शशादिहरणादयः स्वयं द्रुतगमनात् द्रुतसंज्ञकाः स्मृताः । तेषां मांसे गुणाः ' पथ्यं लघु बल्यं वीर्यकारि च (रा. व. १७)
द्रुनख-पु., कण्टकम् (त्रिका.)
द्रुमकिल-पु., देवदारुवृक्षः (वै. नि.)
द्रुमग-पु., स्वल्पजलदेशः (वै. नि.)
द्रुमत्वक्-स्त्री., कुटजवल्कलम् (च. द. कुष्ठ. चि.)
द्रुमध्वज-पु., तालवृक्षः (वै. नि.)
द्रुमनख-पु., कण्टकम् (हारा.) पारिजातवृक्षः (मे.)
द्रुमनिर्यास-पु., तरुनिर्यूहः (वै. नि.)
द्रुमर-पु., कण्टकम् (हारा.)
द्रुमशय-पु., वानरः (वै. नि.)
द्रुमश्रेष्ठ-पु., तालवृक्षः (वै. नि.)
द्रुमामय-पु., लाक्षा (प. मु.)

द्रुमारि–पु., हस्ती (वै. नि.)
द्रुमाशय–पु., सरटः (रा. व. १९.)
द्रुमोत्पल–पु., कर्णिकारवृक्षः (अम.) ऋतुशूले हितः ।
द्रुयव–न., परिमाणम् (वै. नि.)
द्रुसल्लक–पु., पियालवृक्षः (श. र.)
द्रोणकाक–पु., तन्नामककाकः (अम.)
द्रोणकुटुम्बका–स्त्री., देवकुम्भा देवद्रोणी (वै. नि.)
द्रोणगन्धिका–स्त्री., रास्ना (जटा.)
द्रोणपर्णी–स्त्री., द्रोणपुष्पी ।
द्रोणपुष्पिका–स्त्री., द्रोणपुष्पी ((वै. नि.)
द्रोणपुष्पी–स्त्री., घलघसा हलकषा दण्डकलस इति ख्यातः क्षेत्रजह्लस्वक्षुपः । द्रोणपुष्पीति भाषा (र. मा.) (म. कुंबा) (हिं-गुम्मा) गुणाः– कटूष्णा रुच्या वातकफघ्नी अग्निमान्द्यकरी पथ्या च । (रा. व. ५ । च. द. सि. यो. काम. चि. अञ्जने) 'अञ्जनं कामलार्तानां द्रोणपुष्पीरसः शुभः । द्रोणपुष्पीरसोऽप्येवं निहन्ति विषमज्वरम् (शार्ङ्ग. म. ख. १ अ.) कफार्शःकामलाकृमिशोषघ्नी (राज.) द्रोणपुष्पी गुरुः स्वादुपाका कट्वी भेदनी कफामकामलाशोथतमकश्वासकृमिघ्नी च (भा.)
द्रोणपुष्पीदल–न., द्रोणपुष्पीपत्रम् । गुणाः–स्वादु रुच्यं गुरु पित्तकरं भेदनं कामलाशोथमेहज्वरहरम् । कटु च (भा. पू. १ भ. शा. वर्ग.)
द्रोणा–स्त्री., द्रोणपुष्पी (भा. वा. उ.) (१६ अ.) इन्दीवरालता (वै. नि.)
द्रोणिका–स्त्री., नीली (श. र.)
द्रोणिनी–स्त्री., उत्तरिणी (वै. नि.)
द्रोणीदल–पु., केतकीपुष्पवृक्षः (हारा.)
द्रोणील–पु., केतकवृक्षः (वै. नि.)
द्वन्द्वग–पु., चक्रवाकः (वै. नि.)
द्वन्द्वगद–पु., द्वन्द्वजरोगः ।
द्वन्द्वचर (चारी)–पु., चक्रवाकपक्षी (हे. च. । त्रिका.)
द्वन्द्वचरीसहाय–पु., चक्रवाकपक्षी (वै. नि.)
द्वन्द्वजदोषोत्थ–पु., विषमज्वरः (रा. व. २० । द्विदोषरोगः (त्रि.,) द्विदोषोत्थः (मा. ज्व. नि.)
द्व्याग्नि–पु., चित्रकवृक्षः (श. च.)
द्वादशपत्रिका–स्त्री., शताह्वाख्यक्षुपः ।
द्वादशाङ्गक्वाथ–पु., सन्निपातज्वरे कषायः । दशमूलीकषायस्तु पिप्पली पौष्करान्वितः सन्निपातज्वरे देयः श्वासकाससमन्विते (भा. म. ११.)

द्वादशाङ्गुल–पु., वितस्ती (अम.)
द्वादशात्मा–पु., सूर्यः । अर्कवृक्षः (अम.)
द्वादशायसक–पु., ऊरुस्तम्भाधिकारे रसः । त्रिनेत्राख्यरस एव (रस. र.)
द्वादशायु–पु., कुक्कुरः (श. मा.)
द्वार–न.,उपायः । निर्गमम् (त्रिका.)
द्वारका–स्त्री., कार्पासी (वै. नि.)
द्वारदारु–पु., शाकवृक्षः (वै. नि) भूमीसहवृक्षः (भा.)
द्वारबलिभुक्–पु., काकविशेषः (त्रिका.)
द्विक–पु., काकः (त्रिका.) चक्रवाकः (मे.)
द्विककार–पु., काकः (श. र.)
द्विकपृष्ठ–पु., उष्ट्रः (हे. च.)
द्विकाकोली–स्त्री., काकोलीक्षीरकाकोली च (वा. ऊ. २ अ.)
द्विक्षीर–न., गव्याजदुग्धे (च. द. यक्ष्म चि. सांर्पिगुडे)
द्विखुरी (इन्)–पु., गोखुरवत् द्विधाविभक्त खुराश्वाश्वः । 'द्विखुरं गोखुराकाराङ्कुरैर्विद्याद्विचक्षणः । अथवा सीवनीयुक्तैर्निम्नमध्यैस्तु निर्दिशेत्' (ज. द. ३ अ.)
द्विचित्रक–न., श्वेतरक्तचित्रकौ । (सि. यो. अग्निमान्द्यचि.)
द्विजकेतु–पु., जम्बीरविशेषः । (वै. नि.)
द्विजन्मा–(मन्)–पु., पक्षी-दन्तः । (श. र.) आर्द्रधान्यम् । मौक्तिकम् । अण्डजः । (वै. नि.)
द्विजभक्त–(त्रि.) वैद्ये भक्तिमान् रोगी (वै. नि.)
द्विजयष्टि–(ष्टिका) स्त्री., भार्गी (वै. नि. २ भ. वा. व्या. चि.)
द्विजशत–पु., राजमाषः । (श. च.)
द्विजस्नेह–पु., पलाशवृक्षः । (वै. नि.)
द्विजाङ्गिका (ङ्गी)–स्त्री., कटुकी । (रा. व. ६)
द्विजाति–पु., दन्तः । अण्डजः । पक्षी । (मे.)
द्विजायनी–स्त्री., यज्ञोपवीतम् (त्रिका.)
द्विजालय–पु., तरुकोटरः । (श. च.)
द्विजिह्व–पु., सर्पः (अम.) अधिजिह्वनामकः कण्ठरोगः । (सु. नि. १६ अ.)
द्विजेन्द्रक–पु., निम्बूवृक्षः । (वै. नि.)
द्वितीयत्रिफला–स्त्री., द्राक्षाखर्जूरगाम्भारीफलानि (वै. नि.)
द्वितीयाभा–स्त्री., वृक्षविशेषः । दारुहरिद्रा (श. च.)

द्विधागति-पु., शिशुमारः । (वै. नि.) कुम्भीरः । (हे. च.)

द्विधातु-त्रि., द्विप्रकृतिकः ।

द्विधात्मक-न., जातीफलम् (वै. नि.)

द्विधालेख्य-पु., हिन्तालवृक्षः (रा. व. ९)

द्विप-पु., हस्ती (प. मु.) नागकेशरवृक्षः (वै. नि.)

द्विपत्रक-पु., चण्डालकन्दः (वै. नि.)

द्विपद-पु., मनुष्यः । पक्षी (प्रश्नसारः)

द्विपबला-स्त्री., नागबला (वै. नि. वा. व्या. चि. शतावरी तैले.)

द्विपमद-पु., करिमदजलम् ।

द्विपर्णी-स्त्री., शालपर्णी पृश्निपर्णी चेति (च. द. ग्रह चि.)

द्विपाख्य-पु., नागकेशरवृक्षः (प. मु.)

द्विपादिक-पु., नागकेशरवृक्षः (प. मु.)

द्विपायी(इन्)-पु., करी (हारा.)

द्विपिनख-पु., व्याघ्रनखम् (रा. व. १२)

द्विपी(इन्)-पु., चित्रकभेदः (च. वि. ८ अ)

द्विपुट-पु., पुष्पक्षुपविशेषः (श. चि.)

द्विपुटी-स्त्री., मल्लिका (मे.)

द्विपुनर्नव-न., शुक्ललोहितलताभेदेन पुनर्नवाद्वयम् (सि. यो. कामला. चि. व्योषाद्यघृते) 'त्रिफला द्विपुनर्नवम्'।

द्विब्राह्मी-स्त्री., ह्रस्वदीर्घब्राह्मीद्वयम् (सु. शा. १० अ.)

द्विमाष-न., मुद्गपर्णी माषपर्णी च । (च. द. उन्माद चि. महाकल्याणकघृते)

द्विमुखा-स्त्री., झारिका । जलौका (हला.)

द्विमुखोरग-पु., द्विमुखसर्पः (जटा.)

द्विरजनी-स्त्री., हरिद्रा । दारुहरिद्रा ।
सि. यो. कामला. चि. व्योषाद्यघृते.)

द्विरदपिप्पली-स्त्री., गजपिप्पली
(वै. नि. २ भ. वा. व्या. चि. द्वात्रिंशक गुग्गुलौ.)

द्विरदान्त-(क)-पु., सिंहः (रा. व १९)

द्विरदाराति-पु., शरभः (वै. नि.)

द्विरदाशन-पु., अश्वत्थवृक्षः (वै. नि.)

द्विरसन-पु., सर्पः (त्रिका.)

द्विराप-पु., हस्ती (श मा.)

द्विरेता-पु., गर्दभः (वै. नि.) स्त्रीपुंचिह्नाङ्गनपुंसकः (च.शा. २ अ.)

द्विलग्नक-पु., दुश्चर्म (हें. च.)

द्विवर्षा (र्षिका)-स्त्री., द्विहायनी गौः (अम. । हे. च.)

द्विविष-न., पाण्डुकृष्णातिविषाः (वै.नि.२भ.वा.व्या.चि.)

द्विवृन्त-पु., नखरञ्जकक्षुपः (प. मु.)

द्विशृङ्गिका-स्त्री., मेषशृङ्गी (वै. नि.)

द्वीशृङ्गी (इन्)-पु., मत्स्यविशेषः

द्विषा-स्त्री., एला

द्विस्विन्नान्न-न., सिद्धतण्डुलः (पुराणम्)

द्वीपसम्भव-पु., कक्कोलवृक्षः । जीरकः । (**वा**)-स्त्री.) महाखर्जूरवृक्षः ।

द्वीपान्तरवचा-स्त्री., तोपचिनीति ख्यातं मूलम् । गुणाः-'द्वीपान्तरवचा किञ्चित्तिक्तोष्णा वह्निदीप्ति-विबन्धाध्मानशूलघ्नी शकृन्मूत्रविशोधिनी । वात-व्याधीनपस्मारमुन्मादं तनुवेदनाम् । व्यपोहति विशेषेण फिरङ्गामयनाशिनी (भा.)

द्वीपिनी-स्त्री., वटपत्रपाषाणभेदः (वै. नि.)

द्वीपिपलाश-पु., हस्तिकर्णपलाशः (वा. सु. १५ अ; मुष्ककादि)

द्वीप्य-पु., काकः न., कक्कोलः (वै.नि.)

द्वीप्या-स्त्री., शतावरी (रा. व. ४) पिण्डीखर्जूरवृक्षः (रा. व. ११)

द्वेष्य-न., कक्कोलः (रा. व. १२)

द्वैमातृक-पु., नदीवृष्ट्यम्बुपालितः देशः (रा. व २)

द्वैषणीया-स्त्री., नागवल्लीविशेष होसयले हलेय इति घोरसमुद्रदेशे ख्याता । द्वेसनीया इति पुस्तकान्तरे पाठः (रा व ११)

द्व्यन्तर-पु., जातिद्वयसम्भूतः सर्पः (सु. कल्प. टी.)

द्व्यष्ट-न., ताम्रम् (अम.)

द्व्यहिक (हीन)-पु., एकदिनान्तरज्वरः (मा. नि)

ध

धट-(क)-पु., धववृक्षः (वै. नि.) तुलामानम् (अम.) १४ वल्लमाना (लीलावती)

धटी-स्त्री., वल्कलम् (वै. नि.) जीर्णवस्त्रखण्डम्

धन-पु., न., मरिचः । अर्थः (वै.नि.) स्नेहपात्रम् (श.र.)

धनक-न., धान्यकम् (वै. नि. २ भ. सर्वज्वरचि. गुडूच्यादि.)

धनच्छ(च्छू)-पु., स्त्री., पक्षिविशेषः (त्रिका.)

धनद-पु., हिज्जलवृक्षः (रापरि. ८.७ पृ. ३६३) (पाठान्तरात्)

धनदाक्षी-स्त्री., पाटलवृक्षः (रा. व. १०) लताकरञ्जः (रा. व. ८.४ पृ. ३५८)

धनपिशाची(चिका)-स्त्री., तृष्णा (त्रिका. हारा.)

धनसू-पु., धूम्याटपक्षी (वै. नि.)
धनस्य(स्व)(क)-पु., गोक्षुरकवृक्षः (श. च.)
धनहर-पु., ग्रन्थिपर्णवृक्षः, पारसीकयमानी (वै. नि.)
धनह(हा)री-स्त्री., पारसीकयमानी । ग्रन्थिपर्णभेदः (अम.)
धनहृत्-पु., चण्डालकन्दः (वै. नि.)
धना (नी)-स्त्री., आर्द्रधान्यकः (वै. नि.) धान्यकः (वै. नि. २ भ. व्या. चि. षडशीतिगुग्गुलौ अत्रि २ स्थान २ अ)
धनीयक-न., आर्द्रधान्यकः । धान्यकः (श. र.)
धनु (प)(ष्प) ट-पु., प्रियालवृक्षः (रा. व. ११ अम.)
धनुःशाखा-स्त्री., मूर्वा (श. च.)
धनुश्श्रेणी-स्त्री., मूर्वा (प. मु.) महेन्द्रवारुणी (रा. व ३)
धनुर्गुणा-स्त्री., मूर्वा (श. च.)
धनुर्माला-स्त्री., मूर्वा (श. च.)
धनुर्यास-पु., दुरालभा (प. मु.)
धनुर्वीज-पु., भल्लातकवृक्षः (रा. व. ११)
धनुर्वृक्ष-पु., धमन्यवृक्षः (र. मा.)(रा. व. ९) वंशः । भल्लातकवृक्षः । अश्वत्थवृक्षः (रा. व. ११)
धनुष-पु., कुक्कुरः (वै. नि.)
धनेयक-न., धन्याकः (अ. टी. भ.)
धन्यवृक्ष-पु., अश्वत्थवृक्षः (वै. नि.)
धन्याक-न., स्वनामख्यातपण्यद्रव्यम् (प. मु.)(हिं—धनिया) गुणाः—तुवरं स्निग्धम् अवृष्यं मूत्रलं लघुतिक्तं कटूष्णवीर्यं दीपनं पाचनं ज्वरघ्नं रोचकं ग्राहि स्वादुपाकं त्रिदोषघ्नं तृष्णादाहवमिश्वासकास-कार्श्यकृमिघ्नञ्च । आर्द्रं तत् गुणसंपन्नं स्वादु विशेषतः पित्तघ्नञ्च(भा. पू. १ भ.)(मद. व. २)
धन्वक-पु., धामनवृक्षः । (च. द. मेह. चि.)
धन्वङ्ग-पु., धामनवृक्षः । गुणाः—धन्वङ्गः कफपित्तास्र-कासहृत्तुवरो लघुः बृंहणो बलकृद्रूक्षः सन्धिकृद्व्रण रोपणः (भा. म. २ भ. प्रमेह. चि.) वंशः (वै. नि.)
धन्वचारी-त्रि., निर्जलदेशचारी (वा. चि. ७ अ.)
धन्वतरु-पु., सोमवल्ली (वै. नि.)
धन्वदुर्ग-न., निर्जलदेशः (पुराणम्)
धन्वन्तरिग्रस्ता-स्त्री., कटुकी (श. च.)
धन्वन्तरिपञ्चक-न., धन्वन्तरिकृतग्रन्थविशेषः ।
धन्वमांस-न., निर्जलदेशपशुमांसम् (वा. चि. अ. १३ अ.)

धन्वा (न)-पु., मरुभूमिः (रा. व. २.)(च. चि. १अ)
धन्वामिष-न., जाङ्गलपशुमांसम् ।
धन्वी (इन्)-पु., दुरालभा (रा. व. ४.) अर्जुनवृक्षः (रा. व. ९.) बकुलवृक्षः (रा. व. १०.)
धमि-स्त्री,, अन्त्रम् । धमनी (हारा.)
धयन-न., पानम् (रा. व. २०.)
धर-पु., कार्पासतूलकः (मे.)
धरणीधर-पु., पर्वतः । कच्छपः (रा. व. १९.)
धरणीबन्ध-पु., अरिष्टबन्धनम् (च. द. विषचि.)
धराकदम्ब (क)-पु., कदम्बवृक्षः (हारा.)
धराङ्कुर-पु., भूच्छत्राक (वै. नि.)
धराजकूष्माण्ड-पु., भूमिकूष्माण्डः (चि. क. क. स्त्री-रोग. चि.)
धरिमा (न्)-पु., तुला । आकरः (वै. नि.)
धरुण-पु., जलम् (मे.)
धर्तूर-पु., शुक्लधुस्तूरः (वै. नि.)
धर्मघ्न-पु., बिभीतकवृक्षः (वै. नि.)
धर्मण-पु.. धमन्यवृक्षः (र. मा.) सर्पभेदः (मे.)
धर्मद्वेषी(इन्)-पु., बिभीतकवृक्षः (वै. नि.)
धर्मपात्र-पु.,न., उदुम्बरवृक्षः (श. च.)
धर्मसू-पु., धूम्याटपक्षी (श. र.)
धर्ष-(र्षित)-पु.,न., मैथुनम् (त्रिका.)
धलण्ड-(क)-पु.. स्वनामख्यातवृक्षः (श. च.)
धवनी-स्त्री., पृश्निपर्णी (वै. नि.)
धवलपक्ष-(क्षी)(दून्)-पु., हंसः (रा. व. १९ ४७५ पृ. २७८)
धवलपाटली-स्त्री., शुक्लपाटली (रा. व. १० पृ. ३६९)
धवलमृत्तिका-स्त्री., खटिका (रा. व. १३. १४ पृ. ३७६)
धवलशारिवा-स्त्री., शुक्लशारिवा (वै. नि.)
धवली-स्त्री., शुक्लगौः (अम.)
धवित्र-न., मृगचर्मनिर्मितव्यजनम् (अम.)
धाक-पु., वृषः (न.,) अन्नम् (उणा.)
धातक्यादिचूर्ण-न., बालरोगाधिकारे औषधम् । ' धातकी बिल्वधन्याकलोध्रेन्द्रयव वालकम् । लेहः क्षौद्रेण बालानां ज्वरातीसारवान्तिजित् । ' (सा.कौ.)
धाता-पु., त्वष्टा । शरीरादिसंयोगस्य धारणहेतुः (सु. शा. ३ अ.)
धातुकी-स्त्री., धातकीवृक्षः (वै. नि.)
धातुक्षयकास-पु. धातुक्षयकरकासरोगः (निदाने)
धातुग्राही-(इन्)-पु., खर्परः (वै. नि.)

धातुघ्न-न., काञ्जिकम् (हे. च.)
धातुचेतनक-र-(न.) दुग्धम्। आमलकः द्विदलम् (वै.नि.)
धातुद्रावक-न., टङ्कणक्षारः (वै. नि.)
धातुनाशन-न., काञ्जिकः (त्रिका.)
धातुप-पु., शुक्रम् । रसः (श. च.)
धातुपाक-पु., रसादिधातुह्रासः, तल्लक्षणम्—"निद्रानाशो हृदि स्तम्भो विष्टम्भो गौरवारुची। अरतिर्बलहानिश्च धातूनां पाकलक्षणम् । (वैद्यकम्)
धातुपुष्पिका-(ष्पी)-स्त्री., धातकीवृक्षः (प. मु. भा.)
धातुमल-पु., शीषकः । रसादिमलः । 'मलिनीकरणान्मलः (वैद्यकम्) 'कफः पित्तं मलः खेषु प्रस्वेदो नखलोम च। नेत्रविट्ट् त्वक्षु च स्नेहो धातूनां क्रमशो मलः (भा.)
धातुमारिणी-स्त्री., टङ्कणक्षारः (श. च.)
धातुमारी (इन्)-पु., गन्धकः (वै. नि.)
धातुराज-क-पु., न., वीर्यम् (वै. नि.) (श. च.)
धातुवादी (इन्)-पु., खनिजविद्याभिज्ञः ।
धातुविट्-स्त्री., शीषकम् (वै. नि.)
धातुवृद्धि-स्त्री., रसादिवृद्धिः रसादिधातुसाम्यम् (च. सू. १३ अ.)
धातुवृद्धिकर-पु., धातुवर्धकद्रव्यम्। अश्वगन्धामुषलीशतावरी च ।
धातुवैरी (इन्)-पु., गन्धकः (श. च.)
धातुशेखर-न., धातुकाशीषम् (हे. च.)
धातुशोधन-न., शीषकम् (वै. नि.)
धातुशोधनकरी-स्त्री., हरीतकी (वै. नि.)
धातुसम्भव-न., शीषकम् (वै. नि.)
धातुस्तम्भनकर-न., जातिफलम् (वै. नि.)
धातुहा (न)-पु., गन्धकः (वै. नि.)
धातूपल-पु., खडिकादयः (वै. नि.)
धात्रीलौह-न., शूलाधिकारे (सा. कौ.) पाण्डौ हितम् । वाजीकरणे हितम् (रस. र.) अन्यः पित्तरोगे हितम् (रसा. सं.)
धात्रीषट्पलकघृत-न., गुल्मे घृतम् (रस. र. । भैष.)
धात्रेयि (यी) का-स्त्री., आमलकी (रा. व. ११.३२६ पृ. ५१) उपमाता
धात्र्यादि-पु., चातुर्थिकज्वरघ्ने धात्रीमुस्तामृतक्षौद्रकृतः कषाय (वा. चि. १ अ.)
धानाका-स्त्री., धान्यकः (वा. सू. १५ अ.)
धानाचूर्ण-न., भृष्टयवादिचूर्णम् (हे. च.)
धानिका-स्त्री., धान्यकः (वै. नि. अतिसारचि. यवान्यादौ)
धानुष्का-स्त्री., अपामार्गवृक्षः (श. च)
धान्धा-स्त्री., एला (श. च)
धान्यकञ्चुकी (इन्)-पु., धान्यत्वक्गुणाः-धान्यगुणयुक्तः (रा. व १६)
धान्यकतण्डुल-पु., कण्डितधान्यकतण्डुलः (भा. म. १ भ. अन्तकज्वरचि. धान्यकक्वाथे)
धान्यकल्क-पु., तुषः ।
धान्यचतुष्क-न., अतिसारे धान्यमुस्तकबालकबिल्वकषायविशेषः । (वैद्यकसं.)
धान्यचमस-पु., चिपीटकः (त्रिका.)
धान्यतुषोद-न., धान्यतुषकृतसन्धानविशेषम् । एतदभावे काञ्जिकम् (सि. यो. अजीर्णचि.)
धान्यतैल-न.,गोधूमयावनालव्रीहियवादिजतैलम्। गुणाः—त्रिदोषशमनं कण्डूकुष्ठादिहरं चक्षुष्यञ्च (रा. व. १५.५ पृ. ३८६)
धान्यपञ्चक-न., आमशूलादौ कषायः। 'धान्यकं नागरं मुस्तं वालकं बिल्वमेव वा। आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् (वैद्यकसं.)
धान्यपटोल-पु., न., पित्तश्लेष्मज्वरे योगविशेषः । (सि. यो. ज्वरचि.)
धान्यपानक-न., धान्यकृतपानकविशेषम्। तस्य साधनविधिः—शिलायां साधु सम्पिष्टं धान्यकं वस्त्रगालितं। शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम्। नूतने मृण्मये पात्रे स्थितं पित्तहरं परम् (भा.)
धान्यपिप्पली-स्त्री., आमज्वरे। ज्वरे दीपनी पाचनी च (यो. रत्ना.)
धान्यमण्ड-पु., न., धान्यकृतमण्डः । गुणाः—धान्यमण्डं पित्तहरं श्रमघ्नञ्चाश्मरीहरं। वातलं रक्तशमनं ग्राहि सन्दीपनं परम्। (अत्रि. १२ अ)
धान्यमद्य-न., धान्यकृतमद्यम्। गुणाः—गुरु विष्टम्भि च (राव. १४.३०१-३०५; पृ. २५४)
धान्यवीज-न., धन्याकः (रा. व. ६)
धान्यशाक-न., धान्यकशाकम् । (र. चि.) (९ अ.)
धान्यशीर्षक-न., धान्यकणिशः । (जटा.)
धान्याक-न., धान्यकः । (मद. २ व. वै. नि. २ भ. छर्दिचि.)
धान्याग्र-न., धान्यकणिशः ।

धान्याम्बव-न., मधुजम्बीरसन्धानविशेषः। मधुभाण्डं जम्बीररसैरापूर्य धान्यराशौ मासं स्थापयेत (वै. नि.)
धान्यारि-पु., वनमूषकः। (रा. व. १९-५८ पृ. २७४)
धाम(न्)-न., शरीरम् (अम.) जन्म
धामनी-स्त्री., शोणितवाहिशिरा (श. च.)
धाराङ्कुर-पु., लघुवृष्टिः। शीकरः। घनोपलम् (मे.)
धाराट-पु., चातकविहङ्गः। घोटकः। (श. र.)
धारायन्त्र-न., वारिसेचनयन्त्रम्। सुगन्धवारिरक्षणपात्रम् (अत्रि.)
धारासत्त्व-न., गुडूचीस्वरसः। (वै. नि.) (२ भ क्षयचि. सेवन्तीपाके)
धारास्नुही-स्त्री., त्रिधारस्नुही (रा. व. ८-३५८ पृ. ५६)
धारिणी-स्त्री., शाल्मलीवृक्षः। (श. च.)
धारी (इन्)-पु., पीलुवृक्षः। (जटा.)
धारु-त्रि., स्तन्यपायी। (जटा.)
धार्तराष्ट्रपदी-स्त्री., हंसपादीलता। रक्तलज्जालुका (वै. नि.) (रा. व. ५-१६८ पृ. १५६)
धावनिका-स्त्री., कण्टकारी (प. मु.) (वै. नि. २ भ. भुग्ननेत्रसन्निपातज्वरचि.)
धीति-स्त्री., पिपासा (हे. च.)
धीन्द्रिय-न., ज्ञानेन्द्रियम्। तच्च मनः नेत्रं श्रोत्रं त्वक् रसना घ्राणञ्चेति षट् (अम.)
धीमोदिनी-स्त्री., मद्यम् (रा. व. १४.)
धीरस्कन्ध-पु., वनशूकरः (वै. नि.) महिषः (हे. च)
धीरावी-स्त्री., पीतशिंशपा (वै. नि.)
धीवरी-स्त्री., शतमूली (वै. नि.)
धीहरा-स्त्री., कुन्दरुः (वै. नि.)
धुक (का)-पु., स्त्री., भूमिबदरवृक्षः (वै. नि.)
धुकन्धुक-न., बदरीफलम् (मद. व. ६.)
धुकी-स्त्री., भूबदरः। हस्तिकोली (मद. व. ६.)
धुन्धुमार-पु., इन्द्रगोपनामकीटविशेषः। गृहधूमः (मे.)
धुरणीफल-पु., मुद्गवृक्षः (प. मु.)
धुरन्धर-पु., धववृक्षः (प. मु. र. मा.)
धुर्द्धर-धूर्य-पु., ऋषभकः (रा. व. ५.)
धुस्तूरतैल-न., कर्णरोगाधिकारे पक्वतैलम्। पाठः—निशागन्धपले पक्वं कटु तैलं पलाष्टकम्। धुस्तूरपत्ररसे कर्णनाडीजिदुत्तमम् (सा. कौ. ईदृगेव रसरत्नाकरे गन्धकतैलम्)
धूक-पु., वायुः। बकुलवृक्षः। बिडालः (वै. नि.,)

धूनक (न)-पु., शालनिर्यासः (त्रिका.) (न.,) कम्पनम्
धूनराज-पु., वृक्षविशेषः। रुमिमस्तुकीति पश्चिमदेशे। गुणाः- मूत्रलः ग्राही कफघ्नः दन्तरोगघ्नो बल्यः मेहासृग्दरघ्नश्च (अत्रि.)
धूनि-स्त्री., कम्पनम् (व्याक.)
धूपक-न., तूलाकाष्ठम् (रा. व. ९)
धूपद्रुम-पु., रक्तखदिरः (रा. व. ८)
धूपसरला-स्त्री., धूपाङ्गसरलवृक्षविशेषः (वै. नि.)
धूमजांगज-न., वज्रकक्षारः (रा. व. ६)
धूमनाडी-स्त्री., प्रायोगिकादिधूमप्रयोगार्थं नलाकारयन्त्रम्। लक्षणं-धूमनाडी भवेत् तत्र त्रिखण्डा च त्रिपर्विका। कनिष्ठिकापरीणाहा राजमाषागमान्तरा (भा.)
धूममहिषी-स्त्री., नीहारः (त्रिका.)
धूममृत्तिका-स्त्री., स्वर्णशोधनयोग्यकृष्णमृत्तिका (श. चि.)
धूमयोनि-पु., मुस्तकः (अम.)
धूमरज-न., गृहधूमम् (भैष. कर्णरोगचि.)
धूमस-पु., शाकतरुः (वै. नि.)
धूमसी-स्त्री., मुद्गद्विदलादिकृतरोटिका, प्रणाली यथा-माषाणां दालयस्तोये स्थापितस्त्यक्तकञ्चुकाः। आतपे शोषिता पात्रे पिष्टास्ता धूमसी स्मृता। धूमसी रुचिरा सैव प्रोक्ता भुर्भुरिका बुधैः। भुर्भुरी कफपित्तघ्नी किञ्चित् वातकरी स्मृता (भा.)
धूमा (ङ्क)-स्त्री., पु., कृष्णशिंशपा (वै. नि.)
धूमोद्गार-पु., पित्तजरोगभेदः (भा.)
धूम्या(म्रा)ट-पु., कुलिङ्गपक्षी (अम.)
धूम्रकृत्-पु., धूस्तुरवृक्षः। (श. मा.)
धूम्रपत्रिका-स्त्री., धूम्रपत्री (रा. व. २३) गन्धतृणम्। गन्धतृणभेदः (वै. नि.)
धूम्रलोचन-पु., कपोतः (रा. व. १९)
धूम्रशूल-पु., उष्ट्रः (वै. नि.)
धूम्रा-स्त्री., शशाण्डुली (रा. व. ७)
धूम्राक्षी-स्त्री., धूम्रमुक्ता (वै. नि.)
धूर्तक-पु., केलिकदम्बः (प. मु.) शृगालः (श. र.)
धूर्तजन्तु-पु., मनुष्यः (श. च.)
धूर्तमानुष्या-स्त्री., रास्ना (श. च.)
धूर्ता-स्त्री., शुक्लकण्टकारी
धूलक-न., विषम् (श. च.)

धूलि–पु., परागः । गर्दभः । पार्थिवरजः (अम.)
धूलिका–स्त्री., धूली । पुष्परागः । (वै. नि) कुज्झटिका (श. र.)
धूलिगुच्छ–पु., पिष्टातकः (त्रिका.)
धूलिजङ्घ–पु., काकः (वै. नि.)
धूसरच्छदा–स्त्री., श्वेतबुह्ना (प. मु.)
धूसरमुद्ग–पु., धूसरवर्णमुद्गविशेषः । (म–धूसरमूग) गुणाः– रसवीर्यविपाकेषु हरिन्मुद्गसमः कषायः मधुरः रुच्यः पित्तकृत् वातविबन्धकृच्च (रा. व. १६)
धूसरा–स्त्री., पाण्डुरफलीनामक्षुपः (रा. व.५)
धूसराह्वय–पु., गर्दभः (वै. नि.)
धूसरी–स्त्री., गर्दभी
धेनुकारी–पु., नागकेसरवृक्षः (वै. नि.)
धेनुदुग्धकर–पु., मज्जरतृणम् (रा. व. ८.)
धेनुमक्षिका–स्त्री., गोमक्षिका (वै. नि.)
धोडा -पु., डुण्डुभः (श. र.)
धौतकौशेय–न., धौतकोषजम् । पत्रोर्णम् (श. र.)
धौतखण्डी–स्त्री., खण्डशर्करा (वै. नि.)
धौतमत–न., रक्तबोलः (वै. नि.)
धौतशिल–न., स्फटिकम् (त्रिका.)
धौर– पु. धववृक्षः (भा.)
ध्वंस–पु., मद्यविकाररोगः । लक्षणं यथा–' श्लेष्मप्रसेकः कण्ठास्यशोषः शब्दासहिष्णुता । तन्द्रानिद्राभियोगश्च ज्ञेयं ध्वंसकलक्षणम् (च)
ध्वंसी–स्त्री., मानविशेषः । ञ्यसरेणुस्तु पर्यायनाम्ना ध्वंसी निगद्यते। (प. प्र. १ ख.) (पु.,)(इन्)–गिरिजपीलुः । (श. र.)
ध्वजप्रहरण–पु., वायुः । (श. र.)
ध्वजी (इन्)–पु., मयूरः ! (रा. व. १९.) सर्पः (मे)
ध्वनिग्रह–पु. कर्णः । (त्रिका.)
ध्वनिबोधक (न)–न. सुगन्धरोहिषतृणम् (वै. नि.)
ध्वाङ्क्षपुष्ट–पु., कोकिलः (हारा.)
ध्वान्तवित्त–पु., खद्योतम् (श. र.)
ध्वान्तशात्रव–पु., श्योनाकवृक्षः (श. च.)
ध्वान्तोन्मेष–पु., खद्योतः (त्रिका.)

न

न–पु., रत्नम् (ए. को.)
नकुलारि–यु., बिडालः (वै. नि.)
नक्तचारी (इन्)–पु., पेचकः । बिडालः (त्रिका.)
नक्तमूलक–न., करञ्जमूलम् । (पु.) महाकरञ्जः (वै. नि.)
नक्तान्ध–त्रि. राञ्यन्धः । राञ्यन्धाश्वस्य लक्षणम्–' दिवा पश्यति यः स्वच्छं रात्रौ नैव च पश्यति । नक्तान्ध इति तं विद्यात् विकारं पवनोद्भवम्(ज. द. ३० अ.)
नक्ताह्व–पु., करञ्जवृक्षः । (भैष. नेत्ररोगचि.) ' नक्ताह्वबीजवर्तिः (च द त्र शो चि । भा. वातरक्त चि.) त्रिफलागुग्गुलादौ ।
नक्र–न., नासिका (मे.)
नक्रराज–(ट्)–पु., महाशिशुमारः ग्रहः । (त्रिका.)
नक्रा–स्त्री., मक्षिकादंशसूची नासिका (श. र.)
नक्षत्रकान्तिविस्तार–पु., धवलयावनालाख्यशिम्बीधान्यभेदः (रा व १६)
नक्षत्रमालिनी–स्त्री., जातीपुष्पवृक्षः (वै. नि.)
नक्षत्रेश–पु., कर्पूरः (अम.) शुक्तिः (त्रिका) खण्डः (हे. च.)
नक्षुद्र–त्रि., ह्रस्वनासिकः (हे. च.)
नखकुट्ट–पु., नापितः (त्रिका.)
नखगु (पु) च्छ (अ) फला–स्त्री., वृत्तनिष्पाविका (रा. व. ७.)
नखनामा–पु., नीलवृक्षः (वै. नि.)
नखनिकृन्तन–पु., नखच्छेदनास्त्रम् । (श. चि.)
नखनिष्पाव–(विका)–पु., स्त्री., शिम्बीभेदः (रा. व.७)
नखपुह्वी (ष्पी)–स्त्री., स्पृक्का (रा. व. १२-११४ पृ. १०८)
नखपूर्विका–स्त्री., शिम्बीधान्यविशेषः निष्पावी (रा. व. ७-९९ पृ. ३५६)
नखरञ्जक–पु., नखरञ्जिनीवृक्षः । ' तिमिरः कोकदन्ता च द्विदन्तो नखरञ्जकः (वै. द्रव्याभि.)
नखरञ्ज (अ) नी–स्त्री., वृक्षविशेषः (वै. द्रव्याभि.) नखकृन्तनी (उद्भटः)
नखरायुध– } पु., नखशस्त्रजन्तुमात्रः
नखायुध – } सिंहः । ताम्रचूडः । व्याघ्रः । (रा. व. १९-४४२-८४ पृ. २६९) शशकशल्लकीगोधामार्जाराद्याः ' (अत्रि.) (२० अ.)
नखराह्व–पु., श्वेतकरवीरवृक्षः (रा. व. १०)
नखरी–स्त्री., नखीनामगन्धद्रव्यम् (श. मा.) लघुशिम्बी (वै. नि.)
नखविष्किर–पु., नखायुधपक्षिमात्रः (श. चि.)
नखाङ्क–न., नखीनामगन्धद्रव्यम् । (श. र.) नखक्षतम् ।
नखाङ्कुर–पु., नखम् (वै. नि.)
नखाङ्ग–न., नलीनामगन्धद्रव्यम् (र. मा.)

नखाभ्यङ्ग-पु., नखे तैलमर्दनम् । 'तद्विशेषो नखाभ्यङ्गः शिरोनासास्थि (क्षि) तापजित् (प्रयोगपारिजातः)

नखालि-पु., क्षुद्रशङ्खः (श. च.)

नखालु-पु., नीलीवृक्षः (रा. व. ९)

नखाशी(इन्)-पु., पेचकः (त्रिका.)

नखी-स्त्री., स्वल्पनखाख्यगन्धद्रव्यम्, नखं स्वल्पं नखी प्रोक्ता (भा.) सा रक्षोघ्नीति (राजवल्लभः) नखी पञ्चविधा प्रोक्ता गन्धाढ्या गन्धवत् परैः । काचिद्बदरपत्राभा तथोत्पलदलोपमा । काचिदश्वखुराभा च गजकर्णसमा तथा । वराहकर्णसङ्काशा पञ्चमी परिकीर्तिता (च. द. टी.) तत्र वराहकर्णाभा न ग्राह्या । सा द्विधा एका शङ्खनखा अन्या शुक्ताढ्या बदरीच्छदा (र. मा.) गुणाः— ग्रहश्लेष्मवातास्रज्वरकुष्ठघ्नी लघुः उष्णा वर्ण्या शुक्रला स्वादुः व्रणविषालक्ष्मी मुखदौर्गन्ध्यहारी पाके रसे च कटु (भा.) उष्णा कटुः विषघ्नी कुष्ठकण्डूव्रणघ्नी भूतविद्रावणी च (रा. व. १२)

नखीत्रय-न., त्रिविधनखी । नखी, उत्पलपत्राभा, अश्वखुराभा चेति (च. द. वा. व्या. चि.)(महाराजप्रसारणीतैल.)

नखीद्वय-न., कानागड, कुरकराणी, इति द्वये (च. द.- वा. ज्व. चि.)

नगकर्णी-स्त्री., श्वेतापराजिता (वै. नि.)

नगगन्धा-स्त्री., रास्ना (वै. नि.)

नगज-पु., हस्ती (अ. टी. सा.)

नगणा-स्त्री., पारावतपदी (र. मा.)

नगपति-पु., तालवृक्षः (वै. नि.)

नगपर्यायकर्णी-स्त्री., अपराजिता (वै. नि.)

नगभू-पु., पाषाणभेदः (रा. व. ५)

नगभेदन-पु., करज्योडिपाषाणभेदः । (वै. नि.)

नगमाला-पु., शालिधान्यभेदः । गुणाः-शालिवत् (अर्क. चि.)

नगरघात-पु., हस्ती (व्याकरणम्.)

नगराह्व-न., शुण्ठी (रा. व. ६. १३०)

नगरीवक पु., काकः (त्रिका.)

नगरौषधि-स्त्री., कदलीवृक्षः (श. च.)

नगाटन पु., वानरः (त्रिका.)

नगाश्रय-पु., हस्तिकन्दनामकं महाकन्दशाकम् (रा. व. ७.)

नगौका-पु., सिंहः (मे.) काकः (श. च.)

नग्नहू-पु., स्फीता । नानाद्रव्यकृतसुराबीजम् । वाखर इति लोके (भ).

नग्निका-स्त्री., अनागतार्तवकन्या ।

नटपत्रिका-स्त्री., वार्ताकुवृक्षः (वै. नि.)

नटपर्ण-न., त्वक् (वै. नि.)

नटभूषण-न., हरितालः (र. मा.)

नटसंज्ञक-पु., हरितालः (त्रिका.)

नडकीय (प्राय)-त्रि., नलमयप्रदेशः (हे. च.)

नडमीन-पु., चिलिचिममत्स्यः

नतद्रुम-पु., लताशालः (र. मा.)

नतनाडिका-स्त्री., प्रहरद्वयात् मध्यरात्रिपर्यंतं कालः (वै. नि.)

नतनासिक-त्रि., क्षुद्रनासायुक्तम् (अम.)

नताङ्गी-स्त्री., कर्कटशृङ्गी (मद. व. १.)

नदनु-पु., सिंहः (श. मा.)

नदीकुठेरक-पु., नन्दीवृक्षः (रा. व. १२.)

नदीकूलप्रिय-जलवेतसः (जटा.)

नदीजा-स्त्री., जलशुक्तिः (वै. नि.)

नदीनिष्पाव-पु., शिम्बिधान्यविशेषः ।

नदीबहल-पु., मेषशृङ्गी (वै. नि.)

नदीभव-पु., क्षुद्रशङ्खः (वै. नि.)

नदीमातृक-पु., देशभेदः । यो नद्यम्बुभिः पाल्यते । 'नद्यम्बुभिर्भृतोधान्यैः नदीमातृक उच्यते' (रा. व. २)

नदीया-स्त्री., अग्निमन्थः (रा. व. ९)

नद्य-न., कृष्णाञ्जनम् (वै. नि.)

नध्री-स्त्री., चर्मबन्धनी । चर्मरज्जुः (श. च.)

नन्दक-पु., नन्दीवृक्षः । कुन्दरुः । भेकः (त्रिका.)

नन्दकि-स्त्री., पिप्पली (श. च.)

नन्दगोपिता-स्त्री., रास्ना (श. च.)

नन्दनविष-न., तन्नामकवृक्षस्य त्वक्सारनिर्यासविषम् (सु. कल्प. २ अ.)

नन्दा-स्त्री., सुरसा (प. मु.) योनिरोगविशेषः । बालस्य तन्नामकमातृकाग्रहः । तया च प्रथमे दिने मासि वर्षे वा बाल आक्रान्तो भवति । तेन च ज्वरादि भवति (च. द.)

नन्दा (न्द्या)वर्त-पु., तगरपुष्पवृक्षः (र. मा.) मत्स्यविशेषः । गुणाः- नन्दावर्तस्तु संग्राही कफपित्तविनाशनः (रा. ३ अ.)

नन्दिद्रु–पु., धववृक्षः (भा.)
नन्दिनक–पु., धववृक्षः (वै. नि.)
नन्दिपादक–पु., नन्दिवृक्षः (वै. नि.)
नन्दिवृष्य–पु., कलायः (वै. नि.)
नन्दीकामुक–पु., पानीयामलकः (वै. नि)
नन्दीवरल–पु., सागरशङ्ककमत्स्यकः (वै. नि.)
नन्दीवर्त–पु., तगरः (वै. नि.)
नभ–न., कमलम् (रा. व. १०)
नभःक्रान्ती (इन्)–पु., सिंहः (श. मा.)
नभःसङ्गम–पु., पक्षी (अम.)
नभश्चमश–पु., चित्रापूपः (मे.)
नभा–पु., श्रावणमासः । घ्राणम् । बिसतन्तुः (मे.) पलितशीर्षम् (धरणी)
नभोऽम्बुप–पु., चातकपक्षी (हे. च.)
नभोरेणु–पु., नीहारः (त्रिका.)
नभोलय–पु., धूमम् (श. र.)
नम्र (क)–पु , वेतसवृक्षः (मद. व. ५.)(भा.)
नयनचन्द्रलौह–पु., नेत्ररोगे लौहः (भैष.)
नयनचिन्तक–त्रि., दृष्टिविज्ञानकुशलः (भा.ने.रो.चि.)
नयनप्रसाद–पु., कतकवृक्षः [वै. नि.]
नयनशोणाञ्जन–न., नेत्ररोगे अञ्जनम् [भा.]
नयनापाङ्ग–पु., नेत्रप्रान्तः (अम.)
नयनी–स्त्री., कनीनिकाविकारः (श. च.)
नयनोपान्त–पु., अपाङ्गम् (रा. व. १८)
नयनोर्ध्वगरोमराजि–स्त्री., भ्रूः (रा. व. १८)
नयनौषध–न., श्वेतधातुकाशीषः (हे. च.)
नरङ्ग–न., शिश्नम् । पु., वरण्डकः । (उणा.)
नरनामिका(नी)–स्त्री., श्मश्रुमती स्त्रीः (श. र. । त्रिका.)
नरप्रिय–पु., नीलीवृक्षः (रा. व. ९) पारावतः (वै. नि.)
नरमालिनि(नी)–स्त्री., श्मश्रुमती स्त्री (हे. च.)
नरमूत्र–न., मानुषमूत्रम्, ' गुणाः—आमघ्नं कृमिविषघ्नं तिक्तोष्णं लवणं रूक्षं भूतघ्नं त्वक्दोषहरं वातहरञ्च । (रा. व. १५) ' मानुषं क्षारकटुकं तिक्तोष्णं लघु चोच्यते । चक्षुरोगहरं बल्यं दीपनं कफनाशनम् ' । ' अप्रसूताया घनं मूत्रं प्रसूताया घनं लघु । न किं गुणविशेषः स्यात् समता पाकवीर्ययोः (अत्रि. ९ अ.)
नरवल्लभ–पु., कपोतः [वै. नि.]
नरवृक्ष–पु., नीलीवृक्षः [रा. व. ९]
नरसादर–पु., नरसारः (भैष.) महाशङ्खद्रावकः ।
नरसार–पु., निशादल इति ख्यातं द्रव्यम् । हिं.—नौसादर. तत्करणविधिः–' औष्ट्रं वा माहिषं 'गव्यं पुरीषं भस्मतां गतम् । क्षारपाकविधानेन नृसारसिद्धिरुच्यते । गुणाः—पटुप्रवृत्तिशीलानां स्रावणः शोथहृत् हिमः । यकृद्दोषे ज्वरे प्लीह्नि शिरःशूलेऽर्बुदादिषु । स्तनरोगे रक्तपित्ते कासे भग्नामये तथा । योनिव्यापत्सु च ज्ञेयो सुखावहः (र. सा. सं.)
नरसिंहरूपज्वर–पु., विषमज्वरभेदः । ' विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते । तेनार्द्धशीतलं देहमर्धमुष्णं प्रजायते । (निदानम्)
नरहरि–पु., राजनिघण्टुकारः ।
नरी–स्त्री., मानुषी (जटा.) त्वचा । (वै. नि.)
नरेन्द्रद्रुम–पु., आरग्वधवृक्षः । (भैष.) (कुष्ठ. चिं. । च. द. कुष्ठ. चि.)
नरेन्द्राह्न–पु., न., काष्ठागुरुः । (वै. नि.)
नर्कुटक–न., नासिका । (हे. च.)
नर्तनप्रिय–पु., मयूरः । (वै. नि.)
नर्तापहारक–पु., धूलीकदम्बः । (वै. नि.,)
नर्मट–पु., खर्परम् ।
नर्मठ–पु., कुचाग्रम् (श. र.) मैथुनम् (वै. नि.)
नर्मदा–स्त्री., भारतवर्षीयनदीविशेषा । सा विन्ध्यपादवाहिनी । तज्जलगुणाः–' लघु शीतलं पथ्यं कफपित्तप्रकोपकरं सर्वरोगघ्नं रुच्यं मधुरञ्च (रा. व. १४) स्पृक्का । (हे. च.)
नर्मरा–स्त्री., सरला । निष्फला । भस्त्रा (मे.)
नलकिनी–स्त्री., जानुदेशः । जान्वस्थि जङ्घा (हे. च.)
नलदम्बु–पु., निम्बवृक्षः । (भूरिप्र.)
नलदाम्बु–न., उशीरजलम् (वै. नि.)
नलपट्टिका–स्त्री., नलनिर्मितपट्टिका । (हारा.)
नलमीन–पु., चिलिचिममत्स्यः । (अम.) गुणः–कफकरत्वम् ।
नलमूल–न., वीरणमूलम् । (सु. सू. ३६ अ.)
नलित–पु., तिक्तपट्टशाकः । तत् पत्रं तिक्तं पित्तघ्नं शुक्रलञ्च (राज.)
नलुका–स्त्री., नलिका । जातीवृक्षः (वै. नि.)
नलोत्तम–पु., देवनलः (रा. व. ८)
नल्वकी(इन्)–पु., नलः (भैष. यो. ण्या. चि.)
नल्ववर्त्मगा–स्त्री,. काकनासा (श. च.)

नवकार्षिकगुग्गुल-पु., भगन्दरे हितः । 'त्रिफलापुरकृष्णाभिस्त्रिपञ्चैकांशयोजिता । गुडिका शोथगुल्मार्शोभगन्दरवतां हिता (रस. र. भा.)

नवज्वरहरि (वटी)-स्त्री., नवज्वरे रसः । (भा.)

नवज्वरेभसिंह-पु., नवज्वरे रसः । (र. सा. सं.)

नवदल-न., कोमलपत्रम् (हडुचन्द्र)

पद्मकेशरसमीपस्थदलम् (अम.)

नवनीताह्वयगन्ध-पु., आमलासार वालाउया गन्धक इति लोके ख्यातः गन्धकः । (र. सा. सं. नेत्राशनिरसे)

नवपल्लव-पु., कोमलपल्लवम् (भूरित्रि.)

नवफलिका-स्त्री., अचिरजातरजस्का स्त्री (मे.)

नवयौवना-स्त्री., युवती (हारा.)

नवरत्न-न., वज्रमौक्तिकमाणिक्यमरकत-गोमेद-पद्मराग-वैदूर्य-प्रवालानि नवमणयः (प. मु.) तद्दैवतानि सूर्यादयः । तद्धारणविधिः-वैदूर्यं धारयेत् सूर्ये नीलञ्च मृगलाञ्छने । आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे । गुरौ मुक्ता भृगौ वज्रं शनौ नीलं विदुर्बुधाः (दीपिका)

नवरत्नदेवता-त्रि., वज्रादिरत्नानामधिष्ठातृदैवतम् । द्र० नवरत्नम् ।

नववल्लभ-न., दाहागुरुः (रा. व. १२)

नवविधान्न-न., सूपशाकव्यञ्जनमिष्टौदनोपदंशवितर्दिशसन्धानरोचनानि (वै. नि.)

नवशस्य-न., नवीनधान्यम् (वै. नि.)

नवसागर-न., वज्रक्षारः (वै. नि. २ भ.)

(क्षय चि क्षयकेसरिरसे)

नवसूतिका-स्त्री., नवप्रसूता (वा. उ - ३३ अ.)

नवाङ्ग-न., वातपित्तज्वरे विश्वादिनवद्रव्यजकषायः । 'विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः । कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम् (सा. कौ.) अन्यत् त्रिकटुत्रिफला चित्रकमुस्तविडङ्गकृतकषायः (च. द. द्वन्द्वज्व. चि)

नवान्न-न., नूतनान्नम् (अम.)

नवाम्बर-न., नूतनवस्त्रम् (अम)

नशाक-पु., काकसदृशपक्षिविशेषः (वै. नि.) काकभेदः (उणा.)

नश्यत्प्रसूतिका-स्त्री., मृतवत्सा (हे. च.)

नष्टचेष्टता-स्त्री., मूर्च्छा

नस् (सा)-स्त्री., नासिका

नस्वलर्क-पु., मत्स्यजातिज्वरः । (गज वै.)

नहुषाख्य-न., तगरपुष्पम् (रा व १०)

नाकन-पु., वंशधान्यविशेषः (प. मु.)

नाकु-पु., वल्मीकमृत्तिका (भैष. आमवातचि. स्वेदे.)

नागकर्णी-स्त्री., आखुकर्णीलता (रा. व. ३.) श्वेतापराजिता (शचि)

नागकुसुम-न., नागकेशरपुष्पम् (वै नि २ भ ज्वर चि चन्दनबलातैल)

नागकृष्णा-स्त्री., गजपिप्पली (वै नि)

नागजिह्विका-स्त्री., मनःशिला (वै नि)

नागजीवन-न., वङ्गम् (हे च)

नागजीवनशत्रु-पु., हरितालः (वै. नि.)

नागदन्त-(क) पु., हस्तिदन्तः (मे.)

नागदल-न., नागदमनी (भैष तप्तराजतैले । पर्णे)

नागदलोपम-पु., परूषकवृक्षः (प. मु.)

नागदा-स्त्री हरीतकी (रसा. सं. स्वच्छन्दभैरवरसे)

नागद्रु-पु., वृक्षविशेषः । गेरचिकाडा (श. च.)

नागनामक-न., सीसकम् (भा.)

नागनामा (न्)-पु., श्वेततुलसीवृक्षः कृष्णतुलसीवृक्षः ।

नागपत्र-न., ताम्बूलदलम् (वै. नि. श्वास चि. त्रिकटुवटी.)

नागपत्रा-स्त्री., नागदमनी (भा.)

नागपर्णी-स्त्री., नागवल्लीलता (वै. नि.)

नागपर्यायकर्णी-स्त्री., श्वेतापराजिता (रा. व. ३)

नागपुटभावना-स्त्री., षोडशपलेन भावना (वै. नि.)

नागपुरीषच्छत्र-न., गजपुरीषजातछत्राकम् (वा. उ. ३७ अ.)

नागपुष्पक-पु., कपित्थवृक्ष । स्वर्णयूथिका । कूष्माण्डः (रा. व. १३) पुन्नागवृक्षः । नागकेसरवृक्षः (वै. नि.)

नागपुष्पा-स्त्री., नागदमनी मनःशिला (वै नि.)

नागपुष्पी-स्त्री., नागदमनी (भा) स्वर्णयूथिका (रा. व. १०) पुष्पवृक्षविशेषः । गुणाः-'नागिनी रेचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत् । विनिहन्ति विषं शूलं योनिदोषवमिक्रमीन् (भा. अक. चि.)

नागफण-पु., वृक्षविशेषः ।

नागफेन-न., अहिफेनः (वै. नि.)(२ भ. अतिसारचि, कुङ्कुमवटी.)

नागवधूप्रिय-पु., सल्लकीनिर्यासः (वै. नि.)

नागबन्धु-पु., उदुम्बरवृक्षः (श. चि.)अश्वत्थवृक्षः (श. च.)

नागबलातैल-न., वातरक्ते तैलम् । (च. द.)
नागभृत्-पु., डुण्डुभसर्पः (त्रिका)
नागमती-स्त्री., कृष्णतुलसी (वै. नि.)
नागमाता-स्त्री., शारिवा (वै. नि.) मनःशिला (हे. च.) मनसादेवी (श. र.)
नागमार-पु., भृङ्गराजः । केशराजः (त्रिका.) (त्रि) हस्तिमारकः
नागर-न., मुस्ता (मे.)(च. सू. २ अ.) शुण्ठी (रा. व. ६ । भा. । वा. सू. १५ अ. वचादिव)(वा. चि १ अ दुरालभादि.) शुण्ठी । हरीतकी । (च. द.-सन्निपातज्वर. चि. षडङ्गपानीये । च. सू. ४ अ.) नागरङ्गवृक्षः (श. र.)
नागरक-पु.. नागरङ्गवृक्षः (वै. नि.)
नागरक्त-न., सिन्दूरम् (हें. च.)
नागरघन-पु., नागरमुस्ता (रा. व. ६)
नागरमुस्तक-(स्ता)-न., स्त्री., नागरदेशप्रसिद्धमुस्ता (हिं.-नागरमोथा) गुणाः—तिक्ता कटुः कषाया शीतला कफघ्नी पित्तज्वरातिसाराररुचितृष्णा-दाहघ्नी श्रमघ्नी च (रा व. ६)
नागरी-स्त्री., स्नुहीवृक्षः (श. च.)
नागरीकन्या-स्त्री., वन्ध्याकर्कोटकी (वै. नि.)
नागरुक-पु., नागरङ्गवृक्षः (श. र.)
नागरोत्था-स्त्री., नागरमुस्ता ।
नागवल्लरी-स्त्री., नागवल्ली (भा.)
नागवारिक-पु., मयूरः । करीन्द्रः ।
नागवीज-न., शीसकृतरसवेधक वीजविशेषम् । माक्षि-केण हतं ताम्रं नागञ्च रञ्जयेत् मुहुः । तं नागं वाहये-द्वीजे द्विषोडशगुणानिह । वीजन्त्विदं वरं श्रेष्ठं नागवीजं प्रकीर्तितम् (र. चि. ३ अ.)
नागवृन्ता (न्तिका)-स्त्री., वृश्चिकालीक्षुपः (प. मु.)
नागश्रीवल्लभ-पु., सल्लकीनिर्यासः । (वै. नि.)
नागसत्व-पु., मेषशृङ्गी (वै. नि.)
नागसम्भव-न., सिन्दूरम् (अम.)
नागसिन्दूर-न., सीसकृतसिन्दूरम् (रस. चि. ६अ.)
नागसुगन्धा-स्त्री., रास्ना । सर्पगन्धा (अ. टी. भ. स्व)
नागारण्य-पु., नागकेसरः (त्रिका. अत्रि. २स्थान २अ)
नागान्तक-पु., मयूरः । गरुडः। (अम.)
नागार्जुनयोग-पु., अर्शप्रभृति योगेषु योगविशेषः [च. द.]
नागार्जुववटिका--स्त्री., नेत्ररोगे हितः । त्रिफलाव्योष-सिन्धुत्थयष्टितुत्थरसाञ्जनम् । प्रपौण्डरीकं जन्तुघ्नं लोध्रं ताम्रं चतुर्दश । द्रव्याण्येतानि संक्षुद्य वर्तिः कार्या नताम्बुना (रस.र.) (नताम्बु तगरवारि)
नागर्जुनाभ्र-न., हृद्रोगे औषधम् (रसा. स.)
नागार्जुनी-स्त्री., दुग्धिका (वै. नि.)
नागालाबु-स्त्री., न., कुम्भतुम्बी ।
नागी-स्त्री., वन्ध्याकर्कोटकी (वै. नि. २ भ. जीर्णज्व. चि. कल्याणघृते.)
नागेश्वररस-पु., गुल्मे रसः (भैष.)
नाटाम्र-पु., कालिङ्गकलता ।
नाडिक-न., कालशाकः (भा. पू. १ भ., शा. व.)
नाडिचीर-न., निर्वेष्टनम् (हारा.)
नाडिन्धम-पु., स्वर्णकारः (त्रिका.)
नाडिपत्र-न., नाडीचशाकः (श. मा.)
नाडीक-पु., पट्टशाक (हिं.-पटुया.) (भा. पू. १ भ.-शा. व.) तत्पत्रं तिक्तमधुरभेदेन द्विविधम् । तयो-स्तिक्तं कृमिकुष्ठहरं, मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृच्च । शुष्कपत्रं नलितमित्युच्यते ज्वरघ्नं पित्तकफज्वरघ्नञ्च । तज्जलञ्च पित्तघ्नं रोचनं व्यञ्जने हितञ्च (राज.) न., कालशाकः । गुणाः—कालशाकं सरं रुच्यं वातकृत्कफशोथहृत् । बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम् (भा.)
नाडीकलापक-पु., सर्पाक्षी (भा.)
नाडीकेर-(ल)-पु., नारिकेलवृक्षः (शर.)
नाडीच-पु., तिक्तपट्टशाकः (भैष.) (क्षुद्ररोगचि.) पेचुकः (त्रिका.)
नाडीचक्र-न., नाडीनिर्याणकग्रन्थः
नाडीचरण-पु., पक्षी (त्रिका.)
नाडीचवीज-न., नलिताबीजम् (भैष.)(पृथ्वीसारतैल)
नाडीजङ्घ-पु., काकः (त्रिका.)
नाडीतरङ्ग-पु., काकोलविषम् (मे.)
नाडीनक्षत्र-न., जन्मनक्षत्रम् (वै. नि.)
नाडीनिदान-न., नाडीज्ञानसंग्रहभेदः
नाडीपरीक्षा-स्त्री., शङ्करसेनकृतनाडीज्ञानशास्त्रम्, नाडी-प्रकाशम्
नाडीशाक-पु. न., (क) पट्टशाकः नालिता । गुणाः-'कोठकृमिविनाशनम् । मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृत् । तच्छुष्कं जलदोषघ्नं पित्त-श्लेष्मामवातकृत् (राज. ३ प. कूष्माण्डादौ)
नाथहरि-पु., पशुः (व्याक.)
नापितशाला (लिका)-स्त्री., नापितभवनम् । (त्रि.का.)

नाभक-पु., हरीतकीवृक्षः (वै. नि.)
नाभिकण्टक-पु., नाभिरोगः (श. र.)
नाभिगुडक-पु., नाभौ गुडकवत् ग्रन्थिः (त्रिका.)
नाभिगोलक-पु., नाभिगुडकः (जटा)
नाभिच्छेदन-न., नाडिकाच्छेदनम् (च.)
नाभिपाक-पु., नाभिशोथः ।
नाभिलाष-पु., अनिच्छा (वै. नि.)
नाभी-स्त्री., नाभिः (श. र.)
नाभील-न., स्त्रीकटिसन्धिः । नाभिगुडकः (मे.) पीडा । नाभिकूपः (हे. च.) अण्डसन्धिः (वै. नि.)
नाभ्यभ्यङ्ग-पु., नाभौ तैलमर्दनम् ।
नायिका-स्त्री., पिण्डिकातः किञ्चित् स्थूलः कस्तूरीभेदः (रा. व. १२)
नार-पु., गोवासः । जलम् (मे.) शुण्ठी (त्रिका.)
नारकीट-पु., अश्मकीटविशेषः (मे.)
नारकेर-पु., नारिकेलवृक्षः (जटा.)
नारङ्ग-पु., नागरङ्गवृक्षः । फलगुणाः- 'मधुराम्लं गुरु उष्णं रोचनं वातामक्रमिशूलश्रमघ्नं बल्यं रुच्यं' (रा. व. ११ मद. व. ६) 'नारङ्गजं स्वादुगुणोपपन्नं सन्दीपनं रोचकमर्शसाञ्च । त्रिदोषहृत् शूलकृमीन्निहन्ति मन्दाग्निकासश्वसनापहारि' (अत्रि. १७ अ. मरिचयूषेपिप्पलीरसे. मे.)
नारङ्गवर्णक-न., गृञ्जनम् (भा. पू. १ भ. शा. व.)
नारदा-स्त्री., इक्षुमूलम् । मूर्वा (वै. नि.)
नारा-स्त्री., जलम् (श. र.)
नाराचचूर्ण-न., उदावर्ताधिकारे चूर्णम् (सा. कौ.)
नाराचिका-स्त्री., स्वर्णतोलनयन्त्रम् । (श. र.)
नारायणतैल-न., वातव्यधौ तैलविशेषः (रस. र.)
नारिकेरक्षीरिका-स्त्री., नारिकेलक्षीरम्
नारिकेलक्षीरी-स्त्री., नारिकेलदुग्धशर्कराकृतमिष्टान्नम् । 'नारिकेलं तनूकृत्य छिन्नं पयसि गोः क्षिपेत् । सितागव्याज्यसंयुक्तं तत् पचेत् मृदुनाग्निना । गुणाः— नारिकेलोद्भवा क्षीरी स्निग्धाऽपित्तातिपुष्टदा । गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा (भा.)
नारिकेलखण्ड-न., शूलाधिकारे औषधम् । इदं पित्तशूले (सा. कौ.)(रस. र. । भैष.) अन्यत् अम्लपित्ते च हितम् । (रस. र.)
नारिकेलजल-न., प्रसिद्धं, रक्तपित्ते हितं । (सि. यौ.-रक्तपित्त. चि.)
नारिकेललवण-न., सजलनारिकेलमध्ये सैन्धवलवणं पूरयित्वा तन्नारिकेलं मृदावेष्टय शोषयेत् । अथ दग्ध्वा तन्मध्याल्लवणं ग्राह्यम् । मात्रा-४ माषाः (भैष.)
नारिकेलामृत-न., अम्लपित्ताधिकारे औषधम् (रस.-र. । भैष.)
नारीघृत-न., नारीदुग्धोत्थघृतम्, गुणाः—'कफेऽनिले योनिदोषे रोगेष्वन्येषु तद्धितम् । चक्षुष्यमार्तं क्षीणाञ्च सर्पिः स्यादमृतोपमम् । (अत्रि. ८ अ.) चक्षुष्यं पथ्यं सर्वरोगघ्नं मंदाग्निदीपनं रुच्यं पाके लघु विषघ्नञ्च (रा. व. १५)
नारीच-न., शाकविशेषः । तद्द्विविधं तिक्तं मधुरं च । तिक्तं रक्तपित्तघ्नं कृमिकुष्ठहरञ्च । मधुरं पिच्छिलं शीतलं विष्टम्भि कफवातकरञ्च । (राज.)
नारीपय-न., नारीदुग्धम् ।
नारीवल्लभा-स्त्री., गन्धप्रियङ्गुः (वै. नि.)
नारीक्षीर-न., मानुषीक्षीरम् ।
नार्यङ्ग-पु., नागरङ्गवृक्षः (शर.)
नार्यतिक्त-पु., किराततिक्तकम् (वै. नि.)
नाला-स्त्री., नलः । स्तम्बः (अम. भ.)
नालावती-स्त्री., नागवल्लीलता (प. मु.)
नालि-स्त्री., नलकास्थि । नाडीशिरा (द्वि. को.)
नालिकिनी-स्त्री., कमलिनी (अ. टी. र)
नालिजङ्घ-पु., द्रोणकाकः (हारा.)
नालिता-स्त्री., स्वनामख्यातपत्रशाकः (प. मु.) गुणाः- नाडीचवत् ।
नालीक-पु., पद्मः । मृणालम् । शरः । न., पद्मषण्डः (मे.)
नालीकिनी-स्त्री., पद्मसमूहम् (श. र.)
नालीव्रण-पु., नाडीव्रणः (श. र.)
नाल्यपुष्पी-स्त्री., महाशणक्षुपः (प. मु.)
नासत्यौ-पु., अश्विनीकुमारौ (अम.)
नासाच्छिन्नी-स्त्री., पूर्णिका नाम पक्षिविशेषः (त्रिका.)
नासालु-पु., जातिफलवृक्षः (वै. नि.) कट्फलवृक्षः (शच.)
नासिकन्धम-त्रि., नासिकया निःश्वासग्राहि (व्याक.)
नासिकन्धय-त्रि., नासापथेन पानशीलम् (व्याक.)
नासिकामल-न., सिंघाणम् (रा. व. १८)
नासिकाशब्द-पु., नासाशब्दम्
नासिक्य-न., नासा (त्रिका)
नासिक्यौ-पु., अश्विनीकुमारद्वयम् । (हे. च.)

नास्तित-(द)-पु., आम्रवृक्षः (श. च.)
निःशल्या-स्त्री., ह्रस्वदन्तीक्षुपः (रा. व. ६)
निःशूक-पु., मुण्डशालिधान्यम् (रा. व. १६)
निःश्रेणि-स्त्री., वनखर्जूरिका (मे.)
निःश्रेणिका-स्त्री., कोङ्कणप्रसिद्धतृणविशेषः, गुणाः- विरसा उष्णा पशूनामबलप्रदा ।
निःश्वसन(सित)-न., निःश्वासः ।
निःसरण-न., निर्गमनम् (हे. च.)
निःसारक-त्रि., रेचकः ।
निःस्राव-पु., भक्तसमुद्भवमण्डः (हे. च)
निकष-पु , स्पर्शमणिः (अ. टी. भ. .)
निकारण-न., मारणम् (अम.)
निकुञ्चिकाम्ला-स्त्री., निकुञ्चिका नाम श्रीवल्लीतुल्यगुण- कण्टकवृक्षः । निकुञ्चकम् (रा. व. ८)
निकुम्भाख्यबीज-न., जयपालबीजम् (रा. व. ६)
निकृतल-पु., गन्धकः (वै. नि.)
निकेतन-पु., जलवेतसः (वै. नि.) पलाण्डुः (श. च.)
निक्षा-स्त्री., लिखा (उणादिकोषः)
निखण्डिका-स्त्री., गुडूचीकन्दः ।
निखर्व-पु., वामनः (हे. च.)
निगड-पु., धातुजारणबीजविशेषः । स्नुह्यर्कक्षीरं पलाश- बीजं गुग्गुलुः प्रत्येकं समं सैन्धवद्विगुणेन सह मर्दयित्वा विधेयः (र. चि. २ अ.)
निगन्धिक-पु., सुवर्णचम्पकः (वै. नि.)
निगर-पु., भोजनम् (रा. व. २०)
निगरण-न., भोजनम् (रा. व. २०) पु., गलः (मे.)
निगार-पु., भक्षणम् (अम.)
निगाल-पु., गलः (रा. व. १८) अश्वस्य घण्टाबन्ध- समीपस्थदेशः (च. द. २ अ.)
निगालवान्-पु., अश्वः (अम.)
निगु-पु., मनः (त्रिका.) मलः । मूलम् (उणा.)
निगूढ-पु., वनमुद्गः (हे. च.) त्रि., गुप्तम् ।
निघण्टुराज-पु., नरहरिकृतराजनिघण्टुः ।
निघृष्व-पु., खुरः । वराहः (उणा.)
निचयात्मक-पु., सान्निपातिकः ।
निचिकी-स्त्री., उत्तमा गौः (अ. टी. भ.)
निचुलबीज-न., हिज्जलबीजम्
निचोलक-पु., कञ्चुलिका (वै. नि.)
निण्डिला(का)-स्त्री., त्रिवृता (वै. नि.) कलायभेदः (श. च.)
नित्यनाथ-पु., रसरत्नाकरग्रन्थकारः ।
नित्ययुक्-त्रि., आमोक्षं चित्तानुसरणम् । पदार्थानुसारि (च, शा. २ अ.)
नित्या-स्त्री., मनसादेवी (तन्त्रम्)
निद-न., विषम् (श. च.)
निदद्रु-पु., मनुष्यः (श. च.)
निदिग्धा-स्त्री., कण्टकारी (रा. व. ४) एला (श. च.)
निदिग्धिकागण-पु., निदिग्धिकादिसिद्धकषायः (च. द. वातपित्तज्वरचि.)
निदेश-पु., भाजनम् (धरणी)
निद्रागौरव-न., निद्राबाहुल्यम् (भा.)
निद्रासञ्जनन-न., श्लेष्मा (श. मा.)
निधमन-पु., निम्बवृक्षः (रा. व. ९)
निधि-पु., नलिका (रा. व. १२) जीवकौषधम् (श. च.)
निधुवन-न., सुरतः (अम.)
निध्यान-न., दर्शनम् (अम.)
निनन्दु-स्त्री., मृतवत्सा (हे. च.)
निन्दु (न्द्य) तल-त्रि., निन्दितहस्तः (श. र.)
निप-पु., कदम्बवृक्षः ।
निपाक-पु., रन्धनम् । पाकः (श. र.)
निपुण-पु., चिकित्सकः (सु. नि. १३ अ)
निफला-स्त्री., ज्योतिष्मतीलता (भा.)
निफालन-न., दर्शनम् (वै. नि.)
निफेन-न., अहिफेनः (रा. व. ६.)
निभालन-न., दर्शनम् (त्रिका.)
निमज्जथु-पु., शयनम् । निद्रा (वै. नि.)
निमर्दक-पु., मांसस्य विविधव्यञ्जनप्रकारः (वा चि. ७)
निमित्तकृत्-पु., काकः (रा. व. १९)
निमेषरुक्--पु., खद्योतः (त्रिका.)
निम्बपञ्चक-न., पञ्चनिम्बः (रा. व. २२)
निम्बुकपानक-न., निम्बुरसकृतप्रपानकम् (भा.)
नियत-पु., गन्धकः (र. सा. सं. वसन्ततिलकेरसे.)
नियामकगण-पु., रसनियामकद्रव्यसमूहः (र. सा. सं)
नियोद्धा-पु., कुक्कुटः (रा. व. १९)
निरुया-स्त्री., सर्षपषष्ठांशमानम् (प. मु.)
निरन्नता-स्त्री., उपवासः ।
निरशन-न., अनशनम् (व्याक.)
निरसन-न., निष्ठीवनम् (अम.)
निरसा-स्त्री., निःश्रोणिकातृणम् (रा. व. ८)

निरातङ्क—पु., रोगमुक्तिः ।

निरापशालि—पु., जलशून्यक्षेत्रे वृष्ट्यम्बुसञ्जातशालिधान्यविशेषम् । (म.—रूपशालि) गुणाः— मधुरः स्निग्धः शीतलः पित्तदाहघ्नः त्रिदोषघ्नः रुच्यः पथ्यः सर्वरोगघ्नश्च (रा. व. १६)

निरामालु—पु., कपित्थवृक्षः (श. च.)

निरुत्थीकरण—न., मृतलौहस्य मित्रपञ्चकादिभिः पाकेन मारणम् (र. सा. सं.)

निरुद्धगुद–(**पायु**)—पु., तन्नामकक्षुद्ररोगः (सु. नि. १३)

निरोप्यशालि-पु., वापितशालिः । गुणाः—लघवा शीघ्रपाका, गुणोत्तरा विदाहिनः दोषघ्ना बल्या मूत्रवर्धनाश्च (रा. व. १६)

निर्ऋति-स्त्री., बालस्य तन्नामकमातृकाग्रहविशेषः । यया दशमे दिने मासि वर्षे वा बालो गृह्यते । तेन तस्य ज्वरगात्रोद्वेजनादि भवति (च. द. बालरो. चि.)

निर्गन्धपुष्पी-त्रि., शाल्मलीवृक्षः (श. च.)

निर्जर—त्रि., जरारहितः न., सुधा (श. र.)

निर्जरा—स्त्री., गुडूची । तालपर्णी (मे.)

निर्झर-पु., गजः (श. च.) तुषानलः (मे.) शैलनिसृतजलप्रवाहः ।

निर्णायन—न., गजापाङ्गम् (श. र.)

निर्णेजक-पु., रजकः (अम.)

निर्णेजन—न., क्षालनम् । धावनम् ।

निर्दर—न., तरुसारः । वृक्षनिर्यासः (मे.)

निर्दिग्ध—त्रि., बलवान् । मांसलम् (हे. च.)

निर्भत्सन(ना)-न., स्त्री., अलक्तकम्, लाक्षा (रा. व. ६)

निर्भिन्नचिर्भिट—पु., फुटिका (श. चि.)

निम(र्मे)ध्या—स्त्री., नलिकानामगन्धद्रव्यम् (रा. व. १२)

निर्मलोपल-पु., स्फटिकम् (रा. व. १३)

निर्मुट—पु., वनस्पतिविशेषः (त्रिका.) खर्परम् (हारा.)

निर्याण—न., गजापाङ्गदेशः (श. च.)

निर्यासी(**इन्**)-पु., शाखोटवृक्षः (प. मु.)

निर्यूष-पु., निर्यासः (श. मा.)

निर्ल्वे(र्वे)यनी—स्त्री., अहिनिर्मोकः (हे. च. वै. नि.)

निर्विषा [र्षी]—स्त्री., केदारदेशोत्पन्नौषधविशेषः । निर्विषा इति महाराष्ट्रे प्रसिद्धा । गुणाः—कटुः शीता कफवातरक्तघ्नी बहुविषघ्नी व्रणरोपणी च (रा. व. ६)

निर्वीजा—स्त्री., काकली द्राक्षा (रा. व. ११)

निर्वेष्टन—न., नाडीचीरम् (हारा.)

निर्व्यथन—न., छिद्रम् (अम.)

निर्हारगृह(स्थान)—न., निर्हारभवनम् । शल्योत्पाटनगृहम् (स्मृति.)

निर्हारी(इन्)-त्रि., दूरगामिगन्धम् (अम.)

निलिम्पा—स्त्री., दोहनभाण्डम् । स्त्रीगौः । (त्रिका.)

निवन्ध-पु., अश्वस्य ककुदंसभागः । (ज. द. २ अ.)

निवृत्तसंज्ञ—न., गुह्यरोगभेदः (वा. उ. ३३ अ.)

निशल्या—स्त्री., ह्रस्वदन्तीक्षुपः (रा. व. ६)

निशाकर—पु., कुक्कुटः (श. र.)

निशाख्या—स्त्री., हरिद्रा (रा. व. ६)

निशाचरी—स्त्री., केशिनीनामगन्धतृणम् (जटा.)

निशाट—पु., पेचकः (हे. च.)

निशाटन-पु., पेचकः (हला.)

निशादि-पु., हरिद्रादिगणः (वा. उ. २ अ.)

निशान्ध—पु., रात्र्यन्धम् ।
स्त्री., जतुकालता (रा. व. ३)

निशापति—पु., कर्पूरः (अम.)

निशापुष्प—न., उत्पलम् (रा. व. १०)

निशाभङ्गा—स्त्री., दुग्धपुच्छी (श. च.)

निशामूषा-स्त्री., अन्धमूषा(रस. र. हिक्काचि.)

निशामृग-पु., शृगालः (श. र.)

निशालौह-न., पाण्डुरोगे लौहम् । लौहचूर्णम् निशायुग्मं त्रिफलारोहिणीयुतम् । प्रलिह्यात् मधुसर्पिर्भ्यां कामलापाण्डुशान्तये (र. सा. सं.)

निशावेदी(इन्)-पु., कुक्कुटः (हे. च.)

निशाहास-पु., शुक्लपक्षः (त्रिका.)

निशाह्वा-स्त्री., हरिद्रा (अम.)

निशिक्रन्द-पु., बालानां रात्रिरोदनरोगः । 'छुच्छुन्दरुमलो मांसी हरिद्रा बिल्वपत्रकम् । सनिर्गुण्डी दलं धूमात् निशिक्रन्दोऽस्ति नो शिशोः (रस. र. बा. चि.)

निशिपुष्पा (ष्पिका) (ष्पी)-स्त्री., शेफालिकावृक्षः (त्रिका. श. र.)

निशुम्भन—न., मारणम् (हला.)

निशैत-पु., बकपक्षी (त्रिका.)

निशोत्रा-स्त्री., श्वेतत्रिवृत् । त्रिवृत् । (वै. नि. २ भ.-अ. चि. शुण्ठ्यादिगुटी.)

निश्चलाङ्ग-पु., बकः (रा. व. १९)

निश्रुक्रण—न., दन्तशाणः (त्रिका.)

निषङ्गथि-पु., तृणविशेषः । स्कन्धः (उणा.)

निषणक-न., आसनम् । सुनिषणकशाकः (श. र.)
निषादग्रह-पु., ग्रहविशेषः (वा. उ. ४ अ.)
निषादी(इन्)-पु., हस्तिपकः (अम.)
निषेक-पु., सेकः । निःष्यन्दः । गर्भाधानसंस्कारः (भ.)
निष्कण्ठ-पु., वरुणवृक्षः (श. च.)
निष्कल-पु., वीर्यहीनः (मे.)
निष्कला(ली)-स्त्री., वृद्धा । (रा. व. १८) निवृत्त-रजस्का (श. र.)
निष्कुटि-स्त्री., एला । सूक्ष्मैला (रा. व. ६)
निष्कुम्भ-पु., दन्तीवृक्षः (अ. टी. रा.)
निष्ठान-न., व्यञ्जनम् (अम.)
निष्ठीवन-न., मुखेन श्लेष्मादीनां वमनम् (च. द. संनि-पातज्वरचि.) नस्यं निष्ठीवनस्तथा ।
निष्ठेव-(न)-पु., न., निष्ठीवनम् (अम.)
निष्पक्व-त्रि., क्वथितः (अम.) अतिपक्वव्यञ्जनादिः ।
निष्पत्राकृति-स्त्री., अतिपीडा । (हे. च.)
निष्फली-स्त्री., निष्फला वन्ध्याकर्कोटी (श. र.)
निसारा-स्त्री., कदलीवृक्षः (रा. व. ११)
निसिन्धु-पु., निर्गुण्डीवृक्षः
निसुन्धार-पु., निर्गुण्डीवृक्षः (भैष.)(ज्वरचि. पानीय वट्याम्.)
निसृतान्त्रक-पु., कोष्ठगतरोगभेदः, वृद्धिरोगः (वै. नि.)
निस्तनी-स्त्री., वटकः । वडि (श. च.)
निस्तर्हण-न., मारणम् (अम.)
निस्तल(ला)-त्रि., वर्तुलम् (अ. म.) पु., तलप्रदेशः (हे. च.)
निस्तुषक्षीर-पु., गोधूमः (रा. व. १६)
निस्तुषरत्न-न., स्फटिकम् (रा. व. १३)
निस्तुषित-त्रि., त्वग्रहितम् (मे.)
निस्तुषोपल-न., स्फटिकम् । (प मु.)
निःत्रुटी-स्त्री., एला (वै. नि.)
निस्त्रैणपुष्पिक-पु., राजधुस्तूरकः (रा. व. ११)
निस्नेह-(हा)-पु., स्त्री., अतसीवृक्षः (त्रिका.)
निस्नेहफला-स्त्री., श्वेतकण्टकारी (रा. व. ४)
निस्पन्द-पु., स्पन्दनम् (त्रिका.)
निस्पृहा-स्त्री., अमूलवनस्पती (वै. नि.) अग्निशिखावृक्षः (श. च.)
निस्सारक-पु., प्रवाहिकारोगः (च. द. रक्तातिसारे.)
निहाका-स्त्री., गोधिका (अम.)
नीक-पु., वृक्षभेदः (उणा.)
नीचक-त्रि., हस्तः (श. र.)
नीचका-स्त्री., उत्तमा गौ (अ. टी. भ.)
नीचकदम्ब-पु., गोरक्षमुण्डी । महाश्रावणिका (वै. नि.)
नीचकुलिश-न., वैक्रान्तरत्नम् (प. मु.)
नीचग-न., जलम् (वै. नि.)
नीचभोज्य-पु., पलाण्डुः (श. च.)
नीड-पु., न., पक्षिकुलायम् ।
नीडज-पु., | पक्षिसामान्यम् ।
नीडोद्भव- | (हे. च; अम.)
नीत-न., धान्यम् । शस्यम् (वै. नि.)
नीथ-न., जलम् (उणा.)
नीपराज-पु., राजकदम्बवृक्षः (वै. नि.)
नीरजा-स्त्री.,अजातरजस्कास्त्री
नीरप्रिय-पु., जलवेतसम् (वै. नि.)
नीरवृक्ष-पु., जलमधूकवृक्षः (वै. नि.)
नीरस-पु., दाडिम्बवृक्षः (हारा.) (त्रि.,) रसहीनः
नीराखु-पु., जलमार्जारः (हारा.)
नीरिन्दु-पु., अश्वशाखोटवृक्षः (श, र.)
नीलक-न., कृष्णलवणम् । कांस्यम् । जलम् । गन्धबोलः (वै. नि.) कान्तलौहम् (रा. व. ३.)
नीलक-पु., नीलभृङ्गराजः (रा. व. ४) नीलवीजम् नीलबीजासनवृक्षः (रा. व. ९) कृष्णसारमृगः । भल्लातकवृक्षः (वै. नि.)
नीलकणा-स्त्री., कृष्णजीरकः (रा. व. ६.) जीरकः
नीलकण्टक-पु., चातकपक्षी (वै. नि.) मयूरः (अम.)
नीलकलम्बी-स्त्री., स्वनामख्यातलता (हिं.-कालादाना) अस्या बीजचूर्णं विरेचने हितम् ।
नीलक्रौञ्च-पु., नीलवर्णक्रौञ्चपक्षी (वै. नि.)
नीलगिरिकर्णिका-स्त्री., नीलापराजिता (रा. व. ३.)
नीलगिरिजा-स्त्री., विष्णुक्रान्ता आस्फोता (कोषान्तरम्)
नीलङ्गु-पु., कृमिविशेषः कीटमात्रः शृगालः (भ. द्विको.)
नीलचर्म-न., परूषकफलम् (रा. व. ११.)
नीलच्छवि-पु., ककुभपक्षी (वै. नि.)
नीलज-न., नीललौहम् (रा. व. १३.)
नीलधातु-पु., खटिका (र. मा.)
नीलनिर्गुण्डी-स्त्री., नीलपुष्पसिन्धुवारवृक्षः, गुणाः- कटूष्णा तिक्ता रूक्षा कासघ्नी श्लेष्मशोफवायुप्रदरा-ध्मानहरी (रा. व. ४)
नीलपर्ण-न., परूषकफलम् (रा. व. ११)

नीलपर्णी-स्त्री., विदारीवृक्षः (र.मा.) वन्दाकवृक्षः (वै.नि.)
नीलपिच्छ-पु., रणगृध्रः (रा. व. १७)
नीलपीत-पु., महाविषवृश्चिकभेदः (सु. कल्प. ८)
नीलपुष्पक-पु., नीलनिर्गुण्डीवृक्षः (वै. नि.)
नीलपृष्ठ-पु., मत्स्यविशेषः (वै. नि.)
नीलपृष्ठा-स्त्री., नीलीवृक्षः (भा. म. १ भ.)
नीलभण्ट-पु., पियालवृक्षः (प. मु.)
नीलभूमिमलक्षार-पु., खर्परधातुः (वै. नि.)
नीलमकुष्ठ-पु., नीलवनमुद्गः (नकुल, ११ अ.)
नीलमणि-पु., स्वनामख्यातमणिः । गुणाः-तिक्तोष्णः कफपित्तवातघ्नः धारणात् शुभदश्च ।
नीलमण्डल-न , परूषकफलम् ।
पु., तद्वृक्षः (रा. व. ११)
नीलमयूर-पु., मयूरभेदः । गुणाः-मेधावृद्धिं स्रोतसाञ्च करोत्युत्पाटनं शिखी । स वातलोऽतिबलकृत् पुनः किञ्चिद्रसायनम् । (अत्रि. २१ अ.)
नीलमक्षिका-स्त्री., पृथुकृष्णमक्षिका ।
नीलमीलिक-पु., खद्योतः (श. म.)
नीलमृत्तिका-स्त्री., कृष्णमृत्तिका । पुष्पकासीसः (रा. व. १३)
नीलयष्टिका-स्त्री., कृष्णेक्षुः । कृष्णकुटजः (वै. नि.)
नीलरत्न-न., नीलमणिः (रा. व. १३)
नीलरास्ना-स्त्री., नीलपुष्परास्ना (र. मा.)
नीलरूपक-पु., प्लक्षवृक्षः (वै. नि.)
नीललोहिता-स्त्री., भूजम्बूवृक्षः (श. च.)
नीलवटी-स्त्री., नीलवटी (चि. क्र. क. केशरञ्जन.)
नीलवल्ली स्त्री., वन्दाकः (र. मा.)
नीलवीज-पु., स्वनामख्यातासनवृक्षः गुणाः-वीजवृक्षौ कटुशीतौ कषायौ कुष्ठघ्नौ सारकौ कण्डूदद्रुघ्नौ । तयोरसितः श्रेष्ठः (रा. व. ९)
नीलवुह्ना-स्त्री., छगलान्त्री (प. मु.)
नीलवृषा-स्त्री., वार्ताकी (रा. व. ७)
नीलशिम्बिका-स्त्री., शिम्बीभेदः (वै. नि.)
नीलशुक-पु., महाविषवृश्चिकजातिभेदः (सु. क. ८ अ)
नीलशोधनी-स्त्री., नीली (वै. नि.)
नीलषष्टिक-पु., षष्टिकशालिविशेषः, गुणाः- गुणैः गौरषष्टिकात् किञ्चिदूनः (रा. व. १६)
नीलसस्य-न., बाजरा इति ख्यातशस्यम् ।
नीलसहाचर-पु., नीलपुष्पझिण्टी (भा. म. ४ भ. मुखरोगचि.)
नीलस्यन्दा-स्त्री., नीलापराजिता (रा. व. ७)

नीलाक्ष-पु., हंसः (वै. नि.)
नीला-स्त्री., नीलीक्षुपः (नकुल १५ अ.) नीलपुनर्नवा लाक्षा (रा. व. ४, ५, ६,) स्पृक्का । कृष्णजीरकः (वै. नि.) नीलमक्षिका
नीलाख्या-पु., नीलमणिः (वै. नि.)
नीलाङ्ग-पु., नीलक्रौञ्चपक्षी पारावतः (वै. नि.) सारस चाषः (रा. व. १९)
नीलाङ्गु-पु., स्त्री., नीलमक्षिका [द्वि.] क्रिमिः [अम.
नीलाञ्जनच्छदा-स्त्री., जम्बूवृक्षः (वै. नि.)
नीलाण्डक-पु., रोहितमत्स्यः (वै. नि.)
नीलाद्रिकरणी-स्त्री., नीलापराजिता (रा. व. ३)
नीलाम्बुज(न्म)-न., नीलपद्मम् (प. मु.)
नीलाशी-स्त्री., नीलनिर्गुण्डी (वै. नि.)
नीलाश्मज-न., तुत्थकम् (वै. नि.)
नीलासन-पु., नीलबीजासनभेदः गुणाः—कटुः शीतः कषायः कुष्ठकण्डुदद्रुघ्नः सारकश्च (रा. व. ९)
नीलाह्वा-स्त्री., कृष्णापराजिता (वै. नि.)
नीलीफल-न., श्रीफलम् (सु. चि. १७ अ.)
नीलीवृक्षाकृति-स्त्री., शरपुङ्खा । (वै. नि.)
नीलोत्पल-न., नीलकमलम् । नीलकुमुदम् । गुणाः-अतिस्वादु शीतलं सुरभि सुखकृत् पाकेऽतितिक्तं रक्तपित्तघ्नं च (रा. व. १०) नीलोत्पलमतिस्वादु शीतं सुखकरं मतम् । पाकेऽतितिक्तं सुरभि रक्तपित्तस्य नाशकम् । (द्रव्यगुण. । च. अर्श. चि.) तन्मूल-गुणाः—गुरु विष्टम्भि शीतलञ्च (राज. ३ प.)
नीलोत्पलिनी(ली)-स्त्री., नीलकमलिनी कुमुदिनी (रा. व. १०)
नीलोदर-पु., महाविषवृश्चिकजातिभेदः (सु. कल्प ८अ.)
नीलोपल-पु., नीलमणिः (रा. व. १३)
नीवर-न., जलम् (वै. नि.)
नीवारतुण्डिका-स्त्री., नीवारः (र. मा.)
नुत्त-पु., क्षुद्रपनसवृक्षः । लकुचवृक्षः (वै. नि.)
नुद-पु., ब्रह्मदारुवृक्षः । अश्वत्थभेदः (अम.)
नूतनगुड-पु., अभिनवगुडः । गुणाः- दाहघ्नः तापघ्नः रसनेन्द्रियतर्पणः शीतः सुमधुरश्च (रा. व. १४)
नृदन्ता(न्ती)-स्त्री., महामेदा (वै. नि.)
नृपवल्लभघृत(तैल)-न., नेत्ररोगे घृतं तैलं च । तैल-नस्यं घृतसेवनं च (भैष. रस. र.)
नृपामय-पु., राजयक्ष्मा । क्षयरोगः (रा. व. २०)
नृमाण-न., पादात् ऊर्ध्वविस्तृतदोःपाणिः (रा. व. १८)

नृसार-पु., निषादल इति ख्यातं द्रव्यम्। महाद्रावकः।

नेत्रकर्म (प्रसाधन)-न., सप्तविधनेत्रोपचाराः। यथा 'सेकश्चाश्चोतनं पिण्डी बिडालस्तर्पणस्तथा। पुटपाकोऽञ्जनं नेत्रे यथावस्थं प्रयोजयेत् (तोड। भा.)

नेत्रच्छद्-पु., नेत्रावरणम् (अम.)

नेत्रधावन-न., चक्षुर्धावनम् (राज. १ प.)

नेत्रपर्यन्त-पु., अपाङ्गदेशः (रा. व. १८)

नेत्रपाषाण-पु., कटुका (र. मा.)

नेत्रपिण्ड-पु., बिडालः। नेत्रगोलकः (रा.)

नेत्रभूषण-न., कृष्णाञ्जनम् (वै. नि.)

नेत्रमङ्गलकारी (इन्)-पु., खर्परधातुः (वै. नि.)

नेत्रमल-न., पिचटः (वै. नि.)

नेत्ररोम-न., नेत्रपक्ष्म (वै. नि.)

नेत्रवती-स्त्री., पश्चिमदेशप्रसिद्धभारतवर्षीयनदी, एतज्जलगुणाः- समधुरं कान्तिजनकं वृष्यं पुष्टिकरं दीपनं पाचनं बल्यञ्च (रा. व. १४)

नेत्रवर्त्मबन्ध-पु., नेत्ररोगविशेषः

नेत्रवस्ति-पु., नेत्रे वस्तिदानप्रकरणम्। नेत्रक्षेत्रं परित्यज्य सार्धञ्च द्वयमङ्गुलम्। सर्वतश्चापि चमसीं जलं दत्त्वा प्रमर्दयेत्। तेन पिण्डेनालवालं दृढं सन्धिविवर्जितम्। कृत्वालवालं दृक्प्रान्ते शुक्लभागं द्रवेण वै। पूरयेच्च यथापक्ष्म पूरितश्चैव जायते। नेत्रे पलं प्रकुर्वीत विकासस्तु तथैव च। स्वस्थे कफे सन्धिरोगे मात्रा पञ्चशतं विदुः। कफे वाते कृष्णरोगे मात्रा सप्तशतं मता। दृष्टिरोगेष्वष्टशतं अधिमन्थे सहस्रकम्। शुक्रेऽतिकुटिले ह्रस्वे स्याद्द्वादशशती मता। पित्तरोगे नवशतं सहस्रं वातरोगिणाम्। एकाहं वा त्र्यहं वापि पञ्चाहं चेष्यतेऽथवा। द्रवञ्चापाङ्गतो नीत्वा नीलद्रव्यं विलोक्य च। सुखं निरीक्षयेत्। पश्चात् नेत्रबस्तिविधिस्त्वयम्। निवृत्तिर्व्याधिशान्तिश्च। क्रियालाघवमेव च। सम्यक् रोगे सुखसुप्तिर्वैशद्यं वर्णपाटवम्। शोकाश्रुपातगुरुता स्नैग्ध्ये स्यादतितर्पितम्। रूक्षाविलं सरक्तञ्च नेत्रं स्यात् हीनतर्पितम्। रूक्षे स्निग्धः क्रमश्चात्र प्रयोज्यः सम्प्रदायतः [तोड.। सु. उ. १८ अ.]

नेत्रविभूषण-न., नीलाञ्जनम् [वै. नि.)

नेत्रवैमल्यकारी-(इन्) पु., खर्परधातुः [वै. नि.)

नेत्रामयहर-पु., स्त्री., खर्परः (वै. नि.)

नेत्राम्बु-न., अश्रु (अम.)

नेत्रार्श-न., अक्षिजातार्शः तत्र वर्त्मावरोधः वेदनास्रावो दर्शननाशश्च (सु. नि. २अ.)

नेत्रास्थि-न., नयनाधिष्ठाने घोणाख्यास्थित्रयम् (च. शा. ७अ.)

नेत्री-स्त्री., नाभिः (श. र.)

नेत्रोपम-पु., वाताभः (भा.)

नेत्रोपमफल- पु., वातामवृक्षः (भा.)

नेत्र्यवर्ग-पु., चक्षुर्हितकरद्रव्यगणम् यथा-'द्विधा रसाञ्जनं प्रोक्तं त्रिफला लोध्रकद्वयम् कुमारिका च विमला गणोऽयं नेत्र्यसंज्ञकः (अर्क. चि.)

नेदिष्ठ-पु., अङ्कोटवृक्षः (जटा.)

नेपा-स्त्री., नवमल्लिका [रा. व. १०] कस्तूरी [वा. उ. ५अ.] मनःशिला [वै. नि. हिक्का. चि. धूमे.]

नेपालमूलक-न., गजदन्ताकारे मूलकभेदः
(भा. पू. १ भ. शा. व.)

नेपालशृङ्गी-स्त्री., नेपालदेशीयशृङ्गीविषम्, गुणाः- नेपालशृङ्गी नैपाली हन्ति सा कफजान् गदान्। वातजान्निखिलांश्चापि सन्निपातोद्भवं ज्वरम् आमवातं महाघोरं हृद्रोगमपि दारुणम् (अत्रि.)

नेपालीय-न., ताम्रम् (वै नि.)

नैकुम्भ-न., जैपालबीजम् (सा. कौ.)

नैगमेषापहृत-पु., नागोदरः (सु. शा. १०अ.)

नैचिकी स्त्री., उत्तमा गौः (अम.)

नैदानिक-पु., निदानशास्त्रकुशलः।

नैपालिक-न., ताम्रधातुः (रा. व. १३)

नैयग्रोध-न., वटवृक्षफलम् (अम.)

नैर्झरजल-न., निर्झरवारि शैलसानुस्रवद्वारिप्रवाहे निर्झरो झरः। स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् (भा.)

न्यक्कारुका-स्त्री., पतङ्गविशेषः। विष्ठाकीटः (हारा.)

न्यग्रोधपरिमण्डला-स्त्री., सुन्दरी स्त्री (श. मा.)

न्यग्रोधपुटपाक-पु., वटकल्पादिसाध्यपुटपाकः। यथा- न्यग्रोधादेश्च कल्केन पूरयेद्गौरतित्तिरेः। निरन्त्रमुदरं सम्यक् पुटपाकेन तत्पचेत्। अस्य रसो मधुना सर्वातिसारे हितः (शार्ङ्ग. म. ख. १ अ.)

न्यग्रोधी-स्त्री., द्रवन्ती (रा. व. ५)

न्यङ्कुभूरुह-पु., आरग्वधवृक्षः (वै. नि.) शोणाकवृक्षः (त्रिका.)

न्यक्ष-पु., गण्डकः।

न्याक्य-न., भर्जिततण्डुलः (श. च.)
न्याद-पु., भोजनम् । आहारः (अम.)
न्यूनपञ्चाशद्भाव-पु., जन्मन उन्मादग्रस्तः (का. पुराणम्.)
न्यूनाङ्ग-त्रि., हीनाङ्गः । खञ्जः ।
न्यूनेन्द्रिय-त्रि., असम्पूर्णेन्द्रियम् खञ्जः

प

पकटी-स्त्री., प्लक्षवृक्षः (वै. नि.)
पक्क (क्त) पौड-पु., वर्धनवृक्षः (हिं.—पखौडा.)
गुणाः– दध्यञ्जनविधौ शस्तः कटुः जीर्णज्वरघ्नश्च (रा. व. ८)
पक्ता-त्रि., स्वयंपाककर्ता पु., अग्निः ।
पक्ककृत्-पु., निम्बवृक्षः (श. च.)
त्रि., पाचकः (वै. नि.)
पक्कपात्र-न., पक्कशरावः (वा. उ. ५ अ.)
पक्कमांस-न., पक्कसिद्धमांसम् । गुणाः– हितं बलवर्धनं वीर्यवर्धनञ्च (रा. व. १७) बृहद्बदरम् (मद. व. ६)
पक्कवारि-न., उष्णजलम् । काञ्जिकम् (श. च.)
पक्कशस्यसमोन्नति–पु., राजकदम्बः (वै. नि.)
पक्केष्टका-स्त्री., दग्धेष्टका (वै. संग्रह.)
पखौण्ड (पौड)–पु., पक्कपौडवृक्षः (रा. व. ८)
पङ्ककर्वट-पु., कोमलकर्दमः (त्रिका.)
पङ्ककीर-पु., कोयष्टिकपक्षी (त्रिका.)
पङ्कक्रीड-पु., ग्राम्यशूकरः (वै. नि.)
पङ्कगडक-पु., पङ्कालमत्स्यः क्षुद्रमत्स्यभेदः (त्रिका.)
पङ्कगति-पु., पङ्कालमत्स्यः (श. मा.)
पङ्कग्राह-पु., शिशुमारः (वै. नि.) मकरः (हारा.)
पङ्कजात-पु., भृङ्गराजक्षुपः (वै. नि.)
पङ्कजिनी-स्त्री., पद्मालयम् । कमलिनी (वै. नि.)
पङ्कपर्पटी-स्त्री., सौराष्ट्रमृत्तिका (र. मा.)
पङ्कमण्डूक-पु., जलशुक्तिः (वै. नि.) शम्बूकः (हारा.)
पङ्कवारि-न., काञ्जिकम् (वै. नि.)
पङ्कवास-पु., कर्कटः (रा. व. १९)
पङ्कशुक्ति-स्त्री., शुक्तिः (त्रिका.)
पङ्कशू (षू, सू) रण-पु., पद्मकन्दः (त्रिका.)
पङ्कार-पु., जलजवृक्षविशेषः । कण्टकसेवन्ती (मे.)
पङ्कीर-पु., टिट्टिभपक्षी (वै. नि.)
पङ्क्तिचर-पु., कुररपक्षी (रा. व. १९) क्रौञ्चपक्षी (श. च.)
पङ्क्तिशूल-पु., परिणामशूलः ।
पङ्गुत्व (ल्य) हारिणी-स्त्री., शिगृडीक्षुपः (रा. व. ४)
पङ्गुल्य-न., पङ्गुभावः (रा. व. ४)
पचा-स्त्री., पाकः (अम.)
पचेलुक-पु., पाचकः (त्रिका.)
पच्यमानज्वर-पु., ज्वरविशेषः । लक्षणम् ' ज्वरवेगोऽधिकस्तृष्णा छर्दतीसारविड्ग्रहाः । मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् (भा.)
पञ्च-पु., तिक्तपटोलः (वै. नि.)
पञ्चकद्वय-न., जीवनपञ्चमूलं ह्रस्वपञ्चमूलं च (वा. सू. १५ अ.)
पञ्चकन्दा-पु., पञ्चसिद्धौषधिविशेषः तेच तैलकन्दक्रोडकन्दसुधाकन्दरुदन्तीसर्पाक्ष्यात्मका- (रा. व. २२)
पञ्चकपित्थ-न., कपित्थस्य मूलस्त्वक् पत्रफलपुष्पाणि (वा. उ. ३८ अ.)
पञ्चकषाय-पु., वचात्रासापटोलप्रियङ्गुनिम्बात्मकद्रव्यवर्गः (भा. म. ४ भ. यो. व्या. चि. । चूर्णैः पञ्चकषायजैः । भेष. कर्णरोगचि.)
पञ्चकीर-पु., जलकुक्कुभः (त्रिका.)
पञ्चजटा-स्त्री.; पञ्चमूलम् (च. द.)
पञ्चतत्त्व-न., क्षित्यप्तेजोमरुत् व्योमानि पञ्चभूतानि। मद्यमांसमत्स्यमुद्रामैथुनानि (तन्त्रम्.)
पञ्चतिक्तघृत-न., कुष्ठाधिकारे घृतम् । (भैष.) अन्यत् विस्फोटाधिकारे (रस. र.)
पञ्चतिक्तघृतगुग्गुल-पु., कुष्ठे हितः (सा. कौ.)
पञ्चतृण-न., कुशकाशशरदर्भेक्षुस्वल्पतृणपञ्चमूलानि एषां मूलं तृषादाहपित्तासृक्मूत्रसङ्गहृत् (भा.)
पञ्चथ-पु., कोकिलः (वै. नि.)
पञ्चनख-व्याघ्रः (रा. व. १९) कच्छपः (जटा.) गजः (त्रिका.) व्याघ्रशरभशार्दूलगोधाकच्छपशरटसिंहाः। भक्ष्यपञ्चनखाः –शशकः शल्लकी गोधा खड्गी कूर्मश्च पञ्चमः (स्मृति.)
पञ्चनखर-पु., गोधा (वै. नि.)
पञ्चनिदान-न., रोगज्ञानस्य पञ्चविधप्रकाराः, यथा– निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् (मा.)
पञ्चपत्र-पु., चण्डालकन्दः (रा. व.)
पञ्चपत्रिका-स्त्री., गोरक्षी (रा. व. ५)

पञ्चपल्लव-न., आम्रजम्बूकपित्थबीजपूरबिल्वपल्लवानि । 'आम्रजम्बूकपित्थानां बीजपूरकबिल्वयोः । गन्धकर्मणि सर्वत्र पत्राणि पञ्चपल्लवम् । (प. प्र. ३. प.)

पञ्चप्राणा-पु., प्राणापानव्यानोदानसमानाख्याः । पञ्चविधदेहान्तर्वायवः (सु.)

पञ्चबला-स्त्री., बलातिबलानागफला राजबलामहाबला च (वै. नि.)

पञ्चबुद्धीन्द्रिय-न., पञ्चज्ञानेन्द्रियाणि स्पर्शनं रसनं घ्राणं दर्शनं श्रोत्रञ्चेति (च.)

पञ्चभद्र-न. पु. गुडूची पर्पटमुस्तकिराततिक्त विश्वभेषजानि (सि. यो. च. द. ज्व. चि.)

पञ्चमकार-न., मद्यमांसमत्स्यमुद्रामैथुनरूपं प्रकारपञ्चकम् (तन्त्रम्)

पञ्चमास्य-पु., कोकिलः (श. र.)

पञ्चमुख-पु., सिंहः । पिङ्गलसिंहः (रा. व. १९)

पञ्चमूत्र-न., मूत्रपञ्चकम् । तच्च गर्दभीगोमेषीच्छागीमहिषीजमिश्रितमूत्रान् (रा, व. २२.)

पञ्चमूल्यादि-पु., ज्वरातिसारे कषायः (च. द.)

पञ्चरत्न-न., स्वर्णमौक्तिकमाणिक्यहीरकराजपट्टाः । कनकं हीरकं नीलं पद्मरागञ्चमौक्तिकम् । पञ्चरत्नमिति प्रोक्तमृषिभिः पूर्वदर्शिभिः

पञ्चरसलोह-न., वर्तलोहम् (वै. नि.)

पञ्चरसा-स्त्री., हरीतकी (मद. व. १)

पञ्चलक्षण-न., वातपित्तकफसन्निपातागन्तूनां लक्षणयुक्तम् । व्रणस्य-गन्धवर्णस्राववेदनाकृतिरूपलक्षणयुक्तम् (सु. चि. १ अ.)

पञ्चवक्त्ररस-पु., रसोऽयं सन्निपातज्वरे हितः । गन्धेशटङ्कमरिचं विषं धत्तूरजैर्द्रवैः । दिनं सम्मर्दितं शुष्कं पञ्चवक्त्रो रसो भवेत् । आर्द्रकस्य रसेनैष दातव्यो रक्तिकामतः (भा.)

पञ्चवटी-स्त्री., बिल्वाश्वत्थवटाशोकोदुम्बराः (वै. नि.)

पञ्चवर्णक-पु., धुस्तूरवृक्षः (वै. नि.)

पञ्चवेतस-न., न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलानि । न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः । सर्वैरेकत्र मिलितैः पञ्चवेतसमुच्यते । (रा. व. २२) शिरीषपिप्पलवटप्लक्षवेतसानि (वा. उ. ३६ अ.) गुणाः–त्वक्पञ्चकं हिम ग्राहि व्रणशोथविसर्पजित् (भा.)

पञ्चबीज- न., कर्कटीत्रपुषदाडिमपद्मकपिकच्छुजपञ्चबीजानि । राजिकाजमोदाजीरकतिलखसखसश्च ।

पञ्चशस्य-न., धान्यतिलमुद्गयवश्वेतसर्षपाणि ।

पञ्चशाख-पु., हस्तः (रा. व. १८)

पञ्चशिख-पु., सिंहः (त्रिका.)

पञ्चसर्पिणी-ओषधिविशेषः । मण्डलैः कपिलैश्चित्रैः सर्पाभा पञ्चसर्पिणी ।

पञ्चसाराम्बु-न., खर्जुराद्यम्बुः मधुखर्जूरमृद्वीकापरूषकसिताम्भसा (वा. चि. २ अ.)

पञ्चसुगन्धिक-न., कर्पूरकङ्कोलवङ्गजातीफलपूगाः (रा. व. २२)

पञ्चक्षार-न., यवपलाशसर्जतिलमुष्ककजक्षाराः । यवमुष्ककसर्जीनां पलाशतिलयोस्तथा । क्षारैश्च पञ्चभिः प्रोक्तं पञ्चक्षाराभिधो गणः (रा. व. २२) पञ्चलवणानि (वै. नि.)

पञ्चक्षीरवृक्ष-पु., वटाश्वत्थोदुम्बरपर्कटीगर्दभाण्डाः । पर्कटीत्यश्वत्थभेदः । उदुम्बरो वटोऽश्वत्थो वेतसः प्लक्ष एव च (प. प्र. ३ अ.) वेतसोऽत्र गन्धमुण्ड इति उत्तरदेशे प्रसिद्धः ।

पञ्चाङ्गगुप्त-पु., कच्छपः (त्रिका.)

पञ्चाङ्गिकपञ्चगण-पु., स्वल्पमहत्तृणवल्लीकण्टकसंज्ञानिपञ्चमूलानि (सि. यो. तृष्णाचि.)

पञ्चाज्य-न., छागदध्यादिपञ्चकम् । (वै. नि. २ भ. जीर्णज्वरचि.)

पञ्चात्मा-पु., शरीरान्तर्वायुः यथा-प्राणोऽपानः समानश्चोदानव्यानौ च वायवः (निदा.)

पञ्चाननरस-पु., हृद्रोगाधिकारे रसः । (रस. चि.)

पञ्चामृतपर्पटी-स्त्री., ग्रहण्यधिकारे हिता । (रस. र.)

पञ्चामृतपिण्ड-पु., अश्वस्य बलपुष्टिकरपिण्डविशेषः । कटुका च जयन्ती च भ्रामरी सुरसाघनः । पञ्चामृतमयः पिण्डः- — —(नकुल.)

पञ्चामृतयूष-पु., कुलत्थादिपञ्चद्रव्यकृतयूषविशेषः । यथा कुलित्थमुद्गाढकीमाषाणां निष्पावयुक्तश्च कृतो हि यूषः । सन्दीपनः पाचनधातुवृद्धिकरो लघुः स्यादरुचिप्रणाशः । ज्वरं बलासं क्षयमङ्गमर्दं क्षीयेत पञ्चामृतयूषकोऽयम् (वै. नि.)

पञ्चारविन्द-न., अरविन्दस्य मृणालबिसकेसरपत्रबीजानि (वा. उ. ३९ अ.)

पञ्चावस्था-त्रि., मृतम्

पञ्चास्य-पु., सिंहः (अम.)

पञ्चोपविष-न., स्नुह्यर्ककरवीरलाङ्गलिविषमुष्टिकाः च (रा. व. २२)

पञ्चोषण–न., पञ्चकोलम् । पिप्पलीपिप्पलीमूलचव्यचित्रकशुण्ठीच (वै. नि. ज्वरचि. अर्कादि)

पञ्चोष्माण–पु., शरीरान्तःपञ्चविधपाचकाग्नयः यथा भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसा पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यमी । पार्थिवा पार्थियानेव शेषाः शेषांश्च देहगान् (सा. कौ.)

पञ्जर (ल)–पु., कोलकन्दः (रा. व. ७) न., शरीरम् शरीरास्थिसमूहः (त्रिका.)

पञ्जरास्थि–न., पञ्जरस्य चतुर्विंशत्यस्थीनि (त्रिका.)

पट–न, भूतृणम् (र. मा.) पु., कार्पासम् (वै. नि.) प्रियालवृक्षः (मे. रस. र. बालचि.)

पटच्चर–न., जीर्णवस्त्रम्

पटद–(दा) पु., स्त्री., कार्पासक्षुपः (र. मा.)

पटरक–पु., गुन्द्रतृणम् (रा. व. ८)

पटालुका–स्त्री., जलौका (वै. नि.)

पटि–स्त्री., कुम्भिकावृक्षः (मे)

पटीर–न., मूलकः (भा. म. ३ भ. अश्म. चि) चन्दनम् (प. मु) पु., खदिरवृक्षः उदरम् (उणा) वंशलोचनम् । सन्धिवायुः (वै. नि.)

पटु (क)–पु., पटोललता (प. मु.) कारवेल्ली (रा. व. ३) शिग्रुः (रा. व. १८) चीनकर्पूरः चोरकनामगन्धद्रव्यम् (रा. व. १२) लवणम् (मे.) न., पटोलपत्रम् (विश्व) पांशुजलवणम् (प. म.) जीरकम् । वचा छिक्किनी (वै. नि.) पटोलविशेषः (त्रि.) रोगमुक्तः (रा. व. २०)

पटुतूलक–न., लवणतृणम् (रा. व. ८)

पटुत्रय–न., लवणत्रयम् । विटसैन्धवसौवर्चलानि (वै. नि. २ भ. संग्रहणीचि.)

पटुपत्रिका–स्त्री., क्षीरिका क्षुद्रचञ्चुक्षुपः (रा. व. ४)

पटुपर्णिका–स्त्री., क्षीरिणीक्षुपः (रा. व. ४)

पटुभेदनिका–स्त्री., कृष्णजीरकः (रा. व. ६.)

पटुलिका–स्त्री., नागवल्लीभेदः । पोटकुलिकेति आन्ध्रे (रा. व. ११)

पटूत्तम्–न., सैन्धवलवणम् (रा. व. ६)

पटेरक–न., मुस्तकतृणम् (वै. सं.)

पटोटज–न., छत्राकम् (श. र.)

पटोल–पु., स्वनामख्यातफलशाकविशेषः । पटोलस्य भवेन्मूलं विरेचनकरं सुखात् । नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः । दोषत्रयहरं प्रोक्तं तद्व-

त्तिक्ता पटोलिका (भा.) फलं रक्तपित्तघ्नम् (सि. यो. रक्तपित्तचि.) पत्रं पित्तघ्नं, फलं त्रिदोषघ्नं मूलं विरेचनम् (रा. व. ७.) न., पाण्डुफलम् (वा. सू. १५ अ.)

पटोलपत्र–न., वल्लीशाकभेदः (रा. व. ७)

पट्टर (ङ्ग) रञ्जक (न क) म् रागम्–न. पु., पत्राङ्गचन्दनम् (रा. व. १२)

पट्टशाक–पु., शाकविशेषः (हिं–पटुया) गुणाः– रक्तपित्तहरः विष्टम्भी वातकोपनश्च (भा.)

पट्टिक–पु., ताम्रवर्णरोध्रः (अ. टी. रा.)

पट्टिका(ख्य)–स्त्री., पु., ताम्ररोध्रः (अम.)

पट्टिल–पु., वृक्षविशेषः (जटा.)

पट्टिलोध्र(क)–पु., पट्टिकालोध्रम् (श. र.)

पण–पु., कपर्दः (वै. नि.) (२ भ. मधुरज्वरचि.) विण्मक्षिकाकषायः पञ्चगुञ्जामानम् (प. प्र.)

पणदा–पण्यान्धा (रा. व. २३)

पणश–(स)–पु., कण्टालुफलवृक्षः । गुणाः–फलं मधुरं पिच्छिलं गुरु हृद्यं बलवीर्यवृद्धिकरं श्रमदाहशोषघ्नं रुचिकरं ग्राहि दुर्जरञ्च । तत्बीजं ईषत्कषायं मधुरं वातलं गुरु तत्फलविकारघ्नंत्वग्दोषघ्नञ्च । बालपणसफलन्तु नीरसं हृद्यं च । मध्यपक्वं तत् दीपनं रुचिदं लवणादियुक्तञ्च (रा. व. ११) पक्वफलं रक्तवर्धकं मधुरं शीतलं दुर्जरं वातपित्तघ्नं श्लेष्मशुक्रबलकरञ्च । तत् बीजं रक्तपित्तघ्नं स्वादु फलतुल्यगुणञ्च । तदपक्वफलं कषायं स्वादु वातलं शीतलञ्च । (राज.) तन्मज्जगुणाः–शुक्रलं त्रिदोषघ्नं विशेषेण गुल्मिनां न हितम् (रा. व. ११) अस्य क्वाथः मांसग्रन्थिशोफे, तन्मज्जा अण्डवृद्धौ, कोमलपल्लवः चर्मरोगे च हितः ।

पणास्थिक–न., वराटकः (त्रिका. । हे. च.)

पणिकावर्त–पु., राजावर्तमणिः (प. मु.)

पण्ड–(क)–पु., नपुंसकम् (अम.)

पण्या–स्त्री., ज्योतिष्मतीलता । (वै. नि.)

पतग–पु., पक्षी (अम.)

पतङ्गिका–स्त्री., पुत्तिकानाममधुमक्षिका (अम.)

पतत्र–न., पक्षः (अम.)

पतत्रि(त्री)–पक्षी (अम.)

पतद्भीरु–पु., श्येनः पक्षी (श. र.)

पतम(स)पु., पक्षी, पतङ्गः (उणा.)

पति–पु., मूलम् । गतिः (अम.)

पतिम्बरा–स्त्री., कृष्णजीरकम् (श. च.)

पतिश्याय-पु., प्रतिश्यायः (द्वि.)
पतेर-पु., पक्षी । आढकम् (उणा.)
पत्-पु., पादः (रा. व. १८)
पत्रक-पु., पलाशवृक्षः (रा. व. २३)
पत्रकल्क-न., गन्धवृद्ध्यर्थम् उष्ण एव सम्पिष्य पक्वतैले यत् कर्पूरमृगनाभ्यादिकं दीयते (च. द. वातव्याधि-चि. महासुगन्धितैले)
पत्रगुप्त-पु., स्नुहीवृक्षभेदः (श. च.)
पत्रघ(ध)ना-स्त्री., सातला सेहुण्डः (रा. व. ८)
पत्रजासव-पु., पटोलतालपत्रोत्थासवः (च. सू. २५ अ.)
पत्रतालक-न., वंशपत्रहरितालः (वै. नि.)
पत्रदारक-पु., क्रकचः (त्रिका.)
पत्रनाडिका-स्त्री., ताम्बूलीशिरा । पत्रशिरा (जटा.)
पत्रनामक-न., तेजपत्रम् (वै. नि.)
पत्रपरशु-पु., अस्त्रविशेषम् (हला.)
पत्रपाल-पु., बृहत्छुरिका (हे. च.)
पत्रपाली-स्त्री., अस्त्रविशेषम् (हला.)
पत्रपिशाचिका-स्त्री., वारित्रा (त्रिका.) (हारा.)
पत्रपुष्प-रक्ततुलसीवृक्षः (श. च.)
पत्रपुष्पक-पु., भूर्जवृक्षः (श. मा.)
पत्रपुष्पा-स्त्री., तुलसीवृक्षविशेषः (श. मा.) क्षुद्रपत्रतुलसी (र. मा.)
पत्रमाल-पु , वेतसवृक्षः (वै. नि.)
पत्रयौवन-न., नवाङ्कुरः (जटा.)
पत्ररथ-पु., पक्षी (अम.)
पत्रल-न.. पत्तलदुग्धम् (वै. नि.) द्रप्सः (हे. च.)
पत्रशिरा-स्त्री., पर्णनाडी (हारा.)
पत्रशृङ्गी-स्त्री., मूषिककर्णिका (वै. नि.)
पत्रसूचि-पु., कण्टकः (त्रिका.)
पत्रहिम-न., हिमम् । दुर्दिनम् (त्रिका.)
पत्राख्य-., न., तेजपत्रम् (श. च.) तालिशपत्रम् (रा. व. ६)
पत्राम्ला-स्त्री., चुक्रिका (भा.)
पत्रावलि-(ली)-स्त्री., गैरिकम् (श.च.) ईश्वरीलता (वै. नि.)
पत्रिका-न., तेजपत्रम् ।
पत्रिकाख्य-पु., कर्पूरभेदः (रा. व. १२)
पत्रिकापत्र-न., तालिशपत्रम् (वै. नि.)
पत्रिणी-स्त्री., नवाङ्कुरः, पल्लवम् (श. च.)
पत्रैला-स्त्री., एला (वै. नि.)
पत्रोपस्कर-पु., कासमर्दक्षुपः (हारा.)
पत्रोल्लास-पु., पुष्पकलिका (वै. नि.)
पथिका-स्त्री., कृष्णद्राक्षा (रा. व ११)
पथ्यकरी-स्त्री., रक्तकशालिः (रा. व १६)
पथ्यका-स्त्री., मेथिका (वै. नि.)
पथ्यभोजन-न., हितभोजनम् (भा.)
पथ्या-स्त्री., हरीतकी (भा. पू. १ भ.) रा. व. ११. । च. द. वि. ज्व. चातुर्थके ।) चिर्भटा । वन्ध्या-कर्कोटकी । मृगादनी (रा. व. २२)
पथ्यापथ्यविधि-पु., रोगाणां पथ्यापथ्य निर्णयग्रन्थः ।
पदन्-न., पादः (रा. व. १८) । वाक्यम् । वस्तु (मे.)
पदक-न., निष्कासितस्वर्णम् (वै. नि.)
पदन्यास-पु., गोक्षुरक्षुपः (श. च.)
पदरथी (इन्)-पु., पादुका (त्रिका.)
पदरोहिणी-स्त्री., वन्दाकः (वै. नि.)
पदवी-स्त्री., झिण्टीक्षुपः । नागबला (वै. नि.)
पदाक-पु., सर्पः (वै. नि.)
पदारोही(इन्)-पु., वटवृक्षः (म. द. व. ५)
पदेन्द्राभ-पु., विष्किरपक्षिभेदः (च. सू. २७ अ. ।)
पद्धिम-न., पादशीतला (व्याक.)
पद्मक-न., पद्मकाष्ठम् (धरणि)
गुणाः- पद्मकं तुवरं तिक्तं शीतलं वातलं लघु। विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तजित्। गर्भ-संस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् (भा. ।) शीतलं तिक्तं रक्तपित्तघ्नं मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटघ्नश्च (रा. व. १२.) कुष्ठम् (रा. व. १२.) (च. सू, ४ अ.) तन्नामकलूतादिकीटविषघ्नागदे (वा. उ. ३७ अ.)
पद्मकर्णिका-स्त्री., कमलकर्णिका । (वै. नि.)
पद्मकाह्वय-न., पद्मकाष्ठम् । (च. द. वा. व्या. चि. (एकादशशतीमहाप्रसारणीतैले)
पद्मकी (इन्)-पु., भूर्जवृक्षः । (श. मा.)
पद्मगन्धक (गन्धि)-न., पद्मकाष्ठम् । (भा.)
पद्मचारटी-स्त्री., स्थलकमलिनी । (वै. नि.) नवनीत-खोटी । (च. द. वि. विष. चि.)
पद्मदर्शन-पु., सर्जरसः । (वै. नि.) श्रीवासः । लोबान इति भाषा (श. च.)
पद्मनाडिका-स्त्री., स्थलपद्मिनी (वै. नि.)
पद्मनेत्र-पु.,जलचरपक्षिभेदः (रा. व. १०)
पद्मपत्रा-स्त्री., स्थलपद्मिनी (वै. नि.)

पद्मपर्ण–न., पद्मपत्रम् (वै. नि.) पुष्करमूलम् (अ. टी.)

पद्मपुष्करज–न., पुष्करमूलम् । (रा. व. ६.)

पद्मपुष्प–पु., पारिभद्रकवृक्षः । पिकाङ्गपक्षी (वै. नि.) कर्णिकारवृक्षः । (श. च.)

पद्ममुखी–स्त्री., कण्टकारी (वै. नि.) दुरालभा (श. च.)

पद्मरेणु–पु., पद्मकेसरम् । (वै. नि.)

पद्मलाच्छन– पुं., सूर्यः (मे.)

पद्मवर्ण–त्रि., लोहितवर्णः (भा. ४ भ.)

पद्मवर्णक–न., पद्मकाष्ठम् (वै. नि.) पुष्करमूलम् (जटा.)

पद्मवीजाभ -न., मखान्नफलम् माखना इति भाषा (भा.)

पद्मशायिनी–स्त्री.,जलचरपक्षिभेदः (वै. नि.)

पद्माकर–पु., तडागः (अम.)

पद्माट–पु., चक्रमर्दक्षुपः (अम.) (भैष. मुखरोगचि. बृ. खदिरवट्याम् (न.) तत् बीजम् (महाभल्लातकगुडे.)

पद्मान्तर–न., पद्मपत्रम् (वै. नि.)

पद्मालया–स्त्री.,लवङ्गलता (अम.)

पद्मावती–स्त्री., स्थलपद्मिनी (जटा.) मनसादेवी) श. र.)

पद्माह्व (य)–न., पद्मकाष्ठम् (भा. वै. नि. २ भ सर्व– (ज्वरचि. सुदर्शनचूर्णे च. द. मुखरोगचि बृ. खदिरवट्याम्)

पद्माह्वया (ह्वा)–स्त्री., स्थलपद्मिनी (रा. व. ५.)

पद्मी (इन्) -पु., गजः (अम.)

पद्मोत्तम (र) विकास–पु., कुसुम्भपुष्पवृक्षः (र. मा.)

पद्मोत्तर–पुं.. न., कुसुम्भवृक्षः तत्पुष्पम् (रा. व. ४. स्त्री., कुसुम्भबीजम् वै. नि.)

पद्मोद्भवा–स्त्री., मनसादेवी (पुराणम्)

पनश (स)–पु., बहिःकण्टकमहाफलवृक्षः पणसवृक्षः भा. मण्डलिसर्पविशेषः (सुकल्प. ४. अ.)

पनसतालिका–स्त्री., कण्टकीफलवृक्षः (श. मा.)

पन्नगकेशर–पु., नागकेशरवृक्षः (रा. व. ६.)

पन्नद्धा (ध्री)–स्त्री., चर्मपादुका (हे. च. । त्रिका.)

पन्नूर–पु., शालिञ्चशाकः (वा. चि. १३अ.)

पपीता–स्त्री., स्वनामख्यातफलविशेषः (हिं.—पपया) गुणः—प्लीहघ्नी

पपु– स्त्री., उपमाता । धात्री (उणा.)

पमरा–स्त्री., सल्लकीनामगन्धद्रव्यम् (राज.)

पयःपालिनी–स्त्री., वालकम् । उशीरम् । (वै. नि. २भ. वि. ज्वर चि०)

पयःपेटी–स्त्री., नारिकेलः (प. मु. ।)

पयःप्रसाद (दि)–न., निर्मलीबीजम् । (भा.)

पयःसात्म्य–न., तक्रम् (वै. नि.)

पयस्य–पु., बिडालः (श. च.) न., पयोविकारः घृतादिः (अ:म)

पयस्वल–पु., छागः (रा. व. १९.)

पयस्वी–स्त्री., क्षीरकाकोली (वै. नि.)

पया–स्त्री., शुण्ठी (वै. नि.)

पयोद–पु., मुस्तकम् (भैष. बृ.) किङ्किणी तेले । (च. द.) शूलचि. नारिकेलखण्डे)

पयोर–पु., खदिरवृक्षः (श. च.)

पयोलता–स्त्री., क्षीरविदारी (रा. व. ७)

पयोष्णी–स्त्री.,भारतवर्षीयानदी, सा च विन्ध्याचलदक्षिणेप्रसिद्धा । जलगुणाः– सर्वरोगघ्नं रुच्यं पवित्रं लघु बलकान्तिजनकं पापघ्नं सुखदञ्च (रा. व. १४)

परक–पु., केशराजः (वै. नि.)

परग्रन्थि–पु., सन्धिः सन्धिस्थानम् अङ्गुलिपर्वम् । पर्वावधिः (हारा.)

परञ्ज–पु., फेनः । तैलनिष्पेषणयन्त्रम् । छुरिकाफलम् (मे.)

परद्दक्-पु., काकः (वै. नि.)

परद्रव्यहा–स्त्री., ग्रन्थिपर्णी (वै. नि.)

परपत्रिका–स्त्री., क्षुद्रचञ्चुक्षुपः (रा. व. ४)

परपुष्टमहोत्सव–पु , आम्रवृक्षः (वै. नि.)

परपृष्टा–स्त्री., कोकिला (वै. नि.)

परमपूतिक–पु., अहिफेनः (प. मु.)

परमा–स्त्री., सुगन्धद्रव्यविशेषः । गन्धशठी तदालेपनं ज्वरघ्नं रक्षोघ्नं च (रा. च. द. वा. व्या. चि. महाराजप्रसारणीतैले.)

परमायु–न., जीवितकालः । यथाशतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह । परमायुरिदं प्रोक्तं नराणां करिणामिह (श. मा.)

परमायुध–पु., असनवृक्षः (श. च.)

परमृत्यु–पु., काकः (त्रिका.)

परमेष्ट–पु., महानिम्बवृक्षः (र. मा.)

पररु–पु., नीलभृङ्गराजः (त्रिका.)

परला–स्त्री., पटोलवृक्षः (रस. र. कुष्ट. शैलेन्द्ररसे)

परलोकैषणा–स्त्री., परलोकस्य गवेषणा (च. सू. ११ अ)

परश–न., प्रस्तरविशेषः (पुराणम्)

परशुच्छिन्न–पु., स्त्री., कुठारिया इति ख्यातः वृक्षः । (संग्रहः) लोहक्षालनम् । कन्दगुडूची

परशुराम–पु., रसराजशिरोमणिकारः ।
पराञ्ज–पु., तैलनिष्पीडनयन्त्रम् । फेनः । (श. र.)
परात्प्रिय–पु., उलुपतृणम् (श. च.) कासतृणम् (वै. नि)
परादिगुण–पु., परापरत्वादिः । परापरत्वे युक्तिश्च संख्या संयोग एव च । विभागश्च पृथक्त्वञ्च परिणाममथापि च । संस्कारोऽभ्यास इत्येते गुणा ज्ञेयाः परादयः । (च. सू.)
परानसा–स्त्री., औषधप्रयोगः । चिकित्सा (श. च.)
परान्न–न., पलान्नम् । (पाकराजः)
परापर–न., परुषकफलम् (भा.)
पराभिध–न., कुङ्कुमम् (वै. नि.)
परामृत–न., वर्षोपलम् (त्रिका.)
परारु–पु., कारवेल्लकः (त्रिका.)
परारुक–पु., पाषाणः (त्रिका.)
परावत–न. परुषकफलम् (रा. व. ११.)
परावेदी–स्त्री., बृहती (कोषान्तरम्)
परासङ्ग–पु., अवरोधः । शोणितरोधः (सु. सू. ३३ अ.)
परिकर्म–., न., अभ्यङ्गम् । परिचर्याकरणम् (वै., नि.) कुङ्कुमादिना कायप्रसाधनम् (अम. भ.)
परिक्रमसह–पु. छागः (त्रिका.)
परिगर्भिक–(भव)–पु., बालरोगविशेषः । मातुः कुमारो गर्भिण्याः स्तन्यं प्रायः पिबन्नपि । श्वासाग्निसादवमथुतन्द्राकासारुचिभ्रमैः । युज्यते कोष्ठवृद्ध्या च तमाहुः परिगर्भिकम् रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम् (भा.)
परिघ–पु., तन्नामकमूढगर्भविशेषः । यत्र गर्भः परिघ इव योनिमुखमावृत्य तिष्ठेत् (सु. नि. ८.)
परिचरकर्म–न., सेवाकार्यम् ।
परिचर्या–स्त्री., सेवा (अम. शर.)
परिणत–त्रि., परिपक्वः (अम.)
परिणामज (शूल)–न., पक्तिशूलम् (रा. व. २०.)
परिताप–पु., रोगः (वै. नि.) कम्पः (विश्वः) उष्णता (च.)
परितिक्त–पु., निम्बवृक्षः (वै. नि.)
परिपाकिनी–स्त्री., त्रिवृता (श. च.)
परिपुष्करा–स्त्री., कर्कटीभेदः । गोडुम्बा
परिपोषण–न., हिङ्गुः (ज. द. १२ अ.)
परिभाषा–स्त्री., वैद्यकमानादिविषयकग्रन्थः
परिमल–पु , सुगन्धः मैथुनम् । विमर्दनम् (अम. भ.)
परिबृंहित–न., वृद्धिः त्रि., परिवर्द्धितम्
परिवेषण–न., भोजनार्थं भोजनपात्रे अन्नादिदानम्
परिव्राजी–स्त्री., श्रावणीमहाक्षुपः (रा. व. ५)
परिशुष्क(मांस)–न. ' पक्वमांसभेदः ' मांसं बहुघृतैर्भृष्टं सिक्तञ्चेच्चाम्बुना मुहुः । जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते (शच.) (राज.)
परिश्रु(श्रु)**त**--न., सुरा (वै., नि.)
परिषेकस्वेद–पु., स्वेदविशेषः (च. सू. १४ अ.)
परिसर्या–स्त्री., सेवा (वै. नि.)
परिस्यन्द–पु., क्षरणम् । स्पन्दः । बिन्दुशः क्षरणम् (अम. भ.)
परिस्रुतदधि–न., वस्त्रगालितदधि । गुणाः—वातघ्नं कफकृत् स्निग्धं बृंहणं पित्तघ्नञ्च (सु. सू. ४५ अ.)
परिक्षेपी (इन्)–पु., वातपित्तजभगन्दरः । 'वातपित्तात्परिक्षेपी परिक्षिप्यं गुदं गतिः । जायते परितस्तत्र प्राकारपरिखेव च ।
परीति–पु., पुष्पाञ्जनम् (वै. नि.)
परीर–पु., कारवेल्लः । न., तत्फलम् (उणा.)
परीवर्त–पु., कच्छपः (वै. नि.)
परीष्टि–स्त्री., परिचर्या (मे.)
परुहार–पु., अश्वः (श. मा.)
परुस्–न., परूषकफलम् (रा. व. ११) ग्रन्थिः (अम.)
परेष्टुका–स्त्री., बहुवत्सा गौः (अम.)
परैधित–पु., कोकिलः (श. मा)
परोट–पु., घृतसिद्धरोटिकाभेदः (वै. नि.)
परोष्णी–स्त्री., तैलपायिका ।
पर्कट–पु., पश्चात्तापः । क्रौञ्चपक्षी (वै. नि.)
पर्कटि–(टी)–स्त्री., प्लक्षवृक्षः (भा.)
पर्णक–पु., सुनिषणशाकः (भा. पू. १ भ. शा. व.)
पर्णकार–पु., वारजीवी ।
पर्णखण्ड–पु., ताम्बूलखण्डः । वनस्पतिविशेषः (श. च.)
पर्णपिण्डित–पु., मदनवृक्षः (वै. नि.)
पर्णभोजन–पु., छागपशुः (त्रिका.) त्रि., पत्रभोजिमात्रः ।
पर्णमाचल–पु., कर्मरङ्गवृक्षः (श. मा.)
पर्णमूल–न., ताम्बूलमूलम् (रा. ज ३ प.)
पर्णशिरा–स्त्री., ताम्बूलपत्रशिरा ।
पर्णसि–पु., पद्मम् । वारिगृहम् । शाकः (उणा.)
पर्णाक–पु., सुनिषणकशाकः (वै. नि.)
पर्णासि–पु., कृष्णार्जकः (वै. नि.)

पर्णिनीद्वय—न., माषपर्णी मुद्गपर्णी चेति (सि. यो. रक्तातिसारचि. कुटजादौ.)

पर्णीचतुष्क—न., शालिपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी च (च. द. वा. व्या. चि. मध्यनारायणतैले.)

पर्णीर—न., ह्रीबेरम् (वै. नि.)

पर्द (न)—पु., न., अपानवायुत्यागः (वै. नि.) केशसमूहः (उणा. हे. च.)

पर्प—न., नवतृणम् (उणा.)

पर्पटादि—पु., पर्पटचन्दनोदीच्यनागरसिद्धकषायः। 'एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः। किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः।
(चि. द. पित्तज्वरचि. भा.)

पर्पटी—स्त्री., सौराष्ट्रमृत्तिकापरनामसुगन्धद्रव्यम् (हे. च.) पद्मावती, पपरी इति च उत्तरदेशप्रसिद्धं द्रव्यम्। गुणाः— पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः। विषव्रणहरी कण्डूकफपित्तास्रकुष्ठनुत् (भा.) नलद्रव्यमानम् (प. प्र.) पिष्टकभेदः (उणा.)

पर्पटीरस—पु., श्लेष्मज्वरे रसः (रस. कौ. र. सा. सं.)

पर्प (र्व) रीण—पर्वम् (श. र.)
पु., पर्णवृन्तरसः। पर्णशिरा (मे.) पत्रचूर्णरसः (श. र.)

पर्पिक—पु., स्त्री., खञ्जः (व्याक.)

पर्यग—पु., कटाहः (च. सू. १५ अ.)

पर्यय—पु., क्रमोल्लङ्घनम्। व्यतिक्रमम्। (अम.)

पर्यायमुक्तावलि—स्त्री., द्रव्याभिधानविशेषः।

पर्व—न., वंशग्रन्थिः। (अम) अङ्गुल्यादिग्रन्थिः। (मे.)

पर्वक—न., जानुदेशः। (श. च.)

पर्वणिका (णी) स्त्री., नेत्रसन्धिरोगः। लक्षणम्—ताम्रा तन्वी दाहशूलोपपन्ना रक्ताज्ज्ञेया पर्वणी वृत्तशोफा (सु. उ. २) शाकविशेषः। सा च हस्तिशुण्डीति लोके (च. सू. २७ अ.)

पर्वतकाक—पु., द्रोणकाकः (हे. च.)

पर्वतजा—स्त्री., गिरिजाम्लद्राक्षाविशेषः। यहारीति लोके। गुणाः—द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तकृत् (भा.)

पर्वतनिम्ब—पु., महानिम्बः।

पर्वतभेद—पु., करञ्योडिपाषाणभेदः। (भा. म. ३ भ. मू. कृ. चि.)

पर्वतभेदी (इन्)—पु., पाषाणभेदः। (च. द. मू. र. चि.)

पर्वताश्रय—पु., महासिंहः। (रा. व. १९)

पर्वताह्वय—पु., धाराकदम्बवृक्षः (वै. नि.)

पर्वपुष्पिका (ष्पी)—स्त्री., हस्तिशुण्डी। (वा. सू. १५ अ.) तच्छाकगुणः वातपित्तहरः। (च. सू. २७ अ.)

पर्वभेद—पु., सन्धिभङ्गरोगः। तथा सन्धिवेदनायां यथा चालने भङ्गशङ्का जायते। (च. द. ज्वरचि.)

पर्वमूला—स्त्री., श्वेता (रा. व. ५)

पर्वयोनि—पु., इक्षुः। वेतसम्। वंशः (हे. च.)

पर्वरुट्—पु., दाडिमवृक्षः (त्रिका.)

पर्ववल्ली—स्त्री., वल्लीदूर्वा मालादूर्वा (रा. व. ८)

पर्वसन्धि—पु., अङ्गुलिसन्धिः (रा. व. १८)

पर्वित—पु., पर्वतमत्स्यः (श. र.)

पलङ्क—पु., निष्पावः। (रा. व. २३)

पलङ्कर—पु., पित्तम् (त्रिका.)।

पललज्वर—पु., पित्तम् (हारा.)।

पललाशय—पु., अजीर्णम् (त्रिका.) गण्डरोगः। (श. र.)

पलाग्नि—पु., पित्तम् (हारा.)

पलान्न—न., समांसवेशवारादिसिद्धभक्तः।

पलाप—पु., करिगण्डः (श. मा.)

पलापहा—स्त्री., नेत्राञ्जनम्।

पलालदोहद—पु., आम्रवृक्षः (श. मा.)

पलाशक—पु., शठी (जटा) लाक्षा (रा. व. २३.) किंशुकम् (सु. सू. ३८ अ. मुष्ककादिः) पलाशवृक्षः (श. र.)

पलाशगन्धजा—स्त्री., वंशलोचनाभेदः। (वै. नि.)

पलाशच्छदन—न., तमालपत्रम् (वै. नि.)

पलाशतरुशोणित—न., पु., } तद्वृक्षनिर्यासः।
पलाशनिर्यास— }

गुणाः—पलाशभवनिर्यासो ग्राही च क्षपयेत् ध्रुवम्। ग्रहणीं मुखजान् व्याधीन् कासान् स्वेदातिनिर्गमम्। केचित् (भैष ने. रो. चि.)

पलाशन—पु., शारिका (त्रिका.)

पलाशपत्री(र्णी)वल्ली—स्त्री., अश्वगन्धा (रा. व. ४) पलाशीलता (वै. नि.)

पलाशलोहिता—स्त्री., चिल्लीशाकः (रा. व. ७)

पलाशबीज—न., पलाशबीजः (रा. व. १०.)
गुणाः—अतिसारे शकृद्रक्तहरम् (वा. चि. ८ अ.)

पलाशाख्य—(ख्या)—पु., स्त्री., नाडीहिङ्गुः (रा. व. ६)

पलाशाम्भा—स्त्री., यमानिका (वै. नि.)

पलिक्नी—स्त्री., वृद्धा (अम) बालगर्भिणी (त्रिका.)

पलिघ—पु., काचकलसः (मे.)

पलितग्रह–पु., पुष्पवृक्षविशेषः (वै. नि.)
पलिनी–स्त्री., कृष्णोदुम्बरः (वै. नि.)
पली–स्त्री., गृहमक्षिका (वै. नि.)
पल्यशन–पु', वृश्चिकः (वै. नि')
पल्लवक–पु., मत्स्यविशेषः (हला.)
पल्लवाद–पु., हरिणमृगः (वै. नि.)
पल्लवाधार–पु., शाखा (श. च.)
पल्लवाह्वय–न., तालिशपत्रम् ।
पल्लवित–न', लाक्षारङ्गम् (मे.)
पल्लवी ((इन्)–पु., वृक्षः (श. मा.)
पल्लिका–स्त्री., सरटः । गोधा (वै. नि.) गृहगोधिका रा. व. १९)
पल्ली–स्त्री., गृहगोधा (रा. व.)
पल्लूर–न., शुष्कमांसम् । पथ्यापथ्यम्
पल्व–पु., राशिः (च. चि. १ भ.) (भल्लातकक्षीरे)
पल्वलावास–पु., कच्छपः (रा, व. १९)
पल्वलोदक–न., पल्वलजलम् ।
पव–पु., वायुः (श, च.) निष्पावः । धान्यादीनां निर्बुशीकरणम् (श. म.) न., गोमयं (श. च.)
पवनद्विष–पु., गुग्गुलुः (वै. नि.) निष्पावः (मे.)
पवनरिपु–पु., एरण्डवृक्षः (रा. ब. ८.)
पवनरिपुजटा–स्त्री., एरण्डमूलम् (वै. नि.)
पवनव्याधि–पु., वायुरोगः (त्रिका.)
पवनाल–पु., देवधान्यम् । गुणाः–हिमः स्वादुः लोहितः श्लेष्मपित्तकृत् अवृष्यः तुवरो रूक्षः क्लेदकृच्च (भा. पू. १ भ धान्यव.)
पवनाश–(न)–पु., सर्पः (हला. अम.) शीषकम् (र. सा. सं.)
पवनाशनाश–पु., मयूरः (वै. नि.) गरुडः (हला.)
पवनी–स्त्री., वनबीजपूरकम् (रा. व. ११.)
पवनाम्बुज–पु., परुषकवृक्षः (न) तत् फलम् (श. च.)
पवमान–पु., वायुः (रा. व. २१.)
पवारु–पु., कारवेल्लम् (त्रिका.)
पवित–न., मरिचम् (रा. व. ६.)
पशु–पु., जन्तुभेदः (अम.) उदुम्बरवृक्षः (श. च.) छागः (त्रिका.) स ग्राम्यारण्यभेदेन चतुर्दशविध गौरविरजोऽश्वोऽश्वतरः गर्दभः मनुष्यश्चेति सप्तः ग्राम्याः । महिषवानरऋक्षसरीसृपरुरुपृषतमृगा- श्चेति सप्तारण्याः । मांसगुणाः–लघवः शीतमधुराः सकषाया हिता नृणाम् (राज.)

पशुपल्वल–न., कैवर्तकमुस्तम् (श. च.)
पशुमोहनकारिका–स्त्री., चन्द्रशूरः (भा.)
पशुराज–(द्)–पु., सिंहः (श. च.)
पशुहरीतकी–स्त्री., आम्रातकफलम् (त्रिका)
पश्चाद्रुज–पु., बालानां व्रणरोगविशेषः ।
'दुष्टमम्लादिभिर्मातुः स्तन्यं सम्पिबतः शिशोः । यदा प्रकुपितं पित्तं गुदं समभिधावति । तदा सञ्जायते तत्र जलौकोदरसन्निभः । व्रणः सदाह आरक्तः ज्वर कार्श्यकरः परः । हरितं पीतकं वापि वर्चस्तेन भवेत् ध्रुवम् । व्रणः पश्चाद्रुजो नाम व्याधिः परम दारुणः (रस. र. बाल. चि.)
पह्न–पु., न., बिन्दुजालम् । पद्मम् (त्रिका.)
पह्नीका–स्त्री., वारिपर्णी (श. मा.)
पक्षचर–पु., हस्ती (मे.)
पक्षति–पु., पक्षमूलम् (अम.)
पक्षधर–पु., पक्षी (वै. नि.)
पक्षपत्र–पु., सोमलता (वै. नि.)
पक्षभाग–पु., पार्श्वभागः । गजपार्श्व भागः ।
पक्षमार्जार–पु., पक्षविडालः (वै. नि.)
पक्षमूल–न., पक्षतिः (अभ.)
पक्षवधवात–पु., वातव्याधिविशेषः (मा.)
पक्षवाहन–पु., पक्षी (श. च.)
पक्षविन्दु–पु., क्रौञ्चपक्षी (वै. नि.)
पक्षसुन्दर–पु., लोध्रवृक्षः (हारा.)
पक्षालु–पु., पक्षी (श. च.)
पक्षिणी–स्त्री., वनकार्पासी (वै. नि.)
पक्षिपात–पु., पतङ्गज्वरः (गजवै.)
पक्षिराजशालि–पुं., स्वनामख्यातशालिधान्यविशेषः (रा. व. १६.)
पक्षिलावण्य–पुं., पक्षिराजशालिः (रा. व. १६)
पक्षिशाला–स्त्री., पक्षिकुलायः (त्रि. का.)
पक्षिसिंह–पुं., गरुडः (त्रिका.)
पक्षी (इन्)–पुं., माक्षिकधातुः (र. सा. सं.) विहङ्गमः स चतुर्विधः विष्किरप्रतुदप्रसह- प्लवभेदेन । तत्र कपोतपारावतादयः प्रतुदाः । काककङ्ककुररादयः प्रसहाः । हंस सारस- क्रौञ्चादयः प्लवाः । तत्र विष्किरा लावतित्तिर- कपिञ्जलादयः । आनूपमांसगुणाः–धान्याः कूलचरा ये तु तेषां मांसं लघूत्तमम् । आनूपं बलकृन्मांसं स्निग्धं गुरुतरं स्मृतम् (भा. पू. २ भ) स्थूलकायपक्षिमांस-

गुणाः-' गुरुभक्षा बहुभुजो ये चोपचितमेदसः। एकदेहेऽपि पूर्वार्धं मृगाणां पक्षिणां परम् ॥ उत्तरोत्तरं तदङ्गगुरुत्वम् । यथा ' सर्वेषाञ्च शिरःस्कन्धप्लीहचर्मयकृद्गुदम् । पादपुच्छास्तु मस्तिष्कमुष्ककोडाः समेहनाः । धातवः शोणिताद्याश्च गुरवः स्युःपरं परम् (राज.)

पक्ष्मघात-पुं., पक्ष्मगतनेत्ररोगभेदः पक्ष्मवधरोगः (निदान.)

पक्ष्मयूका-स्त्री., पक्ष्मगतकीटः (वै. नि.)

पक्ष्मरोध-पुं., पक्ष्मगतरोगविशेषः (वा. उ. ८ अ.)

पक्ष्मार्श-न., नेत्रवर्त्मार्शोरोगः (निदान)

पक्ष्मोत्सङ्ग-पु., पक्ष्मशोथरोगः (निदान)

पाशव-पुं., पांशुलवणम् (रा. व. ६)

पांशुका-स्त्री., रजस्वला (वै. नि.)

पांशुकासीम्-न., धातुकाशीशम् (भा.)

पांशुखुर-पु., अश्वस्य पादतलस्थरोगः । लक्षणं यथा— ' पांशुभिः शर्कराभिश्च पूर्यते यस्य कोटरम् । तले यस्य विजानीयात् रोगं पांशुखुरं भिषक् (ज. द. ३६ अ.)

पांशुचत्वर-न., पांशुधानः (श. मा.)

पांशुचन्दन-पु., शिवम् (त्रिका.)

पांशुतामर-पु., क्षुद्रकर्कटिका दूर्वामयप्रदेशः (मे.) पटभवनम् (जटा.)

पांशुपटु-न., पांशुलवणम् (र. सा. सं. रसप्रकरणे.)

पांशुपत्रम्-न., वास्तूकः (श. मा.)

पांशुभव-न., मृत्तिकालवणः (वै. नि.)

पांशुभिक्षा-स्त्री., धातकीवृक्षः (वै. नि.)

पांशुर-पु., खञ्जनघोटकः । दंशकः (हारा.)

पांशुल-पु., शिवः । पूतिकरञ्जः (श. च.)

पांशुला-स्त्री., केतकीवृक्षः । रजस्वला (रा. व. १०.१८)

पांशुक्षार-पु., क्षारमृत्तिका (वै. नि.)

पांसुक (ज)-न., पांशुलवणम् । मृत्तिकालवणम् (च. द. सन्निपातज्व. चि. कर्णमूलशोथे.)

पांसुजक्षार-पु., मृत्तिकालवणम् (वै. नि.)

पांसुल-पु., केतकवृक्षः । लावपक्षी (वै. नि.)

पाककृष्ण-(फल)-पु., पानीयामलकः (श. च.) करञ्जवृक्षः (वै. नि.)

पाकज-न., परिणामशूलः (रा. व. २०) बिडलवणम् (रा. व. ६) कुष्ठौषधम् (वै. नि.)

पाकनाडी-स्त्री., अन्नपाचकनाडी

पाकपात्र-न., हण्डिकादिः ।

पाकपुटी-स्त्री., कुम्भशाला

पाकफल-पु., पानीयामलकः (श. च.) अम्लकरञ्जः (अम.)

पाकभाण्ड-न., पाकपात्रम् ।

पाकरञ्जन-न., तेजपत्रम् (श. च.)

पाकलि-(ली)-स्त्री., कर्कटिका (श. मा.)

पाकशाला-स्त्री., रन्धनशाला (जटा. सु. कल्प. १ अ.)

पाकशुल्क(ल्का)-पु., स्त्री., कठिनी (प. मु.)

पाकारि-पु., श्वेतकाञ्चनम् (प. मु. र. मा.)

पाकुक-पु., सूपकारः (उणा.)

पाक्या-स्त्री., सर्जिक्षारः । यवक्षारः सौवर्चललवणम् । मृत्तिकालवणम् (वै. नि.)

पाक्यापटु-न., पाक्यलवणम् (वै. नि.)

पाक्याह्व-पु., यवक्षारः (अम.)

पागल-पु., वातुलः ।

पाचका-स्त्री., कर्कटिका (वै. नि.)

पाचनक-पु., टङ्कणक्षारः (हे. च.)

पाचल-पु., अग्निः (श. र.) पाकशक्तिः । वायुः (शर.) न., पाचनम् (मे.)

पाज (स्)-न., बलम् (उणा.)

पाञ्चजन्य-पु., शङ्खः, । मत्स्यभेदः अग्निः (मे.)

पाञ्चाल-पु., देशविशेषः । 'कुरुक्षेत्रात् पश्चिमे तु तथोत्तरभागतः । इन्द्रप्रस्थान्महेशानि दशयोजनकद्वये पाञ्चालदेशः—" (शक्तिसङ्गमतन्त्रम्)

पाञ्चाली-स्त्री., पिप्पली (वै. नि.)

पाट-(क)-पु., विस्तारः (कः) वितस्ती ।

पाटलच्छद-(द्रुम)-पु., सुरपुन्नागवृक्षः (रा. व. १०)

पाटलादि-पु., बिल्वादिदशमूलकषायः । अयं शोथहरकषायः (चसु. ४ अ.)

पाटलापुष्प-पु., सुरपुन्नागवृक्षः ।

पाटलापुष्पसन्निभ-न., पद्मकाष्ठम् (रा. व. १२)

पाटलाभ-पु., रक्तालुकः (वै. नि.)

पाटलिका-स्त्री., रक्तकरवीरवृक्षः

पाटलिपिण्डिका-स्त्री., महाश्वेतकिणिहीवृक्षः (वै. नि.)

पाटलीकुसुम-(पुष्प)-पु., पुन्नागपुष्पवृक्षः (वै. नि)

पाटलोपम-पु., सर्जरसः (वै. नि.)

पाटलोपल-न., माणिक्यम् । (वै. नि.)

पाटहिका-स्त्री., गुञ्जा (हारा.)

पाटी (इन्)-पु., पाठीनमत्स्यः (वै. नि.)

पाटीर–पु., न., यंशलोचनम्। वङ्गम्। चन्दनवृक्षः। वायुरोगभेदः (वै. नि.)
पाटेयक–न., लवणविशेषः (च चि. ८ अ.)
पाठक–पु., चित्रकवृक्षः (वै. नि.)
पाठमञ्जरी–(शालिनी)–स्त्री., सारिकापक्षी (श. मा.)
पाठा(ठी) कुट–(ठ)–पु., चित्रकवृक्षः (रा. व. १०)
पाठादशक–न., स्तन्यशोधकगणभेदः 'पाठाशुण्ठीदेवदारुमुस्तामूर्वागुडूचीन्द्रयवकिराततिक्तकटुरोहिणीसारिवेतिस्तन्यशोधनाः' (च, सू. ४ अ.)
पाठाद्वय–न., पाठापाटला च (वै. नि. कास चि. त्र्यूषणाद्यघृते.)
पाठान–पु. गुग्गुलुः। मत्स्यभेदः (वै. नि.)
पाठासप्तक–पु.. पाठादिसप्तद्रव्यसिद्धकषायः। स च किराततनागरमुस्तगुडूची पाठोदीच्योशीरद्रव्यसाधितः (च. द. पि. श्ले. ज्वरचिकित्सा)
पाडिनी–स्त्री., मृद्भाण्डम् (वै. नि.)
पाणिनी–स्त्री., नीलापराजिता (वै. नि.)
पाणिन्धय–पु., पाणिना पानकर्ता।
पाणिपृष्ठ–न., करपृष्ठः (च. शा. ४ अ.)
पाणिभुक्–पु., उदुम्बरवृक्षः। (श. च.)
पाणिमणिका–स्त्री., मणिबन्धास्थि, तानि संख्यया चत्वारि (च. शा. ७ अ.)
पाणिमानिक–(का)–पु., तोलकद्वयम्। कर्षः वा (प. प्र. १ ख.)
पाणियालु–पु., स्वनामख्यातकन्दशाकविशेषः। रक्तालुः। गुणाः–त्रिदोषघ्नः–सन्तर्पणकरश्च (रा. व. ७)
पाणीतल–न., तोलकद्वयम्। (श. मा.)
पाणीसर्या–स्त्री., बल्वजतृणम् (रा. व. ८)
पाण्डर–न., गैरिकम्। कुन्दपुष्पः। (पु.,) कुरुबकवृक्षः। (वै. नि.)
पाण्डरपुष्पिका–स्त्री., शीतलावृक्षः। (श. च.)
पाण्डि–पु., लौहविशेषः। (रा. व. १३)
पाण्डुक–पु., पाण्डुरोगः (श. र.) तिक्तपटोलः। सर्जरसः (वै. नि.) पाण्डुशालिधान्यम् (सु. सू. ४६ अ. अर्के. चि.) न., अन्नम् (वै. नि.)
पाण्डुकण्टक–पु., अपामार्गः (रा. व. ४)
पाण्डुकम्बल–पु., प्रस्तरभेदः। (मे)
पाण्डुकर्कशा–स्त्री., औषधिविशेषम्। (वै. नि.)
पाण्डुनाग–पु., पुन्नागवृक्षः। (वै. नि.)
पाण्डुपुत्रा–स्त्री., कर्कटिका। (वै. नि.)
पाण्डुप्रहारिणी–स्त्री., शिम्बुडीवृक्षः। (वै. नि.)
पाण्डुमत्स्य–पु., शुक्लमत्स्यः।
पाण्डुमृत् (त्तिका)–स्त्री., पाण्डुवर्णमृत्तिका। (रा. व. २) खटिका। (रा. व. १३)
पाण्डुरङ्ग–पु., पट्टरङ्गः गुणाः–कृमिश्लेष्मपित्तनाशित्वं लघुत्वञ्च। (राज.)
पाण्डुरच्छद–पु., केतकवृक्षः (प. मु.)
पाण्डुरा–स्त्री., माषपर्णी (रा. व. ३.) शुक्लयूथिका। कर्कटिका (वै. नि.)
पाण्डुरागप्रिय–पु., बकुलवृक्षः (वै. नि.)
पाण्डुलोमशा–(मा) माषपर्णी (जटा. रमा.)
पाण्डुशर्करा–स्त्री., तन्नामकरोगविशेषः।
पाण्डुसूदनरस–पु., पाण्डुरोगघ्नरसविशेषः (रस. र.। भैष.।)
पाता (ऋ)–पु., गन्धपत्रम् (श. च.)।
पातालयन्त्र–न., भेषजपाकयन्त्रविशेषम्। लक्षणं यथा-ऊर्ध्वमापस्तले वह्निर्मध्ये तु रससंग्रहः। पातालयन्त्रमेतद्धि शोधयेत् सूतकादिकम् (रसग्रन्थः)
पातालगरुडाह्वय–पु., पातालगरुडी लता। (वै. नि.)
पातालनृपति–पु., शीसकम् (रसकौ.।) (भैष. वा. वार. चि. द्वादशायसे। रस. र.।)
पातिक–पु., शिशुमारः (वै. नि.)
पात्रट–त्रि., कृशाङ्गः (वै नि.) (पु.,) कर्पटकः (श. र.)
पात्रटीर–पु., काकः (श. र.) लोहकीटः, क्रौञ्चपक्षी (वै. नि.) कङ्कपक्षी (श. र.)
पाथिस्–न., लोचनम् (उणा.)
पादगण्डि (ण्डी) र–पु., श्लीपदरोगः (त्रिका.)
पादचत्वर–पु., छागः। अश्वत्थवृक्षः। सैकतम् (मे)
पादपुष्पक–पु., भूमिचम्पकवृक्षः (वै. नि.)
पादपृष्ठ–न., पादपृष्ठभागः। ते च द्वे (च. शा. ७ अ.)
पादमूल–न., चरणाधोभागः (हे. च.)
पादरोग–पु., पादगतरोगः। चिप्पोपनखकुनखादिः (सु. नि. १३.)
पादरोहिणी–स्त्री., वन्दा (वै. नि.)
पादरोही (इन्) पु., वटवृक्षः (वै. नि.)
पादवल्मीक–न., श्लीपदरोगः (रा. व. २०.)
पादविदारिका–स्त्री., अश्वस्य पादरोगविशेषः। लक्षणम्-पार्ष्णिजा पिण्डिका यस्य दृश्यते तीव्रवेदना। तस्य विद्याद्भिषग्व्याधिं घोरं पादविदारिकाम् (ज. द. ३९ अ.)

पादविरजा–स्त्री., चर्मपादुका (वै. नि.)
पादवृक्ष–पु., मेषशृङ्गी (वै. नि.)
पादशलाका–स्त्री., शलाकावत् पादास्थीनि । ते च द्वे (च. शा. ७ अ.)
पादशाखा–स्त्री., पादाग्रम् (वै. नि.)
पादशिष्टजल–न., चतुर्थांशावशिष्टपक्कजलम् । तद्गुणः–त्रिदोषनाशित्वं (रा. व. १४.)
पादशृङ्ग–स्त्री., मेषशृङ्गी । (वै. नि.)
पादशोथ–पु., पादगतशोफः । यथा 'अनन्योपद्रवकृतः शोथः पादसमुत्थितः । पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयम् (मा. नि.)
पादस्फोट–पु., पादरोगविशेषः (रा व. २०.)
पादहीनजल–न., चतुर्थांशेन हीनम् पक्कजलम् वातजरोगमात्रे हितम् (रा. व. १४.)
पादहीना–स्त्री., आकाशलता (वै नि.)
पादाग्र–न,, प्रपदम्, 'पादाग्रं प्रपदं मतम्' (रा. व. १८.)
पादाभ्यङ्ग–पु. पादयोस्तैलमर्दनम् । स्रोतसां मार्दवकरः कफवातविनाशनः । धातूनां पुष्टिजननो मृजावर्णबलप्रदः । निद्राकरो देहसुखः स्वरव्यः पादरोगहा। पादत्वङ् मृदुकर्ता च पादाभ्यङ्गः प्रशस्यते (तोड.)
पादू–स्त्री., पादुका (अम.)
पादोत्पल–पु., द्रुमोत्पलवृक्षः (वै. नि.)
पानकर्पूर–पु., स्वनामख्यातवृक्षः ।
पानगोष्ठिका–स्त्री., सुरापानालयम् । (अम.)
पानपात्र–न., सुरापानपात्रम् (अम.)
पानभाजन–न., सुरापानपात्रम् (त्रिका.)
पानवणिक्–पु., शौण्डिकः (हे. च.)
पानमात्रा–स्त्री., सुरापाने प्रशस्तमात्रा । यथा ' यावन्न चलते दृष्टिः यावन्न क्षोभते मनः । पानमात्रा परा तावत् विपरीता विषोपमा (शौनकः)
पानस–न., पनसमद्यम् (जटा.)
पानील–न., पानपात्रम् (श. च.)
पानीयकुक्कुट–पु., जलकुक्कुटः (वै. नि.)
पानीयचूर्णिका–स्त्री., वालुका (वै. नि.)
पानीयतण्डुल–(ली)–न., स्त्री., कच्चाटशाकः (वै. नि.)
पानीयनकुल–पु., जलबिडालः (हे. च.)
पानीयपृष्ठज–पु., स्त्री., कुम्भीका (प. मु. र. मा.)
पानीयफल–न., मखान्नम् (भा. मु.)
हिं.—मखाना.
पानीयभक्तवटिका–स्त्री., ग्रहण्यधिकारे रसः ।

पानीयमूलक–न., सोमराजबीजम् (श. च.)
पानीयवर्णिका–स्त्री., वालुका (रा. व. ४)
पानीयशारु–पु.,पानीयकन्दभेदः (उत् – पाणिसारु प. मु.)
पानीयशाला(लिका)–स्त्री., उदकशाला (अम. वै. नि.)
पानीयशिरीषिका–स्त्री., जलशिरीषः (वै. नि.)
पानीयाभा(म्रा)–स्त्री., बल्वजा (रा. व. ८)
पानीयामलक–न., स्वनामख्यातक्षुपः (र. मा.) गुणाः–त्रिदोषघ्नं ज्वरघ्नञ्च (भा.) अम्लं स्वादु मलवर्धकं त्रिदोषज्वरघ्नं मुखशोधनञ्च (राज.)
पापघ्न–पु., तिलः (रा. व. १६)
पापघ्नी–स्त्री., तुलसीवृक्षः (वै. नि.)
पापशमनी–स्त्री., शमीवृक्षः (रा. व. ८)
पापोदक–न., विष्ठाकृमिकीटादियुक्तजलम् (अत्रि.)
पामघ्न–पु., गन्धकः (र. मा.)
पामघ्नी–स्त्री., कटुकी (रा. व. ६)
पामन–त्रि., कच्छुरोगी (अम.)
पामन्–न., पामरोगः (अम.)
पामरोद्धारा–स्त्री., गुडूची (श. च.)
पामारि–पु., गन्धकः (हे. च. र. सा. सं.)
पाय (य्य)–न., जलम् (विश्व.) परिमाणम् (अम.) पानम् (उणा.)
पार–पु., पारदः (अ. टी. सा.)
पारक् (ज्)–पु., सुवर्णम् (उणा.)
पारटीट–पु., प्रस्तरः (त्रिका.)
पारत–पु., पारदः (हे. च.)
पारतन्त्र्य–न., पराधीनता (मा. नि.)
पारदबन्धन–न., सारलौहम् (वै. नि.)
पारशव–न., लौहम् (वै. नि.)
पारश्वय–न., सुवर्णम् (वै. नि.)
पारसीकयमानी–स्त्री., तद्देशीययमानीविशेषा । खोरासनीयमानी । किरमानी ओवा इति महाराष्ट्रादौ (सि. यो. च. द. कृमिचि.) गुणाः–पारसीकयमानी तु यमानीसदृशी गुणैः । विशेषात् पाचनी रुच्या ग्राहिणी मादनी गुरुः (भा.)पारसीकयमानी तु तिक्तोष्णा कटुचोषणा । अग्निदीप्तिकरी वृष्या लघ्वी चैव प्रकीर्तिता । त्रिदोषाजीर्णकृमीनुत् शूलामस्य च नाशिनी (वै. नि.)
पारसीकवचा–स्त्री., श्वेतवचा खोरासनी वचा । गुणाः—हैमवत्युदिता तद्वत् वातं हन्ति विशेषतः (भा.)

पारसीकाश्व–पु., तद्देशजघोटकः ।
पारापत–पु., कपोतः (अ. टी. र.)
पारारुक–पु., प्रस्तरः (श. र.)
पारावतकलिका–स्त्री., महाज्योतिष्मतीलता (वै. नि.)
पारावतशकृत्–न., कपोतविष्ठा, गुणाः—ग्रथितरक्तदोषघ्नम् (वा. चि. २ अ.)
पारावताङ्घ्रि–स्त्री., ज्योतिष्मतीलता (प. मु. र. सा. सं.) महाज्योतिष्मतीलता (रा. व. ३) काकजङ्घा (रा. व. ४)
पारावताङ्घ्रिपिच्छ–पु., वङ्गदेशीयपारावतः ।
पारावती–स्त्री., लवलीफलम् (मे.)
पारावर–पु., भूधामनवृक्षः (वै. नि.)
पारि–न., सुरापानपात्रम् (त्रिका.)
पारिणाम–त्रि., वयःपरिणतिजन्यम् (वा. उ. ३९ अ.)
पारि(री) न्द्र–पु., सिंहः । अजगरसर्पः (हे. च. । त्रिका.)
पारिभद्रकजटा–स्त्री., पालिधामूलम् (च. द. गुल्म च.) ' व्याघ्रीकिंशुकपारिभद्रकजटा । '
पारिभद्ररस–पु., दद्रुकुष्ठे हितः (रस चि.)
पारिभ(भा) व्य–न., कुष्ठम् (प. मु.)
पारिश–(स)–पु., अश्वत्थवृक्षः (भा.) (वै. नि.)
पारिहार्य–न., कुष्ठौषधम् (वै. नि.)
पारी–स्त्री., जातीपत्री (वै. नि.) दोहनी पानपात्रम् (त्रिका.) परागः (विश्वः)
पारीश(ष)–पु., प्लक्षवृक्षः । गर्दभाण्डवृक्षः । ह्रस्वप्लक्षभेदः । अश्वत्थविशेषः । गजदन्तसहोरा इति लोके
हिं.—परशपिपुल.
गुणाः–पारिषो दुजरः स्निग्धः कृमिशुक्रकफप्रदः । फलेऽम्लो मधुरो मूले कषायस्वादुमज्जकः (भा.)
पारुष–पु. नखम् (वै. नि.)
पारु(रू)षकतैल–न., वातरक्ते तैलम् ।
पार्घट–न., भस्म (हारा.)
पार्थकी–स्त्री., क्षीरशुक्ला (श. चि.)
पार्थवल्क–पु., अर्जुनत्वक् । अर्जुनघृते प्रयोज्या ।
पार्थिवज–न., अर्जुनत्वक् (च. द. हृद्रोगचि.)
पार्वण–पु., हरिणभेदः (श. च.)
पार्वतीयसम्भूत–पु., गन्धकः (र. सा. सं. पार्वतीरसे)
पार्श्वक–न., पार्श्वास्थि (रा. व. १८)
पार्श्वपिप्पल–न., पु., हरीतकीभेदः । पारीषवृक्षः । गजहड इति पश्चिमदेशे (भा. म. ४ भ. योनिरोगचि. चि. क. क. वन्ध्याप्रतिकारे)
पार्श्वसंहति–स्त्री , पार्श्वभागः (भा.)

पार्श्वारुण–पु., बालरोगभेदः (वै. नि.)
पार्श्वास्थि (कास्थि)–न., चतुर्विंशति पञ्जरास्थीनि (रा. व. १८ । च. शा. ७ अ.)
पार्श्वोदरप्रिय–पुं., कर्कटः (हे. च.)
पाल–पुं., चित्रकवृक्षः (वै. नि.) निष्ठीवनपात्रम् (हे. च.)
पालकविष–न., तन्नामकस्थावरकन्दविषम् (सु. कल्प.- २ अ.)
पालकाप्य–पुं., चरकोक्त., मुनिविशेषः (च.) धन्वन्तरिः (त्रिका.)
पालङ्की–स्त्री., कुन्दरुः (अ. टी. भ.) उपोदिका । पालङ्कः
पालघ्न–(घ्न्य)–पुं., छत्राकः (अम) जलतृणम् । छत्रातिच्छत्रम् (श. र.)
पालन–न., नवप्रसूतायाः गोःदुग्धम् (श. च.)
पालनिका (ल [लि] नी)–स्त्री., त्रायमाणा (रा. व. ५- वा. चि. १. अ.)
पालास–पुं., पलासवृक्षः (वै. नि.)
पालिहिर–पुं., मण्डलीसर्पभेदः (सु. कल्प. ४ अ.)
पालिधा–स्त्री , पारिभद्रवृक्षः (जयमङ्गलरसे)
पालि (ली)शोष–पुं., कर्णरोगविशेषः (वा. उ. १७ अ)
पालीकुट–पुं., चित्रकवृक्षः (वै. नि.)
पावकमणि–पुं., सूर्यकान्तमणिः (वै. नि.)
पावकमन्थन–पुं., अग्निमन्थक्षुपः (वै. नि.)
पावकारणि–पुं., अग्निमन्थक्षुपः (प. मु.)
पावकाह्व–पुं., अग्निमन्थः (वै. नि.)
पावकोष्मा (न)–पुं., सूर्यकान्तमणिः (वै. नि.)
पावास–पु., क्षुद्रपणसः (वै. नि.)
पाशवपालन–न., घासः (श. च.)
पाशी (इन्)–पु., वरुणवृक्षः (अम. रस. र. उदरचि) -वह्निभल्लातकरसे)
पाश्चात्याकरसम्भव–न., शाम्बरलवणम्
पाषाणकुट्ट (न्द) क–पु., पाषाणभेदकः (वै. नि.)
पाषाणजतु–न., शिलाजतु (भैष. शोथचि. रसाभ्रमण्डूरे)
पाषाणभित्–पु., पाषाणभेदः (र. मा.) कुलत्थः । (एरण्डसप्तके) करज्योऽपिपाषाणभेदः (वै. नि.)
पाषाणरोग–पु., अश्मरीरोगः (चद. अश्मरीचि)
पाषाणवज्रकरस–पु., अश्मर्यधिकारे रसः (रस. र.)
पाषाणविष–न., दारुमोचभेदः (प. मु.)
पाषाणसम्भववल्ली–स्त्री., प्रवालम् (वै. नि.)
पिकदेव– }
पिकप्रिय– } पु., आम्रवृक्षः (वै. नि.)

पिकप्रिया–स्त्री., महाजम्बूवृक्षः । (रा. व. ११)
पिकबन्धु–पु., आम्रवृक्षः (त्रिका.)
पिकभक्षका(क्ष्या)–स्त्री., भूमिजम्बूवृक्षः (रा. व. ११)
पिकमहोत्सव–पु.,आम्रवृक्षः (वै. नि.)।
पिकवल्लभ–पु., आम्रवृक्षः (भा.)
पिकाङ्ग–पु., चातकपक्षी (श. च.)।
पिकाक्ष–पु., कोकिलाक्षः (रा. व. २३)। रोचनी वनस्पतिः (श. च.)
पिकुरस–पु., मद्यम् (वै. नि.)
पिक्क–पु., करिपोतः (श. मा.)
पिङ्ग–न., शोणपित्तलम् (वै. नि.) बालकः । हरितालः । पु., वनमूषिकः । (रा. व. १०. १३. १९ त्रि., पिङ्गलवर्णः
पिङ्गकपिशा–स्त्री., तैलपायिका (हे. च.)
पिङ्गचक्षु–पु., कुम्भीरः । (हे. च.)
पिङ्गभास–पु., गोधेरकजातिभेदः । (सु. कल्प. ८ अ.)
पिङ्गलाक्ष–पु., पिङ्गलापक्षी (वै. नि.)
पिङ्गलिका–स्त्री., बकपक्षी (जटा.) मक्षिकाविशेषः (सु. कल्प. ८)
पिङ्गवर्णक–न., गर्जरमूला (वै. नि.)
पिङ्गस्फटिक–पु., गोमेदमणिः (रा. व. १३)
पिङ्गा–स्त्री., वंशम् । वंशलोचनम् (रा. व. ६)शमीवृक्षः (र. मा.) हिङ्गुः (मे) गोरोचना (रा. व. १२) हरिद्रा (रा. व. २३) रक्तवाहिनाडी (वै. नि.)
पिङ्गाण–पु., काचः (वै. नि.)
पिङ्गाश–पु., मत्स्यविशेषः । न., स्वर्णम् (मे.)
पिङ्गाशी–स्त्री., नीलीवृक्षः (मे.)
पिङ्गास्य–पु., पिङ्गाशमत्स्यः (श. र.)
पिङ्गाह्व–पु., पक्षिविशेषः (वै. नि.)
पिङ्गी–स्त्री., शमीवृक्षः (प. मु.)
पिच (चि) ण्ड–पु., उदरम् (रा. व. १८) पशुपृष्ठभागः (हे. च.)
पिचव्य–(व्या)–पु. स्त्री., कार्पासी (हे. च.)
पिचिण्डिका–स्त्री., इन्द्रबस्तिः (हे. च.)
पिचिण्डिल–त्रि., लम्बोदरः ।
पिचुतु (तू) ल–न., कार्पासी (त्रि. का.)
पिचुल–पु., झावुकवृक्षः (अम.) कार्पासवृक्षः । जलकाकः । तिलकवृक्षः । हिज्जलवृक्षः (मे.) तूलम् (अ. टी. सा.)

पिच्चक (ट)–न., वङ्गम् (प. मु.) (रा. व. १२) शीषकम् (मे.)
पिच्चटक–पु., नेत्ररोगः (मे.)
पिच्छ–(क)–पु., मोचरसः (अम.) लाङ्गुलम् (मे.) न., मयूरपिच्छम् (अम.)
पिच्छपादी–त्रि., तन्नामकपादरोगाक्रान्तः (अश्वः) 'रोमान्तः शूयते यस्य समन्तान्नैव पच्यते । क्लेदश्च पिच्छिलो यस्य पिच्छपादीति तं विदुः (ज. द. ३९ अ.)
पिच्छभार–पु., मयूरपिच्छम् । (वै. नि.)
पिच्छल–पु., मोचरसः । आकाशवल्ली । बहुवारवृक्षः । (वै. नि.)
पिच्छलच्छदा (दला)–स्त्री., उपोदिका । बदरीवृक्षः ।
पिच्छलत्वक्–पु., नागरङ्गवृक्षः । स्त्री., नागरङ्गवल्कलम् (वै. नि.)
पिच्छवाण–पु., रणगृध्रः । (रा. व. १९)
पिच्छितिका–स्त्री., शिंशपावृक्षः । (श. च.)
पिच्छिलक–पु., धन्वनवृक्षः । (रा. व. ९) शाल्मलीवृक्षः । (वै. नि.)
पिच्छिलगुणकर्म–न., पिच्छिलद्रव्यस्य गुणकर्म । तच्च बल्यं सन्धानं श्लेष्मलं गुरु । (सु.)
पिच्छिलच्छदा–स्त्री., उपोदकी (प. मु.)
पिच्छिलत्वक्–पु., धन्वनवृक्षः । (प. मु.) (र. मा.) नागरङ्गवृक्षः । (त्रिका)
पिच्छिलबस्ति–स्त्री., निरूहबस्तिभेदः । (भा.)
पिञ्ज–पु., कर्पूरः । (रा. व. १२) न., बलम् (मे.)
पिञ्जक–न., हरितालः । (र. सा. सं.)
पिञ्जट–पु., पिच्चटरोगः । (श. र.)
पिञ्जन–न., तूलधनुः । (त्रिका.)
पिञ्जल–न,, हरितालम् (प. मु.) कुशपत्रम् (धरणी) पु., जलवेतसम् । (वै. नि.)
पिञ्जा–स्त्री., हरिद्रा, तूलकः (मे.)
पिञ्जिका–स्त्री., तूलनालिका (त्रिका.)
पिञ्जूल–पु., तूलवर्तिका (वै. नि)
पिञ्जूष–पु., कर्णगूथम् (हे. च.)
पिञ्जेट–पु., नेत्रमलः (श. र.)
पिटक–पु., विस्फोटकः (मे.)
पिट (टि) का–स्त्री., पिडका (रा. व. २०) मसूरिका (वैद्यकम्)
पिटङ्काकी–स्त्री., कटुवृन्दावनः (वै. नि.)

पिटङ्काश–पु., मत्स्यभेदः । पर्वतोर्मिमत्स्यः (श. कल्प.)
पिटङ्कोटि (की)–स्त्री., इन्द्रवारुणीलता (प. मु.)
पिट्टक (का)–न., स्त्री., दन्तकिट्टकः (श. र.)
पिठ–पु., पीडा ।
पिंडकालिका–स्त्री., नेत्रमलः (च. रक्तपित्त. नि.)
पिण्डक–पु., पिण्डमूलकः । पिण्डालुः (रा. व. ७) 'पिण्डको वातलः श्लेष्मी ग्राही वृष्यो महागुरुः' (अत्रि. १६ अ.) शिलारसः । (ल.) न., गन्धबोलः । तीक्ष्णलौहम् (रा. व. ६।१३) नवनीतम् अन्नम् ।
पिण्डखर्जूर–पु., स्वनामख्यातवृक्षः (प. मु.)
पिण्डगो (ड) स–पु., गन्धबोलः (भा. अ. टी. रा.)
पिण्डतगर–पु., तगरपुष्पम् (वै. नि.)
पिण्डपाद–(द्य)–पु., हस्ती (त्रिका.)
पिण्डपुष्प–न., अशोकपुष्पम् । जपापुष्पम् (वै. नि.) पद्मपुष्पम् (मे.) तगरपुष्पम् (श. र.) पु., दाडिमवृक्षः (त्रिका.)
पिण्डपुष्पक–पु., शाकविशेषः । वास्तूकः (श. मा.)
पिण्डयोनि–स्त्री., योनिरोगभेदः (च. द. योनिरोगचि.)
पिण्डबीज–पु., कर्णिकारवृक्षः (रा. व. ९)
पिण्डशर्करा–स्त्री., खटीशर्करा (वै. नि.)
पिण्डहरिद्रा–स्त्री., ग्रन्थिहरिद्रा (वै. नि.)
पिण्डा–स्त्री., कस्तूरीभेदः । सा कुलत्थिकायाः क्वचित् स्थूला (रा. व. १२) हरिद्रा । वंशपत्रीतृणम् (भा.) खर्जूरीवृक्षः । पिण्डायासः (रा. व. १३)
पिण्डात–पु., सिह्लकः (र. मा.) गन्धरसः (रस. र. पिप्पल्यादिलौहे.)
पिण्डापा–स्त्री., नाडीहिङ्गुः ।
पिण्डाभ्र–न., करका (श. मा.)
पिण्डाम्ल–न., चाङ्गेरीलिकुचाम्लवेतसजम्बीरकर्पूरनारङ्गफलषाडवसमभागमिश्रितम् (रा. व. २२)
पिण्डार–पु., विकङ्कतवृक्षः (वै. नि. २ भ.) ज्वरवृक्षविशेषः (मे.) कृष्णमदनवृक्षः न., फलशाकविशेषः । फलगुणाः–'पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारकम् । पाके लघु विशेषेण विषशान्तिकरं लघु (भा. पू. १ भ. शा. व. ज्योतिष्मतीनस्ये.)
पिण्डाह्व–न., तगरपादुकम् (र. सा. सं.)
पिण्डितैल–न., शिलारसः (वै. नि.)
पिण्डिनी–स्त्री., गिरिकर्णिका (रा. व. २३.)
पिण्डिरिका–स्त्री., मञ्जिष्ठा, तण्डुलीयकम् (वै. नि.)
पिण्डिला–स्त्री., कर्कटीभेदः । गोडुम्बा । (श. च.)
पिण्डितकफल–न., कृष्णमदनफलम् पाण्डुवर्णमदनफलम् (सु. चि. २५अ.) मरुबकफलम् (वै. नि.)
पिण्डितरु–पु., महापिण्डिवृक्षः (रा. व. ९.)
पिण्डीर–पु., दाडिमवृक्षः (त्रिका.) समुद्रफेनः (अ. टी. रा. । नकुल १३अ.)
पिण्डोद्भवा–स्त्री., सुरा (वै. नि.)
पिण्या(का)–स्त्री., ज्योतिष्मतीलता । (प. मु. वै. नि.)
पितृतर्पण–न., तिलः (रा. व. १६.)
पितृप्रसू–स्त्री., सायङ्कालः (अम.)
पितृभोजन–पु., माषः (रा. व. १६.)
पित्तकफज्वर–पु., पित्तश्लेष्मज्वरः
पित्तकर–(कृत्)–त्रि, पित्तजनक द्रव्यम् । वंशकरीरादिः
पित्तघ्नी–स्त्री., गुडूची (श.च.)
पित्तप्रवर्तन– (न.,) ऊर्ध्वाधोमार्गेण पित्तनिर्गमम् ।
पित्तरेता–त्रि., पित्तभूयिष्ठशुक्रम् (रस. र. मूत्राघातचि.)
पित्तवर्ग–पु., पञ्चविधपित्तानि । तानि च मत्स्यगवाश्वरुरुबर्हिजानि । मतान्तरे वाराहच्छागमाहिषमात्स्यमायूरजानि ।
पित्तस्राव–पु., नेत्रसन्धिगतरोगः । यथा 'पीतभासं नीलमुष्णं जलाभं पित्तस्रावं स स्रवेत् सन्धिमध्यात् (सु. उ. २अ.)
पित्तहा–पु , पर्पटकः (त्रि.,) पित्तघ्नम् (वै. नि.)
पित्तानुबंध–पुं., पित्तानुबलः (वा. चि. ३ अ.)
पित्ताण्ड–पु., अश्वस्य अण्डस्कन्दरोगः (ज. द. ५० अ.
पित्तिका–स्त्री., शतपदीभेदः (सु. कल्प. ८ अ.)
पित्रर्ह–पु., माषकलायः (मे.)
पिनस–पु., नासारोगः। अपीनसम् (निदा.)
पिपासु–त्रि., तृष्णातुरः ।
पिपिली–स्त्री., पिपीलिका (वै. नि.)
पिप्पटा–स्त्री., शर्करा गुडशर्करा (त्रि का.)
पिप्पलपर्णी–स्त्री., मेषशृङ्गी ।
पिप्पलीखण्ड–पु., खण्डपिप्पली ।
पिपल्याद्यलेह–पु., हिक्कायाम् कासे च लेहः । पिप्पल्यामलकीद्राक्षाकोलास्थिममधुशर्करा विडङ्गपुष्करैर्युक्तो लेहो हन्ति सुदुर्जयम् । (र. स. चि. । रस. र.) अन्यः उदरे पिप्पलीमूलपिण्डाभत्रिकत्रयेन्दुसैन्धवैः । योजितो नियतं हन्ति लेहः सर्वोदरामयम् । पिण्डाभः गन्धरसः । इन्दुः कर्पूरं । सर्वसमं लौहचूर्णं ग्राह्यम् (रस. र.)

पिप्पिका-स्त्री., दन्तमलः (त्रिका.)
पियारक-न., स्वनामख्यातफलम् । (अर्क.)
पियालास्थिज-पु., पियालफलमज्जा ।
(भैष. शूलचि. पूगखण्डे)
पिलुक-पु., पीलुवृक्षः (श. र.)
पिलुनी(पर्णी)-स्त्री., मूर्वा (र. मा.)
पिल्लका-स्त्री., करेणुका (श. मा.)
पिशाचघ्न-पु., श्वेतसर्षपम् (प. मु.)
पिशाचद्रु(वृक्ष)-पु., शाखोटवृक्षः (त्रिका. । रमा.)
पिशितरोहिणी-स्त्री., मांसरोहिणी (वै. नि.)
पिशितोदक-न., कुङ्कुमम् (वै नि.)
पिशिनी (पिशि)-स्त्री., जटामांसी (रा. व. १२)
पिशितक-पु., गोधूमः ।
पिशु(ना)-स्त्री., स्पृक्का (रा. व. ११) **ना**-ग्रन्थिपर्णी
(वै. नि.)
पिष्टपाकभृत्-न., पिष्टपचनपात्रम् (अम. हे. च.)
पिष्टपाचक-त्रि., पिष्टकपाककारी ।
पिष्टपायस-पु., स्त्री., कृशरा (प. मु.)
पिष्टपूर-पु., घृतभर्जितगोधूमकृतखाद्यद्रव्यम् (त्रिका.)
पिष्टयोनि-स्त्री., खर्परपोलिका (वै. नि.)
पिष्टवर्ति-स्त्री., मुद्गादिकृतपिष्टकभेदः ।
पिष्टवान्-त्रि., शुक्रम् (भा. ने. रो. चि.)
पिष्टवैकृत-न., पिष्टान्नम् (वै. नि.)
पिष्टसौरभ-न., चन्दनम् (हारा.)
पिष्टात-पु., किङ्किरातः (त्रिका.)
पिस्त-न., पेस्ता इति प्रसिद्धं काबेलदेशीयफलम् । गुणाः– उष्णं दौर्बल्यहरं । अस्य वल्कलं अजीर्णेहितम् ।
पीच-पु., अधरचिबुकम् (वै. नि.)
पीडा-स्त्री., पीडनम् (अम.) शारीरादिबहुविधरोगः (सु.)
पीडाभञ्जीरस-पु., शूलाधिकारे रसः (रस. चि.)
पीतकटुकी-स्त्री., पीतरोहिणी (प. मु.)
पीतकदली-स्त्री., स्वर्णकदली (वै. नि.)
पीतकन्द-न., गर्जरमूलम् (रा. व. ७)
पीतकरवीर-पु., पीतपुष्पकरवीरवृक्षः । गुणैः साधारण करवीरतुल्यः (रा. व. १०)
पीतकाञ्चन-पु., पीतपुष्पकाञ्चनभेदः । गुणाः–पीतस्तु काञ्चनो ग्राही दीपनो व्रणरोपणः । तुवरो मूत्रकृच्छ्रस्य कफवारवोश्च नाशनः (वै नि.)
पीतकायता-स्त्री., पित्तजरोगः ।
पीतकावेर-न., कुङ्कुमम् । पित्तलम् । (मे.)
पीतकूष्माण्ड-न., वैदेशिककूष्माण्डः । गुणाः–'अपरं पीतकूष्माण्डं गुरु पित्तकरं परम् । अग्निमान्द्यकरं स्वादु श्लेष्मलं वातकोपनम् । (आत्रेयः)
पीतगन्धक-पु., गन्धकः (वै. नि.)
पीतघोषा-स्त्री., पीतपुष्पघोषालता (प. मु.)
पीतचम्पक-पु., स्वर्णचम्पकम् । (जटा.)
पीतजाति-स्त्री., स्वर्णजातिवृक्षः (वै. नि.)
पीतझिण्टी-स्त्री., पीतपुष्पझिण्टीक्षुपः । (वै. नि.)
पीततण्डुलिका-स्त्री., सर्जवृक्षः । (वै. नि.)
पीतदन्तता-स्त्री., पित्तजन्यदन्तरोगः ।
पीतदुग्धा-स्त्री., स्वर्णक्षीरी (हिं–चौक) क्षीरिणी (रा. व. ५) (वै. नि.)
पीतद्रुम-पु., हरिद्रावृक्षः (वा चि. ६)
पीतनखता-स्त्री., पित्तजन्यनखरोगः (वै. नि.)
पीतनाश-पु., क्षुद्रपणसः (वै. नि.)
पीतनी-स्त्री., शालपर्णी (मद.)
पीतनेत्रता-स्त्री., पित्तजनेत्ररोगः (भा.)
पीतपराग-पु., पद्मकेसरम् (वै. नि.)
पीतपर्णी-स्त्री., वृश्चिकाली (श. च.)
पीतपाकी (इन्)-पु., वाट्यालकभेदः (च. चि ८ अ.)
पीतपाठी (इन्)-पु., चित्रकवृक्षः (वै. नि.)
पीतपादप-पु., पृथुशिम्बश्योणाकवृक्षः (रा. व. ९.) पीतलोध्रवृक्षः (वै. नि.)
पीतपादा-स्त्री., सारिका (हे. च.)
पीतपिष्ट-न., शीषकम् (वै. नि.)
पीतपुष्पका-स्त्री., कर्कटीभेदः (वै. नि.)
पीतपृष्ठा-स्त्री., वराटिकाभेदः (रा. व. १३)
पीतप्रसव-पु., पीतकरवीरवृक्षः (रा. व. १०)
पीतफेन-पु., अरिष्टकवृक्षः (वै. नि.)
पीतबलि-पु., गन्धकः (वै. नि.)
पीतबालुका-स्त्री., हरिद्रा (त्रिका.)
पीतभस्म-न., भस्मीकरणेन पारदस्य पीतीकरणम् (र. सा. सं.)
पीतमणि-पु., पुष्परागमणिः (रा. व. १३)
पीतमण्डलदर्शन-पु., पित्तजन्यरोगः (निदा.)
पीतमण्डूक-पु., स्वर्णमण्डूकः (वै. नि.)
पीतमस्तक-पु., वृद्धश्येनपक्षी (वै. नि.)
पीतमुण्ड-पु., हरिणभेदः (वै. नि.)

पीतमूली-स्त्री., रेचकमूलविशेषः। रेउचिनि इति लोके। 'गन्धिनी पीतमूली च बल्या सा मृदुरेचनी। हन्त्यजीर्णमतीसारं वह्निमान्द्यमरोचकम् । विट्सङ्गं शीतपित्तञ्च दुष्टव्रणविरोहणी (अर्वाचीनाः)

पीतरत्न (क)—न., मणिविशेषः। पोखराज इति लोके (भा. पू. १ भ. रत्न. व.)

पीतरस-पु., कशेरुः (प. मु.)

पीतरोहिणी—स्त्री., पीतकटुकी (प. मु.) काश्मरी (भा.)

पीतल (क)-न., रीतिः। (रा. व. १३) पीतवर्णः। (वै. नि.)

पीतलोह—न. पित्तलम्। (हे. च.)

पीतवल्ली-स्त्री., आकाशलता। (वै. नि.)

पीतबीजा-स्त्री., मेथिका (रा. व. ६)

पीतशा (सा) ल-(क)-पु., असनवृक्षः। अस्य त्वक्-क्वाथः उदरामयघ्नः प्रलेपः नाडीव्रणे हितः।

पीतशालि-पु., सूक्ष्मशालिः। (रा. व. १६)

पीतसहाचर-पु., पीतझिण्टी। (च. द. वा. व्या. म. प्रसारणीतैले)

पीतसारि—न., स्रोतोञ्जनम् (श. च.)

पीतस्कन्ध-पु., शूकरः। (वै. नि.)

पीतस्फटिक-पु., पुष्परागमणिः। (प. मु.)

पीतस्फोट-(टा)-पु., स्त्री., पीतवर्णस्फोटकः। वै. नि. पामा (रा. व. २०-१५)

पीताभ्र-न., पीतवर्णाभ्रभेदः। (रा. व. १३)

पीतावलोकन—पु., पित्तजन्यदृष्टिरोगः

पीताश्मा (इन्)-पु., पुष्परागमणिः (रा. व. १३)

पीति—स्त्री., पानम्। (रा.व. २०) पु., अश्वः (अम) करिशुण्डी (श. च.)

पीतिनी-स्त्री., शालपर्णीक्षुपः (रा. व. ४)

पीती (इन्)-पु., अश्वः (अम.)

पीथ—न., घृतम् (उणा.) जलम् (हे. च.)

पीनद्रु-पु., सरलवृक्षः (रा. व. १२)

पीनसा—स्त्री., कर्कटी (रा. व. ७)

पीनस्कन्ध-पु., वनशूकरः। महिषः (वै. नि.)

पीपरि-पु., ह्रस्वप्लक्षः (रा. व. ११)

पीयु-पु., काकः। पेचकः (त्रिका.) न., स्वर्णम्।

पीयूषसिन्धुरस-पु., अर्शोधिकारे रसः (रस. चि.)

पीयूषोत्था—स्त्री., शालुंमिश्रि इति ख्यातं द्रव्यम्, इयं बल्या।

पीलक-पु., पिपीलिका (हे. च.)

पीला—स्त्री., पिपीलिका (वै. नि.)

पीलुपत्रा-स्त्री., क्षीरमोरटी (वै. नि.)

पीलूषणा—स्त्री., पीलुफलम् (वै. नि.)

पीवा—स्त्री., जलम् (उणा.)

पुंजातुक-पु., जीवनवृक्षः (हारा.)

पुंध्वज-पु., मूषिकः (वै. नि.)

पुंलक्षणा-स्त्री., पुरुषलक्षणा नपुंसकस्त्री (वै. नि.)

पुंलिङ्ग-पु., शिश्नम् (हे. च.)

पुंवत्सा-स्त्री., पुरुषप्रसविनी (च. शा. ८ अ.)

पुंवृष-पु., गन्धमूषिकः (त्रिका.)

पुंश्चल-त्रि.,कच्छूरोगी (मे.)

पुंश्चिह्न—न., शिश्नम्

पुंस्त्वदा—स्त्री., लक्ष्मणाकन्दः (वै. नि.)

पुंस्त्वनाशन—पु., तृणभेदः (वै. नि.)

पुक्सी—स्त्री., नीली (शर.) पुष्पकलिका (मे.)

पुङ्ख-(क)-पु., शरमूलम्। शरपुङ्खामूलम् (रस. चि.)

पुङ्खिका-स्त्री., शरपुङ्खा (वै. नि.)

पुङ्गव-पु., ऋषभकः (रा. व. ५.)

पुच्छ-पु., न., लाङ्गूलम् (अम.) पिच्छम् (उणा.)

पुच्छटी—स्त्री., अङ्गुलीमोटनम् (त्रिका.)

पुच्छदा—स्त्री.,लक्ष्मणाकन्दः (रा. व. ८.)

पुच्छफल-पु., बदरीवृक्षः (प. मु.)

पुच्छमूल—न., पुच्छमूलतः मांसलभागः (ज. द. २अ.)

पुच्छा (च्छिका)—स्त्री., माषपर्णी (वै. नि.)

पुच्छाधोभागलोहित—पु., पेचकः (वै. नि.)

पुच्छी (इन्)पु., अर्कवृक्षः (रा. व. १०) कुक्कुटः (श. च.)

पुञ्जदल—न., सुनिषण्णशाकः (प. मु.)

पुटकिनी—स्त्री., पद्मिनी (हे. च.)

पुटग्रीव-पु., ताम्रकुण्डम् (मे.)

पुटपत्री—स्त्री., पत्रशाकभेदः (भैष. उपदंश चि.)

पुटराग—न., पत्राङ्गचन्दनम् (रा. व. १२)

पुटलौह—न., रुचकलौहम् (विदुरी) (प. मु.)

पुटस्राव-पु., नासास्रावरोगः (वै.नि.)

पुटस्वेद-पु., वालुकापुटकैः स्वेदः (ज. द. १८ अ.)

पुटालु-पु., कोलकन्दः (रा. व. ७.)

पुण्ड-(क)-पु., तिलकवृक्षः (जटा.)

पुण्डराह्व-पु., पुण्डरिकवृक्षः (वै. नि.)

पुण्डरी-(इन्)-पु., पुण्डरीकः (वै. नि.)

पुण्ड्रका-स्त्री., माधवीलता। तिलकवृक्षः। शुक्लजाती-पुष्पवृक्षः (वै. नि.)

पुण्ड्रशर्करा–स्त्री., पुण्ड्रेक्षुभवशर्करा गुणाः–स्निग्धा क्षीणे क्षयेऽरोचके च हिता (रा. व. १४.) पञ्चविधेक्षु शर्करा) वै. नि.)

पुण्ड्रसाह्व–पु., पुण्डरीकवृक्षः (वै. नि.)

पुण्यगन्ध–पु., महानागकेशरचम्पकवृक्षः (त्रिका.) (स्त्री., स्वर्णयूथिका (वै. नि.)

पुण्यदर्शन–पु., चाषपक्षी (रा. व. १९.)

पुण्यफल–पु., उद्यानम् (श. मा.)

पुण्यसागर–पु., पुष्करमूलम् (वै. नि.)

पुत्रजननी–स्त्री., पुत्रदात्रीलता (वै. नि.)

पुत्रपिच्छट–न., रङ्गम् (र. मा.)

पुत्रमञ्जरि–(री)–स्त्री., पुत्रदात्री (भा. म. ४भ. योनि.-रोगचि.

पुत्रशृङ्गी–स्त्री., अजशृङ्गी (रा. व. ९)

पुत्रश्रेणिका–स्त्री., भूम्यामलकी (वै. नि.)

पुनःखुरी (इन्)–पु., अश्वस्य पादरोगभेदः । लक्षणं– 'प्रसरन्ति खुरा यस्य अथवा पादुकोपमाः । पुनः-खुरीति तं विद्यादश्वं विह्वलगामिनम् (ज. द. ३९. अ.)

पुनर्नवागुग्गुलु–पु., वातरक्ते गुग्गुलुः (भा.)

पुनर्नवाद्यघृत–न., शोथाधिकारे घृतम् (रस. र.)

पुनर्नवाष्टक–पु., शोथे कषायः । 'पुनर्नवानिम्बपटोल-शुण्ठीतिक्तामृतादार्व्यभयाकषायः । सर्वाङ्गशोथोदर पार्श्वशूलश्वासान्वितं पाण्डुगदं निहन्ति (भैष. शोथ. चि.)

पुन्नाग–न., पुन्नागपुष्पम् । देववल्लभं राजचम्पकमिति लोके (सु. सू. ३८ अ. एलादिः ड.)

पुन्नागपुष्प–न., पुन्नागकुसुमम् (वै. नि.)

पुप्फुल–पु., जठरवातः (निदा.)

पुप्फुस–पु., वामपार्श्वस्थमलाशयः। कोष्ठम् (श. च.)

पुमान्–पु., पुन्नागवृक्षः, (रा. व. १०) पुरुषः (च.)

पुरच्छद–पु., उलपः । स्तनाग्रम् (वै. नि.)

पुरट-न., सुवर्णम् (विदग्धमाधवः)

पुरन्दर–न., चविका (श. च.) मरिचम् (वै. नि.)

पुरा–स्त्री., सुगन्धद्रव्यम् । मुरामांसी (रा. व. १२)

पुराणकिट्ट–न., लौहमलः (वै. नि.) (पाण्डु. चि.-मदेभसिंहसूते.)

पुरातनगुड–पु., प्राचीनगुडः। गुणाः–पित्तघ्नः वातरोगघ्नः त्रिदोषघ्नः रुच्यः हृद्यः संयोगेन ज्वरहरः तापघ्नः विण्मूत्रशोधनः अग्निकरः पाण्डुप्रमेहघ्नः स्निग्धः स्वादुतरः लघुः श्रमघ्नः पथ्यश्च (रा. व. १४)

पुरातनधान्य–न., संवत्सराद्युषितं धान्यम् । तच्च लघु अनभिष्यन्दि । उक्तञ्च 'वर्षातीतं सर्वमन्नं परित्यजति गौरवम् । ' (वा. सू. ६ हेमाद्रिः)

पुरीतत्–न., अन्त्रम् (रा. व. १८)

पुरीमोह–पु , धुस्तूरवृक्षः (श. मा.)

पुरीषकृमि–पु., विष्ठाजातकृमिः (मा. नि.)

पुरीषण–पु., विष्ठा (त्रि. का.)

पुरीषम–पु., माषः (त्रिका.)

पुरीषसङ्ग–पु., मलरोधः (च. सिद्धि. २ अ.)

पुरीषोष्णता–स्त्री., पित्तजन्यरोगः (भा.)

पुरुद–न., स्वर्णम् (भैष. भग. चि.)(व्रणगजाङ्कुशे)

पुरुदंशक–पु., हंसः (त्रिका.)

पुरुषक्षीरमोरट–पु., मोरटा (वै. नि.)

पुरुषव्याधि–पु., उपदंशः (भा.)

पुरुहूत–पु., इन्द्रयवः (वै. नि.)

पुरोगति–पु., कुक्कुरः । (धरणि)

पुरोडास(डाश)–पु. घृतम् । (त्रिका.) पिष्टकचमसी । सोमलतारसः । (हे. च.)

पुरोद्भवा–स्त्री., महामेदा । (र. मा.)

पुलाकी(इन्)–पु., वृक्षः । (हे. च.)

पुलिकिर–पु., सर्पः (वै. नि.)

पुलोमा–स्त्री., वचा (वै. नि.)

पुलोमही–स्त्री., अहिफेनः (वै. नि.)

पुषा–स्त्री., लाङ्गलीवृक्षः । (श. च.)

पुष्करक–न., पुष्करमूलम् । (चि. क. क. १ स्तबकः)

पुष्करणी–स्त्री., क्षुद्रजलाशयः (वै. नि.)

पुष्करव्याघ्र–पु., गृध्रः (वै. नि.)

पुष्करसागर–पु., पुकरमूलम् । (वै. नि.)

पुष्करस्रजौ–पु., अश्विनीकुमारौ । (श. र.)

पुष्कराङ्घ्रिज (क)–न., पुष्करमूलम् । (वै. नि.)

पुष्कराद्य–न., पुष्करमूलम् (वै. नि.)

पुष्कराद्या–स्त्री., स्थलपद्मिनी (रा. व. ५)

पुष्करुह–न., पुष्करमूलम् (वै. नि.)

पुष्कलक–पु., गन्धमृगः (मे.)

पुष्पकीट–पु., भ्रमरः । (त्रिका.)

पुष्पगण–पु., पुष्पवर्गः। यथा चतुर्धा स्थलपद्मानि सेवती गुलदावती । नेपाली च गुलाबश्च गुलावासश्च दण्डिनी । जाती यूथी राजवल्ली क्षुद्रयूथी त्रिधा मता । चम्पको नागचम्पश्च बकुलश्च कदम्बकः । कुन्दश्च शिवमल्ली च द्विकुब्जः केतकी द्विधा ।

किङ्किरातः कर्णिकारी द्वाशोकी बाणपुष्पकम् । कुरुण्टकश्चतुर्धा च तिलकोमुचकुन्दकः बन्धूकश्च चतुर्धा स्याजपा द्वेधा वसुन्धरी । अगस्तिर्दमनो मारुः पपरी बहुवर्णिका । द्विःपाटल सूर्यमुखी द्वाशः पुष्पगणस्त्रयम् (अर्कचि.)

पुष्पगन्ध–पु., यवनालवृक्षः । वेतसवृक्षः (वै. नि.)

पुष्पगवेधुका–स्त्री., नागबला (वै. नि.)

पुष्पघातक–पु., वंशः (श. मा.)

पुष्पचामर–पु., दमनवृक्षः (त्रिका.) केतकवृक्षः (श. मा.)

पुष्पजासव–पु., पद्मादिदशपुष्पोत्थासवानि । ' पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रमधूकप्रियङ्गुधातकीपुष्पदशमाः पुष्पासवा भवन्ति ' (च सू २५ अ)

पुष्पद्–पु., वृक्षः (हे. च.)

पुष्पनि(लि)क्ष–पु., भ्रमरः (श. च.)

पुष्पन्धय–पु., भ्रमरः । (रा. व. १९)

पुष्पपथ–पु., योनिः । भगः (त्रिका.)

पुष्पपाण्डु–पु., मण्डलिसर्पभेदः । (सु. कल्प. ४ अ.)

पुष्पपिण्ड–पु., अशोकवृक्षः (वै. नि.)

पुष्पफलशाक–पु., पुष्पशाकफलशाकमात्रः । अलाब्वादिः । ' पित्तघ्नान्यनिलं कुर्यात् तथा मन्दकफानि च । सृष्टमूत्रपुरीषाणि स्वादुपाकरसानि च ' ।

पुष्पमञ्जरी–स्त्री., घृतकरञ्जः । (वै. नि.)

पुष्पमास–पु., वसन्तसमयः । (रा. व. २१)

पुष्पमृत्यु–पु., देवनलवृक्षः । (वै. नि.)

पुष्परक्त–पु., सूर्यमणिवृक्षः । (श. च.)

पुष्परज–न., मकरन्दः । पुष्पपरागः । (वै. नि.)

पुष्परसाह्व (य)–न., मधु (रा. व. १४)

पुष्परसोद्भव–न., मधु (वै. नि.)

पुष्परेणु–पु., पुष्परागः (श. र.)

पुष्परोचन–पु., नागकेसरवृक्षः । (त्रिका)

पुष्पवती–स्त्री., रजस्वला (अम.)

पुष्पवर्षिणी–स्त्री., निर्गुण्डी (वै. नि.)

पुष्पवल्लभ–पु., मल्लिकापुष्पवृक्षः । (प. मु.)

पुष्पशर्करा–स्त्री., पुष्पोद्भूतशर्करा गुणाः–स्वादुः हृद्या शीतला गुरुः पित्तरक्तघ्नी च । (वै. नि.)

पुष्पसमय–पु., वसन्तकालः । (अम.)

पुष्पसिता–स्त्री., सितशर्करा । (वै. नि.)

पुष्पहासा–स्त्री., ऋतुमती स्त्री (श. च.)

पुष्पहीना–स्त्री., उदुम्बरवृक्षः । (श. च.) रजःशून्या (हे. च.)

पुष्पा (ह्वा)–स्त्री., बृहच्छतपुष्पा

पुष्पान्ता–स्त्री., धातकीवृक्षः । (वै. नि.)

पुष्पाम्भ–(र्क)–न., पु., सेवत्यादिपुष्पोत्थार्कः । 'सेवन्ती शतपत्री च वासन्ती गुलदावदी । चामला यूथिका चम्पा बकुलश्च कदम्बकः । छादयेत् केतकीपत्रैः ग्राह्याऽर्कौ गुरुमार्गतः । पुष्पार्क इति विख्यातो मरिचैः सहितं पिबेत् । गुणाः– मण्डलैकप्रयोगेण क्लीबोऽपि पुरुषायते । रोगानीकन्तु यक्ष्माणं हन्यात् (अर्क. चि.)

पुष्पिका–स्त्री., दन्तमलः (हारा.) मूत्रमार्गः । रक्तार्कवृक्षः (र. मा.) लिङ्गमलः (हे. च.)

पुष्पिणी–स्त्री., धातकीवृक्षः । तूलकः । स्वर्णकेतकी (वै. नि.)

पुष्पी–स्त्री., स्वर्णकेतकीवृक्षः (रा. व. १९)

पुष्पेन्द्रा–स्त्री., माधवीलता (वै. नि.)

पुष्पेभ–पु., नागकेसरवृक्षः (वै. नि.)

पुष्पोद्भवा–स्त्री., पुष्पशर्करा (वै. नि.)

पुष्यलक–पु., कस्तूरीमृगः (मे.)

पुस्तकशिम्बिका– स्त्री., पुस्तशिम्बी (वै. नि.)

पुस्तकाख्या– ,, ,, ,,

पुस्तमय– त्रि., वस्त्ररचितः (सुसू. ९)

पुस्तशिम्बी–स्त्री., शिम्बीलताभेदः

पुस्फुस–पु., फुस्फुसरोगः ।

पूगपीठ–न., निष्ठीवनपात्रम् (त्रिका.)

पूगपुष्पिका–स्त्री., विवाहपुष्पम् (त्रिका.)

पूगमण्ड–पु., प्लक्षवृक्षः (वै. नि.)

पूगरोट (क)–पु., हिन्तालवृक्षः (त्रिका.) खर्जूरविशेषः (वै. नि.)–वोट इत्यपि पाठो दृश्यते ।

पूगी (इन्)–पु., गुवाकवृक्षः (मद. १ व)(गी)–स्त्री., गुवाकम् ।

पूगीफल–न., गुवाकम् (वै. नि.)

पूजनी–स्त्री.,–चटका (भ.)

पूततृण–(दर्भ)–पु., सितदर्भः (रा. व. ८)

पूतन–पु., गुदकुन्दरोगः (वा. उ. २. अ.)

पूतनी–स्त्री., स्वनामख्यातसुगन्धशाकः । पुदिना इति सर्वत्र । (प. मु.) गुणाः– कामलाहरी, अरोचकघ्नी मूर्च्छाघ्नी वमिघ्नी । शुष्कवृक्षः–स्निग्धताकरः आग्नेयः उत्तेजकश्च । बालरोगविशेषः (सु. उ. २७ अ.)

पूतिक–न., पुरीषम् (रा. व. १८)

पूति (ती) क–पु., करञ्जविशेषः

पूतीकजा–स्त्री., गन्धमार्जाराण्डम् (वै. नि.)
पूतिकण्टक–पु., इङ्गुदीवृक्षः (वै. नि.)
पूतिकन्या–स्त्री., पूतिका (प. मु.)
पूति (ती) का–स्त्री., करजवृक्षः उपोदका (अ. टी. भ.)
पूतिकामक्षिका–स्त्री., पृथुमधुमक्षिकाविशेषः (वै. नि.)
पूतिकामुख–पु., शम्बूकम् (श. मा.)
पूतिकाह्व–पु., पूतिकरञ्जः (वै. नि.)
पूतिकेसर–पु., गन्धमार्जारः खाटासीति लोके । चन्दनादितैले प्रयोज्यः
पूतितैला–स्त्री., ज्योतिष्मतीलता (र. सा. सं. भैष. ज्वरकुञ्जरपारीन्द्ररसे)
पूतिद–पु., तरुबिडालः (वै. नि.)
पूतिदला–स्त्री., तेजपत्रम् (च. द. वातव्याधिचि. एलातैले)
पूतिपल्लवा–स्त्री., राजसुषवी (प. मु.)
पूतिपुष्प–पु., इङ्गुदीवृक्षः (प. मु.)
पूतिपुष्पिका–स्त्री., मधुमातुलुङ्गवृक्षः (प. मु.)
पूतिमज्जा–स्त्री., इङ्गुदीवृक्षः ।
पूतिमूषिका–स्त्री., छुछुन्दरी ।
पूतियुग्दला–स्त्री., गन्धतृणम् । रोहिषतृणम् (वै. नि.)
पूतिरक्त–पु., नासारोगभेदः (निदा.)
पूतिवर्वरी–स्त्री., वनतुलसी (वै. नि.)
पूतिवात–पु., बिल्ववृक्षः (र. मा.)
पूतिवृक्ष–पु., श्योणाकवृक्षः (प. मु.)
पूतिशाक–पु., बकवृक्षः (प. मु.)
पूतिशारिजा–स्त्री.,–गन्धरवद्वासः (त्रिका.)
पूती–स्त्री., पूतीकरञ्जः ।
पूत्यण्ड–पु., कस्तूरीमृगः (मे. ।) गन्धकीटः (मे. ।)
पूपला–स्त्री., पिष्टकविशेषः (हे. च.)
पूयारि–पु., निम्बवृक्षः (श. च.)
पूयास–न., पूयम् (वै. नि.)
पूर (रि) णी–स्त्री., शाल्मलीवृक्षः (अम.,)
पूरि (ली) का–स्त्री., पूरभरितापूप, तत्साधनं यथा- 'माषाणां पिष्टिकां युञ्जात् लवणार्द्रकहिङ्गुभिः । तया पिष्टिकया पूर्णा समिता कृतपोलिका । ततस्तैलेन पक्का सा पूरिका कथिता बुधैः । गुणाः– रुच्या स्वाद्वी गुरुः स्निग्धा बल्या पित्तास्रदूषिका । चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी । तथैव घृतपक्कापि चक्षुष्या रस ? (रक्त) पित्तहृत् (भा. पू. २भ.)
पूरित–न., अन्यम् (वै. नि.)
पूरुष–पु., मनुष्यः । पुरुषः (वै. नि.)

पूर्णक–पु., ताम्रचूडः (मे. ।)
पूर्णकोषा–स्त्री., यत्रपिष्टमयभक्ष्यद्रव्यम् (सु. चि. १०अ.)
पूर्णगर्भा–स्त्री., पूरणपोलिका । वै. नि.).
पूर्णचन्द्र (णाभ्र) रस–पु., ग्रहण्यां रसः (रस. चि. भैष.)
पूर्णिका–स्त्री., नासाछिन्नी पक्षी । (त्रिका.)
पूर्य (र्व)–पु., तूतवृक्षः (वै. नि.)
पूर्वसन्ध्या–स्त्री., प्रातःकालः ।
पूर्वाग्र–पु., लाजा । (श. चि.)
पूलक–पु., कटिग्रोथः ।
पूष–पु., पौषमासः । ब्रह्मदारुवृक्षः (अम.)
पूषक–पु., पारिशवृक्षः (रा. व. ९)
पूषा–स्त्री., पाठा (रा. व. ९)
पृक्का–स्त्री., पिडिङ्गनामशाकः (प. मु.) (हिं–पुरी) (भा. पू. १ अ.) (सु. सू. ३८ अ.) एलादिः । पृक्कापुष्पम् (च. द. वातव्याधिचि. म. प्रसारणीतैले । अष्टादशशतिकप्रसारणीतैले) लताकस्तूरी (वै. नि.)
पृथक्छद–पु., अक्षोटवृक्षः (वै. नि.)
पृथक्त्वचा–स्त्री., मूर्वा (र. मा.)
पृथक्पत्र–पु., सप्तपर्णवृक्षः (वै. नि.)
पृथगालु–पु., पिण्डालुः (प. मु.)
पृथिका–स्त्री., शतपदी (श. मा.)
पृथिवीकन्द–पु., भूकन्दः (वै. नि.)
पृथिवीगुणा–पु., अस्थिचर्मनखमांसरोमाणि (रस. र. ज्वरचि.)
पृथिवीपति–पु., ऋषभकौषधम् (मे.)
पृथिवीभव–न., मृत्तिकाक्षारः (वै. नि.)
पृथु–स्त्री., हिङ्गुपत्री (रा. व. ६) कृष्णजीरकः (प. मु. भा.) स्थूलकृष्णजीरकः । गुणाः— 'कटुतिक्तोष्णा वातगुल्मघ्नी आध्मानहरी दीपनी च ।' पुनर्नवा । मेदा । धारिणी (रा. व. २३) तरुबुध्नः (रा. व. २) अहिफेनः (श. र.)
पृथुकन्द–न., तृणविशेषः (वै. नि.) (विश्व)
पृथुकालुकी–स्त्री., रक्तालुभेदः (भा. पू. १ अ.)
पृथकील–पु., राजबदरः (रा. व. ११)
पृथुकृष्ण–पु., जीरकः (वै. नि.)
पृथुगन्धा–स्त्री., गन्धशठी (वै. नि.)
पृथुरोमा–स्त्री., मत्स्यभेदः (अर्क. चि.)
पृथुशिरा–स्त्री., कृष्णजलौका (सु. सू. १३)

पृथुशृङ्गक-पु., मेषविशेषः (वै. नि.)
पृथुस्कन्ध-पु., वनशूकरः (रा. व. १९)
पृथूदर-पु., मेषः (हारा.)
पृथ्वीकुवरक-पु , श्वेतमन्दारार्कः (रा. व. १०)
पृदाकु-पु., हस्ती । वृक्षः (उणा.) सर्पः (अम.) वृश्चिकः । व्याघ्रः (मे.)
पृश्नि-(श्नी)-स्त्री., पृश्निपर्णी (श. र. । सु. चि. १७ अ.)
पृश्निका-स्त्री., जलवृक्षविशेषः ।
पृषन्ति-पु., जलबिन्दुः ।
पृष्ठग्रन्थि-पु., गडुरोगः (रा. व. २०)
पृष्ठचक्षु-पु., कर्कटः (वै. नि.)
पृष्ठदृष्टि-पु., भल्लूकः (रा. व. १९)
पृष्ठरूक्ष-न., मरिचम् (वै. नि.)
पृष्ठशृङ्ग-पु., आरण्यछागः (हे. च.)
पृष्ठशृङ्गी (इन्)-पु., महिषः (श. र.) नपुंसकः (मे.) मेषः (वै. नि.)
पृष्ठक्षिति-पु., नन्दिवृक्षः (वै. नि.)
पृष्ठ्य-पु., अश्वः (अम.) न., पृष्ठास्थिसमूहः (वै. नि.)
पृष्णि-स्त्री., पार्ष्णिभागः (उणा.)
पेच-(क)-पु., उलूकपक्षी (अम. श. र.)
पेचकी (इन्)-पु., करी (श. र.)
पेचिल-पु., द्विरदः (त्रिका.)
पेचु-(क)-पु., मुचुकुन्दवृक्षः । केमुकवृक्षः (र. मा.) नाडीचशाकः । पेचुकः (त्रिका.)
पेचुका-स्त्री., पेचुकः । केमुकः (र. मा.)
पेचुनी(ली)-स्त्री., पेचुकशाकः (त्रिका.) केमुकः (र. मा.)
पेटक-(टिका)(टी)-पु., स्त्री., कुबेराक्षी (र. मा. भैष. बालचि. च. द. 'पेटी पाठामूलात्')
पेड-न., घृतम् । अमृतम् (उणा.)
पेडा-स्त्री., पेटिका । वनालुकः (वै. नि.)
पेय-न., अष्टविधान्नान्यतमम् (रा. व. २०) जलम् (मे.) दुग्धम् (श. च.)
पेयु(यू)ष-पु., न., नवप्रसूतायाः गोः सप्तदिनाभ्यन्तरीणदुग्धम् । 'आसप्तरात्रप्रसवात् क्षीरं पेयुषमुच्यते, (र. मा.) प्रत्यग्रघृतम् (वै. नि.)
पेर(रो)ज-न., स्वनामख्यातोपरत्नविशेषः । पेरोजा इति पारस्ये । तच्चभस्माङ्ग हरितभेदेन द्विविधम् । गुणाः– अतिकषायं मधुरं अतिदीपनं शूलादिहरं तत्संयोगेन स्थावरजङ्गमोभयविधविषं हन्याच्च (रा. व. १३.)
पेल-न., अण्डकोषः (हे. च.) सूक्ष्मांशः (वै. नि.)
पेली(इन्)-पु., घोटकः । (वै. नि.)
पेलुवास-पु.,कालसरः । (वै. नि.)
पेशस्कृत्-पु., कीटविशेषः । (वै. नि.) पेशस्कृत् इति (शब्दकल्पद्रुम.)
पेशि-स्त्री., डिम्बम् (अम.)। आढकादिद्विदला (वै. नि.) आम्रादिशलाटुः । खण्डीकृत आर्द्रकशलाटुः । 'हरितार्द्रकस्य शस्त्रकृत्तान्त्रा दीर्घाकारा अवयवाः पेशयः उच्यन्ते । (वा. चि. ७.)
पेशिकोष-पु., अण्डम् । (अटी.)
पेश्यण्ड-न., मांसगोलकः (वै. नि.)
पेहिता-स्त्री., प्रसारणी (वै. नि.)
पैङ्गि-पु., ऋषिविशेषः (च.)
पैज(ञ्जुष)-पु., कर्णम् । (हे. च.)
पैठर-न., स्थाली पक्वमांसादिः । (अम.)
पैत्तिकी-स्त्री., योनिव्यापद्विशेषः (वा. उ. ३३ अ.)
पैष्टी-स्त्री., विविधधान्यविकारजातं अम्लमद्यम् । गुणाः– कटूष्णा तीक्ष्णा मधुरा अतिदीपनी च । (रा. व. १४. ।) पैष्टी सन्दीपनी रुच्या कफकृद्वातनाशिनी । पित्तला पाण्डुरोगाणां कारिणी बहुधा मता (अत्रि. १९ अ.)
पोगण्ड-पु., अपोगण्डः । (हला.)
पोटाहिका-स्त्री., गुञ्जा (वै. नि.)
पोटिक-पु., विस्फोटकः (कश्चित्)
पोड्ड--पु., कपालास्थितलम् । (रा. व. १८.)
पोताण्ड-पु., अश्वस्य मुष्करोगभेदः । 'शूनौ पक्वौ तुरङ्गस्य मुष्कौ यस्य सवेदनौ । त्रिकस्तम्भेन युक्तस्य तस्य पोताण्डमादिशेत् । (ज. द. ५०अ.)
पोताधान-न., शिशुमीनपुञ्जः । गुणाः-पोतधानन्तु सर्वेषां सुस्निग्धं लघुरोचनम् (राज. ३५.)
पोतास-पु., कर्पूरविशेषः (रा. व १२.)
पोत्र-न., वज्रम् । शूकरमुखाग्रभागः (मे.)
पोत्रायुध-पु., शूकरः (रा. व. १९.)
पोत्रिदंष्ट्राज-न., शूकरदन्तजरत्नम् (वै. नि.)
पोत्री (इन्)-पु., शूकरः (वै. नि.)
पोदिका-स्त्री., कलम्बीशाकः (प. मु.)
पोल (क)-पु., कटिप्रोथम् (अ. टी. भ.)
पोलिका (ली)-स्त्री., पिष्टकभेदः । (त्रिका.) यथा 'कुर्यात् समितयातीव तन्वी पर्पटिका ततः । स्वेदयेत्तप्तके तान्तु पोलिकां तां जगुर्बुधाः । गुणाः– मण्डकवत् (भा.)

पोषयित्नु-पु., कोकिलः (उणा.)
पौष्टा (ष्ट)-पु., पूतिकरञ्जः (श. च.)
पौगण्ड-न., पौगण्डावस्था। तच्च षष्ठाब्दात् दशमाब्द-पर्यन्तम् (रा. व. १८)
पौतव-न., परिमाणम् (अ. टी. भ.)
पौतिनासिक्य-न., नासिकारोगः, पीनसम् (निदा.)
पौत्रिक-न., पुत्रिका नाम मक्षिकाभिरायोजितं घृतवर्णं-मधु (जटा.) अन्नजा मक्षिकाः पिङ्गाः पुत्रिका इति कीर्तिताः। तज्जातं मधु धीमद्भिः पौत्रिकं समुदाहृतम्। गुणाः– रूक्षं उष्णं रक्तपित्तदाहघ्नं घृतवर्णञ्च (रा. व. १४)
पौत्रिकशर्करा-स्त्री., पौत्रिकमधुकृतशर्कराः, गुणाः– तन्मधुतुल्याः (रा. व. १४)
पौनर्णाव-पु., सन्निपातज्वरभेदः। 'उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तात् नितान्तमुच्छ्वसिति। तं पौनर्णावजुष्ट विचित्रकष्टं विजानीयात्
(भल्लुकीतन्त्रम्)
पौरस-पु , नखीनामगन्धद्रव्यम् (वै. नि.)
पौरोगव-पु., पाकशालाध्यक्षः (अम.)
पौली-स्त्री., पोलिका। पाकावस्थागतयवादिः (अम.)
पौष-पु., वर्षस्य नवमः मासः (अम.)
पौष्करमूल- } **पौष्कराह्व**- } न., पुष्करमूलम् (मद. व. १)
पौष्प-न., पुष्परेणुः (वे. नि.)
पौष्प (ष्पि) क न., पुष्पाञ्जनम् (रा. व. १३ वै. नि)
प्रकर-न., अगरुकाष्ठम् (मे.)
प्रकशी-स्त्री., शूकरोगः (निदा.)
प्रकाण्ड-पु., तरोः स्कन्धपर्यन्तभागः (रा. व. २)
प्रकाण्डर-पु., वृक्षः (श. च.)
प्रकाश (क) ज्ञाता पु., कुक्कुटः (श. च.)
प्रकीर्ण-पु., न., पूतिकरञ्जः (रा. व. ९।) चामरम् (त्रिका.) अश्वः (मे.)
प्रकुल-न., सुन्दरदेहः (त्रिका.)
प्रकृतिभोजन-न., स्वाभाविकाहारः (च. सू. १५ अ.)
प्रक्रिया-स्त्री., औषधादिक्रिया। चिकित्सा
प्रक्वथित-त्रि., शृतम्। प्रमथ्यारूपेण शृतम्
(वा. चि. ८ अ.)
प्रखर-पु., सन्नाहः (त्रिका.) कुक्कुरः अश्वतरः (मे.)
प्रगण्ड-पु., कूर्परांसमध्यभागः (रा. व. १९)

प्रगतजानु-(क)-त्रि., दूरगतजानुः
प्रगन्ध-पु., पर्पटकः (रा. व. ५)
प्रग्राह-पु., तूलासूत्रम् (मे.)
प्रघण-पु., ताम्रपात्रम्। लौहमुद्गरः (मे.)
प्रघन-पु., मुद्गजातिभेदः (वै. नि.)
प्रचण्डमूर्ति-पु., वरुणवृक्षः (वै. नि.)
प्रचय-पु., उच्छ्रयः (भा.)
प्रचला-स्त्री., सरटः (वै. नि.)
प्रचलाकी (इन्)-पु., सर्पः। मयूरः (त्रि. का.)
प्रचलाङ्ग-पु., मयूरशिखा (वै. नि.)
प्रचलित-पु., सद्योव्रणविशेषः (वै. नि.)
प्रचार-पु., अश्वस्य श्लैष्मिकाक्षिरोगः। प्रच्छादयति यः दृष्टिं मांसं पर्यन्तवर्धितम्। प्रचारकाख्यं तं विद्या-न्नेत्ररोगं कफान्वितम्। (ज. द. ३० अ.)
प्रचेतसी-स्त्री., कट्फलवृक्षः। (रा. व. ९)
प्रचेल-न., पीतचन्दनम्। (श. च.) पीतमुद्गः (वै. नि.)
प्रचेलक-पु., अश्वः (श. मा.)
प्रचेलुक-पु., मानभेदः (त्रिका.)
प्रचोद(दि)नी-स्त्री., कण्टकारी (अम.) दुरालभा (वै. नि.)
प्रच्छर्दिका-स्त्री., वान्तिः (हे. च.)
प्रच्छादन-न., नेत्रच्छदः (ज. द. २ अ.) उत्तरीयवस्त्रम् (हे. च.)
प्रजल्प-पु., अतिभाषणम् (वै. नि)
प्रजादान-न., रौप्यम् (श. च.)
प्रजाहित-न., जलम् (श. मा.)
प्रज्ञविप्रिय-पु., षष्टिकधान्यम् (रा. व. १६)
प्रणा(ना)लस-पु., जीवशाकः। वास्तुकः (प. मु.)
प्रणालिका(ली)-स्त्री., जलनिर्गममार्गः। नस्यनलिका
(च. द. नस्याधिकारे)
प्रतना(नी)-स्त्री., गोजिह्वा (रा. व. ४) वाद्यालक
(वै. नि.)
प्रतल-पु., संहतविसृताङ्गुलिकरः। (रा. व. १८.)
प्रतापतपन (रस)-पु., सन्निपातज्वराधिकारे रसः
(रस. कौ.)
प्रतापस-पु., श्वेतार्कः (अम.)
प्रतिकीर्ण-पु., मलादिव्याप्तः (च. इं.)
प्रतिघ-पु., मूर्च्छा (श. र.)
प्रतिघ्न-न., अङ्गम् (श. च.)
प्रतिजिह्वा (ह्विका)-स्त्री., मूलजिह्वा
(रा. व. १८. त्रिका.)

प्रतिपर्णशिफा–स्त्री., द्रवन्ती। (रा. व. ५.)
प्रतिबला–स्त्री., अतिबला (चि. क. क. प्रदरचि.)
प्रतिमा (न)–स्त्री., न., करिणो दन्तद्वयमध्यवर्तिशुण्डा-भागः। गजदन्तबन्धः (त्रिका.)
प्रतिमूषिका–स्त्री., छुछुन्दरी (वै. नि.)
प्रतियत्न–पु., रचना (त्रिका.)
प्रतिरम्भ–पु., सन्तापः (निदा.)
प्रतिबिम्बदर्शक–पु., दर्पणम् (वै. नि.)
प्रतिविष्णुक–पु., मुचुकुन्दवृक्षः (रा. व. १०.) क्षीरिणीभेदः (वै. नि.)
प्रतिबीज–न., तारनागाभ्रहेमकृतपारदनिबन्धनद्रव्यम्। 'नागाभ्रं वाहयेत्तारे हेम्नि च द्वादशे गुणे। प्रतिबीजमिदं पारदस्य निबन्धनम् (र. चि. ३ अ.)
प्रतिसमाधान–न., रोगमुक्तकरणम्। (वै. नि.)
प्रतिसर–पु., व्रणशुद्धिः। प्रभातकालः (वै. नि.)
प्रतिसारी(इन्)–त्रि., सारकद्रव्यमात्रम्। (वै. नि.)
प्रतिक्षुत्–स्त्री., छिक्का (वै. नि.)
प्रतीक–पु., शरीरावयवः (रा. व. १८) पटोलम् (भा. पू. १ भ. शा. व.) विलोमन् (मे.)
प्रतुण्डक–पु., जीवकशाकः (वै. नि.)
प्रत्यग्रगन्धा–स्त्री., स्वर्णयूथिका (वै. नि.)
प्रत्यङ्गिरा–स्त्री., कण्टकशिरीषवृक्षः। (च. द. भैष. विष. चि)
प्रत्यवसान–न., भोजनम् (र. मा.)(रा. व. २०)
प्रत्यश्मा(न्)–पु., गिरिमृत्तिका (त्रिका.)
प्रत्यानाह–पु., आनाहवातः (निदा.)
प्रत्युद्गार–पु., वायुजन्यरोगभेदः (वै. नि.)
प्रत्यु(त्यू)ष–पु., न., प्रभातम् (अ. टी. भ.)
प्रथमकुसुम–पु., शुक्लमरुबकवृक्षः (वै. नि.)
प्रथमनवनीत–न., प्रसवात् शतदिनानन्तरजातनवनीतम् (वै. नि.)
प्रथितालुकी–स्त्री., रक्तालुभेदः (भा.)
प्रदरान्तकलौह–न., प्रदराधिकारे लौहविशेषः (रस. र.)
प्रदिग्धमांस–न., पक्वमांसव्यञ्जनविशेषः।
प्रदीपन–पु., चित्रकवृक्षः (वै. नि. २ भ. अर्शचि. राजवल्लभरसे) स्थावरविषभेदः। लक्षणं यथा 'वर्णतो लोहितो यः स्याद्दीप्तिमान्दहनप्रभः। महादाहकरः पूर्वैः कथितः स प्रदीपनः (भा.)
प्रदीता–स्त्री., लाङ्गलिका (वै. नि.)
प्रनाल(श)क–पु., वास्तूकशाकः जीवशाकः (वै. नि.)
प्रपादिक–पु., मयूरः (वै. नि.)
प्रपुन्नाट–पु., चक्रमर्दक्षुपः (रा. व. ४)
प्रपुन्नाटच्छद–पु., चणकवृक्षः (वै. नि.) चक्रमर्दपत्रम्।
प्रपुराणघृत–न., अतिपुरातनघृतम्। लाक्षारसनिभं शीतं प्रपुराणमतः परम् (सि. यो. उन्मादचि.)·
प्रपुराणधान्य–न., पुराणधान्यकम् (च. चि. ५ अ.)
प्रपूरिका–स्त्री., कण्टकारी (श. च.)
प्रपोटक–पु., अश्वस्य पादरोगभेदः। 'प्रपोटकं विजानीयात् ग्रन्थिभिः कूर्चसम्भवैः। आमण्डकास्थिसङ्काशैः ग्रन्थिभिश्चातिकण्टकैः। (ज. द. ३८)
प्रबल–त्रि., बलवान्। पु., पल्लवम्। (श. मा.) स्त्री., प्रसारणीलता (वै. नि.)
प्रबलाकी (इन्)–पु., सर्पः। (विश्व)
प्रबाल–पु., न., स्वनामख्यातरत्नभेदः। गुणाः–'मधुरः अम्लः कफपित्तादिदोषघ्नः। स्त्रीवीर्यकान्तिकरः धारणात् माङ्गल्यश्च'। सूक्ष्मः घनः शिराहीनः वृत्तः–शुभकरः। गौरः कृष्णरूक्षः श्वेतः वक्रसूक्ष्मः अशुभकरः। (रा. व. १३) 'सारकः शीतलः कषायः स्वादुः वान्तिकरः चक्षुष्यश्च (राज) किशलयम् (मे.)
प्रबालफल–न., रक्तचन्दनम्। (भा.)
प्रबालिक–पु., जीवशाकः। (रा. व. ७)
प्रबोधिका–स्त्री., कुक्कुटी (वै. नि.)
प्रभाकर–पु., अर्कवृक्षः। (अम.)
प्रभाकरक्षीर–न., अर्कक्षीरम्। (वै. नि.) (२ भ. कर्णकज्वरचि.)
प्रभाकीट–पु., खद्योतः। (रा. व. १९)
प्रभाञ्जन–पु., शोभाञ्जनवृक्षः (त्रिका)
प्रभात–न., प्रातःकालः। तत्र द्रष्टव्यं यथा 'वैद्यः पुरोहितो मन्त्री दैवज्ञोऽत्र चतुर्थकः। प्रभातकाले द्रष्टव्यो नित्यं स्वश्रियमिच्छता।
प्रभाभास–पु., कालविशेषः (वै. नि.)
प्रभूततीक्ष्णगन्धा–स्त्री., राजिका
प्रभृति–स्त्री., प्रकृष्टायोजनम् (च. सू. १६ अ.)
प्रभेषजा–स्त्री., काकोदुम्बरिका (रा. व. ११)
प्रमथ–पु., घोटकः (श. र.) स्त्री., (था) हरीतकी (म. द. व. १) पीडा।
प्रमथित–न., नवनीतम्। निर्जलतक्रम् (रा. व. १५)
प्रमद–पु., न., धत्तूरवृक्षः। तत्फलं च (श. च.) त्रि., मत्तः– स्त्री., प्रियङ्गुः (चि. क. क. ४)(स्तबक.)
प्रमदिनी–स्त्री., धातकीवृक्षः (वै. नि.)
प्रमित–त्रि., अन्यूनातिरिक्तम् (वै. नि.)

प्रमीला-स्त्री., तन्द्रा (रा. व. २०)
प्रमीलिका-स्त्री., तन्द्रा विसूच्यां शिरोरोगादौ (सि. यो. विसूचि. श्रीकण्ठः.)
प्रमुख-पु., पुन्नागवृक्षः (श. च.)
प्रमोचनी-स्त्री., गोडुम्बा (जटा.)
प्रमोदसट्टक-न., कृतान्नभेदः। यथा 'सान्द्रं दधि मरीचं पिप्पलिशुण्ठीलवङ्गकर्पूरम् । एषां चूर्णं साकं शर्करया मध्ये शुद्धवस्त्रेण गालयित्वा क्षिपेत्तस्मिन् पक्कदाडिमबीजकम्। प्रमोदसट्टकं ह्येतत्वद्वर्धमानगुणैः समम् (वै. नि. द्रव्यगुण.)
प्रयस्त-त्रि., सुसंस्कृतम् (त्रिका.)
प्रयोगबस्ति-स्त्री., रसायने वाजीकर्मणि च प्रयोज्यः बस्तिविशेषः। स अष्टविधः, तद्विधिः यथा-आदावेकः स्नेहबस्तिः, ततः त्रयो निरूहबस्तयः। ततश्च चत्वारः स्नेहबस्तयः कार्याः (च. सि. १ अ.)
प्ररूढ-पु., जठरम्। (मे.) त्रि., बद्धमूलम् जातम् (श. र.)
प्ररोही(इन्)-पु., नन्दिवृक्षः (भा.)
प्रलम्बक-पु., सुगन्धतृणम्। (वै. नि.)
प्रलम्बाण्ड-त्रि., लम्बमानकोषः (हे. च.)
प्रलापहा(न्)-पु., कुलत्थाञ्जनम्। (रा. व. १३)
प्रलीनता-स्त्री., प्रलयः। इन्द्रियस्वापः। (रा. व. २०)
प्रलेह-पु., व्यञ्जनविशेषः (पाकराज)
प्रलोभनी-स्त्री., बालुका (वै. नि.) प्रलेहः। कोरमा, दस्पोखता (पाकराज)
प्रवट-पु., गोधूमः। (वै. नि.)
प्रवया-पु., स्त्री., वृद्धः। (रा. व. १८)
प्रवरा-स्त्री., पलाशवृक्षः (वै. नि.)
प्रवाहोत्था-स्त्री., वालुका (वै. नि.)
प्रविर-न., पीतचन्दनम्। (श. च.)
प्रविलम्बि-न., सद्योव्रणभेदः। प्रविलम्बि सशेषास्थि (वा. उ. २६ अ.)
प्रविषा-स्त्री., अतिविषा (अम.)
प्रवेट-पु., यवः (त्रिका.)
प्रवेल-पु., पीतमुद्गः। (हे. च.)
प्रवेष्ट-पु., बाहुः। (रा. व. १८) बाहुनिम्नभागः (श. च.) करिदन्तमांसम् (हारा.)
प्रशास्या-स्त्री., आढकी (वै. नि.)
प्रश्नि (श्नी)-स्त्री., पृश्निपर्णी (द्विकोष.) कुंभिका (त्रि. का.)
प्रष्ठा (ष्ठा)- रु-पु., गुदकुन्दरोगः (वा. उ. २अ.)

प्रष्ठौही-स्त्री., प्रथमगर्भिणी गौः (भ.)
प्रसन्नान्ध-पु., अश्वस्य नेत्ररोगविशेषः। लक्षणं यथा-शुद्धस्तु चक्षुषा रूपं नैव पश्यति यो हयः। प्रसन्नान्धः स विज्ञेयो नैव शक्यश्चिकित्सितम् (ज. द. ३० अ.)
प्रसन्नरा-स्त्री., मद्यविशेषम् (अ. टी. भ.)
प्रसवक-पु., पियालवृक्षः (श. मा.)
प्रसवबन्धन-न., पुष्पवृन्तम् (अम.)
प्रसवस्थली-स्त्री., माता (नाटकम्.)
प्रसहन-पु., प्रसहपशुः (रा. व. १९.)
प्रसहा-स्त्री., लताबृहतिका (र. मा.)
प्रसादक-पु., देवधान्यम्। वास्तुकः (वै. नि.)
प्रसादधातु-पु., गुर्वादिद्रवान्तगुणसमुदायः रसादिशुक्रान्तद्रवधातुसमुदायः च (च. शा. ६अ.)
प्रसादनाञ्जन-न., नेत्राञ्जनविशेषम्। 'मधुरस्नेहसम्पन्नमञ्जनन्तु प्रसादनम् (तोड.)
प्रसदनमन्त्र-पु., माहेश्वरमन्त्रः। यथा 'ॐ ह्रां ह्रीं ह्रैं ह्रौं शिवाय स्वाहा। (रस. र. विपरीतमल्लतैल.)
प्रसाधनी-स्त्री., कङ्कतिका (अम.) भङ्गा (मे.)
प्रसित-न., पूयः (श. च.)
प्रसू-स्त्री., कदलीवृक्षः। लता (मे.) घोटकी (अम.)
प्रसूका-स्त्री., अश्वी (रा. व. १९)
प्रसूत-न., पुष्पम् (मे.)
प्रसूता-स्त्री., घोटकी। कृतप्रसवा। (अम.)
प्रसूनरससम्भव-स्त्री., पुष्पशर्करा (वै. नि.)
प्रस्कन्दिका-स्त्री., संग्रहग्रहणीरोगः (निदान.)
प्रस्कन्न-पु., अश्वस्य रोगविशेषः, लक्षणं 'गुरु यस्य भवेद्वक्षः स्तब्धगात्रपरिक्रमः। कुब्जीभूतेन पृष्ठेन यो वाजी याति बद्धवत् (ज. द. ४५ अ.)
प्रस्तरभेद-पु., पाषाणभेदः। (भैष. मूत्रकृच्छ्र. चि. त्रिकण्टकादिचूर्णे.)
प्रस्तरोद्भूत-न., प्रस्तरजलम् (वै. नि.)
प्रस्तरोपल-पु., चन्द्रकान्तमणिः (प. मु.)
प्रस्तर्य-न., प्रस्तरोदकम् (वै. नि.)
प्रस्तान्न-न., पुरातनतण्डुलः।
प्रस्तार-पु., शय्या। तृणवनम्। (हे. च.)
प्रस्थपुष्प-पु., श्वेतमरुवकवृक्षः, क्षुद्रपत्रमरुवकः (अम.) जम्बीरवृक्षः (अ. टी. भ.)
प्रस्थवान्-न., पर्वतः (रा. व. २)
प्रस्थिका-स्त्री., आम्रातकवृक्षः (वै. नि.) माचिका (भा.)
प्रस्फोटन-न., पचनम् (हे. च.) सूर्पः (अम.)

प्रस्रव–पु., दुग्धम् (वै. नि.)
प्रस्रवणजल–न., निर्झरसलिलम्, गुणाः– ' स्वच्छं मधुरं लघु रोचनं दीपनकृच्च (रा. व. १४)
प्रस्रुतदधि–न., वस्त्रगालितदधि (वै. नि.)
प्रहर–पु., दिवसाष्टमभागः (अम.)
प्रहरकुटुम्बी–स्त्री., कुटुम्बिनीक्षुपः (रा. व. ५)
प्रहर्ष(र्षि)णी–स्त्री., हरिद्रा (हारा.)
प्रहस्त–पु., संहतविस्तृताङ्गुलिकरः । चपेटम् (रा. व. ८)
प्रहारवल्ली–स्त्री., मांसरोहिणी (भा.)
प्रहिता–स्त्री., प्रसारणी (वै. नि.)
प्रहीरजा–स्त्री., कुटुम्बिनीक्षुपः (रा. व. ५)
प्रहृष्टक–पु., काकः (वै. नि.)
प्रहेण(ल)क–न., पिष्टकभेदः (हारा.)
प्राकृतज्वर–पु., वसन्तशरद्भवोज्वरः (च. चि. ३)
प्राकृतदोष–पु., प्रकृतिसम्पन्नवातादिः । वर्षाशिशिरयोः वायुःकोपः, ग्रीष्मशरदोः पित्तकोपः, हेमन्तवसन्तयोः कफकोपः इति (च. सू. १० अ.)
प्राक्फल–न., पणसवृक्षः (जटा.)
प्राक्भाग–पु., कायपूर्वभागः (वै. नि.)
प्राग्राट–न., अघनदधि (त्रिका.)
प्राचिका–स्त्री., श्येनपक्षिणी (वै. नि.)
प्राचीनपनस–पु., बिल्ववृक्षः (त्रिका.)
प्रचीनाकरक–पु., मधुरजम्बीरवृक्षः (रा. व. ११)
प्राच्यकशेरु(क)–पु., कशेरुः (श. चि.)
प्राणक–पु., जीवकौषधम् (मे.)
प्राणथ–पु., बलवान् पुरुषः । वायुः (उणा.)
प्राणदा(गुडिका)–स्त्री., अर्शांसि गुडिका (च. द.)
प्राणन–न., जीवनम् (जटा.)
पु., गलः (श. च.)
प्राणना–स्त्री., हरीतकी । ऋद्धिः । (वै. नि.)
प्राणन्त–पु., रसाञ्जनम् (उणा.)
प्राणन्ती–स्त्री., हिक्का । क्षवथुः । (उणा.)
प्राणपिण्ड–पु., सुगन्धबोलः (वै. नि.)
प्राणप्रिया–स्त्री., ऋद्धिः (प. मु.)
प्राणसंयम–पु., श्वासनिरोधः (वै. नि.)
प्राणसद्म–न., शरीरम् (वै. नि.)
प्राणापानौ–पु., द्वि , अश्विनीकुमारौ ।
प्राणिमाता–स्त्री., पुत्रदात्रीक्षुपः । (रा. व. ४.)
प्राणेश्वररस–पु., सन्निपातज्वरे रसः (र. सा. सं.)
प्राणैषणा–स्त्री., जीवनरक्षणोपायगवेषणा । सा च स्वस्थस्य स्वस्थवृत्तिरूपा आतुरस्य च विकारप्रशमनेऽनवधानतारूपा प्राणानुपालनस्य दीर्घायुष्ट्वावाप्तिः । (च. सू. ११.)
प्राण्यङ्ग–न., प्राणिनो अङ्गमात्रं मांसास्थ्यादिः (सि. यो. ग्रहचि.)
प्रात–न., प्रभातम् (अम.)
प्रातःकृत्य–न., प्रातरनुष्ठेयकर्म (च.)
प्रातःस्नान–न., प्राभातिकावगाहनम्
प्रातर्भोक्ता–पु., काकः (श. च.)
प्रातर्भोजन–न., प्रातःकालीनभोजनम् (जटा. त्रिका.)
प्रातर्विकस्वरा–स्त्री., मल्लिकाभेदः । या प्रातर्विकसति गुणैर्वार्षिकतुल्या (रा. व. १०.)
प्राभृत–न., उपढौकनम् (अम.)
प्रामाघ–पु., वासकवृक्षः (श. च.)
प्राय–न., वयः (हे. च.)
प्रायोगिक–पु., शमनधूमपानम् । (भा.) स्नैहिकधूमः (वा. चि. ५ अ.)
प्रावट–पु., यवः (जय.)
प्रावारकीट–पु., कीटविशेषः (जटा.)
प्रावृज्ज–पु., पुनर्नवा (रचि. ९ अ)
प्रावृट्–स्त्री., वर्षाकालः । पुनर्नवा (च. द. अमृतसारलौहे
प्रावृडत्यय–पु., शरत्समयः (रा व २१)
प्रावृत–न., प्रकृष्टावरणम् (भ.)
प्रावृषा–स्त्री., वर्षाकालः (त्रिका.)
प्रावृषायणी–स्त्री., रक्तपुनर्नवा (प. मु.)
प्रावृषिक–पु., मयूरः (धरणी)
प्राशन–न., भक्षणम् । लेहनम् । अन्नम् (रा. व. २०)
प्राशित–पु., भक्षितम् (जटा.)
प्रासादकुक्कुट–पु., कपोतः (जटा.)
प्रासादमण्डना–स्त्री., हरितालः (वै. नि.)
प्राह्ण–पु., प्रातःकालः । पूर्वाह्णः (अम.)
प्रियकाम्य–पु., पीतशालवृक्षः (वै. नि.)
प्रियकोशल–पु., पियालवृक्षः अङ्किकावृक्षः (प. मु.)
प्रियतम–पु., मयूरशिखा (श. च.)
प्रियदर्शनी–स्त्री., शारिकापक्षी
प्रियदा–स्त्री., स्वर्णजातिः (वै. नि.)
प्रियवर्णा–(र्णी) स्त्री., पियङ्गुलता (जटा.)
प्रियवादिनी–स्त्री., शारिका (वै. नि.)
प्रियसख–पु., खदिरवृक्षः (श. च.)
प्रियसन्देश–पु., चम्पकवृक्षः (श. च.)
प्रियाह्वा–स्त्री., कङ्गुणिका (वा. ल. ५अ.)

प्रीणन-पु.,खड्गीमृगः (रा. व. १९.)
प्रीहा (न)-स्त्री., पु., प्लीहा (द्वि. कोष.)
प्रुष्ठ-न., दुग्धम् (वै. नि.)
प्रेक्षण-न., चक्षुः (श. र.)
प्रेक्षणकूट-पु., चक्षुर्गोलकः (मा. नि. पाण्डौ.)
प्रेक्षा-स्त्री., तरुशाखा (श. न.)
प्रेङ्खित-न., कम्पितः (अम.)
प्रेतग्रह-पु., भूतग्रहविशेषः (वाउ.)
प्रेतजिह्वा-स्त्री., स्तब्धतादिलक्षणयुक्ता जिह्वा । अरिष्ट-लक्षणभेदः (च. इ. ८अ.)
प्रेतराक्षसी-स्त्री., सुरसा (प. मु.)
प्रेमपातन-न.,नेत्रजलम् (श. च.)
प्रेयोपत्य-पु., क्रौञ्चपक्षी (वै. नि.)
प्रेष्ठा-स्त्री., जङ्घा (श. च.)
प्रोज्ज्ञासन-न., मारणम् (हे. च.)
प्रोच्छन-न., लोपनम् (तन्त्रम्.)
प्रोत्प (क) ल-पु., तालवृक्षभेदः (श. मा.)
प्रोथ-पु., प्रपाणोर्ध्वभागः (ज. द. २अ.) कटी (मे.) स्फिक् (उणा.)
प्रोर्णुनाव-पु., सन्निपातज्वरविशेषः । यथा-उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तान्नितान्तमुच्छ्वसिति । तं प्रोर्णुनावं विचित्रकष्टं विजानीयात् (भा. म. १म.)
प्रोल्लाघित-त्रि., रोगमुक्तः (वै. नि.)
प्रोष-पु., सन्तापः (रा. व. २०)
प्रोषितप्रिया-स्त्री., कुब्जकवृक्षः (रा. व. २३) फलिनी । प्रियङ्गुः । वार्षिकमल्लिका (रा. व. २३)
प्रोष्ठी-स्त्री., क्षुद्रशफरीमत्स्यः । 'प्रोष्ठी तिक्ता कटुः स्वादुः शुक्रला कफवातजित् (राज. ३५)
प्रोह-पु., गजचरणपर्व (त्रिका.)
प्रौढा-स्त्री., दृष्टार्तवस्त्री (रा. व.)
प्लवगति-पु., भेकः (श. च.)
प्लवङ्गम-पु. वानरः (प. मु.) भेकः (अम.)
प्लवधान्य-न., परिपेल्लतृणम्
प्लाक्ष-न., प्लक्षफलम् (अम.)
प्लावग-पु., मर्कटः (वै. नि.)
प्लावी (इन्)-पु., पक्षी (वै. नि.)
प्लुतगति-पु., शशकः (वै. नि.)
प्लुष-पु., अग्निदाहः (व्याकरणम्)
प्सा-स्त्री., भक्षणम् (त्रिका.)
प्सान-न.,भक्षणम् । भक्तम् (हे. च.)

फ

फ-पु., जृम्भानिस्फारः (विश्व.) झञ्झावातः (मे.)
फञ्जिप(पु)त्रिका-स्त्री., आखुपर्णी (प. मु.) (पुत्रिका)-वनस्पतिभेदः (वै. नि.)
फञ्जीकर-पु., फञ्जी (वै. नि.)
फञ्जादिपञ्चक-न., फञ्जिका जीवनी पद्मा तर्कारी चुञ्चुक इति वनजपत्रशाकवर्गः । गुणाः-वात-हारित्वं ग्राहित्वं दीपनत्वं रुच्यत्वञ्च । भेण्डा कुणञ्जरः त्रिपुटश्च इत्यपि तद्वर्गमध्ये गण्यते । वर्गोऽयं दीपनः पाचनः रुच्यः बलवर्णकरश्च । त्रिदोषशमनः पथ्यः ग्राही वृष्यश्च (रा. व. ७)
फट-(टा)-पु., स्त्री., अहिफणा (अम.)(जटा.)
फटिकारी-स्त्री., स्वनामख्यातक्षारविशेषः (हिं-फिटुकरी) गुणाः—संग्राहिणी सङ्कोचकरी अपूतिकरी बाल-विसूच्याम् उदरामये नासारक्तस्रावे च हिता। "फटी च कटुका स्निग्धा कषाया प्रदरापहा । मेहकृच्छ्र-वमीशोषदोषघ्नी दृढरङ्गदा (रा. व. १३)
फण(णा)क(ध)र-पु., सर्पः (श. र.)
फणभृत्-पु., सर्पः (हे. च.)
फणाभर-(वान्)-पु., (हारा.)
फणि-पु., विषम् (र. सा. सं. गदमुरारिरसे.)
फणिका-स्त्री., कृष्णोदुम्बरिका (वै. नि.)
फणिके(श)सर-न., नागकेसरपुष्पम् । (रा. व. ६)
फणिखेल-पु., लावपक्षी (वै. नि.)
फणिजिह्विका-स्त्री., श्वेतसारिवा । महाशतावरी (रा.व.४)
फणिप्रिय-पु., वायुः । (श. र.)
फणिफेन-पु., अहिफेनः (रत्ना.)
फणिभारिका-स्त्री., कृष्णोदुम्बरवृक्षः । (वै. नि.)
फणिहारी-(इन्)-पु., कपिकच्छुः । (वै. नि.)
फणी (इन्) पु., मरुवकवृक्षः । क्षुद्रपत्रतुलसी । श्वेत-चन्दनम् (च. द. वातव्याधिचि महासुगन्धतैले) सर्पः । स्त्री., (नी)-सर्पिणी । सर्पस्त्री । (रा. व. ५)
फरङ्गरोग-पु., फिरङ्गरोगः ।
फरेन्द्र-पु., जम्बूवृक्षः । (वै. नि.)
फर्फरी-स्त्री., कराग्रम् (वै. नि.)
फलकण्टक-पु., पर्पटकः (वै. नि.) स्त्री. (का)-इन्दीवरा
फलकर्कशा-स्त्री., वनबदरवृक्षः । (संग्रहः)
फलकी (इन्)-पु., मत्स्यविशेषः (त्रिका)
फलकृष्ण-पु., करञ्जवृक्षः । (वै. नि.) पानीयामलकम् (श. च.)

फलकेशर–पु., नारिकेलवृक्षः । (जटा.)
फलङ्क्षषा–(स्त्री.,) महाश्रावणिका (रा. व. ५)
फलग्रहि–पु., फलितवृक्षः । (अ. टी. भ.)
फलग्राही (इन्)–पु., वृक्षः । (धरणिः)
फलघृत–न., पक्वघृतविशेषम् । तत् योनिरोगमात्रे हितम् (भा. म. ४ भ. योनिरोगचि. च. द. योनिव्यापदचि)
फलचमस–न., वटवृक्षवल्कलम् (वै. नि.)
फलत्रिकादि–पु., पाण्डौ कषायः । 'फलत्रिकामृतावासातिक्तभूनिम्बनिम्बजः । क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम् (रस. र.)
फलद–पु., वृक्षः (धरणि.)
फलद्रुम–पु., फलितवृक्षः (वै. नि.)
फलपञ्चाम्ल–न., अम्लफलपञ्चकम् (रा. व. २२)
फलपाकी(इन्)–पु., गर्दभाण्डवृक्षः (र. मा.)
फलपुच्छ–पु., कन्दशाकविशेषः । वरण्डालुः (त्रिका.)
फलप्रिय–पु., द्रोणकाकः (रा. व. १९)
फलमत्स्या–स्त्री., गृहकन्या (वै. नि.)
फलमुण्ड–पु., नारिकेलवृक्षः (श. र.)
फलमुद्गरिका–स्त्री., खर्जूरवृक्षविशेषः (श. मा.)
फलयुग्मा–स्त्री., इन्दीवरा (वै. नि.)
फलराज–पु., खर्वूजेति ख्यातः फलशाकः (वै. नि.)
फलवर्तुल–पु., तरम्बुजवृक्षः (रा. व. ७)
फलवान्–त्रि., फलितः (अम.)
फलविरेचन–न., हरीतकी 'मृद्वीकाथ विडङ्गानि खर्जूराणि परूषकम् । आरग्वधोऽथामलकं हरीतक्यो बिभीतकम् । कम्पिलकोपचित्रे च त्रपुषञ्च मुकूलकम् । नीलिका बकुलं पीलु भवेत् फलविरेचनम् (वा. चि. ६ अ. अरुण.)
फलशाक–न., फलप्रधानवृक्षवर्गः । यथा–'कूष्माण्डकालिङ्गकालिङ्गचिर्भटं पटोलयुग्मञ्च तथा च तुण्डी । बीजारण्यकर्कोटककारवेलं कोषातकी बालुफलानि चैव ' (अत्रि १६. अ.)
फलश्रेष्ठ–पु., आम्रवृक्षः (श. च.)
फलश्रेष्ठा–स्त्री., त्रिफला (वै. नि.)
फलस–पु., पणसवृक्षः (अटीभ.)
फलसम्बद्ध–पु., उदुम्बरवृक्षः (वै. नि.)
फलसम्भारा–स्त्री., कृष्णोदुम्बरिका
फलाक्षी–स्त्री., क्षीरिणीवृक्षः (वै. नि.)
फलात्मिका–स्त्री., कारवेल्ली (वै. नि.)
फलादन–पु., लकुचवृक्षः (प. मु.) शुकपक्षी (हे. च.) (त्रि.,) फलभक्षकः
फलाध्यक्ष– त्रि., राजादनवृक्षः (भा.)
फलानालु–(पु.,) पानशारु इति प्रसिद्धः कन्दशाकः (प. मु.) वृक्षाम्लम् (रा. व. ६)
फलान्त–पु., वंशः (शमा.)
फलान्न–न., फलोपकरणकृतान्नम् ।–गुणाः–फलान्नं स्यात् रुचिकरं गुरु फलसमं गुणैः । (वै. नि. वृक्षाम्ले। रा.व.११.)
फलाम्बु–न., द्राक्षादिसिद्धजलम् । (वा चि २ अ.)
फलाम्लपञ्चक– न., जम्बीरनागरङ्गाम्लवेतसचिञ्चामातुलुङ्गश्च
फलासव–पु., द्राक्षाखर्जूरादिफलोद्भवषड्विंशत्यासवानि (च. सू. २५ अ.)
फलास्थि–पु., नारिकेलवृक्षः (वै. नि.)
फलित–पु., वृक्षः । स्त्री., रजस्वला
फली–स्त्री., मुषली । प्रियङ्गुवृक्षः (प. मु.) शुकनासा (वै. नि.) आम्रातकवृक्षः। फलिमत्स्यः (श. मा.)
फलीश–पु., पारिशपिप्पलम् (वै. नि.)
फलूष–पु., लताविशेषा (उणा.)
फलेग्राहि–(ही) (इन्)–पु., फलितवृक्षः (श. र.)
फलेन्द्र–पु., स्त्री., राजजम्बुवृक्षः (भा.)
फलेपाकी–स्त्री.. गन्धमुण्डः (प. मु.)
फलेपुष्पा–स्त्री., द्रोणपुष्पी (भा.)
फलोत्पत्ति–पु., आम्रवृक्षः (श. च.)
फलोनि–स्त्री., स्त्रीयोनिः (वै. नि.)
फल्गुन–(नाल)–पु., फाल्गुनमासः (अ. टी. भ.)
फल्गुफल–न., काकोदुम्बरिकाफलम् (सि. यो. रक्तपित्तचि. सिद्धतमयोगे)
फल्गुमूल–न. काकोदुम्बरिकामूलम् (सि. यो. मूर्च्छा चि. बृहत्पञ्चगव्यघृते)
फल्य–न., पुष्पम् । पुष्पकलिका
फल्लकिन्–पु., मत्स्यविशेषः (श. मा.)
फाटकी–स्त्री., स्फटी (रा. व. १३)
फालखला–स्त्री., भारतीपक्षी (त्रिका,)
फाल्गुनप्रिय–पु., शङ्खः (वै. नि.)
फाल्गुनानुज–पु., वसन्तर्तुः (हारा.)
फाल्गुनिक–पु., फाल्गुनमासः (अम.)
फिङ्गक–पु., नक्रः । पक्षिविशेषः (श. मा.)
फिरङ्ग–पु , स्वनामकरोगः (भा.)
फिरङ्गरोटी–स्त्री., रोटिकाभेदः । सा तु तालस्याथवा खर्जूरस्य रसेन मधुरिकाजलेन वा मिश्रिता गोधूमकणिका अधिककालमुत्तमं सम्मर्दिता स्थूलगोलाकारेण निर्मिता तन्दूरपाकेन निष्पादिता भवति (पाकराजः)

फिरङ्गिणी–स्त्री., तद्देशीया स्त्री (भा.)
फुक–पु., पक्षी (श. च.)
फुट–पु., सर्पफणा (हे. च.)
फुल्लफाल–पु., सूर्पवातः (त्रिका.)
फुल्लरीक–पु., सर्पः (उणा.)
फुल्ललोचन–पु., हरिणविशेषः (श. च.)
फेण(न)का–स्त्री., अरिष्टकवृक्षः (वै. नि.)जलपक्वतण्डुल-चूर्णम् (श. च.)
फेण(न)वाही(इन्)–पु., वस्त्रम् (श. मा.)
फेणा(ना)ग्र–न., बुद्बुदः (हारा.)
फेणा(ना)श्मभस्म--न., तन्नामकधातुविषम् । शृङ्गी विषम् (सु. कल्प. २ अ.)
फेणि(नि)का-(णी,नी)–स्त्री., पक्वान्नविशेषः (भा.)
फेर(ण्ड)–पु., शालावृक्षः । (रा. व. १९)
फेरव–पु., शृगालः (रा. व. १८)
फेरु–पु., शृगालः (रा. व. १८)
फेल(क)–त्रि., उच्छिष्टः (श. र.)
फेला(लिः,ली)–स्त्री., भुक्तावशिष्टम् (अम. जटा श. रा)
फोग–पु., शाकविशेषः (वै. नि.)

ब

बकदर्शी (इन्)–पु., पारावतः (वै. नि.)
बकपुष्पा–स्त्री., शिवलिङ्गिनी (वै. नि.)
बकेरुका–स्त्री., बलाका (त्रिका.)
बकोट–पु., बकपक्षी (त्रिका.)
बटु–पु., त्रिवर्षशिशुः (रा. व. १८.)
बडवा–स्त्री., घोटकी (अम.)
बडवासुतौ–पु., अश्विनीकुमारौ (श. च.)
बणिग्बन्धु–पु., नीलीवृक्षः (श. च.)
बणिग्वह–पु., उष्ट्रः (श. च.)
बदरत्रय–न., बृहद्बदरक्षुद्रबदरशृगालकोलिका च (च. सू. ४अ. विरेचने) सौवीरकोलकर्कन्धु च (भा.)
बदरा–स्त्री., आदित्यभक्ता (रा. व. ४.) कार्पासी (प. मु.) वराक्रान्ता एलापर्णी (मे.) वाराहीकन्दः श्वेतविदारी (वै. नि.) विष्णुक्रान्ता (विश्व.)
बदरामलक–न., पानीयामलकः (हारा.)
बदरास्थि–न., बदरबीजम् (संग्रहः)
बदरास्थिमज्जा–पु., स्त्री., तन्मजा । गुणाः—' वृष्यः वीर्यबलप्रदश्च (म. द. ब. ६.)
बदरि–स्त्री., बदरीवृक्षः (श. च.)
बदरीच्छद–पु., स्त्री., नखीनामगन्धद्रव्यम् (वै. नि.)
बदरीच्छदा–स्त्री., हस्तिकोलिवृक्षः । शङ्खनखी (र. मा.)

बदरीपल्लव–पु., न , कोलिकोमलपल्लवम् (च. द. पित्त-ज्वरे शिरोलेपे)
बदरीफला–स्त्री., नीलशेफालिका (श. मा.)
बद्धमूलक–पु., क्षीरमूर्वा (वै. नि.)
बद्धरसाम्र(ल)–पु., राजाम्रवृक्षविशेषः कोमलफलगुणाः– अम्लं कटु पित्तदाहकरञ्च । पक्वस्य गुणाः–स्वादु मधुरं पुष्टिवीर्यबलप्रदञ्च । (रा. व. ११)
बद्धवल्क–पु., दारुचिनीति ख्यातं मधुरद्रव्यम् (वै. नि.)
बद्धशिखा–स्त्री., लशुनः (वै. नि.) उच्चटा (पु.,) शिशुः (मे.)
बद्धामयपति–पु., ऋषभकौषधम् (वै. नि.)
बधू–स्त्री., नारी । पृक्का (अम.) शारिवा (मे.)
बधूत्सवप्रसव–पु., रक्तझिण्टी
बभ्र(क)–न., शीषकः (अम.)
बन्दफल–पु., करञ्जवृक्षः (श. चि.)
बन्दूक–न., बन्धुजीवक्षुपः । गुणाः– बन्दूकं श्लेष्मलं ग्राहि च (राज. ५ प)
बन्धकी–स्त्री., पुंश्चली (अम.) करिणी (मे.)
बन्धु (बन्धू) क–पु., स्त्री., बन्धुजीवक्षुपः (र. मा. । रा. व. १० । भा. म. ४ भ उ. चि.) पीतशालः (मे.)
बन्धुकपुष्प (क) पु., बीजकवृक्षः (रा. व. ९) श्योणाकवृक्षः (च. द. उषकादौ)
बन्धुरा–पु., बहुः । शक्तः (मे.)
बन्धुल–पु., बन्धुजीववृक्षः (श. र.)
बन्धुवेतस–पु., जलवेतसम् (वै. नि.)
बन्धूलि–पु., बन्धुजीववृक्षः (श. र.)
बन्ध्या–स्त्री., बन्ध्याकर्कोटकी (रा. व. ३) अप्रजस्त्री (मे.) वायुजन्यः स्त्रीयोनिरोगविशेषः । तस्यां नारी नष्टार्तवा भवति । 'बन्ध्या नष्टार्तवा ज्ञेया' (भा. म. ४ भ.) ह्रीबेरम् (श. च.)
बन्ध्याकर्कोटकी–स्त्री., तिक्तकर्कोटकी (सा. कौ. विषाधिकारे) गुणाः– लघ्वी कफनुत् व्रणशोधिनी सर्पदमनी तीक्ष्णा विसर्पविषघ्नी च (भा. पू. गु. व.) तिक्ता कटुः उष्णा कफघ्नी स्थावरादि विषहरी च (रा. व. ३)
बन्ध्याकार्पासी–स्त्री., वनकार्पासी ।
बब्बु(ब्बू)र(ल) निर्यास–पु., बर्बूरनिर्यासः (वै. नि.)
बम्भराली–स्त्री., मक्षिका (वै. नि.)
बरम्–न., पु., कुङ्कुमम् । बालकः । त्वक् । आर्द्रकः (रा. व. ६.१२)

बलकन्द-पु., मालाकन्दः (रा. व. ७)
बलकर-न., अस्थि (वै. नि.)
त्रि., बलजनकम् ।
बलजम्-न., फलम् (मे.) पु., मज्जधातौ (वै. नि.)
बलजा-स्त्री., आरबीयमल्लिका । यूथिका (मे.)
बलदेव-पु., वायुः (मे.)
बलपाण्डुकर-पु., कुन्दवृक्षः (वै. नि.)
बलपुच्छक--पु., काकः (वै. नि.)
बलपृष्ठक-पु., रोहितमत्स्यम् (वै. नि.)
बलभद्र-पु., क्षुद्रकदम्बवृक्षः (रा. व. २३) लोध्रवृक्षः (श. च.) गवयमृगः (रा. व.) (त्रि.,) बलवान् ।
बलमोटा-स्त्री., वृक्षविशेषः । बलामोटा शेंवरी इति लोके । गुणाः- कटु तिक्ता शीता जयदा कण्ठशोधनी लघु कफघ्नी मदगन्धिः मूत्रकृच्छ्रविषपित्तवातभूतघ्नी च (रा. व. ४; वै. नि.)
बलवर्धिनी-स्त्री., जीवकः (जटा.)
बलवल्लभा-स्त्री., सुरा (वै. नि.)
बलवसा-स्त्री., गन्धकः ।
बलवान्-पु., आहारः कफः । शणबीजम् (त्रि.,) बलिष्ठम्
बलहा (न्)-पु., कफः (श. र.)
बलाट-पु., मुद्गविशेषः (वै. नि.)
बलात्मिका-स्त्री., हस्तिशुण्डीक्षुपः (श. र.) सूर्यकमलम् (वै. नि.)
बलाधिष्ठान-न., बलाधानम् (च. सू. १ अ.)
बलापञ्चक-न., बलातिबला नागबला महाबला राजबला च (वै. नि.)
बलाय-पु., वरुणवृक्षः (श. च.)
बलालक-पु., पानीयामलकः (श. च.)
बलासघ्नी-स्त्री., तेजोवती (वै. नि.)
बलाह-न., जलम् (वै. नि.)
बलिचन्दन-न., रक्तचन्दनम् (वै. नि.)
बलिनी-स्त्री., वाट्यालकः (श. च.)
बलिपुष्ट-पु., काकः (अम.)
बलिप्रिय-पु., लोध्रवृक्षः (श. च.) कदम्बवृक्षः (वै. नि.)
बलिभ-पु., वृद्धपुरुषः (अम.)
बलिमान्-त्रि., जराजन्यबलियुक्तः (अ. टी. भ.)
बलिमुख-पु., वानरः (अ. टी' र.)
बलिष्ठ-पु., उष्ट्रः (रा. व. १९.)
बलीन-पु., वृश्चिकः (वै. नि.)
बलीयान् (स्)-पु., गर्दभः (वै. नि.)
बलीशाक-पु., आम्रातकवृक्षः (वै. नि.).
बलोत्तमा (त्तरा)-स्त्री., बला (रा. व. ४. वै. नि.)
बल्याख्यपञ्चमूल-न., बलाश्वगन्धाशिम्बुडीपाषाणभेदातिबला अन्या-हरिद्रागुडूचीविदारीशारिवामेषशृङ्गी । (वै. नि.)
बल्लव-पु., पाचकः (त्रिका.)
बष्कय-पु., एकवर्षदेशीयवत्सः । (वै. नि.)
बष्कय (यि) नी-स्त्री., बहुदिनप्रसूता गौः (अम. टी. भ.)
बस्तक-न., शाकम्भरलवणम् (वै. नि.)
बस्तगन्धक-पु., अरण्यतुलसीवृक्षः । (रा. व. ४. वै. नि. २भ. वातव्याधिचि.)
बस्तगन्धाकृति-स्त्री., पुत्रदात्री लता । (वै. नि.)
बस्ताम्बु-न., छागमूत्रम् (भा. म. चित्तविभ्रमचि.)
बहलदल-पु., कृष्णशोभाञ्जनम् (वै. नि.)
बहलाङ्ग-पु., मेषशृङ्गी (वै. नि.)
बहिःकुटीचर-पु., कुलीरकः त्रि. का.)
बहिर्गलगण्ड-पु., गलरोगभेदः । स च त्रिविधः—वातजकफजमेदोजभेदात् (वा. उ. २१)
बहिर्मृजा-स्त्री., स्नानादिना बहिः शुद्धिः (वा. चि. ५ अ)
बहुक-पु., हरिणविशेषः (वै. नि.) अर्कः । दात्यूहः । जलखातकः । कर्कटः (मे.)
बहुकन्या-स्त्री., गृहकन्या (रा. व. ५)
बहुकर-पु., उष्ट्रः (त्रिका.) (त्रि.,) सम्मार्जकम् (अम.) स्त्री., सम्मार्जनी (हे. च.)
बहुगुडा (हा)-स्त्री., कण्ठकारी (हा.) भूम्यामलकी
बहुग्रन्थि-पु., झाबुकवृक्षः (श. च.)
बहुच्छद-पु., सप्तपर्णवृक्षः (वै. नि.)
बहुतरकणिश-रागिधान्यम् (रा. व. १६)
बहुतृण-पु.,मुञ्जतृणम् (वै. नि.)
बहुत्वक्-पु., सप्तपर्णवृक्षः (वै. नि.)
बहुत्वक्क-पु., भूर्जवृक्षः (श. मा. । हे. च.)
बहुदल-पु., रागिनामतृणधान्यम् । (रा. व. १६) स्त्री.. (ला) चिञ्चोटकक्षुपः (वै. नि.)
बहुदुग्धिका-स्त्री., स्नुहीवृक्षः (श. च.)
बहुधूप-पु., सर्जवृक्षः (वै. नि.)
बहुध्वज-पु., शूकरः (वै. नि.)
बहुनाडिक-पु., देहः (व्याक.)

बहुप (पु) ट-पु., भूर्जवृक्षः (वै. नि) (वा. सू. १५ अ.)
बहुपर्णिका-स्त्री., आखुकर्णी (रा. व. अ.)
बहुपर्वा-(न्) पु., वंशः । (वै. नि.)
बहुपुत्र-पु., सप्तपर्णवृक्षः (श. च.)
बहुपुत्री-स्त्री., शतावरी । भूम्यामलकी (प. मु.) बृहती (रा. व. ४ च. द. यक्ष्मा चि. बलाद्यघृते)
बहुप्रिय-पु., यवतृणम् (प. मु.)
बहुबल-पु., सिंहः । (रा. व. १९.)
बहुबल्क-पु., प्रियालवृक्षः (रा. व. ११)
बहुमल-पु., शीषकः । (रमा.)
बहुमूत्रता-स्त्री., बहुमूत्ररोगः । (निदा.)
बहुमूर्ति-स्त्री., वनकार्पासी (श. च.)
बहुरेणु-पु., श्वेतकिणिहीवृक्षः (वै. नि.)
बहुरोमन्-पु.,मेषः । (हारा.) वन्यछागः । वानरः (वै. नि.)
बहुलाङ्गक-पु., मेषश्रृङ्गलता (वै. नि.)
बहुलिङ्ग-स्त्री., इत्कटः (प. मु.)
बहुलोहसङ्करभव-न., स्वर्णः (वै. नि.)
बहुवल्कल-पु., प्रियालवृक्षः (रा. व. ११)
बहुवल्ली-स्त्री., लताबृहतिका (रा. व. ४)
बहुवार-(क) पु., भव्यफलवृक्षः । (भा. आम्रवर्ग)
बहुविषाण-पु., शम्बरमृगः (वै. नि.)
बहुविस्तीर्णा-स्त्री., कुचिकावृक्षः । (श. च.)
बहुवीजा-स्त्री., सीताफलः (श. च.)
बहुशत्रु-पु., चटकपक्षी (श. च.)
बहुसन्तति-पु., वंशभेदः (श. च.)
बहुसिक्थ-त्रि., बहुसारविशिष्टः ।
बहुसू-स्त्री., वराहपत्री । (श. र.) बहुप्रसवा स्त्रीः
बहुसूति-स्त्री., बष्कयणी गौः (अम.) बहुसन्तान-प्रसविनी स्त्रीः
बहुस्रवा-स्त्री., शल्लकीवृक्षः (श. च.) लज्जालुका (वै. नि.)
बहुस्राव-पु., स्नुहीवृक्षः । (वै. नि.)
बहुस्वन-पु., शङ्खः । पेचकः । (वै. नि.)
बहुक्षार-पु., सावान् इति ख्यातद्रव्यम् (वै. नि.)
बह्वपत्य-पु., कुक्कुटः । मूषिकः । शूकरः । (रा. व. १९) मुञ्जतृणम् (वै. नि.)
बह्वी-स्त्री., मत्स्याक्षी (वै. नि.)
बाडस-पु., मत्स्यः (वै. नि.)
बाडवेयौ-पु., अश्विनीकुमारौ (श. मा.)
बाणपत्रा (क्षा)-स्त्री., कङ्कपक्षी (वै. नि.)
बाणपुष्प-पु., नीलझिण्टी (भा.)
बाणलवण-न., पञ्चलवणम् (वै. नि. शीतज्वर. चि.)
बाणी-स्त्री., नीलझिण्टी ।
बाणीरज-न., कुष्ठौषधम् (रा. व. १२.)
बातिङ्गन-पु., वार्ताकी (र. मा.)
बादरङ्ग-पु., अश्वत्थवृक्षः (वै. नि.)
बादरा (री)-स्त्री., कार्पासी (प. मु. श. र.) मेषशृङ्गी (वै. नि.)
बाधक-पु., स्त्रीरोगभेदः (रस. र.)
बाधा-स्त्री., पीडा (अम.)
बावली-स्त्री., बब्बूरवृक्षः (वै. नि. २ अ. अतिसारचि.)
बारकीर-पु., यूका (मे.)
बार्वटीर-पु., यशदम् । आम्रास्थि । अङ्कुरः (हे. च.) वङ्गम् (वै. नि.)
बालकुटजावलेह-पु., बालरोगाधिकारे अवलेहः (रस. र.)
बालकृमि-पु., उत्कुणः । केशकीटः (जटा.)
बालकेशी-स्त्री., तृणविशेषः (वै. नि)
बालगर्भिणी-स्त्री., प्रथमगर्भिणी (जटा.)
बालच (चा)तुर्भद्रिका-स्त्री., बालरोगे अवलेह-विशेषः । (च. द.) ‘ घनकृष्णारुणाशृङ्गी चूर्णं क्षौद्रेण संयुतम् । शिशोर्ज्वरातिसारघ्नं कासश्वास-वमीहरम् (रस. र.)
बालचिकित्सा-स्त्री., कौमारभृत्यम् ‘ गर्भोपक्रमविज्ञानं सूतिकोपक्रमस्तथा । बालानां रोगशमनं क्रिया बालचिकित्सितम् । (वैद्य. सं २ अ.)
बालजीवन-न., दुग्धम् (वै. नि.)
बालतनय- } पु., खदिरवृक्षः ।
बालदलक- } बालकपुत्रः । (अ. टी. भ.)
बालतन्त्र-न., कुमारभृत्यम् । धात्रीविद्या (त्रिका.)
बालतृण-न., नवतृणम् । (अम.)
बालधि-पु., सकेशलाङ्गुलम् (अम.)
बालनख-पु., व्याघ्रनखः । (वै. नि.)
बालपत्रा (त्री)-स्त्री., दुरालभा । खदिरवृक्षः (वै. नि.)
बालपर्णी-स्त्री., मेथिका (वै. नि.)
बालभ-पु., सुदन्तगजः । (रा. व. १९)
बालभद्रक-पु., खनिजविषभेदः (श. च.)
बालमत्स्य-पु., मत्स्यविशेषः । लक्षणं यथा–‘ नाति-स्थूलो वृत्तमुखः शल्कहीनः दण्डवान् श्मश्रुयुक्तः दीर्घकायः सन्ध्यायां रात्रिशेषे च सञ्चरणशीलः । गुणाः–पथ्यः बल्यः वृष्यश्च । (रा. व. १७)

बालमूलक—न., अचिरजातकोमल-मूलकम् । गुणाः-कोष्णं तिक्तं तीक्ष्णं मधुरं कटुरसं जीर्णं तत् मूत्रदोषघ्नं श्वासार्शः कास-गुल्मक्षयनेत्ररोगघ्नं कण्ठ्यं बल्यं रुच्यं मलविकृतिघ्नं उष्णं शोषप्रदम् । आमं तत्संग्राहि रुच्यं वातकफघ्नम् । पक्वं तत् कटूष्णं पित्तदाहप्रकोपकरंच । वेशवारेण भुक्तंतत् बलकृत् हृद्रोगशूलप्रशमनञ्च (रा. व. ७)

बालमूलिका-स्त्री., आम्रातकवृक्षः (वै. नि.)

बालमूषिका—स्त्री., छुछुन्दरी क्षुद्रमूषिका (अम.)

बालमृग—पु., हरिणादिमृगवर्गः (अर्क. चि.)

बालरस-पु., बालज्वराधिकारे रसः । (रस. र.)

बालराज-न., वैदूर्यमणिः (श. र.)

बालरोग-पु., शिशूनां रोगः ।

बालवत्स-पु., कपोतः (वै. नि.)

बालवाय (ज)—न., वैदूर्यमणिः (त्रिका.)

बालवाह्य-पु., वन्यछागः (हारा.)

बालवैद्य-पु., बालचिकित्सकः (निदा.)

बालसूर्य-पु., प्राभातिकसूर्यः । वन्यछागः (वै. नि.)

बालसूर्य (क)-न., वैदूर्यमणिः (त्रिका.)

बालाङ्घ्रि-पु., शरपुङ्खा (रस. र. विपरीतमल्लतैले.)

बालाश्म—न., बालुका (भा. म. ३ भ. उदर. चि.)

बालाक्षी-स्त्री., केशपुष्टवनस्पतिः (श. च.)

बालिका-स्त्री., एला (श. र.) अम्बष्ठा (रा. व. ५) कुमारी । मुषली । कन्या । कर्णभूषणम् । शर्करा ।

बलि(ली)श-पु., शिशुः (मे.) मूत्रकृच्छ्ररोगः (श. र.) न., उपधानम् (श. मा.)

बालु(का)-पु., स्त्री., कर्पूरः (श. च.)(वै. नि.) श्वासचि. शुण्ठ्यादिचूर्णे । चिर्भटिका (जटा.) सिकता । गुणाः-लेखनी शीता व्रणोरःक्षतनाशिनी (भा.) तन्नामकयन्त्रम् (का.) एलवालुकम् (उणा. श. च.)

बालुक-न., एलवालुकम् (अम.) शाकविशेषः (वै. नि. २ भ. अर्श. चि.) आलुकफलम् । पानीयालुकः (वै. नि. २ भ. अर्शचि. पथ्यागुडे)

बालुकागड-पु., मत्स्यविशेषः (हारा.)

बालुकात्मिका—स्त्री., शर्करा (श. च.)

बालुकायन्त्र-न., औषधपाकार्थयन्त्रम् भाण्डे वितस्ति गम्भीरे मध्ये निहितकूपके । कूपिकाकण्ठपर्यन्तं वालुकाभिश्च पूरिते । भेषजङ्कूपिकासंस्थं वह्निना यत्र पच्यते । वालुकायंत्रम् (भा.)

बालुकास्वेद-पु., तप्तवालुकाभिः स्वेदम् (भा.)

बालुकिन-न. हिङ्गुलः (श. चि.)

बालुकि(ङ्की)-स्त्री., क्षेत्रकर्कटिका (त्रिका.) बालुकी मधुरा शीता आध्मानहृच्छ्रमापहा । पित्तास्रशमनी रुच्या कुरुते कासपीनसौ । शरद्वर्षजा सा दोषकरी, हेमन्तजा पित्तहरा रुच्या । अर्धपक्का पीनसकरी,पक्का अतिमधुरा । (रा. व. ७)

बालुकैल—न., इलायां भूम्यां बालुकाजातं लवणम् (च. वि. ८ अ.)

बालुङ्किका-(ङ्की) त्रि., कर्कटी (श. र.)

बाल्रूक-पु., विषभेदः

बालेय-पु., गर्दभः (त्रिका.)चाणक्यमूलम् (रा. व. ७) मुस्तकः (ज. द. १२) अङ्गारवल्ली (विश्व)

बालेयशाक-पु., भार्गी (अम.)

बालैल-स्त्री., एला (वै. नि.)

बाल्वङ्गिरा-स्त्री., इर्वारुलता (हारा)

बाष्कल—न., रौप्यम् (वै. नि.)

बाष्पक-पु., मारिषशाकः (वै. नि.)

बाह (हा) पु., स्त्री., बाहुः (अ. टी. र.)

बाहुकुण्ठ-पु., दोर्गण्डौ (त्रिका)

बाहुज-पु., स्वयं जाततिलम् (मे.)

बाहुमूल- न., कक्षः

बाहुल-पु., कार्तिकमासः (अम)

बाह्वस्थि-न., बाहुनलकः (च. शा. ७ अ)

बीभत्स-(त्सु) पु., अर्जुनवृक्षः (वै. नि.)

बुक्का (न्) पु., अग्रमांसम् (अ. टी भ.) वक्षोधः-पार्श्वभागः (च. सू. १७)

बुद्धिदात्री-स्त्री., बुध्यौषधिः (वै. नि.)

बुधा-स्त्री., जटामांसी (श. च.)

बुध्न-पु., मूलशिफा (रा. व. २) गुदम् (वै. नि.)

बुली-स्त्री., स्त्रीगुह्याङ्गम् (हे. च.)

बुष-न., तुषः (नकुलः १३ अ)

बुस्त-न., कण्टाफलस्यासारभागः (अम.)

बूक्क-न., बुक्कम् । हृदयम् (अ. टी. र.)

बृक्क(न्)-न. मूत्राशयः । तच्च द्वयं रक्तमेदः प्रसादजम् (सु. शा. ४अ.) नाडीव्रणः । (रा. व. २०.)

बृहत्फल-पु., चचेण्डा (मद. ३व.)

बेटक-पु., मत्स्यविशेषः (श. र.)

बेट्टचन्दन-न., श्रीखण्डचन्दनान्यतरम् । 'मलयाद्रि-समीपस्थाः पर्वता बेट्टसंज्ञिताः तज्जातं चन्दनं यत्तु बेट्टवाच्यं क्वचिन्मते ।' तच्चातिशीतं दाहपित्तज्वरघ्नं तिक्तं छर्दिमोहतृष्णाकुष्ठतिमिरोत्कासघ्नंच (रा. व. १२.)

बोटवृद्धा–
बोटस्था– } स्त्री., गोरक्षमुण्डी (वै. नि.)

बोधनी–स्त्री., वृद्धौषधम् (र. मा.) पिप्पली (मे.)

बोधितरु–(द्रुम)–(पादप)–पु., अश्वत्थवृक्षः (मद. व. ५. अम.)

ब्रह्मकुशा–स्त्री., अजमोदा (भा.)

ब्रह्मजटा–स्त्री., दमनकवृक्षः । (रा. व. १०.)

ब्रह्मजा–स्त्री., ब्राह्मी (रा. व. २३.)

ब्रह्मणिका–स्त्री., अग्निप्रकृतिकीटभेदः (सु. क. ८अ.)

ब्रह्मण्य–पु., मुञ्जतृणम् (रा. व. ८.) पारिशाश्वत्थः (अम.)

ब्रह्मत्वक्–पु., सप्तपर्णवृक्षः । (वै. नि.) ब्राह्मणयष्टिका (श. च.)

ब्रह्मदण्ड–पु., यमानी (वै. नि.)

ब्रह्मदर्भ–(र्भा)–पु., स्त्री., यमानी (भा. भैष. अग्निसन्दीपनरसे)

ब्रह्मनिष्ठ–पु., पारिशपिप्पलः (वै. नि.)

ब्रह्मपत्र–न., पलाशपत्रम् (शब्दकल्पद्रुम)

ब्रह्मपर्णी–स्त्री., पृश्निपर्णी (रा. व. १३)

ब्रह्मपुत्र–पु., विषभेदः (प. मु.) तत्स्वरूपम्:– वर्णतः कपिलो यः स्यात्तथा भवति सारतः । ब्रह्मपुत्रः स विज्ञेयः जायते मलयाचले । ब्राह्मणः पाण्डुरस्तेषु क्षत्रियो लोहितप्रभः । वैश्यः पीतः सितः शूद्रो विष उक्तश्चतुर्विधः (भा.)

ब्रह्मपुत्री–स्त्री., भार्गी (रा. व. २३) वाराहीकन्दः (रा. व. ७)

ब्रह्मपुष्प–पु., फणिज्जकक्षुपः (ज. द.)

ब्रह्मभद्रा–स्त्री., त्रायमाणा (वै. नि.)

ब्रह्मभूमिजा–स्त्री., सैंहलीपिप्पलिः (रा. व. ६)

ब्रह्ममुण्डकी–स्त्री., ब्राह्मी (वै. नि.)

ब्रह्मयष्टि–स्त्री., भार्गी (प. मु.)

ब्रह्मरन्ध्र–न., उत्तमाङ्गम् (तन्त्रम्)

ब्रह्मरस–पु., वातरक्ताधिकारेहितः (रस. कौ.) 'पलाशबीजचूर्णञ्च गोघृतेन समन्वितं । तुल्यं तुल्यं मृतं शुल्बं स्निग्धे भाण्डे निधापयेत् । वर्धयेच्च यथाशक्तिः अयं ब्रह्मरसो महान् ।

ब्रह्मरूपिणी–स्त्री., बन्दा (वै. नि.)

ब्रह्मवटी–स्त्री., उदराधिकारे औषधम् (रस. र.)

ब्रह्मवर्धन–न., ताम्रम् (हे. च.)

ब्रह्मशल्य–पु., बर्बूरवृक्षः । कदरः (र. मा.)

ब्रह्मसोमा–स्त्री., ब्राह्मी । श्वेतवृद्धदारकः (वै. नि.)

ब्रह्मस्थान–न., तूलकाष्ठम् (वै. नि.)

ब्रह्माग्र (त्म)**भू**–पु., घोटकः (श. मा.),

ब्रह्माणी–स्त्री., रेणुकः (र. मा.) राजरीतिः (रा. व. १३)

ब्रह्माण्ड– पु., कृष्णपिण्डारुभेदः (प. मु.)

ब्रह्माम्भ–न., गोमूत्रम् (वै. नि.)

ब्रह्मी–स्त्री., स्वनामख्यातशाकः (च. सू. ४ अ.) फञ्जिका (मे.) पङ्कालमत्स्यः (त्रि. का.)

ब्रह्मीघृत–न., स्वरभङ्गाधिकारे पक्वघृतम् (च. द. रस. र.)

ब्रह्मोपनेता (तृ)–पु., पलाशवृक्षः (रा. व. १०)

ब्राह्मपिङ्गा–स्त्री., रौप्यम् (वै. नि.)

ब्राह्मीकन्द–पु., वाराहीनाममहाकन्दशाकः (रा. व. ७)

ब्रुवद्धावी–पु., पक्षिविशेषः (वै. नि.)

—भ—

भ–पु, भ्रमरः (एकाक्षरकोषः)

भक्किका–स्त्री., भल्लीकीटः (वै. नि.)

भक्तकर–पु., दशाङ्गादिकृत्रिमधूपः । (श. च.) (कार)–त्रि., पाचकः (हे. च.)

भक्तछन्द–पु., क्षुधा । आकाङ्क्षा । (च. द. अर्शचि. नागार्जुनयोगे ।)

भक्तजा–स्त्री., अमृतम् । (वै. नि.)

भक्तमण्ड–पु., अन्नमण्डः (अम.)

भक्तविपाकवटी–स्त्री., अग्निमान्द्यादौ हिता. (रस. कौ.)

भक्तिका–स्त्री., आरामशीतला (वै. नि.)

भक्षकण्टक–पु., क्षुद्रगोक्षुरकः (रा. व. ४)

भक्षण–न., भोजनम् (त्रिका.)

भक्षणीय–त्रि., भक्ष्यद्रव्यमात्रम् (वै. नि.)

भक्षालावु–स्त्री., शुक्लालाबुः । (रा. व. ७)

भगफल–न., योनिकन्दरोगः (च. द. योनिव्या. चि.)

भगाल–न., नरमस्तकम् । मनुष्यकरोटी

भग्नसन्धिक–पु., सन्धिभग्नरोगविशेषः न., घोलः (श. च.)

भग्नास्थिसन्धानकर–पु., लशुनः (वै. नि.)

भङ्कारी–स्त्री., गोधा (वै. नि.) दंशम् (त्रिका.)

भङ्गवासा–स्त्री., हरिद्रा (श. र.)

भङ्गान–पु., मत्स्यविशेषः ।

भङ्गारी–स्त्री., गोधा (वै. नि.) दंशः । (त्रिका.)

भङ्गिका–स्त्री., भङ्गा (वै. नि.)

भङ्गिनी–स्त्री., जिङ्गिनी (वै. नि.)

भङ्गील–न., भङ्गाक्षेत्रम् (रा. व. २)

भङ्ग्य–न., भङ्गाक्षेत्रम् (रा. व. २)
भञ्जरु–पु., देवकुलोद्भवद्रुमम् (त्रिका.)
भटा–स्त्री., इन्द्रवारुणीलता (र. मा.)
भटित्र–न., शूलपक्वमांसादिः (अम.)
भण्टक–पु., मारिषक्षुपः (वै. नि.)
भण्टा–स्त्री., विस्फोटकः । वार्ताकी (वै. नि.)
भण्टुक–पु., श्योणाकवृक्षः (र. मा.)
भण्डक–पु., खञ्जरीटपक्षी (जटा.)
भण्डीक–पु., शिरीषवृक्षः (रा. व. ९)
भण्डीतक–पु., मेण्डा (वै. नि.)
भण्डीतकी–स्त्री., मञ्जिष्ठा (भा.)
भण्डीरतिलका (लतिका)–स्त्री., मञ्जिष्ठा (रा.व.६)
भण्डील–पु., शिरीषवृक्षः । (वै. नि.)
स्त्री., मञ्जिष्ठा ।
भण्डूक–पु., मत्स्यभेदः । गुणाः– मधुरः शीतः वृष्यः श्लेष्मकरः गुरुः विष्टम्भि रक्तपित्तहरश्च (भा.) श्योणाकवृक्षः (र. मा)
भद्रक–न., नागरमुस्ता (श. मा.; वै. नि. २ भ. क्षय.चि) सूर्यप्रभागुटी । इन्द्रयवः । सरलदेवदारुकाष्ठम् । पद्मम् (वै. नि.)
पु., देवदारुवृक्षः (वै. नि.)
भद्रका–स्त्री., इन्द्रयवः (रा. व. ९)
भद्रकार्पासिका–स्त्री., रक्तकार्पासी (वै. नि.)
भद्रकाह्वया–स्त्री., भद्रमुस्ता (च. द. अतिसारचि.)
भद्रगन्धिका–स्त्री., प्रसारणी (वै. नि.) मुस्ता (र. मा.)
भद्रघन–पु., भद्रमुस्तम् (विसू. चि.) पिपासा । नागरमुस्ता (वै. नि. २ भ. अजीर्णचि.)
भद्रचन्दनसारिवा–स्त्री., कृष्णसारिवा (वै. नि.)
भद्रचूड–पु., लङ्काशिग्रु इति ख्यातः वृक्षः (वै. नि.)
भद्रज–पु., इन्द्रयवः (रा. व. ९)
भद्रतरुणी–स्त्री., कुब्जकवृक्षः (रा. व. १०)
भद्रनामा–पु., पक्षिविशेषः (वै. नि) काष्ठकुट्टपक्षी (त्रिका.)
भद्रनामिका–स्त्री., त्रायमाणा (प. मु.)
भद्रवचा–स्त्री., इन्द्रयवः (रा. व. ९)
भद्रब (व) ला–स्त्री., बला नाम क्षुपः (रा. व. ४) काकोदुम्बरिका । प्रसारिणी (रा. व. ५) गाम्भारीवृक्षः (वै. नि.)
भद्रमल्लिका (ल्ली)–स्त्री., काष्ठमल्लिका (प. मु.) गवाक्षी (श. मा.)
भद्रमुञ्ज–पु., मुञ्जतृणभेदः
भद्रयोगदिवस–पु., पुष्यानक्षत्रयुक्तदिनम् (च. द. विष. चि.)
भद्रवत्–न., देवदारुः (रा. व. १२)
भद्रवर्मा (न्) पु., नवमल्लिका (श. च.)
भद्रवल्लिका–स्त्री., अनन्ता (र. मा.) प्रसारणी (वै. नि.)
भद्रशिफा–स्त्री., हरिद्रा (रा. व. ६)
भद्र (द्रा) श्रिय–न., श्वेतचन्दनम् (र. मा. श. च. । च. द. वातव्याधि म. प्रसारणीतैले) (च. चि. ३।४ अ.)
भद्रसर–न., चन्दनसामान्यम् (प. मु.)
भद्रहंस–पु., नागरमुस्ता (वै. नि.)
भद्राकरण–न., क्षौरकर्म (हे. च.)
भद्राख्य–पु., देवदारुवृक्षः (च. द. उपदंशचि.)
भद्रालपत्रिका–स्त्री., प्रसारणी (श. मा.)
भद्राली–स्त्री., प्रसारणी (श. मा.)
भद्रावती–स्त्री., कट्फलवृक्षः (रा. व. ९.)
भद्राह्व–पु., मुस्तकः (भा. म. ३भ. अश्मचि.)
भद्रिका–स्त्री., गुञ्जा (वै. नि.)
भद्रोत्कट–पु., भद्रमुस्ता (र. मा.) जातीफलादिः (भैष. स्त्रीरोगचि.) भादाकड इति ख्यातः वृक्षः (च. द. गर्भाधिकारे)
भन्दिल–न., कम्पः (उणा.)
भम्भ–पु., धूमः (त्रिका.) मक्षिका (त्रिका.)
भम्भरालिका–स्त्री., दंशमक्षिका (त्रिका.)
भयङ्कर–पु., रणगृध्रः (रा. व. १९. त्रि.) भयावहः ।
भयानक–पु., व्याघ्रः (मे.) (त्रि.,) भयङ्करः ।
भयावहा–स्त्री., रात्रिः (वै. नि.)
भर–पु., द्विसहस्रपलपरिमाणम् (वै. नि.)
भरण्ड–पु., वृषः । क्रमः (उणा.)
भरण्याह्वा–स्त्री., पर्वपुष्पी रामदूतीति लोके (श. च.)
भरद्वाजी–स्त्री., वनकार्पासी (र. मा.)
भरु–पु., स्वर्णम् (मे.)
भरुज–पु., क्षुद्रशृगालः (श. च.)
भरुटक–न., भर्जितमांसम् (हे. च.)
भरोद्वह–पु., धवतरुः (वै. नि.)
भर्ग–पु., पाककरणम् , भर्जनम् (व्याक) कल्कः (भैष. वातव्याधीचि. महाविष्णुतैले.)
भर्गपर्वणी–स्त्री., भार्गी (वै. नि.)
भर्म–न., स्वर्णः । धुस्तूरः (अम.) नाभिः (विश्व. द्विरू.)
भर्मगैरिक–न., स्वर्णगैरिकम् (वै. नि.)
भर्मयूथी–स्त्री., स्वर्णयूथिका (वै. नि.)

भर्त्सपत्रिका–स्त्री., महानीली (रा. व. ४.)
भलता–स्त्री., प्रसारणी (वै. नि.) आकाशलता (श र.)
भल्ल–पु., सन्निपातविशेषः । भल्लातकवृक्षः । भल्लूकः । (अम.)
भल्लकिमत्स्य–पु., मत्स्यविशेषः, गुणाः–'भल्लकी मधुरः शीतो वृष्यः श्लेष्मकरो गुरुः' (राज. ३प.)
भल्लपुच्छी–स्त्री., गोरक्षतण्डुला (श. च.)
भल्लातकगुड–पु., अर्शोरोगे पक्वगुडः । (च. द.)
भल्लातकफलमज्जा -स्त्री., गोडुम्बा
भल्लि–(ल्लिका)(ल्ली)–स्त्री., भल्लातकवृक्षः (रा. व. २३. श. र. च.)
भल्लु–पु., पित्तश्लेष्मोल्बणसन्निपातज्वरविशेषः (भा) अफल्गुरिति तन्त्रान्तरे नाम ।
भवलिङ्गी–स्त्री., शिवलिङ्गिनीलता पञ्चगुरिया इति पश्चिम-देशे ख्याता (भा. भ. ४भ. योनिरोगचि.)
भवात्मजा–स्त्री., मनसादेवी (श. मा.)
भविल–पु., षण्डः । (वै. नि.)
भव्यफल–न., बहुवारफलम् । (वै. नि. रक्त–पित्तचि.)
भव्या–स्त्री., गजपिप्पली (मे)
भष (क)–पु., कुक्कुरः । (का) कुक्कुरी (र. मा. । अम.)
भषत्–न., अन्तःकरणम् (वै. नि.)
भसत्–न., काष्ठम् । जघनम् । अश्वमांसम् । (उणा.) पु., (द्)–कारण्डवपक्षी । प्लवम् । (उणा.) योनिः (मे.)
भसरा–स्त्री., मधुमक्षिका । शालनिर्यासः (वै. नि.)
भसराल–पु., बृहन्मक्षिका (वै. नि.)
भस्त्र (स्त्रा) **का**–(स्त्रा, स्त्री) -स्त्री., चर्मदतिः (श. र.)
भस्मकाग्नि–पु., तन्नामकरोगविशेषः । (मा. नि.)
भस्मगन्धा (न्धिका)–स्त्री., रेणुकबीजम् (भा. जटा.)
भस्मगन्धिनी–स्त्री., रेणुकबीजम् (वै. नि.)
भस्मतूल–न., हिमम् (मे)
भस्ममेह–पु., शर्करामेहः । (निदा.)
भस्मवर्ण–पु., भासपक्षी (वै. नि.)
भस्मवेध (क)-पु., कर्पूरः । (श. र.)
भस्मसूत–पु., रससिन्दूरः । (र. सा. सं. बृ. ज्व. चूडा-मणिरसे)
भस्माङ्ग–पु., कपोतः । (वै. नि.)
भस्माह्वय–पु., कर्पूरः (त्रिका.)
भाकु(कू)ट–पु., मत्स्यविशेषः (मे.) गुणाः–' भाकुटो मधुरः शीतः वृष्यः श्लेष्मकरो गुरुः । आमवातकरो हृद्यो वातपित्तहरो मतः । (राज. ३ प.)
भाक्त–न., धान्यम् (वै. नि.)
भाग–पु., कालपरिमाणविशेषः अंशः (अम.)
भाण्डिका–स्त्री., वार्ताकी (श. चि.)
भाण्डकमुष्टिका–स्त्री., बृहज्जलाधारः (त्रिका.)
भाण्डकारी–स्त्री., मञ्जिष्ठा (वै. नि.)
भाण्डपुष्प–पु., सर्पविशेषः (त्रिका.)
भाण्डरञ्जनमृत्तिका–स्त्री., रञ्जनमृत् (सं. रसकर्पूरप्रकरणे)
भाण्डि–पु., नापितस्य क्षुराद्याधारः (शब्दकल्पद्रुमः)
भाण्डिल–पु., नापितः (श. मा.)
भाण्डीर–पु., क्षुपविशेषः (हिं. भाण्ट्) वटवृक्षः (जटा.)
भाण्डीरलतिका–स्त्री., मञ्जिष्ठा (रा. व. ६)
भाद्र–(पद)–(पदा)–पु., स्त्री., भाद्रमासः (अम.)
भाद्रविक–पु., चीनधान्यम् (प. मु.)
भानुपाक–पु., सूर्यरश्मिभिः लौहस्य पाकः (र. सा. सं)
भारङ्गिका(ङ्गी)–स्त्री., भार्गी (रा. व. ६ नकुल. १२ अ.)
भारटी–स्त्री., नीलीवृक्षः (वै. नि.)
भारती–स्त्री., ब्राह्मीक्षुपः (रा. व. ५ भा. म. १ भ. प्रलापकज्वरचि. चि. क. क. स्त्रीरोगचि.) भारद्वाज-पक्षी (त्रिका.)
भारथ(य) पु., भारद्वाजपक्षी (श. च.)
भारवाह–पु., गर्दभः (वै. नि.)
भारवी–स्त्री., तुलसीवृक्षः (वै. नि.)
भारवृक्ष–पु., काक्षीनामकगन्धद्रव्यम् (श. च.)
भारशृङ्ग–पु., मृगविशेषः । मांसगुणाः– ' कफजनकं गुरु स्निग्धं बल्यं वृष्यं पुष्टिकरं किञ्चित्वातकरं सरञ्च (रा. व. १७)
भारि–पु., सिंहः (हे. च.)
भारिक–पु., गर्दभः ।
भारिट–पु., श्यामचटकः (रा. व. १९)
भार्गवप्रिय–पु., हीरकः (शब्दकल्पद्रुमः)
भार्गवाग्रणी–स्त्री., भार्गी (वै. नि.)
भार्गीगुड–पु., श्वासाधिकारे हितः (भा. भैष.)
भार्ग्यादि–पु., विषमज्वरे कषायभेदः (भैष. ज्व. चि.)
भार्द्वाजी–स्त्री., वनकार्पासी (श. र.)
भार्या–स्त्री., पत्निः (श. र.)
भार्याटिक–पु., हरिणविशेषः (मे.)
भार्यारु–पु., मृगभेदः (मे.)
भाल–न., गण्डस्थलम् (रा. व. १८) तेजस् (मे.)
भालदर्शन–न., सिन्दुरम् (श. च.)

भालाङ्ग-पु., रोहितमत्स्यः (त्रिका.) शाकविशेषः । कच्छपः (मे)
भालु (लू लु लू) क पु., भल्लूकः (अ. टी. भ.) शृगाल (वै. नि.)
भासन्त-पु., काकभेदः । भासपक्षी (मे)
भासा स्त्री., कुमारी (वै. नि.)
भास्करप्रिय-पु., माणिक्यविशेषः (रस. चि.)
भास्करलवण-न., ग्रहण्यधिकारे औषधम् (रस. र. भ)
भास्करशिफा-स्त्री., अर्कमूलम् (वै. नि.) (वातव्या. चि. विषगर्भतैले.)
भास्वन्मूल-न., अर्कमूलम् (भा. म. १ भ.) शीताङ्गसन्निपातज्वर. चि.)
भास्वान्-पु., ताम्रम् (र. चि. ३ अ.) अर्कवृक्षः (अम.)
भिक्षुक-पु., गोक्षुरः (रा. व. २३.)
भिण्डा (ण्डी)-स्त्री., भेण्डाक्षुपः (रा. व. ४)
भिण्डितक-पु., भेण्डाक्षुपः (रा. व. ४)
भित्तीखा (पा) तन-पु., महामूषिकः (रा. व. १९)
भिदि (र) (दु द्र) पु., न., वज्रम् (अ. टी. भ. । त्रिका. रा.व. १३ । क्षयरोगचि. त्रैलाक्यचिन्तामणिरसे)
भिन्नखुर-पु., अश्वस्य पादरोगभेदः । यथा विन्द्याच्छिन्नखुरश्चैव यस्यान्यो जायते खुरः । (ज. द. ३९अ.)
भिन्नगात्रिका-स्त्री., कर्कटिका (श. च)
भिन्नभिन्नात्मा(न्)-पु., चणकवृक्षः । (श. च.)
भिन्नयोजनी-स्त्री., पाषाणभेदकवृक्षः । (भा.)
भिन्नवर्ति-पु., अश्वस्य शूलरोगभेदः । यथा 'अतीसारेण संयुक्तं शूलं यस्योपजायते । भिन्नवर्तिन्तु तं विद्यात्तुरङ्गं दीनचेष्टितम् । (ज. द. ४३ अ.)
भिन्नवल्कल-पु., गुच्छकन्दः । तैलसारु इति ख्याते कन्दशाके (प. मु.)
भिन्नविट्कता-स्त्री., पित्तजन्य मज्जभेदरोगः (निदानम्)
भिरिटिक-पु., वृद्धशृगालः (वै. नि.)
भिरिण्टि (ण्डि)का-स्त्री., श्वेतगुञ्जालता । रा. व. ३) अन्धाहुली (वै. नि.)
भिल्ल(तरु)-पु., लोध्रवृक्षः (रा. व. ६)
भिल्लगवी-स्त्री., वन्यागोः (रा. व. १९)
भिल्लीशावरक-पु., चम्पकरोध्रः (रा. व ६.)
भिषग्भद्रा-स्त्री., भद्रदन्तिका (रा. व. ६)
भिष्मिकाटा(ष्टा)-स्त्री., दग्धान्नम् । (अ. टी. सा.)
भिस्सट-पु., पद्मकन्दः (वै. नि.)
भिस्स(स्सि)टा-स्त्री., भिष्मिका (अम. अ. टी. सा.)
भिस्सा-स्त्री., अन्नम् (अम.)
भिस्साण्ड-न., शालूकः (भा. पू. १भ. शा. व.)
भीमनाद-पु., सिंहः (श. च.)
भीमरथी-स्त्री., कृष्णसंज्ञका काचित् नदी । तज्जलं कृष्णाजलतुल्यम् । लोकानां वयः कालभेदे । स च कालः सप्तसप्ततितमवर्षस्य सप्तममासिक सप्तमरात्रिरिति यथा ' सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी । रात्रिर्भीमरथीनाम नराणां दुरतिक्रमा (श. मा.)
भीमविक्रान्त-न., द्राक्षामद्यम् (वै. नि.) पु., सिंहः (त्रिका.)
भीमसेन-पु., तन्नामककर्पूरः । गुणाः-'वातपित्तघ्नः रसे पाके च मधुरः शीतलः बृंहणः बल्यश्च (भा. र.-व. १२.)
भीमा-स्त्री., रोचनाख्यसुगन्धिद्रव्यम् (श. च.)
भीरुचेता (स)-पु., हरिणः (वै. नि.)
भीरुपत्रिका (त्री) स्त्री., शतावरी (प. मु.)
भीरुहृदय-पु.,-मृगः (जटा.)
भीलभूषणा-स्त्री., गुञ्जा (रा. व. ७.)
भीलुक-पु., भल्लुकः (श. र.)
भीष्म-न., अन्नम् (प. मु.)
मीष्मगन्धक-पु., माध्वीलता (वै. नि.)
भुक्तशेष-त्रि., उच्छिष्टम् (वै. नि.)
भुक्ति-स्त्री., उपभोगः । नखम् (वै. नि.) भोजनम् (श. र.)
भुक्तिप्रद-पु., मुद्गः (रा. व. १६)
भुग्न-त्रि., रोगादिना वक्रीकृतम् (अम.)
भुग्नदृक्-(नेत्र)-पु., तन्नामकसन्निपातज्वरविशेषः (भा. ज्वरचि.)
भुग्नी-स्त्री., भूनागः (रा. व. १३)
भुजकोटर-पु., कक्षदेशः (हे. च.)
भुजगोपभोजी (इन्)-पु., मयूरः (रा. व. १९)
भुजङ्गघातिनी-स्त्री., सर्पकङ्कालिका (रा. व. १३)
भुजङ्गदमनी-स्त्री., नाकुलीकन्दः, नागदमनी (वै. नि.)
भुजङ्गदर्शिनी-स्त्री., नागदमनी (वै. नि.)
भुजङ्गदारण-पु., मयूरः, रास्ना (वै. नि.)
भुजङ्गभुक् (ज)-मयूरः (अम.)
भुजङ्गभोजी (इन्)-पु., राजसर्पः (हे. च.)
भुजङ्गलता-स्त्री., नागवल्ली (रा. व. ११)
भुजङ्गवल्ली-स्त्री., नागवल्लीलता (र. सा. सं. भैष. चिन्तामणिरसे)
भुजङ्गाख्य-पु., नागकेशरवृक्षः ।

भुजङ्गान्तक-(शन)-पु., मयूरः गृध्रः (वै. नि.)
भुजङ्गाक्षी-स्त्री., सर्पाक्षी । रास्ना (अम.)
भुजङ्गी-स्त्री., सर्पिणी (वै. नि.)
भुजमध्य-न., कूर्परः (रा. व. १८)
भुजमस्तक न., स्कन्धदेशः (वै. नि.)
भुजशिर-न., स्कन्धदेशः (अम.)
भुजा-स्त्री., बाहुः (रा. व. । १८ त्रिका.)
भुजाकण्ट-पु., हस्तनखम् (हे. च.)
भुजागम-पु., वृक्षः (वै. नि.)
भुजाढकी-स्त्री.,कलायविशेषः (र. मा.) नीलनिर्गुण्डी । शेफालिका (रा. व. ४)
भुजादल-पु., करः (त्रिका.)
भुजान्तर-न., वक्षः (रा. व. १८) क्रोडम् (अम.)
भुजिष्य-पु., रोगः (उणा.)
भुर्ज-पु., भूर्जपत्रवृक्षः (रा. व. ९)
भूक-पु., न., छिद्रम्, अन्धकारः (मे.) (श. मा.)
भूकदम्बा(बिका)-स्त्री., गोरक्षमुण्डी (वै. नि.)
भूकाक-पु., नीलकपोतः । क्षुद्रकङ्कः (श. र.)
भूकुम्बक-पु., कुलहलः (वा. सू. १५ अ.) (सुरसादि)
भूकुम्भी-स्त्री., भूपाटली (रा. व. ५)
भूकूष्माण्ड-न., भूमिकूष्माण्डः (भैष. (ध्वजभङ्गचि.)
भूकूष्माण्डी-स्त्री., विदारीकन्दः (रा. व. ७)
भूकेश-पु., वटवृक्षः । शैवालः (मे.)
भूकेसी-स्त्री., अवल्गुजनामकवृक्षविशेषः ।
भूगन्धा-स्त्री., मुरानामगन्धद्रव्यम् (श. चि.)
भूगर-न., विषम् (रा. व. ६)
भूचणक-पु., वृक्षभेदः, एतत्तैलं कोशाम्रतैलगुणम् । हिं.—मुंफली.
भूचम्पक-पु., भूमिचम्पकक्षुपः (वै. नि.)
भूच्छत्र-न., छत्राकः (वै. नि.)
भूजन्तु-पु., भूनागः (रा. व. १३)
भूतकेसरा-स्त्री., मेथिका (वै. नि.)
भूतक्रान्ति-स्त्री., भूतोन्मादः। भूतसञ्चारः (रा. व. २०)
भूतगन्धा-स्त्री., मुरामांसी (जटा.)
भूततृण-पु., विषभेदः (र. मा.) गन्धतृणविशेषः (रा. व. ८)
भूतपति-पु., कृष्णतुलसीवृक्षः (वै नि.)
भूतपत्री-स्त्री., तुलसीवृक्षः (रा. व. १०)
भूतपादप-पु., भव्यफलवृक्षः (वै. नि)
भूत(ति)पुष्प-पु., श्योणाकवृक्षः (वै. नि.)
भूतबन्ध-पु., पिशाचबन्धनम् (वै. नि.)

भूतभैरवरस-पु., अपस्माराधिकारे रसः (भा. म. २ अ.)
भूतमारी-स्त्री., चिडा नाम गन्धद्रव्यम् । देवदारुभेदः (रा. व. १२)
भूतयज्ञ-पु., भूतेभ्यो बलिहरणम् (हारीत)
भूतलिका-स्त्री., स्पृक्का नाम गन्धद्रव्यम् (रा. व. २०)
भूतविक्रिया-स्त्री., अपस्माररोगः (रा. व. २०)
भूतवेशी (श्या)-स्त्री., श्वेतशेफालिकावृक्षः (प. मु.) निर्गुण्डी (वै. नि.)
भूतशिखाग्रणी-स्त्री., सुगन्धजटामांसी (वै. नि.)
भूतशिखी-स्त्री., सुगन्धजटामांसी (वै. नि.)
भूतशिफा-स्त्री., सुगन्धजटामांसी (वै. नि.)
भूतसञ्चार-पु., ग्रहावेशः भूतोन्मादः (रा. व. २०.)
भूतहा (न्)-पु., भूर्जवृक्षः (वै. नि.)
भूतहास-पु., सन्निपातज्वरविशेषः (भा. म. १ भ.)
भूतावास-पु., बिभीतकवृक्षः (रा. व. ११.) शरीरम् । (वै. नि.)
भूताविष्ट-त्रि., पिशाचग्रस्तः ।
भूतावेश-पु., भूतसञ्चारः।
भूतावेशा (शी)-स्त्री., निर्गुण्डीवृक्षः । (वै. नि.)
भूतावेश्यालता-स्त्री., तुलसीवृक्षः । (वै. नि.)
भूतिपुष्पिका-स्त्री., शुक्लकेतकवृक्षः (वै. नि.)
भूतिसित-न., रौप्यधातुः (रा. व. १३.)
भूतेष्टा-स्त्री., कृष्णतुलसी (वै. नि.)
भूतोन्माद-पु., भूतावेशजन्योन्मादः (निदानम्)
भूत्तम-न., स्वर्णम् (हे. च.)
भूदराश्रया-स्त्री., मूषिकाकर्णी ।
भूदरीरोद्भवा-स्त्री., आखुकर्णीलता
भूदर्या-स्त्री., मूषिकपर्णी (वै. नि.)
भूनिम्बादिकषाय-पु., भूनिम्बगुडूचीमुस्तनागरकृत-कषायः । गुणाः—ज्वरे दोषपाचनः ज्वरादिघ्नश्च (वा. चि. १ अ.)
भूनीप-पु., भूकदम्बः (रा. व. ५)
भूपत्र-न., मृत्तिकाक्षारः (वै. नि.)
भूपद-पु., वृक्षः (श. च.)
भूपर्णी-स्त्री., भूपीठरिका (वै. नि.)
भूपलाश-पु., आस्फोतगुल्मम् (र. मा.)
भूपाला(ली)-स्त्री., घोषा (वै. नि.)
भूपिठरिका(री)-स्त्री., सोनामुखीति ख्यातलता (वै. नि.)
भूपत्री-स्त्री., भूपिठरी (वै. नि.)
भूपुष्प-पु., भूमिचम्पकवृक्षः (वै. नि.)

भूपेष्ट-पु., राजादनीवृक्षः (रा. व. ११)
भूफल-पु., मुद्गः। हरितमुद्गः (रा. व. १६)
भूभुक्ता-स्त्री., भूमिखर्जूरिका (रा. व. ११)
भूभृत्-पु., पर्वतः (रा. व. २)
भूमण्डली-स्त्री., मल्लिकावृक्षः, वनस्पतिभेदः (वै. नि.)
भूमण्डिनी-स्त्री., मल्लिका (वै. नि.)
भूमिकदम्बिका-स्त्री., मुण्डी, गोरक्षमुण्डी (रा. व. ५)
भूमिकालिका-स्त्री., गोधूमिकाशाकः। (वै. नि.)
भूमिकूष्माण्ड-पु., विदारीकन्दः। (प. मु.)
भूमिगम-पु.,उष्ट्रः। (वै. नि.)
भूमिचम्पक-पु., भूचम्पकः। (हिं-चण्डमूल) (श. च) अस्य मूलं व्रणपाककरम्।
भूमिच्छत्र (त्र) न., भूमिस्थच्छत्रशाकः। संस्वेदज-शाकः। (वै. नि. भा. पू. १ भ. शा. व.)
भूमिजगुग्गुलु-पु., आशापुरगुग्गुलुः। भूमिजगुग्गुलः काशीदेशे प्रसिद्धः। गुणाः-सौरभ्यदः तिक्तकटूष्णः कफवातघ्नः भूतघ्नः मेध्यः सुगन्धिश्च। (रा. व. ७।१३)
भूमिजम्बूका-स्त्री., नागरङ्गवृक्षः। क्षुद्रजम्बूवृक्षः। (अम.)
भूमिदण्डा-स्त्री., मल्लिका पुष्पवृक्षः। (वै. नि.)
भूमिपिशाच-पु., तालवृक्षः। (हारा.)
भूमिपुत्र-पु., श्योणाकः। (वै. नि.)
भूमिमण्ड-पु., आस्फोतकलता अष्टपादिका इति लोके (र. मा.)
भूमिमण्डा-स्त्री., शारदमल्लिका (वै. नि.)
भूमिलता-स्त्री., शङ्खपुष्पीलता (वै. नि.) किञ्जुलुका (भैष वीर्यस्तम्भेः। च. द. वृष्य चि.)
भूमिलवण-न., मृत्तिकालवणम् (वै. नि.)
भूमिलेपन-न., गोमयः। (श. च.)
भूमिवल्ली-स्त्री., मार्कण्डिकालता (भा.)
भूमिशय-पु., वनचटकः (रा. व. १९.)
भूमिसम्पुट-पु., शरावादिः (वै. नि. कास. चि.)
भूमिसर-पु., श्यामाकतृणम् (वै. नि.)
भूमिस्पृक्-पु., मानुषः (मे.) अन्धः। खञ्जः (श. र.)
भूमिस्फोट-पु., भूच्छत्राकः (वै. नि.)
भूमिषण्ड-पु., शारदमल्लिका (रत्ना.)
भूम्याहुली-स्त्री., अपराजिता (रा. व. २३.)
भूम्युदराश्रया-स्त्री., मूषिककर्णीलता (वै. नि.)
भूरिग (म)-पु., गर्दभः (रा. व. १९.)
भूरिधर-पु., गर्दभः (रा. व. १९.)
भूरिनिष्क-न., स्वर्णः (रा. व. १३.)
भूरिप्रेमा (न)-पु., चक्रवाकपक्षी (रा. व. १९.)
भूरिफेना-स्त्री., चर्मकषा (र. मा.) सागुवृक्षः (वै. नि.)
भूरिमाय (यु)-पु., शृगालः (अम.) स्त्री., (या-यु) शृगाली (रा. व. १९.)
भूरिमूलिका-स्त्री., अम्बष्ठा (वै. नि.)
भूरिरस-पु., इक्षुवृक्षः (भा.)
भूरिलग्ना-स्त्री., श्वेतापराजिता (वै. नि.)
भूरुण्डी-स्त्री., हस्तिशुण्डीवृक्षः (अम.) महाकरञ्जः। आदित्यभक्ता (वै. नि.)
भूरोह-पु., किञ्जुलुकः (भैष. भग. चि.)
भूलता-स्त्री., किञ्जुलुकः (वै. नि.)
भूशमी-स्त्री., हस्वशमीवृक्षः (वै. नि.)
भूषि (सु) ता-स्त्री., अङ्कोलवृक्षः (वै. नि.)
भूस्थ--पु., गण्डूपदी। मनुष्यः (वै. नि.)
भूस्पृक्-पु., मानुषः (हे. च.)
भूक्षित्-पु., शूकरः (त्रिका.)
भृगुभवा-स्त्री., भार्गी (रा. व. ६)
भृगूद्भवा-स्त्री., भार्गी (रा. व. ६)
भृङ्गक-पु., धूम्याटः
भृङ्गचुली-स्त्री., भृङ्गाह्वा (म. भ्रमरमाली) गुणाः-कटूष्णा तिक्ता दीपनरोचनी च (रा. व. ७)
भृङ्गज-न., अगरुकाष्ठम् (र. मा.)
भृङ्गपर्णिका-स्त्री., सूक्ष्मैला (श. च.)
भृङ्गवन्धु-पु., कुन्दवृक्षः कदम्बवृक्षः (वै. नि.)
भृङ्गमोही (इन्)-पु., चम्पकवृक्षः (रा. व. १०) स्वर्णचम्पकः (वै. नि.)
भृङ्गरा-स्त्री., भृङ्गराजः। केशराजः
भृङ्गरि (री) ट-पु., लौहः (रस. र. रसायने)
भृङ्गरोल-पु., कीटविशेषः (त्रिका.)
भृङ्गसुहृत्-पु., कुन्दपुष्पवृक्षः।
भृङ्गसोदर-पु., केशराजः। (वै. नि.)
भृङ्गारिका(री) स्त्री., झिल्लीकीटः। (अम. हे. च.)
भृङ्गार्क-पु., भृगराजवृक्षः। (वै. नि.)
भृङ्गिका-स्त्री., इन्द्रगोपकीटः (वै. नि.)
भृङ्गिणी-स्त्री., वटीवृक्षः। (रा. व. ११)
भृङ्गि(ङ्गे)रिटि-स्त्री., भृङ्गः (त्रिका.)
भृङ्गी-स्त्री., अतिविषा। वटीवृक्षः (रा. व. ११) भृङ्गः (वै. नि. २ भ अन्तकज्वरचि. शुण्ठ्यादि) तन्नामकमक्षिका। इन्द्रगोपकीटः (वै. नि.) (इन्)-वटवृक्षः (रा. व. ११)

भृङ्गीगृह-न., भृङ्गीमक्षिकागृहम्। (वै. नि. २ भ. रक्तपित्तचि. नस्ये.)
भृङ्गीफल-न., आम्रातकवृक्षः। (रा. व. ११)
भृङ्गेष्ट-पु., आम्रवृक्षः (वै. नि.)
भृज्जन-पु., भर्जनपात्रम् (उणा.)
भृषत्-पु., स्त्री., पाषाणः (श. र.)
भृष्टकुलत्थ-पु., भर्जितकुलत्थकः। सज्वरे स्वेदोद्गमहरः (सा. कौ. ज्वरचि.)
भृष्टचणक-पु., भर्जितचणकः।
गुणाः—रुच्यः वातघ्नः रक्तदोषकृत् वीर्योष्णः लघुः कफघ्नः शैत्यापहारकश्च (रा. व. १६)
भृष्टतण्डुलान्न-न., भर्जिततण्डुलस्यान्नम्। गुणाः—भृष्टतण्डुलजञ्चान्नं लघु वह्निप्रदीपनम्।
भृष्टमत्स्य-पु., भर्जितमत्स्यः।
भृष्टमांस-न., घृतादिभर्जितमांसम्, गुणाः—विदाहि रक्तवातादिदोषकृच्च (रा. व. ७, १७)
भृष्टयव-पु., भर्जितयवः। धाना, चिपिटकः (प. मु.)
भृष्टान्न-न., भृष्टतण्डुलः (श. च.)
भेकट-पु., मत्स्यभेदः (भ. द्वि.)
भेकनि-(नी)-स्त्री., मत्स्यभेदः। गुणाः—'सद्योबलकरं श्रमतृष्णाप्रमेहक्षयकुष्ठच्छर्दिघ्नञ्च (राज.)
भेकपर्णी-स्त्री., मण्डूकपर्णी (सा. कौ. रास्नादिलौहे.)
भेकभुक्-पु., सर्पः (त्रिका.)
भेकमूत्र-न., मण्डूकमूत्रम् (र. सा. सं.) (वज्रशोधने)
भेकराज-पु., महाभेकः। भृङ्गराजः (वै. नि.)
भेकी-स्त्री., मण्डूकपर्णी (र. मा.) भेकपत्री (अम.)
भेट्टुलि-पु., वाममत्स्यः (सु. सू. ७ अ.)
भेडी-स्त्री., मेषी।
भेदिज्वराङ्कुश-पु., ज्वराधिकारे रसः (रस. कौ.)
भेरुण्ड-न., गर्भधारणः (श. र.) त्रि., भयानकः।
भेषजाङ्ग-न., औषधानुपानम् (श. च.)
भैरवीवचा-स्त्री., स्वनामख्यातवचा (प. मु.)
भैषज्यसार-पु., उपेन्द्रमिश्रकृतसंग्रहः।
भोगगृह-न., वासगृहम् (हे. च.)
भोगधर-पु., सर्पः (वै. नि.)
भोगपिशाचिका-स्त्री., क्षुधा (हारा.)
भोगवान्-पु., सर्पः (मे.)
भोगावास-पु., वासगृहम् (हारा.)
भोगिभुक्-पु., गरुडः। मयूरः (वै. नि.)
भोग्य-न., धान्यम् (रा व. १६)
भोग्यार्ह-न., शालिधान्यम् (रा. व.)
भोजनक-पु., नदीभल्लातकः (प. मु.)
भोजनपात्र-न., स्वर्णादिनिर्मिताहारपात्रम् (पाकराजः)
भोजनार्ह-शालिधान्यम् (प. मु.)
भोजनीय-न., भोजद्रव्यमात्रम्।
भोजराज-पु., अश्वशास्त्रकारः।
भोजराजशुक्र-पु., रससुधानिधिकारे हितः।
भोज्य-न., अष्टविधान्नान्यतमं अन्नम् (रा. व. २०)
भोज्यसम्भव-पु., शरीरस्थरसधातुः।
भोलि-पु., उष्ट्रः (त्रिका.)
भौमसर्प-पु., पृथ्वीजातसर्पदंष्ट्राविषम् (सुकल्प ३ अ.)
भौर्जग्रन्थि-पु., भूर्जग्रन्थिः। (च. सू. ३)
भ्रमणी-स्त्री., जलौका (वै. नि.)
भ्रमत्कुटी-स्त्री., तृणादिच्छत्रम् (त्रिका.)
भ्रमरकीट-पु., कुम्भीरकीटः। अग्निप्रकृतिकीटः (सु. कल्प. ८ अ.)
भ्रमरत्वचा-स्त्री., भ्रमरच्छल्ली (रा. व. ७)
भ्रमरप्रिय-पु., धाराकदम्बः (र. मा.)
भ्रमरभारी-स्त्री भ्रमरारिपुष्पवृक्षः (रा. व. १०)
भ्रमरालम्ब-पु., भूतृणम् (रा. व. ८)
भ्रमि-स्त्री., मूर्च्छा।
भ्रमिका-स्त्री., धातकीवृक्षः (वै. नि.)
भ्रस्यथु-पु., नासारोगभेदः (निदानम्)
भ्रामरशर्करा-स्त्री., भ्रामरमधुकृतशर्करा। गुणाः—'भ्रामरमधुतुल्याः' (रा. व. १४)
भ्रामरी-स्त्री., पुत्रदात्रीलता (रा. व. ३ नकुल. १३ अ.)
भ्रामित-त्रि., रोगी (रा. व. २०)
भ्रामिताक्ष-पु., अश्वस्य वातव्याधिविशेषः। लक्षणं यथा-'वक्रः पश्चिमकायेन मण्डलैर्यो विचेष्टते। मन्दग्रासश्च दीनश्च भ्रामिताक्षो रजोवृतः (ज द. ५५ अ.)
भ्राष्ट-पु., न., भर्जनपात्रम् (अम.)
भ्राष्ट्रजा-स्त्री., खर्परपोलिका।
भ्रुकुटि-स्त्री., भ्रूः (वै. नि.)
भ्रूण(क)-पु., बालकः। गर्भः (अम.) ह्रीबेरम् (रस. र. तिक्तकघृते)

म

म-पु., ब्रह्म (एका. कोषः) विषम् (मे.)
मकरध्वज-पु., रसायनाधिकारे औषधविशेषः (र. स. सं)
मकरन्दज-न., ह्रीबेरम् (प. मु.)
मकरन्दवती-स्त्री., पाटलपुष्पवृक्षः (श. च.)

मकराकर–पु., कण्टककरञ्जः (श. च.)
मकरी–स्त्री., सन्निपातज्वरविशेषः ।
मकुर-(ल)–पु., बकुलवृक्षः । कोरकः (हे. च. श. र.)
मकु(कू)लक–पु., दन्तीवृक्षः (अ. टी. र. च. सू. २७ अ.)
मकूल–न., शिलाजतुः (श. र.)
मकोल–पु., खटिका (त्रिका.)
मखप्रभु–पु., बृहत्सोमलता (वै. नि.)
मखान्न–न., पद्मबीजसदृशबीजम् । (हिं–मखाना) 'मखान्नं पद्मबीजाभं पानीयफलमित्यपि' । गुणाः– मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत् (भा.)
मगधजा–स्त्री., पिप्पली (वै. नि. विज्वरचि.)
मघ–न., औषधम् । पुष्पविशेषः । (श. र.)
मघा (घी)–स्त्री., औषधविशेषम् (धरणि) धान्यविशेषः (मे.)
मङ्क (ङ्क्षु) ण–न., जङ्घात्राणम् (हारा.)
मङ्गलागुरु–न., मङ्गल्यागुरुः (रा. व. १२.)
मङ्गल्यक–पु., मसूरकलायः (भा. पू. १भ. धा. व.)
मङ्गल्यकुसुमा–स्त्री., शङ्खपुष्पी (भा.)
मङ्गल्यनामधेया–स्त्री., जीवन्तीवृक्षः (जटा.)
मङ्गल्यपुष्पी–स्त्री., शङ्खपुष्पी
मङ्गल्यागुरु–न., स्वनाम्ना केदारदेशे प्रसिद्धागुरु। गुणाः–'शीतलं गन्धाढ्यं योगवाहिकञ्च (रा.व.१२)
मङ्गल्याह्वा–स्त्री., त्रायमाणलता (रा. व. ५.)
मङ्गुर–पु., मत्स्यविशेषः (वै. नि.)
मच्छ–पु., मत्स्यसामान्यः (श. र.)
मज्जकृत्–न., अस्थि (हे. च.)
मज्जगतज्वर–पु., तदाश्रितज्वरविशेषः । 'तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा । अन्तर्दाहो महाश्वासः मर्मच्छेदश्च मज्जगे । मज्जशुक्रे क्रिया नोक्ता मरणं तत्र भाषितम् (वै. नि.)
मज्जदमनी–स्त्री., वन्ध्याकर्कोटिकी (वै. नि.)
मज्जफल–न., माजूफलमिति प्रसिद्धं वणिग्द्रव्यम् ।
मज्जसमुद्भव–न., शुक्रम् । (हे. च.)
मज्जामेह–पु., मज्जागतप्रमेहः । (निदा.)
मज्जारजा–पु., गुग्गुलुः । (वै. नि.)
मज्जासार–न., जातीफलम् । (रा. व. १२)
मज्जिका–स्त्री., लक्ष्मणाकन्दः । बकस्त्री (वै. नि.)
मञ्चकाश्रय–पु., मक्षिका; मत्कुणः । (रा. व. १९)
मञ्जर–न.,मुक्ता (श. र.) तिलकवृक्षः (श. र.) मञ्जरी (त्रिका.)
मञ्जा–स्त्री., वृन्तम् । छागी (हे. च.)
मञ्जि-(ञ्जी)–स्त्री., मञ्जरी (त्रिका)
मञ्जिफला–स्त्री., कदली वृक्षः । (वै. नि.)
मञ्जिष्ठादितैल–न., क्षुद्ररोगाधिकारे तैलम् (रस. र.)
मञ्जगमना–स्त्री., हंसी (रा. व.१९)
मञ्जघोष–पु., कपोतः । (वै. नि.)
मञ्जुपाठक–पु., शुकपक्षी (रा. व. १९)
मञ्जुल–पु., जलरङ्कपक्षी (मे.) तित्तिरपक्षी । हरिणभेदः । अञ्जीर वृक्षः । (वै. नि.) न., अञ्जीरम् (राज) स्त्री., मञ्जिष्ठा
मट्ट (ड) क–पु., शस्यविशेषः (जटा.)
मणिकण्ठ–पु.,चासपक्षी । (वै. नि.)
मणिकानन–न., मानम् । कण्ठः । (श. र.)
मणितारक–पु., सारसः (रा. व. १९)
मणितुण्ड–पु., तृषा (वै. नि.)
मणिपूर–न., आमाशयकुण्डम् ।
मणिभावर–पु., सारसः । (वै. नि.)
मणिमन्दिर–न., मुक्तागृहम् (वै. नि.)
मणिराम–पु., ग्रन्थरत्नमालाकर्ता
मणिवर–पु., हीरकमणिः (भा.)
मणिबीज–पु., दाडिमवृक्षः (रा. व. ११) जीरकः (वै. नि.)
मणिचक–न., चन्द्रवर्णरौप्यम् । (त्रिका.) पु., चन्द्रकान्तमणिः (वै. नि.) मत्स्यरङ्कपक्षी । (हारा.)
मणिवक–न., पुष्पम् (हे. च.)
मण्टपी–स्त्री., क्षुद्रोपोदिका (रा. व. ७)
मण्डूर–न., मण्डूरम् । (वै. नि)
मण्ठ(क)–पु., बटकाकारपिष्टकविशेषः (हिं.—माँडा) यथा 'समितां मर्दयेदाज्यैर्जलेनापि च सन्नयेत् । अस्यास्तु वटकङ्कृत्वा पचेत्सर्पिषि नीरसम् । एलालवङ्गकर्पूरमरिचाद्यैरलंकृते । मज्जयित्वा सिता पाके ततस्तञ्च समुद्धरेत् । अयं प्रकारः संसिद्धो मण्ठ इत्यभिधीयते । गुणाः–' मण्ठस्तु बृंहणो वृष्यो बल्यः समधुरो गुरुः । पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः (रा. व. १७)
मण्ड–न., पु., सारः । पिच्छम् । दध्याद्यग्रसरः । न., मस्तु (मे.)
मण्डप–पु., माधवीलता (वै. नि.)
मण्डपा–स्त्री., निष्पावः (रा. व. १६)
मण्डयन्त–पु., अन्नम् (उणा.)

मण्डरी–स्त्री., घुर्घुरिका (हारा.)
मण्डलच्छदा–स्त्री., शुक्लपुनर्नवा (वै. नि.)
मण्डलशुक्लभाक्–पु., अनारस इति ख्यातः वृक्षः (वै. नि.)
मण्डा–स्त्री., मेथिका (प. मु.) मद्यम् (हा. रा.) आमलकी (मे.)
मण्डूकता-(ताप) – स्त्री., पु., अश्वस्य पादरोगविशेषः । लक्षणं-यथा मण्डूकतापो मण्डूक्यां व्रणे-नाश्वस्य जायते । अभिघातसमुत्थेन दुष्टकर्दमकेन च (ज. द. ३८ अ)
मण्डूका–स्त्री., मञ्जिष्ठा (श. मा.) मण्डूकपर्णी (प. मु.) आदित्यभक्ता (रा. व. ४.)
मतङ्ग (रा) ज.–पु., हस्ती (अम.)
मतिविभ्रंश–पु., बुद्धिवैपरीत्यम् । (श. र.)
मतिविभ्रान्ति–पु., उन्मादरोगः (रा. व. २०)
मत्क–पु., मत्कुणः (श. मा.)
मत्कुणारि–पु., शणवृक्षः भङ्गा (श. मा.)
मत्तकाशिनी–स्त्री., उन्मत्तस्त्री (अम.)
मत्तकीश–पु., हस्ती (अम.)
मत्तवारण–न., पुगफूलचूर्णः (श. मा.) कुन्दवृक्षवृति (मे) पु., मत्तहस्ती
मत्ताख्य–पु., कोकिलः (वै. नि.)
मत्सग (घ) ण्ट–पु., मत्स्यशल्कम् । समत्स्यव्यञ्जन-भेदः (श. च.)
मत्सर–पु., मक्षिका (त्रिका.)
मत्स्यकाली-(ळी)–स्त्री., उपोदिका (वै. नि.)
मत्स्यगन्धि–स्त्री., मत्स्याक्षी (का)–शुकनासा (वै. नि.)
मत्स्यघण्ट–पु., व्यञ्जनाविशेषः (श. च.)
मत्स्यण्डीफलित–न., खटीशर्करा (वै. नि.)
मत्स्यनाशक-(नाशन)–पु., मत्स्यरङ्गपक्षी । कुररपक्षी (त्रिका. । हे. च.)
मत्स्यपित्त--न., मीनपित्तम् । तच्छुद्धिः ‘ मत्स्यादि पित्तं संशुष्कं निम्बद्रावैर्विभावितम् । दिनान्तं शुद्धिमायाति सत्यं गुरुवचो यथा । ’ (सा. कौ.)
मत्स्यपुटपाक–पु., पुटेन मत्स्यपाकभेदः । तत्साधनं दग्धमत्स्यतुल्यमेव ।
मत्स्यभि(वि) न्ना–स्त्री., कटुकी (रा. व. ६)
मत्स्यरङ्क (ङ्ग) (क)–पु., जलकाकः (हारा.)
मत्स्यराज–पु., रोहितमत्स्यम् (त्रिका.)‘मुद्गरो रोहितः श्रेष्ठः शकुलश्च विशेषतः । मत्स्यराज इति प्रोक्तः (र. स. चि. ८ ज.)
मत्स्यर्क–पु., शफरीमत्स्यः (च. शा. ८ अ.)
मत्स्यवेधनी–स्त्री., मीनरङ्गः (जटा) बडिशः (श. र.)
मत्स्यशकल–न., मीनशल्कम् । मत्स्यचर्म . (भा. म. कुष्ठचि.) स्त्री., कटुकी (भा. म.) (१ भ. चित्तविभ्रमज्र व. चि.)
मत्स्यसन्तानिका–पु., मत्स्यव्यञ्जनभेदः । यथा ‘दग्धेऽ-ङ्गारे सलवणो वेशवारैरुपस्कृतः । सार्द्रकःकटुतैलेन मत्स्यसन्तानिका भवेत् ।
मत्स्याङ्गी–गण्डदूर्वा (रा. व. ८) हिलमोचिका (त्रिका.)
मत्स्याशन–पु., मत्स्यरङ्गम् (त्रिका.)
मत्स्यी–स्त्री., जटामांसी (वै. नि.; वातव्याधिचि. शतावरीतैले.) स्त्रीमत्स्यजातिः (व्याक.)
मत्स्यौदन–न., मीनपक्वभक्तः । गुणाः– ‘मत्स्योदनं कफकरं त्रिदोषकरणं तथा । अग्नेर्मान्द्यकरं प्रोक्तं चतुरैर्मत्स्यभक्षकैः (वै. नि.)
मथुरानाथ–पु., वैद्यामृतलहरी नाम संग्रहकारः ।
मदकर–पु., धुस्तूरवृक्षः स्त्री., (रा) धातकीवृक्षः (री) –सुरा (वै. नि.)
मदकूद्द्रुम–पु., तालवृक्षः (वै. नि.)
मदगन्ध–पु., सप्तपर्णवृक्षः (रा. व. १२) स्त्री., अतसीक्षुपः (प. मु.) मद्यम् (रा.व. १४)
मदगमन–पु., महिषः (वै. नि.)
मदनकाकुरव–पु., पारावतः (रा. व. ११)
मदनपाठक–पु., कोकिलः (रा. व. १९)
मदनमृग–पु., कस्तूरीमृगः (वै. नि.)
मदनमोदनी–स्त्री., गणिकारिका (वै. नि.)
मदनरिपु–पु., मदनफलम् (वै. नि.)
मदनशलाका–स्त्री., सारिका, कामोन्मादकौषधम् (त्रिका.) कोकिला (श. र.)
मदनसारिका–स्त्री., सारिका (जटा.)
मदना–स्त्री., कस्तूरी । धातकी सुरा (हेच.)
मदनाङ्कुश–शिश्नम् (त्रिका.) नखम् (वै. नि.)
मदनालय–पु., स्त्रीयोनिः । पद्मम् (वै. नि.)
मदभञ्जिनी–स्त्री., शतमूली (श. च.)
मदयित्नु–न., मध्यम् (मे.)
मदरोग–पु., मदात्ययरोगः (रा. व. २०)
मदव्याधि–पु., पानात्ययरोगः (रा. व. २०)
मदसार–पु., तूलवृक्षः (रा. व. ९)
मदस्थान–न., सुरापानस्थानम् (त्रिका.)
मदा–धातकीवृक्षः (वै. नि. अति. चि.) शुण्ठीचूर्णे, कुटजचूर्णे ग्रहणीचि. पाठादिचूर्णे) कस्तूरी (चिक्र.) क. प्रदरचि.

मदार–पु., शूकरः। मृगनाभिः। (वै. नि.) गजः (विश्व)
मदामंद- फलिकमत्स्यः। राजग्रीवमत्स्यः (त्रिका.)
मदालापी(इन्)–पु., कोकिलः (शमा.)
मदाह्व–पु., कस्तूरी (त्रिका.)
मदिर–पु., रक्तखदिरः (श. च.) मत्तखञ्जनः (श. र.)
मदिष्ठा–स्त्री., मद्यम् (हे. च.)
मदोत्कट–पु., मत्तगजः। कपोतः (वै. नि.)
मदोद्रेक–पु., महानिम्बः (रा. व. ९.)
मद्गुरसी–स्त्री., शृङ्गीमत्स्यः (श. र.)
मद्यदोहद–पु., बकुलवृक्षः (वै. नि.)
मद्यपङ्क–पु., मेदकः (हे. च.)
मद्यपाशन–न., पिपासाजनकद्रव्यम् (वै. नि.) पानरुचकभक्ष्यद्रव्यम् (हे. च.)
मद्यमण्ड–पु., मद्यफेनम्। सुरामण्डः (अम.)
मद्ययोनि–स्त्री., सर्जवृक्षः (वै. नि.)
मद्यश्रेष्ठ–न., द्राक्षासुरा (वै. नि.)
मद्यसन्धान–न., सुरानिष्काशनार्थं फल वंशाङ्कुरादीनां सुचिरसंस्थापनम् (हे. च.)
मद्यहेतु–पु., धातकीवृक्षः (वै. नि.)
मद्यामोद–पु., बकुलवृक्षः (रा. व. १.)
मद्योत्तम–न.,माध्वी सुरा (वै. नि.)
मधुकच्छदा–स्त्री., मयूरशिखा (वै. नि.)
मधुकण्ठ–पु., कोकिलः (त्रिका.)
मधुकन्द–पु., आलुकभेदः (वै. नि.)
मधुकर–पु., मधुरजम्बीरः, अपामार्गः (वै. नि.) भृङ्गराजवृक्षः (श. मा.) भ्रमरः (अम.)
मधुकरप्रिय–पु., आम्रवृक्षः (रा. व. ११.)
मधुकसार–पु., गुडपुष्पवृक्षसारः।
मधु (धू) कसुरा–स्त्री., मधुकमद्यम्। गुणाः–वातपित्तकरं रूक्षं कषायं विशदं गुरु। श्लेष्मलं भेदनं ग्राहि मूत्रकृच्छ्रशिरोऽर्तिनुत्। (अत्रि. १९अ.)
मधुकादिघृत–न., कासाधिकारे घृतम्
मधुकाश्रय–पु., मधूच्छिष्टः (वै. नि.)
मधुकाष्ठ–पु., मधूकवृक्षः (वै. नि.)
मधुकुक्कुटिका (टी)–स्त्री., मातुलुङ्गवृक्षः। जम्बीरभेदः। महूर इति भाषा । गुणाः–'मधुकुक्कुटिका शीता श्लेष्मलास्यप्रसादनी (रज. ३ प.)
मधुकृत्–स्त्री., मधुमक्षिका (हे. च.)
मधुकेशट–पु., भ्रमरः (त्रिका.)
मधुकोदक–न., यष्टिमधुकसिद्धजलम्। इदं तृष्णाहरम्। (सि. यो. तृष्णाचि.)
मधुकोष–पु., क्षौद्रपटलः (श. च.) छागमुष्कः (श. कल्पद्रुम.)
मधुक्रम–पु., मध्वाशयः (श. च.)
मधुक्षरा–स्त्री., शिम्बीभेदः (प. मु.)
मधुक्षीर–(री) पु., स्त्री., खर्जूरवृक्षः। (हारा)
मधुगन्धप्रसूनक–पु., अर्जुनवृक्षः (वै. नि.)
मधुगायन–पु., कोकिलः (रा. व. १९.)
मधुगुञ्जन–पु., शोभाञ्जनवृक्षः (श. मा)
मधुघातक–पु., पक्षिविशेषः (वै. नि.)
मधुघोष–पु., कोकिलः (श. मा.)
मधुच्छद–पु., मयूरशिखा (भा.)
मधुजीरक–पु., जीरकभेदः (हिं. सौंफ.)
मधुजीवन–पु., बिभीतकवृक्षः वै. नि.)
मधुतैलबस्ति–पु., निरूहबस्तिभेदः (भा.)
मधुत्रय–न., घृतमधुशर्करा (रा. व. २२. भा. म. ४ भ. कुष्ठचि)
मधुदूत–पु., आम्रवृक्षः (भा.) कोकिलः (वै. नि.)
मधुदूती–स्त्री., पाटलवृक्षः (भा.
मधुद्र–पु., भ्रमरः (त्रिका.)
मधुद्रुम–पु., मधूकवृक्षः (र. मा.) आम्रातकवृक्षः। अम्बष्ठा (वै. नि.)
मधुधूलि–स्त्री., खण्डशर्करा (हे. च.)
मधुनिष्पाव–पु., मुकुटशिम्बी (प. मु.) गुणाः– रुच्यः मधुरः ईषत् कषायः शीतलः वातलो बल्यः आध्मानकरः गुरुः पुष्टिकरश्च (रा. व. १६)
मधुनी–स्त्री., क्षुपविशेषः (र. मा. अत्रि. स्थान २ अ.)
मधुपञ्जर–पु., बकुलवृक्षः (प. मु.)
मधुपालिका–स्त्री., गाम्भारीवृक्षः (श. मा.)
मधुप्रिय–पु., भूमिजम्बुवृक्षः (जटा.)
मधुबहुला–स्त्री., वासन्तीलता (रा. व. १०) शुक्लयूथिका (वै. नि.)
मधुमत्त–(त्ता)–पु., स्त्री., महाकरञ्जवृक्षः (रा. व. ९)
मधुमल्ली–स्त्री., मालतीलता (श. मा.)
मधुमक्षिका–स्त्री., मक्षिकाविशेषः (अम.)
मधुमाधवक–पु., पलाशवृक्षः (वै. नि.)
मधुमाध्वीक–न., मधुकपुष्पमद्यम् (वै. नि.) मद्यम् (अ. टी. भ.)
मधुमानी–स्त्री., मधुनः अष्टपलानि (सि. यो. कासचि. वासाकूष्माण्डे)
मधुमालती–स्त्री., मालतीपुष्पवृक्षः (वैद्य.)
मधुमाक्षिक–न., स्वर्णमाक्षिकम् (भा.)

मधुमूल—न., रक्तालुकम् (श. च.)
मधुयोनि—स्त्री., कपिलद्राक्षा (वै. नि.)
मधुर—न., वङ्गम् (रा. व. १३) मधुरिका वल्लीयष्टिमधु (रा. व. ६) सिक्थकम् (रा. व. १३) विषम् (त्रिका.)
मधुरकूष्माण्ड—न., कुष्माण्डम् (संग्रह.)
मधुरजम्बीर—पु., जम्बीरविशेषः (म—साखरलिंबु) गुणाः—' मधुरः शीतलः कफपित्तघ्नः शोफघ्नः तर्पणः वृष्यः श्रमघ्नः पुष्टिकारकश्च (रा. व. ११ पृ. १७२)
मधुरजीवकादि—पु., जीवन्तीमधुकयुक्तजीवकादिगणः (रा. व. २२)
मधुरजीवनीय—पु., जीवकर्षभकौ मेदे काकोल्यौ मधुकं सहे जीवन्ती चेति द्रव्यगणम् (च.)
मधुरज्वर—पु., मन्थरापरनामकज्वरविशेषः (वै. नि.)
मधुरवल्ली—स्त्री., मधुबीजपूरद्रुमम् (रा. व. ११ पृ. १७२)
मधुरवाताम—पु., मिष्टवातामम् ।
मधुरस्रवा—स्त्री., मूर्वा । पिण्डीखर्जूरिका (रा. व. ११)
मधुराकर—पु., इक्षुः (प. मु.)
मधुराजालुक—न., मिष्टरसालभेदः । गुणाः— ' मधुराजालुकं शीतं मधुरं वायुकारकम् । पाके कटु च विज्ञेयं रुचिदं दाहपित्तनुत् । शोषतृट्कफनुत् प्रोक्तमस्य कन्दस्तु शीतलः । अग्निमान्द्यमलस्तम्भकृत् पित्तनुत्परः (वै. नि.)
मधुरादिफलत्रय—न., मधुरत्रिफला (रा. व. २२)
मधुराम्लफल—पु., पियालवृक्षः (र. मा.)
मधुराम्ल (क)—पु., आम्रातकवृक्षः (श. च.) दाडिमवृक्षः । नागरङ्गवृक्षः (वै. नि.)
मधुराम्लरस—पु., नागरङ्गवृक्षः (वै. नि.)
मधुरालाप—स्त्री., शारिका (रा. व. १९)
मधुरालाबु—(नी)—स्त्री., मिष्टालाबुः (रा. व. ७)
मधुरालिक—स्त्री., क्षुद्रमत्स्यविशेषः अरुचिपथ्यापथ्यम् ।
मधुरासव—पु., आम्रम् (वै. नि.)
मधुरास्य—स्त्री., मुखलिप्तता मुखस्य मिष्टता (मा. व. नि.)
मधुरी—स्त्री., आम्रवृक्षः (वै. नि.) मधुरिका (च. द.- वातव्याधिचि. प्रसारणीतैले.)
मधुलग्न—पु., रक्तशिग्रुवृक्षः ।
मधुलता—स्त्री., शूलीतृणम् (रा. व. ८) वल्लीयष्टिमधु
मधुबला—स्त्री., कोकिलः (श. च.)
मधुवासिनी—स्त्री., लघुधातकीवृक्षः (वै. नि.)
मधुविट्—स्त्री., मधुच्छिष्टः (वै. नि.)
मधुवीज—पु., दाडिमवृक्षः (रा. व. ११)
मधुवीजपूर—पु., मधुरमातुलुङ्गवृक्षः (रा. व. ११)
मधुशाख—पु., मधूकवृक्षः (श. च.)
मधुशिता—स्त्री., श्वेतनिष्पावः (रा. व. १६)
मधुश्वास—पु., जीवन्तीलता (रा. व. ३)
मधुष्ठील—पु., मधूकवृक्षः
मधुसन्धान—न., मद्यम् (वै. नि.)
मधुसम्भवा—स्त्री., कपिलद्राक्षा
मधुसिक्थक—पु., मधूच्छिष्टम् (भा. म. ४ भ पादस्फोटचि. स्थावरविषभेदः (हे. च.)
मधुसूदन—पु., भ्रमरम् (त्रिका.)
मधुसूदनी—स्त्री., पालङ्कीशाका (हे. च.)
मधुस्नेह—पु., मधूच्छिष्टम् (वै.नि.) स्त्री., चोव (तोप) चीनीतिख्याते पुष्टिकरौषधम् (वै. नि.)
मधुस्राव—पु., मोरटलता (रा. व.१३) मधूकवृक्षः (भा.)
मधुस्वर—पु., कोकिलः (श. र.)
मधूकशर्करा—स्त्री., मधूकफाणितम् ।
मधूलि—स्त्री., मालकाकडी इति ख्यातमौषधम् (प. मु.)
मधूलिक—पु., इक्षुः । आसवविशेषः । गुणाः—श्लेष्मलस्तु मधूलिकः । (च. सू. २७)
मधूवक—(षित)—न., मधूच्छिष्टम् (वै. नि.)
मध्यगन्ध—पु., आम्रवृक्षः (श. च.)
मध्यजम्बू—स्त्री., मधुजम्बू वृक्षः ।
मध्यदेशभवा—स्त्री., वक्रकशालिः । (रा. व. १६)
मध्यन्दिन—पु., बन्धुजीवपुष्पवृक्षः । (रा. व. १०) न., मध्याह्न ।
मध्यपाक—पु., तैलादीनां नातिमृदुखरपाकविशेषः (च. द.)
मध्यपुष्प—पु., जलवेतसम् (मद. व. ५)
मध्यमकदल—न., अर्ध पुष्टकदली फलम् । गुणाः– ईषत्कटु मधुरं गुर्वग्निमान्द्यकरञ्च । (वै. नि.)
मध्यमनारायणतैल—न., वातव्याध्यधिकारे तैलम् । (भैष.)
मध्यमनिष्पावा—स्त्री., एकोनविंशतिधरणम् । (सु. चि. ३१ अ.)
मध्यमाग्नि—पु., अर्कार्थमग्नितापविशेषः । मुष्टिमेयकाष्ठचतुरंशेन योऽग्निः तद्विगुणेन काष्ठेन मध्यमाग्निरुच्यते । (अर्कचि.)

मध्ययव-पु., षट्श्वेतसर्षपपरिमाणम् (शब्दकल्पद्रुमः)
मध्यवासिनी-स्त्री., धातकीवृक्षः (र. मा.)
मध्यसत्त्व-त्रि., पुरुषभेदः । यः परानात्मनि उपनिधाय संस्तम्भयति आत्मनात्मानं, परैश्चापि संस्तभ्यते (च. वि. ८ अ)
मध्यस्थल-न., कटिदेशः (उद्भटः)
मध्या-स्त्री., नाभिः (वै. नि.) मध्यमाङ्गुलिः (हे. च.)
मध्वल-पु., अतिपानम् । मधुवारः । (श. च.)
मध्वाधार-पु., मधुक्रमम् । (वै. नि.)
मध्विजा-स्त्री., मद्यम् (हे. च.)
मनसा-स्त्री. सर्पदुहिता देवी । 'कन्या च सा भगवती कश्यपस्य च मानसी । तेनेयं मनसा देवी मनसा याच दीव्यति (पुराणम्)
मनाका-स्त्री., हस्ती (उणा.)
मनीषा-स्त्री., बुद्धिः
मनुज-पु., मानुषः ।
मनोजवा-स्त्री., (अग्निजिह्वावृक्षः जटा.)
मनोभवागार-पु. योनिः
मनोरथ-पु., इच्छा;
मनोविभ्रम-पु., चित्तविभ्रमः (निदानम्)
मन्त्रजिह्व-पु., अग्निः (हेमचन्द्रः)
मन्थज-न., नवनीतम् (र. मा.)
मन्थर-पु., वैशाखमासः हरिणः नवनीतम् (वै. नि.) कुसुम्भम् (मे) फलम् चि. जडः (श. र.)
मन्थरज्वर-पु., ज्वरविशेषः (हिं-मतीज्वर) लक्षणम्-ज्वरो दाहो भ्रमोमोहोह्यतीसारो वमिस्तृषा। अनिद्रा मुखशोषश्च तालुजिह्वे चशुष्यतः । ग्रीवायां परिदृश्यन्ते स्फोटकाः सर्षपोपमाः । घृताशनात्स्वेद-रोधात् मन्थरो जायते नृणाम् ॥ (योगरत्नाकर.)
मन्थराधि-पु., मध्यकायम् (चशा ७.)
मन्थरु-पु., चामरवायुः (त्रिका.)
मन्थसार-पु., नवनीतम् (वैनिघण्टु)
मन्था-स्त्री., मेथिका (रा.नि. ६)
मन्थिर-पु., समुद्रः,
मन्थ्य-पु., सक्तुः (वै. निघ.)
मन्दगमना-स्त्री., महिषस्त्री (वै. नि.)
मन्दज-वि., मन्दजातम् (चसू. १८)
मन्दसानु-पु., स्वप्नः (उणा.)
मन्दरोत्थ-न., शिलाजतुः (वै. नि.)
मन्दर-पु., मन्दारवृक्षः (मे) तन्नामकलतादिकीट-विषघ्नागदविशेषः । अपामार्गमनोह्वालदार्वीध्यामक-गैरिकैः । नतैलाकुष्ठमरिचयष्टयाह्वघृतमाक्षिकैः ॥ (वाउ ३७.) मुकुरः ।
मन्दारफलिका-स्त्री., काकोदुम्बरिका (वै.-नि.)
मन्दारी-स्त्री., रक्तार्कः (सु. चि. १९)
मन्दारु-पु., धातकीपुष्पवृक्षः (वैनिघ)
मन्दालक-न., खटिका (वैनिघ)
मन्दिकुकुर-पु., मत्स्यविशेषः (वैनिघ)
मन्दिर-पु., जानुपश्चाद्भागः (हेच.)
मन्दिरपशु-पु.' बिडालः (श. च.)
मन्दिरा-स्त्री., शय्यासनविशेषः (मे)
मन्दुरा-स्त्री., शय्यासनविशेषः (मे.)
मन्दोष्ण-वि., ईषदुष्णम् (अम.)
मन्द्रपुष्प-पु., जपावृक्षः (वैनिघ.)
मन्मथ-पु., कपित्थवृक्षः पसु.) (आम्रवृक्षः (वैनिघ.) आम्रातवृक्षः । (चिक्रकः) । शठी (वैनिघ)
मन्मथशठी-स्त्री., कर्पूरशठी (वै. नि.)
मन्मन-पु., गद्गदध्वनिः (त्रिका.)
मन्याचाली-पु., अश्वस्य वातव्याधिलक्षणम्-स्तब्धा-यांग्रीवायां स्फुरणम् (जद. ५५.)
मन्यु-पु., शोकः (अम.)अहङ्कारः (श. र.)
मन्युमणी-स्त्री., भेकपर्णी (भैषज्य विद्याधराभ्रे)
मन्वाद्यम्-न., धान्यम् (वै. नि.)
मप (पु)ष्ट (क)-पु., वनमुद्गः (अ. टी. भ.)
मय-पु., उष्ट्रः (त्रिका.) अश्वतरम् । (यी)-स्त्री., उष्ट्री; चिकित्सा (श. च.)
मयट-पु., पर्णकुटी (हारा.)
मयन -पु., मदनवृक्षः (रानि. ८; न.) मधूच्छिष्टम्
मयु-पु., अश्वः (त्रिका.) मृगः (मे.)
मयूरका-स्त्री., अम्बष्ठा (वै. नि.)
मयूरचटक-पु., कुक्कुटः ।
मयूरचूडा-स्त्री., मयूरशिखा (वै. नि.)
मयूरटभावना-स्त्री., पलचतुष्टयेन भावना (परिभाषा.)
मयूरपुच्छ-न., चन्द्रकः (भा. म. १ भ. सन्ततादिज्वर-चि. माहेश्वरधूपे.)
मयूरविदला-स्त्री., अम्बष्ठा (वै. नि.)
मयूर(वि)शिखा-स्त्री., स्वनामख्यातक्षुपः गुणाः-' स्वादुरसा मूत्रकृच्छ्रघ्नी बालग्रहनाशिनी वशीकरणी च (रा, व. ५)
मयूरा-स्त्री., कृष्णतुलसी । अममोदा (वै. नि.)
मयूरालासक-पु., प्रावृट्कालः (रा. व. २१)

मयूराक्षेपियन्त्र–न., सुराश्चोतनयन्त्रविशेषः (भैष. मृतसञ्जीवनीसुरा)

मयूरी–स्त्री., अजमोदा, मयूरस्त्री।

मर–पु., विषम् (वै. नि.)

मरक्त–न., मरकतमणिः (श. र.)

मरट–पु., खदिरविशेषः (वै. नि.)

मरन्द–(क) पु., पुष्पमधु पुष्परेणुः (श. र.)

मराकाली–स्त्री., वृश्चिकाली क्षुपः (र. मा.)

मरार–पु., शस्यरक्षणस्थानम् (जटा.)

मराल–क–पु., राजहंसः। हंसः (रा. व. १९) घोटकः कारण्डवपक्षी। कज्जलम् (शब्दकल्पे सारस्वतः) (त्रि., मसृणम् (त्रिका) स्त्री., हंसी

मरि (री) च पत्रक पु., देवदारुवृक्षः

मरीचसदृश–पु., देवदारुवृक्षः सरलवृक्षः

मरिच सदृश–पु., कक्कोलवृक्षः (वै. नि.)

मरिचाद्य तैल–न., कुष्ठाधिकारे तैलम्।

मरीचिका–स्त्री., मृगतृष्णिका (वै. नि.)

मरुजाता–स्त्री., कपिकच्छूलता (वै. नि.)

मरुटा(ण्डा)–स्त्री., उच्चललाटस्त्री

मरुत–पु., घण्टापाटली (श. च.)

मरुत्कर–पु., राजमाषः (श. च.)

मरुत्कार–(क्रिया.) (पु., स्त्री.,) अपानवायुः। (शब्दकल्पद्रुमे)

मरुत्पुत्री–स्त्री., वननिर्गुण्डी (वै. नि.)

मरुत्प्रिय–पु., उष्ट्रः (हे. च.)

मरुत्प्लव–पु., सिंहः (त्रिका.)

मरुदिष्ट–पु., गुग्गुलुः (रा. व. १२)

मरुदूर्वा–स्त्री., (रा. व. ४)

मरुद्रथ–पु., अश्वः (त्रिका.)

मरुद्रुम–पु., विट्खदिरः (रमा.)

मरुद्विप–पु., उष्ट्रः (त्रिका.)

मरुन्माला–स्त्री., स्पृक्का (अम.)

मरुपुष्पी–स्त्री., हेमपुष्पी (रमा.)

मरुप्रिय–पु., उष्ट्रः (हे. च.)

मरुभूरुह–पु., करीरवृक्षः (भा.)

मरुल–पु., हंसविशेषः कारण्डव। (हे. च.)

मरूक–पु., हरिणभेदः, मयूरः, शठी (उणा.)

मरूद्भवा–स्त्री.–दुरालभाविशेषः (प. मु.) कार्पासी क्षुद्रखदिरः (रा. व. ४. ८) पु., यवासः रा. व. ४)

मरोलि(क)–पु., मकरमत्स्यः (त्रिका. शर.)

मर्क–पु., शरीरम् (उणाः) मर्कटः (शरः)

मर्कक–उर्णनाभिः। (वै. नि.) गलगण्डपक्षी (श. र.)

मर्कटपिप्पली–स्त्री., अपामार्गः (रा. व. ४)

मर्कटप्रिय–पु., क्षीरवृक्षः (श. मा.)

मर्कटवासा–उर्णनाभिजालम् (श. र.)

मर्कटशीर्ष–न., हिङ्गुलः (र. मा.)

मर्कटाख्य–न., कपिकच्छूबीजम् (वै. नि. २ भ. क्षयचि.-गुडूच्यादिमोदके)

मर्कटाम्र–पु., राजाम्रः (भा.)

मर्कटास्य–न., ताम्रम् (हे. च.)

मर्कटिकाफल–म., कपिकच्छूफलम्।

मर्कटेन्दु–पु., काकतिन्दुकः (श. च.)

मर्कर–पु., भृङ्गराजः (श. र.) स्त्री., (री)–निष्फलस्त्री (विश्व.)

मर्त्यकदली–स्त्री., कदलीविशेषः।

मर्त्येन्द्रमाता–स्त्री., अग्निदमनीक्षुपः (रा. व. ४)

मर्मधाम–न., मर्मस्थानम् (अ. म. ४. भ. मसूरी चि.)

मर्मव्रण–पु., नाडीव्रणः (रा. व. २०)

मर्मस्थान–न.' जीवस्थानम्। यत्र घातेन प्राणसंशयो भवेत् (रा. व. १८) (भा.)

मर्मिक–त्रि., मर्मवित् (जटा.)

मलङ्गी–स्त्री., मत्स्यभेदः। गुणाः–' मलङ्गी मधुरा हृद्य वातघ्नी श्लेष्मला गुरुः (रा.ज. ३ प.)

मलधातु–पु., शरीराबाधकरभावः (च. शा. ६ अ.)

मलपाक–पु., दोषपाकः, वातादीनां पाकावस्था पूर्णावस्था वा। तल्लक्षणम्–' दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः। इन्द्रियाणाञ्च वैमल्यं दोषाणां पाकलक्षणम् (वैद्यकम्)

मलभुक्–पु., काकः (श. र.)

मलभेदि(न्)–पु., रौप्यम् स्त्री., कटुका (रा. व. ६)

मलयतपना–स्त्री., भल्लातकवृक्षः। (वै. नि.)

मलयद्रुम–पु., मदनवृक्षः (द्वि. कोष.)

मलरोधन–न., विष्टम्भः। आनाहरोगः (रा. व. २०)

मलवेग–पु., अतीसाररोगः (रा. व. २०)

मलशैत्य–न., तन्नामकश्लेष्मजरोगः (भा.)

मलहर–पु., जैपालवृक्षः (भैष. आमवातचि. सैन्धवाद्यतैल)

मला–स्त्री., भूम्यामलकी (श. च.) आमहरिद्रा (वै. नि.) नाभिनाला (त्रिका.)

मलाकर्षी(इन्)–पु., हड्डीकः (श. मा.)

मलाख्यकिट्ट–न., भुक्ताहारस्यान्यतरभागः। यतः मूत्र-पुरिषाद्युत्पत्तिर्भवति। (च. सू. २८ अ.)
मलाज्जातक–पु., गन्धमार्जारः। (वै. नि.)
मलायन–न., मलहारः। गुदौपस्थादिः (च. द. स्वस्थवृत्ते)
मलावरोध–पु., मलविष्टम्भः।
मलिनाम्बु–न., मत्स्यः (हे. च.)
मलिष्ठा–स्त्री., सञ्जातरजस्का।
मल्लूक–पु., कीटविशेषः (उणा.)
मल्लखण्ड–पु., गुडशर्करा (वै. नि.)
मल्लज–न., मरिचम् (जटा.)
मल्लतरु–पु., पियालवृक्षः (रा. व. ११.)
मल्लवाह–पु., ताम्रवर्णतृणविशेषः। पल्लिवाहतृणम् (रा. व. ८.)
मल्ला–स्त्री., मल्लिकापुष्पवृक्षः (श. रा.)
मल्लिकाख्या–स्त्री., त्रिपूरमल्लिका (र. मा.)
मल्लिकागन्ध–न., मङ्गलागुरुकाष्ठम् (रा. व. १२.)
मल्लिकाद्वय–न., मल्लिका आफरमल्लिका चेति (च.-द. कुष्ठचि.)
मल्लिगन्धि–न., अगुरुकाष्ठम् (श. च.)
मल्लिनाथ–पु., कल्पतरुनामसंग्रहकारः।
मल्लिनी–न., अतिमुक्तकपुष्पवृक्षः (रा. व. १०)
मल्लिपत्र–न., छत्राकः (त्रिका.)
मशकी (इन्)–पु., उदुम्बरवृक्षः (हे. च.)
मशख–पु., मशकनामक क्षुद्ररोगभेदः (भा.)
मशच्छद–पु., तृणविशेषः (वै. नि.)
मशहरी–स्त्री., मशकवारणार्थं वस्त्रगृहम्। (जटा.)
मशुन–पु., कुकुरः (श. मा.)
मसन–न., सोमराजी (श. च.)
मसरा–स्त्री., मसूरः (जटा.)
मसि (सी) का–स्त्री., जटामांसी (वै. नि.) शेफालिका (श. र.)
मसिवर्धन–न., गन्धरसः। बोलः। (त्रिका.)
मसीना–स्त्री., स्वनामख्यातक्षुपः। (श. च.)
मसीनिका–स्त्री., शेफालिकावृन्तः (श. र.)
मसूरघृत–न., ग्रहण्यां घृतम्। (च. द.)
मसूरयूष–पु., न., मसूरकृतक्काथः। मसूरयूषः। संग्राही बृंही स्वादुः प्रमेहजित्। (द्रव्यगुणः)
मसूरसूप–पु., भर्जित मसूरकृतयूषः। गुणाः– 'मसूरसूपः संग्राही शीतलो मधुरो लघुः। कफपित्तास्रजित् वर्ण्यो विषमज्वरनाशनः। (द्रव्यगुणः)
मसूराभा–स्त्री., मसूरिकारोगः। (रा. व. २०)
मसूरीहररस–पु., मसूर्यधिकारे रसः। (रस. र.)
मसृणा–स्त्री., अतसी (मे.)
मस्करी–स्त्री., देवकुरुण्टकः। (वै. नि.)
मस्तकस्नेह–पु., मस्तिष्कम् (हे. च.)
मस्तकारण्य–पु., वृक्षाग्रम् (श. च.)
मस्तकी–स्त्री., गुहाबदरीफलम्। रुमिमुस्तकीति लोके (भैष. वाजीकरणचि.)
मस्तकोद्भव–न., मस्तिष्कम् (रा. व. १८.)
मस्तदारु–पु., देवदारुवृक्षः (भा.)
मस्तमूलक–न., ग्रीवा (श. च.) मस्तकस्नेहः (वै. नि.)
मह–न., तेजस् (मे.)
महतिक्रान्ता–स्त्री., बृहती (रा. व. ४.)
महत्तेजा–पु., पारदः (वै. नि.)
महत्पत्र–पु., मालाकन्दः (वै. नि.)
महत्फला–स्त्री., राजकोषातकी (वै. नि.) महेन्द्रवारुणी (रा. व. ३.)
महद्बल–पु., मधुरवास्तुकः (वै. नि.)
महद्वारुणी–स्त्री., महेन्द्रवारुणी
महद्वृक्ष–पु., वटवृक्षः (वै. नि.)
महर्षि–पु., कपिकच्छुः (वै. नि.)
महर्षिका–स्त्री., शुक्लकण्टकारी (वै. नि.)
महा–स्त्री., गोरक्षी (श. च.)
महाकण्टकिनी–स्त्री., विश्वसारकः (श. च.)
महाकण्टा–स्त्री., शेवन्तीवृक्षः (वै. नि.)
महाकदम्ब–पु., केलिकदम्बः (प. मु.)
महाकपित्थ–पु., बिल्ववृक्षः (प. मु.)
महाकरञ्ज–पु., करञ्जविशेषः (सुसू. ३८) गुणाः–महाकरञ्जकस्तीक्ष्णः कटुश्चोष्णश्च तिक्तकः। कण्डू-विचर्चिकाकुष्ठत्वग्रुग्विषव्रणापहः (रा. व. ९)
महाकर्णिकार–पु., आरग्वधवृक्षः (रा. व. ९)
महाकल्याणगुड–पु., द्र० कल्याणगुडः (भा.)
महाकिराततिक्तक–पु., बृहत्किरात तिक्तकः (कश्चित् निघण्टुः)
महाकुमारिका-री–स्त्री., महाशेवन्तीवृक्षः (वै. नि.)
महाकृष्णा–स्त्री., कृष्णापराजिता (वै. नि.)
महाकोशफला–स्त्री., देवदालीलता (रा. व. ७)
हाक्लीतन (निका)–पु., स्त्री., शालपर्णी
महागदमहीरुह–पु., चालमुगरा इति ख्यातः वृक्ष (अत्रि.)

महागन्धक-न., बोलः (रा. व. ६) कुङ्कुमागुरुचन्दनम् (रा. व. १२) अतिसारोदरामयग्रहणीघ्नरसविशेषः (सा. कौ. भेष.)

महागवय-(गव)-पु., बृहद्गवयमृगः (रा. व. १९)

महागुहक-पु., क्रमः (वै. नि.)

महागोधूम-पु., बृहद्गोधूमः (भा. धा. व.)

महागोपा-स्त्री., शारिवा (वै. नि.)

महाग्रीव-(वी) (इन्)-पु., उष्ट्रः । (रा. व. १९)

महाघूर्णा-स्त्री., द्राक्षामद्यम् । सुरा (श. च.)

महाच्छद-पु., देवताडवृक्षः (रमा.)

महाज-पु., महाछागः (रा. व. १९)

महाजम्बीर-पु., बृहज्जम्बीरवृक्षः । (हिंवडनिमु) अस्य त्वक् दीपनी वातघ्नी च । तैलं वातघ्नं । यूषः उदारामयघ्नः रक्तातिसारे पामादौ च हितः

महाज्योतिष्मती-स्त्री., स्वनामख्यातलता हिं-बडी मालकांगोणी । गुणाः-' तिक्ततरा रूक्षा किञ्चित्कटुः वातकफघ्नी दाहकरी दीपनी मेधाप्रज्ञाकरी च (रा. व. ३)

महाढ्य-पु., कदम्बवृक्षः (रा. व. १०)

महातङ्क-पु., मदात्ययरोगः (रा. व. २०) महाव्याधिः।

महातरु-पु., स्नुहीवृक्षः (श. च.)

महाताली-स्त्री., आवर्तकीलता (रा. व. ३)

महातीक्ष्णा-स्त्री., भल्लातकवृक्षः (रा. व. ११)

महातुम्बी-स्त्री., महालाबुः (वै. नि.)

महादन्ता-स्त्री., नागबला (रा. व. ४)

महादीर्घ-पु., सरलदेवदारुः (वै. नि.)

महादुग्धा-स्त्री., वनस्पतिभेदः (वै. नि.)

महादेवमणि-पु., महामेदा (वै. नि.)

महाद्रावक-पु., यकृत्प्लीहाधिकारे औषधविशेषः (रत्नमालासंग्रहः)

महाद्रु-पु., शुकशिम्बी (र. मा.)

महाधात्री-स्त्री., आमलकीवृक्षः (वै. नि. वातव्याधिचि.) वातविध्वंसनरसे.)

महानन्दा-स्त्री., आरामशीतला (रा. व. १०) मद्यम्) (रा. व. १४)

महानय-पु., उष्ट्रः (वै. नि.)

महानसाध्यक्ष-पु., रसवत्यधिकारिपुरुषः (सु.क.१अ.)

महानसिकवोढा-त्रि., राजपाकशालाधिकृतपुरुषः (सु. क. १. अ.)

महानाग-पु., सुरपुन्नागवृक्षः (वै. नि.)

महानाडी-स्त्री., कण्डरा (रा. व. १८)

महानाद-पु., शङ्खः । उष्ट्रः (रा. व. १८) गजः (मे) कर्णः । सिंहः (हे. च.)

महानारायणतैल-न., वातव्याधौ तैलम् (भैष । भा.)

महानेमि-पु., काकः (वै. नि.)

महान्-पु., वाराहमदनवृक्षः । कालदमनवृक्षः (रा. व. ८ उष्ट्रः (रा. व. १९) महाषष्टिक शालिः (वै. नि.)

महापञ्चमूल-न., बिल्वाग्निमन्थश्योणाकपाटली गणिकारिका च (रा. व. २२ । सु. सू. ४०. अ) एतत् कषायः तिक्तानुरसो वातं शमयेदुष्णवीर्यत्वात् (सु. सू. ४० अ.)

महापञ्चविष-न., शृङ्गीविषकालकूटमुस्तकवत्सनाभसक्तुकविषैः समभागिकयोगः (रा. व. १२)

महापिण्डीतरु-पु., वृक्षविशेषः । श्वेतपिण्डीतरुः । गुणाः -कषायोष्णः त्रिदोषघ्नः चर्मरोघघ्नः रक्तदोषघ्नश्च (रा. व. ९)

महापुरुष-पु., महामेदा (वै. नि.)

महाप्रहारवटी-स्त्री., मांसरोहिणी । (वै. नि.)

महाप्राण-(स)-पु., द्रोणकाकः । (रा. व. १०)

महाफेणा-स्त्री., समुद्रफेणः । (श. च.) हिण्डीरः ।

महाबर्बरिका-स्त्री., भार्गी । (वै. नि.)

महाबिज-पु., पारदः । (वै. नि.)

महाभल्लातकगुड-पु., कुष्ठाधिकारे औषधम् (भैष. भा.)

महाभीता-स्त्री., लज्जालुका (वै. नि.)

महाभीरु-पु., गोपालिकाख्यकीटः (हे. च.)

महाभ्रवटिका-स्त्री., राजयक्ष्माधिकारे रसः । (रस. र.)

महामण्डूक- पु., मण्डूकविशेषः । पीतमण्डूकः । (रा. व. १९)

महामत्ता-स्त्री., महाकरञ्जवृक्षः । (रा. व. ९)

महामधुफला-स्त्री., पीतवर्णालाबूविशेषः (वै. नि.)

महामनस् (ना)-पु., महासिंहः (रा. व. १९.)

महामांस-न., नरादिमांसम् ।

महामार्जारगन्धिका-स्त्री., वनमुद्गः (वै. नि.)

महामाष-पु., राजमाषः (भा. पू. १ भ. धा. व.)

महामुख-पु., कुम्भीरः (हे. च.)

महामुण्ड-न., बोलनामगन्धद्रव्यम् । (रा. व. १६.)

महामूर्द्धा (र्द्धन्)-स्त्री., ऋद्धिः वृद्धिः (वै. नि.)

महामूषिक-पु., बृहन्मूषिकः (रा. व. १९.)

महामृगाङ्क-पु., यक्ष्माधिकारेरसः (रस. कौ.)

महामेद्–पु., महामेदा (र. मा.) निम्बवृक्षः (वै.नि.)
महाम्ल–न., तिन्तिडीकः (जटा.)
महारजन–न., कुसुम्भपुष्पः (अम.) सुवर्णम् (मे.)
महारतिवल्लभमोदक–पु., वाजीकरणाधिकारे औषधम् (भैष.)
महारसाष्टक–न., पारदाभ्रकहिङ्गुलवैक्रान्तस्वर्णमाक्षिक-रूप्यमाक्षिकशङ्खकान्तलौहेषु 'दरदः पारदः शङ्खः वैक्रान्तं कान्तमभ्रकम् । माक्षिकं विमलश्चेति स्युरेतेऽष्टौ महारसाः । (रा. व. २२)
महाराज–पु., नखम् (हे. च.)
महारूप–पु., रालः (वै. नि.)
महारोग–पु., महाव्याधिः (वैद्यकम्) उन्मादादिरोगाः । यथा ' उन्मादः त्वग्दोषः राजयक्ष्मा श्वासः मधु-मेहः भगन्दरः । उदरः अश्मरी चेति (नारदस्मृतिः)
महार्घ–पु., महासोमलता (वै. नि.) लावपक्षी (विश्व.)
महार्ध–पु. महार्द्रकम् (श. च.)
महार्द्रक–न., शुण्ठी (वै. नि. २ भ दुर्जलज्वरचि.) स्थूलार्द्रकम् । वनार्द्रकम् । गुणाः—' महार्द्रं दीपनं ग्राहि रूक्षं वातकफापहम् (रा. व. ३ प)
महालिकटभी–स्त्री., श्वेतकिनिहीवृक्षः (रा. व. ९)
महालोध्र–पु., शबरलोध्रः (र. मा.)
महालोभल–पु., काकः । (रा. व. १९)
महावप–पु., महामेदा (श. च.)
महावरा–स्त्री., मूर्वा । दूर्वा (श. र.)
महावल्कः–पु., जातिफलवृक्षः (वै. नि.)
महावस–पु., शिशुमारः (हे. च.)
महावार्ताकिनी–स्त्री., महावार्ताकुवृक्षः । (वै. नि.)
महावास्तु–न., महायतनम् । (भा. म. कुष्ठचि.)
महावास्तुपरिग्रह–पु., व्यापकतया प्रशस्तस्थानग्राहि (भा. गुल्म. चि.)
महावील–न., अन्तःकरणम् (वै. नि.) आकाशम् (जटा.)
महाविहङ्ग–पु., गरुडः (च. द.)
महावीज–पु., पियालवृक्षः (न.) विटपः तत्तुमुष्कवङ्क्षण-योरन्तरम् (हे. च.)
महावृषा (ष्या)–स्त्री., मुशलीभेदः । (वै. नि.)
महावृ (बृ) हती–स्त्री., महावार्ताकी
महाव्याधि–पु., कुष्ठादिमहारोगाः । (निदानम्)
महाव्रण–न., दुष्टव्रणः (शब्दकल्पे वाराहीतन्त्रम्)
महाशठ–पु., पीतधुस्तूरवृक्षः । (रा. व. १०.)
महाशणपुष्पिका-(ष्पी)–स्त्री., शणपुष्पी नाम क्षुपविशेषः हिं.–फुणफुणा. । गुणाः—'कषाया उष्णा रसनिया-मका मोहनस्तम्भनादौ शस्ता (रा. व. ४.)

महाशणा–स्त्री., आरण्यशणः (वै. नि.)
महाशफर–पु., पार्वतमीनः
महाशल्क–पु., महाचिङ्गटमत्स्यः (हारा.)
महाशिता–स्त्री., शतावरी (श. च.) वनस्पतिविशेषः (वै. नि.)
महाशुक्ति–स्त्री., मुक्तागृहम् (रा. व. १३)
महाश्रय–पु., अक्षोटवृक्षः (वै. नि.)
महाश्वेतघण्टी–स्त्री., महाशणपुष्पी वृक्षः (वै. नि.)
महासंवितिकाफल–न., काबेलदेशीयसेवफलम् (वै. नि.)
महासफर–पु.. पार्वतमत्स्यः बृहत् प्रोष्ठीमत्स्यः, गुणाः– तिक्तः पित्तकफघ्नः शीतलः मधुरः रुच्यः वात-भूयिष्ठश्च (भा.)
महासिंह–पु., शरभापरनाम सिंहः (रा. व. १९)
महासीता–स्त्री., महाशणपुष्पी (रा. व. ७)
महासिद्धिकर–पु., कृष्णवनालुकम् (वै. नि.)
महासुख–न., मैथुनम् (त्रिका.)
महासुगन्धषट्क–न., चन्दनकस्तूरी कर्पूर कृष्णागुरुः मूर्वाकुङ्कुमानि (वै. नि.)
महासुगन्धि तैल–न., मेदोरोगे तैलम् (भा.)
महासूक्ष्मा–स्त्री., वालुका (रा. व. १३)
महास्नायु–स्त्री., रक्तवहमहानाडी (श. च.)
महाहवि–न., गव्यघृतम् (श. चि.)
महाह्स्वा–स्त्री., शूकशिम्बी (प. मु.)
महाक्षीरा–स्त्री., महिषी (वै. नि.)
महिका–स्त्री., हिम (अम.)
महिज्ञक–पु., मूषिकः (वै. नि.)
महिलाह्वया–स्त्री., प्रियङ्गुलता (अम.)
महिषकन्द–पु., श्वेतालुकम् (रा. व. ७)
महिषमत्स्य–पु., मत्स्यविशेषः । तल्लक्षणगुणाः– ' कृष्णः दीर्घकायः बलवान् महाशकश्च । तन्मांसं दीपनं बलवीर्यकरञ्च (रा. व. १७)
महिषमस्तक–पु., शालीधान्यविशेषः (भा. पू. १ भ. धा. व.)
महिषवल्ली–स्त्री., स्वनामख्यातसोमवल्लीसमलताविशेषः हिं छिरहिट्टी म. महिषवेली ।–गुणाः–रसवीर्यविपा-केषुसोमवल्ली समा ' (रा. व. ३)
महिषतक्र–न., महिषीघोलः, गुणाः––महिषं कफकृत् किञ्चिद्धनं शोफकरं नृणाम् । शस्तं प्लीहार्शोग्रहणी-दोषेऽतीसारिणामपि (अत्रि. ८ अ.)

महीपद–पु., किञ्जुलकः (वै. नि.)
महीलता–स्त्री., गण्डूपदी (अम.)
महेन्द्रकदली–स्त्री., कदलीवृक्षविशेषः । गुणाः–' उष्णा वातासृग्दरपित्तघ्नी च ' (रा. व. ११)
महेन्द्रलोह–न., अगरुकाष्ठम् (वै. नि.)
महेन्द्राणी–स्त्री., इन्द्रचिर्भटी (श. र.)
महेन्द्री–स्त्री., महेन्द्रवारुणीलता (रा. व. ३)
महेलिका (ला)–स्त्री., स्थूलैला (वै. नि.)
महेशबन्धु–पु., श्रीफलवृक्षः (श. च.)
महेश्वर–पु., श्वेतमन्दारः । विश्वकोषप्रणेता न., स्वर्णम् (रस. कौ. ज्वरान्तकरसे.)
महोक्ष–पु., महावृषः (अम.)
महोदधिवटी–स्त्री., अजीर्णाधिकारे औषधम् (रस. र.)
महोद्रेक–पु., महानिम्बः (वै. नि.)
महोन्नत–पु., तालवृक्षः (भा.) नारिकेलवृक्षः । धाराकदम्बः (वै. नि.)
महोन्मद–पु., मत्स्यविशेषः (श. र.) मदः ।
महोरग–न., तगरपादिकः (प. मु.) पु., महासर्पः ।
मांसकर्णी–स्त्री., वरट्यादिकीटः । वक्त्रशुङ्गम् (वा. उ.)
मांसकारि–न., रक्तम् । (हे. च.)
मांसकीलक–पु., तन्नामकगुह्यरोगभेदः अर्शोभेदः वा । लक्षणं यथा–' अन्तर्बहिर्वा मेढ्रस्य कण्डूला मांसकीलकाः । पिच्छिलास्रस्रवा योनौ तद्वच्च छत्रसन्निभाः । तेऽर्शांस्युपेक्षया घ्नन्ति मेढ्रपुंस्त्वभगार्तवम् । (वा. उ. ३३.)
मांसकेशी (इन्)–पु., पादरोगभेदयुक्तः अश्वः । 'केशाकाराणि मांसानि यस्य स्युस्तलजानि च । मांसकेशीति तं विद्यात् (ज. द. ३९ अ.)
मांसखुर–पु., पादरोगविशेषयुक्तः अश्वः । लक्षणं यथा–' बहुमांसखुरश्चैव ज्ञेयो मांसखुरो हयः । (ज. द. ३९ अ.)
मांसगज्वर–पु., ज्वरविशेषः । पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता । उष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ' । चिकित्सा–तीक्ष्णविरेचनादि । (निदा)
मांसग्रन्थि–पु., मांसजग्रन्थिरोगः । लक्षणम्–'मांसलैर्दूषितं मांसमाहारैर्ग्रन्थिमावहेत् । स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् । (वा. उ. २९ अ.)
मांसज–न., मेदोधातुः । (हे. च.)
मांसजाति–स्त्री., मृगविष्किरप्रतुदप्रसहबिलेशयमहामृगजलचरमत्स्याद्याः अष्टविधाः । मांसजातीयः (प. म.)
मांसतेज–पु., मेदोधातुः (हे. च.)
मांसदलन–पु., प्लीहघ्नवृक्षः । रक्तरोहितकवृक्षः (श. च.)
मांसपचन–न., मांसपाकः ।
मांसपुष्पिका–स्त्री., भ्रमरारिपुष्पवृक्षः । भ्रमरमारी इति मालवे प्रसिद्धा (रा. व. १०.)
मांसफल–पु., तरम्बुजवल्ली (रा. व. ७.)
मांसफला–स्त्री., वार्ताकी (रा. व. ७.)
मांसरक्ता–स्त्री., रोहिणी (वै. नि.)
मांसलिप्त–न., अस्थि (वै. नि.)
मांसवारुणी–स्त्री., हरिणादिमांसकृतं वारुणीमद्यम् । तत्करणविधिः–'एषां मांसन्तु कणशः कृत्वा पूर्वद्रवे न्यसेत् । संस्थाप्य मण्डलं पश्चादर्कं निष्काशयेत्ततः । एवं सर्वत्र मांसस्य वारुणीकरणक्रिया । पूर्वद्रवः तक्रादि । मण्डलं ४८ दिनानि (रावणः)
मांससङ्कोच–पु., मांसस्य शठितभावः (भा. म. ४ भ. विस्फोट. चि.)
मांससमुद्भवा–स्त्री., वसा (वै. नि.)
मांससर्पि–पु., राजयक्ष्मणि घृतम् (वा. चि. ५अ.)
मांसस्नेह–पु., मेदोधातुः (रा. व. १८.) वसा (वै. नि.)
मांसहासा–स्त्री., चर्म (श. र.)
मांसारि–पु., अम्लवेतसम् ।
मांसार्बुद–न., शूकरोगविशेषः ' मांसदोषेण जानीयादर्बुदं मांससम्भवम् (सु. नि. १४.) अर्बुदविशेषः (सु. नि. ११.)
मांसावद (दा) रण–न., मांसभेदनम् (वा. उ. ३७ अ.)
मांसाह्वया–स्त्री., जटामांसी (सु. चि. २ अ.)
मांसिका–स्त्री., जटामांसी (चि. क. क. स्त्रीरोगचि.)
मांसेष्टा–स्त्री., वल्गुला (रा. व. ४)
मांसौदन–न., मांससिद्धौदनम् । गुणाः–' मांसौदनं धातुवृद्धिकरं स्निग्धं गुरु स्मृतम् (च.)
माकरा–स्त्री., मरुवकवृक्षः (र. मा.)
माक्ष–न., सौवर्चललवणम् (प. मु.)
माक्षिकश्रेष्ठा–स्त्री., रूप्यमाक्षिकम् (प. मु.)
माक्षिकान्त–न., माधवीमद्यम् (वै. नि.)
माक्षिकाश्रय–न., सिक्थकम् (रा. व. १३.)
माक्षिकी–स्त्री., सुवर्णमाक्षिकम् (नकुल. १६अ.)
मागधिमूल–न., पिप्पलीमूलम् (प्र. बाहुशालगुडे द्रष्टव्यम्)
मागधीजटा–स्त्री., पिप्पलीमूलम् (वै. नि.)
मागधीशिफा–स्त्री., पिप्पलीमूलम् (सर्व ज्वरचि. त्रिभुवनकीर्तिरसे.)

मागधेया-स्त्री., स्वर्णजीवन्ती (वै. नि.)

माघमा-स्त्री., कर्कटः (वै. नि.)

माघवती- } स्त्री., पूर्वदिग् (रा. व. ११)
माघोनी- }

माघ्य-न., कुन्दपुष्पम् (र. मा.)

माङ्गल्यकाया-स्त्री., दूर्वा

माङ्गल्यकुसुमा-स्त्री., शङ्खपुष्पी (वै. नि.)

माङ्गल्यप्रवरा-स्त्री., वचा (वै. नि.)

माङ्गल्यागुरु-पु., अगुरुभेदः । केदारदेशे प्रसिद्धः,। गुणाः-' शीतगुणः स सुगन्धियोगवहः श्रेष्ठश्च (रा. व. १२)

माची-स्त्री., काकमाचीक्षुपः (वै. नि.)

माचीपत्र-न., सुरपर्णनामपत्रशाकः। (रा. व. १०)

माजल-पु., चाषनामकपक्षिविशेषः ।

माटी-स्त्री., पर्णदलशिरा (वै. नि.)

माठ-पु., सुनिषण्णकशाकः (वै. नि.)

माढि(ढी)-स्त्रीं., पत्राङ्कुरः । दन्तवेष्टभागः । (अ. टी. भ.) पर्णशिरा (हे. च.) दन्तशिरा (श. र.)

माण(क)-पु., स्वनामख्यातः कन्दविशेषः (प. मु.) (हिं.—मानकन्द.) गुणाः-' माणकः स्यान्महापत्रः कथ्यते तद्गुणा अथ । माणकः शोथहृत् शीतः पित्तरक्तहरो लघुः । (भा. पू. १ भ. शा. व.)

माणकघृत-न., शोथेघृतम् (भा.)

माणतुण्डिका-स्त्री., जलचरपक्षिविशेषः (च.सू.२७ अ)

माणवक-पु., सप्तवर्षीयबालकः । (रा. व. १८) दीपान्तरखर्जूरिका (वै. नि.) मनुष्यः । हारभेदः । (त्रिका.) कुत्सितपुरुषः (मे.) वटः (हे. च.) गोणकः (च. सू. १५)

माणिक्यकदली-स्त्री., कदलीविशेषः ।

माण्डविक-पु., तद्देशजमध्यमाश्वः । ' केकनाकारदेहस्तु भवेन्माण्डविको हयः (ज. द. ६ अ.)

माण्डूक-न., वङ्गधातुः (रा. व. १३) अहिफेनः (भैष. अभयनृसिंहरसे)

माण्डूकी-स्त्री., ब्राह्मीक्षुपः (वै. नि.)

मातङ्गकृष्णा-स्त्री., गजपिप्पली (वै.नि. २भ.वातव्याधिपक्षवधचि.)

मातङ्गमकर-पु., महामत्स्यविशेषः । (रा. व. १९.)

मातर-पु., क्रमः (वै. नि.)

माता-स्त्री., जननी (अम) आखुकर्णीलता इन्द्रवारुणीलता (रा. व. ३.) जटामांसी (रा. व १२) महाश्रावणिका (रा. व. ५) घृतकुमारी (वै नि.) गौः (मे.)

माताङ्गा-स्त्री., नागबला (वै. नि.)

मातुलद्रुम-पु., धुस्तूरवृक्षः । शाल्मलीवृक्षः (वै. नि.)

मातुलपत्रक-पु., धुस्तूरफलम् (अम.)

मातुलपुष्प-न., धुस्तूरपुष्पम् (वै. नि.)

मातुलानी-स्त्री., प्रियङ्गुलता (श. च.) शणबीजम् (हे. च.) भङ्गा, कलायः । (मे.)

मातुलाहि-पु., सर्पविशेषः (अम.)

मातुली-स्त्री., शणबीजम् । भङ्गा (श. च.)

मातुलुङ्गशिफा- स्त्री., मातुलुङ्गमूलम् । (च. द. कफज्वर चि.)

मातृकाकुन्द-पु., शिशोर्गुदजव्रणविशेषः (वा. उ. २अ.)

मातृकावह- } पु., पर्दकीटः (प्रयोगा.)
मातृवाहक- } च. (द. ग. ग. चि.)

मातृमण्डल-न., नेत्रयोर्मध्यभागः, तत्तु आसन्नमरणो न पश्यति (स्मृतिः)

मातृवाहिनी-स्त्री., वल्गुलापक्षी (रा. व. १९)

मातृसिंही-स्त्री., वासकवृक्षः (श. र)

मादक-पु., अहिफेनः (प. मु.) हरिणभेदः (वै. नि.) दात्यूहपक्षि (श. मा.)

माधवकर-पु., रुग्विनिश्चयग्रन्थकारः । रसकौमुदीकारः च ।

माधविका-श्री., मालवीलता (अ. टी. भ.)

माधवीमूल-न., माधवीलतामूलम् । (रस. र. स्तनरोगचि.) 'घोलेन माधवीमूलं पीतं स्त्रीमध्यकार्श्यकृत् ।

माधवीलता-स्त्री., स्वनामख्यातलता, गुरुविन्द, माधवी, इन्द्रगोचे, इति महाराष्ट्रकर्णाटदेशयोः प्रसिद्धा । गुणाः--' कटुका तिक्ता कषाया मदगन्धयुक्ता पित्तकासव्रणघ्नी दाहशोषघ्नी च (रा. व. १०) मधुरा शीता लघ्वी दोषत्रयघ्नी च । (भा.)

माधुर-न., मल्लिकापुष्पम् (त्रिका.)

माधुरी-स्त्री., अजमोदा (रा. व. ६) द्राक्षासवः मधुरता (वै. नि.)

माधूकसार-पु., मधूकपुष्परसः मधु वा (वा. सू. १५ अ. शिरोविरेचने)

माध्वक-न., माध्वीकम् (वै. नि.)

माध्वाम्र-पु., बहुरसालाम्रवृक्षः (रा. व. ११)

माध्वीमधुरा-स्त्री., मधुखर्जूरिका (रा. व. ११.)

माध्वी शर्करा-स्त्री., मधूशर्करा सा अष्टविधा मधूनामष्टविधत्वात् । गुणा अपि तत्तन्मधुतुल्या भवन्ति (रा. व. १४.)

माध्वीसीता–स्त्री., मधुशर्करा (रा. व. १४.)
मानकक्षार–पु., माणकदण्डपत्रक्षारः (भैष.)
मानत–पु., पर्पटकः (वै. नि.)
मानधानिका–स्त्री., त्रपुषी (श. मा.)
मानभाण्ड–न., परिमाणभाण्डम् (च. सू. १५अ.)
मानमृताफल–पु., पटोलवृक्षः (वै.नि.)
मानव–पु., मनुष्यः (अम.)
मानवकोत्तम–पु., शिशुः (रा. व. १८.)
मानसक्लैब्य–न., चित्तसम्भूतक्लैब्यम् (सु. चि. २६.)
मानसज्वर–पु., य आदौ मनसि जायते वैचित्यादिः। लक्षणम्–' वैचित्यमरतिर्ग्लानिः मनसस्तापलक्षणम् (च. चि. ३अ.)
मानसालय(सौका)–पु., हंसः (रा. व. १९.)
मानिनी–स्त्री., लक्षणाकन्दः (रा. व. ७.)
मानिमन्थ–न., सैन्धवलवणम् (भेष. कुष्ठचि.)'मानिमन्थञ्च तुल्यांशम् '।
मानी (इन्)–पु., सिंहः (रा. व. १९.) स्त्री., (नी) शरावमितम् (भेष.)
मानुषी–स्त्री., औषधनिर्माणकार्यम् चिकित्साभेदः (श. च.) नारी (अम.)
मानुषी दधि–न., मानुषीदुग्धजातदधि । गुणाः– विपाके मधुरं बल्यं अम्लं गुरु सन्तर्पणं चक्षुष्यं ग्रहदोषघ्नञ्च (रा. व. १५)
मानुषीक्षीर–न., मानुषीस्तनदुग्धम्, गुणा :- मधुरं कषायं हिमं लघु चक्षुष्यं दीपनं पथ्यं पाचनं रोचनञ्चं (रा. व. १५) सञ्जीवनं बृंहणमेव सात्म्यं सन्तर्पणं नेत्ररुजापहञ्च । पित्तस्य रक्तस्य च नाशनञ्च नारीपयः स्नेहनमेव शस्तम् (अत्रि. ८ अ.)
माम्बिका–स्त्री., अम्बष्ठा (रा. व. ४)
मायाद–पु., कुम्भीरः (त्रिका.)
मायी–स्त्री., हिलमोचिका (र. मा.)
मायु–पु., पित्तम् (रा. व. २१) (त्रिका. प्र. रविसुन्दररसे)
मायूरा–स्त्री., काकोदुम्बरिका (वै. नि.)
मायूरादिपक्ष व्यजन–न., मयूरपक्षवस्त्रवेत्रादिव्यजनम् । 'मायूरा वस्त्रजावैत्रा वाता दोषत्रयापहाः (राज २५.)
मार–पु., मृतः (मे.) धुस्तूरवृक्षः (श. च.)
मारकवर्ग–पु., रसमर्दकद्रव्यगणः (र. सा. सं.)

मारङ्गा–स्त्री., मेदा (रा. व. ५)
मारजातक–पु., मार्जारः (वै. नि.)
मारट–न., इक्षुमूलम् (वै. नि.)
मारारिनारीरज–पु., गन्धकः (भा. ज्वरचि. कल्पतरौ)
मारीचपत्रका–स्त्री., सरलदेवदारुः सर्जतरुः (वै. नि.)
मारीचवल्ली–स्त्री., मरिचवृक्षः (वै. नि.)
मारुण्ड–पु., सर्पाण्डम् (मे.)
मारुता–स्त्री., स्पृक्का (वै. नि.)
मार्क–पु., भृङ्गराजः (र. मा.)
मार्कटपिप्पली–स्त्री., कपिपिप्पली (रा. व. ४)
मार्गवाहिनी–स्त्री., क्षुद्रनाडी (वै. नि.)
मार्जारकण्ठ–पु., मयूरः (श. र.)
मार्जारपाद–पु., अश्वभेदः । यस्याश्वस्य पादे कूर्चे च स्ववर्णभिन्नवर्णा रेखा भवेत् । स च भर्तुरमङ्गलकर) (ज. द. ३ अ.)
मार्जारिका–स्त्री., कस्तूरी (वै. नि.)
मार्जारीय–पु., बिडालः (मे.)
मार्जाल–पु., बिडालः (द्वि. कोष.)
मार्जिता–स्त्री., दधिशक्तुः (प. मु.) शिखरिणी (वै. नि.)
मार्तण्ड–पु., अर्कवृक्षः (अम.) शूकरः (मे.) स्वर्णमाक्षिकम् (वै. नि.)
मार्तण्डमूल–न., अर्कमूलम् (वै. नि. २ भ. ज्वरचिं निर्गुण्डीधूपे. .
मार्द्वीकमद्य–न., द्राक्षाकृतमद्यम् ' मृद्वीकाभिः कृतं मद्यं मार्द्वीकमिति चोच्यते। मृद्वीकानां सुपक्वानां यः स्वयं गालितः पटात् । रसस्तेन हि तन्मद्यं कषायरहितेन यत् । मार्द्वीकं कापिशं भीमविक्रान्तं कापिशायनम् (तोड. वृद्धशौनकः)
मार्षक–पु., मधुरवास्तुकः (रा. व. ७.)
मार्ष्टि–स्त्री., तैलमर्दनम् (वै. नि.)
मालक–न.. स्थलपद्मम् (जटा.)
मालतीजात–पु., टङ्कणक्षारः (र. सा. सं.)
मालतीतीरज–पु., टङ्कणम् (हे. च.)
मालतीमूल–न., मालतीशिफा, इदं जङ्गमविषहरम् (नकुल १६ अ.)
मालतृण–न., तृणसामान्यम्, । तृणविशेषम् (वै. नि.)
मालवा–स्त्री., उपोदकी (भा. पू. १ भ. शा. व.)
मालविटपी (इन्)–पु., कुम्भीवृक्षः (वै. नि.)
मालसी–स्त्री., केशपुष्पवृक्षः (श. र.)

मालाफल- } न., पु., रुद्राक्षः (वै. नि.)
मालामणि- }

मालारिष्टा-स्त्री., पाचीनामसुगन्धपत्रम् (रा. व. १०)

मालाश्रेष्ठतमा-स्त्री., तुलसीवृक्षः (वै. नि.)

मालिक-पु., पक्षिविशेषः (मे.) रञ्जकम् (श. र.) स्त्री., (का)-द्राक्षामद्यम् (वै. नि.) मल्लिकाविशेषः । मद्यम् (हारा.) सप्तला (मे.) अतसी (श. च.)

मालिनी-स्त्री., अग्निशिखावृक्षः । दुरालभा (श. च.)

मालुक-पु., कृष्णार्जकम् । ईषच्छ्वेतराजहंसः (वै. नि.)

मालुकाच्छद-(पत्र)-पु., अश्मन्तकवृक्षः (वै. नि.)

मालुधान-पु., मातुलाहिसर्पः । (अम.) स्त्री., (नी)-लताभेदः (वै. नि.)

मालूरमूल-न., बिल्वमूलम् (भा. म. १ भ.-जिह्मकज्वरचि.)

मालेया-स्त्री., स्थूलैला (प. मु.)

माल्यक-पु., मदवृक्षः (वै. नि.)

माल्या-स्त्री., तृणभेदः (वै. नि.)

माषकलाय-पु.,माषव्रीहिः (अ. टी. भ.)

माषतैल-न., वातव्याधौ तैलम् (सा. कौ. भैष.-बृहन्माषतैलम्)

माषयोनि-पु., पापड इति ख्यातखाद्यद्रव्यम् (वै. नि.)

माषरा-स्त्री., अन्नमण्डः (प. मु.)

मांषद-पु., कच्छपः (श. र.)

माषान्न-न., माषकृतान्नम् । गुणाः- 'माषान्नं दुर्जरं प्रोक्तं मांसवृद्धिकरं गुरु । वातनाशकरं वृष्यं (वै. नि.)

माषेण्डरी-स्त्री., माषपिष्टविकृतिः (च. द. शूल. चि.)

मासङ्ग-पु., हरिणविशेषः (वै. नि.) दात्यूहपक्षी

मासद्वयोद्भव-(वा)-पु., स्त्री., षष्टिकशालिधान्यम् । गौरषष्टिकः (रा. ब. १६)

मासन-न., ओषधिबीजविशेषः (श. च.)

मासमान-न., माषपरिमाणम् ।

मासर-पु., काञ्जिकम् (वै. नि.) भक्तसमुद्भवमण्डः (अम.)

मासवर्तिका-स्त्री., सर्षपीनामक्षुपविशेषः ।

माहिषघृत-न., महिषीक्षीरजातघृतम् । घृतमिदं तीक्ष्णकभस्मकादिरोगेषु हितम् । (सि. यो. अग्निमान्द्यचि ।) गुणाः—' वातश्लेष्मघ्नं बलकरं वर्णकरं अर्शोग्रहणीहरं दीपनं चक्षुष्यं च (रा. व. १५)

माहिषदधि-न., महिषी दुग्धकृतं दधि । गुणाः——मधुरं स्निग्धं रक्तपित्तघ्नं श्लेष्मलं बलशोणितवर्धनं वृष्यं श्रमघ्नं शोधनञ्च (रा. व. १५)

माहिषनवनीत-न., महिषीदुग्धजातं नवनीतम् । गुणाः--' कषायं मधुरं शीतं वृष्यं बल्यं ग्राहि पित्तघ्नं पुष्टिदञ्च (रा. व. १५) ' माहिषी नवनीतेन स्तनपीडा स्थिरा भवेत् । (र. स. र. स्तन. रोग चि.)

माहिषमूत्र-न., महिषजलम् गुणाः--' कटु उष्णम् आनाहशोषगुल्मरोगघ्नं कुष्ठकण्डूतिशूलोदर रोगघ्नञ्च (रा. व. १५)

माहिषवल्लरी(ल्लिका)-स्त्री., कृष्णवृद्धदारकः । ल्लिका-श्वेतवृद्धदारकः (वै. नि.)

माहिषवल्ली-स्त्री., लघुसोमलता (वै. नि.)

माहिषाक्ष-पु., माहिषाक्षगुग्गुलुः (वै. नि.)

माहेय-पु., प्रवालः (वै. नि.)

मिताशन-त्रि., परिमिताहारः, परिमितभोजी (च.)

मित्रपञ्चक-न., घृत-मधु-गुञ्जा-टङ्कण-गुग्गुलुः (र.-सा. सं.)

मिथ्याचार-पु., शास्त्रोक्तविधिभ्रष्टाचारः (सु. नि. ५अ.)

मिथ्योपचार-पु., प्रवातादिसेवनरूपानुचिताचरणम् (भा.)

मिरा-स्त्री., मूर्वा (रा. व. ३.)

मिलपत्र-पु., अश्मन्तकवृक्षः (वै. नि.)

मिश्रज-पु., खेसरः (रा. व. १९.)

मिश्रवनफला-स्त्री., वार्ता (रा. व. ७.)

मिश्रीतुत्थ-न., खर्पर (वै. नि.)

मिश्रोदन-न., खेचरिका (संग्रहः)

मिषिका-स्त्री., मधुरिका शताह्वा (श. र.)

मिष्ट-त्रि., मधुररसः (भा.)

मिष्टनिम्ब-पु., निम्बवृक्षभेदः । (वै. नि.)

मिष्टनिम्बू-स्त्री., मधुरजम्बीरः । मधुनिम्बुकः । गुणाः— 'मिष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत् । गररोगविषध्वंसि कफोत्क्लेशि च रक्तहृत् । शोषारुचितृषाच्छर्दिहरं बल्यञ्च बृंहणम् (भा.)

मिष्टपाक-पु., मिष्टान्नम् । मधुररसविपक्वफलादिः (पाकराजः)

मिष्टरस-पु., स्वादुपाकरसद्रव्यम् । तद्गुणौ श्लेष्मकृत वातपित्तहरौ (सु.)

मिष्टान्न-न., मधुरान्नम् । परान्नादिः । (हला.)

मिहिर-पु., अर्कवृक्षः (अम. वै. नि. २भ. क्षय. चि. त्रैलोक्यचिन्तामणिरस
न., ताम्रम् (वै. नि.)
मीनक-न., नयनाञ्जनविशेषः (उणा.)
मीनकाक्ष- (नाक्ष)-पु., शुक्लकरवीरः (वै. नि.)
मीनघाती (इन्)-पु., बकपक्षी (रा. व. १९.)
मीनपित्त-न., कटुकी (वै. नि.)
मीनर-पु., हारकः (त्रिका.)
मीनरङ्क (ङ्ग)-पु., मत्स्यरङ्कपक्षी (त्रिका.) जलकाकः (वै. नि.)
मीनाम्रीण-पु., खञ्जरीटपक्षी (वै. नि.) दर्दुराम्रः (मे)
मीलक-पु., रोहितमत्स्यः (वै. नि.)
मीलन-न., नेत्रमुद्रणम् (निदा. व्याक्र.)
मीर-पु., पानीयम् (उणा.)
मीवा (न्)-स्त्री., उदरकृमिः । शीकरम्; सारम् (उणा)
मीशान-पु., महारग्वधवृक्षः (वै. नि.)
मुकन्द-(क)-पु., पलाण्डुः (अ. टी. भ.) षष्टिकव्रीहिविशेषः । कुधान्यभेदः (भा. सु.सू. ४६ अ.) गुणाः कङ्गुवत् (च. सू. २७. अ.)
मुकुर-पु., मल्लिकापुष्पवृक्षः (विश्व.) बकुलवृक्षः । आदर्शः (मे.) बदरवृक्षः (श. र.)
मुकुल-पु., ईषद्विकसितकलिका । स्थूलकलिका (अम.) जैपालवृक्षः । 'पिस्ता इति ख्यातः । फलवृक्षः । आत्मा । शरीरम् (धरणि)
मुकुष्ट-(क)-पु., वनमुद्गः (र. मा. च. द. ज्वरचि.) 'कुलत्थान् समुकुष्टकान् । ' गुणाः— शीतलः ग्राही कफपित्तज्वरघ्नश्च (राज.)
मुक्तचण्डा-स्त्री., चिञ्चा (वै. नि.)
मुक्तचक्षु-पु., सिंहः (श. मा.)
मुक्तपालेवत-पु., द्वैपखर्जूरीवृक्षः (वै. नि.)
मुक्त (क्ता) माता-स्त्री., शुक्तिः (वै. नि.)
मुक्तरसा-स्त्री., रास्ना (र. मा.)
मुक्त (क्ता) वास-पु., शुक्तिः (श. च.)
मुक्तशृङ्ग-पु., रोहितकमत्स्यः (वै. नि.)
मुक्तागार-न., शुक्तिः (श. च.)
मुक्ताप्रसू-पु., शुक्तिः (प. मु.)
मुक्ताशुक्ति-स्त्री., मुक्तायोनिशुक्तिः, मुक्तागृहम् । गुणाः- कटु स्निग्धा श्वासहृद्रोगहारिणी । शूलप्रशमनी रुच्या मधुरा दीपनी परा (रा. व. १३)
मुक्तास्फोट(टा)-पु., स्त्री. मुक्तागृहम् (अम.)

मुक्तिप्रद-पु., हारिद्रमुद्गः (वै. नि.)
मुक्तिमुक्त-पु., शिलारसः (र. मा.)
मुक्षक-पु., मुष्ककवृक्षः (अरुण.)
मुखचीरी(इन्)-स्त्री., पु., पलाण्डुः (श. चि.) जिह्वा (श. मा.)
मुखज-पु., दन्तः (वै. नि.)
मुखधौता-स्त्री., भार्गी (श. च.)
मुखपूरण-न., गण्डूषः (च)
मुखप्रसेक-पु., श्लेष्मजमुखव्याधिः (भा.)
मुखभूषण-न., ताम्बूल (निदा.)
मुखमोदा-स्त्री., शोभाञ्जनवृक्षः (रा. व. ७)
मुखर-पु., शङ्खः, काकः (रा. व. १९)
मुखलाङ्गल-पु., शूकरः (जटा.)
मुखलिप्तता-(लेप)-पु.. मुखरोगः (भा.)
मुखवल्लभ-पु., दाडिमवृक्षः (श. मा.)
मुखवासन-त्रि., मुखसुरभिकरणद्रव्यमात्रम् (अम.)
मुखविलुण्ठिका-स्त्री., छागी (श. र.)
मुखविष्ठा-स्त्री., तैलपायिका (हे. च.)
मुखवैदल-पु., तन्नामकवायव्यकीटः (सु. क. ८ अ.)
मुखव्यङ्ग-पु., गण्डगतक्षुद्ररोगः (निदा.)
मुखशुद्धि-स्त्री., मुखशोधनम्
मुखशोधन-न., त्वक् (रा. व. ६)
मुखसम्भव-न., पुष्करमूलम् (वै. नि.)
मुखसिञ्चनमन्त्र-पु., पीतविषस्य मुखसिञ्चनार्थं जलस्य मन्त्रपूतकरणमन्त्रम् । 'ओं हर हर नीलकण्ठ अमृतं प्लावय प्लावय हुङ्कारेण विषं ग्रस ग्रस क्लीङ्कारेण हर हर हौङ्कारेण अमृतं प्लावय प्लावय हर हर नास्ति विषम् उच्छिरे (अत्रि. ३ स्थान. ५६ अ.)
मुखसुर-न., तालुसुरा (त्रिका.) अधरामृतम्
मुखसूची-स्त्री., आम्रातकवृक्षः (वै. नि.)
मुखार्जक-पु., अर्जकवृक्षः (रा. व. १०)
मुखास्त्र-पु., कर्कटः (त्रिका.)
मुखिक-पु., मुष्ककवृक्षः (वै. नि.)
मुगूह-पु., हरिणविशेषः । (वै. नि.) दात्यूहपक्षी (भूरिप्र.)
मुचक-पु., लाक्षा (वै. नि.)
मुचलिन्द-पु., मुचुकुन्दनवृक्षः । तिलकवृक्षः (क)-राजादनवृक्षः (वै. नि.)
मुचुक-पु., पिचुकः । मदनवृक्षभेद (प. मु.)
मुञ्जक-(जाल)-पु., न., अश्वस्य कृमिजन्याक्षिरोगः । 'एकेन मुञ्जमाख्यातं बहुभि र्मुञ्जजालकं । कृमिभिः

पटलान्तस्थैर्विद्यान्नेत्ररुजाद्वयमिति। प्रथमं तैलवर्णाभं द्वितीयं स्फटिकप्रभम्। रक्ताभञ्च तृतीयञ्च चतुर्थं तैलमुच्यते। प्रथमं पटलं साध्यं द्वितीयञ्च तथा भवेत्। तृतीयं कृच्छ्रसाध्यं स्याच्चतुर्थं नैव सिध्यंति (ज. द. ३० अ.)

मुञ्जतृण–न., मुञ्जम् (रा. व. ९)

मुञ्जमणि–पु., पुष्पराागमणिः (भा.)

मुञ्ज (ञ्जा) र–न., शालूककन्दः (श. मा.) मृणालः (वै. नि.)

मुञ्जातकफल–न., मुञ्जातकबीजम् (च. द. वृष्य चि.) गोधूमाद्यघृते) अभावे तालमस्तकं देयम्।

मुण्डक(ज)–न., मुण्डलौहः (रा. व. १३) पु.. (क)–नापितः (हे. च.)

मुण्डकिट्ट–पु., न., मुण्डलौहभेदः। मण्डूरलौहः (र. सा. सं.)

मुण्डन–न., वपनम्। केशच्छेदनम् (हे. च.)

मुण्डफल–पु., नारिकेलवृक्षः (श. र.)

मुण्डलौह–न., लौहविशेषः। तच्च मृदु किट्टकठोरमिति त्रिधा (रा. व. १३)

मुण्डित–न., लौहम् (रा. व. १३)

मुण्डिनी–स्त्री., कस्तूरीमृगः (वै. नि.)

मुण्डीरिका (री)–स्त्री., मुण्डितिका, अलम्बुषा (प. मु.)

मुण्डीवृक्षानुकारक–पु., मुचुकुन्दवृक्षः

मुत् (दा)–स्त्री., वृद्ध्यौषधिः (रा. व. ५.)

मुदिर–पु., भेकः (उणा.)

मुदी–स्त्री., ह्रस्वगाम्भारीवृक्षः। ज्योत्स्ना (वै. नि.)

मुद्गदला–स्त्री., मुद्गपर्णी (चि. क. क. प्रदरचि.)

मुद्गभुक् (भोजी)–पु., घोटकः (त्रिका. रा. व. १९.)

मुद्गमोदक–पु., पक्वान्नभेदः। गुणाः– लघुः ग्राही त्रिदोषघ्नः चक्षुष्यः स्वादुः ज्वरघ्नः बल्यः शीतलः रुच्यश्च। तत्साधनविधिः यथा– 'मुद्गानां धूमसीं सम्यक् गोलयेन्निर्मलाम्बुना। कटाहस्थघृतस्योर्ध्वं झर्झरं स्थापयेत्ततः। धूमसीन्तु द्रवीभूतां प्रक्षिपेत् झर्झरोपरि। पतन्ति बिन्दवस्तस्मात् तान् सुपक्वान् समुद्धरेत्। सितापाकेन संयोज्य कुर्यात् युक्तेन मोदकान् (भा.)

मुद्गवटक–पु., मुद्गकृतवटकः। गुणाः– मौद्गो वटो गुरू रुच्यो वातपित्तास्रदो मतः। श्लेष्मलः पुष्टिबलकृत शुक्रलो बलदोऽल्पतृड्ड (वै. नि.)

मुद्गष्ट (क)–पु., वनमुद्गः (श. र. अम.)

मुद्गार्द्रवटक–पु., वटकविशेषः। मुद्गपिष्टीविरचितान् वटकांस्तैलपाचितान्। हस्तेन चूर्णयेत् सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत्। भृष्टं हिङ्ग्वार्द्रकं सूक्ष्मं मरिचं जीरकं तथा। निम्बुरसं यवानीञ्च युक्त्या सर्वं विमिश्रयेत्। मुद्गपिष्टिं पचेत्सम्यक् स्थाल्यामङ्गारकोपरि। तस्यास्तु गोलकं कुर्यात् तन्मध्ये पूरणक्षिपेत् तैले तान् गोलकान् पक्त्वा क्वथितायां निमज्जयेत्। गुणाः– 'मुद्गार्द्रवटका रुच्या लघवो बलकारकाः। दीपनास्तर्पणाः पथ्यास्त्रिदोषेषु प्रपूजिताः' (भा.)

मुद्राशङ्ख–न., स्वनामख्यातखनिजदार्थः। गुणौ–सङ्कोचनम् आवरकञ्च।

मुनिका–स्त्री., ब्राह्मीक्षुपः (वै. नि.)

मुनिच्छद–पु.,सप्तपर्णवृक्षः (रा. व. १२)

मुनिनिर्मित–पु., डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः। सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः (भा. पू. १ भ. शा. व.)

मुनिपत्र–पु., दमनकवृक्षः (वै. नि.)

मुनिपादप–पु., वकवृक्षः (प. मु.)

मुनिपित्तल–न., ताम्रम् (त्रिका.)

मुनिपुत्र–पु., दमनकवृक्षः (भा.) खञ्जनपक्षी (त्रिका.)

मुनिपुष्प–न., पु., अगस्तिपुष्पम् (शब्दकल्पः)

मुनिपूग–पु., पूगवृक्षभेदः (त्रिका.)

मुनिफल–पु., अगस्तिफलकोषः (वै. नि.)

मुनिभेषज–न., हरीतकी, लङ्घनम्। वकवृक्षः (मे.)

मुनिभोजन–न., श्यामाकधान्यम्। नीवारः (वै. नि.)

मुनिवर–पु., पुण्डरीकवृक्षः (वै. नि. कासचि. पर्पटीरसे)

मुनिवल्लभ–पु., प्रियालवृक्षः (वै. नि.)

मुनिवृक्ष–पु., अगस्तिवृक्षः (प. मु.)

मुनिशस्त्र–न., श्वेतदर्भः (वै. नि.)

मुनिसुत–पु., दमनकवृक्षः (भा.)

मुनिह्वय–पु., समष्ठिलक्षुपः (रा. व. ४)

मुनीन्द्र–पु., अगस्तिवृक्षः। लोध्रवृक्षः (वै. नि.)

मुनीष्ट–न., नीवारधान्यम् (प. मु.)

मुमूर्षा–स्त्री., मरणेच्छा।

मुरगण्ड–पु., वरण्डः (जटा.)

मुरङ्गिका–स्त्री., मूर्वा (वै. नि.)

मुरजफल–पु., पणसवृक्षः (त्रिका.)

मुर्भिणी–स्त्री., अङ्गारधानिका (श. च.)

मुर्मुर–पु., तुषाग्निः (मे.)

मुशटी-स्त्री., श्वेतकङ्गुः (हे. च.)
मुश(ष)लीकन्द-पु., तालमूली (वै. नि.)
मुषक-पु., मूषिकः (वै. नि.)
मुषा-स्त्री., स्वर्णादिगालनपात्रम् (अ. टी. रा.)
मुष्कर-पु.,महाण्डकोषमनुष्यः (हे. च.)
मुष्कशून्य-पु., षण्डः (श. मा.)
मुष्ट-त्रि., मर्दितम्
मुष्टि-पु. स्त्री., अन्तर्नखमुष्टिः (भा. प. ४भ. कर्णदो चि. अन्तर्नखमुष्टिमुष्णः यष्टिमधुकषायः (सु. सू. ४३ अ.)
मुष्टिन्धय-पु., बालकः (त्रिका.)
मुष्टिप्रमाणबदर-न.,सेवफलम् (भा.)
मुष्टियोग-पु.,'उद्धृत्य मुष्टिनाच्छाद्य सुगुप्तं यन्निधापयेत्। तं मुष्टियोगमित्याहुर्विबुधा भिषगीश्वराः। इति परिभाषान्तरम्
मुष्ठक-पु., राजसर्षपः (र. मा.)
मुस्तकादि-पु.,विषमज्वरे कषायभेदः 'मुस्तामलकगुडूचीविश्वौषधकण्टकारिकाक्वथः। पीतः सकणाचूर्णः समधुविषमज्वरं हन्ति (भैष. ज्वरचि.)
मुस्तद्वय-न., नागरमुस्तकैवर्तिमुस्तद्वयम् (च. द. वातव्याधिचि. महाप्रसारणीतैले)
मुस्ताकृति-स्त्री., शठी (वै. नि.)
मुस्ताद-पु., शूकरः (जटा.)
मुस्ताभ-न., नागरमुस्ता (र. मा.)
मूढि-स्त्री., मूर्च्छा (रा. व. २०.)
मूत्रकोश- पु., मूत्राशयः (ज. द. २अ.)
मूत्रदशक-न., दशविधमूत्राणि हस्तिमेषोष्ट्रगवाजमहिषघोटकगर्दभमानुषीमानुषजातानि (रा. व. २२.)
मूत्रनिरोध-पु., मूत्ररोधरोगः (निदा.)
मूत्रपञ्चक-न., पञ्चविधमूत्राणि। गवामजानां मेषीणां महिषीणाञ्च मिश्रितम्। मूत्रेण गर्दभीनाञ्च तन्मतं मूत्रपञ्चकम् (रा. व. २२.)
मूत्रपतन-पु.. गन्धमार्जारः (रा. व. १९.)
मूत्रपथ-पु., योनिः (वै. नि.)
मूत्रपुट-न., बस्तिः। नाभेरधोभागः (हे. च.)
मूत्रबीजक-पु., असनवृक्षः (वै. नि.)
मूत्रशोधनिका-स्त्री., चिर्भटिका वनकर्कटीविशेषः (नै.वि.)
मूत्रशौक्ल्य-न., श्लेष्मजन्यमूत्ररोगः (भा.)
मूत्रक्षय-पु., मूत्राघातभेदः। 'रूक्षस्यक्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ। मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम् (मा. नि.)
मूत्रातीत-पु., मूत्राघातभेदः। तस्य लक्षणम्—'चिरं धारयतो मूत्रं त्वरया न प्रवर्तते। मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते (मा. नि.)'
मूत्राधिक्य-न., श्लेष्मजन्यमूत्रबाहुल्यरोगः (भा.)
मूत्राष्ट (क)-न., गोऽजाविमहिषाश्वानां खरोष्ट्रकरिणां तथा। मूत्राष्टकमिति ख्यातं सर्वशास्त्रेषु सम्मतम् (प. प्र. ३ ख. भा. म. ४ भ. बालचि.)
मूत्रोष्णता-स्त्री., पित्तजन्यमूत्ररोगः (भा.)
मूर्धकर्णी (परी)-स्त्री., छत्रम् (हारा.)
मूर्धखोल-पु., जलत्राणा (त्रिका)
मूर्धज-पु., न., केशः (रा. व. १८) स्त्री., (जा) बालकः (भा. म. १ भ. चित्तविभ्रमज्वरचि.)
मूर्धपुष्प-पु., शिरीषवृक्षः (श. मा. श. च.)
मूर्धरस-पु., अन्नफेनः
मूर्धवेष्टन-न., उष्णीषः (हे. च.)
मूर्धा (न्)-पु., मस्तकम् (रा. व. १८)
मूलकक्षार-पु., शुष्कमूलकक्षारः (च. द. ग्रन्थिचि.)
मूलकच्छद-पु., कृष्णशिग्रुः (वै. नि.)
मूलकपोता-स्त्री., बालमूलकम् (वा. चि. ८ अ.)
मूलकबीज-न., मूलकशस्यम् (भा.)
मूलकमूला-स्त्री., क्षीरीशवृक्षः क्षीरकाकोली (प. मु.)
मूलकर्कटी-स्त्री., कृष्णोदुम्बरम् (वै. नि.)
मूलकविष-न., कन्दविषभेदः (सु. क. २ अ.)
मूलकशाक-पु., मूलकपत्रम्
मूलजिह्वा-स्त्री., सूक्ष्मजिह्वाधोवर्ति जिह्वामूलम् (रा. व. १८)
मूलपर्णी-स्त्री., मण्डूकपर्णी (प. मु.)
मूलफल(ला)-पु., स्त्री., पनसवृक्षः (वै. नि.)
मूलरस-पु., मोरटलता (र. मा.)
मूलवीर-न., पुष्करमूलम् (मद. १ व.)
मूलवृक्ष-पु., शाल्मलीवृक्षः (रा. व. ८)
मूलशो (सा) धन-पु., पुण्डरीकवृक्षः। (वै. नि.)
मूलाधार-पु., गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थानम् (तन्त्रम्.)
मूलाह्वय-न., मूलकम् (रा. व. ७)
मूलिका-स्त्री., मूलकम्। मूलसमूहः। मूलौषधम् (रस. र. रसशोधने.) क्षीरिका (वै. नि.)
मूलिकामूल-न., क्षीरिकामूलम्। (वै. मि. २ भ. सर्वज्वरचि.)
मूलिनीवर्ग-पु., प्रशस्तमूलानामुद्भिदां षोडषगणः। 'हस्तिदन्ती (नागदन्ती) हैमवती (श्वेतवचा)

श्यामा त्रिवृदधोगुडा । सप्तला श्वेतश्यामा च प्रत्यक्श्रेणी गवाक्ष्यपि । ज्योतिष्मती च बिम्बी च शणपुष्पी विषाणिका । अश्वगन्धा द्रवन्ती च क्षीरिणी चाथ षोडश ’ । एषु शणपुष्पी हैमवती बिम्बी च छर्दने । श्वेता ज्योतिष्मती च शीर्षविरेचने । शिष्टाः ११ विरेचने योज्याः (च. सू. १ अ.)

मूलेर–न., पु., जटामांसी (उणा.)

मूश (ष) ली-स्त्री., तालमूली (वै. नि.)

मूष (षि) ककर्णी (पर्णिका)–स्त्री., आखुकर्णीलता (रा. व. ३५)

मूषकयुग्म–न., ह्रस्वदीर्घमूषाकर्णीद्वयम् (वै. नि. शीतज्वरचि. तालकादिशीतारिरसे)

मूषकशत्रु-पु., बिडालः (वै. नि.)

मूषकश्र (श्रा) वणी–स्त्री., मूषिककर्णी (वै. नि.)

मूषाक (प)र्णी –स्त्री., आखुकर्णी (श. र.)

मूषातुत्थ–न., नीलतुत्थकम् (हे. च.)

मूषिकतैल–न., योनिकन्द तैलम् (सा. कौ.)

मूषिकरुहा-स्त्री., मूषिकलोमन् (सु. क. १अ.)

मूषिकाद्यतैल–न., गुदभ्रंशेतैलम्

मूषिकाराति–पु., बिडालः (रा. व. १९.)

मूषिकारि-पु., मूषिकघ्नौषधविशेषः, उन्दिरमारी इति पश्चिमदेशे ख्यातः । गुणाः—‘ मूषिकारिस्तु कटुको नेत्र्यश्चाखुविषापहः । व्रणदोषं नेत्ररोगं नाशयेदिति च स्मृतम् ’ (वै. नि.)

मूषिकाह्वय–पु., आखुकर्णी (रा. व. ४,५.)

मूषी (का)-स्त्री., मूषिकः । बृहदुन्दरः (रा. व. १९.)

मूषीका–पु., मूषिकः (श. र.)

मूषीककर्णी–स्त्री., आखुकर्णी (श. र.)

मृगक्षीर–न., मृगीदुग्धम् (व्याक.)

मृगखुरी–स्त्री., हरिणखुरम् (वै. नि.)

मृगगन्धा–स्त्री., मुद्गपर्णी (वै. नि)

मृगघर्मज–न., जवादिगन्धद्रव्यम् । गन्धराजः (रा.-व. १२.)

मृगचिर्भिटा-स्त्री., मधुचिर्भटिका (वै. नि.)

मृगचेटक-पु., गन्धमार्जारः (श. मा.)

मृगजरस–पु., रक्तपित्ताधिकारे रसः (र. सं. र.)

मृगजहु–पु., हरिणबालकः (वै. नि.)

मृगजा–स्त्री., कस्तूरी (वै. नि.)

मृगजृम्भ–पु., अश्वस्य वातव्याधिविशेषः, लक्षणं यथा– ‘ मृगरोगी यदा वाजी जृम्भवान् जायते मुहुः । मृगजृम्भं तदा तस्य व्याधिं समुपलक्षयेत् (ज. द. ५५ अ.)

मृगदंशक–पु., कुक्कुरः (अम.)

मृगधूर्तक–पु., शृगालः (रा. व. १९)

मृगनाभ्याद्यवलेह–पु., स्वरभेदे हितः (भा.)

मृगपति–पु., सिंहः (रा. व. १८)

मृगपालिका–स्त्री., कस्तूरीमृगः (वै. नि.)

मृगमदवासा–स्त्री., कस्तूरीमल्लिका (रा. व. १०)

मृगमालारस–पु., प्रमेहाधिकारे रसः (रस. र.)

मृगयु–पु., शृगालः (मे)

मृगराज–(ट्)–पु., सिंहः (श. र.)

मृगराटिका–स्त्री., जीवन्ती (रा. व. ७.)

मृगरिपु–पु., सिंहः (रा. व. १९)

मृगरोग–पु.,मृगज्वरः (ग. ज. वै.) भूर्युपद्रवजनके साङ्घातिकाश्वरोगविशेषः । लक्षणं यथा– ‘ नासासन्धानसंयुक्ता जायन्ते भूर्युपद्रवाः । नित्यघासाभिलाषो च हीयते बलमांसयोः । मृगरोगः स विख्यातो व्याधिःकष्ट चिकित्सितः । षण्मासाभ्यन्तरे वाऽथ परलोकं प्रयाति च । बहुदुःखो भवेदश्वो मृगरोगप्रपीडितः यावदुच्छ्वासते जन्तुस्तावत् कुर्यात् प्रतिक्रियाम् (ज. द. २६ अ.) ‘ सन्त्रासी चैव यः पूर्वं पुनः स्वस्थो भृशम्भवेत् प्रस्विन्नाङ्गस्य तस्याशु मृगरोगं समादिशेत् (ज. द. ५५ अ)

मृगलण्डिका–स्त्री., फलविशेषः (च. सू. २३ अ.)

मृगलोमज–न., राङ्कवः (अम.)

मृगवल्लभ–पु., कुन्दुरुतृणम् (रा. व. ८)

मृगशृङ्ग–न,, हरिणशृङ्गम् । एतद्भस्म हृद्रोगे त्रिकशूलादौ शस्तम्

मृगाङ्क–पु., कर्पूरः (अ. म.)

मृगाङ्क (ङ्क)(ज)–पु., कस्तूरी (र सा सं बृहच्चूडामणिरसे)

मृगाङ्कमुकुटार्ह–पु., देवकर्दमः (रा. व. २२)

मृगाङ्करस–पु., राजयक्ष्माधिकारे रसः (रस. चि. ९ अ.)

मृगाङ्कजा–स्त्री., मृगनाभिः (र. सा. सं. बृहज्ज्वरचूडामणिरसे) मधुचिर्भटिका इन्द्रवारुणीलता (वै. नि.)

मृगाजिन–न., कृष्णमृगचर्म (वै. नि.)

मृगाद्‌–(दन)–पु., सिंहः । तरक्षुः (रा. व. १९)

मृगान्तक–पु., चित्रकव्याघ्रः (रा. व. १९)

मृगाराति–पु., कुक्कुरः (श. मा.)

मृगी-स्त्री., कस्तूरिका (वै. नि.) पीतवर्णसितोदर वराटकभेदः (रा. व. १३) मृगस्त्री। दुग्धगुणाः—छागीदुग्धगुणतुल्यम् (भा. अपस्माररोगे)

मृगेक्षणा-स्त्री., मधुचिर्भटिका (रा. व. ७)

मृगेन्द्र-पु., सिंहः (अम.)

मृगेन्द्रकुटिलोद्भूत-न., सिंहदंशनजन्यविषम् (र. सा. सं रसप्रयोगे)

मृगेन्द्रचटक-पु., मृगयादक्षश्येनपक्षी (जटा.)

मृडङ्कण-पु., बालकः (उणा.)

मृडीक-पु., हरिणः (व्याक.)

मृणालमूल-न., पद्मकन्दम् (श. र. भा. पू. १ भ.)

मृण्मरु-पु., पाषाणः (त्रिका.)

मृतक-न., शरः (हे. च.)

मृतकान्तक-पु., शृगालः (हारा.)

मृतजीव-पु., तिलकक्षुपः (रा. व. १०)

मृतमत्त-पु., शृगालः (त्रिका.)

मृतवत्सा-स्त्री., मृतसन्ततिका, लक्षणं यथा—'गर्भे सन्धानमात्रं वा पक्षात् मासाच्च वत्सरात्। म्रियते द्वित्रिवर्षाद्वा यस्याः सा मृतवत्सका (प्रयोगा. मृतवत्साचि.)

मृतसूत-पु., रससिन्दूरः (र. सा. सं. चूडामणिरसे.)

मृतामद-न., तुत्थकम् (श. च.)

मृत्कांस्य-न., शरावः (त्रिका.)

मृत्किरा-स्त्री., घुर्घुरिका (त्रिका.)

मृत्खलिनी-स्त्री., चर्मकषा (श. च.)

मृत्तिकालवण-न., क्षारमृत्तिका (वै. नि.)

मृत्पाण्डु-पु., मृत्तिकाभक्षणजन्यपाण्डुरोगः (निदा.)

मृत्पिण्ड-न., पु., लोष्टम् (रस. र. बालचि.)

मृत्फली-स्त्री., कुष्ठौषधम् (हारा.)

मृत्या-स्त्री., व्याधिः (रा. व. २०)

मृत्युपुष्प-पु., इक्षुः (प. मु.) देवनलः (पुष्पा)—स्त्री., कदलीवृक्षः (वै. नि.)

मृत्युफल-पु., महाकाललता (ला)—कदलीवृक्षः (मे.)

मृत्युबीज-पु., वंशः (त्रिका.)

मृत्युभृत्य-पु., रोगः (रा. व. २०)

मृत्युवञ्चन-पु., दण्डकाक; बिल्ववृक्षः (मे.)

मृत्युसूति-स्त्री., कर्कटस्त्री (वै. नि.)

मृत्स-त्रि., पिच्छिलः (सु. नि. ६)

मृदङ्कुर-पु., हरितकपोतः (हे. च.)

मृदङ्गफलिनी-स्त्री., कोशातकी (रा. व. ३)

मृदङ्गी-स्त्री., कोषातकी (र. मा.)

मृदाह्वया-स्त्री., सौराष्ट्रमृत्तिका (हे. च.)

मृदिनी-स्त्री., मृत्स्ना (वै. नि.)

मृदुकण्टक-पु., श्वेतझिण्टी (वै. नि.)

मृदुकण्टफला-स्त्री., कर्कटीलता (प. मु.)

मृदुकृष्णायस-न., सीसधातुः (रा. व. १३)

मृदुखुर-पु., अश्वस्य पादरोगविशेषः। लक्षणं मृदुखुरश्च विख्यातो मृदुर्यस्य खुरो भवेत्' (ज. द. ३९ अ.)

मृदुगमना-स्त्री., हंसी (रा. व. १९)

मृदुचर्मी(इन्)-पु., भूर्जवृक्षः (रा. व. ९)

मृदुताल-पु., श्रीतालः (रा. व. ९)

मृदुत्वक् (च्)-पु., भूर्जवृक्षः (अम.)

मृदुन्नक-न., स्वर्णम् (श. च.)

मृदुबीज-पु., विकङ्कतवृक्षः (वै. नि.)

मृदुल-न., अञ्जीरफलम्। जलम् (श. र.) (त्रि.) कोमलम् (स्त्री.,)-(ला) सुलेमानी खर्जूरवृक्षः (भा.)

मृदुलोमक-(वान्) पु., शशकः (हे. च.)

मृदुसार-न., तूलकाष्टम् पु., पारिशाश्वत्थः (रा. व. ९.)

मृदूत्पल-न., नीलपद्मम् (श. च.)

मृद्र-पु., मत्स्यभेदः (उणा.)

मृद्वङ्ग-न., वङ्गधातुः (र. मा. त्रिका.) पु., वनवास्तुकः (वै. नि.)

मृद्वीकादि-पु.. द्राक्षादिसिद्धकषायः। मृद्वीका मधुकं निम्बं कटुकारोहिणी समा। अवश्यायस्थितं पाक्यमेतत्पित्तज्वरापहम् (च. द्र. पि. ज्वर. चि.)

मृद्वीकादिकषाय-पु., स्नेहोपगकषायः। 'मृद्वीकामधुकमधुपर्णीमेदाविदारीकाकोलीक्षीरकाकोलीजीवकजीवन्तीशालपर्ण्यः (च. सू. ४अ.)

मृद्वीकासव-पु., द्राक्षासवः

मृषाध्यायी (इन्)-पु., वकः (रा. व. १९.)

मृषालक-पु., आम्रवृक्षः (श. च.)

मृष्टेरुक-त्रि., मिष्टान्नभक्षकः

मेक-पु., छागः (रा. व. १९.)

मेघकफ-पु., करका (हारा.)

मेघचिन्तक-, **मेघजीवक**- } पु., चातकपक्षी (श. च.)

मेघजीवन-पु., चातकः (रा. व.) तालवृक्षः। चाषः

मेघनादानुलासक (लासी)-पु., मयूरः (रा. व. १९. अम.)

मेघनामा-पु., मुस्तकम् (अम.) तण्डुलीयशाकः (वै. नि.)
मेघनीलक-पु., तालीशपत्रम् (वै. नि.)
मेघपुष्पी-स्त्री., वेतसम् । जलम् (अम.) करका
मेघफल-पु., विकङ्कतफलवृक्षः (रा. व. ११)
मेघभूति-पु., वज्रम् (श. र.)
मेघवर्णा-स्त्री., भूमिजम्बूवृक्षः । नदीजम्बूवृक्षः (वै. नि.) नीलीवृक्षः (श. च.)
मेघसुहृत्-पु., मयूरः (हे. च.)
मेघस्कन्दी- (इन्)-पु., महासिंहः (रा. व. १९)
मेघस्वनाङ्कुर-पु., वैदूर्यमणिः (प. मु.)
मेघाख्य-न., मुस्तकम् (र. मा.)
मेघागम-पु., धाराकदम्बः (रा. व. ९) वर्षाकालः (श. र.)
मेघानन्द-(न्दा)-पु., स्त्री., मयूरः । बलाका (रा. व. १९-२३).
मेघानन्दी (इन्)-पु., मयूरः (रा. व. १९)
मेघान्त-पु., शरत्कालः (रा. व. २१)
मेघाभा-स्त्री., भूजम्बूवृक्षः (वै. नि.)
मेघास्थि-न., करका (त्रिका.)
मेघाह्व-पु., अभ्रकम् । उशीरम् (वै. नि.) (२ भ. चित्तभ्रमसन्निपात चि.)
मेचकाञ्जन-न., कृष्णाञ्जनम् (वै. नि.)
मेटुला-स्त्री., आमलकी
मेठ-पु., मेषः (प. मु.)
मेढिका-स्त्री., ह्रस्वमेषशृङ्गी (वै. नि.)
मेढ्रशृङ्गी-स्त्री., मेषशृङ्गी (प. मु.)
मेढ्रास्थि-न., लिङ्गास्थि (च. शा. ७.)
मेण्ढ-पु., मेषः (श. र.)
मेथीमोदक-पु., वाजीकरणाध्यायः । पाठः—' त्रिकटुत्रिफलामुस्तजीरकद्वयधान्यकम् । कट्फलं पौष्करं शृङ्गी यमानी सैन्धवं बिडम् । तालीशकेशरं पत्रं त्वगेला च फलं तथा । यावन्त्येतानि चूर्णानि तावदेव च मेथिका । संचूर्ण्य गुण्डकङ्कार्यं पुरातनगुडेन तु । घृतेन मधुना मिश्रं खादेदग्निबलं प्रति' (रस. र.)
मेदकोद्भवा-स्त्री., मेदा (र. मा.)
मेदगज्वर-पु., तदाश्रितज्वरः । लक्षणम् ' भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च । दौर्गन्ध्यारोचकौ ग्लानिर्मेदस्थे चासहिष्णुता । (मा. नि.)

मेदज-., भूमिजगुग्गुलः (रा. व. १२.)
मेदभव-पु., मेदधातुः (वै. नि.)
मेदसमुद्भव-न., अस्थि स्त्री., (वा) वसा (वै. नि.)
मेदस्कृत-पु., मांसम् (हे. च.)
मेदोगण्ड-पु., गलरोगभेदः (निदा.)
मेदोदाह-पु., पुरलाक्षादिभिर्वर्तिमष्टाङ्गुलाङ्कृत्वा तया दाहः (ज. द. १४अ.)
मेदोद्भवा-स्त्री., मेदा (रा. व. ५.)
मेदोरोहिणी-स्त्री., गलरोगविशेषः (निदा.)
मेदोवती-स्त्री., मेदा (रा. व. ५.)
मेदोवृद्धी-स्त्री., देहस्थौल्यम् । अण्डवृद्धिः (निदा.)
मेधाकरी-स्त्री., शङ्खपुष्पी (वै. नि.) ब्राह्मीक्षुपः । (वै. संग्रहः)
मेधाजनन-न., कृष्णसर्षपः (वै. नि.)
मेधायु-स्त्री., ब्राह्मीक्षुपः (वै. नि.)
मेधि-पु., धान्यमर्दनस्थाने पशुबन्धनार्थंन्यस्तदारुः (भ)
मेधिका-स्त्री., तन्नामकवृक्षः
मेन्धिका-(न्धी)-स्त्री., मेदुदीति ख्यातः वृक्षः । (कोषान्तरम्)
मेरुक-पु., मूषिकः । (वै. नि.) यक्षधूपः (श. च.)
मेरुपादज-न., रौप्यम् (वै. नि.)
मेलान्धु-स्त्री., मत्स्याधारः (जटा.)
मेषकम्बल-पु., मेषलोमकृतकम्बलम्
मेषकुसुम-पु., चक्रमर्दः (वै. नि.)
मेषपुष्पा-स्त्री., मेषशृङ्गी (वै. नि.)
मेषलोचन-पु., चक्रमर्दवृक्षः (भा.)
मेषवल्ली-स्त्री., मेषशृङ्गी (भा.)
मेषा-स्त्री., सूक्ष्मैला (श. च.)
मेषारण्य-पु., बालग्रहविशेषः
मेषालु-पु., बर्बरावनस्पतिः (श. च.)
मेषिका-स्त्री., मेषपत्री (श. र.)
मेहकुलान्तकरस-पु., वसामेहे औषधम् (भैष.)
मेहघ्नी-स्त्री., हरिद्रा (प. मु)
मेहनाशिनी-स्त्री., श्वेतापराजिता (वै. नि.)
मेहहररस-पु., प्रमेहाधिकारे रसः (रस. चि. ९ अ.)
मैत्री-स्त्री., मित्रता । अनुराधा । सर्वप्राणिष्वात्मबुद्धिः (च. सू. १ अ.)
मैत्रीपर त्रि., मैत्रीप्रधानम् (च. सू. चक्रदत्तटीका.)
मैरेयाम्बु-न., काञ्जिकभेदः (च. द. विद्रधिचि.)
मैला-स्त्री., नीलीवृक्षः (वै. नि.)

मोचन-न., मोक्षणम् । विस्रावणम् (भा. म. कुष्ठचि.)
(नी)-स्त्री., कण्टकारी (जटा.)

मोचपुष्पा-स्त्री., वन्ध्या स्त्री (रा. व. १८) कदलीवृक्षः

मोचाट-पु., कृष्णजीरकम् (अम.) कदलीवृक्षः कदल्यस्थि (मे.) चन्दनवृक्षः (वै. नि.)

मोचारस-पु., कदलीस्तम्भजलम् (भा. म. ४भ. मसूरिकाचि. शीतलाधिकारे)

मोचास्राव-पु., मोचरसः (वै. नि.)

मोचाह्व-पु., शाल्मलीवेष्टकः (सि. यो. रक्तार्शचि.) " समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः " (वै. नि.)

मोचिका-स्त्री., मत्स्यभेदः (वै. नि.)

मोचिनी-स्त्री., कण्टकारी (वै. नि.)

मोचिलिन्द्रा-स्त्री., राजादनवृक्षः (वै. नि.)

मोची-स्त्री., हिलमोचिका (रमा.)

मोछिकायन्त्र-न., सुराश्चोतनयन्त्रम् (भैष. मृतसञ्जीवनीरसे)

मोटन-न., आक्षेपः (जटा.)

मोण-पु., शुष्कफलम् (वै. नि.) नक्रः । मक्षिका । सर्पकरण्डः (मे.)

मोथ-पु., मुस्तकम् । कोषान्तरम् ।

मोद-पु., आम्रवृक्षः । सुरभिगन्धः (वै. नि.)

मोददायिनी-स्त्री., जातीपुष्पवृक्षः (प. मु.)

मोदन-न., सिक्थम् (रा. व. १३)
पु., मदनवृक्षः (सौभाग्यशुण्ठीमोदके)

मोदमोदिनी-स्त्री., जम्बूवृक्षः (रा. व. ११)

मोदाख्य-पु., आम्रवृक्षः (रा. व. ११)

मोर्व-पु., मूर्वा (वै. नि.)

मोहकारी (इन्)-पु., माड इति कोङ्कणे ख्यातः वृक्षविशेषः (रा. व. ९)

मोहनभोग-पु., द्र० लप्सिका ।

मोहना (नी)-स्त्री., त्रिपुरमल्लिका (रत्ना.) वृत्तमल्लिका (रा. व. १०) उपोदिका (रा. व. ७)

मौकुलि-(ली) (इन्)-पु., द्रोणकाकः (वै. नि.) काकः (हे. च.)

मौक्तिकप्रसवा-स्त्री., मुक्ताशुक्तिः (रा. व. १३)

मौक्तिकशुक्ति-स्त्री., मुक्ताशुक्तिः (रा. व. १३)

मौक्तिकसम्पुट-पु., मुक्ताशुक्तिः (प. मु.)

मौक्तिकसम्भव-स्त्री., शुक्लाञ्जनम् (वै. नि.)

मौक्तिकस्थान-न., शुक्तिशूकरशङ्खसर्पभेकमत्स्यवेणुगजेषु (वैद्यकम्)

मौग्धिक-पु., प्लक्षवृक्षः (वै. नि)

मौद्गदल-न., मुद्गदाली (वा. चि. ६ अ.)

मौद्गलि-पु., द्रोणकाकः (वै. नि.) काकः (त्रिका.)

मौन-न., मूकता (अम.)

मौर्वी-स्त्री., मेषशृङ्गी अजशृङ्गी (र. मा.) तीरपुंखी इति प्रसिद्धौषधिः (प. मु.)

मौलक-त्रि., मूलाकरजः । (च. वि. ८ अ)

मौली-पु., स्त्री., मस्तकम् (रा. व. १८)

मौषली-स्त्री., मुषली (वै. नि. २ भ. गुडूच्यादिमोदके)

म्रातन-न., कैवर्तमुस्तकः (श. च.)

म्लाना-स्त्री., रजस्वला

म्लेच्छद्रुक-न., चोबाचीनीति ख्यातद्रव्यम् (वै. नि.)

म्लेच्छाश-पु., म्लेच्छभोजनम्, गोधूमः (वै. नि.)

म्लेच्छास्य-न., ताम्रधातुः । (र. मा.)

य

यकृदात्मिक-स्त्री., तैलपायिका (श. च.)

यकृद्वैरी-पु., रक्तरोहीतकवृक्षः (श. च.)

यक्षकर्दम-पु., कर्पूरादिकृतगन्धानुलेपनम् । स च समभाग कर्पूरागुरुकस्तुरी कङ्कोलात्मकः । 'कर्पूरागुरुकस्तुरीकङ्कोलैर्यक्षधूपकः । चन्दनागुरुक्षकुरङ्गनाभिकाचन्द्रचन्दनसमांशसम्भृतम् ।
त्र्यक्षक्षजनपरैकगोचरं यक्षकर्दममिमं प्रचक्षते (रा. व. २२)

यक्षरस-पु., पुष्पमद्यम् (त्रिका.)

यक्षामलक-न., पिण्डीखर्जूरफलम् (श. मा.)

यक्षोदुम्बरक-न., अश्वत्थफलम् (त्रिका.)

यक्ष्मघ्नी-स्त्री., द्राक्षा (श. मा.)

यजा-स्त्री., कृष्णतुलसीवृक्षः (वै. नि. ६ अ.)

यज्ञश्रात्-पु., महासोमलता (वै. नि.)

यज्ञधूप-पु., सर्जवृक्षः (रा. व. ९)

यज्ञनेतृ-पु., महासोमलता (वै. नि.)

यज्ञपशु-पु., घोटकः (शमा.)

यज्ञपादप-पु., विकङ्कतवृक्षः

यज्ञफल-पु., उदुम्बरवृक्षः

यज्ञसंस्तर-पु., शुक्लदर्भः (वै. नि.)

यज्ञसाधनी-स्त्री., सोमलता (वै. नि.)

यज्ञसार-पु., यज्ञोदुम्बरः (रानि. ११)

यज्ञसूत्र-न., यज्ञोपवीतम्

यज्ञिक-पु , पलाशवृक्षः (वै. नि.)

यज्ञीयब्रह्मपादप-पु., विकङ्कतवृक्षः (रानि. ९)

यज्ञेष्ट–न., दीर्घरोहिषतृणम् (रा. ८)
यज्ञोदुम्बर–पु., उदुम्बरवृक्षः
यति–पु., अगस्तिवृक्षः (वै. नि.) जितेन्द्रियम् (अम.)
यत्नसाध्य–वि., यत्नेन आरोग्यार्हः पक्षी
यथेष्टचारिन्–वि., पक्षी (श. च.) स्वेच्छाचारी
यन्त्रगृह–न., तैलनिष्पीडनयन्त्रगृहम् (श. च.)
यन्त्रगोल–पु., कलायभेदः (श. च.)
यन्त्रणवास–न., क्षतबन्धनशाठकः (अहृचि. ८)
यन्त्रापीड–पु., सन्निपातज्वरभेदः । लक्षणम् रक्तपीतवर्णत्वं यन्त्रेण गात्रनिष्पीडमिव वेदना (भाम. १)
यमकबन्ध––पु., यमलनामव्रणबन्धनभेदः (सू. १८)
यमकीट–पु., भूकीटः (त्रिका.)
यमदग्नि–पु., ऋषिविशेषः (च.)
यमदूतक–पु., काकः (श. र.)
यमदूतिका–स्त्री., तिन्तिडी (अम.)
यमप्रिय–पु., वटवृक्षः (शर.)
यमरथ–पु., महिषः (वै. नि.)
यमलपत्रक–पु., अश्मन्तकः, कोविदारः (रानि. ९)
यमवाहक–पु., महिषः (त्रिका.)
यमवृक्ष–पु., शाल्मलीवृक्षः (रानि. ८)
यमानीतैल–न., यमानीसम्भवतैलम्
यमानीद्वय–न., यमानी, वनयमानी च (वै. नि. २)
यमुना–स्त्री., नदीः (रानि. १४)
ययु–पु., घोटकः (मे)
यवकण्टक–पु., पर्पटकः (वै. नि.)
यवकलश–पु., इन्द्रयवः (वै. नि.)
यवकाञ्जिक–न.. यवसहितकाञ्जिकम्
यवक्षोद–पु., यवचूर्णम् (हे. च.)
यवगण्ड–पु., सुखव्रणः (श. र.)
यवगोधूमसम्भव–न., एतन्मिश्रकाञ्जिकम् (वै. नि.)
यवजोद्भव–न., तवक्षीरः
यवतैल–न., यवचूर्णादिसाधिततैलविशेषं ज्वरदाहमहावेगाङ्गप्रहर्षणनाशनम्
यवनप्रिय–न., मरिचम् (हे. च.)
यवनभोजन–पु., न., मरिचम् (चि. क. क.) (प्रदचि.)
यवनक–पु., गोधूमः (वै. नि.)
यवनालज–पु., यवक्षारः (हे. च.)
यवनी–स्त्री., यवानी (मे.)
यवपटोल–पु., ज्वरः । कषायभेदः गुणाः–तृष्णादाहहरः पित्तज्वरनाशनश्च (च. चि.)
यवफलाङ्कुर–पु., वंशाङ्कुरम् (रानि. ७)
यवभोज्य–न., यवाहारः (नकुल. १७)
यवमण्ड–पु., यवकृतमण्डः (वै. नि.)
यवमद्य–न., यवकृतमद्यम् । गुणाः–गुरु विष्टम्भदायकम् (रानि. १४)
यवयवागुका–स्त्री., यवकृतयवागुः (प. मु.)
यवयवागू–स्त्री., यवसिद्धयवागुः
यवलक–पु., पक्षिविशेषः । अयं मधुरलघुशीतकषायः (सु. सू. ४६)
यवलास–पु., यवक्षारः (श. र.)
यववर्णाभ–पु., सविषमण्डूकजातीयकीटः । तद्दष्टे दंशकण्डूः पीतफेणागमश्च (सु. क. ८ अ.)
यवविकृति–स्त्री., प्रमेहहितेयवकृतापूपादिः (वा. चि. १२अ.)
यवशक्तु–पु., भृष्टयवकृतचूर्णम् । 'यवानां शक्तवो रूक्षा लेखनावह्निदीपना वातलाः कफरोगघ्ना वातवर्चोऽनुलोमनाः । (राज. ३प.)
यवशर्करा–स्त्री., सिद्धयवकृतशर्करा । गुणाः–'पित्तश्रमतृष्णाघ्नी वृष्या रेचनी विदाहमूर्च्छाभ्रान्तिघ्नी च (च.)
यवश्वेता–स्त्री., यवशर्करा (वै. नि.)
यवसाह्वया–स्त्री., यमानी (भा. पू.) पारसीकयमानी (वै. नि.)
यवसौवीर–न., यवकाञ्जिकम् । (वै. नि.)
यवाग्र–न., यवतुषः (वै. नि. २ भ. पाण्डु चि. पञ्चकोलघृते.)
यवानीक–पु., यमानीभेदः (वा. चि. ६अ.)
यवानीशाक–न., यमानीदलम् (हिं.—जवाईन)
यवान्न–न., यवकृतभक्तम् (वै. नि.)
यवाम्ल–न., यवकाञ्जिकम् । गुणाः—' जातं यवाम्लं कटुकं विपाके वातापहं श्लेष्महरं सरक्तम् । पित्तप्रकोपं कुरुते सभेदि विदूषणं पित्तगदासृजोश्च (अत्रि. ११ अ.)
यवासा–स्त्री., गुण्डासिनीतृणम् (रा. व. ८.)
यवोद्भवा–पु., यवक्षारः (रा. व. ६.)
यवोद्भूता–स्त्री., यवशर्करा (वै. नि.)
यशद–न., धातुविशेषः । यशदं वङ्गसदृशं रीतिहेतुश्च तन्मतम् । गुणाः—' यशदं तुवरं तिक्तं शीतलं

कफपित्तहृत् । चक्षुष्यं परमं मेहान् पाण्डु श्वासञ्च नाशयेत् (भा. पू. १भ. धा. व.)

यष्टि (ष्टी) पुष्प–पु., पुत्रञ्जीववृक्षः (भा.)

यष्टिमधुका–स्त्री., यष्टिमधु (अम.)

यष्टीकर्ण–पु., तन्नामककर्णबन्धनाकृतिः (सु. सू. १६अ,)

याज–पु., अन्नम् (हे. च.)

याजक–पु., पलाशवृक्षः (रा. व. १०) कुशतृणम् (श. र.) रक्तखदिरवृक्षः (रा. व. ८.) अश्वत्थ-वृक्षः (रा. व. ११)

याजुष–पु., तित्तिरपक्षी (वै. नि.)

यातना–स्त्री., अतितीव्रवेदना (अम.)

यातयाम–पु., वृद्धः (रा. व. १८) त्रि., जीर्णम् (अम.) उज्झितम् (मे.)

याद्–न., जलजन्तुः (अम.)

यादोनिवास–पु., जलम् (हे. च.)

यामघोष–पु., कुक्कुटः (श. मा.) (**षा**)–स्त्री., घटिका-यन्त्रम् (त्रिका.)

यामनादी (**इन्**)–पु., कुक्कुटः (वै. नि.)

यामिनीचर–पु., गुग्गुलुः । पेचकः (वै. नि.)

यामिनीपति–पु., कर्पूरः (मे.) चन्द्रः (श. र.)

यामुनेष्टक–न., शीषधातुः (जटा.)

याम्यज्वर–पु., प्रवृद्धहीनमध्यवातादिजनितसन्निपात-ज्वरः । लक्षणम्–'हृदयं दह्यते चास्य यकृत्प्लीहान्त्र-फुप्फुसाः । पच्यन्तेऽत्यर्थमूर्धाधः पूयशोणितः निर्गमः । शीर्णदन्तश्च मृत्युश्चा तत्राप्येतद्विशेषतः भिषग्भिः सन्निपातोऽयं याम्यो नाम्ना प्रकीर्तितः (भा. म. १ भ.)

याम्यदिग्भवा–स्त्री., तमालपत्री (वै. नि.)

याम्यद्रुम–पु , शाल्मलिवृक्षः (वै. नि)

यावनक–पु., रक्तैरण्डः (वै. नि.)

यावनालनिभ–(**भा**)-पु., यावनालः (रा. व. ८)

यावनालरसजगुड–पु., तद्रसजातगुडः । गुणाः–क्षारः कटुः समधुरः कफवातघ्नः पित्तलः नित्यसेवनेन कण्डूकुष्ठजननः रक्तदाहघ्नश्च (वै. नि.)

यावनालशर–पु., यावनालस्य शरः । हि.–जोहुरली । गुणा –ईषन्मधुरः रुच्यः शीतलः पित्ततृष्णाहरः पशूनामबलप्रदश्च (रा. व. १६)

याविक–पु., यवनालः (प. मु.)

याव्य–पु., यवक्षारः (वै. नि.)

यासा–स्त्री., मदनशलाकापक्षी (श. मा. सि. यो. कासचि.)

युक्तश्रेयसी–स्त्री., गन्धरास्ना (रा. व. ६)

युगच्छद–पु., आपटा इति ख्यातः वृक्षः (वै. नि. उन्मादचि.)

युगन्धर–पु., यावनालः (वै. नि.)

युगन्धरभक्त–न., पु., यावनालभक्तम् । गुणाः–'अप्रसाधितभक्तो युगन्धराणां भक्तश्च घनोविशदो-मधुरश्च । कफे त्रिदोषशमने च कथ्यते कासे च श्वासात्मक एव सः स्मृतः (अत्रि. २३ अ.)

युगन्धराम्ल–न., यावनालकृतकाञ्जिकम्, गुणाः– युग-न्धराम्लं कफवातहन्तृ शूलामयानां जरणप्रकर्तृ । तीक्ष्णं तथाम्लं श्रमदोषहन्तृ मेहार्शसोः रक्तहितं मतञ्च (अत्रि. ११ अ.)

युगप(पा)(त्र)(क)–पु., रक्तकाञ्चनवृक्षः (प. मु. अम.) अश्मन्तकः । लोध्रः (वै. नि.)

युगपत्रिका–स्त्री., शिंशपावृक्षः, सर्षपवृक्षः (त्रिका.)

युगपात्रिका–स्त्री., शिंशपावृक्षः (त्रिका.)

युगभृङ्गराज–पु., भृङ्गराजः केशराजश्च (संग्रहः)

युगाक्षिगन्धा–स्त्री., वृद्धदारकलता (प. मु.)

युग्बला–स्त्री., सुगन्धतृणम्, रोहिषतृणम् (वै. नि.)

युग्मकण्टका–स्त्री., बदरीवृक्षः (मद. व. ६)

युग्मपत्रिका–स्त्री., शिंशपावृक्षः

युग्मपर्ण–पु., रक्तकाञ्चनवृक्षः (रा. व. १०) सप्तपर्णवृक्षः (रा. व. १२) (**पर्णा**)–स्त्री., वृश्चिकालीक्षुपः (श. चि.)

युग्मफलिनी–स्त्री., दुग्धिका (प. मु.)

युग्माञ्जन–न., अञ्जनद्वयम् । एकं स्रोतोऽञ्जनं अपरं सौवीरमिति(अरुणः वा. सू. १५ अ. प्रियङ्ग्वादिवर्गः)

युग्या–स्त्री., ऋद्धिः । वृद्धिः (वै. नि.)

युजौ–पु., द्वि., अश्विनीकुमारौ (त्रिका.)

युञ्जातक–पु., वृक्षविशेषः । गुणाः–'बल्यः शीतो गुरुः स्निग्धस्तर्पणो बृंहणात्मकः । वातपित्तहरः स्वादुः वृष्यो युञ्जातकः परम् (च. सू. २७ अ.)

युद्धसार–पु., अश्वः (श. च.)

युधिष्ठिरराज–पु., कङ्कपक्षी (त्रिका.)

युयु–पु., घोटकः (हला.)

युयुक्खुर–पु., क्षुद्रव्याघ्रः (श. च.)

युवगण्ड–पु., पोगण्डः (त्रिका.) यूनो गण्डस्थव्रणः (श. र.)

युवा (**न्**)–पु., षोडशमारभ्य पञ्चाशत्पर्यन्तवयस्कः (रा. व. १८)

युवावस्था–स्त्री., यूवः (रा. व. १८)

यू–स्त्री., मुद्गादिद्विदलधान्यकृतयूषः (हे. च.)

यूकाण्ड–पु., लिखा (वै. नि.)
यूकारी–स्त्री., लाङ्गलिका (वै. नि.)
यूकावास–पु., शाखोटवृक्षः । (रा. व. ९)
यूथप–पु., सुनिषण्णशाकः । (वै. नि.)
यूथा–स्त्री., पाठा (वै. नि.)
यूथिकापत्र–पु., तालीशपत्रम् (वै. नि.)
यूथी–स्त्री, यूथिका (श. र.) शुक्लयूथिका (वै. नि.)
यूपलक्ष्य–पु., पक्षी (श. मा.) **योक**–न., यूकावृन्दम् (सि. यो. कृमिचि.)
योगचिन्तामणि–पु., चिकित्सासंग्रहविशेषः श्रीहर्षसूरिकृतः
योगतरङ्गिनी–स्त्री., वैद्यकचिकित्सासंग्रहविशेषः त्रिमल्लभट्टकृतः
योगनाविक–पु., मत्स्यविशेषः । (हारा.)
योगरत्नाकर–पु., चिकित्साग्रन्थविशेषः
योगशतक–न., चिकित्सासंग्रहग्रन्थः, लक्ष्मीदासकृतः
योगसार (क)–पु., नागरङ्गवृक्षः
योगा (गी) रङ्ग–पु., नागरङ्गवृक्षः (रा. व. ११)
योगी (गे) ष्ट–न., शीषधातुः । (र. मा. । रा. व. १३)
योजनगन्धा (न्धिका)–स्त्री., कस्तूरी (मे. अजयपाल)
योजनपर्णी–स्त्री., मञ्जिष्ठा (प. मु.)
योजनमल्लिका–स्त्री., आस्फोता (भैष. ज्वरचि. पानीयवटी)
योनल–पु., यावनालः (हे. च.)
योनिरञ्जन–पु., योनिदोषभेदः (निदा.)
योनिशूलघ्नी–स्त्री., शतपुष्पा
योन्यर्श–न., योनिकन्दरोगः (निदा.)
योषित्प्रिया–स्त्री., हरिद्रा
यौगन्धरान्न–न., यावनालकृतान्नम् । गुणाः– योगन्धरं गुरुघनं कासश्वासप्रवृत्तिकृत् (वै. नि.)
यौतव–न., परिमाणः (अम.)
यौवन–पु., यावनालः (प. मु.)
यौवनकण्टक–पु., न., युवगण्डरोगः (श. मा.)

र

रक–पु., सूर्यकान्तमणिः (वै. नि.)
रकण–पु., कोकिलाक्षक्षुपः (रा. व. ४)
रक्तक–पु., लोहितवर्णः (मे) बन्धुजीववृक्षः (प. मु.) रक्तझिण्टी (मे) रक्तशिग्रुवृक्षः (पमु.) रक्तैरण्डवृक्षः (वै. नि. २ भ. जिह्वकज्वर चि.) पत्राङ्गचन्दनवृक्षः (रा. व १२)
रक्तकङ्गु–पु., धूनकः (वै. नि.)
रक्तकण्टा–स्त्री., विकङ्कतवृक्षः (वै. नि.)
रक्तकदली–स्त्री., लोहितकदली (वै. नि.)
रक्तकन्दल–पु., रक्तप्रवालद्रुमः (त्रिका.)
रक्तकमल–न., रक्तवर्णपद्मम् (रा. व. १०)
रक्तकम्बल–न., कल्हारः
रक्तकरवीरक–पु., रक्तपुष्पकरवीरवृक्षः (हिं-लालकनेल) गुणाः–' कटुः तीक्ष्णः शोषकः त्वग्दोषव्रणकण्डूकुष्ठघ्नः विषघ्नश्च (वै. नि.)
रक्तका–स्त्री., पानीयामलकः (वै. नि.)
रक्तकाञ्चन–पु., काञ्चनारवृक्षः हिं.-कच्नार-(पमु.)
रक्तकुमुद–न., रक्तकैरवम् । (जटा.)
रक्तकुरण्टक–पु., रक्तझिण्टी, गुणाः–तिक्तो वर्ण्यः उष्णः कटुः शोथघ्नः ज्वरघ्नः, तथा वातरोगं कफं रक्तरोगं पित्तं आध्मानं शूलं श्वासं कासञ्च नाशयेत् (वै. नि.)
रक्तकृमिजा–स्त्री., लाक्षा (वै. नि.)
रक्तकैरव–न., रक्तकुमुदम् (जटा.)
रक्तकोकनद–न., रक्तोत्पलम् (जटा.)
रक्तकोप–पु., शोणितप्रकोपः, रक्तविकारः (नकुल. १० अ.)
रक्तखदिर–पु., रक्तवर्णखदिरवृक्षः । गुणाः– ' कटूष्णः तिक्तः कषायः गुरुः आमवातघ्नः वातरक्तहरः-व्रणभूतज्वरघ्नश्च (रा. व. ८)
रक्तखाण्डव–पु., द्वैपखर्जूरवृक्षः (वै. नि.)
रक्तगतज्वर–पु., रक्तधातुगतज्वरः, लक्षणं यथा-रक्तनिष्ठीवनं दाहो मोहच्छर्दनविभ्रमौ । प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् (मा. नि.)
रक्तगन्धा–स्त्री., अश्वगन्धा (वै. नि.)
रक्तगर्भा–स्त्री., नखरञ्जनीवृक्षः (वै. नि.)
रक्तगैरिक–न., स्वर्णगैरिकः (वै. नि.)
रक्तग्रीव–पु., कपोतः (वै. नि.)
रक्तघ्न–पु., रोहितकवृक्षः (जटा.) **(घ्नी)**–ग्रन्थिदूर्वा (श. च.)
रक्तचिल्लिका–स्त्री., मधुरवास्तुकः (वै. नि.)
रक्तजकृमि–पु., रक्तजन्यकृमिरोगः (मा. नि.)
रक्तजन्तुक–पु., भूनागः (रा. व. १३.) लोहितप्राणिमात्रः
रक्तजिह्व–पु., सिंहः (श. मा.)
रक्तझाबुक–पु., स्वनामख्यातवृक्षः (श. चि.)

रक्तझिण्टी-स्त्री., रक्तपुष्पझिण्टीक्षुपः (अम.)
रक्ततर-न., स्वर्णगैरिकम् (वै. नि.)
रक्ततुण्ड-(क)-पु., सारसः, शुकः, भूनागः (रा. व. १३)
रक्ततृण-न., तृणविशेषः (वै. नि. स्त्री., (णा)-गोमूत्रिका-तृणम् (रा. व. ८.)
रक्तत्रिवृत्-स्त्री., रक्तमूलत्रिवृत्, गुणाः-तिक्ता कटूष्णा रोचनी ग्रहणीमलविष्टम्भहरी (रा. व. ६.)
रक्तदृक्-पु., स्त्री., कपोतः
रक्तद्रुम-पु., रक्तबीजासनवृक्षः (रा. व. ९.)
रक्तनाडी-स्त्री., दन्तमूलगतरक्तजनाडीरोगविशेषः
रक्तनासिक-पु., पेचकः (श. र.)
रक्तनिर्यास-पु., रक्तबीजासनवृक्षः (रा. व. ९.)
रक्तनील-पु., महाविषवृश्चिकविशेषः (सु. क. ८अ.)
रक्तनेत्र-पु., सारसः, कपोतः (वै. नि.)
रक्तनेत्रत्व-न., रक्तविकारजनेत्ररोगः (निदा.)
रक्तपदी-स्त्री., क्षुद्रवृक्षविशेषः (जटा.)
रक्तपर्ण-पु., रक्तपुनर्नवा (वै. नि.)
रक्तपा-स्त्री., जलौका (मे.)
रक्तपाका (की)-स्त्री., लताबृहतीक्षुपः (र. मा.)
रक्तपात्री-स्त्री., जलौका (श. र.)
रक्तपाद्-पु., शुकः (हे. च.) हंसः (वै. नि.)
रक्तपायिनी-स्त्री., जलौका (रा. व. १९.) मत्कुणः (वै. नि.)
रक्तपायी (इन्)-पु., मत्कुणः (व्याक.)
रक्तपारद-न., हिङ्गुलम्
रक्तपाषाण-पु., गिरिमृत्तिका
रक्तपिण्ड-न., जपापुष्पवृक्षः । रक्तालुः (वै. नि.) चीनदेशीय गुलाबपुष्पम्
रक्तपित्त-न., तन्नामकरोगभेदः (निदा.) पु., हारीतपक्षी
रक्तपित्तहा-स्त्री., ग्रन्थिदूर्वा
रक्तपित्तान्तकरस-पु., रक्तपित्ताधिकारे रसः (र. सा. सं)
रक्तपीटिकादर्शन-न., रक्तजविकारः (निदा.)
रक्तपीतफला-स्त्री., मधुरबिम्बिका (वै.नि.)
रक्तपुनर्नवा-स्त्री., स्वनामख्यातपत्रशाकक्षुपः (म-रक्त-घेंटुलि) गुणाः-' तिक्ता सारणी शोथघ्नी रक्तप्रदरघ्नी पाण्डुपित्तघ्नी च ' (रा. व. ५.)
रक्तपूर्वक-पु., रक्तापामार्गः (वै. नि.)
रक्तपोस्त-पु., रक्तखसखसवृक्षः (हिं.-लालपुस्ता) (कोषान्तरम्)

रक्तप्रतिश्याय-पु., दुष्टरक्तजप्रतिश्यायरोगः (मा. नि.)
रक्तप्रवृत्ति-पु., पित्तजरोगः (भा.)
रक्तफेनज-पु., फुफ्फुसः । वामपार्श्वस्थक्लोमन् (हे. च.)
रक्तबभ्रु-पु., महावृश्चिकविशेषः (सु. क. ८ अ)
रक्तबाल(लु)क(का)-न., स्त्री., सिन्दूरः (हारा. त्रिका.)
रक्तबिन्दुच्छदा-स्त्री., पुत्रदात्री शुक्लकण्टका (वै. नि)
रक्तभस्म-न., रससिन्दूरादिकरणम् (एतत्साधनप्रणाली र. सा. संग्रहे मृग्या)
रक्तमञ्जर-पु., वेतसलता (त्रिका.) निम्बवृक्षः (वै. नि.)
रक्तमञ्जरी-स्त्री., रक्तकरवीरः (वै. नि)
रक्तमण्डलिका-स्त्री., रक्तलज्जालुका
रक्तमण्डूक-पु., रक्तवर्णमण्डूकजातीयकीटः सुकल्प. ८अ.)
रक्तमत्स्य-पु.. रक्तवर्णमत्स्यविशेषः । तल्लक्षणगुणाः-'यो रक्ताङ्गो नातिदीर्घो न चाल्पो नातिस्थूलः रक्तमत्स्यः स चोक्तः । शीतो रुच्यः पुष्टिकृद्दीपनोऽसौ नाशं धत्ते दोषत्रयस्य ' (रा. व. १७)
रक्तमरिच-न., मरिचभेदः (हिं-लालमरिच) (वै. नि.)
रक्तमातृका-स्त्री., रसधातुः (वै. नि.)
रक्तमिलातक-पु., रक्ताम्लानपुष्पवृक्षः (रा. व. १०)
रक्तमुख-पु., रोहितमत्स्यम् । षष्टिकधान्यम् (वै. नि.)
रक्तमूत्रता-स्त्री., रक्तप्रस्रावरोगः (निदा.)
रक्तमूर्धा (न्)-पु., सारसपक्षी
रक्तमृत्-स्त्री., गैरिकम् (वै. नि.)
रक्तरङ्गा-स्त्री., मेहदीति ख्यातः वृक्षः (वै. नि.)
रक्तरस-पु., रक्तासनवृक्षः (वै. नि.)
रक्तरसा-स्त्री., रास्ना (वै. नि.)
रक्तरसोन-पु., लोहितरसोनः । गुणाः-' मधुरः कटुः बलकरः। पत्रं तिक्तम् । अस्थि सलवणञ्च (रा. व. ७) पत्रं मधुरं क्षारं नालो मधुरपिच्छलः कषायः इति (मद. व. ७)
रक्तराजालुक-न., रक्तवर्णालुकभेदः एतच्च किञ्चिदुष्णं आग्नेयं वातकफहरञ्च (द्रव्यगुणः)
रक्तरेणुका-स्त्री., पलाशकलिका (श. मा.)
रक्तरोहितक-पु., (हिं-रक्तरोहिडा)
रक्तलशुन-पु., रक्तरसोनः (रा. व. ७)
रक्तलोचन-पु., कपोतः (हे. च. । भा.)
रक्तवटी-स्त्री., मसूरिका (जटा.)
रक्तवरटी-स्त्री., मसूरिका (जटा.)
रक्तवर्ण-पु., इन्द्रगोपकीटः (रा. व. १९) गोमेदमणिः प्रवालः । कम्पिल्लकः । (वै. नि.)

रक्तवर्तक-पु., विष्किरपक्षिविशेषः (च. सू. २७ अ.)
रक्तवर्त्मा-पु., कुक्कुटः (वै. नि.)
रक्तवर्धन-पु., वार्ताकी (श. च.)
रक्तवल्ली-स्त्री., पीतपुष्पदण्डोत्पलः
रक्तवास्तुक-पु., शोणवास्तुकशाकः (वै. नि.)
रक्तविकार-पु., रक्तजरोगः (वै. नि.)
रक्तवृन्तक-पु., रक्तपुनर्नवा (वै. नि.)
रक्तवृन्ता-स्त्री., शेफालिकावृक्षः (प. मु.)
रक्तशमन-न., कम्पिल्लकः (वै. नि.)
रक्तशालुक-(का)-पु., स्त्री., रक्तकमलकन्दः (वै. नि.)
रक्तशाल्मलि-पु., रक्तपुष्पशाल्मलिवृक्षः (वै. नि.)
रक्तशासन-न., सिन्दूरः (हारा.)
रक्तशिम्बी-स्त्री., शिम्बीभेदः (वै. नि.)
रक्तशृङ्गिक-न., विषम् (रा व. ६.)
रक्तशेखर-पु., पुन्नागवृक्षः (र. मा.)
रक्तश्रीखण्डक-न., रक्तचन्दनम् (वै. नि. २ भ. वातव्याधिचि. महारास्नादौ)
रक्तश्वेत-पु., तद्वर्णमहाविषवृश्चिकभेदः (सु. कल्प. ८ अ.)
रक्तष्ठीविसन्निपात-पु., स्वनामख्यातसन्निपातविशेषः (निदा.)
रक्तसंज्ञ(सङ्कोचपिशुन)-न., कुङ्कुमम् (त्रिका.)
रक्तसंवरण-न., कृष्णाञ्जनम् (वै. नि.)
रक्तसन्दंशिका-स्त्री., जलौका (रा. व. १९)
रक्तसन्ध्यक-न., रक्तकल्हारः (अम.) रक्तोत्पलम् (वै. नि.)
रक्तसरोरुह-न., रक्तपद्मम् (अम.)
रक्तसार-न., रक्तचन्दनम्-(प. मु. रा. व. १२ रस. र. च. द. मेह. चि. न्यग्रोधादिपञ्चके) पत्तङ्गचन्दनम् (प. मु.) (पु.,) अम्लवेतसः (रा. व. ६) रक्तखदिरवृक्षः (रा. व. ८) (सुचि. ८ अ.) रक्तबीजासनवृक्षः (रा. व. ९) रक्तशिंशपा वाराहीकन्दः (वै. नि.)
रक्तसू-पु., शरीरस्थरक्तधातुः (रा. व. १८)
रक्तसौगन्धिक । न., रक्तकल्हारपुष्पम् (जटा.)
रक्तस्थज्वर-पु., रक्तगतज्वरविशेषः (मानि.)
रक्तहर-पु., भल्लातकः (वै. नि.) (त्रि.,) रक्तघ्नद्रव्यमात्रम्
रक्ता-स्त्री., गुञ्जा (रा. व. ३ सुचि. ३७ असु. कल्प ५ अ.) लाक्षा । मञ्जिष्ठा (रा. व. ६।२३ शिम्बीभेदः । प. मु.) उष्ट्रकाण्डीनामक्षुपः (रा .व. १०) लक्षणाकन्दः । वचा (वै. नि.) रक्तवर्णशतपदी (सुकल्प ८ अ.) कृच्छ्रसाध्यलूताविशेषः, कर्णशिराभेदः (वा. उ. १ अ.)
रक्ताक्त-न., रक्तचन्दनम् (जटा.)
रक्ताख्यात (क)-पु., रक्तापामार्गः (वै. नि.)
रक्ताञ्जना-स्त्री., रक्ताञ्जनिका (च. द्र. क्षारतैले)
रक्ताढकी-पु., रक्तपुष्पाढकी, गुणाः—' रुच्या बल्या पित्ततापादिहरी च (रा. व. १६.)
रक्ताण्ड-पु., अश्वस्य अण्डरोगभेदः (ज. द. ५०अ.)
रक्ताधार-पु., चर्म (रा. व. १८.)
रक्तापराजिता-स्त्री., रक्तपुष्पापराजिता
रक्ताब्ज (क)-न., रक्तकमलम् (वै. नि.)
रक्ताभ्र-न., रक्तवर्णाभ्रकम् (रा. व. १३.)
रक्तारि-पु., महाराष्ट्रीक्षुपः (प. मु.)
रक्तार्क-पु., अरुणार्कवृक्षः (मद. व. १. रा. व. १०.)
रक्तार्ति-स्त्री., शोणितामयः (रा. व. २०.)
रक्तार्म (न)-स्त्री., नेत्ररोगभेदः । ' पद्माभं मृदु रक्तार्म यन्मांसं चीयते सिते (मा. नि.)
रक्तार्श-न., रक्तजन्यगुदजरोगः (मा. नि.)
रक्ता (लता)-स्त्री., मञ्जिष्ठा (सु. कल्प. ५अ.)
रक्तावसेचन-न. रक्तमोक्षणम् (च. चि. ३अ.)
रक्ताश्वमारपुष्प-न., रक्तकरवीरपुष्पम् (सि. यो. विषमज्वरे.)
रक्ताश्वारि-पु., रक्तकरवीरवृक्षः (रावणकृते शतके.)
रक्ताक्षी-स्त्री., गुग्गुलुः (वै. नि. २भ. अतिसारचि.)
रक्तेक्षुशर्करा-स्त्री., रक्तेक्षुकृतशर्करा । गुणः——पित्तघ्नी (रा. व. १४.)
रक्तोच्चटा-स्त्री., श्वेतगुञ्जा (भा.)
रक्तोपल-न., गिरिमृत्तिका (हारा.)
रक्तौदन-न. रक्तशाल्यादिभक्तम् । अलक्तक रञ्जितभक्तम् (च. द. बालचि.)
रक्षगन्ध-(क)-पु., श्वेतालुः, गुग्गुलुः (वै. नि.)
रक्षणा-(णी)-रक-पु., मूत्रकृच्छ्ररोगः (श. र.)
रक्षणि-(णी)-स्त्री., त्रायमाणालता (रा. नि. व. ५)
रक्षापत्र-पु., भूर्जवृक्षः (रा. नि. व. ९.) न., भूर्जत्वक् श्वेतसर्षपम् (वै नि.)
रक्षाबीज-पु., रीठाकरञ्जः (वै. निघ.)
रक्षारेणुत्कर-पु., शुष्कगोमयभस्मचूर्णप्रक्षेपः (भा. म-४ भ. मसूरिका. चि. शीतलाधिकारे.)
रक्षिताफल-न., सर्षपम् (वै. नि.)

रक्षोभूत–पु., श्वेतसर्षपवृक्षः (प. मु,)
रघुनाथ–पु., वैद्यविलासनामग्रन्थकारः
रङ्कु–पु., मत्स्यरङ्गः (वै. नि.) शबलपृष्ठहरिणविशेषः (रा. व. १९.)
रङ्गज–न., सिन्दूरम् (र. मा.)
रङ्गदलिका–स्त्री., नागवल्लीलता (वै. नि.)
रङ्गदा–स्त्री., स्फटिका (भा.)
रङ्गदढा–स्त्री., स्फटिका (रा. व. १३.)
रङ्गबीज–न., रूप्यम् (त्रिका.)
रङ्गमाणिक्य–न., माणिक्यरत्नम् (रा. व. १३)
रङ्गलता–स्त्री., आवर्तकीलता, गुणः– शूलघ्नी (केचित्)
रङ्गलासिनी–स्त्री., शेफालिकावृक्षः (श. च.)
रङ्गसदृश–न., यशदम् (भा.)
रङ्गक्षार–पु., टङ्कणक्षारः (वै. नि.)
रङ्गा–स्त्री., जवावृक्षः (वै. नि.)
रङ्गाङ्गा–स्त्री., फटिकारिका (रा. व. १३)
रङ्गारि–पु., करवीरवृक्षः (र. मा.)
रङ्गाष्ठालुक–न., स्वनामख्यातं आलुकम् (त्रिका.)
रजःशय–पु., कुक्कुरः (श. मा.)
रजःसार–न., कर्पूरम्
रजःसारथी–पु., वायुः
रजतोपम–न., रौप्यमाक्षिकम् (वै. नि.)
रजनि–स्त्री., वास्तुकः, रात्रिः, हरिद्रा
रजनिपुष्प–न., हरिद्रापुष्पम्
रजनीगन्धा–स्त्री., स्वनामख्यातपुष्पवृक्षः
रजनीजल–न., नीहारः
रजनीहासा–स्त्री., शेफालिकापुष्पवृक्षः (श. र.)
रजसानु–पु., मनस्, हृदयम्
रजस्वर्ण–पु., पीतधुस्तूरकः (वै. नि.)
रजस्वल–पु., पारदः (वै. नि.)
रञ्जनकेशी–स्त्री., नीलीवृक्षः (वै. नि.)
रञ्जनगण–पु., रञ्जनद्रव्यवर्गः । 'चतुर्विधा हरिद्रा स्यात पत्तङ्गं रक्तचन्दनम् । नीलीकुसुम्भमञ्जिष्ठा-लाक्षामहद्विकिंशुकम् ' (रा. नि. व. ६)
रञ्जनद्रु–(म)–पु., अच्छुकवृक्षः
रञ्जनीपुष्प–पु., पूतिकरञ्जः (रा. नि. व. १९)
रण–पु., दुम्बामेवः (वै. नि.)
रणघण्टासमाकृति–पु., महाशणम्
रणपक्षी (इन्)–पु., रणगृध्रः
रणमुष्टि–पु., विषमुष्टिक्षुपः (रा. नि. ४)
रणमूर्द्धजा–स्त्री., कर्कटशृङ्गी (रा. नि.)

रणरण–पु., भ्रमरः, उत्कण्ठा
रणालङ्करण–पु., कङ्कपक्षी (रा. व. १९)
रण्डक–पु., अफलवृक्षः
रतकोल–पु., कुक्कुरः (त्रि. का.)
रतज्वर–पु., काकः
रतनारीच–पु., कुक्कुरः (वै. नि.)
रतनिधि–पु., खञ्जनः
रतव्रण–पु., कुक्कुरः
रतशायी–(इन्)–पु., कुक्कुरः
रताङ्गी–स्त्री., कुज्झटिका
रतान्दुक–पु., कुक्कुरः
रतामर्द्द–पु., कुक्कुरः
रति–स्त्री., प्रीतिः । सुरतम् । गुह्यदेशम्ः
रतिकुहर–न., भगः
रतिक्रिया–स्त्री., मैथुनम्
रतिगृह–न., भगम् (त्रिका.)
रतिचर्य्या–स्त्री., स्त्रीसेवा (जटा.)
रतिमन्दिर–न., योनिः
रतिरथ–पु., नखम्
रतिलक्षण–न., रतिक्रिया
रतिवल्लभमोदक–पु., वाजीकरणाधिकारे औषधम् (रस. र.)
रतिसत्वरा–स्त्री., पृक्का (श. च.)
रतिसाधन–न., शिश्नम् (वै. नि.)
रतोद्वह–पु., कोकिलः (श. मा.)
रत्नकन्दल–पु., प्रवालः (श. र.)
रत्नगर्भपोट्टलिरस–पु., यक्ष्माधिकारे रसः (र. सा. सं । भैष.)
रत्नगिरिरस–पु., ज्वराधिकारे रसः (रस. चि.)
रत्नजाति–स्त्री., श्वेतरक्तनीलपीतवर्णाः ब्राह्मणक्षत्रियवैश्य-शूद्राः
रत्ननायक–पु., माणिक्यम् (रा. नि. व. १२)
रत्ननिधि–पु., खञ्जनपक्षी (त्रिका.)
रत्नमाला–स्त्री., वैद्यकचिकित्साशास्त्रभेदः
रत्नमुख्य–न., हीरकः (हे. च.)
रत्नराट्–पु., माणिक्यं (रा. नि. व. १३)
रत्नावली–स्त्री., राधामाधवकृतद्रव्याभिधानम्
रत्नि–पु., स्त्री., बद्धमुष्टिहस्तः (अ. म.)
रत्यङ्ग–न., योनिः (श. र.)
रथचरण–पु., चक्रवाकः (श. र.)

रथद्रु–पु., तिनिशवृक्षः (अ. म.)
रथपर्य्याय–पु., वेत्रलता (श. च.) तिनिशवृक्षः (अम.)
रथाङ्गाह्वयनायक–पु., चक्रवाकः (अम.)
रथाभ्र–पु., वेतसवृक्षः (अम.)
रथाभ्रपुष्प–पु., वेतसवृक्षः (अम.)
रथी (इन्) पु., चक्रवाकः (वै. नि.)
रदच्छद–पु., ओष्ठम् (रा. नि. व. १८.)
रदद्रु–पु., अश्वशाखोटवृक्षः
रदनच्छद–पु., ओष्ठम् (रा. नि. व. १८.)
रदनी (इन्)–पु., हस्ती (हला)
रदायुध–पु., शूकरः
रदी (इन्)–पु., हस्ती
रन्तिदेव–पु., कुक्करः (श. र.)
रन्धन–न., पाककरणम् (व्याक.)
रन्धित–त्रि. पाचितम् न., कृतरन्धनद्रव्यम्
रन्ध्र–न. दूषणम् । छिद्रम् (मे.)
रन्ध्रबभ्रु–पु., उन्दुरी (त्रिका.)
रभस–पु., वेगः । पौर्व्वापर्यविचारः (अरुणः)
रम–पु., रक्ताशोकवृक्षः (मे.)
रमठ–न., हिङ्गु (उणा.)
रमठध्वनि–पु., हिङ्गु (श. च.) मैथुनम्
रमणा (णी)–स्त्री., प्रियङ्गुः, नारी
रमति–पु., काकः (श. र.)
रमाप्रिय–न., पद्मम् (श. च.) पु., दारुचीनीति ख्यातं मिष्टत्वग् (वै. नि.)
रमावेष्ट–पु., श्रीवासचन्दनम् (रा. नि. व. १२.)
रम्यकक्षीर–पु., महानिम्बः (रा. नि. व. ९.)
रम्यामली–स्त्री., भूधात्री (रा. नि. व. ५.)
रराटी–स्त्री., ललाटम् (पुराणम्)
रवण–न., कांस्यम् पु., उष्ट्रः (हे. च.) कोकिलः (उणा.)
रवथ–पु., कोकिलः (उणा.)
रविकान्त–पु., सूर्यकान्तमणिः (रा. नि. व. १३.) सूर्य्यावर्त्तक्षुपः (वै. नि.)
रविग्रह–पु., अश्वस्य ग्रहविशेषः (ज. द.)
रविजप्रिय–पु., नीलकान्तमणिः (वै. नि.)
रविजल–न., अर्कमूलरसः (वै. संग्रहपञ्चामृतरसे.)
रविदुग्ध–न., अर्कक्षीरः (र. सा. सं. त्रैलोंक्यचिन्तामणिरसे)
रविद्रुम–पु., सदापुष्पवृक्षः (रा. नि. व. १३.)
रविनाथ–पु., बन्धूकवृक्ष न., पद्मम् (श. च.)
रविपत्र–पु., आदित्यपत्रक्षुपः (रा. नि. व. ४)
रविप्रिया–स्त्री., सूर्य्यावर्तक्षुपः (र. मा.)
रविभक्ता–स्त्री., सूर्य्यावर्तक्षुपः (र. सा. सं.)
रविमूल–न., अर्कमूलम् (र. सा. सं. ज्वरचूडामणे.)
रविरत्न (क)–न., माणिक्यम् (रा. नि. व. १३.)
रविलोह–न., ताम्रम् (रा. नि.)
रविवल्लभ–पु., भृङ्गराजवृक्षः (वै. निघ.)
रविवल्ली–स्त्री., आदित्यभक्ता, ब्राह्मीक्षुपः
रविसंज्ञक–न., ताम्रम् (श. च.)
रविसुन्दररस–पु., सर्वज्वराधिकारे रसः
रविस्पर्शा–स्त्री., ह्रस्वमेषशृङ्गी (वै.)
रवीन्द्र–न., पद्मम् (धरणिः)
रश–पु., वंशः
रशना–स्त्री., जिह्वा (श. र.)
रशील–पु., कर्मरङ्गवृक्षः (प.)
रश्मिजात–न., रूप्यम् (वै. नि.)
रश्मिपति–पु., आदित्यक्षुपः (रा. नि. व. ४)
रसकर्पूर–न., पारदस्य श्वेतभस्मीकरणम् (चन्द्रिकाकारः) (र. सा. सं.) गुणाः—फिरङ्गरोगघ्नं दीपनं पुष्टिकरं बलवीर्यकारकं कुष्ठघ्नं व्रणघ्नं च.
रसकल्पलता–स्त्री., वैद्यकरसग्रन्थः
रसकेसर–न., कर्पूरम् (हारा.)
रसकेसरी (इन्)–पु., खर्परधातुः
रसगुडिका–स्त्री., कासाधिकारे रसः (र. सा. सं.)
रसघ्ना–स्त्री., तिक्तगुञ्जाकरञ्जः
रसचंद्रिकावटी–स्त्री., शिरोरोगे हिता (र. सा. सं.)
रसचूडामणि–पु., ज्वराधिकारे रसः (रस. चि.)
रसज्ञा–स्त्री., जिह्वा (रा. नि. व. १८)
रसज्येष्ठ–पु., मधुररसः (हे. च.)
रसतालक–न., रसगन्धतालादिकृतयन्त्रपकौषधभेदः(भै.)
रसतालेश्वर–पु., कुष्ठाधिकारे रसः (र. सा. सं.)
रसतेज (स्)– न., रक्तम् (हे. च.)
रसदा–स्त्री., रसनिर्गुण्डी (वै. नि.)
रसद्रावी (इन्) पु., मधुरजम्बीरम् (रा. नि. व. १८)
रसनापद–न., नितम्बम् (रा. नि. व. १८)
रसनायक–पु., पारदः (श. र.)
रसनालिट्(ड़ः)–पु., कुक्कुरः (हे. च.)
रसनिर्यास–पु., रालवृक्षः (वै. निघ)
रसनेत्रिका–स्त्री., मनःशिला (हे. च.)

रसनेष्ट-पु., इक्षुः (प. मु.)
रसपर्पटिका-स्त्री., ग्रहण्याद्यधिकारे औषधम् (भैष.)
रसप्रदीप-पु., रामचन्द्रकृतः वैद्यकरसग्रन्थः
रसबन्धकर-पु., सोमलता (वै. निघ)
रसभाव-पु., रसधर्म्मः, स्निग्धतादिः (राज. ४ प.)
रसमञ्जरी-स्त्री., शालिनाथकृतरसग्रन्थः
रसमञ्जरीभाष्य-न., शेषचिन्तामणिकृतरसमञ्जरी-भाष्यम्
रसमणि-पु., हरिहरकृतरसग्रन्थः
रसमण्डुर न., परिणामशूले औषधम् (र. स. र.)
रसमर्द्दन-न., पारदस्य चूर्णीकरणं मारणं वा
रसमाणिक्य-न., कुष्ठाधिकारे औषधम् । मात्रा २ र.
रसमारण-न., मारणद्रव्यैः पारदस्य मर्दनम् (र. सा. सं.)
रसमैत्री-स्त्री., मधुराम्लं लवणाम्लं कटुतिक्तकं, कटु-लवणं, तिक्तलवणं चेति सोच्यते
रसराजशिरोमणि-पु., परशुरामकृतो रसग्रन्थः
रसललना-स्त्री., जिह्वा
रसवती-स्त्री., पाकशाला (अम.)
रसवर्णक-पु., दाडिमपुष्पादिद्रव्यगणः (रा. नि. व.१२)
रसवीर्यकृत्-पु., सोमलता (वै. नि. घ.)
रसवेधक न., स्वर्णम् (वै. निघ.)
रसशङ्कर-पु., रसग्रन्थदभेदः
रसशार्दूल-पु., सूतिकोपचारे रसः (र. सा. सं.)
रसशेषाजीर्ण-न., रसशेषजन्याजीर्णरोगभेदः
रसशोणितसम्भव-न., मांसधातुः (वै. निघ.)
रसशोधन-न., टङ्कणम् (हे. च.) पादरस्य सीसकादि-दोषसंस्करणम्
रससंरक्षण-न., रसस्य शोधनमूर्च्छनबन्धनमारणरूपं कर्म्मचतुष्टयम् (र. सा. सं.)
रससंकेतकलिका-स्त्री., शतद्वयश्लोकात्मकरसग्रन्थः
रससंग्रहसिध्दान्त-पु., वैद्यकरसग्रन्थविशेषः
रससंभव-न., रक्तम् (वै. निध.)
रससार-पु., वैद्यकरसग्रन्थविशेषः। मधु (नकुल १२ अ.)
रससिन्दूर-न., रसगन्धकयोः सिन्दूरीकरणम् (र. चि. २ अ.)
रससुधाकर-पु., वैद्यकरसग्रन्थविशेषः
रससुधानिधि-पु., रसग्रन्थभेदः भोजराजशूक्रकृतः
रससू-पु., रसधातुः (वै. निघ.)
रसस्राव-पु., अम्लवेतसम् (वै. निघ.)

रसाखन-पु., कुक्कुटः (श. च.)
रसाङ्का-स्त्री., जिह्वा । अलिजिह्विका ।
रसाञ्जनादिचूर्ण-न., ज्वरातिसारे औषधम् । (रस. र.)
रसाढ्य-पु., आम्रातकवृक्षः (रा. नि. व. ६)
रसाढ्या-स्त्री., रास्ना (रा. नि. व. ११)
रसादान-न., रसशोषणम् (हे. च. रसग्रहणे)
रसाधिकार-पु., हरिहरकृतः वैद्यकरसग्रन्थः ।
रसानुग-त्रि., रसदूषकः, रसानुसारी
रसाभुग्न-न., बोलनामगन्धद्रव्यम् (रा. नि. व. ६)
रसाभ्रगुडिका-स्त्री., रसायनाधिकारे औषधम् (रस. र.)
रसाभ्रवटी-स्त्री., ग्रहण्यधिकारे औषधम् (र. सा. सं.)
रसामृतरस-पु., रक्तपित्ताधिकारे रसः (र. सा. सं.)
रसायनाफला-स्त्री., हरीतकीवृक्षः (त्रिका.)
रसायनामृतलौह-न., ज्वरातिसारे लौहम्
रसालशर्करा-स्त्री., रसालेक्षुरसकृतशर्करा (रा. नि. व. १४)
रसालसा-स्त्री., पुण्ड्रकेक्षुः । गोधूमः । कुन्दुरुतृणम् । नाडी (श. च.)
रसालाम्र-पु., महाराजाम्रः (रा. नि. व. ११)
रसालिका-स्त्री., सप्तला (वै. निघ)
रसालिहा-स्त्री., पृश्निपर्णी (श. च.)
रसाली (इन्)-पु., कृष्णचणकेक्षुः
रसालेक्षुली-पु., करङ्कशालिनामेक्षुः (रा. नि. व. १४)
रसालोला-स्त्री., जिह्वा
रसाश्वासा-स्त्री., पलाशीलता (रा.)
रसाष्टक-न., महारसाष्टकम् । पारददरदाभ्रककान्तलौह-विमलमाक्षिकवैक्रान्तशङ्खश्च (वै. निघ.)
रसास्वादी-(इन्)-पु., भ्रमरः
रसाह्व-पु., लवणखोटी (र. मा.)
रसिकालु-पु., नीलालुः (वै. निघ.)
रसुन-पु., लशुनः (श. च)
रसेन्द्रगुडिका-स्त्री., कासे यक्ष्मणि वा रसविशेषः
रसोदर-न., हिङ्गुलः (रा. नि. व. १३)
रसोनपिण्ड-पु., ऊरुस्तम्भधिकारे औषधम्
रसोनाष्टक-न., वातव्याध्यधिकारे औषधम्
रसोपल-न., मौक्तिकम् (त्रिका.)
रस्य-न., मांसधातुः (वै. निघ.) रक्तम् (श. च.)
रा-पु, स्त्री., काञ्चनम् (श. र. । अम.)
राका-स्त्री., दुष्टरजस्का कन्या (हारा.) पूर्णिमा । कच्छूरोगः (मे.)

राक्षम्-न., पर्कठीफलम् (अम.)
राक्षसभोजन-न., मांसम् । राक्षसग्रहः ।
राक्षसीकन्द-पु., चन्डालकन्दः (वै. निघ.)
राक्षा (क्ष्या)-स्त्री., लाक्षा (अम.)
रागचूर्ण-पु., खदिरवृक्षः (मे.) फल्गुचूर्णम् । (श.र.) लाक्षारसः (रा. नि. व. ६.)
रागद-पु., तैरणीक्षुपः (रा. नि. व. ४) लाक्षारसः
रागदृक्-पु., माणिक्यम् (रा. नि. व. १३.)
रागपुष्पी-स्त्री., ओड्रपुष्पवृक्षः (रा. नि. व. १०)
रागयुक् (ज्)-पु., माक्षिकम्
रागलता-स्त्री., उपस्थम्
रागसारा-स्त्री., मनःशिला (वै. निघ.)
रागसूत्र-न., पट्टवस्त्रम् (मे.)
रागी (तरु)-पु., अशोकवृक्षः
रागीष्ट-न., सुगन्धरोहिषतृणम् (वै. निघ.)
राघव-पु., तिमिङ्गिलमत्स्यः (मे.) बृहदाकारमत्स्यभेदः
राङ्कल-पु., तरुकण्टकः (हारा.)
राङ्कव-न., पशुलोमजातवस्त्रादिः (अम.)
राङ्कण-न., रङ्कणपुष्पम् (राज. ५प.)
राजक-पु., कृष्णागुरुः (वै. निघ.)
राजकदम्ब-पु., कदम्बविशेषः (जटा.)
राजकर्कटी-स्त्री., चीनकर्कटी (रा. नी. व. ७)
राजकार्शी-पु., शालवृक्षः
राजकाष्ठ-न., पतङ्गचन्दनः (वै. निघ.)
राजकुलक-पु., पटोललता (प. मु.)
राजकूष्माण्ड-पु., वार्त्ताकी (जटा.)
राजग्रीव-पु., मत्स्यविशेषः (त्रिका.)
राजघास-पु., तृणभेदः
राजचम्पक-न., पुन्नागपुष्पम् (सुसू. ३८ अ.)
राजचिह्नक-न., शिश्नम् (श. च.)
राजजक्ष्मा-पु., स्वनामख्यातरोगः
राजजीरक-न., जीरकभेदः
राजतरणी-स्त्री., पुष्पविशेषः । महातरणीपुष्पवृक्षः (रा. नि. व. १०)
राजताल-पु., गुवाकवृक्षः (त्रिका.) नारिकेलः (वै. निघ.)
राजतालेश्वर-पु., कुष्ठाधिकारे रसः
राजतिमिश-पु., चेलानम् । सुखाशः
राजदन्त-पु., दशनानामग्रस्थदन्तचतुष्टयम् (त्रिका.)
तूराजध त्तु(र)रक-पु., पीतधुस्तूरवृक्षः (वै. निघ.)
राजधूर्त्त-पु., पीतधुस्तूरः (वै. निघ.)
राजनग-पु., राजगिरिशाकः (वै. निघ.)
राजनिम्बूक-पु., निम्बूविशेषः (वै. निघ.)
राजनील-न., मरकतमणिः (श. र.)
राजनीलिका-स्त्री., महानीली (रा. नि. व. ४)
राजन्य(न्या)-पु., स्त्री., राजादनवृक्षः (जटा.)
राजन्यावर्त(क)-पु., राजावर्तमणिः (रा. नि. व. १३)
राजपटोल-पु., मधुपटोलः (रमा.)
राजपटोलिका(ली)-स्त्री., मधुरपटोली (रा. नि. व. ३)
राजपट्ट-पु., न., कान्तपाषाणः (त्रिका.)
राजपट्टिका-स्त्री., चातकः (हारा.)
राजपत्नी-स्त्री., प्रसारणी लता (रा. नि. व. ५)
राजपुत्रिका-स्त्री., शरारिपक्षी (जटा.)
राजपुष्प-पु., नागकेशरवृक्षः (श. च.)
राजपूज्य-न., स्वर्णम् (वै. निघ.)
राजफणिज्झक-पु., नागरङ्गवृक्षः (श. मा.)
राजफल्गु-पु., कृष्णोदुम्बरवृक्षः (वै. निघ.)
राजभक्त-न.. नृपभोजान्नपानादि च
राजभट्टिका-स्त्री., हापुत्रीपक्षी (जठा.)
राजभद्रक-पु., पारिभद्रकवृक्षः । निम्बवृक्षः । कुष्ठम् । कुन्दुरकम् [रा. नि. २३)
राजभोग-पु., शालिधान्यविशेषः (रावणः)
राजभोग्य-न., जातीकोषः पु.. प्रियालवृक्षः (श. च.) त्रि. राजभोगार्हः
राजमण्डूक-पु., महामण्डूकः (रा नि. व. ११)
राजमान्य-न., पटोलः (वै. निघ.)
राजयोग्य-न., चंदनम् (वै. निघ.)
राजरङ्ग-न., रजतम् (श. र.)
राजराजेश्वररस-पु., कुष्ठाधिकारे रसः (र. सा. सं.)
राजलक्ष्मी-स्त्री., कदलीवृक्षः (रा. नि. व. ११.)
राजवर्त-पु., राजवर्तमणिः (भा. म. कर्णरो.चि.)
राजवल्ली-स्त्री., कारवेल्लकः (र. मा.)
राजवासन-पु., भृङ्गराजपक्षी
राजवाह-पु., घोटकः (श. च.)
राजशण-पु., पाट इति ख्यातवृक्षः
राजशाली-पु., राजभोग्यशालिधान्यविशेषः
राजशिम्बी-स्त्री., श्वेतशिम्बी निष्पावः (वै. निघ.)
राजशुक-पु., पक्षिविशेषः (रा. नि. व. १९)
राजशूकज-न., शालिधान्यम् (प. मु.)
राजशृङ्ग-पु., मद्गुरमत्स्यः (हे. च.)

राजसफर–पु., इलिषमत्स्यः (हारा.)
राजसर्प–पु., सर्पविशेषः (त्रिका.)
राजसारस–पु., मयूरः (श. मा.)
राजसी–स्त्री., श्वेततुलसी (वै. निघ.)
राजसुषवी–स्त्री., कारवेल्लभेदः (प. मु.)
राजसैरेयक–पु., नीलझिण्टी
राजस्कन्ध–पु., घोटकः (त्रिका.)
राजस्वर्ण–पु., राजधुस्तूरवृक्षः (रा नि व १०)
राजहास–(क)–पु., मत्स्यविशेषः
राजाग्र–पु., राजगिरिशाकः (वै. नि.)
राजातन–पु., पीतशालवृक्षः (रा. नि. व.)
राजात्यावर्त्तक–पु., राजावर्तः
राजादनफल–पु., क्षीरिणीवृक्षः (वै. निघ.)
राजालाबु–स्त्री., स्वादुतुम्बी (मद.)
राजालुक–पु., महाकन्दः (हारा.)
राजाहि–पु., द्विमुखसर्पः (त्रिका.)
राजिचित्र–पु., राजिमच्छर्पविशेषः (सु. कल्प. ४)
राजिफला–स्त्री., चीनकर्कटीलता (रा. नि. व. ७)
राजिभ–पु., दुण्डुभसर्पः (वै. निघ.)
राजिमत्फला–स्त्री., मधुकोषातकी (भा. पू. १ भ.)
राजिल–पु., डुण्डुभसर्पः
राजील–पु., राजसर्षपः (वै. निघ.)
राजेन्द्र–पु., राजगिराशाकः (वै. नि.)
राजेय–पु., पटोलः (भा. पू. १ भ. शा. व.)
राटि–(डि)–पु., शरारिपक्षी (अम.)
राठपुष्प–न., मदनपुष्पम् (वा. उ. २ अ.)
रात्रिजल–न., कुज्झटिका (श. मा.)
रात्रिजागर–पु., कुरः (हे. च.)
रात्रिनामिका–स्त्री., हरिद्रा
रात्रिपुष्प–न., उत्पलम् (रा. नि. व. १०)
रात्रिवियोगी (इन्)–पु., चक्रवाकपक्षी
रात्रिविश्लेषगामिन्–पु., चक्रवाकपक्षी (रा. नि. व. १९)
रात्रिहास–पु., श्वेतोत्पलम् (श. र.)
रात्रिवेद (दी) इन्–पु., कुक्कुटः (त्रिका.)
राधवङ्क–पु., करका
राद्ध–त्रि., पक्वः (हे. च.) न., ह्यन्तरभुक्तः आन्तर-भुक्तः वा (त्रिका.)
राधा–स्त्री., विष्णुक्रान्ता । आमलकी (भै)
राधामाधव–पु., वैद्यरत्नावलीकारः
रामक–पु., जलापामार्गः (वै. निघ.)

रामकन्द–पु., शमीवृक्षः (प. मु.)
रामकर्पूरक–पु., कतृणम् (श. र.)
रामकोशा(षा) तकी–स्त्री., महाशुककोशातकी (वै. नि.)
रामगुवाक–पु., रामपूगवृक्षः
रामचन्द्र–पु., रसप्रदीपकारः । चिन्तामणिकारः
रामच्छर्दनक–पु., मदनवृक्षः (भा.)
रामजननी–स्त्री., रेणुका
रामतरुणी–स्त्री., तरुणीपुष्पवृक्षः (रा. नि. व. १०)
रामदूतिका (ती)–स्त्री., नागदन्ती (र. मा.) नागपुष्पी (भा) तुलसीविशेषः
रामपूग–पु., गुवाकवृक्षविशेषः (त्रिका)
रामभद्रा–स्त्री., गान्धारीवृक्षः (वै. नि.)
रामलवण–न., शाकम्भरिलवणम् (र. मा.)
रामबाणरस–पु., अजीर्णाधिकारे रसः (चि. भा.)
रामशे (से) न (क)–पु., भूनिम्बः
रामाटरूष–पु., वासाभेदः
रामाप्रिय–पु., त्वक्
रामावक्षोजोपम–पु., चक्रवाकः
रामोदुम्बरिकाफल–न., अञ्जीरफलम् (वै. निघ.)
रायण–न., पीडा (श. र.)
रालकार्य–पु., शालवृक्षः (रा. नि. व. ९.)
रालतैल–न., शालवृक्षभवतैलम्
रालनिर्यास–पु., सालवृक्षः
रालिका–स्त्री., धूनकः (वै. निघ.)
रावण–पु., वृक्षविशेषः (वै. निघ.)
राषभी–स्त्री , कपिकच्छुः (वै. नि.)
राष्ट्रक–न., वैदूर्यमणिः (प. मु.)
राष्ट्री–स्त्री., महाराष्ट्रीलता (रा. नि. व. २३)
रास–पु., शृङ्खलकः । क्रीडा (त्रिका.)
रासना–स्त्री., रास्ना । त्रिकटुकादिचूर्णम्
रासभवन्दिनी–स्त्री., मल्लिकापुष्पवृक्षः (श.)
रास्नागुग्गुलु–पु., वातव्याधौ औषधम् (चचि. २८)
रास्नादशमूल–न., वातव्याधौ कषायः (रस. र.)
रास्नादि–पु., रास्नावृक्षादनीदेवदारुसरलैलवालुककृत-कषायः
रास्नादिलौह–न., राजयक्ष्माधिकारे श्वासकासेच लौहम्
रास्नापञ्चक–पु., उरुस्तम्भाधिकारे कषायः (रस. र.)
रास्नासप्तक–न., उरुस्तम्भाधिकारे पाचनम् (रस. र.)
रास्निका–स्त्री., रास्ना (भा.)

राहुरत्न–न., गोमेदक रत्नम् (रा. नि. व. १३)
राहूच्छिष्ट–पु., लशुनः (त्रिका.)
राहूत्सृष्ट–पु., रशोनः (हारा.)
रिङ्ख (ङ्ग)ण–न., स्खलनम् (अम.)
रिठा (करञ्ज)–पु., स्त्री.,रीठाकरञ्जः
रिपुघातिनी–स्त्री., गुञ्जाविशेषः (श. च.)
रिबु–पु., रक्तैरण्डः (वै. निघ.)
रिमेद–पु., अरिमेदः (रा. नि. व. ८)
रिरी–स्त्री पित्तलम् (हे. च.)
रिश्य–(स्य)–पु., हरिणविशेषः (त्रिका.)
रिष्टक–पु., रक्तशिग्रुवृक्षः (शर)
रिक्षा–स्त्री., निक्षा । यूका (हे. च.)
रीढक–पु., पृष्ठास्थि (हे. च.)
रीति (का) कुसुम (पुष्प) न., पुष्पाञ्जनम् (रा.नि.व.१०)
रीतिहेतु–पु., यशदम् (भा.)
रुक्का–स्त्री., सुराविशेषः (प. प्र. ३ ख.)
रुक्प्रतिक्रिया–स्त्री., रोगशमनोपायः चिकित्सा (रा नि व २०)
रुक्मवन्ती–स्त्री., शालिधान्यविशेषः
रुक्षदधि–न., निःस्नेहदधि (वै. निघ.)
रुक्षपत्र–पु., शाखोटवृक्षः (रा. नि. व. ९)
रुक्सद्म(न्)–न., मलः
रुग्दाह–पु., तन्नामकसन्निपातज्वरविशेषः (वै. निघ. भा.)
रुग्म–न., स्वर्णम्
रुचिकर–पु., नागरङ्गवृक्षः (वै. निघ.)
रुचित–त्रि., मिष्टवस्तु (उणा.)
रुचिप्रदा–स्त्री., मधुरबिम्बी (वै. निघ.)
रुचिफल–न., अमृतफलम्
रुचिराञ्जन–पु., शोभाञ्जनवृक्षः (रा. नि. व. ७)
रुचिरासुत–पु., पालकाप्यनामगजवैद्यककारः (त्रिका.)
रुण्डक–न., अगुरुकाष्ठम् (वै. निघ.)
रुण्डी–स्त्री., कुन्दुरुः (रा. नि. व. ८)
रुदथ–पु., कुक्कुरः (उणा)
रुद्रक–पु., महाबकुलवृक्षः
रुद्रदारु–पु., तैलदेवदारुः (वै. निघ.)
रुद्रनिर्माल्य–न., शिवनिर्माल्यं, पुष्पादि
रुद्रपर्पटी–स्त्री., कासाधिकारे औषधम् (रस. र.)
रुद्रप्रिय–पु., बकुलवृक्षः (रा. नि. व. ८)
रुद्रभट्ट–पु., वैद्यजीवनग्रन्थकारः । सन्निपातकलिकाकारः
रुद्रमाल्य–पु., बिल्ववृक्षः (वै. निघ.)
रुधिरक्षरा–स्त्री., लोहितक्षरा नाम योनिव्यापत्
रुधिराख्य–न., इन्द्रनीलतुल्यमणिभेदः (पुराणम्)
रुधिराशय–पु., यकृत् प्लीहा च
रुपिका–स्त्री., आदित्यपुष्पिका (सुनि १७ अ.)
रुमा–स्त्री., तन्नामक्षारसमुद्रः (मे.)
रुमाभव–न., रुमानदीभवलवणम् (वै. निघ.)
रुरुमाण–पु., वरुणवृक्षः (वै. निघ.)
रुवुक्–पु., एरण्डवृक्षः (र. मा.)
रुबुबीज–न., एरण्डबीजम् (भैष. वातरक्त चि.)
रुष्कर–पु., भल्लातकवृक्षः (वै. निघ.)
रुहक–न., छिद्रम् (श. च.)
रुहदर्भ–पु., हरितकुशः (रा. नि. व. ८)
रुहा (न)–पु., वृक्षः
रूक्षगुणकर्म्म–न., अमार्दवकरत्वम् बलवर्णघ्नत्वंच (सु.)
रूक्षणात्मिका–स्त्री., कृष्णचणकवृक्षः । लङ्कानामशिम्बी-धान्यम् (रा. नि. व. १६)
रूक्षपत्र–पु., शाखोटवृक्षः (रा. नि. व. ९)
रूक्षप्रिय–पु., ऋषभौषधम् (रा. नि. व. ५)
रूक्षस्वादुफल–पु., धन्वनवृक्षः (रा. नि. व. ९)
रूढक–न., पिप्पलीमूलम् (वै. निघ.)
रूढमल्लिका–स्त्री., अङ्कोलवृक्षः (वै. निघ.)
रूपक–न., रौप्यधातुः (रा. नि. व. १३)
रूपनाशन–पु., पेचकः (श. र.)
रूपशङ्ख (सिख)–पु., वङ्गम् (वै. निघ.)
रूप्यमाक्षिक–न., तारमाक्षिकम् (प. सु.)
रूप्योद्भव–नं., रौप्यमाक्षिकम् (वै. निघ.)
रूमीमुस्तकी–स्त्री., गुहाबदरीवृक्षः (भैष)
रूवुक–पु., एरण्डवृक्षः (श. मा.)
रूषक–पु., वासावृक्षः (जटा.)
रूषण–न., रजोगुणः (रा. नि. व. २१)
रूषिका–स्त्री., अर्कवृक्षः (च.)
रेकण–पु., स्वर्णम् (उणा.)
रेणुरूषित–पु., गर्दभः (त्रिका.)
रेणुवास–पु., भ्रमरः (त्रिका.)
रेणुसार (क)–पु., कर्पूरः (त्रिका.)
रेतजा–स्त्री., वालुका (भा.)
रेतन–न., शुक्रम् (श. च.)
रेत्य–न., पित्तलम् (अ. टी. नीलकण्ठ)
रेत्र–न., शुक्रः, पारदः (मे) पियूषं पटवासचूर्णं

रेवट–न., दक्षिणावर्तशङ्खः । शिग्रुतैलम्, कदलीफलम् (अजयपाल) पु., शूकरः । वातुलः । विषवैद्यः (अजयपालः) रामपूगः (त्रिका.)

रेवतीभव–पु., शनैश्चरग्रहः (हे. च.)

रेवा–स्त्री., नीलीवृक्षः

रोक–न., छिद्रम् (अम.)

रोगकाष्ठ–न., पत्राङ्गचन्दनम् (रा. नि. व. १२)

रोगज्ञ–पु., वैद्यः (रा. नि. व. २०)

रोगपति–पु., ज्वरः (वै. निघ.)

रोगप्रे (श्रे) ष्ठ–पु., ज्वरः (रा. नि. व. २)

रोगभू–स्त्री., शरीरम् (श. च.)

रोगमुरारी–पु., नवज्वरे रसः (रस. कौ.)

रोगशान्तक–पु., चिकित्सकः (श. च.)

रोगशिल्पी (इन्)–पु., स्वर्णुलीवृक्षः (जटा.)

रोगह–न., औषधम्

रोगहरद्रव्य–न., मधुरादि रोगनाशकद्रव्यम् (धन्वतरी)

रोगहारी (इन्)–पु., वैद्यः (रा. नि. व. २०)

रोगहेतु–पु., रोगनिदानम् (रा. नि. व. २०)

रोगाधीश–पु., राजयक्ष्मा (रा नि व २०)

रोगासन–पु., ज्वरः (वै. निघ.)

रोगाह्वय–न., कुष्ठौषधम् (वै. निघ)

रोगितरु–पु., अशोकवृक्षः (रा. नि. व १०)

रोगिवल्लभ–न., ओषधप्रलेपादिः (श. च.)

रोगोदक–न., मलिनदुर्गन्धादियुक्तं रोगजनकजलम्

रोग्य–न., रोगहितम् । रोगयोग्यम् अपथ्यम् (श. च.)

रोचकद्वय–न.. लवणद्वयम् । विट्सैन्धवम् (वै. निघ ज्व. चि. चन्दनबलातैले)

रोची–स्त्री., पत्रशाकविशेषः, हिलमोचिका (श. र)

रोटिका–स्त्री., गोधूममाषादिकृतपिष्टकविशेषः

रोदिका–स्त्री., लज्जालुका (कोषान्तरम्)

रोदिनी–स्त्री., रक्तदुरालभा (वै. निघ.)

रोधिनी–स्त्री., लज्जालुः (वै निघ)

रोध्रपुष्पिणी–स्त्री., धातकीवृक्षः (रा. नि. व. ६)

रोप–पु., रोपणम् (मे. न.) छिद्रम् (हे. च.)

रोपणीवर्त्ति–पु., कुसुमाभिधनेत्राञ्जनवर्त्तिभेदः (भा.-नेत्ररो.)

रोप्यशालि पु., छिन्ना पुनरुत्था शालिः (रा. नि. व. १९)

रोप्यातिरोप्य–पु., रोप्यशालिः (राज.)

रोम–न., पत्रम् (म. द. व. ३) जलम् (श. च)

रोमकर्ण–पु., शशकः (वै. निघ.)

रोमकाख्य–न., शाम्भरलवणम् । मृत्तिकालवणम् कान्तलौहम् (वै. निघ.)

रोमगुच्छ (क)–न., चामरः (हे. च.) ·

रोमतक्षरी–स्त्री., अरोमा स्त्री (रस. र.)

रोमद्वीप–पु., कृमिः (वै. निघ)

रोमन्थ–पु., पशूनां चर्वितचर्वणम् (अम.)

रोमभूमि–स्त्री., चर्म्म (रा. नि. व. १८)

रोमलता–स्त्री., रोमराजी (श. च.)

रोम (क) लवण–न., शाम्भरलवणम् सौवर्चललवणम् (र. मा.)

रोमविकार–पु., रोमाञ्चः (हला.)

रोमशपत्रा–स्त्री., देवताडवृक्षः

रोमशफल–पु., डिण्डिशवृक्षः (भा. पू. १ भ. शा. व.)

रोमशमूलिका–स्त्री., हरिद्रा (वै. निघ.)

रोमशुक–न., स्थौणेयकः

रोमहरण–न., हरितालम् (र. सा. सं.)

रोमाख्य–न., शाम्भरलवणम् (वै. निघ.)

रोमान्ती–स्त्री., क्षुद्रमसूरिकारोगभेदः (मा. नि.)

रोमाली–स्त्री., रोमराजिका वयःसन्धिः (श. मा.)

रोमालुविटपी (इन्)–पु., कोङ्कणदेशप्रसिद्धकुम्भीवृक्षः (रा. नि. व. ९)

रोमावली–स्त्री., नाभेरूर्ध्वं रोमराजी (हे. च.)

रोमाश्रयफला–स्त्री., झिञ्झिरीटाक्षुपः (रा. नि. व. ४)

रोमेश्वर–पु., वैद्यामृतग्रन्थकारः

रोल–पु., आर्द्रशुण्ठी । फलविशेषः पानीयामलकम् (श. च.) तालीशपत्रम् (कश्चित्)

रोलम्ब–पु., भ्रमरः (त्रिका.)

रोषण–पु., परूषकवृक्षः । पारदः । निकषोपलम् (मे.) ऊषरभूमिः (हे. च.)

रोषिणी–स्त्री., लज्जालुका (वै. निघ)

रोह–पु., अङ्कुरः (हे. च.)

रोहणद्रुम–पु., चन्दनवृक्षः । मलयागुरुः (वै. निघ.)

रोहन्त–पु., वृक्षः । तरुविशेषः (उणा.)

रोहन्ती–स्त्री., लतामात्रम् । लताविशेषः (उणा.)

रोहि–पु., वृक्षः बीजम् (उणा.)

रोहिका–पु., वनरोहिनामम्गः (अत्रि. २२ अ.)

रोहिकाप्रिय–पु., महाकरञ्जः (वै. निघ.)

रोहिणेय–पु., मरकतमणिः (रा. नि. व. १३)

रोहित्–पु., रोहितमत्स्यः । श्रीखण्डचन्दनम् (त्रिका.) सूर्यः । वर्णभेदः स्त्री., लताभेदः (मे.)

रोहिता–स्त्री., मञ्जिष्ठा (वै. निघ.)

रोहितेय-पु., रोहितकवृक्षः (रत्नकोषः)
रोहितकलौह-न., प्लीहाधिकारे औषधम् (र. सा. सं.)
रौक्ष-न., रुक्षता (सु.,)
रौक्ष्य-न., वायुगुणभूयिष्ठत्वम् । स्नेहराहित्यम् (सु.)
रौद्ररस-पु., अर्बुदाधिकारे रसः
रौप्यमल-न., रौप्यमाक्षिकम् (वै. निघ.)
रौप्यमाक्षिक-न., स्वनामख्यातोपधातुः
रौम (क)-न., रोमकलवणम् (र. मा.)
रौहिट-पु., रोहिषमृगः (अ. टी. भ.)
रौहिण-पु., रक्तचन्दनम् । चन्दनवृक्षः (त्रिका.)
रौहिष (षेय)-न., कतृणम् ।रोहिषतृणम् । पु., रोहितमत्स्यः । मृगविशेषः (अम.) स्त्री., (षी) दूर्वामृगी (उणा.)
रौही-(इन्)-पु., रोहितकवृक्षः

ल

लक्तकर्म (न्)-स्त्री., रक्तवर्णलोध्रः (श. च.)
लक्ष-न., मौक्तिकम्
लक्ष्मणाजटा-स्त्री., लक्ष्मणामूलम्
लक्ष्मीग्रह-न., रक्तोत्पलम् (त्रिका.)
लक्ष्मीदास-पु., योगशतकग्रन्थप्रणेता
लक्ष्मीपति-पु., लवङ्गवृक्षः । पूगवृक्षः (विश्व.)
लक्ष्मीपुत्र-पु., घोटकः (मे.)
लक्ष्मीपुष्प-पु., पद्मरागमणिः (हे. च.)
लक्ष्मीश्रेष्ठा-स्त्री., स्थलपद्मिनी (वै. निघ.)
लग्निका-स्त्री., नग्निका (अ. टी.)
लघुकण-पु., शुक्लजीरकः (वै. निघ.)
लघुकण्टका-स्त्री., लज्जालुः (वै. निघ.)
लघुकर्कन्धु-पु., स्त्री , (न्धू) भूमिबदरम् (वै. निघ.)
लघुकाम-पु., छागः (त्रिका । श. र.)
लघुगर्ग-पु., गर्गरमत्स्यः । त्रिकण्टकमत्स्यः (त्रिका.)
लघुगोधूम-पु., ह्रस्वगोधूमः (रा. नि. व. १९)
लघुचन्दन-न., काष्ठागुरुः (वै. निघ.)
लघुचेतकी-स्त्री., बालहरीतकी (वै. निघ.)
लघुच्छदा-स्त्री., महाशतावरी (वै. निघ.)
लघुज (ङ्ग) ल-पु., लावपक्षी (त्रिका.)
लघुदन्ती-स्त्री., क्षुद्रदन्ती (भा.)
लघुनाम (न)-न., अगुरुः (श. च.)
लघुनिदान-न., सुरजितकृतसंक्षिप्तनिदानम् । ग्रन्थः ।
लघुपञ्चमूल-न., स्त्री., (ली) स्वल्पपञ्चमूलम् । शालपर्णी-पृश्निपर्णी बृहती कण्टकारी गोक्षुरकृतकषायः (रा. नि. व. १२)
लघुपर्वा (न)-पु., उदुम्बरवृक्षः (वै. निघ.)
लघुपाकी (इन्)-पु., चीनधान्यम् (प. मु.)
लघुफल-पु., लघूदुम्बरः (वै. निघ.)
लघुवदर-पु., क्षुद्रफलबदरवृक्षः (रा. नि. व. ११)
लघुवदरी-स्त्री., भूवदरी (रा. नि. व. ११)
लघुभण्टी-स्त्री., चिञ्चिटकः (वै. निघ.)
लघुमांस-पु., तित्तिरिपक्षी (त्रिका.)
लघुमूलक-न., ह्रस्वमूलकः, नेपालमूलकम् (भा.)
लघुलता-स्त्री., कारवेल्लकः । अनन्ता (वै. निघ.)
लघुलय-स्त्री., वीरणमूलम् (अम.) पीतोशीरम् (वै.-निघ. वा. व्या. चि. एलादितैले)
लघुशंख-पु., क्षुद्रशङ्खः (वै. निघ.)
लघुश्लेष्मातक-पु., शेलुवृक्षः (वै. निघ)
लघुसोमवल्ली-स्त्री., लघुसोमलता (म.) तानसेरासहि (वै. निघ.)
लघूदुम्बरिका-स्त्री., क्षुद्रोदुम्बरवृक्षः (रा. नि. ११)
लघ्वानन्दरस-पु., पाण्डूधिकारे रसः (र. सा. सं.)
लघ्वारग्वध-पु., आरग्वधवृक्षविशेषः
लङ्काधिपेश्वररस-पु., कुष्ठाधिकारे रसः (रस. र.)
लङ्का (ङ्को) पि (यि, रि) का-स्त्री., पृक्का (श. र.)
लङ्कास्थायी-पु., स्नुहीभेदः (श. च.)
लङ्केश्वररस-पु., कुष्ठाधिकारे रसः (रस. र.)
लङ्गित-न., अश्वस्य रोगभेदः (ज. द. ३२ अ.)
लङ्गूल-न., लाङ्गूलम् (उणा.)
लङ्गेष्ठालुक-न., रङ्गेष्ठालुः (त्रिका.)
लजकारिका-स्त्री., लज्जालुकालता (श. मा.)
लज्जका-स्त्री., वनकार्पासी (वै. निघ.)
लज्जरी-स्त्री., लज्जालुका (वै. निघ.)
लज्जिरी-स्त्री., लज्जालुका (रा. नि. व. ५)
लञ्ज-पु., पादशाखा, कच्छ (हे. च.)
लटपर्ण-न., त्वग् (रा. नि. व. १२)
लटषक-पु., प्रतुदपक्षिविशेषः (च. सू. २० अ.)
लट्व-पु., अश्वः (उणा.) स्त्री., (ट्वा) करञ्जभेदः (त्रिका.) कुसुम्भवृक्षः (हे. च.) ग्राम्यचटकः (मे. चसू. ३७ अ.) भ्रमरः
लठ-न., विष्ठा
लड्डुक-पु., मिष्टान्नभेदः (श. च.)
लण्ड-(न., स्त्री., (ण्डा) । पुरीषः (भूरि प्र.) ।
लताजिह्व-पु., सर्पः (श. मा.)
लतातरु-पु., तालवृक्षः । निम्बूवृक्षः (श मा.) लताशालवृक्षः (त्रिका.)

लताद्रुम-पु., लताशालः (र. मा.)
लतापनस-पु., तरम्बुजलता (त्रिका.)
लतापर्णी-स्त्री., तालमूली । मधुरिका (वै. निघ.)
लतापृक्का-स्त्री., स्पृक्का (श. र.)
लताप्रतानिनी-स्त्री., शाखाप्रच्यवल्लता (अम.)
लताफल-न., पटोलः (बह्मवै. पु.)
लताबृहतिका-स्त्री., बृहतीलता (प. मु.)
लताभद्रा-स्त्री., भद्रालीलता (श. मा.)
लतामरुत्-स्त्री., स्पृक्का (श. र.)
लतामाधवी-स्त्री., माधवीलता (श. र.)
लतायष्टि (ष्टी)-स्त्री., मञ्जिष्ठा (श. मा.)
लतायावक-न., तरुप्रवालः (हारा.)
लतारसन-पु., सर्पः (हारा.)
लतालक-पु., गजः (त्रिका.)
लतावृक्ष-पु., शल्लकीवृक्षः (वै. निघ.)
लताशङ्कुतरु-पु., लताशालवृक्षः (त्रिका.)
लताशङ्ख-पु., शालवृक्षः (श. र.)
लताशिरीष-पु., वल्लीशिरीषः (प. मु.)
लतिका-स्त्री., यमकलता (व्याक.)
लत्तिका-स्त्री., ज्येष्ठा । गोधा (उणा.)
लपन-न., मुखम् (रा. नि. व. १८)
लम्फ-पु., उल्लम्फनम्
लम्वन-पु., कफः (श. च.)
लम्बिका-स्त्री., सूक्ष्मजिह्वा (रा. नि. व. १८)
लम्बित-न., मांसधातुः (वै. निघ.)
लबो (म्बौ) ष्ठ-पु., उष्ट्रः (रा. नि. व. १९)
ललज्जिह्व-पु., उष्ट्रः । कुक्कुरः (मे.) स्त्री. (ह्वा) महासमङ्गा (रा. नि. व. ४)
ललदम्बु-पु., पुष्पभेदः लिम्पाकः (जटा.) न., उदकविशेषः (वै. निघ. हिक्का. चि.)
ललाक-पु., शिश्नम् (श. च.)
ललाटरेखा-स्त्री., दीर्घजीवनसूचककपालस्थरेखा
ललाटास्थि-न., कपालास्थिद्वयम् (च. शा. ७ अ.)
ललाम-न., अश्वः । शृङ्गम् (चिन्हम्)
लवङ्गकन्दपत्रा-स्त्री., लघुतालीशपत्रम् (वै. नि. घ.)
लवङ्गतैल-न., लवङ्गोत्थतैलम्
लवङ्गलता-स्त्री., पुष्पवृक्षविशेषः (जयदेव)
लवङ्गादिचूर्ण-न., राजयक्ष्माधिकारे चूर्णौषधम् (रस. र.)
लवणख (खा) पु., लवणाकारः (हे. च.)
लवणत्रय-न., विट्सैन्धवरुचकानि (रा. नि. व. २२)
लवणनित्य-त्रि., नित्यं लवणरसास्वादनशीलः (च)
लवणमद-पु., लवणक्षारः (रा. नि. व. ६)
लवणव्यापत्-स्त्री., अश्वस्य अतिमात्रलवणभक्षणजन्यव्यापत् (ज. द. ६० अ.)
लवणारज-न., लोणारक्षारः (रा. नि. व. ६)
लवणी-स्त्री., आतृष्यफलजातीयफलवृक्षः
लवणोत्तमाद्यचूर्ण-न., अर्शोविनाशकं चूर्णम्
लवणोत्था-स्त्री., ह्रस्वज्योतिष्मतीलता (वै. निघ.)
लवणोद-पु., लवणसमुद्रः (अम.)
लव्नी-स्त्री., छेदनम् (अम.) ग्रीष्मजफलभेदः (श. च.)
लसा-स्त्री., हरिद्रा (हारा.) आम्रहरिद्रा (वै. निघ.)
लसान्द्र-पु., राजमाषः (र. मा.)
लाक्षातरु-पु., पलाशवृक्षः (श. मा.)
लाक्षापुष्पा-स्त्री., शतपत्री
लागजीर-(क)-पु., शङ्खजीरकम् (वै. निघ.)
लाङ्गलिक-पु., स्थावरविषभेदः (हे. च.)
लाङ्गली (इन्)-पु., नारिकेलवृक्षः (रा. नि. ११) सर्पः (श. च.)
लाङ्गलीशाक-पु., जलजशाकविशेषः (राज ३ प.)
लाङ्गु-पु., शिश्नम्
लाजभक्त-पु., खधिभक्तः (वै. निघ.)
लाञ्जल-न., धान्यम् (वै. निघ.)
लालसा-स्त्री., गर्भिणीदोहदः (हे. च.)
लालसीक-न., पिच्छिलम् (श. र.)
लालिक पु., महिषः (हे. च.)
लावणिकतैल-न., तैलविशेषः
लावु-(बू) (का)-पु., स्त्री., अलाबुः (श. र.)
लास-पु., यूषः (श. च.)
लासक-पु., मयूरः (मे.)
लासिका-स्त्री., सुखस्रावः
लास्फोटनी-स्त्री., आस्फोटनी । वेधनिका (अ. टी. रा.)
लाह्वा-स्त्री., पेचकः (वै. निघ.)
लिकोच (ठ) क-पु., अङ्कोटवृक्षः
लिक्षा (ख्या)-स्त्री., केशकीटभेदः (प. प्र.)
लिङ्गक-पु., कपित्थवृक्षः (श. च.)
लिङ्गरोग-पु , उपदंशः (भा.)
लिङ्गवर्द्धन-पु., कपित्थवृक्षः (श. च.)
लिङ्गवर्द्धिनी-स्त्री., अपामार्गवृक्षः (श. च.)
लिङ्गसम्भवा-स्त्री., लिङ्गिनीलता (रा. नि, व. ३)
लिङ्गलिका-स्त्री., क्षुद्रमूषकः (हारा.)

लिप्त-पु., विषलिप्तः (मे.)
लिम्पाक-पु., जम्बीरवृक्षविशेषः (राज. ३ प.)
लीका-स्त्री., ह्रस्वमूषिकमारी (वै. निघ.)
लुङ्गमांस-न., मातुलुङ्गमांसम् (वै निघ.)
लुङ्गाम्ल-न., मातुलुङ्गाम्लम् (र. सा. सं.)
लुङ्गुषः-पु., मातुलुङ्गवृक्षः (रमा.)
लुण्टक-पु., शाकविशेषः (श. च.)
लुण्ठन-न., लुठनम् (श. र.)
लुण्ठाक-पु., काकः (त्रिका.)
लुण्डिका-स्त्री., लोमादिगोलकः (भैष.)
लुब्धक-पु., चौरनामगन्धद्रव्यम् (वै. निघ.)
लुलाप (य) कान्ता-स्त्री., महिषी (रा. नि. व.)
लुषभ-पु., मत्तहस्ती
लूतिका-स्त्री., लूता (श. र.)
लून-त्रि., छिन्नम् (अम.)
लूनक-पु., पशुः
लूम-न., लाङ्गुलम् (अम.)
लूमविष-पु., पुच्छदंशकप्राणिमात्रम् वृश्चिकादिः (हे. च.)
लेख-पु., तालवृक्षः (प. मु.)
लेण्ड-न., लण्डा (भूरिप्र)
लेनीतक-पु., औत्तरापथिक पाषाणभेदः (सि. यो. च्छर्दि. चि.)
लेश-पु., स्वल्पः
लेहिन-पु., टंकणक्षारः (हे. च.)
लेह्य-न., अष्टविधान्नान्यतमान्नम् (रा. नि. व. २०) अमृतम् (श. मा.) (चि.) लेहनयोग्यः
लोकतुषार-पु., कर्पूरः (रा. नि. व. १२)
लोकस्कंद-पु., तमालवृक्षः (वै. निघ.)
लोकहिता-स्त्री., तुत्थाञ्जनम् । कुलत्था (रा. नि. व. ५)
लोचक-पु., नेत्रकनीनिका कज्जलम् । कदली । भ्रुवः शिथिलचर्म (मे.) मांसलड्डुकः । बदरीवृक्षः नीलवस्त्र निर्मितिः (त्रिका.) अहिनिर्मोकः (श.र.)
लोचकर्कट-पु., लोचमस्तकम् (अ. टी. स्वा.)
लोचनामय-पु., नेत्ररोगः (त्रिका.)
लोचमस्तक-पु., अजमोदा (भा.) मयूरशिखा (अम.)
लोचशिर-पु., अजमोदा (वै. निघ.)
लोचिका-स्त्री., लुचीति ख्यातं खाद्यद्रव्यम्
लोटा (टिका)-स्त्री., चुक्रा (वै. नि.)
लोणक-न., लवणम् (वै. निघ.)
लोणाम्ला-स्त्री., क्षुद्राम्लिका (रा. नि. व. ५)
लोणार-न., लवणक्षारः (रा. नि. व. ६)
लोणी-स्त्री., पत्रशाकभेदः (भा. पू. १ भ. शा. व.)
लोत (त्र)-पु., न., लवणम् नेत्रजलम् (त्रिका.) चिन्हम् (उणा.)
लोतनी-स्त्री., महाश्रावणिका
लोध्रपुष्पक-पु., शालिधान्यविशेषः (भा. पू. भ. धी. व)
लोध्रवल-न., तन्नामकं चक्रपाणिदत्तस्य कुलम् त्रि., (ली)- तत्कुलसम्भूतम् (च. द.)
लोध्रवृक्ष-पु., मधूकवृक्षः । रोध्रवृक्षः (वै. निघ.)
लोध्रादि-पु., पित्तज्वरघ्नकषायः (च. द. पि. ज्व. चि.)
लोपा (शि) कि-स्त्री., धूर्तशृगालिका (श. मा.)
लोपाशक-शृगालः (हारा.)
लोभन-न., मांसम् (वै. निघ.)
लोभ्य-पु., हरितालः (वै. निघ.) शिम्बीधान्यभेदः मुद्गः (हे. च.)
लोमकर्कटी-स्त्री., अजमोदा (वै. निघ.)
लोमकर्ण-पु., शशकः (हे. च.)
लोमघ्न-न., इन्द्रलुप्तरोगः त्रि., लोमपातनम् (निदा.)
लोमफल-न., भव्यफलम् (रा. नि. ब. ११)
लोमविष-पु., व्याघ्रादिः (हे. च.)
लोमशकाण्डा-स्त्री., कर्कटिका (रा. नि. व. ७)
लोमशपर्णिनी-स्त्री.. माषपर्णी (प. मु.)
लोमशमार्जार-पु., गन्धमार्जारः (रा. नि. व. १९)
लोमहृत्-पु., हरितालः (हे. च.)
लोमालिका-स्त्री., शृगालिका (त्रिका.)
लोलजिह्वा-स्त्री., महाबला (वै. निघ.)
लोलान्ध-पु., अपस्माररोगः (रा. नि. व. २०)
लोलिका-स्त्री., हंसीविशेषः । चाङ्गेरी (जटा.)
लोलिनी-स्त्री., नीलवुह्या
लोलिम्बराज-पु., वैद्यजीवनग्रन्थकारः
लोष्ट्रराज- पु., रौप्यम् (वै. निघ.)
लोहकण्टक-पु., मदनवृक्षः (श. च.)
लोहकर्ष (क)-पु., लौहचुम्बकम् (भा.)
लोहकान्त (क)-न., कान्तलौहम् (प. मु.) लौहचुम्बकम् (वै. निघ.)
लोहपञ्चक-न., स्वर्णरौप्यताम्रवङ्गशीषंच स्वर्णरौप्यताम्रत्रपुकान्तलौहंवा
लोहपत्रिका-स्त्री., शालिञ्चशाकः
लोहराज-न., रौप्यम्

लोहरुण्डक-पु., मदनवृक्षः (वै. निघ.)
लोहल-पु., अस्फुटभाषा (अम.)
लोहवर-न., स्वर्णम् (त्रिका.)
लोहविद् (ष्ठा)-पु., लोहमलः (वै. निघ.)
लोहशुद्धिद-पु., टङ्कणक्षारः (हे. च.)
लोहश्लेष्मण-पु., टङ्कणक्षारः (हे. च.)
लोहसार-पु., सारलौहम् (वै. निघ.)
लोहसिंहान (निका)-न., स्त्री., लोहकिट्टः (भा.)
लोहहृत्-पु., हरितालः (वै. निघ.)
लोहाख्य-न., अगुरुकाष्ठम् (र. मा.)
लोहि-न., शुक्लटङ्कणम् (रा. नि. व. ६)
लोहिका-स्त्री., लौहपात्रविशेषः (त्रिका.)
लोहितकन्द-पु., पलाण्डुः
लोहितकुस्तुम्बुरुधान्य-न., तुरवयावनालः
लोहितज-न., हरिचन्दनम्
लोहितपुष्पक-पु., दाडिमवृक्षः (भा.)
लोहितमृत्तिका-स्त्री., गैरिकमृत्तिका । रक्तमृत्तिका (प. मु.)
लोहितयष्टिका-स्त्री., मञ्जिष्ठा
लोहितलता-स्त्री., मञ्जिष्ठा (संग्रहः)
लोहितशिग्रु-पु., रक्तपुष्पशिग्रुः (वै. निघ.)
लोहितानन-पु., नकुलः (रा. नि. व. १९)
लोहिताभ-पु., रक्ताभमहाविषवृश्चिकविशेषः (सुकल्प)
लोहिताय(यस)-न., ताम्रम् (त्रिका.)
लोहित्याज-पु., तृणधान्यभेदः
लोही(इन्)-पु., रोहितकवृक्षः
लोहोच्छिष्ट-न., लोहकिट्टम् (वै. निघ.)
लोहोत्तम-न., स्वर्णम् (हे. च.)
लोहोत्थ-न., मण्डुरः (वै. निघ.)
लौहकान्तक-न., कान्तलौहम् (रा. नि. व. १३)
लौहकिट्ट-न., मण्डुरः (प. मु.)
लौहज-न., वर्तलौहः (रा. नि. व १३) मण्डुरः (र. मा.)
लौहदाह-पु., अश्वस्य वायुप्रकोपादौ दग्धलौहशलाकया दाहकरणम् (ज. द. १४ अ)
लौहपत्री-स्त्री., लौहचटका (सा. कौ.) लौहमारणम्
लौहपुरीष-न., लौहमलः । मण्डुरम्
लौहभाण्ड-पु., अश्मभालः (श. च.) (न.,) लौह निर्मितभाण्डम्
लौहभू-स्त्री., लौहपात्रविशेषः (श. च.)
लौहभेकीबीज-न., रसजारणबीजभेदः (र.स.चि.३ अ.)
लौहविशुद्धिद-पु., टङ्कणक्षारः (र. सा. सं. टङ्कणशुद्धिः)
लौहसार-पु., सारलौहः

व

व-पु., वायुः । बाहुः । व्याघ्रः । वस्त्रम् । शालूकः । (त्रि.) बलवान्
वंशकञ्ज-न., कृष्णागुरुकाष्ठम् (वै. निघ.)
वंशकफ-न., शाल्मलीतूलकम् । वंशतूलम् यद्वृक्षादेव वायुना नीतं नभसि उड्डीयते (हारा.)
वंशकार-पु., गन्धकः (वै. निघ.)
वंशकुटजा-स्त्री., कृष्णकुटजः (वै. निघ.)
वंशतैल-न., अरूंषिकारोगे तैलम् (रस. र.)
वंशत्वक्(च्)-स्त्री., वंशत्वग् तद्गुणः रजःस्रावकारि
वंशदूर्वा-स्त्री., कटुका । शतपर्वा, किंशुका (रा. नि. व. २३.)
वंशनेत्र-न., इक्षुमूलम्
वंशपत्र-पु., नलः (रा. नि. व. ७)
वंशपत्रिका-स्त्री., वेणुदलम्
वंशपुष्पा-स्त्री., सहदेवा (रा. नि. व. ४)
वंशपूरक-न., इक्षुमूलम् (रा. नि. व. १४)
वंशमूल-न., इक्षुमूलम् (रा. नि. व. १४)
वंशबीज-पु., वेणुयवः (रा. नि. व. १६)
वंशयव-पु., वेणुयवः (रा. नि. व. १६)
वंशवर्धिनी-स्त्री., वंशलोचना (वै. नि.)
वंशव्यजनवायु-पु., वंशकृततालवृन्तवायुः । गुणाः वंशव्यजनजोवायुः रूक्षोष्णोवातपित्तदः (राज. २ प,)
वंशशलाका-स्त्री., वीरणमूलम् । वंशनिर्मितशलाका (हे. च.)
वंशिक-पु., न., कृष्णेक्षुः (वै. निघ.) अगुरुकाष्ठम् (अम.) (स्त्री.,)(का)-पिप्पली (वै. नि.)
वंशी-स्त्री., वंशलोचना (वै. निघ. रभ. संग्रहणी. चि. जातीफलादिचूर्णे) वंशः । कर्षचतुष्टयम् । ८ तो. (रा. नि. ब. २१) त्रसरेणुमानम् - त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते (भा)
वंशोद्भवा-स्त्री., वंशरोचना (वै. निघ. र. पि. चि. वासाखण्डे)
वंश्य-न., वंशलोचनम् (वै. निघ. २ भ. क्षय. चि. सूर्यप्रभावव्याम्)
वक-पु., अगस्तिवृक्षः (रा. नि. व. १७)
वकचिञ्चिका-स्त्री. मत्स्यविशेषः (हारा.)

वकपुष्प-(ष्पा, ष्पी) (पु., स्त्री.,) अगस्तिवृक्षः (श. र.)
वकाची-स्त्री., वकचिञ्चिकामत्स्यः (हारा.)
वकु (कू) ल-पु., स्वनामरव्यातवृक्षः (रा. नि. व. १०)
वकुलपुष्प-न., बकुलकुसुमम् (अम.)
वकुला-स्त्री., कटुकी (रा. नि. व. ६)
वकुली-स्त्री., काकोली (श. च.)
वकुश-पु., पर्णमृगभेदः
वकेरुका-स्त्री., बलाका (मे.)
वकोट-पु., वकः (त्रिका)
वक्कम-पु., मद्यविशेषः (सु. सू. ४५ अ.)
वक्त्रकटुता-स्त्री., मुखस्य कटुता, मुखवैरस्यम् (मा. नि.)
वक्त्रखुर-पु., दन्तः (त्रिका.)
वक्त्रपट्ट-पु., अश्वस्य चणकभोजनपात्रम् (हे. च.)
वक्त्रभेदी-(इन्) पु., तिक्तरसः (हे. च.)
वक्त्रालु-पु., वाराहीकन्दः (वै. निघ.)
वक्रगुल्फ-पु., उष्ट्रः (वै. निघ.)
वक्रग्रीव-पु., उष्ट्रः (त्रिका.)
वक्रचुञ्चु-पु., शुकपक्षी
वक्रतुण्ड-पु., शुकपक्षी (श. र.)
वक्रदंष्ट्र-पु., शूकरः (वै. निघ.)
वक्रदन्ती-स्त्री., ह्रस्वदन्ती (वै. निघ.)
वक्रनक्र-पु., शुकपक्षी (मे.)
वक्रनासिक-पु., पेचकः (त्रिका.)
वक्रपुच्छ-पु., कुक्कुरः (त्रिका.)
वक्रपुष्पिका-स्त्रीं., लाङ्गलिका (वै. नि.घ.)
वक्रबालधि-पु., कुक्कुरः (हे. च.)
वक्रलाङ्गुल-पु., कुक्कुरः (हे. च.) त्रि., वक्रपुच्छयुक्तम्
वक्रवक्त्र-पु., शूकरः (श. र.)
वक्रशल्या-स्त्री., कुटुम्बिनीक्षुपः (रा. नि. व. ५) कटुतुम्बी । रक्तलाङ्गलिका (वै. निघ.)
वक्रा-स्त्री., कर्कटशृङ्गी (मद. व. ३) स्पृक्का (वै. निघ.)
वक्राग्र-न., कवाटवक्रवृक्षः (र. मा.)
वक्राङ्ग-पु., हंसः (हे. च.) त्रि. कुटिलाङ्गम्
वङ्कसेन-पु., अगस्तिवृक्षः (त्रिका.)
वङ्कि-पु., न., (क्रि)-पर्शुकम् । पार्श्वास्थि (उणा.)
वङ्किल-पु., कण्टकः (त्रिका.)
वङ्क्षण-पु., सक्थिसन्धिः (रा. नि. व १८)
वङ्क्षणानाह-पु., वङ्क्षणयोराकर्षणवत्पीडा (भा. म. ३ भ.)
वङ्गज-न., सिन्दूरः (र. मा.)
वङ्गन-पु., वार्ताकुवृक्षः
वङ्गमल-पु., न., शीषधातुः (वै. निघ.)
वङ्गशुल्वज-न., कांस्यधातुः (हे. च.)
वङ्गसदृश-न., यशदम् (वै. निघ.)
वङ्गसेन--(क)-पु., वकवृक्षः (त्रिका.)
वङ्गारि-पु., हरितालः (हे. च.)
वङ्गावलेह-पु., मेहे अवलेहः (रस. चि.)
वचण्डा (ण्डी)-स्त्री., शारिका (त्रिका.) वर्तिः (श. र.)
वचर-पु., कुक्कुटः (मे.)
वचाद्यघृत-न., गण्डमालाद्यधिकारे घृतम् (रस. र.)
वचोगृह (ग्रह)-न., पु., श्रवणेन्द्रियम् (वै. निघ.)
वज्रकाञ्जिक-न., प्रसूतिचिकित्साधिकारे औषधम् (रस. र.)
वज्रगोप-पु., इन्द्रगोपकीटः (वै. निघ.)
वज्रचञ्चु-पु., गृध्रपक्षी (वै. निघ.)
वज्रचर्म्मा (न्)-पु., गण्डकः (रा. नि. व. १९)
वज्रतुण्ड-पु., स्नुहीवृक्षः । गृध्रः (वै. निघ.) मशकः (रा. नि.व. १९)
वज्रदण्डक-पु., स्नुहीवृक्षः (वै. निघ.)
वज्रदन्त-पु., शूकरः (त्रिका.) मूषिकः (श. मा.) अस्थिसंहारः (र. मा.)
वज्रदशन-पु., उन्दूरः (हे. च.)
वज्रद्रु (म)-पु., स्नुहीवृक्षः (अम. । श. र.)
वज्रपाषाण-पु., दुग्धपाषाणम्, शिरगोला (वै. निघ.)
वज्रपुष्प-न., तिलपुष्पम् । शतपुष्पा (वै. निघ.)
वज्रभूमिरज-न-, वैक्रान्तमणिः (वै. निघ.)
वज्रभृङ्गी-स्त्री., मधुरतृणविशेषः (वै. निघ.)
वज्रमण्डूर-न., पाण्डुरोगे औषधम् (रस. र.)
वज्ररद-पु., शूकरः (त्रिका.)
वज्रलौहक-न., कान्तलौहम् (वै. निघ.)
वज्रवल्लरी-स्त्री., अस्थिसंहारलता (हारा.)
वज्रशल्य-पु., शल्लकीमृगः (रा. नि. व. १९)
वज्रशृङ्खलिका-स्त्री., वज्रास्थि (वमू. विखरा.)
वज्राख्य-न., दुग्धपाषाणः पु., सेहुण्डवृक्षः (सु.चि.६अ.)
वज्राङ्क-पु., सर्पः (रा. नी. व. १९) अस्थिसंहारः (भा.) स्त्री., (ङ्गी.) गवेधुका (श. च.)
वज्राभ-पु., शुक्लगोदन्तमणिः । दुग्धपाषाणः(रा.नि.व.१३)
वज्राभ-पु., न., अभ्रविशेषः । लक्षणं यथा-'यदञ्जननिभं क्षिप्तं न वह्नौ विकृतिं व्रजेत् । वज्रसंज्ञं हि तद्योज्यमभ्रं सर्वत्र नेतरत् (रस. चि. ४ अ.)

वज्रास्थि (शृंखला)–स्त्री., कोकिलाक्षक्षुपः (रा.नि.व.४)
वज्राहिका–स्त्री., कपिकच्छुः (वै. निघ.)
वज्राह्व–न., तगरपादुकम् (वै. निघ.)
वञ्च (ञ्चु) क–श्रृगालः (अम.)
वञ्चथ (थू)–पु., कोकिलपक्षी
वञ्जुलप्रिय–पु., वेतसवृक्षः (र. मा.)
वञ्जुला–स्त्री., बहुदुग्धा गौः (हे. च.)
वटकाकार–पु., पक्षिविशेषः । वटपक्षी (वै. निघ.)
वट(ठ) र–पु., कुक्कुटः (श. र.) वैद्यः (हे. च.)
वट (प्र) रोह–पु., वटाङ्कुरम् (वै. निघ. रभ. तृष्णा. चि. च. द.) बृहत्खदिरवटी
वटशुङ्गा–स्त्री., वटाङ्कुरम् (भा. क्षुद्ररो. चि.)
वटाग्रज–पु., वटशुङ्गा (रस. र. बालचि.)
वटि–स्त्री., वटकः (प. प्र. १ अ.) उपजिह्विका (हारा.)
वटिका–स्त्री., वटकः (प. प्र. १ ख.)
वटु (क)–पु., कुटन्नटवृक्षः । बालकः (श. र.)
वडा–स्त्री., पिष्टकविशेषः (श. च.)
वडिश(शी)–न., स्त्री., मत्स्यधारणयन्त्रम् (अम.) (श. र.) ऋषिविशेषः (च.)
वण्ट–पु., खर्वः (मे.)
वण्ठर–पु., नूतनतालाङ्कुरः । कुक्कुरलाङ्गुलम्
वण्ड–पु., षण्डपुरुषः । अनावृतमेढ्रम् (हे. च.) (त्रि.) लाङ्गुलादिरहितः
वतू–पु., नेत्ररोगः (उणा.)
वत्स–न., वक्षः (अम.) पुष्पकाशीषम् । (पु.) गोवत्सः । पुत्रः । वर्षः । (त्रिका.) इन्द्रयवः
वत्सकण्टक–पु., पर्पटकः
वत्सभक्षक–पु., ईहामृगः (वै. निघ.)
वत्सरान्तक–पु., फाल्गुनमासः (रा. नि. व. २१)
वत्सा–स्त्री., वसा (रा. नि. व. १८)
वत्साक्षी–स्त्री., गोडुम्बा (जटा.)
वत्सादन–पु., ईहामृगः । वृकः (रा. नि. व. १९)
वत्साह्व–(य)–पु., कुटजवृक्षः
वद्द्रु–पु., आस्यशाखोटवृक्षः (अत्रि.)
वदाम–न., वातामफलम् (रा. नि. व. ११)
वदाल–(क)– पु., मत्स्यविशेषः (त्रिका.)
वधक–पु., व्याधौ । मृत्युः (उणा.)
वधाङ्गक–न., विषम् (वै. निघ.)
वधिर–पु., भूस्तृण (त्रि.) श्रुतिशक्तिहीनः
वधूटशयन–न., वातायनम्
वनकचु–पु., कचुविशेषः
वनकणा–स्त्री., वनपिप्पली (वै. निघ.) जलपिप्पली
वनकण्डूल–पु., मधुरशूरणः (वै. निघ.)
वनकर्कटी–स्त्री., आरण्यकर्कटी (र. सा. सं.)
वनकर्कोट–न., अरण्यकर्कटिका (भैसा विषाधिकारे)
वनकर्णिका–स्त्री., सल्लकीवृक्षः (वै. निघ.)
वनकाक–पु., द्रोणकाकपक्षी
वनकुक्कुट–पु., वन्यताम्रचूडः (रा. नि. व. १९)
वनकुण्डली–(इन्)–पु., वनशूरणः (वै. निघ.)
वनकुलत्थिका–(त्थी)–स्त्री., अरण्यजातकुलत्थी
वनकुसुम्भ–पु., अरण्यजातकुसुम्भवृक्षः
वनकेन्द्राणी–स्त्री., श्वेतनिर्गुण्डी (वै. निघ.)
वनकोलि–स्त्री., वनजबदरीवृक्षः
वनगज–पु., वन्यकरी
वनगौ–स्त्री., अरण्यभवा गौः । गवयः (रा. नि. व. १९)
वनघोली–स्त्री., अरण्यजातघोलीशाकः
वनचटक–पु., अरण्यजातचटकपक्षी
वनचन्दन–न., अगुरुः । देवदारुः
वनचम्पक–पु., वनचम्पकवृक्षः (रा. नि. व. १०)
वनचिचिण्डा–स्त्री., अरण्यचिचिण्डा
वनच्छाग–पु., वानरः
वनजताम्रचूड–पु., वन्यकुक्कुटः
वनजवृत्तिका–स्त्री., ह्रस्वमेषशृङ्गी
वनजीर–पु., वनजातजीरकः, कटुजीरकः (रा. नि. ६)
वनतण्डुली–स्त्री., तण्डुलीयभेदः
वनतरु–पु., अर्जुनवृक्षः (वै. निघ.)
वनतिक्ता (क्तिका)–स्त्री., वनतिक्तिका, पाठा (र. मा.)
वनत्रपुष–(क)–पु., आरण्यत्रपुषम् । इन्द्रवारुणी (वै. निघ.)
वनद्रु–पु., चारवृक्षः (रा. नि. व. ११)
वनद्रुम–पु., अर्जुनवृक्षः, काष्ठागुरुः (वै. निघ.)
वनधेनु–पु., अरण्यभवा गौः (रा. नि. व. १९)
वनपलाण्डु–पु., म० -रानकांदा (रा. नि. व. ७)
वनपल्लव–पु., शोभाञ्जनवृक्षः (जटा.)
वनपिप्पली–स्त्री., वनोद्भवपिप्पली (रा. नि. व. ६)
वनपीत–पु., भूमिजगुग्गुलुः कणगुग्गुलुः (वै. निघ.)
वनपूतिका–स्त्री., आरण्यपूतिका
वनभद्रिका–स्त्री., भद्रबला (शब्दकल्पद्रुमः)
वनभुक्–पु., कोकिला (वै. नि.)
वनभूषणा–स्त्री., कोकिला (वै. निघ.)
वनमञ्जरी–स्त्री., वननिर्गुण्डी (वै. निघ.)

वनमक्षिका-स्त्री., क्षुद्रदंशः । दंशः (अम.)
वनमार्जार-पु., वनविडालः (वै. निघ.)
वनमाष-पु., माषपर्णी
वनमूर्धजा-स्त्री., कर्कटशृङ्गी (रा. नि. ब. ६)
वनयमानी-स्त्री., स्वनामख्यातह्रस्वक्षुपः (प. मु.)
वनर-पु., वानरः
वनराज-पु., अश्मन्तकवृक्षः (वै. निघ.) सिंहः
वनराट-पु., वटवृक्षः (वै. निघ.)
वनवल्लभा-स्त्री., निःश्रेणिकावृक्षः (रा. नि. व. ८)
वनवाताम-पु., वातामभेदः
वनवास-पु., मधूकवृक्षः (वै. निघ)
वनवासन -पु., खट्टासः (त्रिका.)
वनविडाल-पु., वनमार्जारः (वै. निघ.)
वनव्रीहि-पु., देवधान्यम्, नीवारः (हे. च.)
वनशिम्बिका-स्त्री., अरण्यशिम्बी (भैष. शिरोरो. चि. बृहद्दशमूलतैले)
वनशू (सू) करी-स्त्री., कपिकच्छुः (रा. नि. व. ३) वनवाराही (रा. नि. व. ७)
वनशू (सू)रण-पु., आरण्यशूरणः (रा. नि. व. ७)
वनशोभन-न., पद्मम् (श. च.)
वनश्वा (न्)-पु., गन्धमार्जारः । व्याघ्रः (मे.) शृगालः (त्रिका.)
वनषण्ढी-स्त्री., पद्मिनी (वै. निघ.)
वनसङ्कट-पु., मसूरः (श. च.)
वनसम्भव-न., कैवर्तमुस्तकः
वनसरोजिनी-स्त्री., वनकार्पासी (श. र.)
वनस्थ-पु., मृगः (श. च.)
वनस्नेहफला-स्त्री., ह्रस्वबृहती (वै. निघ.)
वनाखु (क)-पु., शशकः । खङ्गाशः । मुद्गः (त्रिका.)
वनाशज-पु., वन्यच्छागलः (हे .च.)
वनाट्ठु-पु., नीलमक्षिका (श. मा.)
वनादिदमन-पु., वन्यदमनकः
वनामल-पु., कृष्णपाकफलद्रुमः, करमर्दकः (श. मा.)
वनायु-पु., हरिणः (वै. निघ.)
वनायुज-पु., तद्देशीयोत्तमाश्वः (ज. द.)
वनारिष्टा-स्त्री., वनहरिद्रा (रा. नि. व. ७)
वनालक्त-न., गैरिकम् (वै. निघ.)
वनालिका-स्त्री., हस्तिशुण्डी (हारा.)
वनालुक-न., वनालुः
वनासय-पु., द्रोणकाकः
वनाहिर-पु., शूकरः (त्रिका.)

वनिता-स्त्री., प्रियङ्गु (र. सा. सं. पूर्णचन्द्ररसे) कस्तूरीमोदकः (च. द. यक्ष्म चि. चन्दनादितैले) नारी
वनितावल्लभा-स्त्री., प्रियङ्गुः (वै. निघ.)
वनेक्षुद्रा-स्त्री., करञ्जवृक्षः (प. मु.) पानीयामलकः (रमा.)
वनेभवा-स्त्री., शाकविशेषः (वै. निघ.)
वनेरुहा-स्त्री., त्रिपर्णीकन्दः (वै. निघ.)
वनेसर्ज-पु., असनवृक्षः (प. मु.)
वनोत्सव-पु., आम्रवृक्षः (वै. निघ.)
वन्दन-न., मुखम् (श. च. । वै. निघ.)
वन्दनी-स्त्री., गोरोचना (वै. निघ.)
वन्दाका (की)-स्त्री., वन्दा
वन्दारु-पु., वृन्दाकः (वै. निघ.)
वन्धफला-स्त्री., रक्तकार्पासी (वै. निघ.)
वन्धा-(स्त्री.,) गोरोचना (भा.) वन्दा (श. च.)
वन्यकर्कटी-स्त्री., वनजातकर्कटीभेदः
वन्यजा-स्त्री., वनोपोदकी (वै. निघ.)
वन्यदमन-पु., वनदमनक्षुपः (रा. नि. व. १०)
वन्यधान्य-न., नीवारः (प. मु.)
वन्यसहचरी-स्त्री., पीतझिण्टी (रा. नि. व. १०)
वन्योपोदकी-स्त्री., वनजोपोदकी (रा. नि. व. ७)
वपरु-पु., केशराजः (त्रिका.)
वपा-स्त्री., मेदोधातुः (रा. नि. व. १८)
वपावह-न., मेदस्थानरूपकोष्ठाङ्गम् (च. शा. ७ अ.)
वपुःस्रव-पु., शरीरस्थरसधातुः (रा. नि. व. १८)
वपुर्वीर्य-न., शुक्रधातुः (वै. निघ.)
वपुषा-स्त्री., हपुषा (भा.)
वपुष्मा-स्त्री., स्थलपद्मिनी (जटा.)
वप्र (विप्रक)-न., शीषधातुः (हे. च.)
वप्रा-स्त्री., मञ्जिष्ठा
वप्री-स्त्री., वल्मीकम् (हला.)
वभ्रु-पु., मण्डलीसर्पभेदः (सु. कल्प. ४अ.) वातपित्तोल्बणज्वरः (भा.)
वभ्रुधातु-पु., सुवर्णगैरिकम् (रा. नि. व. १३)
वम-(थु)-पु., वमिरोगः (रा. नि. व. २०) करिशुण्डाग्रशीकरम्
वमनकल्प-पु., वमनार्थं मदनादिनानायोगयोजनविधिः तत्र मदनकल्प एव शस्तः (सु. सू. ४३ अ.)
वमनीया-स्त्री., मक्षिका (रा. नि. व. १९)
वम्भ-पु., वंशः (श. र.)
वम्रीकूट-पु.' वल्मीकम्

वयःसंस्थापनी-स्त्री., ब्राह्मी (वै. निघ.)
वयस्या-स्त्री., आमलकी, गुडुची (भा. ४ भ. नैगमेय. चि.)
वयोवङ्ग-न., शीषधातुः (कश्चित् । रा. नि. व. ३)
वरकन्दा-स्त्री., क्षीरीशवृक्षः (प. मु.)
वरकोद्रव-पु., कोविदारवृक्षः (र. मा.)
वरकोल-न., राजवदरः
वरक्षक-पु., श्यामाकः (वै, निघ.)
वरचन्दन-न., कालीयचन्दनम् । देवदारुः (मे.)
वरटीवान्त-न., मधु
वरट्टिका-स्त्री. कुसुम्भवीजम्
वरणा-स्त्री., तुवरी (नकुल १३ अ.)
वरण्ड-(क)-पु., यौवनकण्टकम् (मे. श. र.)
वरण्डा-स्त्री., शारिका
वरण्डालु-पु., एरण्डवृक्षः । कन्दशाकविशेषः (त्रिका.)
वरत्करी-स्त्री., वेणुनामगन्धद्रव्यम् (श. च.)
वरत्रा-स्त्री., करिबन्धनरज्जुः (अ. टी. भ.)
वरदायिनी-स्त्री., सुवर्च्चला (वै. निघ.)
वरपर्णाख्य-पु., क्षीरकञ्चुकीवृक्षः (र. मा.)
वरफल-पु., नारिकेलवृक्षः
वरमुखी-स्त्री., रेणुका
वरम्बरा-स्त्री., पृश्निपर्णी (श. च.)
वरल-पु., वरटः (श. मा.)
वरलब्ध-पु , चम्पकवृक्षः (प. मु.) रक्तकाञ्चनः नागकेसरचम्पकः (त्रिका.)
वारवाण-पु.,जाङ्गलजीवविशेषः (अचि. २० अ.)
वरवाह्लीक-न., श्रेष्ठकुङ्कुमम् (अ. टी.)
वरवेल-पु., वीरतरुः । स चतुर्विधः श्वेतकृष्णनीलरक्तभेदेन (वै.निघ.)
वरशीत-न., त्वक् (वै. निघ.)
वरश्रेणी-स्त्री., हस्वमूर्वा (वै. निघ.)
वराङ्गक-न., त्वक् (अम.)
वराङ्गदल-न., प्रियङ्गुपत्रम् (च. चि. ३ अ.)
वराङ्गवल्कल-त्वक् (र. सा. सं. ज्वरान्तक. लौहे.)
वराटकविष-न., तन्नामकत्वक्सारनिर्यासविषम् (सु. कल्प. २ अ.)
वराटकरजा-(स)-पु., स्त्री., नागकेशरवृक्षः (श. मा.)
वराण-पु., वरुणवृक्षः (श. र.)
वरादन-न., राजादनफलम् (श. च.)
वरान्न-न., भर्जितधान्यद्विदलकृतश्रेष्ठान्नम्
वराभिध-पु., अम्लवेतसः (रा. नि. व. ६)
वराम्र-पु., करमर्दवृक्षः (र. मा.)
वरायु-(स)-न., पानीयाम्लकः
वरारक-न., हीरकः (हे. च.)
वरारोह-पु,, पक्षिविशेषः (वै. निघ.) अवरोहः (विश्व.) स्त्री. (हा)-कटी । नारी (हे. च.)
वरार्द्धक-न., भागैककुङ्कुमं भागैकचन्दनं भागैकह्रीवेरं वरार्द्धकमुच्यते (रा. नि. व. २२)
वराल(क)-न.,पु., लवङ्गम् (अष्टाङ्गसारसङ्ग्रहे) (वै. निघ. २ भ. व्या. चि.)
वराशि-(सि)पु., स्थूलवस्त्रम् (श. र. जटा. धरणी)
वरासन-न., ओड्रपुष्पम् (श. मा.)
वरासी-स्त्री., मलिनवस्त्रम् (श. मा.)
वराहक-पु., हीरकः । शिशुमारः (वै. नि.)
वराहकाली(इन्)-पु., सूर्यमणिपुष्पवृक्षः (हारा) (स्त्री) (ली)-आदित्यभक्ता (वै. निघ.)
वराहक्रान्ता-स्त्री., स्वनामख्यातक्षुपः (प. मु.) वाराहीकन्दः (अ. टी. भ.)
वराहदंष्ट्रा-स्त्री., क्षुद्ररोगविशेषः (मा. नि.)
वराहनामा(न्)-पु., वाराहीकन्दः (श. मा.) वराहक्रान्ता
वराहनिर्यूह-पु., वराहमांसरसः (च. सू. २अ.)
वराहपित्त-न., शूकरपित्तम् (सा. कौ.)
वराहपुट-न., औषधपाकार्थं पुटभेदः
वराहशिम्बी-स्त्री., शूकरभोज्यशिम्बी (चि. क. क. बन्ध्याप्रतीकारे.)
वराहाङ्गी-स्त्री., क्षुद्रदन्ती (वै. निघ.)
वरिवस्या-स्त्री., शुश्रूषा (अम.)
वरिशी-स्त्री., वडिशम् (श. र.)
वरिषा-स्त्री., वर्षर्तुः
वरिषाप्रिय-पु., चातकपक्षी (श. र.)
वरिष्ठ-न., ताम्रम् । (र. मा.) उशीरम् (वै. निघ.) मरिचम् (मे.) पु., नागरङ्गवृक्षः (रा. नि. व.११ तित्तिरपक्षी (मे.) स्त्री., (ष्ठा)-हरिद्रा (वै. निघ.) आदित्यभक्ता (रा. नि. व. ४.)
वरिहिष्ट-न., उशीरम् । बालकम् (सु. चि. १८ अ.)
वरिहिष्टमूल-न., उशीरमूलम् (सु. चि. १८ अ.)
वरुणग्रह-पु., तन्नामक अश्वस्य ग्रहविशेषः (ज.द.५७.)
वरूथ-न., मर्म्म (मे.)
वरोट-न., मरुबकपुष्पम् (श. मा.)
वरोत्पल-न., श्वेतरक्तपद्मम् (वै. निघ.)
वरोल-पु., वरटः । भृङ्गरोलः (त्रिका.)
वरौषधी-स्त्री., आदित्यभक्ता । ब्राम्हीशाकः (वै. निघ.)
वर्कणा-स्त्री., तरुणच्छागी (सु. चि. १ अ.)

वर्कर-पु., पशुजातीयतृणम् (अम.) छागः (त्रिका.) मेषशावकः (अ. टी. भ.)
वर्ग-पु., गणः (सु. कल्प. ५ अ.)
वर्गचर-पु., पाठीनमत्स्यः (वै. निघ.)
वर्च्च (स)-न., रूपम् । विष्ठा । तेजः (मे.)
वर्च्चक-पु., न., विष्ठा (अम.)
वर्ज-पु., कपर्द्दकः
वर्जन-न., मारणम् (हे. च.)
वर्णकण्ट-न., तुत्थम् (वै. निघ.)
वर्णकृत्-न., पीतवर्णचन्दनम् (वै. निघ.)
वर्णद-न., कालीयचन्दनम् (जटा.)
वर्णपुष्प (क)-पु., राजतरुणीपुष्पवृक्षः (म. रक्तकोरण्टा रा. नि. व. १०)
वर्णभू-स्त्री., स्थौणेयकः (वै. निघ.)
वर्णमातृका-स्त्री., वाग्देवता
वर्णमृत्तिका-स्त्री., मृत्तिकाविशेषः (रस चि ६ अ)
वर्णरे (ले)खा-स्त्री., खटिका (त्रिका.)
वर्णलेखिका-स्त्री., कठिनी (त्रिका.)
वर्णलोहक-न., राजपित्तलम् (वै. निघ.)
वर्णशाक-पु., न., गौरसुवर्णशाकः (वै. निघ.)
वर्णसि-पु., जलम् (उणा.)
वर्णा-स्त्री., आढकी (हे. च.)
वर्णार्ह-पु., हरितमुद्गः (रा. नि. व. १६)
वर्णि-न., स्वर्णम् (सिद्धान्तकौमुदी)
वर्णिका-स्त्री., कठिनी (हारा.)
वर्णोज्वल-न., हरितालः । गन्धकम्
वर्तकी-स्त्री., सप्तला (वै. निघ.)
वर्त्तनी-स्त्री., तर्कुपीठिका (त्रिका.) (पेषणे श. र.)
वर्त्ति (र्त्ती) क-पु., वन्यचटकः । बर्त्तिकपक्षी
वर्तिनी-स्त्री., पिष्टकविशेषः (च. चि. २ अ.) तित्तिर-प[क्ष]ी (वै. निघ.) वर्तकपक्षी (अम.)
वर्ती-स्त्री., वर्तिका (प. प्र. लेंपनचूर्णे) पु., (इन्) वनचटकः (वै. निघ.)
वर्तुलफल-न., कालिङ्गकफलम् (वै. निघ.)
वर्त्मकुन्द-पु., अश्वस्य नेत्ररोगभेदः (ज. द.)
वर्त्मनिमेष-पु., नेत्रवर्त्मगतरोगविशेषः (मा. नि.)
वर्त्ममाक्षिक-न., स्वर्णमाक्षिकम् (वै निघ.)
वर्त्मार्बुद-न., नेत्ररोगभेदः (सु. उ. ३ अ.)
वर्द्ध-न., शोषकम् (हे. च.)
वर्द्ध- (क) पु., ब्राह्मणयष्टिका (जटा. अम.)

वर्द्धमानपिप्पली-स्त्री., योगविशेषः (रस. र.)
वर्द्धमानसट्टक न., सट्टकभेदः (वै. निघ.)
वर्ध्र-न., चर्म (उणा. स्त्री) (ध्र्री)-चर्मरज्जुः (अम.)
वर्प-पु., रूपम् (उणा.)
वर्म-पु., पर्पटकः (भा. म. १ भ. ज्व. चि. विश्वादियोगे)
वर्मण-पु., नागरङ्गवृक्षः (त्रिका)
वर्म्मूष-पु., मत्स्यविशेषः (राज. ३ प.)
वर्य्या-स्त्री., भुजाढ़की (प. मु.) आढकी (रा. नि. व. १६) युवती । स्त्री
वर्व्वट-(टी)-पु., स्त्री., स्वनामख्यातकलायः
वर्व्वणा-स्त्री., नीलमक्षिका (अम.)
वर्व्वर-पु., मत्स्यविशेषः (रा. नि. व. १७) स्वनाम-ख्यातकण्टकवृक्षः
वर्व्वरक-पु., विन्ध्योत्तरप्रसिद्धे नदः । तत् जलं शोणजल-सहशगुणम् (रा. नि व. १४) न., वर्व्वरचन्दनम् । स्त्री., (का)-भार्गी (वै. निघ.)
वर्व्वरगन्ध-पु., श्वेतरक्तमिश्रचन्दनविशेषः (वै. निघ.)
वर्व्वरा-(री)-स्त्री., भार्गी कर्णस्फोटा (वै. निघ.) वनतुलसी (भा) शाकविशेषः । पुष्पविशेषः (मे.) मक्षिकाभेदः (श. र.)
वर्व्वराह्वय-न., वर्व्वरचन्दनम् (वै. निघ.)
वर्व्वरीक-पु., बोलः (वै. निघ.) भार्गी (उणा.) तुलसीभेदः (श. च. महाकाले । हे. च.)
वर्व्वरीगन्धा-स्त्री., कर्णस्फोटा । वनतुलसी (वै. निघ.)
वर्व्वरोत्थ न., वर्व्वरचन्दनम् (वै. निघ.)
वर्व्वा-स्त्री., वर्व्वरिका (श. च.)
वर्व्वूर(क)-पु., वव्वूलवृक्षः (रा. नि. व. ८)
वर्षकरी-स्त्री., झिण्टी (हे. च.)
वर्षकाली-स्त्री., जीरकः (वै. निघ.)
वर्षण-न., वर्षोपलम् (त्रिका.) वृष्टिः (श. र.)
वर्षपाकी(इन्)पु., आम्रातकवृक्षः (हे. च.)
वर्षप्रिय-पु., चातकपक्षी
वर्षवर-पु., नपुंसकः । षण्डः (अम.)
वर्षाघोष-पु., महाभेकः (रा. नि. व. १९)
वर्षाङ्गी-स्त्री., पुनर्नवा (श. र.)
वर्षाभूशाक-पु., पुनर्नवाशाकः (रा. निव. ७)
वर्षा[भ्]वी-स्त्री. । भेकपत्नी, पुनर्नवा
वर्षामद-पु., मयूरः (शब्दकल्प.)
वर्षाम्भःपारणव्रत-पु., चातकपक्षी
वर्षाल-पु., स्पृक्का (वै. निघ.)

वर्षालङ्कायिका–स्त्री., स्पृक्का (अ. टी. भ.)
वर्षावती–स्त्री., भूकीटविशेषः । भेकपत्री (अम.) पुनर्नवा (अमरमाला)
वर्षावसान–पु.,शरत्कालः (रा. नि. व, २१)
वर्षाह्वा–स्त्री., पुनर्नवा (च. द. शूल. चि.) राममण्डूरे
वर्षोपल–पु., मेघोद्भवशिला (अम.)
वर्ष्म–न., शरीरम् (रा. नि. व.१८) प्रमाणम् (अम.)
वर्ष्म(न)–न., शरीरम् (द्विरूपकोषः)
वर्ह–पु.,न., मयूरपुच्छम् (अम.) ग्रन्थिपर्णभेदः (भरत) पत्रम् (श. र.)
वर्हण–न., तगरपुष्पम् । पिण्डीतगरः (रा. नि. व. १०) पत्रम् (श. र.)
वर्हनेत्र–न., मयूरपुच्छचन्द्रकम् (वै. निघ.)
वर्हपुष्प–पु., शिरीषवृक्षः (रा. नि. व. ९) नीलझिण्टी (रा. नि. व. १०) ग्रन्थिपर्णः (वै. निघ.)
वर्हभार–पु., मयूरपुच्छम् (वै. निघ.)
वर्हि–पु., चित्रकवृक्षः (अम.) अग्निः (मे.) मयूरः (वै. निघ.) पु., न., (स)–दर्भः । कुशः (त्रिका.) ग्रन्थिपर्णः (श. र.)
वर्हिकुसुम–न., ग्रन्थिपर्णक्षुपः (श. र.)
वर्हिण–पु., मयूरः (अम.) न., तगरः । पिण्डीतगरः (वै. निघ.)
वर्ही (इन्)–पु., कुशतृणम् (प. मु.) मयूरः (अम.)
वल–न., व्यायामगम्यशक्तिः (सु. सू. १० अ.)
वलाक–पु., वकजातिः (भ.) स्त्री., (का) क्षुद्रबकपक्षी (च. सू. २७ अ.)
वलिग्रह–पु., अश्वस्य ग्रहविशेषः (ज. द. ५७ अ.)
वलित्रय–न., प्रवाहिणी संवरणी विसर्जनी चेति त्रिविध-गुदस्थवली (मा. नि. अर्श. चि.) विद्यात् गुद-वलित्रयम्
वलिर–पु., केकरः (अम.)
वलूक–न., पद्ममूलम् पु., पक्षिभेदः (उणा.)
वल्का–स्त्री., शुक्रपाषाणभेदः (रा. नि. व.५) तेजोवती (वै. निघ.)
वल्कली (इन्)–पु., श्वेतरोध्रवृक्षः (वै. निघ.)
वल्करोध्र–पु., पट्टिकारोध्रः (रा. नि. व. ६)
वल्कवान्–पु., मत्स्यः (त्रिका.)
वल्कील–पु., कण्टकः (श. र.)
वल्की (इन्)–पु., बिभीतकवृक्षः (वै. नि.)
वल्कुत–न., वल्कलम् (श. च.)
वल्गु–पु., छागः (मे.)
वल्गुक–न., चन्दनम् (शब्दकल्पे, अजयः)
वल्गुपत्र–पु., वनमुद्गः (श. च.)
वल्गुपोदकी–स्त्री., राजगिराशाकः (वै. निघ.)
वल्गुला(ली)–स्त्री., सोमराजी (रा. नि. व. २३) प्रतुदपक्षिविशेषः (रा. नि. व. १९ सु. सू. ४६ अ.)
वल्गुलिका–स्त्री., तैलपायिका
वल्भण–न., भक्षणम्
वल्मीकि–पु., वल्मीकम् (श. मा.)
वल्मीकूट–न., वल्मीकम् (हे. च.)
वल्य–पु., तार्क्ष्यः (न) त्वक् (रा. नि. व. ६) स्त्री (ल्या)–पातालगरुडीलता (त्रि.) बलकरः
वल्यावर्त–पु., मत्स्यभेदः
वल्लगुणपूग–न., कोङ्कणदेशीयपूगफलविशेषः (रा. नि. व. ११)
वल्लभ–पु., सुलक्षणाश्वः । कृष्णागुरुः । राजशिम्बी (भा. पू. १भ. धा. व.) वैद्यवल्लभनामग्रन्थकारः
वल्लभी–स्त्री., मेथिका
वल्लभेन्द्र–पु., वैद्यचिन्तिामणिग्रन्थकारः
वल्लव–पु., पाचकः (त्रिका.)
वल्लिजविष–न., पुष्पविषभेदः (सु. कल्प. २अ.)
वल्लिशाकटपोतिका–स्त्री., मूलपोतिका (रा. नि. व. ७)
वल्लि(ल्ली)शू(सू)रण-(णा)–पु., स्त्री., अत्यम्लपर्णी (रा. नि. व. ३)
वल्लीखदिर–पु.,आरुकनामखदिरभेदः (वै. निघ.)
वल्लीगड पु., मत्स्यविशेषः (राज ३प.)
वल्लीपञ्चमूल–न., लतापञ्चमूलम् ।विदारीसारिवारजनी-गुडूच्योऽजशृङ्गीचेति (सु. सू. ३८अ.)
वल्लीपलाशकन्द–स्त्री.. भूमिकूष्माण्डः (वै. निघ.)
वल्लर–पु., ऋषभकः (प. मु.) न., मञ्जरी । निर्जल-स्थानम् (हे. च.)
वल्लया–स्त्री., अश्वगन्धा (मद. व. १) धात्रीवृक्षः (हारा) प्रसारिणी (रा. नि. व. ५)
वल्वक–न., वास्तूकभेदः (प. मु.)
वल्वज–पु., उलपः (श. च. । अम.)
वल्वजा–स्त्री., तृणविशेषः
वव्बू (बो) ल–पु., वर्व्वुरवृक्षः (भा.)
वव्बूलनिर्यास–पु., वर्व्वुरवृक्षनिर्यासः
वशा–स्त्री., वन्ध्या करिणी (मे.)
वशाढ्यक–पु., शिशुमारः (श. र.)
वशा (सा) पायी (इन्)–पु., कुक्कुरः (श. मा.)
वशाक्षार–पु., क्षारः (र. मा.)

वशिका–स्त्री., अगुरुः (श. च.)
वशिजाता–स्त्री., पुत्रदात्रीलता (वै. निघ.)
वशिनी–स्त्री., शमिवृक्षः । वृन्दा (श. च.) लज्जालुका
वशीकरण–न., मणिमन्त्रौषधैरायत्तीकरणम्
वश्य–न., लवङ्गम् (श. च.)
वश्या–स्त्री., नीलापराजिता (मद. व. १) गोरोचन (वै. निघ.)
वषट्फल–न., कक्कोलः (रा. नि. व. १२)
वसनाह्वय–पु., तेजपत्रम्
वसन्तकुसुम–पु., वृक्षविशेषः' वसन्तकुसुमः शेलुशयितो द्विजकुत्सितः' (श. मा.)
वसन्तघोषी (इन्)–पु., कोकिलः (वै. निघ.)
वसन्ततिलक–पु., वाजीकरणाधिकारे रसः
वसन्तद्रु–पु., आम्रवृक्षः (त्रिका.)
वसन्तमण्डन–न., सिन्दूरः । रक्तपद्मम् (वै. नि.घ)
वसन्तललना–स्त्री., शुक्लयूथी (वै. नि. घ.)
वसन्तव्रत–पु., मसूरकः (वै. निघ.)
वसन्तार्त्त–पु., बिभीतकवृक्षः (वै. निघ.)
वसाढ्य–पु., शिशुमारः (त्रिका.)
वसारोह–न., छत्रिका (हारा.)
वसिर–न., सामुद्रलवणम् (धरणिः) गजपिप्पली (अ. टी. सु. सू. ३८ अ.)
वसी (इन्)–पु., जलनकुलम्
वसुक–न., वकपुष्पम् (त्रिका.)
वसुकोदर–न., तालिशपत्रम् (रा. नि. व. ६.)
वसुक्षार–पुं., सूतिकालवणम् (वै. नि. घ.)
वसुचारुक–न., स्वर्णम् (वै. नि. घ.)
वसुद्रुम–पु., उदुम्बरवृक्षः (वै. निघ.)
वसुधांशु–पु., पाण्डुलवणम्
वसुस्थिति–पु., निर्गुण्डीवृक्षः (वै. नि.)
वसुहट्ट–(क)–पु., वकवृक्षः (प. मु. श. मा.)
वसूत्तम–न., रौप्यम् (वै. निघ.)
वस्कयनीक्षीर–न., प्रवृद्धवत्सायाः क्षीरम् (सुचि. १ अ.)
वस्कराटिका–स्त्री., वृश्चिकः (हारा.)
वस्तक–न., कृत्रिमलवणम्
वस्तपथ–पु., छागदुग्धम्
वस्तमूत्र–न., छागमूत्रम्
वस्तान्त्री–स्त्री., छागलान्त्रीवृक्षः
वस्ताम्बु–न., छागीमूत्रम्
वस्तिमल–न., मूत्रम् (हे. च.)
वस्तिवात–पु., स्वनामख्यातवातव्याधिः
वस्तिशीर्ष–न., देहप्रत्यङ्गविशेषः (च. शा. ७. अ.)
वस्तिशूल–न., वस्तिवेदना (निदा.)
वस्तिशोधन–न., मदनफलम् । बस्तिशोधक द्रव्यमात्रम् (वै. निघ.) पु., मदनवृक्षः (रा. नि. व. ८)
वस्तूकी–स्त्री., श्वेतचिल्लीशाकः (रा. नि. व. ७)
वस्त्याशय–पु., मूत्राशयः
वस्त्रधारण–न., वस्त्रपरिधानम् (राज. २ प.)
वस्त्ररञ्जिनी–स्त्री., मञ्जिष्ठा (वै. निघ.)
वस्त्ररागधृत्–पु., नीलकाशीषम् (वै. निघ.)
वस्न–न., वसा (रा. नि. व. १८) चर्म (अ. ची. रा.) वसनम् (विश्व.)
वस्न (स्न) सा–स्त्री., वसा (रा. नि. व. १८) शरीरान्तःशिरादिः । स्नायुः (त्रिका. । अम.)
वह–पु., घोटकः त्रि., वृषस्कन्धः (अम.)
वहलगन्ध–न., सम्बरचन्दनम् (रा. नि. व. १२)
वहलचक्षु–पु., मेषशृङ्गी (प. मु.)
वहला–स्त्री., शताह्वा (रा. नि. व. ४) स्थूलैला (भा.) सीतोपलादिलेहे)
वहा–स्त्री., गन्धरास्ना (प. मु.)
वहिः कुटीचर–पु., कर्कटः (त्रिका)
वहिरङ्ग–पु., शरीरावयवः
वहिरिन्द्रिय–न., चक्षुःकर्णादिवाह्येन्द्रियेषु चक्षुःकर्णनासाजिह्वात्वक्च, वाक्–पाणिपायुपादोपस्थ श्च
वहुलवहुरस–पु., इक्षुः (वा. सू. १५ अ.)
वहेडुक–पु., विभीतकवृक्षः (रा. नि. व. ११)
वह्निकरी–स्त्री., धातकीवृक्षः (श. र.)
वह्निगन्ध–पु., रालः (श. र.)
वह्निगर्भ–पु., वंशः (श. र.)
वह्निगर्भा–स्त्री., शमीवृक्षः (श. च.)
वह्निचक्रा–स्त्री., कलिकारीवृक्षः
वह्निजिह्वा–स्त्री., लाङ्गलिका (र. मा.)
वह्निदग्ध–न., अग्निदग्धरोगः (निदा.)
वह्निदीपक–पु., कुसुम्भवृक्षः (श. र.)
वह्निनामा (न्)–पु., अजमोदा (रा. नि. व. ६)
वह्निनिर्मथना–स्त्री., अग्निमन्थवृक्षः (वै. निघ.)
वह्निनी–स्त्री., जटामांसी (र. मा.)
वह्निभूतिक–न., रौप्यम् (वै. निघ.)
वह्निभाग्य–न., घृतम् (श. च.)
वह्निमारक–न., जलम् (श. च.)

वह्निरुचि–स्त्री., महाज्योतिष्मतीलता (वै. निघ.)
वह्निवक्त्रा–स्त्री., लाङ्गलिका (भा.)
वह्निवर्ण–न., रक्तोत्पलम् (श. च.)
वह्निवल्लभ–पु., सर्जरसः, धूनकः (त्रिका.)
वह्निशिखर–पु., लोचमस्तकम् । कुङ्कुमम् । रुद्रजटा (श. र.)
वह्निसंज्ञक–पु., चित्रकवृक्षः (अम.)
वह्निसख–पु., जीरकवृक्षः (रा. नि. व. ६) वायुः
वह्निसम्भूत–न., स्वर्णम् (वै. निघ.)
वा (र)–न., जलम् (अम.)
वाःकिटि–पु., शिशुमारः (व्याक.)
वाकुचिका–स्त्री., वाकुची (वै. निघ.)
वाकुल–न., बकुलफलम् (राज.)
वाका–स्त्री., प्रतुदपक्षिविशेषः (च. सू. २७ अ.)
वाक्शल्या–स्त्री., कुटुम्बिनीक्षुपः (वै. निघ.)
वागर–पु., वृकः (हे. च.)
वागुजारल–पु., } **वागुञ्जाल**–पु., } नादेयमत्स्यभेदः (वम्.) वागूस-मत्स्यः (सु. सू. ४६ अ.)
वागुजी–स्त्री., सोमराजी (प. मु. । र. सा. सं.) (महामृत्युञ्जयरसे)
वागुण–पु., कर्मरङ्गवृक्षः (श. मा.) (न.) कर्मरङ्गः
वागु(ग्गु)लिक–त्रि., राज्ञां ताम्बूलदाता (हारा.)
वागुश–पु., वागुञ्जालमत्स्यः (वै. निघ.)
वाग्गुद–पु., पक्षिविशेषः (त्रिका.)
वाग्गुलि–पु., ताम्बुली (हारा.)
वाग्दल–न., ओष्ठाधरः (त्रिका.)
वाग्विलासी(इन्)–पु., कपोतः (वै. निघ.)
वाचन(क)–न., प्रहेणकाख्यापिष्टकभेदः
वाचस्पतिवल्लभ–पु., पुष्परागमणिः (भा)
वाज–न., घृतम् । अन्नम् । जलम् । शुक्रम् (भैष.) (पु.,) पक्षती (मे.)
वाजशल–पु., पट्टशाकः (श. मा.)
वाजिखुरा–स्त्री., कृष्णापराजिता (वै. निघ.)
वाजिदन्त–(क)–पु., स्त्री., वासकवृक्षः (प. मु.)
वाजिनामा–स्त्री., अश्वगन्धा (वै. निघ.)
वाजिपुत्री–स्त्री., सल्लकीवृक्षः (वै. निघ.)
वाजिपृष्ठ–पु., अम्लानवृक्षः (श. च.)
वाजिप्रिय–(या)–पु., स्त्री., यवः, भूमिकुष्माण्डः (वै. निघ.)
वाजिभक्ष्य–पु., चणकः (रा. नि. व. १६) मुद्गः (वै. निघ.)
वाजिभोजन–पु., मुद्गवृक्षः (रा. नि. व. १६)
वाजिमन्थ–पु., चणकवृक्षः । मुद्गवृक्षः (वै. निघ.)
वाजिमान्(त्)–पु., पटोलः
वाजीकरी–स्त्री., अश्वगन्धा (मद. व. १)
वाटीदीर्घ(इन्)–पु., इत्कटक्षुपः (र. मा.)
वाट्यक–न., भृष्टयवः (श. च.)
वाट्यपुष्प–न., चन्दनम् । कुङ्कुमम् (वै. निघ.)
वाट्यमण्ड–पु., निस्तुषदरदलितयवः (राज. ३ प.)
वाट्याल–पु., वाट्यालकः (श. र.)
वाट्यालक–पु., पीतपुष्पबला (भा.) बला (र. मा.च. द. वा. ब्या. चि.)
वाट्याल (लि) का–स्त्री., लघुवाट्यालकः । महाबला (वै. निघ.)
वाट्याला (ली)–स्त्री., लघुवाट्यालकः (श. र.) महाबला (वै. निघ.)
वाट्याह्व–न., पुष्करमूलम् (वै. निघ.)
वाठ–पु., मदनफलवृक्षः
वाडवाग्निरस–पु., स्थौल्याधिकारे रसः (रस. र.)
वातक–पु., अशनपर्णीवृक्षः, गोकर्णी (अम.)
वातकफज्वर–पु., वायुश्लेष्मजन्यज्वरः (मा. नि.)
वातकर्म (न्)–न., अपानवायुनिःसरणम् । पर्दनम् (बराहपु.)
वातकास–पु., वायुजन्यकासरोगः
वातकी–स्त्री., शेफालिकावृक्षः (रा. नि. व. ४ पु.) (न्)–वातरोगी (अम.)
वातकुम्भ–पु., करिगण्डाधोभागः
वातकेतु–पु., धूलिः (त्रिका.)
वातगण्ड–पु., वातजगलगण्डरोगः (निदा.)
वातगुल्म–पु., वातुलः (त्रिका.) वायुजन्यगुल्मरोगः (निदा.)
वातघ्निनी–स्त्री., वार्ताकी (सु.भद्रदार्वादिगणः)
वातचटक–पु., तित्तिरः
वातज–त्रि., वातिकः (रा. नि. व. २०)
वातनाडी–स्त्री., दन्तमूलगतरोगः (मा. नि.)
वातपाण्डु–पु., वायुजन्यपाण्डुः
वातपित्तघ्न–पु., वातपित्तनाशकं गुरुपाकद्रव्यमात्रम् (सु. सू. ४१ अ.)
वातपित्तजशूल–न., वातपित्तजनितशूलरोगः
वातपित्तज्वर–पु., वातपित्तप्रधानः ज्वरः
वातप्रमी–पु., द्रुतगामिहरिणः (अम.) घोटकः नकुलः (उणा)

वातप्रशमनी–स्त्री., आरुकम् (वै. निघ)
वातफुल्लान्त्र–न., वातरोगः । उदराध्मानम् । फुस्फुसः (भूरिप्र)
वातमृग–पु., द्रुतगामिहरिणः (जटा.)
वातरक्तघ्न–पु., कुकुरद्रुमः (श. च.)
वातरक्तान्तकरस–पु., वातरक्ताधिकारे रसः (रस. र.)
वातरक्तारि–पु., गुडूची (श. च.)
वातरङ्ग–पु., अश्वत्थवृक्षः (श. र. त्रिका.)
वातरायण–पु., सरलवृक्षः (श. र.) करपात्रम् काण्डम् । उन्मत्तः (मे.)
वातरोहिणी–स्त्री., गलरोगभेदः (सु. नि. १६ अ.)
वातविसर्प–पु., वायुजन्यविसर्पः (मा. नि.)
वातवैरी–पु., वातादवृक्षः (भा.) रक्तैरण्डः (वै. निघ)
वातशीर्ष–न., बस्तिस्थानम् । स्त्रियो गर्भस्थानम् (रा. नि. व. १८)
वातस्तम्भनिका–स्त्री., चिञ्चा (वै. निघ.)
वातहर–पु., वातनाशकः
वातहरवर्ग–पु., वातघ्नद्रव्यगणः (रा. नि. व. ९)
वाताट–पु., जाङ्गलमृगविशेषः । वातमृगः (श. र.)
वातातिसार–पु.,वायुजन्यातिसारः (निदा.)
वाताद(म)पु., वातामवृक्षः
वाताद(म)तैल–न., वातामफललेहः
वाताभिष्यन्द–पु., सर्वगताक्षिरोगभेदः (वा. उ. १५अ)
वातामोदा–स्त्री., कस्तूरी (श. मा.)
वातायु–पु., हरिणः । वातमृगः (अम.)
वातारिगुग्गुलु–पु.. वातव्याधौ औषधम् (रस. र.)
वातारितण्डुला–स्त्री., विडङ्गः (रा. नि. व. ६)
वातासह–पु., वातुलः (श. र.)
वातास्र–न., वातरक्तम् (निदा.)
वातिकप्रिय–पु., अम्लवेतसः (वै. निघ.)
वातिकरक्तपित्त–न., वायुजन्यरक्तपित्तम्
वातिगम–पु., वार्ताकुवृक्षः (श. र.)
वातिङ्गन–पु., वार्ताकुवृक्षः (र. मा.)
वातीक–पु., पक्षिविशेषः । अयं विष्किरो लघुः शीतमधुरकषायश्च (सु. सू. ४६अ.)
वातीय–न., काञ्जिकम् (श. च.)
वातु(तू)ल–पु., कङ्गुनीनामतृणधान्यम् (रा. नि. व. ६)
वातुलि–पु., तरुतूलिका (हारा.)
वातूक–पु., मत्स्यविशेषः (रा. नि. व. १७)
वातोना–स्त्री., गोजिह्वा

वातोल्वण–त्रि., वाताधिकः
वात्सीपुत्र–पु., नापितः (त्रिका)
वादर–न., कार्पासजवस्त्रादिः (स्त्री.,)(रा) कार्पासी (श. र.)
वादराङ्ग–पु., अश्वत्थवृक्षः
वादल–न., मधुयष्टिका (श. च.)
वादलीय–पु., रन्ध्रवंशः (रा. नि. व. ७)
वादाम–न., स्वनामख्यातफलम् (राज.)
वादाल–पु., मत्स्यविशेषः (हे. च.)
वादिर–न., शृगालकोली (श. च.)
वादुलि–पु., चर्मचटी (च. द.)
वाद्यपुष्पिका–स्त्री., अतिबला
वाधन–त्रि., वाधाजनकः । सद्यःप्राणहरः (च. चि. १ अ.)
वाधपुष्पी–स्त्री., प्रियङ्गुः (ज. द.)
वाधा–स्त्री., भङ्गवत्पीडा (मा. नि.)
वाधिर्य–न., वातव्याधिविशेषः
वान–पु., शुष्कम् (न.,) शुष्कफलम् (मे.) गोदुग्धजतवक्षीरम् (रा.नि.व६)
वानरीबीज–न., शुकशिम्बीवीजम् (सा. कौ. शतावरीमोदके)
वानल–कृष्णवर्वरकः (श. च.)
वाना–स्त्री., वर्त्तिकपक्षी (जटा.)
वीनी (ने) य–न., कैवर्तमुस्तकः (अम.)
वानीरक–पु., मुञ्जतृणम् (रा. नि. व. ८)
वान्तारि–पु., स्त्री., भार्गी
वान्ति–स्त्री., छर्दिः (र. मा.)
वान्तिका (दा)–स्त्री. कटुकी (श, च.।वै. निघ.)
वान्तिकृत्–पु., मदनवृक्षः
वान्तिशोधनी–स्त्री. जीरकः (वै. निघ)
वाप (प्र) वोल–न., मरकतमणिः
वापित–न., अरोपितधान्यम्
वापीह–पु., चातकपक्षी (त्रिका.)
वाप्यक्षीर–न., सामुद्रलवणम् (रा. नि. व. ६)
वाभट–पु., अष्टाङ्गहृदयेतिख्यातवैद्यकसंहिताप्रणेता शास्त्रदर्पणनिघण्टुकारः
वाम–न., वास्तूकशाकः (जटा.) पु., पयोधरः सव्यम् (मे.) स्त्री., मा., कृष्णचटका (वै. निघ.) नारी
वामदृक् (श्)–स्त्री., नारी
वामलूर–पु., वल्मीकम् (अम.)
वामसंज्ञ–पु., कर्पूरभेदः (वै. निघ)

वामस्कन्ध-पु., शूकरः (वै. निघ.)
वामाङ्घ्रिघातन-पु., अशोकवृक्षः
वामापीडन-पु., अशोकवृक्षः
वामावर्तफल-स्त्री., ऋद्धि (वै. निघ)
वायन-न., पिष्टान्नविशेषः (त्रिका.)
वायसजङ्घा-स्त्री., काकजङ्घा (वै. निघ.) (२ भ. जीर्णज्व चि.)
वायसाराति-पु., पेचकः (अम.)
वायसीवल्ली-स्त्री., करञ्जवल्ली (वै. नि.)
वायुकेतु-पु., धूलिः (हारा.)
वायुगण्ड-पु., अजीर्णम् (त्रिका.)
वायुगुल्म-पु., वायुदोषजन्यगुल्मरोगः (मा. नि.)
वायुफल-न., करका (मे.)
वायुभक्ष्य-पु., सर्पः (रा. नि. व. १७)
वायुवाह-पु., धूमः (हेच.)
वायुवाहिनी-स्त्री., वातसञ्चारिणीशिरा (सु.)
वायुव्यवस्था-स्त्री., ऋतुविशेषे वायोरवस्था यथा वसन्ते दक्षिणः वर्षायां पश्चिमः, शरद्युत्तरः, हेमन्ते शिशिरे च पूर्व इति
वायुष-पु., मत्स्यविशेषः (राज. ३ प.)
वार-न., जलम् । पत्रम् । मदिरापात्रम् (हे. च.) (पु.) कुञ्जकवृक्षः (त्रिका.)
वारक-न., ह्रीवेरम् । कष्टस्थानम् (हारा.)
वारकीर-पु., जलौका (मे.)
वारङ्क-पु., पक्षी (त्रिका.)
वारटा-स्त्री., हंसी (हे. च.)
वारणकणा-स्त्री., गजपिप्पली (वै. निघ.)
वारणपिप्पली-स्त्री., गजपिप्पली (वै. निघ. २ भ. चातुज्व, दार्व्यादिः । भैष शोथचि. त्रिकट्वादिलौहे च. द. कुब्जप्रसारणीतैले.)
वारणवल्लभा-स्त्री., कदलीवृक्षः (त्रिका.)
वारणवुषा(सा)-स्त्री., कदलीवृक्षः (अम.)
वारला-स्त्री., वराटः (हे. च.) कदलीवृक्षः (भा.) हंसी (हे. च.)
वारलीक-पु.. वल्वजातृणम् (श. र.)
वारवु(बु)षा-स्त्री., कदलीवृक्षः (श. र.)
वारष-पु., मत्स्यविशेषः (वै. निघ.)
वारा-स्त्री., काकमाची (रा. नि. व. ४)
वारासन-न., } भाण्डभेदः (त्रिका.)
वारसदन-न., }

वाराहक-पु., प्राणहरकीटभेदः (सु. कल्प ८अ.)
वाराहदशनाह्वय-पु., शूकरदंष्ट्रकनामक्षुद्ररोगः (भा.- म. ४भ.)
वाराहपत्री-स्त्री., अश्वगन्धा (रा. नि. व. ४)
वाराहपुटभावना-स्त्री., अष्टपल (करीष)कृतभावना (वै. निघ.)
वाराहाङ्गी-स्त्री., दन्तीवृक्षः (भा.)
वारिकण्टक-पु., शृङ्गाटकः (त्रिका.)
वारिकफ-पु., समुद्रफेनः (वै. निघ.)
वारिकर्णिका-स्त्री., कुम्भिका (श. र.)
वारिकर्पूर-पु., इल्लीषमत्स्यः (त्रिका.)
वारिकुब्ज-(क)-पु., श्रृङ्गाटकः (श. र.)
वारिकृमि-पु., जलौका
वारिचामर-न.. शैवालम् (त्रिका.)
वारित्रा-स्त्री., जलत्राणा (त्रिका.)
वारिद-न., ह्रीवेरम् (श. र. च. द. कास. चि.)
वारिद-पु., मुस्ता (रा. नि. वा. ६ भा. म. वाजी. रतिवल्लभपूगपाके) मेघः (मे.)
वारिधर-पु., भद्रमुस्ता (वै. नि.घ)
वारिपर्णी-स्त्री., शैवालम्, कुम्भिका (राज.)
वारिपालिका-स्त्री., आकाशमूलिका (श. मा.)
वारिप्रवाह-पु., वारिनिर्झरः (श. मा.)
वारिप्रश्नी-स्त्री., वारिपर्णी (श. मा.)
वारिप्रसादन-न., कतकफलम् (वै. निघ.)
वारिबदर-(रा)-स्त्री., प्राचीनामलकः (त्रिका.)
वारिबालक-न., ह्रीवेरम् (हारा.)
वारिब्राम्ही-स्त्री., जलब्राम्हीक्षुपः (वै. निघ.)
वारिभक्तवटिका-स्त्री., अजीर्णाधिकारे वटी । (रस. र)
वारिमान-न., पाचनादौ जलदानपरिमाणम् । (प.प्र. १अ)
वारिमूली-स्त्री., कुम्भिका वारिपर्णी (श. र.)
वारिवदर-न., करमर्दकः (हिं-करोदा. जठा.)
वारिवल्लभा-स्त्री.,विदारी (रा. नि. व. ७)
वारिवल्ली-स्त्री., कारवल्ली (मद.)
वारिशिरीषिका-स्त्री., जलशिरीषः (वै. निघ.)
वारिशुक्ति-स्त्री., जलशुक्तिः (वै. निघ.)
वारुज-पु., गौरसुवर्णशाकः (वै. निघ.)
वारुणात्मजा-स्त्री-, मद्यम् (वै. निघ.)
वारुणीयन्त्र-न., मद्यसाधनार्थं यन्त्रभेदः
वारुणीरस-न., मद्यम्
वारुण्ड-पु., कर्णगूथः । नेत्रमलः (मे.)
वारूषक-पु., मत्स्यविशेषः (रा. व. १७)

वारेन्द्रपत्र—न., सुगन्धवर्गीयपत्रविशेषः
वार्क्षि—पु., ऋषिविशेषः (च)
वार्च्च—पु., हंसः (व्याक.)
वार्त्त—न., आरोग्यम् (रा. नि. व. २०)
वार्त्तक—पु., वार्त्ताकी (मे) वर्त्तक पक्षी (भा.)
वार्त्ती(इन्)—त्रि., निरामयः (रा. नि. व. २०)
वार्द्दर—न., काकचिञ्चा (मे) गुञ्जा, दक्षिणावर्तशंखः (मे) आम्रबीजम्। जलम् (विश्व) भारतीपक्षी
वार्द्दल—न., दुर्दिनम् (मे)
वार्द्धक(क्य)—पु., वृध्दावस्था (मे.)
वार्द्धिकरा—स्त्री., गुडूची (रा. नि. व. ३)
वार्द्धिफेन—न., समुद्रफेनः
वार्द्धिभव—न., दक्षिणावर्तशङ्खः, आम्रबीजम्। जलम् द्रोणीलवणम् (रा. नि. व. ६)
वार्द्धिवृक्ष—पु., पिप्पली (वै. निघ.)
वार्द्धिसम्भव—न., द्रोणीलवणम् (वै. निघ.) आम्रबीजम्
वार्द्धेय—न., द्रोणीलवणम् (रा. नि. व. ७)
वार्ध्रीणस—पु., गण्डकः। नीलग्रीवरक्तशीर्ष पक्षिविशेषः (का पुराणम्.)
वार्भट—पु., कुम्भीरः (त्रिका) शिशुमारः (वै. निघ.)
वार्युद्भव—न., कमलम् (धनञ्जयः)
वार्य्यौक—पु., जलौका (सु. कल्प. ५ अ.)
वार्व्वाणा—स्त्री., नीलमक्षिका (श. र.)
वार्षिला—स्त्री., करका (श. च.)
वार्हत—न., वृहतीफलम् (अम. वासु. १५ अ.) क्षुद्र-वार्ताकीफलम् (अम.)
वार्लधिप्रिय—पु., चमरीमृगः (रा. नि. व. १९)
वाल्कली—स्त्री., मदिरा। गौडीमद्यम्
वावय—पु., तुलसीभेदः (श. र.)
वावरी—स्त्री., वर्बूरवृक्षः (भैष. मृतसञ्जीवनीसुरा)
वावल—पु., वब्बूलवृक्षः
वाशा(शिका)—स्त्री., वासकवृक्षः (श. र.)
वाशिर—पु., अपामार्गवृक्षः
वाशुरा—स्त्री., रात्रिः (उणा)
वाष्प—पु., अश्रु (अम.) उष्मा (मे.)
वासका—स्त्री., स्वनामप्रसिद्धपुष्पशाकवृक्षः
वासगृह—न., मध्यभवनम् (अम.) वासभवनम्
वासत—पु., गर्दभः (श. र.)
वासतेयी—स्त्री., रात्रिः (त्रिका)
वासपुष्पा—स्त्री., चन्द्रशूरः (भा.)
वासयोग—पु., चूर्णम् (अम.)
वासर—पु., दिवसः (अम.)
वासाकुष्माण्डखण्ड—पु., रक्तपित्तकासे औषधम्
वासावासिका—स्त्री., वासकवृक्षः
वासास्त्रवा—स्त्री., ह्रस्वमूर्वा (वै. निघ.)
वासि—पु., कुठारभेदः (उणा.)
वासिका—स्त्री., वासकवृक्षः (श. र.)
वासिकार—न., शुद्धशूल्यमांसम्
वासिनी—स्त्री., शुक्लझिण्टी
वासिष्ट—न., रुधिरम् (हे. च.)
वासिष्ठलेह—पु., कासाधिकारे औषधम् (वा. चि. ३ अ)
वासिष्ठी—स्त्री., वासिष्ठकृतवैद्यकम्
वासी—स्त्री., तक्षणी (वै. निघ. त्रिका.)
वासुकी—स्त्री., बिल्वघृक्षः (वै. निघ.)
वासुदेवप्रियङ्करी—स्त्री., शतावरी (रा. नि. व. ४)
वास्तुकशाकट—न., वास्तुकशाकक्षेत्रम् (रा.नि. व. २)
वास्तुकाकारा—स्त्री., पट्टशाकः (वै. निघ.)
वास्तुकालिङ्ग—पु., तरम्बुजलता (प. मु.)
वास्तुपुष्पा—स्त्री., चन्द्रशूरः (भा.)
वास्तुरुजा—स्त्री., स्फोटपिडकाधिष्ठानवेदना (भा. म. ४. भ.)
वास्तवस्तूक—न., वास्तुशाकः (रा. नि. व. १४)
वास्प—पु., लौहः, उष्मा (कश्चित्) न., नेत्रजलम्
वास्पसेक—पु., रोदनम् (भा. म. ४ भ. नासारोग)
वास्पस्वेद—पु., गुल्मे स्वेदविशेषः (रस. र.)
वास्पेय—पु., नागकेशरवृक्षः (र. मा.)
वाहद्विषन्—पु., महिषः (प मु.)
वाहश्रेष्ठ—पु, घोटकः (रा. नि. व. ११)
वाहस—पु., सुनिषण्णकशाकः (मे.)
वाहित्य—न., करिगण्डाधोभागः (अम.)
वाहुवार—पु., श्लेष्मान्तकवृक्षः (रा. नि. व. ११)
वाह्यकी—स्त्री., अग्निप्रकृतिकीटभेदः (सु. कल्प ८ अ)
वाह्यद्रुती—पु., रसस्य संस्कारविशेषः (रस. चि. ३ अ)
वाह्यायाम—पु., धनुस्तम्भाख्यवातव्याधिभेदः (सु. नि. अ.)

वि—पु., पक्षी
विक—न, सद्यःप्रसूताया गोः क्षीरम् (श. चि.)
वीकङ्क—पु., विकङ्कतवृक्षः (वै. निघ.)
विकङ्कट—पु., गोक्षुरक्षुपः (श. मा.)
विकटविषाण—पु., सम्बरमृगः (वै. निघ.)
विकटश्रृङ्ग—पु., सम्बरमृगः (वै. निघ.)
विकर—पु., रोगः (श. च.)

विकरणी—स्त्री., तिन्दुकवृक्षः
विकर्णक—पु., ग्रन्थिपर्णभेदः
विकर्णरोमा (न)—पु., ग्रन्थिपर्णभेदः
विकर्णसंज्ञ—पु., ग्रन्थिपर्णभेदः (वम्—भटोरा.)
विकर्त्तन—पु., अर्कवृक्षः (अम.)
विकलपाणिक-त्रि., विकलहस्तः (हला.)
विकलाङ्ग-त्रि., पङ्गुकायः
विकषा—स्त्री , मञ्जिष्ठा (प. मु.)
विकाल—पु., सायाह्न (श. र.)
विकालिका—स्त्री., मानरन्ध्रा (त्रिका.)
विकाशि-न., तद्गुणविशिष्टद्रव्यभेदः (भा.)
विकीर्ण (क) म् (का)—न., स्त्री., ग्रन्थिपर्णभेदः (वै. निघ.) विक्षिप्तः
विकीर्णफल -(क)-पु., रक्तार्कः (वै. निघ.)
विकीर्णसंज्ञ—न.. स्थौणेयकः (रा. नि. व. १२)
विकुम्भ—पु., कनकवृक्षः (रस. कौ. ज्वरारिरसे.)
विकूणिका—स्त्री.. नासिका (हे. च.)
विक्रम—पु., पादः (रा. नि. व. १८)
विक्रमी(इन्)-पु., सिंहः (रा. नि. व. १९)
विक्रिया—स्त्री., विकारः (अम.)
विक्षत-पु., क्षतरोगः
विक्षाव-पु., छिक्का (वै. निघ.) कासः (भा)
विख (खु)-(ख्य)-त्रि., अनासिकः (हे. च.)
विगतसूतिका—स्त्री., पुनरार्तवदर्शनपर्यन्तंप्रसूतिः यस्याः (सु. शा. १०अ.)
विगतार्तवा—स्त्री., निवृत्तरजस्का (श. र.)
विगिर—पु., विस्किरपक्षिभेदः (अर्क. र.चि. ४र्थ. शतके.)
विग्र—त्रि., अनासिकः (हे. च.)
विग्रहावर—न., पृष्ठम् (श. च.)
विघट्ट—न., वङ्गम् (वै. निघ.)
विघट्टिकाकन्द—पु., गुदकन्दरोगः
विघण्टा (ण्टिका)—स्त्री., गुलच्छकन्दः (रा. नि. व. ७)
विघस—न., भोजनम् (रा. नि. व. २०) सिक्थम्। पु., भोजनशेषम् (अम.)
विघ्न—पु., अम्लकरञ्जः । उपद्रवादिः
विघ्नप्रिय—न., यवकृतयवागुः (प. मु.)
विघ्नेशवाहन—पु., महामूषिकः (रा. नि. व. १९)
विङ्क्ष—पु., खुरः (त्रिका.)
विचकिल—पु., दमनकवृक्षः (भा. म. ३ भ. मेद. चि.) मल्लिकावृक्षः (वै. निघ.)
विचण्डिका—स्त्री., रक्तकरवीरवृक्षः (वै. निघ.)
विचक्षु—त्रि., विमनः (त्रिका.)
विचित्रकवुरा (वर्णा)—स्त्री., सविषजलौका(सु.सू. १३अ.)
विचित्राङ्ग—पु., मयूरः (श. र.) व्याघ्रः (श. च.)
विचित्रान्न—पु., खेचरिका
विच्छत्रक—पु., सुनिषण्णकशाकः (ज. द.)
विच्छर्दिका—स्त्री., वमनम् (रा. नि. व. २०)
विच्छल—पु., वेतसलता (र. मा.)
विच्छाय—पु., मणिः
विच्छत्ति—पु., कषायः त्रिका.)
विजनन—न., उत्पत्तिः । प्रसवः
विजपिल—न., पङ्कः (हला)
विजयचूर्ण—न., अर्शसि औषधम् (च. द.)
विजयन्ती—स्त्री., ब्राह्मीक्षुपः (वै. निघ.)
विजयाबन्ध-पु., अपराजिताबन्धनम् (वै. निघ.)
विजयावह-पु , सर्षपः (वै. निघ.)
विंजायनी—स्त्री., नत्रमल्लिका (वै. निघ.)
विजिल—न., दधिप्रकारः । ईषत्सरसव्यञ्जनादि (अम.)
विजिविल—न., विजिलम् (अ. टी. रा. । श. र.)
विजृम्भित—न., चेष्टा (मे.)
विज्ञबुद्धि—स्त्री., जटामांसी (श. च.)
विज्जुलि (ल्लि) का—स्त्री., जन्तुकालता (रा. नि. ३)
विज्ञामर—न., चक्षुषः शुक्लक्षेत्रम् (कश्चित्)
विट—पु., खदिरः । मूषिकः (वै. निघ.) लवणभेदः (मे.) नागरङ्गवृक्षः (श. मा.)
विटमाक्षिक—पु., धातुमाक्षिकम् (हे. च.)
विटलवण—न., विडलवणम् (रा. नि. व. ६)
विटवल्लभा—स्त्री., पाटलीवृक्षः (रा. नि. व. १०)
विटि—स्त्री., पीतचन्दनम् (श. मा.)
विट्—स्त्री., विष्ठा (रा. नि. व. १८ का. नि.)
विट्कता—स्त्री., विष्ठा (मा. ज्वनि.)
विट्खदिर—पु., अरिमेदखदिरवृक्षः विष्ठागन्धखदिरः (भा.)
विट्घात—पु., मूत्राघातः
विट्चर—पु., ग्राम्यशूकरः (अम.)
विट्प्रिय—पु., शिशुमारः (वै. निघ.)
विट्सङ्ग—पु., पुरीषाप्रवृत्तिः (भा. अ. सा. चि.)
विट्सारिका—स्त्री., सारिकाभेदः (जटा.)
विडङ्गादिचूर्ण—न., कासाधिकारः । तत्पाठः—' विडङ्गं नागरं रास्ना पिप्पली हिङ्गुसैन्धवम्। भार्गी क्षारश्च तच्चूर्णं पिबेद्वा घृतमात्रया (वा. चि. ३ अ.)

विडार-पु., मार्जारः । सुगन्धमार्जारः न., हरितालः (हे. च.)

विडालक-पु., तदाख्यनेत्रलेपभेदः ' विडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जिते ' (भा.)

विडालपदक-न., कर्षः, तो. २ (प. प्र. १ ख.)

विडालास्थि-न., मार्जारास्थि (वा. उ. २८.)

विडालिका-स्त्री., भूमिकूष्माण्डः (रा. नि. व. ७)

विडुल-पु.,वेतसवृक्षः (हे. च.)

विड्गन्ध(न्धि)-न., विडलवणम् (प. मु.)

विड्ग्रह-पु., बद्धकोष्ठता (निदा.)

विड्भेद-पु., पित्तजन्यरोगः (भा.)

विड्लवण-न., विडलवणम् (र. मा.)

विड्वराह-पु., ग्राम्यशूकरः (जटा.)

विड्वल-पु., गोपकः (प. मु.)

विड्विघात-पु., मूत्राघातरोगविशेषः (मा. नि.)

विड्विभेद-पु., विड्विघातरोगभेदः (मा. नि.)

विण्मार्ग-पु., गुदम् (वा. चि. २ अ.)

वितानमूलक-न., कोङ्कणदेशप्रसिद्धं वीरणमूलम् (रा. नि. व. ९)

वितुन्न-न., सुनिषण्णकः (अम.) शेवालः (मे.)

वित्रास-न., हिङ्गुलः

वित्सन-पु., वृषभः (श. च.)

विथ्या-स्त्री., गोजिह्वा (श. च.)

विदंश-पु., व्यञ्जनम् (रा. नि. व. २०)

विद्-पु., तिलकवृक्षः (वै. निघ.)

विदग्धाम्लदृष्टि-स्त्री., दृष्टिगतरोमभेदः (वा. उ. १२अ.)

विदन्ता-स्त्री., वराटकभेदः (रा. नि. व. १३)

विदर-न., विश्वसारकः (श. च.) पु., स्फोटनम् (अम.)

विदरण-न., विद्रधिः (रा. नि. व. २०)

विदलान्न-न., दाली यथा-' यवगोधूमचणका माषो मुद्गाढकौ तथा । मकुष्ठकः कुलत्थश्च मसूरस्त्रिपुटस्तथा । निष्पावकः कलायश्च विदलान्नं प्रकीर्तितम् (अत्रि. १५ अ.)

विदलित-न., मज्जरक्तपरिप्लुतसद्योव्रणः (वा. उ. २६ अ.)

विदारीद्वय-न., कुष्माण्डभूमिकुष्माण्डद्वयम् (वै. निघ.) (क्षय. चि. शिवगुट्याम्.)

विदारु-पु., कृकलासः (त्रिका.)

विदिक्चङ्ग-पु., हरिद्राङ्गपक्षी (श. च.)

विदु (द्रु)-पु., करिगण्डमध्यावकाशः (अ. टी.) अश्वस्य कर्णाधः षडङ्गुलः भागः (ज. द. २ अ.)

विदूरज-न., वैदूर्यमणिः (रा. नि. व. १३)

विदूररत्न-न., वैदूर्यमणिः

विद्धकर्ण-पु., अविद्धकर्णा (भ. द्विरूपकोषः)

विद्धकर्णा (र्णिका, र्णी)-स्त्री., पाठा (भ. द्विरूपकोषः । अम. । रा. नि. व. ६)

विद्धपर्कटी-स्त्री., तिक्तगुञ्जा

विद्धमाक्षिक-न., मद्यम् (वै. निघ.)

विद्यादल-भूर्जवृक्षः (श. मा.)

विद्याधररस-पु., गुल्मे रसः

विद्याधराभ्र-न., शूलाधिकारे औषधम्

विद्यापति-पु., चिकित्साञ्जनप्रणेता

विद्युत्प्रिय-न., कांस्यधातुः (हे. च.)

विद्र-न., छिद्रम् (श. च.)

विद्रधिका-स्त्री., प्रमेहपिडका (सु. नि. ६. अ.)

विद्रधिघ्न (नाशन) पु., शिग्रुवृक्षः शोभाञ्जनवृक्षः (त्रिका)

विद्रुम-पु., प्रवालः (रा. नि. व. १३.) पल्लवम्

विद्रुमफल(ला)-पु., स्त्री., मधुरकुन्दरः (वै. निघ.)

विद्रुमलता (तिका)-स्त्री., नलीनामगन्धद्रव्यम् (अम. रा. नि. व. १२)

विद्रुमवाक्-स्त्री., मधुरकुन्दरः (वै. निघ.)

विद्रुल-पु., वेतसवृक्षः (वै. निघ.)

विद्वान्-पु., वैद्यः (रा. नि. व. २०)

विध-(धा)-पु., स्त्री., ऋद्धिः । हस्त्यन्नम् । वेधनम् (भ. रभसः । मे. । त्रिका.)

विधन-न., मधूच्छिष्टम् (वै. निघ.)

विधवन-न., कम्पनम् (व्याक)

विधस-न., मधूच्छिष्टम् (वै. निघ.)

विधाता-(तृण)-पु., मद्यम् (रा. नि. व. १४)

विधात्री-स्त्री., पिप्पली (श. च.)

विधानिका-स्त्री., बृहती (वै. निघ.)

विधु-पु., कर्पूरः (मे.)

विधु (धू) ति-स्त्री., कम्पनम्

विधु (धू) नन-न., कम्पनम्

विधुफल्गुध्वर-पु., सन्निपातज्वरभेदः (भा.)

विधुवन (ल)-न., कंपनम् (जटा. अम.)

विनद-पु., सप्तपर्णवृक्षः (श. च.)

विनया-स्त्री., वाट्यालकः (मे)

विनस-पु., नासाहीनः (जटा.)
विनारुहा-स्त्री., त्रिपर्णिकाकन्दः (रा. नि. व. ७)
विनाश-पु., नाशः (अम.) (क)-त्रि., गतनासिकः (जटा.)
विनाशोन्मुख-न., पक्कम् (अम.)
विनिपात-पु., दैवादिव्यसनम् (मे.)
विनीय-पु., कल्कः (र. मा.)
विन्दु-पु., परिणामभेदः । जलकणा (अम.) भ्रुवोर्मध्यभागः (मे.)
विन्दुचित्रक-पु., मृगविशेषः (श. र.)
विन्दुपत्र-पु., भूर्जवृक्षः (रा. नि. व. ९)
विन्दुफल-न., मौक्तिकम्
विन्दुराजि-पु., राजिमच्छर्पविशेषः (सु. कल्प. ४)
विन्ध्यजात-पु., विभीतकवृक्षः (वै. निघ.)
विन्ध्यवासियोग-पु., राजयक्ष्माधिकारे योगः (रस. र.)
विन्ध्या-स्त्री., लवलीवृक्षः (मे.) एला (हे. च)
विन्याक-पु., सप्तपर्णवृक्षः (श. च.)
विन्विनी-स्त्री., अक्षितारकम्
विपत्ति-स्त्री., विपद् (अम.)
विपदापहा-स्त्री., वनकुलत्थः (वै. निघ.)
विपन्न-पु., सर्पः (मे.) त्रि., विपद्ग्रस्तः
विपरीतमल्लतैल-न., शारीरव्रणाद्यधिकारे तैलम् (कल्क. प्र. १ प.)
विपर्णक-पु., पलाशवृक्षः (श. च.)
विपाण्डुरा-स्त्री., महामेदा (प. मु.)
विपाशा-स्त्री., भारतीयनदीविशेषः (रा. नि. व. ४)
विपिनद्रु-पु., कालशाकः (वै. निघ.)
विपिननृप-पु., आरग्वधवृक्षः (रस. र. ज्व. चि.)
विपुलरस-पु., इक्षुः । कोषान्तरम्
विपूय-पु., बहुपूयता (भा. म. कुष्ठचि.) मुञ्जतृणम् (व्याक.)
विप्रदह-पु., फलमूलादिशुष्कद्रव्यम् (श. च.)
विप्रप्रिय-पु., पलाशवृक्षः (रा. नि. व. २३)
विप्रलम्बी (लोभी) (इन्)-पु., देववर्बूरकः (रा. नि. १०)
विफल-पु., वन्ध्याकर्कोटिका (वै. निघ.)
विबन्धबन्ध-पु., पृष्ठोदरोरःस्थव्रणबन्धनविशेषः
विबन्धवर्ति-स्त्री., अश्वस्य शूलरोगभेदः (ज. द. ४३)
विभाकर-पु., चित्रकवृक्षः । अर्कवृक्षः (अम.) सूर्यः
विभाण्डिका-स्त्री., आढुल्यक्षुपः (वै. निघ.)
विभात-पु., न., प्रभातम्
विभावरी-स्त्री., हरिद्रा (रा. नि. व. ६) मेदा (र. मा.) रात्रिः (अम.)
विभावरीयुग-न., हरिद्रादारुहरिद्रे (भा. १ भ.-ज्व. चि.)
विभावसु-पु., चित्रकवृक्षः । अर्कवृक्षः (मे.) अग्निः सूर्यः (अम.) चन्द्रः (हे. च.)
विमर्द-पु., चक्रमर्दक्षुपः (रा. नि. व. ४) घृतसुक्तकान्वितद्रव्यम् (वा. उ. ३९ अ.)
विमलजाता-स्त्री., स्त्रावितेन द्रवीकृतखण्डादिः (सु. सू. ४५ अ.)
विमलमणि-पु., कर्पूरमणिः (रा. नि. १३)
विमलाशन-पु., शिरीषवृक्षः (र. मा.)
विमुक्त-पु., माधवीलता
विम्बिनी-स्त्री., नेत्रकनीनिका (रा. नि. व. १८)
विम्बु-स्त्री., गुवाकः (कश्चित्)
विम्लापन-न., अङ्गुल्यादिविमर्दनेन शोथविलायनम् (सुचि. १ अ.)
वियच्चारी (इन्)-पु., चक्रवाकपक्षी (श. मा.)
विरजा-त्रि., विगतार्तवा (जटा.)
विरजा-स्त्री., दूर्वा (हरा.) गन्धविरजा (भैष. बाजीपल्लवसारतैले.) कपित्थालीवृक्षः (र. मा.)
विरठ-पु., तिलकवृक्षः (वै. निघ.)
विरण-न , वीरणमूलः (प. मु. रस. व. वा' व्या. चि.) (गंधराजतैले.)
विरदा-स्त्री., अश्वगन्धा (कश्चित्)
विरलद्रवा-स्त्री., विरलद्रवयवागुः (जटा.)
विरा-स्त्री., मद्यम् (रा. नि. व. १४)
विराटक-न., कान्तपाषाणः (र. सा. सं,)
विराटज-पु., राजपट्टमणिः (त्रिका.)
विरान्तक-पु., अर्जुनवृक्षः (वै. निघ.)
विराध (धा) न-न., पीडा (श. र.)
विराल-पु., विडालः (अ. टी.)
विरुक्-पु., ईहामृगः (रा. नि. व. १९)
विरुद्धता-स्त्री., विरुद्धं नाम यत् दृष्टान्तसिद्धान्तसमयैर्विपरीतम् (च. वि. ८ अ.)
विरुद्धा (ध्य) शन-न., विरुद्धभोजनम् (राज. ३ अ.)
विरूपाक्ष-पु., अश्वस्य दुष्टग्रहभेदः (ज. द. ५७ अ.)
विरूपी (इन्)-पु., जाहकः (रा. नि. व. १९)
विरूक्षण-न., रूक्षीकरणम् (वा. उ. ३२ अ.)
विरेकी (इन्)-पु., कम्पिल्लकम् (वै. निघ.)

विरेचक-पु., विरेककारी
विलया-स्त्री., बला (र. मा.)
विलला-स्त्री., श्वेतबला
विलवास-पु., जाहकजन्तुः (रा. नि. व. १९)
विलाल-पु., विडालः (अ. टी.)
विलासिनी-स्त्री., हरिद्रा (रा. नि. व. ६) शङ्खपुष्पी (वै. निघ.)
विलिखा-स्त्री., मत्स्यभेदः (इलीश इति कश्चित् वै. निघ.)
विलेप (न)–पु., न., सुगन्धलेपनद्रव्यम् (अम.)
विलेप्य-पु., यवागुः (श. र.) स्त्री., विलेपी (च. द. वमने.)
विलोटक-पु., वल्लीगडमत्स्यः (श. च.)
विलोडन-न., आलोडनम् वायुजन्यव्रणवेदनाविशेषः (सु. सू. २२ अ)
विलोमी-स्त्री., आमलकी (मे.)
विल्ल-न., विडङ्ग (प. मु.) हिङ्गुः (श. र.)
विल्लक-न., विषम् (प. मु.)
विल्लमूला-स्त्री., वाराहीकन्दः (श. च.)
विवर्तितसन्धि-पु., सन्धिमुक्तभग्नरोगविशेषः (सु. नि. १६)
विवस्वान्-पु., अर्कवृक्षः (अम.)
विविधविषापहा-स्त्री., निर्विषीवृक्षः (अम.)
विश–न., रौप्यम् (वै. निघ.) मृणालम् (अ. टी. रा.) (सु. चि. ११ अ.) पु., मनुष्यः
विशद–न., काशीषम् (वै. निघ.) पु., निर्मलम् (मे)
विशर्द्धन-न., गुदेकुलित शब्दकरणम् (सु. नि. ३ अ)
विशल्यकरणी-स्त्री.. ओषधिविशेषम् (रामायणम्)
विशल्यकृत्-पु., भूपलाशः आस्फोतकः (र. मा.)
विशाकर–पु., हस्वदन्ती (रा. नि. व. ६) हस्तिशुण्डी (प. मु.) पाटलावृक्षः (भा. म. ४ भ. गर्भचि) भद्रचूडवृक्षः (श. च.)
विशाख–पु., पुनर्नवा (रा. नि. व. ५) स्कन्दापस्मारः (सुउ. ३७ अ.)
विशाखग्रह–पु , विल्ववृक्षः (वै. निघ.)
विशाखज–पु., नागरङ्गवृक्षः (श. च.)
विशाखपत्र–पु., बालरोगभेदः (निदा.)
विशाखा-(खका)स्त्री.,–श्वेतरक्तपुनर्नवा (वै. निघ. २) (भ. वा. व्या. चि.) षडशीतिगुग्गुलौ) कृष्णापराजिता (वै. निघ.) कठिल्लकवृक्षः (मे.) तन्नामनक्षत्रम् (अम.)

विशाचिका–स्त्री., माषपर्णी
विशालतैल गर्भ–पु., आङ्कोटवृक्षः (रा. नि. व. ९)
विशालत्वक्–पु., सप्तपर्णवृक्षः
विशिखपुङ्खा–शरपुङ्खा (भा. म. ४ भ. वन्ध्याप्रतीकारे)
विशिष्ट पत्र–पु., ग्रन्थिपर्णवृक्षः (हारा.)
विशोधनी बीज–न., जैपालीबीजम् (वैद्यकम्)
विश्राम–पु., आयासग्रहणम् (राज. २ प.)
विश्लेषण–न.. वायुजन्यव्रणवेदना (सुसु. २२ अ) पृथक्करणम्
विश्वकद्रु–पु., मृगयानिपुणकुक्कुरः (अम.)
विश्वका–स्त्री., गङ्गाचिल्ली (हारा.)
विश्वक्सेना–स्त्री., प्रियङ्गुलता (कश्चित्)
विश्वग्वायु–पु., सर्वतोगामिवायुः (राज.)
विश्वची–स्त्री., तदाख्यवातव्याधिविशेषः द्र० विश्वाची
विश्वजा–स्त्री., शुण्ठी (सा. कौ. वा. ज्व. चि.)
विश्वतुलसी–स्त्री., तुलसीभेदः । मधुरतुलसी (कश्चित्)
विश्वमदा–स्त्री., अग्निजिह्वालता
विश्वरोचन–पु., पेचुकः (त्रिका.) नाडीचशाकः
विश्ववर्णा–स्त्री., भूम्यामलकी (वै. निघ.)
विश्वसारक–न., विदरवृक्षः (श. च.)
विश्वस्था–स्त्री., शतावरी (रा. नि. व. ४)
विश्वादि–पु , कषायविशेषः (च. द. पि. ज्व. चि.)
विश्वामित्रप्रिय–पु., नारिकेलवृक्षः (श. र.)
विश्वाह्वा–स्त्री., शुण्ठी (वै. स. बाहुशाल गुड)
विश्वोर–पु., रक्तार्कः (र. मा.)
विषकङ्खाखोलिका (ली) स्त्री., वृक्षविशेषः (नकुल १६ अ)
विषकण्टका (किनी, की)–स्त्री., वन्ध्याकर्कोटिका (रा. नि. व. ३.)
विषकण्टालिका (ली) स्त्री., विषकण्टालीति प्रसिद्ध-वृक्षः (र. सा. सं. स्वच्छन्दभैरवरसे)
विषकण्ठी–स्त्री., बलाका (रा. नि. व. १९)
विषगन्धक–पु., हस्वसुगन्धतृणम् (वै. निघ.)
विषगन्धा–स्त्री., कृष्णगोकर्णी (वै. निघ.)
विषग्रन्थि–पु., मृणालपर्व (च. द. यक्ष्म चि.) (बलाद्यघृते)
विषघा–स्त्रीं., गुडूची (श. च.)
विषघाती-(इन्) पु , शिरीषवृक्षः (श. मा.)
विषचक्रक–पु., चकोरपक्षी (वै. निघ.)

विषजिह्व-पु., देवताडवृक्षः (र. मा.)
विषज्वर-पु., तन्नामकागन्तुज्वरः (श. र.)
विषण्ड-न., मृणालम् (श. र.)
विषतन्त्र-न., तन्नामसर्पादिविषोपशमनतन्त्रभेदः (वैद्य सं. २ अ.)
विषतरु-पु., कुचेलकवृक्षः (भैष. वातरक्तचि.) (विषतिन्दुकतैल)
विषतिन्दुकज-न., मधुरतिन्दुकफलम् (र. सा. सं) (त्रैलोक्यडम्बररसे । गलत्कुष्ठारिरसे)
विषदंश-(क)-पु., मार्जारः (वै. निघ.)
विषदंष्ट्रा-स्त्री., सर्पकङ्कालिका (प. मु.) (र. सा. सं) नागदमनी (वै. निघ.)
विषदन्त-(क)-पु., विडालः (वै. निघ.) सर्पः (श. च.)
विषदमूला-स्त्री., बहुमूलमाकन्दी (रा. नि. व. ७)
विपदर्शनमृत्युक-पु., चातकपक्षी (हे. च.)
विषधर-पु., सर्पः (अम.)
विषधर्मा-स्त्री., शुकशिम्बी (श. च.)
विषध्वंसी (इन्)-पु., नागरमुस्ता (वै. निघ.)
विषनाशन-पु., शिरीषवृक्षः (प. मु.) माणकम् (प. मु.)
विषनाशिनी-स्त्री., सर्पकङ्काली (श. च.) बन्ध्याकर्कोटिका (वै. निघ.)
विषनुत्-पु., श्योणाकवृक्षः (श. च.)
विषभिषक्-पु., विषवैद्यः (हे. च.)
विषभुजङ्ग पु., विषधरसर्पः (वैद्यकम्)
विषमाधुर-न., शृङ्गीविषम् (भैष. ज्व. चि. पानीयवट्याम्.)
विषमाधूक-न., द्रव्यविशेषः । विगमा इतिलोके (भैष. शिरो. रोचि. किङ्किणीतैले.)
विषमुष्कक-पु., मदनवृक्षः (वै. निघ.)
विषमूला-स्त्री., शिरामलकम् (प. मु.)
विषमृत्यु-पु., जीवञ्जीवपक्षी (त्रिका.)
विषमच्छद-पु., सप्तपर्णवृक्षः (प. मु.)
विषमज्वराङ्कुशलौह-न., विषमज्वरे औषधम् (रस. चि.)
विषमज्वरान्तकरस-पु., विषमज्वरे पुटपक्वम् औषधम्
विषमभोजन-न., विषमाशनम् (मा. नि.)
विषमवल्कल-पु., करुणनिम्बुकः (प. मु.)
विषमवेग-पु., न्यूनाधिकवेगः (मा. नि.)
विषमा-स्त्री., सौवीरबदरम् (भा.)
विषमाशुकर-पु., ग्रन्थिपर्णमूलम् (वै. निघ.)
विषमोभयकण्टक-पु., घण्टाबदरः (वै. निघ.)
विषयि-न., इन्द्रियम्
विषयेन्द्रिय-न., शब्दादिग्राहकेन्द्रियाणि (रा. नि. व. १८)
विषरूपा-स्त्री., अतिविषा (रा. नि. व. ६) महानिम्बुकः बृहद्दलम्बुषा । कर्कोटी (वा. सू. १५ अ.) सुरसादिः (अरुणः)
विषरोग-पु., विषजन्यरोगमात्रम्
विषल-न., विषम् (श. च.)
विषलिप्तक-न., विषसञ्चरणम् (वा. उ. २६ अ.)
विषवज्रपात-पु., रसः (रस. र. विष. चि.)
विषवर्त्म (न्)-न. नेत्रवर्त्मगतरोगविशेषः (भा.)
विषविद्या-स्त्री., विषघ्नमन्त्रभेदः । विषविज्ञानशास्त्रम्
विषवृक्ष-पु., उदुम्बरवृक्षः (प. मु.)
विषवैद्य-पु., विषमन्त्राभिज्ञः वैद्यः (अम.)
विषसैरिणी-स्त्री., निर्विषा (रा. नि. व. ६)
विषशालूक-पु., पद्मकन्दः
विषशूक-पु., भृङ्गरोलः
विषशोकापह-पु., तण्डुलीयवृक्षः (वै. निघ.)
विषसंयोग-पु., सिन्दूरम् (वै. निघ.)
विषसूचक-पु., चकोरपक्षी (हे. च.)
विषसृक्का (क्कन्)-पु., भृङ्गरोलः (त्रिका)
विषस्फोट-पु., स्फोटकभेदः (भा.)
विषहर-पु., ग्रन्थिपर्णभेदः (त्रि.,) विषघ्नौषधादिः
विषहरा (हा)-स्त्री., देवदालीलता (रा. नि. व. ३) निर्विषा (रा. नि. व. ६)
विषहरी-स्त्री., मनसादेवी (श. र.)
विषहरीबर्त्ति-स्त्री., विषे हिता (रस. चि.)
विषहारक-पु., भूकदम्बः (वै. निघ.)
विषहारिणी-स्त्री., निर्विषा (वै. निघ.)
विषा-स्त्री., अतिविषा (रा. नि. व. ६)
विषाख्या-स्त्री-शुक्लकन्दातिविषा (वा. सू. १५ अ. । मुस्तादिः (वा. उ. ५ अ.)
विषाङ्कुर-पु., शल्यास्त्रम् (त्रिका)
विषानन-पु., सर्पः (श. मा.)
विषान्न-न., सर्षपादिः
विषाभावा-स्त्री., निर्विषा (रा. नि. व. ६)
विषायुध-पु., सर्पः (श. र.)
विषार-पु. सर्पः (श. च.)
विषाराति-पु., कृष्णधुस्तूरवृक्षः (रा. नि. व. १०)

विषारि-पु., महाचुञ्चुशाकः (रा. नि. व. ४) घृतकरञ्जः (रा. नि व. ९)
विषाला-स्त्री., मत्स्यविशेषः (अत्रि. २२ अ.)
विषास्य-पु., सर्पः (श. र.)
विषास्या-स्त्री., भल्लातकवृक्षः । (श. च.)
विषौषधी-स्त्री., नागदन्ती । हस्तिशुण्डी (र. मा.)
विष्कल-पु., ग्राम्यवराहः (रा. नि. व. १९)
विष्कलन-न., भोजनम् (त्रिका.)
विष्टर-पु., अर्कवृक्षः (रा. नि. व. १० वृक्षः (त्रिका.)
विष्टरा-स्त्री., गुण्डासिनीतृणम् (रा. नि. व. ८)
विष्टाभुक्-(शी)-पु., ग्राम्यशूकरः (वै. निघ.)
विष्टारुहा-(स्त्री.,) सुवर्णकेतकी (रा. नि. व. १०)
विष्ठेष्टा-स्त्री., हरिद्रा (वै. निघ.)
विष्णुतैल-न., वातव्याधौ तैलम् । पाठः- ' शालपर्णी पृश्निपर्णी बला गोरक्षतण्डुला । एरण्डस्य च मूलानि बृहत्योः पूतिकस्य च । शतावरी सहचरं पचेदेतैः पलोन्मितैः । तैलप्रस्थं पयो दत्वा गव्यं वाजं चतुर्गुणम् (रस. र.)
विष्णुपद-न., आकाशम् (अम.) पद्मम् (हे. च.)
विष्णुपर्णिका-स्त्री., पृश्निपर्णी (वै. निघ.)
विष्णुपर्णी-स्त्री., भूम्यामलकी (वै. निघ.)
विष्णुप्रिया (हिता)-स्त्री., तुलसीवृक्षः (वै. निघ.)
विष्णुलिङ्गी-स्त्री., वर्तिकापक्षी (त्रिका.)
विष्णुवल्लभा-स्त्री., तुलसीवृक्षः (रा. नि. व. १०) अग्निशिखा (श. च.)
विष्वग्वायु-पु., घूर्णितवातः (राज. २प.)
विसङ्कट-पु., इङ्गुदीवृक्षः (रा. नि. व. ८) सिंहः (श. च.)
विसर्पघ्न-पु., मधूच्छिष्टम्
विसर्पज्वर-पु., तज्जन्यागन्तुज्वरः
विसर्पण-न., कायसञ्चरणम् । तन्तुव्रण विटपादेः विसर्पणम् (भ.)
विसार-पु., मत्स्यः (अम.)(रा. नि. व. ४)
विसुन्दल-पु., सिन्दुवारवृक्षः (निसिन्दा.)
विस्तारी (इन्)-पु., वटवृक्षः (वै. निघ.)
विस्तीर्णपर्ण-न., माणकन्दः (श. च.)
विस्फा (स्फु) रक-पु., वातोल्बणसन्निपातज्वरः (भा. म. १ भ.)
विस्फुरणी-स्त्री., } तिन्दुकवृक्षः (वै. निघ.)
विस्फूर्जनी-स्त्री., }
विस्फुरित-न., काण्डभग्नास्थि भङ्गभेदः
विस्फोटज्वर-पु., तज्जन्यागन्तुज्वरः
विस्रगन्ध-(न्धा, न्धि)-पु., स्त्री., पलाण्डुः (रा. नि. व.) गोदन्तहरितालः (हे. च.) हवुषा (रा. नि. व. ४)
विस्रगन्धक-पु., गोदन्तहरितालः (रा. नि. व. २३.)
विस्रसा-स्त्री., जरा (अम.)
विस्रा-स्त्री., हवुषा (रा. नि. व. ४)
विस्राव-पु., अन्नमण्डम् (वै. निघ.)
विहग-(ङ्गम)-पु., पक्षी (अम.)
विहङ्ग--न., स्वर्णमाक्षिकम् (रस. कौ.)(ज्वरान्तकरसे)
विहङ्गमा-स्त्री., भारयष्टी (शर.)
विहायस-पु., पक्षी न., आकाशम् (त्रिका.)
वीक्ष-पु., दृष्टिः (व्याक.)
वीजकर-पु., माषव्रीहिः (वै. निघ.)
वीजका-स्त्री., कपिलद्राक्षा (वै. निघ.)
बीजकाह्व-पु., मातुलुङ्गवृक्षः (वै. निघ.)
वीजकृत्-न., वाजीकरणम् (रा. नि. व. २०)
वीजकोश-(ष)-पु., पद्मकर्णिका
वीजगुप्ति-स्त्री., धान्यादिकञ्चुकी । शिम्बी (रा. नि. व. १६)
वीजद्रुम-पु., असनवृक्षः (रा. नि. व. २३)
वीजपूरफल-न., मातुलुङ्गफलम् (म. द. व. ६)
वीजपेशिका-स्त्री., वृषणम् (रा. नि. व. १८)
वीजमातृका-स्त्री., पद्मबीजम् (हारा.)
वीजरत्न-(वर)-पु., न., माषकलायः (हे. च.)
वीजरुह-पु., शालिधान्यादिः (हे. च.)
वीजाख्य-पु., जैपालवृक्षः (न.) तद्बीजम्
वीजाविक-पु., उष्ट्रः (वै. निघ.)
वीजोदक-न., करका (मे.)
वीटि (टी)-स्त्री., ताम्बुललता सज्जिततताम्बूलम् । (शब्दकल्पद्रुमः)
वीतन-पु., कृकपार्श्वयोः
वीतशोक-पु., अशोकतरुः (श. मा.)
वीति-.पु, घोटकः (हे. च.)
वीतिका-स्त्री., यष्टिमधु । नीलिका (वै. निघ.)
वीरतण्डुलनामा(न-)पु., तण्डुलीयशाकक्षुपः(कश्चित्)
वीरनायक-पु., उशीरम् (वै. निघ.)
वीरपत्रा (त्री)- स्त्री., विजया (रा नि व ६) धारणीनाममहाकन्दः (रा. नि. व. ७)
वीरपादप-पु., बिल्वान्तरवृक्षः (वै. निघ.)

वीरपुष्पा (ष्पी)– स्त्री., वाट्यालकभेदः। महाबला (वै. निघ.) सिन्दूरपुष्पीवृक्षः (रा. नि. व. १०)
वीरभद्र–पु., वीरणम् (मे)
वीरभद्रक–न., वीरणम् (जटा.)
वीरभद्ररस–पु., सन्निपातज्वरे रसः (रस. चि.)
वीरवती–स्त्री., मांसरोहिणी (भा.)
वीरवल्ली–स्त्री., देवदाली (वै निघ.)
वीरवेतस–पु., अम्लवेतसः (रा. नि. व. ६)
वीरशाक–पु., वास्तूकशाकः (वै. निघ.)
वीरसिंह–पु., वीरसिंहावलोकनप्रणेता
वीरसिंहावलोकन–न., वीरसिंहकृतवैद्यकग्रन्थः
वीराम्ल–पु., अम्लवेतसः (रा. नि. व. ६)
वीरायतच्छदा–स्त्री., कदलीवृक्षः (वै. निघ.)
वीररुक–न., आरुकम् (रा. नि. व. ११)
वीरास्राव–पु., कुमारीनिर्यासः
वीरी–स्त्री., ब्रह्मरौती
वीरुपत्रिका–स्त्री., चुन्चुशाकः (रा. नि. व. ४)
वीरेश्वररस–पु., पित्तश्लेष्मज्वरे रसः
वीर्या–स्त्री., वीर्यम् (अ. टी. भ.)
वीहा–स्त्री., वनकुलत्थः (वै. निघ.)
वृंहणीयवर्ग–पु., बृंहणाय हिते कषायवर्गः (च. सू. ४ अ.)
वृकदंश–पु., कुक्कुरः (हे. च.)
वृकदन्ती–स्त्री., पाठा (वै. निघ.)
वृकधूप (क)–पु., बहुसुगन्धद्रव्यकृतसुगन्धधूपः (अम) सरलद्रवः (अम.)
वृकधूर्त्त–पु., शृगालः (हारा.)
वृकाक्षी–पु., त्रिवृत् (र. मा.)
वृकाराति (रि)–पु., कुक्कुरः (रा. नि, व. १९)
वृकि (की)–स्त्री., पाठा (वै. निघ.) (२ भ. वा. व्या. चि. महारास्नादौ.)
वृक्का–स्त्री., नागदमनी । महासमङ्गा
वृक्ष–पु., तरुः (रा. नि. व.) धववृक्षः (र. मा.)
वृक्षक–पु., श्वेतकुटजवृक्षः (र. मा. च. कल्प. अ.) नन्दिवृक्षः (धन्वतरि.)
वृक्षकवीज–न., इन्द्रयवः
वृक्षचर– पु., वानरः (धनञ्जयः)
वृक्षतपन–पु., कर्णिकारवृक्षः (वै. निध.)
वृक्षधूमक – न., शैवालः (वै. निघ.)
वृक्षनाथ–पु , वटवृक्षः (श. च.)
वृक्षपाक–पु., वटवृक्षः (श. च.)

वृक्षभक्षा–स्त्री., बन्दा (भा.)
वृक्षभेदी–(इन्) पु., वृक्षादनः (अम.) अश्वत्थवृक्षः (कश्चित्)
वृक्षमृद्ध–पु., जलवेतसम् (श. च.)
वृक्षराज– पु., महामेदा, द्वीपान्तरवचा (वै. निघ.)
वृक्षवान्–पु. पर्वतः (रा. नि. व. २)
वृक्षवीरा–स्त्री., भूम्यामलकी (वै. निघ.)
वृक्षामय–पु., लाक्षा (वै. निघ.)
वृक्षायुर्वेद– पु., वृक्षरोपणपोषणादिशास्त्रम्
वृक्षाहा–स्त्री., महामेदा (रा. नि. व. ५)
वृक्षाश्रयी (इन्) पु.. क्षुद्रोलूकः (रा. नि. व. १९)
वृक्षोत्पल–पु., द्रुमोत्पलम् (र. मा.)
वृजन–पु., केशः (उणा.)
वृजिन–पु., न., केशः (मे.)न., शोणितम् रक्तचर्म(हेच.)
वृतपत्रा–स्त्री., पुत्रदात्रीलता
वृतिङ्कर–पु., विकङ्कतवृक्षः
वृत्तक–न., वेत्रम् (वै. निघ.)
वृत्तका–स्त्री., उपोदकी (वै. निघ.)
वृत्तकोष–पु., पीतदेवदाली (भा.)
वृत्ततुम्बी–स्त्री., वृत्तालाबुः (वैं. निघ.)
वृत्ततृण–न., गुण्डतृणम् (वै. निघ.)
वृत्तनिष्पाविका–स्त्री., नखनिष्पावी, ह्रस्वशिम्बी (रा. नि. व. ७)
वृत्तपत्र–पु., उत्तमशाकविशेषः (प. मु.)
वृत्तपर्णिका–स्त्री., अजान्त्रीलता (रा. नी. ३)
वृत्तपक्ष–पु., क्षुद्रशङ्खः (वै. निघ.)
वृत्तभोजन–पु., गण्डीरः (श. च.)
वृत्तयुग्म–पु., वाताम्रवृक्षः (वै. निघ.)
वृत्ता–स्त्री., मांसरोहिणी । प्रियङ्गुलता (रा. नि. व. १२) श्वेतनिष्पावः (रा. नि. व. १६) झिञ्झिरीटाक्षुपः (रा. नि. व. ४) नागदमनी (रा. नि. व. ५) रेणुका (रा, नि. व. ६ । वै. निघ. २ भ. वा. व्या. चि. वातारिरसे.) हस्तिकोशातकी (रा. नि. व. ७)
वृत्तिस्थ–पु., कृकलासः (रा. नि. व. १९)
वृत्तेर्वारु–पु., खर्मूजावृक्षः (रा. नि. व. ७)
वृत्रभोजन–पु., गण्डीरशाकः
वृथार्तवा–स्त्री., वन्ध्यास्त्री (रा. नि. व. १८)
वृद्धकण्ट–(क)–पु., इङ्गुदीवृक्षः (वै. निघ.)
वृद्धकर्णिका–स्त्री., पाठा (रा. नि. व. ६)
वृद्धकाक–पु., द्रोणकाकः (हे. च.)
वृद्धकोटरपुष्पी–स्त्री., नीलवुह्मा । वृद्धदारकः

वृद्धतिक्ता-स्त्री., पाठा (वै. नि. घ.)
वृद्धत्व-न., वार्द्धक्यम् (अम.)
वृद्धदारक-पु., वृद्धदारु श्वेतरक्तभेदेनद्विधा (रानिव३)
वृद्धदारकादिलौह-न, ऊरुस्तम्भाधिकारे औषधम् (रस. र.)
वृद्धधूप-पु., वृद्धदारुः, श्वेतरक्तभेदेनद्विधा (रानिव. ३)
वृद्धधूमा-स्त्री., श्लेष्मातकवृक्षः (वै. निघ.)
वृद्धनाभि-त्रि., उच्चनाभिः (अम.)
वृद्ध (द्धि) बला-स्त्री., महासमङ्गा (रा. नि. व. ४) महाबला (वै. निघ.)
वृद्धराज-पु., अम्लवेतसः (कश्चित्)
वृद्धवाहन-पु., आम्रवृक्षः (कश्चित्)
वृद्धविभीतक-पु., आम्रातकवृक्षः (श. मा.)
वृद्धसूत्रक-न., इन्द्रतूलकम् (हारा.)
वृद्धा स्त्री., पञ्चाशतोर्ध्वा प्राचीना (भा.) महाश्रावणिका (रा नि. व ५) अङ्गुष्ठः (श. र.)
वृद्धाङ्गुलि-स्त्री., अङ्गुष्ठाङ्गुलिः (श. र.)
वृद्धिका-स्त्री. शुद्धपुष्पी । अर्कपुष्पी (वै. निघ) ऋद्धिः (श. मा.)
वृद्धिद-पु., जीवकनामहस्वक्षुपः (रा. नि. व. ५) वाराहीकन्दः (रा. नि. व. ७)
वृद्धिभाक्-स्त्री., वृद्धौषधिः (नकुल १० अ.)
वृद्धैला-स्त्री., स्थूलैला (वै. निघ.)
वृधसान-पु., मनुष्यः (उणा.)
वृन्तिका-स्त्री., कटुका (श. च.)
वृन्दा-स्त्री., तुलसीवृक्षः (श. र.) वृक्षोपरिजातलता (वै. नि.)
वृवूक-न., जलम्
वृश-पु., वासकवृक्षः (अ. टी. भ.) उन्दरुः (श. र.) स्त्री., वासा (उणा.)
वृश्चि-पु.,रक्तपुनर्नवा (वै. निघ. कास. चि. कण्टकारीघृते)
वृश्चिकप्रिया-स्त्री., पूतिका (श. मा.)
वृश्चिकविषापहा-स्त्री., महारास्ना नाकुली (वै. निघ.)
वृश्चिकाहिविषापहा-स्त्री., नाकुली (वै. निघ.)
वृश्चिपत्री (र्णी)-स्त्री., वृश्चिकाली (प. मु. र. मा.) लघुमेषशृंङ्गी (वै. निघ.)
वृश्ची-स्त्री., वृश्चीरक्षुपः (वा. चि. ३ अ.)
वृश्चीद्वय-न., वृश्चीरयुगलम् । श्वेतरक्तपुनर्नवाद्वयम् (चि. क. क. १ स्त. ३ अ.)
वृषगन्धा(न्धिका)-स्त्री., छगलान्त्री (रा. नि. व. ३) अतिबला (वै. निघ.)
वृषदंश(क)-पु., बिडालः (अम.)
वृषध्वाङ्क्षा(क्षी)-स्त्री., नागरमुस्ता (रा. नि. व. ६)
वृषनाशन-पु., विडङ्गः (श. मा.)
वृषपत्रिका-स्त्री., वसान्त्री (रा. नि. व, ३)
वृषपर्णी-स्त्री., आखुकर्णीलता (प. मु.) कृष्णदन्ती (र. म.)
वृषपर्वा-(न्)-पु., कशेरुः (विश्व.)
वृषभध्वजा-स्त्री., महादन्तीवृक्षः (वै. निघ.)
वृषभपलव-पु., वासावृक्षः (वै. निघ. २ भ. क्षय. चि. वसन्तकुसुमाकररसे.)
वृषमूल-न., वासामूलम् (वातरक्त. चि. रुदतैले)
वृषल-पु., गृञ्जनः घोटकः (मे.)
वृषलोचन-पु., मूषिकः (हे, च)
वृषवीभत्स-पु., कपिकच्छूभेदः (वै. निघ.)
वृषसार-पु., शुक्रवटः। देवकुम्भाख्यवृक्षभेदः (वै. निघ.)
वृषकी (इन्)-पु., भृङ्गरोलः (श. मा.)
वृषस्यन्ती-स्त्री.. अतिकामुका (अम.)
वृषा (न्)-पु., घोटकः । वृक्षः (हे. च.) कर्णः (मे.)
वृषाकपायी-स्त्री.. शतावरी, जीवन्ती (मे.)
वृषाकर-पु., माषः (रा. नि व. १६)
वृषाङ्क-पु., पानीयभल्लातकः । षण्ढः (मे.)
वृषादनी-स्त्री., इन्द्रवारुणी
वृषायण-पु., चटकपक्षी (हारा.)
वृषाहार-पु., विडालः (हारा,)
वृषी (इन्)-पु., मयूरः (श. मा.)
वृष्णिका-स्त्री., अरण्यशणपुष्पी
वृष्टिकाल-पु., वर्षर्तुः
वृष्टिघ्नी-स्त्री., क्षुद्रैला (श. च.)
वृष्टिजीवन-पु., चातकपक्षी
वृष्टिभू-पु., भेकः (हारा.)
वृष्णि-पु., मेषः (अम')
वृष्यचण्डी-स्त्री., महामूषिककर्णी (वै. निघ.)
वृष्यपर्णी-स्त्री., भूमिकूष्माण्डः (वै. निघ.)
वृष्यफला-स्त्री., आमलकीवृक्षः (वै. निघ.)
वृहच्चित्त-पु., फलपूरम् (श. च.)
वृहच्छतावरीघृत-न., असृग्दराधिकारे घृतम् (च. द. असृग्दर. चि.)
वृहच्छफरी-स्त्री., महाप्रोष्ठीविशेषः (राज.)
वृहच्छल्क-पु., चिङ्गटमत्स्यः (जटा.)
वृहच्छालपर्णी-स्त्री., महाशालपर्णी
वृहज्जीरक-न., स्थूलजीरकः (भा. वाजी. चि.)

वृहतिका-स्त्री., वार्त्ताकी
वृहत्कालशाक-पु., महाकासमर्दः (त्रिका.)
वृहत्काश पु., खग्गडतृणम् (प. मु.)
वृहत्कुक्षि-त्रि., तुन्दिलः (अम.)
वृहत्खर्जूरिका-स्त्री., राजखर्जूरिका (वै. निघ.)
वृहत्गोधूम-पु., महागोधूमः
वृहतृण -पु., वंशतृणम् (श. च.)
वृहत्त्वच-पु., निम्बवृक्षः (प. मु.)
वृहत्धुस्तूरक-पु., राजधुस्तूरः
वृहत्पञ्चमूल-न., बिल्वाग्निमन्थटुण्टुक- (श्योणाक) पाठाकाश्मरीच (सु. सू. ३८ अ.)
वृहत्पत्रा-स्त्री., त्रिपर्णिका (रा. नि. व. ७) कासमर्दक्षुपः (वै. निघ.)
वृहत्पर्णी-स्त्री., महाशणपुष्पीविशेषः (रा. नि. ४.)
वृहत्पाटलि-(ली)-पु., स्त्री., धुस्तूरवृक्षः (त्रिका.)
वृहत्पाद्-पु., वटवृक्षः (श. च.)
वृहत्पारे (ले) वत-न., महापारेवतफलम् (रा. नि. व. ११)
वृहत्पाली (न)-पु., वनजीरकक्षुपः (रा. नि. ११)
वृहत्पुष्प-पु., महाकूष्माण्डः (वै. निघ.)
वृहत्फल-न., कूष्माण्डः (भा. पू. १ भ. शा. व.)
वृहदम्ल-पु., कर्मरङ्गवृक्षः (श. च.)
वृहदेला-स्त्री., स्थूलैला (रा. नि. व. ६)
वृहद्गोल-न., तरम्बुजः (श. च.)
वृहद्दन्ती-स्त्री., एरण्डपत्रविटपदन्तीविशेषः
वृहद्द्रोणी-स्त्री., द्रोणीपरिमाणम् (१२८ श.)
वृहद्धान्य-पु., क्षेत्रेक्षुः । महाशालिः (प. मु.)
वृहद्बर-न., महाकोलीफलम् (मद. ब. ६)
वृहद्बला-स्त्री., महाबला (सि. यो. उन्मा. चि.-चैतसघृते) शुक्ररोधः । लज्जालुका (वै. निघ.)
वृहद्भण्डी-स्त्री., त्रायमाणालता (प्रयोग.) (कनकतैले.)
वृहद्भानु-पु., अग्निः, चित्रकवृक्षः (अम.)
वृहद्राव-(वी) (इन्)-पु., क्षुद्रपेचकः (रा. नि. व. १९)
वृहद्वर्ण-पु., माक्षिकनामोपधातुः (र. सा. सं.)
वृहद्वल्कल-पु., पट्टिकालोध्रम् (रा. नि. व. ६) सप्तपर्णवृक्षः (वै. निघ.)
वृहद्वल्ली-स्त्री., कारवल्ली (मद.)
वृहद्वात-पु., देवधान्यम् (र. मा.)
वृहद्बीज-पु., आम्रातकवृक्षः
वृहन्नल-पु., महापोटगलः (मे.)
वृहन्निम्ब-पु., महानिम्बः (वै. निघ.)
वृहन्नीली-स्त्री., महानीलीवृक्षः
वृहन्मरीच-पु., मरीचः (वै. निघ.) .
वृहल्लोनी-स्त्री., लोनीशाकभेदः (ज. द. ५७ अ.)
वेकट-पु., मत्स्यभेदः (मे.)
वेगनाशन-पु., श्लेष्मा (श. र.)
वेगनिरोध-पु., वेगाविधारणम् (निदानम्)
वेगिहरिण-पु., श्रीकारिमृगः (रा. नि. व. १९)
वेजानी-स्त्री., सोमराजी
वेट्टचन्दन-न., श्रीखण्डचन्दनान्यतरचन्दनम् (रा. नि. व. १२.)
वेढमिका-स्त्री., रोटिकाविशेषः (भा.)
वेणि-स्त्री., देवदाली (बा. कल्प १ अ.)
वेणिवेधनी-स्त्री., जलौका
वेणीग (मूलक)-न., उशीरः (रा. नि. व. १२)
वेणीफल-न., देवदालीफलम् (वै. निघ. २ भ. कामलानस्ये)
वेणीर-पु., अरिष्टम् (श. च.)
वेणुकर्कर-पु., करीरवृक्षः (त्रिका.)
वेणुनिःसृत-पु., इक्षुः (वै. निघ.)
वेतन-न.-रौप्यम् (श. च.)
वेतसी-स्त्री., वेतसवृक्षः (श. र.)
वेतालग्रह-पु., भूतग्रहविशेषः (वा. उ. ४ अ.)
वेतालरस-पु., कुष्ठाधिकारे रसः (र. सा. सं.)
वेत्रक-पु., रामशरः (वै. निघ.)
वेत्रमूला-स्त्री., शङ्खिनी (वै. निघ.)
वेत्रविष-न., तन्नामकपुष्पविषभेदः (सु. कल्प. २. अ.)
वेत्राग्र-न., नाडीशाकविशेषः (राज. ३ प.)
वेदनाधिष्ठान-न., मनोदेहेन्द्रियादिः
वेदयिता-त्रि., मनसः प्रवर्त्तकः (सु. शा. ३ अ.)
वेदार-पु., कृकलासः (त्रिका.)
वेदि-स्त्री., परिष्कृतभूमिः (अम. न.) अम्बष्ठा (श. च.)
वेदिक-पु., श्वेतधुस्तूरकः (वै. निघ.)
वेधनिका-स्त्री., छिद्रकरणार्थास्त्रभेदः (अम.)
वेधफल-पु.,करञ्जवृक्षः (रानि व९)
वेधमुख्यक-पु., गन्धशठी हरिद्रा (अमभ)
वेधस-न., अङ्गुष्ठमूलम् (श. च.)
वेधा-(स्.) श्वेतार्कवृक्षः (श. च.)
वेर-न., कुङ्कुमम् (त्रिका.) वार्त्ताकम् (त्रिका.) शरीरम् (मे.)

वेरक-न., कर्पूरः (हारा.)
वेलन-न., हिङ्गुः (ज. द.)
वेलाजलपान-न., वेलायां वारिपानम् (रा. नि. व १४)
वेलाज्वर-पु., ज्वरविशेषः (ज्व. नि.)
वेलिभुक्प्रिय-पु., सुगन्धाम्रः (श. र.)
वेल्लगिरिका-स्त्री.. प्रियङ्गुः (वै. निघ.)
वेल्लज-न., मरिचम् (भा. पू. १ भ.)
वेल्लन-न., मरिचम् (प. मु.) लुण्ठनम् (त्रिका.) रोटीवेलनार्थं वर्तुलकाष्ठम् (भा.)
वेल्लनी-स्त्री., वल्लीदूर्वा (रा. नि. व. ८)
वेल्लन्तरादिगणः-पु., तदादिद्रव्यवर्गः (वा. सू. १५ अ.)
वेल्लभव-न., मरिचम् (वै. निघ. कास. चि. त्रिकटुचूर्णे)
वेल्लरी-स्त्री., कृष्णवृद्धदारकः (वै. निघ.) (२ भ.) (वा.व्या. चि. एरण्डपाके) वल्लीदूर्वा (वै. निघ.)
वेल्लि-स्त्री., लता (श. र.)
वेल्लिका-स्त्री., इन्दूपोदकी (रा. नि. व. २३)
वेल्लिकाख्या-स्त्री., विल्वशलाटुः (श. च.)
वेशन-न., द्विदलचूर्णम्
वेशन्त-पु., क्षुद्रसरोवरम् (अ. म.)
वेशर-अश्वतरः (त्रिका.)
वेशवारीकृत-पु., पिष्टम् (वा. चि. ५ अ.)
वेशीजाता-स्त्री., पुत्रदात्रीलता
वेश्मकलिङ्ग-पु., चटकपक्षी (राज.)
वेश्मकूल-पु., चचेण्डा (मद. । रा. नि. व. ७)
वेश्मनकुल-पु., छुछुन्दरी (त्रिका.)
वेश्मरस-पु., मोचरसः (वै. निघ.)
वेश्या-स्त्री., पाठा (श. च.)
वेश्याचार्य-पु., पीठमर्दवृक्षः
वेषण-पु., कासमर्दवृक्षः (हारा.)
वेषणा-स्त्री., वितुन्नकवृक्षः (र. मा.)
वेषवार-पु., वेशवारः (अ. टी. रा.)
वेषिका-स्त्री , जातीपुष्पवृक्षः
वेष्टवंश-पु., कण्टककिणेत्यपरनामवंशभेदः (श. च.)
वेष्टा-स्त्री., हरीतकी (वै. निघ.)
वेष्प-पु., पानीयम्
वेसन-न., द्विदलचूर्णम् (भा.)
वेसनमोदक-पु., वेसनकृतलड्डुकभेदः (भा.)
वैकङ्कत-पु., श्रुवावृक्षः (श. र.) न., वैकङ्कतफलम्
वैकतिक-पु , मणिकारः (हे. च.)
वैकुण्ठाश्रमी (इन्)- पु., वैद्यवल्लभनामग्रन्थकारः
वैकृतज्वर-पु., अप्रकृतकालजातो वातज्वरः (मा. नि.)
वैजनन-पु., प्रसवमासः (अम.)
वैजपाणि-पु., ऋषिविशेषः (च.)
वैजिक-न., शिग्रुतैलम् (मे.) पु., सद्योजाताङ्कुरः (मे.) आत्मा (श. मा.)
वैडालशकृत् न.. विडालविष्ठा (च. द. ज्व. चि. धूपे.)
वैतंसिक-पु., मांसविक्रेता (अम.)
वैतरणवस्ति-पु., निरूहवस्तिभेदः (च. द.) (निरूहवस्तौ)
वैतस-पु., अम्लवेतसम् (जटा.)
वैदलान्न-न., वैदलयुक्तभक्तम् (वै. निघ.)
वैदलिकशिम्ब-पु., वैदलिकशिम्बी
वैदारिक-पु., हीनमध्यप्रवृद्धवातादिजनितसन्निपातज्वरः
वैदिका-स्त्री- , भूमिजम्बूवृक्षः (वै. निघ.)
वैदुल-न., वेतसमूलम् (सु. चि. १. अ.)
वैदूर्यवर्ण-त्रि., कृष्णवर्णः (भा.)
वैद्यक-न., वैद्यस्य कर्म । अष्टाङ्गचिकित्साशास्त्रम् । दशाङ्गवैद्यशास्त्रम् (वै. निघ.)
वैद्यचिन्तामणि-पु., वल्लभेन्द्रकृतवैद्यकग्रन्थः
वैद्यजीवन-न., लोलिम्बराजकृतवैद्यकग्रन्थः। रुद्रटकृतः च
वैद्यतोषसंग्रह-पु., भीमसेनकृतचिकित्सासंग्रहः
वैद्यत्रिंशट्टीका-स्त्री., चन्द्रकृतत्रिंशच्छ्लोकीटीका
वैद्यदर्पण न., वैद्यकसंग्रहः
वैद्यबन्धु-पु., आरग्वधवृक्षः (श. च.)
वैद्यमनोरमा-स्त्री., वैद्यकग्रन्थभेदः
वैद्यमाता-स्त्री., वासा (अम.)
वैद्यरसायन-न., रसायनग्रन्थविशेषः
वैद्यवल्लभ-पु., उदयरुचिकृतवैद्यकग्रन्थः
वैद्यविनोद-पु., शङ्करकृतवैद्यकग्रन्थः
वैद्यविलास-पु , रघुनाथकृतवैद्यकशास्त्रम्
वैद्यवृन्द-पु., नारायणकृतवैद्यशास्त्रम्
वैद्यसार-पु., हर्षकीर्तिरचितवैद्यकम्
वैद्यसिंही-स्त्री., वासा (श. र.)
वैद्यहितोपदेश- पु., श्रीकण्ठकृतं तथा शिवपण्डितकृतं च चिकित्साशास्त्रम्
वैद्या-स्त्री., काकोली (श. च.)
वैद्यामृत-न., नारायणदासकृतं रामेश्वरकृतं च वैद्यशास्त्रम्
वैद्यामृतलहरी-स्त्री., मथुरानाथकृतःवैद्यक ग्रन्थः
वैद्यावतंश-पु., लोलिम्बराजकृतवैद्यकम्

वैपरीत्यलज्जालु-पु , स्त्री., लघुलज्जालुका (रा. नि.व. ५)
वैपादिक-न., कुष्ठरोगभेदः (मा. नि.)
वैराट-पु., इन्द्रगोपकीटः
वैरातङ्क-पु., अर्जुनवृक्षः (रा. नि. व. ९)
वैरोचनरस-पु , अजीर्णादौ रसः (रस. र.)
वैवस्वतद्रुम- पु., कुष्ठवैरिवृक्षः (अत्रि.)
वैशाख-पु., मन्थनदण्डः । वर्षस्य प्रथमः मासः (अम.) रक्तपुनर्नवा (वै. निघ.)
वैशिकी-स्त्री., वमनविरेचनादिषु चतुर्विध शोधनेषु एकम् (च. द. वमनाधिकारे)
वैश्या-स्त्री., हरिद्रा (वै. निघ.)
वैश्रवणालय-पु., वटवृक्षः (हे. च.)
वैश्रवणोदय-पु., वटवृक्षः (र मा.)
वैश्वानररस-पु., उदराधिकारे रसः (रस. चि.)
वैष्किर-त्रि., विकीर्य भक्षणशीलः कुक्कुटादिः (वा. चि. ६ अ.)
वैसारिण-पु., मत्स्यः (अम.)
वोड-पु., गुवाकवृक्षः (श. र.)
वोड्र-पु., गोनससर्पः । मत्स्यविशेषः (मे.)
वोढ-पु., कदम्बवृक्षः (वै. निघ.)
वोण्ट-पु., वृन्तम् (श. र.)
वोद-पु., आर्द्रम्
वोदाल-पु., मत्स्यविशेषः (शर)
वोपदेव-पु., हृदयदीपकसिद्धमन्त्रशतश्लोकीप्रणेता
वोरट-पु., कुन्दवृक्षः-(त्रिका.)
वोरव-पु., तन्नामकव्रीहिधान्यभेदः (राज. ३ प.)
व्यडम्बक-पु., एरण्डवृक्षः (अम. सं. कनकतैले)
व्यण्डा-स्त्री., भूम्यामलकी (वै. निघ.)
व्यतिक्रम-पु.,क्रमविपर्ययः
व्यथा-स्त्री., वेदना
व्यवहारिक-(का)-पु., स्त्री., इङ्गुदीवृक्षः । सम्मार्जनी (मे.)
व्याघ्रकर-पु., रक्तैरण्डः (वै. निघ.)
व्याघ्रखड्ग-पु., व्याघ्रनखम् (वै. निघ.)
व्याघ्रघण्टा (ण्टी)-स्त्री., कोङ्कणे प्रसिद्धलताविशेष. (वै. निघ.) वाघांटी
व्याघ्रतरु-पु., रक्तैरण्डः (वै. निघ.)
व्याघ्रनखी-स्त्री., व्याघ्रनखः (भा. ४ भ. प्रद. चि.)
व्याघ्रनायक(सेवक)-पु., शालावृकः (रा. नि. व. १९)
व्याघ्रपात् (द)-पु.,विकङ्कतवृक्षः (रा. नि. व. ११)
व्याघ्रपुच्छ-पु., एरण्डवृक्षः (अम.)
व्याघ्रपुष्प-पु., व्याघ्रनखः (वै. निघ.)
व्याघ्रहस्त-पु., रक्तैरण्डः (रा. नि. व. ८)
व्याघ्राङ्घ्रिज-पु., व्याघ्रनखम् (वै. निघ.)
व्याघ्राट-पु.,भरद्वाजपक्षी (अम.)
व्याघ्रादनी-स्त्री., त्रिवृता (प. मु.)
व्याघ्रायुध-न., व्याघ्रनखम् (वै. निघ.)
व्याघ्रास्य-पु., विडालः
व्याघ्री-स्त्री., कण्टकारी (प. मु.) वराटिकाभेदः (रा. नि. व. १३) व्याघ्रपत्नी । व्याघ्रनखी (च. द. वा. व्या. चि.)
व्याघ्रीयुक् (युग)-स्त्री., न., बृहती । कण्टकारी च
व्याड-पु., सर्पः । हिंस्रः (अम.)
व्याडम्ब-पु., रक्तैरण्डः (वै. निघ.)
व्याडायुध-न., नखीनामगन्धद्रव्यम्
व्याधभीत-पु., मृगः
व्याधिघ्न (जित्)-पु., आरग्वधवृक्षः (ज. द.)
व्याधिनाशन-पु., द्वीपान्तरवचा (वै. निघ.)
व्याध्यर्गल-पु., दामोदरकृतवैद्यकग्रन्थः
व्याप-न., कुष्ठौषधम् (अम.)
व्यामण-न., व्यामम्
व्यालकरज-पु., व्याघ्रनखम् (रा. नि. व. १२)
व्यालपत्र-पु., एर्वारुकलता (कश्चित्)
व्यालप्रहरण-न., व्याघ्रनखम् (वै. निघ.)
व्यालमृग-पु., चित्रकव्याघ्रः (भारतम्)
व्यालम्ब-पु., रक्तैरण्डः (वैद्यकम्)
व्यालवल्लरी-स्त्री., नागवल्ली (वै. निघ.)
व्यालवेणी-स्त्री., देवदाली (वै. निघ.)
व्यासदीपप्रजा-स्त्री., वन्ध्याकर्कटी (वै. निघ.)
व्युष्ट-न., प्रभातम् । पर्युषितम् । फलम् (हे. च.) (त्रि.) उषितम् । दग्धम् (मे)
व्योमचारी (इन्)-पु., पक्षी (मे.)
व्योमनासिका-स्त्री., भारतीपक्षी (त्रिका.)
व्योमपूर-न., सुगन्धतृणम् (वै. निघ.)
व्योषाद्यगुग्गुलु-पु., स्थौल्यरोगे गुग्गुलुः (रस. र.)
व्योषाद्यघृत-न., अर्शसि घृतम्
व्योषाद्यचूर्ण-न., रक्तार्शसि रक्तातिसारे च हितम्
व्योषाद्यलौह-न., विद्रध्यधिकारे लौहम् (रस. चि.)
व्रजभू-पु., केलिकदम्बवृक्षः (श. च.)
व्रणकृत्-पु.,भल्लातकवृक्षः (र. मा.)

व्रणघ्नी–स्त्री , लघुकारवेल्लकम् (वै. निघ.)
व्रणजिता–स्त्री.,मुण्डी (वै. निघ.)
व्रणद्विट्–पु., ब्राह्मणयष्टिका (श. च.)
व्रणरोपणरस–पु., क्षुद्ररोगाधिकारे औषधविशेषः (रस. चि.)
व्रणशुक्र–न., नेत्रतारकगतरोगविशेषः (भा.)
व्रणशोथ–पु., व्रणनिमित्तश्वयथुः (मा. नि.)
व्रणह पु., एरण्डवृक्षः (श.च.) स्त्री., (हा) गुडूची (शर)
व्रणहरी–स्त्री., लाङ्गलिकौषधम् (वै. निघ.)
व्रणोपक्रम–पु., व्रणचिकित्सा (सु. चि. १ अ.)
व्रत-न., ईप्सितकामनियमः (च. सू. १ अ.)
व्रतति-(ती)–स्त्री., लता (अम.)
व्रतादेश–पु., उपनयनम्, स्मृतिः
व्रतोपायन–न., प्रहेणकाख्यापिष्टकभेदः
व्रश्चन–न., छेदनम् पु., स्वर्णादिछेदकं अस्त्रम् (अम.)
व्रीडा–स्त्री., वनकुलत्थिका (प. मु.) लज्जा
व्रीहिकाञ्चन–पु., मसूरवृक्षः (त्रिका.)
व्रीहितुण्डिका–स्त्री., देवधान्यम् (वै. निघ.)
व्रीहिधान्य–न., षष्टिकादिधान्यम् (वै. निघ.)
व्रीहिभेद–पु., चीनाकधान्यम् (र. मा.)
व्रीहिराजिक–पु., चीनाकधान्यम् कङ्गुधान्यम् (मे.)
व्रीहिश्रेष्ठ–पु., शालिधान्यम् (रा. नि. व. १६)
व्रीह्यास्य–न., व्रीहिमुखास्त्रभेदः (च. द.)

श

शंब–पु., मुषलाग्रस्थलौहमण्डलम् (धरणिः)
शंवर- न., जलम् (अम)
शकटाख्य(क)–पु., धववृक्षः (र. मा.)
शकुनघ्ना–स्त्री.. क्षुद्रगृहगोधिका (त्रिका.)
शकुनिप्रपा–स्त्री., पक्षिपानीयशाला (हारा.)
शकुन्त (न्ति)–पु. पक्षी (अम) काकभेदः, कुकुटभेदः (वै. निघ.) भासपक्षी (उणा.) कीटविशेषः (मे.) (वै. निघ)
शकुल–पु., मत्स्यविशेषः (राज. ३ प.)
शकुलगण्ड–पु., मत्स्यविशेषः (त्रिका.)
शकुला–स्त्री., कटुरोहिणी (रा. नि. व. ६)
शकुलार्भक–पु., गडकमत्स्यः (अम.)
शकुलाक्षक-(का)–पु., स्त्री., श्वेतदूर्वा (अम.)
शकृत्करि-(री)–पु., स्त्री., गोवत्सः (त्रिका.)
शकृत्कार–पु., मलत्यागकारकः (व्याक.)
शकृद्द्वार– न., मलद्वारम् (हे. च.)
शकृद्भव–त्रि., द्रवरूपः (भा. म. ४भ. तालुकण्टकचि)

शक्कर (रि)–पु., वृषः (हे. च. । त्रिका.)
शक्तव–पु., भृष्टयवादिचूर्णम्
शक्तिक–पु,, गन्धकः (रस. र. रस. कौ. भैष.) (द्वादशायसे.)
शक्तिपर्ण–पु., सप्तपर्णवृक्षः (जटा.)
शक्तुक–पु., तन्नामकविषभेदः (भा. पू. १ म.) (विष. व.) न., शक्तुः (भा. कौ.)
शक्तुपिण्डी–स्त्री., शक्तुकृतपिण्डाकारभोजनद्रव्यम् (राज. ३ प.)
शक्तुफला (ली)–स्त्री., शमीवृक्षः (अम.)
शक्त्ववलेहिका–स्त्री., शक्तुकृतावलेहिका (रा. ज. ३प)
शक्रचापसमुद्भवा–स्त्री., अलावुः (वै. निघ.)
शक्रज-(जातः) पु., काकः (त्रिका.)
शक्रजा–स्त्री., इन्द्रवारुणी (सु. चि. ३८ अ.)
शक्रदारु–पु., शालवृक्षः । तैलदेवदारुवृक्षः (वै. नि. घ)
शक्रद्रुम–पु., वकुलवृक्षः (भा. म. १ भ. ज्वरोपद्रवचि.- द्वात्रिंशतक्काथे) तैलदेवदारुः (भा.)
शक्रनेमी–स्त्री., ह्रस्वमेषशृङ्गी । शुक्लकुटजवृक्षः, देवदारु-वृक्षः (वै. नि. घ)
शक्रपर्याय–पु., कुटजवृक्षः (प. मु.)
शक्रपुष्प–न., इन्द्रयवः (वै. निघ. जीज्व. चि. लवङ्गादि-कषाये)
शक्रपुष्पा(ष्पी)–स्त्री., नागदमनी (र. मा.) लाङ्गली-वृक्षः (अम.)
शक्रपुष्पिका–स्त्री., अग्निशिखावृक्षः (र. मा.)
शक्रभूभवा–स्त्री., इन्द्रवारुणी (श. च.)
शक्रभूरुह–पु., कुटजवृक्षः (वै. नि. घ)
शक्रमूर्द्धा (न्)–पु., वल्मीकम् (त्रिका.)
शक्रवीज–न., इन्द्रयवः
शक्रशाखी (इन्)–पु., कुटजवृक्षः (भा.)
शक्रशिरा–पु., वल्मीकम् (रा. नि. व. १३)
शक्रसुधा-स्त्री., कुन्दुरुखोटी । (श. च.)
शक्रसृष्टा–स्त्री., हरीतकी (त्रिका.)
शक्राख्य–पु., उलूकः, पेचकः (त्रिका.)
शक्राणी–स्त्री., निर्गुण्डी
शक्रासन–न., भङ्गा (राज.) (पु.) विजयावृक्षः (प. मु.) कुटजवृक्षः (श. च.) इन्द्रयवः (वै. निघ) (२ भ. दुर्जलज्ब. चि. ज्ञानोदयरसे)

शक्रेन्द्र-पु., इन्द्रगोपकीटः (वै. निघ.) (अर्शः चि. त्रिफलागुग्गुलौ)

शक्वरी-स्त्री., अङ्गुलिः (उणा.)

शक्व (न)-पु., गजः (उणा.)

शङ्करप्रिय-पु , द्रोणपुष्पी (प. मु.) तित्तिरपक्षी (शब्दकल्पद्रुमः)

शङ्करमत (लौह)-न., अर्शसि लौहम् (भा.)

शङ्करशुक्र-न., पारदः (भा. ज्व. चि. कल्पतरौ)

शङ्करस्वेद-पु., आमवातहरे स्वेदविशेषः (ज. द. १८ अ.) 'शकृता महिषाश्वानां गोमयेन तथैव च। अग्नितप्तेन यः स्वेदः शङ्करस्वेद उच्यते

शङ्करावास-पु., भीमसेनीकर्पूरः (रा. नि. व. १२)

शङ्कराह्वया-स्त्री., ह्रस्वशमीवृक्षः (वै. निघ.)

शङ्कुकर्ण-पु., गर्दभः (त्रिका.)

शङ्कुचि-पु., मत्स्यविशेषः (श. र.)

शङ्कुतरु-(वृक्ष)-पु., शालवृक्षः (श. र.)

शङ्कुला स्त्री., यन्त्रिका (शब्दकल्पः) उत्पलपत्रम् (उणा)

शङ्कोच-(चि)-पु , मत्स्यविशेषः (ज. टा.)

शङ्खकन्द-पु., शङ्खालुः (प. मु.)

शङ्खकुसुमा-स्त्री., शङ्खपुष्पी (रा. नि. व. ३)

शङ्खचरी (चर्ची)-स्त्री., ललाटिका (त्रिका. श. र.)

शङ्खज-पु., पारावताण्डाकारस्थूलमौक्तिकम् (शब्दकल्पः)

शङ्खद्रावक-पु., प्लीहयकृदधिकारे द्रावकविशेषः (भैष)

शङ्खधरा-स्त्री., हिलमोचिका (भा. पू.)(१ भ. शा. व.)

शङ्खधवला-स्त्री., शुक्लयूथिका (वै. निघ.)

शङ्खनाम्नी-स्त्री., शङ्खपुष्पी (वै. निघ.)

शङ्खपाल-पु., स्वनामप्रसिद्धः दर्वीकरमहासर्पः (सु. कल्प. ४ अ.)

शङ्खमुख-पु., कुम्भीरः (हे. च.)

शङ्खवटी-स्त्री., अग्निमान्द्ये शूलाधिकारे च हिता वटी (रस. चि. । भैष)

शङ्खविष-न., विषभेदः

शङ्खसङ्काश-पु., शङ्खालुः (वै. निघ.)

शङ्खाख्य-पु., वृहन्नखम् (र. मा.)

शङ्खावर्त-पु., शम्बूकावर्तभगन्दररोगः (सु. शा. ५ अ)

शङ्खास्थि-न., मस्तकस्थास्थिद्वयम् (च. शा. ७ अ.) पृष्ठास्थि (रा. नि. व. १८)

शङ्खाहुली-स्त्री., शङ्खपुष्पी (रा. नि. व. ३)

शङ्खाह्वया-स्त्री., शङ्खपुष्पीलता (रा. नि. व. ३)

शङ्खिन-पु., शिरीषवृक्षः (वै. निघ.)

शङ्खिनिका-स्त्री., ग्रन्थिपर्णवृक्षः (वै. निघ.)

शङ्खिनीवास-पु., शाखोट वृक्षः (श. च.)

शङ्खोदधिमल-पु., समुद्रफेनः (वै. निघ.)

शङ्खोदरी-स्त्री., तृणविशेषम्

शट्टक-न., सघृतजलमिश्रितशालिचूर्णम् (भा.)

शठाङ्गा-स्त्री., अम्बष्ठा (रा. नि. व. ४)

शठिका-स्त्री., स्वनामख्यातमूलम्

शठीरूपा-स्त्री., कन्दगुडूची (वै. नि.)

शठ्यादि-पु.. त्रिदोषज्वरे कषायविशेषः (च. द. ज्व चि.)

शणकन्द-पु., चर्मकषा (रस. र. उद. चि. वह्निभल्लातकरसे)

शणघण्टा-स्त्री., शणपुष्पी (रा. नि. व. ४)

शणपर्णी-स्त्री., असपर्णी (श. र.)

शणपुष्पिका-स्त्री.. शणपुष्पी। आढकी (भा. पू. १ भ. धा. व.)

शणमूल-न., शणशिफा (सु.सू. ३६ अ.)

शणाल (लुक)-पु., आरग्वधवृक्षः (श. र.)

शणिका-स्त्री., शणपुष्पी (रा. नि. व. ४)

शण्ड-न., पद्मिनी (श. र.) पु., नपुंसकः (अम.)

शण्ढ-पु., क्लीबः (अ. टी. भ.) वन्ध्यपुरुषः (जटा.) अन्तर्महल्लिकः (अम.)

शतकीम्भ(क)म्-न., स्वर्णम् (वै. निघ.)

शतक्रतुद्रुम-पु.,कृष्णकुटजवृक्षः (वै. निघ.)

शतक्रतुयव-पु., इन्द्रयवः (वै. निघ.)

शतखण्ड-न., सुवर्णम् (श. च.)

शतच्छद-पु , काष्ठकुक्कुटपक्षी (त्रिका.)

शतजटा-स्त्री., शतमूली (चि. क. क.)

शतदन्तिका-स्त्री., नागदन्ती (रा. नि. ब ५)

शतदलमल्लिका-स्त्री., स्वनामख्यातपुष्पक्षुपः (प. मु.)

शतदला-स्त्री., शतपत्रीपुष्पवृक्षः (रा. नि. व. १० ।

शतद्रु-पु., नदीविशेषा (रा. नि. व. १४)

शतधा-स्त्री.,दूर्वा

शतपद्म-न., श्वेतकमलम् (र. मा.)

शतपात् (द्)-स्त्री., शतपदी (जटा.)

शतपादिका-स्त्री., काकोली (जटा.) कर्णजलौका (श.र.)

शतपुत्री-स्त्री., ह्रस्वशतमूली (र. सा. सं.) लघुघोषा (वै. निघ.)

शतपोनक-पु., शतपोनकनामभगन्दरविशेषः । शुक्ररोगः (कश्चित्)

शतपोरक(पौर)-पु., इक्षुविशेषः (सु. सू. ४५ अ.)

शतप्रास-पु., करवीरवृक्षः (अम.)

शतफल-पु., वंशः
शतभीरु-स्त्री., मल्लिकापुष्पवृक्षः (अम.)
शतभेदक (न)-पु., अम्लवेतसः (मद..व. ६)
शतमान-पु., रूप्यमलः। आढकमानम् (अम भ.)
शतमूला-स्त्री., नीलदूर्वा (रा. नि. व. ८) महाशतमूली (रा. नि. व. ४) वचा (रा नि. व. ६)
शतबेधनी-स्त्री., चुक्रिका
शतश्लोकी-वोपदेवकृतं चन्द्रकलानामकं द्रव्यगुणशास्त्रम्
शतश्लोकीटीका-स्त्री., कृष्णदत्तकृतशतश्लोकीटीका
शतसुता-स्त्री., शतावरी (रस. र. शिरोरो. चि. वरुणाद्य घृते)
शताक्षी-स्त्री., शताह्वा रात्रिः (श. च.)
शताङ्ग-पु., तिनिशवृक्षः (रा. नि व. ९)
शताङ्गुल-पु., तालवृक्षः (कश्चित्)
शतायुष-पु., मनुष्यः (वै. निघ.)
शतारु-(स) (रुषी) न., स्त्री., कुष्ठरोगभेदः (भा. कुष्ठ चि.)
शतावरीमण्डूर-न., परिणामशूले मण्डूरम्
शताह्वाद्वय-न., शतपुष्पामधुरिकाद्वयम् (च. सू. ३)
शत्र-न., बलम् (त्रिका.)
शत्रि-(द्रि)-पु., गजः (उणा.)
शत्रुद्रुम-पु., अम्लवेतसः (कश्चित्.)
शत्रुभूमिज-पु., नीलाञ्जनम् (वै. निघ.)
शद-पु., शाकफलादिः (व्याक.)
शनकावलि-पु, स्त्री., गजपिप्पली (श. च.)
शनपर्णी-स्त्री., कटुकी (श. च.)
शनिप्रिय-न., नीलकान्तमणिः (शब्दकल्पद्रुमः)
शनीरुह-पु., महिषः (वै. निघ.)
शस- पु., तृणविशेषम् (अम.)
शब्दग्रह-पु., कर्णः (अम.)
शब्दभेदी (इन्)-पु., मलद्वारम् (शब्दकल्पः)
शब्दमाल-पु., रन्ध्रवंशः (वै. निघ.)
शब्दरोचन-न., तृणम् (वै. निघ,)
शब्दाढ्य-न., श्रेष्ठकांस्यधातुः (वैनिघ.)
शब्दाधिष्ठान-न., श्रवणेन्द्रियम् (त्रिका.)
शमठ-पु., शाकविशेषः। तूदभेदः (वै. निघ.)
शमल-न., विष्ठा (अम.)
शमि-स्त्री., शिम्बी (हेच.)
शमिका-स्त्री., महाशमीवृक्षः (वै. निघ.)
शमि (मी) ज (जा)-पु., स्त्री., रक्तकुलत्थकः (जा) -शिम्बीधान्यम् (भा. पू. १ भ. धा. वा.)
शमि (मी) र-पु., ह्रस्वशमीवृक्षः (वै. निघ.)
शमिला-स्त्री., जातीपुष्पवृक्षः (वै. निघ.)
शमीधान्य-न., शिम्बीधान्यम्। माषादिः 'मुद्गराजमाषतिलकुलत्थाः (च)
शमीपात्रा-स्त्री., लज्जालुकालता (रा. नि. व. ५)
शमीरकन्द-पु., वाराहीकन्दः (कोषान्तरम्)
शम्पदा-स्त्री., वृद्धिः (वै. निघ.)
शम्पात-पु., आरग्वधवृक्षः (श. र.)
शम्ब-(व) रकन्द-पु., वाराहीकन्दः (रा. नि. व. ७.)
शम्ब(व)रचन्दन-न., वर्बरचन्दनम्। (रा. नि.व. १२)
शम्ब (व) रदेशज-पु., शुक्लरोध्रः (वै. निघ.)
शम्ब (व) राहार-पु., वनबदरः (वै. निघ.)
शम्ब (व) री-स्त्री., आखुकर्णीलता (रा. नि. व.२३) श्रुतश्रेणीक्षुपः (रा. नि. व. ४)
शम्बरीगन्धा-स्त्री., वनतुलसी (वै. निघ.)
शम्ब (व) रोद्भव-पु., शुक्लरोध्रः (वा. उ. ३२ अ.)
शम्बु-पु., शम्बूकः (हड्डचन्द्र.)
शम्बुक्क-पु., शम्बूकः (श. र.)
शम्बूकपुष्पी-स्त्री., शङ्खपुष्पी (भा. पू. १ भ. चित्तभ्रम. चि.)
शम्बूकाद्यतैल-न., कर्णरोगे तैलम् (रस. र.)
शम्भुकेतन-पु., पीतलोध्रः (वै. निघ.)
शम्भुतेज-न., पारदः (र. सा. सं.)
शम्भुप्रिया-स्त्री., आमलकी (श. र.)
शम्भुवीज-न., पारदः
शम्भोःकण्ठविभूषण-न., विषम् (भैष. पञ्चाननरसे)
शय-पु., हस्तः (रा.नि.व. १८) सर्पः (मे.) निद्रा (विश्वः)
शयथ पु., सर्पविशेषः। वराहः। मीनः मृत्युः (उणा.) (त्रि.), गाढनिद्रितः (हे. च.)
शयानक-पु., कृकलासः (हे.च.) सर्पः (उणा.)
शयामूत्र-न., शय्यामूत्रम् (वै. निघ.)
शयालु-पु., कुक्कुरः (त्रिका.) शृगालः (त्रि.) अलसम्
शयित-पु., अजगरः। शलि (शमा.) (त्रि.) (अम.)
शयु-पु., अजगरनाम सर्पजातिः (अ. म.)
शय्यामूत्र-न., शिशोस्तन्नामकरोगः (र.स.र.बाल. चि.)
शरखङ्क-पु., खागतृणम् (प. मु.)
शरजम्-न., नवनीतम् (शब्दकल्पः।) हैयङ्गवीनघृतम् (हे. च.)
शरट-पु., कुशुम्भशाकः (रमा.) पूकतिरङ्गः (प. मु.) कृकलासः-(अटि.) स्त्री., (टी.,)-खदिरपर्णी (वै. निघ. जीर्णज्व. चि.)

शरणा-(णी) स्त्री., प्रसारणी (म. द. व ३) (श. र.) जयंती (शा)
शरण्ड-पु., पक्षी (श. र.) गृहगोधा, कृकलासः (मे.)
शरत्कामी (इन्)-पु., कुकुरः (श. र.)
शरदन्त-पु., शरः । हेमन्तकाल. (रा. नि. व. २१)
शरदा-स्त्री., वत्सरः (शरद्कालः)
शरदुदाशय-न , शरत्कालिकसरोवरम् (भागवतम्)
शरदुद्भव-पु., वृत्तपत्रशाकविशेषः (र. सा. सं.)
शरबीज-न., शरधान्यम् (वै. निघ.)
शरभूमिज-पु., गन्धकः
शरमल्ल-पु., शारिकाभेदः । मयनभेदः (श. च.)
शरल-पु., सरलवृक्षः (शब्दकल्पः)
शरलपृष्ठक-पु., पर्वतमृगः
शरलक-न., जलम् (श. च.)
शराटि-(डि) (ति)-पु., आटिनामकपक्षी (श. र. अ. टी. र. मा.)
शराटिका-स्त्री., शरारिपक्षी । खदिरपर्णी (वै. निघ.)
शरादिपञ्चमूल-न., शरादिपञ्चद्रव्यकृतकषायः (च. द. अश्म चि. शरादिघृते)
शरादिपञ्चमूलाद्यघृत-न., अश्मर्याः घृतम् (च. द. अश्म. चि.)
शरालि-(का) ली-स्त्री., शरारिपक्षी (श. र.)
शरावार्द्ध-न., अर्द्धशरावपरिमाणम् (प. प्र.)
शराविला-स्त्री., प्रमेहपीडकाभेदः (सु. नि. ६ अ.)
शरित-पु., श्लेष्मातकवृक्षः जयन्ती (श. र.)
शरिमा-(न् -पु.,) प्रसवः
शरी-स्त्री., मेथीतृणम् (भा.) शरपुष्पनलः
शरीरज-पु., रोगः (धरणिः त्रि.,) देहमार्जनम्
शरीर (परि) मार्जन-न., देहमार्जनम् (राज २ प.
शरीरसंस्कार-पु., देहस्य पवित्रीकरणम्
शरीरावरण-न., त्वक् (रा. नि. व. १८)
शरीरास्थि-न., कङ्कालः (रा. नि. व. १८)
शरेष्ट-पु., आम्रवृक्षः (ज. टा.)
शरोटिका-स्त्री., लज्जालुका (वै. निघ.)
शरीरोपस्तम्भ-पु., शरीरधारकस्तम्भः (च. सू. ११ अ)
शर्करकन्द-पु., वालुकाविशेषः
शर्करजा-स्त्री., मधुशर्करा (रा. नि. व. १४)
शर्कराक्ष-पु., ऋषिविशेषः (च.)
शर्करालेह-पु., रसायनाधिकारे लेहः (रस. र.)
शर्करासुरभि-पु., शर्करासवः (वै. निघ.)

शर्करोदक-न., सिताजलम् (भा.)
शर्द्ध-(न)-पु., न., मरुत्करः । अपानवायुः (व्याकरणम्)
शर्द्धञ्जह-पु., शिम्बादिः । माषः (व्याक.) (त्रि.,) मलद्वारेण वायुत्यागी
शर्मणी-स्त्री., ब्राह्मीक्षुपः (वै. निघ.)
शर्मरा-स्त्री., दारुहरिद्रा (धरणी.)
शर्माख्य-पु., मसूरः (प. मु.)
शर्वरीद्वय-न., हरिद्रादारुहरिद्राच (भैष.) (क्षुद्ररो. चि.)
शर्षप-पु., सर्षपः
शल-पु., न., तालवृक्षः (वै. निघ.) उष्ट्रः (हे. च.) शल्लकीकण्टकः (अम.)
शलक-पु., तालवृक्षः । शल्लकीकण्टकः (वै. निघ.) मर्कटकः (त्रिका.)
शलङ्ग-पु., लवणविशेषः (उणा.)
शलभोलि-पु., उष्ट्रः (हे. च.)
शलली-स्त्री., शल्लकीकण्टकः (अम.)
शलाकाधिष्ठानास्थि-स्त्री., पाणिपादयोः शलाकाख्याधारभूतानि अस्थीनि । तानि ४ (च. शा. ७ अ.)
शलाट-पु.,शकटपरिमाणम् । द्विसहस्रपलानि (हे. च.)
शलालु-न., सुगन्धद्रव्यविशेषः (व्याक.)
शली-स्त्री., क्षुद्रशल्लकीमृगः (रा. नि. व. १७)
शल्क-न., खण्डः (अम.) मत्स्यत्वक् (कोषान्तरम्) वल्कलम् (अम.)
शल्कल-न., मत्स्यशल्कः । तरुवल्कलम् (व्याक.)
शल्कली (इन्)-पु., मत्स्यः (श. र.)
शल्पदा-स्त्री., मेदा
शल्पपर्णिका-स्त्री., मेदा
शल्मलि(ली)-पु., शाल्मलिवृक्षः (लिक) रक्तरोहितकवृक्षः (रानि. व. ८)
शल्मलिक-पु., रक्तरोहितकः
शल्यकण्ठ-पु., सल्लकीमृगः (श. च.)
शल्यचिकित्सा-स्त्री., अस्त्रचिकित्सा
शल्यतन्त्र-न., सौश्रुताष्टविधतन्त्रान्यतमतन्त्रम् (सु. सू. १ अ.)
शल्यमृग-पु., शल्लकीमृगः
शल्यलोम-(न्)- न., शल्लकीरोमन् (रानि. व. १९)
शल्या-स्त्री , मेदा (रानि व. ५) विकङ्कतवृक्षः नागबल्ली लता (वै. निघ.)
शल्योद्धरण-न., विद्धशल्योत्पाटनम् (वै. सं. २ अ.)
शल्ल-पु., भेकः (श. र.)

शल्लकीत्वक्-स्त्री., सिल्हकीवृक्षत्वक् (च. सू. ४ अ).
शल्लकीद्रव(रस)-पु., सिह्लकः (जटा. च. द. बा.) (व्या. चि. अष्टादशशतीप्रसारणीतैले)
शल्ली-स्त्री., सल्लकीवृक्षः । सल्लकीमृगः (वै. निघ.)
शव-न., लौहम् । जलम् (मे.)
शवकाम्य-पु., कुकुरः (श. र.)
शबर-पु., पानीयम् । हस्तः
शवरलोध्र-पु., शावरलोध्रः
शवल-पु., चित्रकक्षुपः (रा. नि. व. ६) (ला, ली) स्त्री.,–शवलवर्णा गौः (अ. टी. भ.) कवूरवर्णः
शशधर-कर्पूरः (रा. नि. व. १२)
शशभृत्-पु., कर्पूरः (हे. च. भैष. वा. व्या.) (गन्धद्रव्यकथने)
शशलोम-(न्) न., शशकरोमन् (अम.)
शशाङ्कलेखा-स्त्री., सोमराजी (च. द. कुष्ठ. चि.) गुडूची
शशाद (न) पु., श्येनपक्षी (रा. नि. व. १९)
शशिपर्णा-स्त्री., पटोलः (वै. निघ.)
शशिपुष्प-न,. पद्मम् (वै. निघ.)
शशिप्रभ-न., मुक्ता (रा. नि. व. १३) कुमुदपुष्प (श. मा.) स्त्री., ज्योत्स्ना (जटाः)
शशोण-न., शशकलोम (अम.)
शष्कुल-पु., करञ्जवृक्षः (श. र.)
शस्त-पु., प्रशस्तः न., शरीरम् (त्रिका.)
शस्त्रक-न., लौहः (प. मु.)
शस्त्रचूर्ण-न., लौहकिट्टम् (वै. निघ.)
शस्त्री (इन्)-त्रि., शस्त्रधारी, स्त्री., छुरिका (मे.)
शस्यध्वंसी (इन्) पु., तुत्रवृक्षः (श. च.)
शस्यमञ्जरी- स्त्री., धान्यादिकणिशः (अम.)
शस्यशूक न., शस्यशुङ्गम् (अम.)
शस्यसम्बर(रण)-पु,. अश्वकर्णनामलताशालिः (रा. नि. व. १९)
शस्यारु-(वन) पु., ह्रस्वशमीवृक्षः (श. र.)
शाकटमुख-न.. पटवासः (वै. निघ.)
शाकटाख्य-पु., धवबृक्षः (र. मा.)
शाकटीन-पु., २० तुलापरिमाणम् २००० पलानि (हे. च. प. प्र.)
शाकतरु-पु., शाकवृक्षः (श. मा.)
शाकद्रुम-पु., वरुणवृक्षः (वै. निघ.)
शाकपाकी (इन्) पु., सुनिषण्णकः (वैनिघ.)
शाकमत्स्य-न., मत्स्यव्यञ्जनभेदः (राज.)
शाकबालेथ-पु., ब्रह्मयष्टी (श. र.)
शाकम्भरीभव–न., रोमकलवणम् (भा.)
शाकम्भरीय–न., रोमकलवणम्
शाकवर-पु., जीवशाकः (प. मु.) स्त्री., (रा) जीवन्तीशाकः (वै. निघ.)
शाकवल्ली–स्त्री., लताकरञ्जकः (वै. निघ.)
शाकविन्द-(ल्व)-(क)–पु., वार्ताकुवृक्षः (जटा । त्रिका)
शाकवृक्ष-पु., स्वनामख्यातवृक्षः
शाकशाकट (किन्) म् न., शाकक्षेत्रम् (रा. नि. व. ५)
शाकशाल-पु., महानिम्बः (वै. निघ.)
शाकश्रेष्ठ-पु., वास्तुकक्षुपः (शर.)
शाका-स्त्री., हरीतकी (शब्दकल्पः)
शाकाख्य–न., व्यञ्जनयोग्यफलमूलपत्रपुष्पादिः
शाकाम्लभेदन–न., चुक्रनामककाञ्जिकभेदः (रा. नि. व. १५)
शाकालावु–स्त्री., राजालावुकः (रा. नि. व. ७)
शाखापित्त–न., हस्तपादांसमूलदाहः । मुखताल्वोष्ठादिषु सदाहदवथुः (रा. नि. व. २०)
शाखामृग-पु., कपिः (प. मु.)
शाखाम्ला-स्त्री., तिन्तिडीवृक्षः (रा. नि. व. ६)
शाखारोग–पु., रक्तादिधातुजेषु त्वग्जेषु च वीसर्पगुल्मादि रोगः (च. सू. ११ अ.)
शाखाशिफा-स्त्री., शाखाजातशिफा (वै. निघ.)
शाखी(इन्)-पु. वृक्षः, (अम)
शाङ्कर-पु., सोमलताभेदः (सु. चि. २९ अ.) वृषः (त्रिका स्त्री.,) (री)–शमीवृक्षः (वै. निघ.)
शाङ्कित-पु., ग्रन्थिपर्णभेदः (वै. निघ.)
शाङ्कुची-स्त्री., शाङ्कोचमत्स्यः (श. च.)
शाङ्कुष्ठा-स्त्री., गुञ्जा (र. मा.)
शाञ्ची-स्त्री., शालिञ्चशाकः (रस. चि. ९ अ.)
शाटिका-स्त्री., शटी (अ. टी. भ.)
शाडल-पु., नीलदूर्वा (वै. निघ.)
शात-पु., शाणितः । कृशः पु., धुस्तूरवृक्षः (अम.)
शातकौम्भ-न., सुवर्णम् (भ. द्वि.)
शातपत्रक-पु., चन्द्रप्रकाशः (श. च.)
शातभीरु-पु., मदनमालीनाममल्लिकावृक्षः (र.मा.)
शातला-स्त्री., स्वनामप्रसिद्धसेहुण्डभेदः,पीतसेहुण्डः (भा)
शाद-पु., कर्दमः । कोमलतृणम् (अम.)
शाद्वलाभ-पु., मन्दविषवृश्चिकभेदः (सु. कल्प. ८ अ.)

शान–पु., ४ माषकः (प. प्र. १ ख.)
शानपाद–पु., चन्दनपीठिका (भारत.)
शानी–स्त्री., इन्द्रवारुणी (श. च.)
शान्त्वति–स्त्री., भार्गी
शापटिक–पु., मयूरः (शब्दकल्पः)
शाबरवल्कल–न., लोध्रत्वक् (वा. चि. ९अ.)
शामील–न., भस्म (सा. कौ.)
शाम्बर (रिक)–पु., लोध्रवृक्षः (वै. निघ.)
शाम्बरी–स्त्री., मूषिकमारी (वै. निघ.)
शायकपुङ्खा–स्त्री., शरपुङ्खा
शायिका–स्त्री., निद्रा
शारदजल–न., शरत्कालीनजलम्
शारदमल्लिका–स्त्री., शरत्कालभवमल्लिका (रत्ना.)
शारदयावनाल–पु., शारदीययावनालः (रा. नि. १६)
शारदी(इन्)–पु., सप्तपर्णवृक्षः (अम.) कच्छटशाकः (र. मा.) अपराजिता (जद.)
शारिवा–स्त्री., स्वनामप्रसिद्धलता (सु. सू. ३८ अ.)
शारीरगुण–पु., दैहिकगुणसमष्टिः (च. सू. १ अ.)
शारीरग्रन्थ–पु., श्रीमुखविरचितशारीरशास्त्रम्
शारीरज्वर–पु., देहगतज्वरः (च. चि. ३ अ.)
शार्क–पु., शर्करा. (श. र.)
शार्कक–पु., दुग्धफेनः । शर्करापिण्डः (मे.)
शार्करमद्य-शीधु–न., पु., शर्कराधातकीसिद्धमद्यम् (रा. नि. व. १४)
शार्करिल–पु., शर्करान्वितभूमिजः, शर्कराभूयिष्ठम् (व्याक)
शार्ङ्गधर–पु., स्वनामख्यातचिकित्सासंग्रहकारः, ज्वरत्रिशतीकारः
शार्ङ्गधरदीपिका–स्त्री., आढमल्लकृतः शार्ङ्गधरटीकाविशेषः
शार्ङ्गेरिक–पु., शुण्ठीसमानवर्णः । स्थावरविषभेदः (अत्रि. ३ स्थान. ५६. अ.)
शार्दूलकन्द–पु., अरण्यपलाण्डुः
शार्दूलज–व्याघ्रनखम् (वै. निघ.)
शार्वरी–स्त्री., रात्रिः (अ. टी. भः) रोध्रः (वै. निघ.)
शालक–न., नाडीशाकम् (वै. निघ.)
शालज–पु., शालमत्स्यः (श. र.)
शालञ्च–पु., शालिञ्चशाकः
शालद्रव–न., शालपीतशालद्रवम् (सा. कौ. शिलाजतुशोधने)
शालपत्र-समपत्री–स्त्री.,–शालपर्णी (प. मु.)
शालपर्णिका–स्त्री., मुरा (वै. निघ.)
शालपर्ण्यादि–पु., तदादिद्रव्यगणः
शालमर्कट–पु., दाडिमवृक्षः (वै. निघ.)
शालव–पु., लोध्रवृक्षः (श. र.)
शालवर्ग–पु., शालशारादिवर्गः (भा.)
शालवेष्ट–पु., शालनिर्यासः (त्रिका.)
शालशाक–न., शालवृक्षः (सु. सु. ३८. अ.) हिङ्गुवृक्षः (विश्व)
शाला–स्त्री., तरुशाखा । गृहम् (त्रिका.)
शालाककूटक–न., चाणक्यमूलकम्
शालाकी (इन्) पु., अस्त्रवैद्यः
शालाङ्गार–पु., कर्मकारशालाग्निः (रस. चि. (९ अ. शालकाष्ठाङ्गारे)
शालाजिर–पु., शरावः (त्रिका.)
शालाश्चि–पु., शाकभेदः (श. र.)
शालानी–स्त्री., विदारी (श. र.)
शालामृग–पु., शृगालः (हारा.)
शालिज (जाहकः)–पु., खट्टाशाण्डः (च. द. व्या. चि.)
शालिजाहक–पु., खट्टाशाण्ड (च. द. वा. व्या. चि.)
शालिञ्च (ञ्ची) पु. स्त्री., स्वनामख्यातशाकभेदः (राज. ३ प.)
शालिनाथ–पु., रसमञ्जरीकारः
शालिनी–स्त्री., पद्मकन्दः (रा. नि. व. १०) मेथिका (वै. निघ.)
शालिमूल–न., हैमन्तिकधान्यमूलम् (च. चि. ३ अ)
शालिराट्–पु., महाशालिः, राजशालिः (प. मु.)
शालिशक्तु–पु., शालिधान्यकृतसक्तुकः (च. सू. २७ अ.)
शालिहोत्र–पु., तन्नामकाश्वशास्त्रप्रणेता ऋषिविशेषः । घोटकः (त्रिका.)
शालिहोत्र–न., नकुलकृतअश्ववैद्यकम्
शाली–स्त्री., कृष्णजीरकः (रा. नि. व. ६) मेथिका शालपर्णी । दुरालभा (वै. निघ.)
शालु–न., शालूकः (श. र.) पु., भेकः (हे. च.) चोरकनामगन्धद्रव्यम् (मे.)
शालूर–पु., भेकः (अम.) पद्मकन्दः (वै. निघ.)
शालूरक–पु., पुरीषजकृमिभेदः (च. वि ७ अ.)
शालूरपर्णी–स्त्री., ब्राह्मीशाकः (भा. म. १ भ.) (जिह्वकज्वर. चि.)
शाल्मलिनी–स्त्री., शाल्मलीवृक्षः (श. र.)
शाल्मलीकण्टक–पु., प्रसिद्धः (वा. उ. २२ अ.)
शाल्मलीकल्प–पु., वैद्यशास्त्रान्तर्गतचिकित्साकल्पभेदः (ज. द.)

शाल्मलीसत्वनिर्यास-पु., मोचरसः (भैष.) (ध्वजभ. चि.)
शाल्वणस्वेद-पु., वातव्याधौ स्वेदविशेषः
शावक-पु., शिशुः (रा. नि. व. १८)
शावर-पु., शवरलोध्रः (मे.)
शावरकरोध्र-पु., अक्षिभेषजापरसंज्ञः । स्वनामख्यातवृक्षः (वा. सू. १३ अ.)
शावरभेदाख्य (क्ष)-न., ताम्रम् (हे. च.)
शावरी-स्त्री., शुकशिम्बी (मे.)
शाष्कुल-त्रि., मांसाशी (हे. च.)
शिकतावलम्बन-न., जलस्य शीतलीकरणोपायाविशेषः (सु. सू. ४५ अ)
शिक्थ-न., मधूच्छिष्टम् (रा. नि. व. १३)
शिक्षा-स्त्री., वेदाङ्गविशेषः (र. मा.) श्योणाकवृक्षः (श. मा.)
शिखण्ड (क)-पु., मयूरपुच्छम् (अम.) काकदक्षः (मे.)
शिखण्डिक-पु., कुक्कुटः (भा.) स्त्री., का-गुञ्जा
शिखण्डिनी-स्त्री., गुञ्जालता (प. मु. र. सा. सं.) (रसप्रकरणे) यूथिका (र. मा.) मयूरी
शिखण्डि (इन्)-पु., मयूरः । मयूरपुच्छम् (मे.) कुक्कुटः (हे. च.) स्त्री., गुञ्जालता (रा. नि. व. ३) स्वर्णयूथिका (रा. नि. व. १०)
शिखरा-स्त्री., मूर्वा (श. च.)
शिखरिचरण-न., अपामार्गमूलम् (वै. निघ. २ भ.) उन्मा. चि.)
शिखरिज-पु., अपामार्गः (भैष. ने. रो. चि. भार. म. ४ भ.)
शिखरिलोहित-पु., भूकदम्बः (श. च.)
शिखाचल-पु., मयूरः (त्रिका.)
शिखाधर (धार)-पु., मयूरः (त्रिका.)
शिखामूल-न., गृञ्जनम् (रा. नि. व. ७)
शिखाल-पु., मयूरः (वै. निघ.)
शिखालु-पु., मयूरशिखा (रा. नि. व. ५)
शिखावती-स्त्री., मूर्वा (श. च.)
शिखावर-पु., पणसवृक्षः (श. मा.)
शिखावला-स्त्री., मयूरशिखा (रा. नि. व, ५) मेथिका (वै. निघ.)
शिखावान्-पु., चित्रकवृक्षः (अम.) भाषपक्षी (वै. निघ.)
शिखावृक्ष-पु., उच्चदीपाधारः
शिखिकुन्द-पु., कुन्दुरुखोटी (कश्चित्)
शिखिग्रीव-(वा.) न. स्त्री. तुत्थकम् (अम.) कान्तपाषाणः । चुम्बकः (र. सा. सं.)
शिखिध्वज-पु., धूमः (त्रिका) मयूरः (वै. निघ.)
शिखिनीफल-पु., शिरीषवृक्षः
शिखिपुच्छम्-न., मयूरपुच्छम् (श. र.)
शिखिपुच्छभूति-स्त्री., पुच्छभस्म (च. द. हिक्का श्वास. चि.)
शिखिमण्डल-पु., वरुणवृक्षः (श. र.)
शिखिमन्थ-पु., गणिकारिका (रस. र.)
शिखिमोटा-स्त्री., अजमोदा (रा. नि. व. ६)
शिखियूप-पु., श्रीकारिमृगः (रा. नि. व.१९)
शिखिवर्द्धक-पु., कूष्माण्डः (श. र.)
शिखिवाडवरस-पु., गुल्माधिकारे रसः (रस. र.)
शिखिहिण्टी-स्त्री., महाबलाक्षुपः (वै. निघ.)
शिखिवभ्रु-पु., सितावरीक्षुपः (रा. नि. व. ४)
शिगूडि-स्त्री., स्वनामख्यातक्षुपः (रा. नि. व. ४)
शिग्रुपुष्प-न., शोभाञ्जन पुष्पम् (भा.)
शिग्रुफल-न., शोभाञ्जन फलम्
शिग्रूद्भव-न., शिग्रुबीजम् (वै. निघ.)
शिङ्घाणक-पु., कफः । नासामलः (उणा) वाजिनो नासागतरोगविशेषः (ज. द॰)
शिङ्घाण (णिका)-न., (स्त्री.) काचपात्रम् (त्रिका.) लोहमलः नासामलः (मे.)
शिङ्घित-त्रि., घ्रातम् (श. र.)
शिङ्घिनी-स्त्री., नासिका
शित-पु., वृषः (त्रि,.) कृशः (विश्व.)
शितकर-पु., कर्पूरः (रा. नि. व. १२)
शितकर्णी-स्त्री., बासा (रा. नि. व. ४)
शितच्छत्रा-स्त्री., शताह्वा (वै. निघ.)
शितद्रु पु., स्त्री., क्षीरमोरटः (र. मा.) शतद्रुनदी (अक.)
शितनिर्गुण्डी-स्त्री., कृष्णनिर्गुण्डी (रस. र. वाल. चि.)
शितपर्ण-पु., क्षुद्रमुस्तकम् (वै. निघ.)
शितपुष्प-पु., शिरीषवृक्षः (रा. नि. व. ६)
शितपुष्पक-न., काशतृणम् (रा. नि. व. ८)
शितशाक-पु., शालिञ्चशाकः (प. मु.)
शितशिव-न., सैन्धवलवणम् (वै. निघ.) मिश्रेया स्त्री., शताह्वा (वै. निघ.)

शितशिंशपा-स्त्री., श्वेतशिंशपा (रा. नि. व. ९.)
शितशूक-पु., यवः (त्रिका.) गोधूमः (त्रिका.)
शितसार-पु., तिन्दुकवृक्षः (अम.)
शिताद्रिकर्णी-स्त्री., श्वेतापराजिता (रा. नि. व. २३)
शितावार-पु., सुनिषण्कः (जटा.)
शितिच्छद-पु., हंसः (श. र.)
शितिपक्ष-पु., हंसः (श. र.)
शितिमारक-न., शालिञ्चशाकः
शितिसार (क)-पु., तिन्दुकवृक्ष (अम.)
शितिसिम्बिनी-स्त्री., श्यामालता
शिपि-पु.. चर्म
शिफ-पु., मूलम् (अटी. विद्याविनोदः)
शिफाक(कन्द)-पु., पद्ममूलम् (श. च.)
शिफाधर-पु., शाखा (श. च.) मयूरः
शिमृडी-स्त्री., स्वनामख्यातक्षुपः
शिम्बिक-पु., कृष्णमुद्गः (हे. च.)
शिम्बीभव-पु., शिम्बीधान्यम् (भा. पू. १ भ.)
शिरःखण्ड-न., कपालास्थि (वै. निघ.)
शिरःपीडा-स्त्री., शिरोरोगः (निदा.)
शिरःफल-पु., नारिकेलवृक्षः (त्रिका.)
शिरज-पु., केशः (श. र.)
शिरसिज (रो-रुहः)-पु., केशः (रा. नि. व. १८)
शिरा-स्त्री., धमनी (रा. नि. व. १८)
शिराजपिडका-स्त्री., शुक्लगतनेत्ररोगः (सु. ३ ४ अ.)
शिराजाल-पु., शुक्लगतनेत्ररोगः (भा.)
शिराग्रन्थि-पु., वातेन शिरासंकोचेन ग्रन्थिरोगभेदः (वा. उ. २९ अ.)
शिराप्रहर्ष-पु., सर्वंगताक्षिरोगः (मा. नि.)
शिराफल-पु., नारिकेलवृक्षः (श. च.)
शिरामलक-पु., स्वनामख्यातवृक्षः (प. मु.)
शिरामोक्ष-पु., रक्तमोक्षणम् (नकुल १४ अ.)
शिरायाम-पु., शिरायाः प्रसरणवत्पीडा (मा. नि.)
शिरायु-पु., भल्लूकः (रा. नि. व. १९)
शिराल-न., कर्मरङ्गफलम्
शिरावृत्त-न., शीषकम् (रा. नि. व. १९)
शिरावेध(व्यधा)-पु., शोणितदुष्टिजन्यरोगेषु शिराया वेधनम्
शिरोत्पात-पु., सर्वगताक्षिरोगः (मा. नि)
शिरोधि-स्त्री., कन्धरा (रा. नि. व. १८)
शिरोधिजा-स्त्री., शिरा (रा. नि. व. १८)
शिरोऽभ्यङ्ग-पु., मस्तकाभ्यङ्गः (सु. चि. २४ अ.)
शिरोमर्म्म-(न्) पु., शूकरः (हे. च.)
शिरोऽर्ति-स्त्री., शिरःपीडा (मा. नि.)
शिरोवल्ली स्त्री., मयूरशिखा (श. च.)
शिरोवृत्तफल-पु., रक्तापामार्गक्षुपः (भा.)
शिरोऽस्थि-न., करोटी (रा. नि. व. १८)
शिलाजतुलेह-पु., प्रमेहाधिकारे लेहः (रस. र.)
शिलाजा-स्त्री., श्वेतशिलानामपाषाणभेदः (रा. नि. व. ५)
शिलाञ्जनी-स्त्री., कालाञ्जनी (रा. नि. व. ४)
शिलाटक-पु., विलेपनम् (मे.)
शिलाटिका-स्त्री., रक्तपुनर्नवा
शिलात्मिका-स्त्री., मूषिका (श. च.)
शिलाद्दन्द्व-न., शैलेयः
शिलापुत्र-लोडा इति ख्याते प्रस्तरखण्डः (श. र.)
शिलाभव-न., शैलेयः (जटा.)
शिलाभिष्यन्द-पु., शिलाजतुकः (वै. निघ.)
शिलामल-पु., शिलाजतुः (वै. निघ.)
शिलारस-पु., स्वनामख्यातखनिजगन्धद्रव्यविशेषः
शिलाव्याधि-पु., शिलाजतु (त्रिका.)
शिलासन-न., शैलेयः (श. र.)
शिलासार-पु., लौहः (हे. च.)
शिलास्वेद-पु., शिलाजतु (वै. निघ.)
शिलाह्वा-स्त्री., (भा. म. ३ अश्मरि.) मनःशिला (र. सा. सं. बृहच्चिन्तामणिरसे.) कुण्डली (रा. नि. व. २३) न., शिलाजतु
शिलाक्षार-पु., चूर्णकः (वै. निघ.)
शिलि-भूर्जवृक्षः (श. मा.)
शिलिगर्भजा-स्त्री., पाषाणभेदकः (रा. नि. व. ५)
शिलिन्द-पु., मत्स्यविशेषः (राज. ३ प.)
शिली-स्त्री., गण्डूपदी (मे.)
शिलि (ली) न्ध्र (क) पु., भूच्छत्राकः । छत्रिका (मे.)
शिलीन्ध्रपुष्प-न., कदलीपुष्पम् (मे)
शिलीन्ध्री-स्त्री., किञ्चुलुका । मृत्तिका (मे)
शिलीपद-पु., श्लीपदरोगः (श. र.)
शिलीमुख-पु., भ्रमरः (अम.)
शिलु-पु., बहुवारवृक्षः (वै. निघ.)
शिलेय-न., शैलेयः (श. र.)
शिलोद्भिदा-स्त्री., पाषाणभेदः (भा. म. ३. प.)
शिल्ली-स्त्री., शल्लकीवृक्षः

शिवतेज-न., पारदः (शब्दकल्प.)
शिवधातु-पु., पारदः, गोदन्तमणिः (शब्दक.)
शिवधूप-पु., महिषाक्षगुग्गुलुः (वै. निघ.)
शिवनामा-(न्) पु., पारदः (र. सा. सं)
शिवनिर्माल्य-न., पुष्पादिः (रावणकृतकुमारतन्त्रम्)
शिवपण्डित-पु., वैद्यकहितोपदेशकारः
शिवपुत्र-पु., पारदः (वै. निघ.)
शिवप्रीति-पु., विल्ववृक्षः (वै. निघ.)
शिवब्रह्म स्त्री., ब्रह्मीशाकभेदः, शङ्खपुष्पी (प. मु.)
शिवरस-पु., त्र्यहात्पर्युषितान्नोदकरसः स्वनाम्ना महाराष्ट्रकर्णाटकदेशे ख्यातः
शिवलिङ्गी-स्त्री., लिङ्गिनीलता (रा नि. व. ३)
शिवशित-पु., कफः (वै. निघ.)
शिवसाधन-न., शालिधान्यम् (प. मु.)
शिवाख्या-स्त्री., वल्लीदूर्वा (रा. नि. व. ८)
शिवाघृत-न., उन्मादे घृतविशेषः (वै. निघ.)
शिवाङ्क-न., रुद्राक्षः (रा. नि. व. १०)
शिवात्मक-न., सैन्धवलवणम् (रा. नि. व. ६)
शिवानी-स्त्री., जयन्तीवृक्षः (श. च.)
शिवापीड-पु., अगस्तिवृक्षः (रा. नि. व. १०)
शिवाप्रिय-पु., छागः (त्रिका.)
शिवामूल-न., दूर्वामूलम् (रत्नमाला. सं. बालग्रह. चि.)
शिवाराति-पु., कुक्कुरः (र. मा.)
शिवालय-पु., रक्ततुलसीवृक्षः (श. च.) न., श्मशानम् (हारा.)
शिवालु-पु., शालावृकः (रा. नि. व. १९)
शिवास्मृति-स्त्री., जयन्तीवृक्षः (रा. नि. व. १०)
शिवाल्हाद-पु., अगस्तिवृक्षः (रा. नि. व. १०)
शिवाह्वय-पु., पारदः (भा.) श्वेतार्कः । वटवृक्षः (वै. निघ.)
शिवि-पु., भूर्जवृक्षः (मे.)
शिविका-स्त्री., खाद्यद्रव्यभेदः (वै. निघ.)
शिविर-पु., तृणधान्यभेदः (च. सू. २७ अ.)
शिवेश-पु., शृगालः (वै. निघ.)
शिशुक-पु., शिशुमारः (अम.) मण्डलिसर्पविशेषः सु. कल्प. ४ अ.) बालकः (मे.) वृक्षभेदः (हे. च.)
शिशुगन्धा-स्त्री., मल्लिकाविशेषः (श. मा.)
शिशुमाराकृति-पु., मत्स्यभेदः
शिशुबाह (ह्य) क-पु., वन्यछागः (हे. च.)
शि - ., न., लिङ्गम् (रा. नि. व. १८)

शिष्ट-पु., आम्रवृक्षः (वै. निघ.)
शिह्ल (क)-पु., शिलारसः । (श. च. र. मा.)
शीघ्रकारी (इन्)-पु., त्रिदोषसन्निपातज्वरः (भा. म. १ म.)
शीघ्रग-पु., सन्निपातज्वरविशेषः (भा. म.)
शीघ्रचेतन-पु., कुक्कुरः (श. मा.)
शीघ्रजन्मा-(न्)-पु., कण्टकरञ्जः (श. र.)
शीघ्रजीर्ण (शीर्ण)-पु., तण्डुलीयकशाकः (श. मा.)
शीघ्रप्ररोही (इन्) पु., शणवृक्षः (वै. निघ.)
शीघ्रा -स्त्री., दन्तीवृक्षः (रा. नि. व. ६)
शीतकणा-स्त्री., श्वेतजीरकः (वै. निघ.)
शीतकाल-पु., हेमन्ते ऋतुः (मे.)
शीतकुम्भ-पु., करवीरवृक्षः (र. मा.)
शीतकूर्चिका-स्त्री., लघुवाव्यालकः (वै. नि.)
शीतकेशरीरस-पु., रसप्रदीपोक्ते शीतज्वरे रसः(भा.)
शीतक्षार-न., श्वेतटङ्कणम् (रा. नि. व. ६)
शीतगुणकर्म्म (न्) गुणाः-ह्लादनत्वं मूर्च्छातृष्णाक्लेददाहघ्नत्वं च (सु. सू.)
शीतचम्पक-पु., दर्पणम् (मे.)
शीतच्छाय-पु., वटवृक्षः (वै. निघ.)
शीतदन्तिका-स्त्री., नागदन्ती (रा. नि. व. २०)
शीतदीप्य-न., श्वेतजीरकः (वै. निघ.)
शीतद्रु-पु., क्षीरमोरटः (प. मु.)
शीतपत्रा-स्त्री., श्वेतलज्जालुका (वै. निघ)
शीतपर्णी-स्त्री., अर्कपुष्पिका (र. भा.)
शीतपल्लवा-स्त्री., भूमिजम्बूवृक्षः (र. मा.)
शीतपाकी-स्त्री., काकोली (प. मु.) गुञ्जा (रा. नि. व. ३) वाव्यालकः (श. र.)
शीतपूर्वकज्वर-पु., विषमज्वरभेदः (मा. नि.)
शीतबला-स्त्री., महासमङ्गा (रा. नि. व. ४)
शीतमयूख-पु., कर्पूरः (मे.)
शीतमरीचि-पु., कर्पूरः (श. र.)
शीतमूलक-न., उशीरः (रा. नि. व. ८)
शीतरश्मि-पु., कर्पूरः (वै. निघ.)
शीतरुह-न., श्वेतरक्तपद्मम् (वै. निघ.)
शीतलजल-न., उत्पलम् (रा. नि. व. १०)
शीतलता-स्त्री., हिमत्वम् । चित्रकूटदेशख्यातामृतवल्ली (वै. निघ.)
शीतलत्व-न., जडता, हिमत्वम् (रा. नि. व. २०)
शीतलप्रद-पु., चन्दनवृक्षः (शब्दकल्पः)
शीतलवातक-पु., असनपर्णी (श. र.)

शीतलि (ली)-स्त्री., पाताडीति प्रसिद्धः जलजवृक्षभेदः (रा. नि. व. ८)
शीतवर-पु., सुनिषणकशाकः (वै. निघ.)
शीतवल्लभ-पु., पर्पटकः (वै. निघ.)
शीतवासा-स्त्री., यूथिका (वै. निघ.)
शीतवीज-न., तदाख्यसूक्ष्मवीजभेदः
शीतवृक्षा-स्त्री., सुवर्चला (वै. निघ.)
शीतशूक-पु., यवः (भ. पू. १भ. धा. व.)
शीतांशुतैल-न., कर्पूरतैलम् (रा. नि. व. १५)
शीताद-पु., दन्तवेष्टगतरोगविशेषः (सु. नि. १६ अ)
शीताद्य-पु., विषमज्वरः (रा. नि. व. २०)
शीताभ-पु.,न., कर्पूरः (वै. निघ.)
शीताबला-स्त्री., महासमङ्गा (रा. नि. व. ४)
शीताश्मा (न्)-पु., चन्द्रकान्तमणिः (रा. नि. व. १३)
शीतेच्छा-स्त्री., पित्तजन्यरोगः (भा.)
शीतोत्तम-न., जलम् (श. च.)
शीधुगन्ध-पु., वकुलवृक्षः (त्रिका.)
शीफालिक-स्त्री., शेफालिकावृक्षः (अ. टी. भ.)
शीमूल-पु., शाल्मलिवृक्षः (रस. चि. ९ अ.)
शीर-पु., नागरङ्गवृक्षः (वै. नि.घ) अजगरसर्पः (श. र.)
शीरिका-स्त्री., वंशपत्रीतृणविशेषः (वै. निघ.)
शीर्णदल-पु., निम्बवृक्षः (रा. नि. व, २३)
शीर्णपत्र-पु., कर्णिकारवृक्षः (श. च.) पट्टिकालोध्रः (वै. निघ.) निम्बवृक्षः (रा. नि. व. ९)
शीर्णपुष्पिका-स्त्री., अवाक्पुष्पी (श. च.)
शीर्णमाला-स्त्री., पृश्निपर्णी (श. च.)
शीर्षक-न., शरीरावयवः, मस्तकम्, मस्तकास्थि (रा. नि. व. १८) अगुरुकाष्टम् उष्णीषम् नारिकेलः (वै. निघ.)
शीवल न., शैलेयः । शैवालः (मे.)
शीष-न., कासीसम् (रा. नि. व. १३)
शीषक-न., शीषधातुः (प. मु.)
शीहुण्ड-पु., स्नुहीवृक्षः
शुकद्रुम-पु., शिरीषवृक्षः (श. मा.)
शुकनामा-स्त्री., शुकतुण्डी । शुकजिह्वा (र. मा.)
शुकनासिका-स्त्री श्योणाकवृक्षः
शुकपत्र-पु., गन्धकः (वै. नि. घ)
शुकपत्रक्ष-पु., गन्धकः (वै. निघ.)
शुकपुष्प-न., स्थौणेयकः (भा.) पु., शिरीषवृक्षः (रा. नि. व. ११) गन्धकः (वै. नि. घ)

शुकरोग-पु., शूकरोगः
शुकवर्ण-पु., ग्रन्थिपर्णभेदः (वै. निघ.)
शुकवृक्ष-पु., शिरीषवृक्षः (वै. नि. घ)
शुकशाक-पु., महानिम्बः (वै. नि.घ)
शुकशिम्बा (म्बि)(म्बी)-स्त्री., शूकशिम्बी (श. र.)
शुकशीर्षा-स्त्री., तालीशपत्रम् । स्थौणेयकः, तेजपत्रम् (वै. निघ.)
शुकादन-पु., दाडिमवृक्षः (श. च.)
शुकानना-स्त्री., शुकाख्या (प. मु.)
शुक्तिपुटोपम-न., वातादः (वै. निघ.)
शुक्तिमणी-पु., मुक्ता (वै. निघ.)
शुक्तावीज-न., मुक्ता (वै. नि.घ)
शुक्त्यङ्गी-स्त्री., श्वेतनिर्गुण्डी (वै. नि. घ)
शुक्रभुक-पु., मयूरः (श. च.)
शुक्रभू-स्त्री., मज्जा (श. च.) अस्थिसारः
शुक्रमाता-स्त्री., भार्गी (वै. निघ.)
शुक्रमातृका (वटिका)-स्त्री., प्रमेहे औषधम् (रस. र)
शुक्रला-स्त्री., उच्चटा (प. मु.) आमलकवृक्षः
शुक्रसङ्ग-पु., शुक्ररोधः (भा.)
शुक्रकृच्छ्र-न., मूत्रकृच्छ्ररोगः (निदा.)
शुक्रगतज्वर-पु., तदाश्रितज्वरः (मा. नी.)
शुक्रपुष्प-कुरुवकशाकः (प. मु.) स्त्री., श्वेतापराजिता (वै. निघ)
शुक्रा-स्त्री., वंशलोचना (रा. नि. व. ६.)
शुक्राङ्ग पु, मयूरः (जटा.)
शुक्राल्पता-स्त्री., पित्तजरोगः (भा.)
शुक्लक-पु, क्षीरिणीवृक्षः (वै. निघ.)
शुक्लकण्ठ (क) पु., दात्यूहपक्षी (श. मा.)
शुक्लकुष्ठ-न., श्वित्रम् । गारुडम्
शुक्लतुलसी-स्त्री., श्वेततुलसी (संग्रहः)
शुक्लदुग्ध-पु., जलजवृक्षभेदः, शृङ्गाटकः (श. च.)
शुक्लधातु-पु., कठिनी (हे. च.)
शुक्लपद्म-न., श्वेतपद्मम्
शुक्लपृष्ठक-पु., सिन्धवारकवृक्षः (श. च.)
शुक्लफल-पु., रक्तार्कवृक्षः
शुक्लफला-स्त्री., शमीवृक्षः (वै. निघ)
शुक्लफेन-पु., समुद्रफेनः (वै. निघ.)
शुक्लभण्डी-स्त्री., शुक्लत्रिवृत् (वै. निघ.)
शुक्लमञ्जरी-स्त्री., श्वेतनिर्गुण्डी (वै. निघ.)
शुक्लमुद्र-पु., शुभ्रमुद्रः

शुक्लमूल–न., श्वेतलशुनः (वै. निघ.)
शुक्ला–स्त्री., उच्चटा (र. मा.) आमलकः
शुक्लवंश–पु., श्वेतवंशः (रा. नि. व. ८)
शुक्लवायस–पु., बकपक्षी (त्रिका.)
शुक्लबृहती–स्त्री., श्वेतबृहती (भैष.अ. पि. चि. पानीय-भक्तवट्याम्)
शुक्लसारङ्ग–पु., शुक्लचातकः (च. सू. २७ अ.)
शुक्लाङ्ग–पु., द्वीपान्तरवचा (वै. नि.)
शुक्लाक्ष–पु., प्लवजातीयसंघातचरपक्षी (सु. सू.४६ अ.)
शुक्लाजाजी–स्त्री., श्वेतजीरकः (वै. निघ.)
शुक्लापाङ्ग–पु., मयूरः (हे. च.)
शुक्लाम्ल–न., अम्लशाकम् (रा. नि. व. ७)
शुक्लाहिफेन–पु., शुक्लपुष्पाहिफेनवृक्षः
शुक्लौदन–न., शातपान्नम् (रा. नि. व. १६)
शुक्लोपला–स्त्री., शर्करा (र. मा.)
शुङ्गी(इन्)–पु., प्लक्षवृक्षः, वटवृक्षः (जटा.)
शुचिद्रुम–पु., अश्वत्थवृक्षः (रा. नि. व. ११)
शुचिमल्लिका–स्त्री., नवमल्लिका (रा. नि. व. ११)
शुचिव्रत–पु., प्रपौण्डरीकम् (वै. निघ.)
शुटीरता(टीर्य्य)–स्त्री., न., वीर्यम् (त्रिका.)
शुण्टि(ण्टी)–पु., स्त्री., शुष्कार्द्रकः (अम.)
शुण्ठ–न., गुण्डासिनीतृणम् (वै. निघ.)
शुण्ठघृत–न., ग्रहण्याम् आमवाते च घृतम् (च. द. भा.)
शुण्ठ्य–न , शुण्ठी (श. च.)
शुण्डरोह–पु., भूतृणम् (रा. नि. व. ८)
शुण्डा–स्त्री., गलशुण्डीनामरोगः (रा. नि. व. २०)
शुण्डार–पु., करिशुण्डाकारः वकयन्त्रभेदः
शुण्डाल–पु., गजः (धनञ्जयः)
शुण्डिका–स्त्री., स्फोटकः (रा. नि. व. २०) उपजिह्विका (शब्दकल्पः)
शुण्डिनी–स्त्री., छुछुन्दरी (रा. नि. व. १९)
शुजङ्गन्द–पु., गर्दभः (त्रिका.)
शुद्धमांस–न., मांसव्यञ्जनम् । पक्वमांसम्
शुद्धवल्लिका–स्त्री., गुडूची (श. च.)
शुद्धा–स्त्री., कुटजबीजम् (वै. निघ.)
शुद्धान्तपालक–पु., नपुंसकः (श. च.)
शुद्धिकन्द–पु., लशुनः (वै. नि.)
शुन (क)–पु., कुक्कुरः (श. टी. भ.)
शुनि–पु., कुक्कुरः (हेच.) (नी) स्त्री., कुष्माण्डी (रा. नी. व. ७)
शुभग–पु., टङ्कणक्षारः (र. सा. सं.)
शुभाकिनी–स्त्री., भूम्यामलकी (वै. निघ.)
शुभाञ्जन–पु., रक्तशिग्रुवृक्षः (र. मा.)
शुभेक्षण – पु., मत्स्यः (वै. नि.)
शुभ्रतरु–पु., शिरीषवृक्षः (प. मु.)
शुभ्रपुङ्खा–स्त्री., श्वेतशरपुङ्खा (रा. नि. व. ४)
शुभ्रवेष्ट पु., श्वेताशाल्मली (वै. निघ.)
शुभ्रसर्षप–पु., श्वेतसर्षपः (वै. निघ.)
शुभ्रिका–स्त्री., मधुशर्करा (वै. निघ.,)
शुल्कवायस–पु., वकपक्षी (त्रिका.)
शुल्या–स्त्री., सुनिषणकशाकः (वै. निघ.)
शुल्ल (ल्व)(क–)न.,–ताम्रम् (प. मु.) सूतादिगुट्याम्
शुल्वपत्र–न., ताम्रपत्रम् (रस. चि.)
शुल्वरिपु–पु., गन्धकः (हे. च.)
शुल्वशत्रु–पु., गन्धकः (वै निघ)
शुल्वारि–पु.,गन्धकः (हे. च.)
शुश्रूषा–स्त्री., सेवा (त्रिका)
शुषणी–स्त्री., स्वनामख्यातशाकः (राज. ३प.)
शुषवी–स्त्री., कारवेल्लता
शुषिर–न., लवङ्गम् (प. मु.) पु., मूषिकः (मे.) स्त्री., नलीनामगन्धद्रव्यम् (अम.) छिद्रम्
शुषिराख्य–पु., रन्ध्रवंशः
शुष्कगोमय–पु., वनकरीष
शुष्कनी–स्त्री., शुष्कमांसम्
शुष्कपत्र–न., शुष्कपट्टशाकः (राज. ३ प.)
शुष्कमत्स्य–पु., सलवणः रौद्रशोषितमत्स्यः (शब्दकल्प)
शुष्कमुख–पु., मुखशोषयुक्तः (वा. चि. ९अ.)
शुष्कमूल–न., रौद्रशोषितमूलकः (वा. चि. ७ अ.)
शुष्कमूलकाद्यतैल–न., शोथाधिकारे तैलम् (रस. र.)
शुष्कमूलाद्यघृत–न., उदावर्ताधिकारे घृतम् (रस. र.)
शुष्कली–स्त्री., शुष्कमांसम् (शब्दकल्पः)
शुष्कवृक्ष–पु., धववृक्षः (रा. नि. व. ९)
शुष्कव्रण–पु., योनिकन्दरोगः (त्रिका. किणे. त्रिका.)
शुष्काङ्ग–पु., धववृक्षः (वैद्यकम्)
शुष्काङ्गी–स्त्री., बलाका (वै. निघ.)गोधिका (श. च.)
शुष्कार्द्रम्–न., शुण्ठी (श. च.)
शुष्म–न., तेजः (मे.)
शुष्मा (न्)–पु., चित्रकवृक्षः (अम.) अग्निः
शूकक–पु., रसः (मे.) यवः
शूककीट–(क)–पु., ऊर्णादिभक्षकशूकयुक्तकीटविशेषः (अम.)

शूकतृण–न., तृणविशेषम् (रा. नि. व. ८)
शूकपाक्य–पु., यवक्षारः (संग्रह)
शूकपिण्डि-(ण्डी)–स्त्री., शूकशिम्बी (श. मा.)
शूकरकन्द–पु., वाराहीकन्दः (रा. नि. व. ७)
शूकरक्रान्ता–स्त्री., वराहक्रान्ता
शूकरपादिका–स्त्री., कोलाशिम्बी (रा. नि. व. ३)
शूकरशिम्बी–स्त्री., कोलशिम्बी (भा. म. ४ भ.)
शूकराक्रान्त–स्त्री., वराहक्रान्ता (श. र.)
शूकरेष्ट–पु., कशेरुः (रा. नि. ब. ८)
शूकला–स्त्री., शालिधान्यविशेषः (अत्रि. १५. अ.)
शूकवती–स्त्री., कपिकच्छुः (श. च.)
शूकवृन्त -पु., कीटविशेषः (सु. कल्प. ८ अ.)
शूका–स्त्री., कपिकच्छूलता (श. च.)
शूकाक्ष–पु., शिरीषवृक्षः (आयुर्वेदसारे सा. ज्वरे.)
शूकाक्षवीज–न., शिरीषवीजम् (आयुर्वेदसारे)
शूकापुट्ट–पु., तृणमणिः (हारा.)
शूकाभपुष्प–पु., शिरीषवृक्षः (वै. निघ.)
शूतिपर्ण–पु., आरग्वधवृक्षः (श. र.)
शूद्रार्त्ता–स्त्री., प्रियङ्गुलता (श. च.)
शूनक–त्रि., शोथयुक्तः (मा. नि.)
शूनकचञ्चुक–पु., क्षुद्रचञ्चुक्षुपः (वै. निघ.)
शूपकार–पु., शूद्रपाचकः (पुराणम्)
शूरक–पु., कोकिलावृक्षः
शूरण–पु., वङ्गदेशजस्वनामख्यातकन्दशाकविशेषः
शूरणपिण्डिका–स्त्री., अर्शसि औषधम् (च. द.)
शूरणमोदक–पु., स्वल्पाख्येऽर्शोघ्नौषधविशेषः (भा.)
शूरणोद्भुज–पु., पक्षिविशेषः (श. र.)
शूरा–स्त्री., क्षीरकाकोली (वै. निघ.)
शूरिमृग–पु., वराहादिः (अत्रि. २९ अ.)
शूर्पश्रुति–पु., गजः (हारा.)
शूलग्रन्थि–पु., वल्लीदूर्वा
शूलघातन–न., मण्डूरलौहम् (श. च.)
शूलद्विट्–न., हिङ्गु (र. मा.)
शूलनाशन–न., सौवर्चललवणम् (हे. च.) हिङ्गुः, पुष्करमूलम् (वै. निघ.)
शूलवज्रिणी (वटिका)–स्त्री., शूलाधिकारे औषधम्
शूलशत्रु–पु., एरण्डवृक्षः (श. र.)
शूलशब्द–पु., उदरमध्यः गुडगुडाशब्दः
शूलहरम्–न., पुष्करमूलम् (वै. निघ.)
शूलहृत्–पु., हिङ्गु (रा. नि. व. ६.)
शूलाकृत–न., शुलविद्धदग्धं पक्कमांसम् (अम.) त्रि.,
शूलारि–पु., इङ्गुदीवृक्षः (रा. नि. ब. ८)
शूलिक–पु., शशकः (हे. च.) न., शूलविद्धपक्कमांसम् (श. च.)
शूलिन–पु., भाण्डीरपुष्पवृक्षः (शमा.) उदुम्बरवृक्षः
शूली (इन्)–त्रि., शूलरोगवान् पु., शशकः (भा.)
शूलोत्था–स्त्री., सोमराजी
शूल्यपाक–पु., शूलविद्धं कृत्वाऽङ्गारपक्कमांसादि(पाकराजः)
शृगालकण्टक–पु., वृक्षविशेषः (श. च.)
शृगालकोलि–पु., कर्कन्धुवृक्षः (प. मु.) क्षुद्रबदरः (र. मा.)
शृगालजम्बु(म्बू)–स्त्री., गोडुम्बा । घोण्टाफलम् (मे.)-
शृङ्खलक–पु., उष्ट्रः (रा. नि. व. १९.)
शृङ्खला (ली)–स्त्री., कोकिलाक्षक्षुपः (रा. नि. व. ४.)
शृङ्गज–न., अगुरुकाष्ठम्
शृङ्गधूम–पु., फिङ्गापक्षी (वै. निघ.)
शृङ्गनाभ–न., विषभेदः (प. मु.)
शृङ्गनाम्नी–स्त्री., कर्कटशृङ्गी (मद. व. १.)
शृङ्गमोही (इन्)–पु., चम्पकवृक्षः (रा. नि. व. १०)
शृङ्गरीटका–स्त्री., स्वर्णजीवन्ती
शृङ्गवेराभमूलक–पु., गुन्दातृणम् (भा.)
शृङ्गाराभ्र–न., वाजिरसायनाधिकारे औषधम् (रस. र.)
शृङ्गारी (इन्)–पु., माणिक्यम् (रा. नि. व. १३.)
शृङ्गारुहा–स्त्री., शृङ्गाटकम् (वै. निघ.)
शृङ्गाह्व (ह्वा)–पु., (स्त्री.) जीवकः (रा. नि. व. ५.) शृङ्गाटकम् (वै. निघ.)
शृङ्गि–स्त्री., तन्नामप्रसिद्धमत्स्यः (राज. ३प.)
शृङ्गिण–पु., मेषः (हे. च.) सशृङ्गमृगवर्गः (अत्रि. २०)
शृङ्गिणी–स्त्री., मल्लिकापुष्पवृक्षः । ज्योतिष्मतीलता (मे) अतिविषा (रा. नि. व. ६.) नदीवट (वै. निघ.) गौः (अम.)
शृङ्ग्यादि–पु., बालरोगे लेहः (च. द.)
शृत–पु., तोयक्षिप्तद्रव्यादग्निपाचितात निःसृतकषायः (प. प्र, १ ख.)
शृतशीतजल–न., पक्कशीतलजलम् (रा. नि. व. १४)
शृधु-(धू) स्त्री., पायुः (विश्व.)
शेखरिक–पु., अपामार्गः
शेखरी–स्त्री., बन्दकः (रा. नि. व. ५)
शेट–पु., करण्डः (त्रिका.)
शेप–पु., शेफस्
शेपाल–पु., शेवालम् (श. र.)

शेफालि-स्त्री., स्वनामख्यातपुष्पवृक्षः (रा. नि. व. ४)
शेलक-पु., बहुवारवृक्षः (वै. निघ.)
शेलुत्वक्-पु., बहुवारवृक्षत्वक् (भैष. शोथ. चि. बृहच्छुष्कमूलाद्यतैले)
शेलुष-पु., क्षुद्रशेलुः (वै. निघ.)
शेवाली-स्त्री., आकाशमांसी (रा. नि. व. १२)
शेषचिन्तामणि-पु., रसमञ्जरीटीकाकारः
शैखरी-स्त्री., वन्दा
शैखरेय-पु., अपामार्गः (शब्दकल्पः)
शैत्यवीज-न., शीतवीजम्
शैम्ब-न., शिम्बीधान्यम् (वै. निघ.)
शैरेयक-पु., नीलझिण्टी (र. मा.)
शैलक-न., शैलजनामगन्धद्रव्यम् (रा. नि. व. १२)
शैलगन्ध-न., शाबरचन्दनम् (रा. नि. व. १२)
शैलगर्भजा-स्त्री., करज्योडिपाषाणभेदविशेषः (वै.निघ.)
शैलजा-स्त्री., गजपिप्पली (रा. नि. व. २३) सैंहली-पिप्पली (रा. नि. व. ६) श्वेतवर्णपाषाणभेदः (वै. निघ.)
शैलजात-न., शैलजः (च. द. मदनमोदके)
शैलधातुज-न., शिलाजतु (भा.)
शैलनिर्यास-पु., शिलाजतु (भा.)
शैलपत्र-पु., बिल्ववृक्षः (रा. नि. व. ११)
शैलमल्ली-स्त्री., कोरैआ इति प्रसिद्धवृक्षः (भा. म. १ भ. ज्व. चि. श्वास. चि. दशाङ्ग)
शैलरोही(इन्)-पु., कुष्ठवैरिवृक्षः (अत्रि.)
शैलवीज-पु., भल्लातकवृक्षः (रा. नि. व. ११)
शैलाख्य(ज)-न., शैलजः (रमा.)
शैलाह्व-न., शिलाजतुः (रा. नि. व. १३)
शैलू(क)-पु., बहुवारवृक्षः (वै. निघ.)
शैलूषभूषण-न., हरितालः (भैष ज्व. चि.)
शैलेय-न., पु., शैलजनामगन्धद्रव्यम्
शैलोत्थगरल-न., पाषाणघातजन्यविषम् (र. सा. सं. रसाध्याये.)
शैल्यमेथिका-स्त्री., लिङ्गिनीलता (वै. निघ)
शैवमल्लिका-स्त्री., लिङ्गिनीलता (रा. निघ. ३)
शैशिर-पु., श्यामचटकः (रा. नि. व. १९) बदरवृक्षः वै. निघ.)
शैशेरिक-न., शीतबीजम्
शोक(दोष)घ्न-पु., अशोकवृक्षः (रा. नि. व. १०)
शोकज्वर-पु., शोकजन्यज्वरः (मा. नि.)
शोकारि-पु., कदम्बवृक्षः (श. च.)
शोचिष्केश-पु., चित्रकवृक्षः (अम.)
शोटीर्य-न., वीर्यम् (श. र.)
शोठ- पु., पारावतः (श. र.)
शोणपुष्प (क)-पु., कोविदारवृक्षः (रा. नि. व. १०)
शोणफलिनी-स्त्री., पीतपुष्पकाञ्चनवृक्षः (वै. निघ.)
शोणरत्न-न., माणिक्यम् (रा. नि. व.१३) पद्मरागमणिः (अम.)
शोणा स्त्री., रक्तझिण्टी (वै. निघ.)
शोणाक-पु., श्योणाकवृक्षः (अम.)
शोणितचन्दन-न., रक्तचन्दनम् (रा. नि. व. १२.
शोणितमोक्षण न., रक्तमोक्षणम्
शोणितसंभव-न., मांसधातुः (वैद्यकम्)
शोणिताभिध-न., कुङ्कुमम् (वै. निघ.)
शोणिताह्वय-न., कुङ्कुमम् (र. मा.)
शोणितोत्पल-न., रक्तोत्पलम् (वै. निघ.)
शोणोपल-पु., माणिक्यम् (रा. नि.व. १३)
शोथक-न., कङ्कुष्ठम् (रा. नि. व. १३)
शोथघ्नी-स्त्री., रक्तपुनर्नवा (अम.) शालपर्णी (रा. नि. व. ४)
शोथजनेत्रपाक-पु., सर्वाक्षिरोगः (निदा.)
शोथजि(ह्व)त्-पु., भल्लातकवृक्षः (प. मु.) पुनर्नवा (त्रिका.)
शोथजिह्व पु , पुनर्नवा (त्रिका.)
शोथारि-पु., पुनर्नवा (रस. र. वह्निभल्लातकरसे)
शोथोदरारिलेह-पु., उदराधिकारे औषधम्(भैष.रस.र.)
शोधनीवीज-न., जैपालवीजम् (रा. नि. व. ६)
शोफकर-पु., भल्लातकः (वै. निघ.)
शोफकृत्-पु., भल्लातकवृक्षः (भा.)
शोफारि-पु., हस्तिकन्दः (वै. निघ.)
शोभन-न., पद्मम् (श. च.) कङ्कुष्ठम् (वै. निघ.) कुङ्कुमम् (त्रि.) सुन्दरम्
शोभनक-पु., शोभाञ्जनवृक्षः (श. च.)
शोभनानन-पु., सुगन्धार्जकः (वै. निघ.)
शोभनीया-स्त्री., गोरक्षमुण्डी । महामुण्डी (वै. निघ.)
शोषसम्भव-न., पिप्पलीमूलम् (रा. नि. व. ६)
शोषहा-(न्)-पु., जलापामार्गः (वै. निघ.)
शौकरी-स्त्री., वाराहीकन्दः (वै. निघ.)
शौक्तिकेय-न., मुक्ता (प. मु.)
शौक्तिकेय-पु., विषम् (प. मु.) सोमलता (वै. निघ) विषभेदः (अम.)

शौक्लय–न., शुक्लता (अम.)
शौग्र–न., शोभाञ्जनबीजम् (वै. निघ.)
शौटीर्य–न., शौण्डीरम् । वीर्यम् (श. र.)
शौण्ठी–स्त्री., पिप्पली (रा. नि. व. २३.) कृष्णकटभी-वृक्षः (रा. नि. व. ९)
शौण्ड (ण्डी)–पु., स्त्री., देवधान्यम्, कुकुटः (वै. निघ.) स्त्री., पिप्पलीमूलम् (वै. निघ.)
शौण्डिक–न., पिप्पलीमूलम् (वै. निघ.)
शौण्डिकप्रिय–पु., आम्रवृक्षः (वै. निघ.)
शौधिका–स्त्री., रक्तकः (हे. च.)
शौभ–पु., गुवाकवृक्षः (शमा.)
शौभाञ्जन–पु., शोभाञ्जनवृक्षः (भ. द्वि.)
शौरिप्रिय–न., नीलहीरकः (प. मु.)
शौरिरत्न–न., नीलमणिः (रा. नि. व. १३.)
शौल्फ–न., शुलुफाशाकः (शब्दकल्पः)
शौल्यशीत–पु., क्षेत्रेक्षुः (प. मु.)
शौष्कल–पु., मत्स्यमांसभक्षकः (अम.)
श्मन्–न., मुखम् (भ.)
श्मश्रुमुखी–स्त्री., श्मश्रुयुक्तानारी (श. र.)
श्मश्रुशेखर–पु., नारिकेलवृक्षः (वै. निघ.)
श्यामकण्ठ–पु., मयूरः (हला) श्यामकण्ठपक्षी (शब्दकल्पः)
श्यामचटक–पु., भारिटपक्षी
श्यामचूडा–स्त्री., कृष्णचटका (वै. निघ.)
श्यामपत्र पु., तमालवृक्षः (श. च.) (स्त्री.) जम्बूवृक्षः (वै. निघ.)
श्यामपर्ण–पु., शिरीषवृक्षः (वै. निघ.)
श्यामपर्णी–स्त्री., 'चा' इति प्रसिद्धः श्लेष्मार्यपरनामधेयः वृक्षभेदः
श्यामभूषण–न., मरिचम्
श्याममृग–पु., कृष्णवर्णहरिणः (च).
श्यामलचूडा–स्त्री., रक्तगुञ्जा (रा. नि. व. ३.)
श्यामलता–स्त्री., श्यामानामलता (प. मु.)
श्यामलाल–पु., सङ्क्षेपरत्नावलीकारः
श्यामलालु–पु., नीलालुकम् (रा. नि. व. ७.)
श्यामबीज–न., कालादानेतिख्याते वणिग्द्रव्यविशेषः
श्यामा–स्त्री., दृष्टार्तवा मध्यमा स्त्री (रा. नि. व. १८.)
श्यामसर्प–पु., कृष्णसर्पः (चि. क. क. १ स्त.)
श्यामाङ्गी–स्त्री., नीलदूर्वा (वै. निघ.)
श्यामाढकी–स्त्री., कृष्णपुष्पाढकी
श्यामाम्ली–स्त्री., नीलाम्ली (रा. नि. व. ४.)
श्यामालता–स्त्री., कृष्णशारिवा
श्यामाह्वा–स्त्री., पिप्पली (वै. निघ.)
श्यामेक्षु–पु., कृष्णेक्षुः (रा. नि. व. १४)
श्यावतैल–न., कर्पूरतैलम्
श्यावास्यता–स्त्री., मुखकृष्णता (निदा)
श्येतकोलक–पु., मत्स्यविशेषः (हारा.)
श्येनाहत–पु., सोमलता (वै. निघ.)
श्येनी–स्त्री., श्येनाक्षी (शब्दकल्पः)
श्रपित–त्रि. पक्वम् । पाचितम् । घृतदुग्धजलभिन्नपक्वद्रव्यम् (जटा.)
श्रपिता–स्त्री., काञ्जिकम् (शब्दकल्पः)
श्रमणा–स्त्री., सुदर्शना । मुण्डी । मांसी (मे.)
श्रव(स्)–पु., श्रवणेन्द्रियम् (रा. नि. व. १८)
श्रवणविभ्रम–पु., अन्यथाश्रवणम् (वैद्यकम्)
श्रवणी–स्त्री., प्रपौण्डरीकनामगन्धद्रव्यम् (रा. नि. व. १२)
श्राण–न., पक्वम् (मे.) घृतजलदुग्धभिन्नपक्वद्रव्यम् (जटा.) स्त्री., (णा) यवागुः (पमु.)
श्राद्धशाक–न., कालशाकः । नाडीचशाकः
श्रान्तोपचार–पु., अश्वस्य श्रान्तौ उपचारविधानम्
श्राव–पु., श्रीवासः (भा.)
श्रावक–पु., काकः (त्रिका.)
श्रावा–स्त्री., अन्नमण्डः (प. मु.)
श्रीकर–न., रक्तोत्पलम् (त्रिका.)पु., शालवृक्षः (वै. निघ)
श्रीकारी-(इन्) पु., मृगविशेषः (रा. नि. व. १९)
श्रीकुक्कुट–पु., तिलसर्षपपिण्याकजः मालवदेशप्रसिद्धः अम्लखडकविशेषः (वा. चि. १२ अ.)
श्रीगन्ध–न., श्वेतचन्दनम् (वै. निघ. २ भ. दाह. चि. पुनर्नवातैले.)
श्रीग्रह–पु., पक्षिपानीयशाला (हारा.)
श्रीधनम्–न., दधि (जटा.)
श्रीचन्दन–न., श्वेतचन्दनम् (वै. निघ. २ भ. अप. चि. द्राक्षावलेहे.)
श्रीचमरी–स्त्री., चमरीमृगः (वै. निघ.)
श्रीतरु–पु., शालवृक्षः (वै. निघ.)
श्रीधात्री–स्त्री., शिरामलकः (रस. कौ. महामृत्युञ्जयरसे)
श्रीपदी–स्त्री., वार्षिकीमल्लिका (भा.)
श्रीपर्ण–न., पद्म (रा. नि. व. १०) पु., गणिकारिका (अम. । च. वि. ८अ.

श्रीपिष्ट-पु., सरलवृक्षनिर्यासः (अ. टी. रा. मा.) लवणखोटी (कश्चित्)
श्रीपुत्र-पु., घोटकः (त्रिका.) अश्वत्थवृक्षः
श्रीपुष्पमञ्जरी-स्त्री., प्रपौण्डरीकः (रा. नि. व. १२)
श्रीप्रसूनक-न.; लवङ्गम् (वै. निघ.)
श्रीफलशलाटु-पु., बिल्वशलाटुः (सा. कौ. ग्रहणी चि.)
श्रीबाहुशालगुड-अर्शोधिकारे पक्वगुडः (च. द.)
श्रीबीज-पु., तालवृक्षः (वै. निघ.)
श्रीभद्र-पु., मुस्ता (श. र.)
श्रीभ्राता-स्त्री., घोटकः (रा. नि. व. १९)
श्रीमञ्जरी-स्त्री., तुलसीवृक्षः (वै. निघ.)
श्रीमत्-न., तिलपुष्पम् (वै. निघ.) स्त्री., [ती] मुण्डीरी (वै. निघ.)
श्रीमदनानन्दमोदक-पु., ध्वजभङ्गे औषधम्
श्रीमलापहा-स्त्री., धूम्रपत्रा (रा. नि. व. ५)
श्रीमस्तक-पु., रङ्गेष्ठालुकः । रसोनः (त्रिका.)
श्रीमुख-पु,. शारीरकग्रन्थकारः
श्रीलता-स्त्री., महाज्योतिष्मतीलता (रा. नि. व. २)
श्रीवाससार-पु.. कपित्थपर्णीवृक्षनिर्यासः
श्रीवासा (स्) पु., सरलद्रव्यम्
श्रीवृक्ष(क)-पु., अश्वत्थवृक्षः (हें. च.) बिल्ववृक्षः (शब्दकल्पः)
श्रीवेष्टफल-न.. सरलवृक्षफलम् (वै. निघ.)
श्रीसंज्ञ-न., लवङ्गम् (अम.)
श्रीसम्पदा-स्त्री., ऋद्धिः (रा. नि. व. ५)
श्रीहर्षसूरि-पु.; योगचिंन्तामणिकारः
श्रीहस्तिनी-स्त्री., हस्तिशुण्डी (जटा.)
श्रुग्वारु-पु., विकङ्कतवृक्षः (र. मा.)
श्रुतश्रेणी-स्त्री., द्रवन्तीवृक्षः (भा.)
श्रुति-स्त्री., श्रवणेन्द्रियम् (रा. नि. व. १८)
श्रुतिकट-पु., सर्पः (मे.)
श्रुतिमूल-न., कर्णमूलम् (संग्रहः)
श्रुतिवर्जित-पु., बधिरः (जटा.)
श्रुतिवेध-पु., कर्णवेधः (शब्दकल्पः)
श्रुतिसार-पु., वैद्यकग्रन्थभेदः
श्रुतिस्फोटा-स्त्री., कर्णस्फोटालता (रा. नि. व. ३)
श्रुव-पु., अश्वस्य शिरोऽधः केशान्तभागः (ज. द. २ अ.) स्त्री., (वा)-मूर्वा (रा. नि. व. ३)
श्रुवावृक्ष-पु., विकङ्कतवृक्षः (रा. नि. व. ११)
श्रेणि (णी)-स्त्री., लाजमण्डः (प.मु.) समानशिल्पसंहत्तिः (मे.) सेकपात्रम् (विश्व.)
श्रेणिवला-स्त्री., निःश्रेणिकातृणम्
श्रेय-स्त्री., जीवकः (वै. निघ.)
श्रेष्ठकाष्ठ-पु., शाकवृक्षः (रा. नि. व. ९).
श्रेष्ठमल्लिका-स्त्री., शतदलमल्लिका (प. मु.)
श्रेष्ठलवण-न., सैन्धवलवणम् (वै. निघ.)
श्रेष्ठवृक्ष-पु., वरुणवृक्षः (रा. निव. ९.) कृष्णागुरुवृक्षः (वै. निघ.)
श्रेष्ठवेधिका-स्त्री., कस्तूरी (वै. निघ.)
श्रेष्ठव्रीहि-पु., षष्टिकशालिः (वै. निघ.)
श्रेष्ठाम्बु-न., तण्डुलोदकम् (वा. उ. ३७ अ.)
श्रोण-त्रि., खञ्जः (अम.) (स्त्री.,) (णा) काञ्जिकम् (शब्दकल्पः)
श्रोणिफल-न , वरस्त्रीणां प्रशस्तनितम्बः (रा. नि. व. १८)
श्रोणिफलकास्थि-न.,नितम्बभगास्थीनि (च.शा. ७अ.)
श्रोत-(स्)-न., कर्णम् (त्रिका.) इन्द्रियम् (हे. च.) शिरा (सु.)
श्रोतोज-न., सौवीराञ्जनम् (रा. नि. व. १३)
श्रोतोद्भव-न., श्रोतोऽञ्जनम् (रा. नि. व. १३)
श्रौत्र-न., श्रवणेन्द्रियम्, कर्णम् (अम.)
श्याह्व-पु., नवनीतखोटी (च. सू. ३ अ.) प्रदेहः (न.) कमलम् (शब्दकल्पः)
श्लक्ष्णक (का)-न., स्त्री., पूगफलम् (रा नि. व. ११) (का)-कृष्णापराजिता (वै. निघ.)
श्लक्ष्णत्वक्-पु., अश्मन्तकवृक्षः (रा. नि. व. ९)
श्लीपदप्रभव-पु., आम्रवृक्षः (श. मा.)
श्लीपदापह-पु., पुत्रजीववृक्षः (त्रिका.)
श्लीष्ट-पु., आम्रवृक्षः (वै. निघ.)
श्लेष्मकोष्ठ-पु., अश्वरोगभेदः (ज. द. ४६ अ.)
श्लेष्मघ्न-पु., श्लेष्महरं द्रव्यम् (सु. सू ४१ अ.)
श्लेष्मघ्ना (घ्नि)-स्त्री., त्रिपुरमल्लिका (त्रिका.) केतकी (विश्व) ज्योतिष्मतीलता (जटा) त्रिकटुः (श. र)
श्लेष्मज्वर-पु., कफजन्यज्वरः (निदा.)
श्लेष्मण-पु., कफः (भा.)
श्लेष्मनाडी-स्त्री., दन्तमूलगतरोगः
श्लेष्मपाण्डु-पु., श्लेष्मजन्यपाण्डुरोगः
श्लेष्मलफल-पु., बहुवारवृक्षः (वै. निघ.)
श्लेष्मविसर्प-पु., कफजन्यविसर्पः (निदा.)
श्लेष्मसंभूत-त्रि., श्लेष्मजः (रा. नि. व. २०)
श्लेष्मस्राव-पु., नेत्रसन्धिगतरोगविशेषः (सु.उ.२ अ.)
श्लेष्मह-पु., पनसवृक्षः (वै. निघ.) कट्फलवृक्षः (श. च.)

श्लेष्महन्त्री-स्त्री., देवदालीलता (वै. निघ.)
श्लेष्माट-पु., शेलुवृक्षः
श्लेष्माणा-स्त्री., वृक्षविशेषः (श. मा.)
श्लेष्मातकसदृशपत्र-पु., पनसवृक्षः
श्लेष्मान्तक-पु., शेलुवृक्षः (रा. नि. व. ११)
श्लेष्मारि-पु., पार्वत्यक्षुद्रवृक्षभेदः
श्लेष्मोल्वण-पु., श्लेष्माधिकः (वा. चि. ७ अ.)
श्लैष्मिकरक्तपित्त-न., कफजन्यरक्तपित्तम् (मा. नि.)
श्लैष्मिकी-स्त्री., श्लेष्मजन्ययोनिव्यापद् (वा. उ. ३३ अ.)
श्वचिल्ली-स्त्री., कुक्कुरचिल्लीक्षुपः (वै. निघ.)
श्वदंष्ट्रक-पु., गोक्षुरक्षुपः (रा. नि. व. ४)
श्वधूत-पु., शृगालः (श. र.)
श्वनक-पु., कुक्कुरः (प. मु.)
श्वनिशम् (शा)-न., स्त्री., मत्तकुक्कुरनिशा (जटा.)
श्वपुच्छ-पु., वृश्चिकः
श्वफल-पु., चूर्णम् । बीजपूरम् (र. मा.)
श्वभीरु-पु., शृगालः (श. मा.)
श्वभ्र-न., पु., छिद्रम् (अम.)
श्वयाचि-(ची)-स्त्री., रोगः । पीडा (व्याक.)
श्वसनाशन-पु., सर्पः (हारा.)
श्वसनेश्वर-पु., अर्जुनवृक्षः (श. च.)
श्वसनोत्सुक-पु., सर्पः (श. च.)
श्वसित-न., निःश्वासः (हे. च.)
श्वसुन-पु., कासालुः (रा.नि.व.७) क्षतघ्नवृक्षः(श. च.)
श्वादन्त-पु., कुक्कुरदन्तः (व्याक.)
श्वान-पु., कुक्कुरः स्त्री., (नी)-सारमेया (श. र.)
श्वानचिल्लिका-(ल्ली)-स्त्री., शुनकचिल्लीशाकः (वै. निघ.)
श्वावलिका-स्त्री., धन्याकम् (रा. नि. व. ६)
श्वावित्-पु., शशकः । शल्लकीमृगः (भा.) शल्लकीवृक्षः (त्रिका.)
श्वास-पु., स्वनामख्यातरोगविशेषः (ज. द. ३५ अ.)
श्वासकास-पु., प्रसिद्धरोगद्वयम् (निदा.)
श्वासभक्ष-पु., वर्बूरकवृक्षः (रा. नि. व. ८)
श्वासहेति-स्त्री., निद्रा (हे. च.)
श्वित्रघ्नी-स्त्री., वृश्चिकाली (श. च.)
श्वेतकटभी-स्त्री., शुक्लकटभीवृक्षः (वा. उ. ३८ अ.) श्वेतगुञ्जा (वा. उ. ५ अ.)
श्वेतकण्टक-पु., श्वेतलज्जालुका (वै. निघ.)
श्वेतकण्टकारिका (री)-स्त्री., शुभ्रपुष्पकण्टकारी (रा. नि. व. ४)
श्वेतकपोत-पु., दर्विकरसर्पविशेषः (सु. कल्प. ४ अ.)
श्वेतकमल-न., श्वेतपद्मम् (रा. नि. व. १०)
श्वेतकरवीर-पु., शुक्लपुष्पकरवीरवृक्षः
श्वेतकाक-पु., शुक्लकाकः । रावणकृतकार्मणशतकम्
श्वेतकाञ्चन-पु. शुक्लपुष्पकाञ्चनवृक्षः (प. मु.)
श्वेतकाष्ठा-स्त्री., श्वेतपाटली (वै. निघ.)
श्वेतकिणिही-स्त्री., शुक्लकटभीवृक्षः (रा. नि. व. ९)
श्वेतकुश-पु., शुक्लदर्भः (रा. नि. व. ८)
श्वेतकुसुमा-स्त्री., श्वेतनिर्गुण्डी (वै. निघ.)
श्वेतकृष्णा-स्त्री., कीटजातिभेदः (सु. कल्प. ८)
श्वेतकेश-पु., रक्तशिग्रुः (जटा.)
श्वेतकोल-पु., शफरमत्स्यः (त्रिका.)
श्वेतखदिर-पु., शुक्लखदिरवृक्षः (भ्रा.)
श्वेतगण्डा-स्त्री.. श्वेतदूर्वा (वै. निघ.)
श्वेतगरुत्-पु., राजहंसः (अम.)
श्वेतघोषा-स्त्री., श्वेतकोषातकी (वै. निघ.)
श्वेतचरण-पु., प्लवचरजलजपक्षिविशेषः (सु. सू. ४६अ.)
श्वेतचरणक-पु., शुक्लचरणकः
श्वेतच्छद-पु., गन्धपत्रम् (श. च.) हंसः (हला)
श्वेतजयन्ती-स्त्री., शुकजयन्तीवृक्षः (भैष.) (कुष्ठचि)
श्वेतजरण-पु., शुक्लजीरकः (वै. निघ.)
श्वेततण्डुलमण्ड-न., पु., आतपतण्डुलसिद्धमण्डः (अत्रि. १२ अ.)
श्वेततुलसी-स्त्री., शुभ्रपत्रतुलसीवृक्षः (प. मु.)
श्वेतत्रिवृत्-स्त्री., शुक्लमूलत्रिवृत् (भा.)
श्वेतदन्ता-स्त्री., नागदन्ती (वै. निघ.)
श्वेतदर्भ-पु., शुक्लदर्भः (वै. निघ.)
श्वेतधातु-पु., दुग्धपाषाणः (रा. नि. व. १२)
श्वेतधामा-न् पु., कर्पूरः, समुद्रफेनः (मे)
श्वेतधूनक-न., शुक्लधूनकम् (रस. र.) (ज्वराति. चि. ग्रहणीकपाटरसे)
श्वेतनाडी-स्त्री., खटिका (वै. निघ.) श्वेतापराजिता (च. सू. २ अ.)
श्वेतपटल-न., यशदधातुः (वै. निघ,)
श्वेतपर्ण-पु., श्वेतार्जकः (प. मु.) स्त्री., (र्णा) वारिपर्णी (र. मा.)
श्वेतपणास-पु., श्वेततुलसी (प. मु.)
श्वेतपाटला-स्त्री., शुक्लपुष्पपाटलवृक्षः (जटा.)
श्वेतपारावत-पु., शुभ्रकपोतः (वै. निघ.)
श्वेतपाषाण-पु., शुभ्रप्रस्तरः (र. सा. सं.) रसप्रकरणे स्फटिका (वै. निघ.)

श्वेतपिङ्ग-ल-पु., सिंहः (त्रिका.)
श्वेतपुङ्खा-स्त्री., शुक्लशरपुङ्खा (रा. नि. व. ४)
श्वेतपुनर्नवा-स्त्री., शुभ्रपुनर्नवा (भा.)
श्वेतपुष्पा-स्त्री., कोषातकीलता (र.मा.) श्वेतगोकर्णिका (वै. निघ.) नागदन्ती (रा. नि. व. ५) मृगेर्वारुः (रा. नि. व. ७)
श्वेतपूरिका- स्त्री., खाद्यद्रव्यभेदः (वै. निघ.)
श्वेतप्रसूनक-पु., शाकवृक्षः (श. मा.)
श्वेतभण्टिका-स्त्री., शुक्लवार्ताकी (वै. निघ.)
श्वेतभण्डा-स्त्री., श्वेतापराजिता (र. मा.)
श्वेतभृङ्गराज-पु., शुक्लपुष्पभृङ्गराजः
श्वेतमञ्जरी-स्त्री., चुञ्चुक्षुपः (वै. निघ.)
श्वेतमृग-पु., भूशयमृगविशेषः (च.)
श्वेतयूथिका-स्त्री., शुक्लयूथिका (वै. निघ.)
श्वेतरञ्जन-न., शीषकन् (शब्दकल्पः.)
श्वेतरत्न-न., स्फटिकः (प. मु.)
श्वेतराजि-(जी) स्त्री., चिचिण्डः (भा. पू. १ भ. शा. व.)
श्वेतराजिका-स्त्री., श्वेतपीतसर्षपस्, राजिका (रा. नि. व. १६)
श्वेतरास्ना-स्त्री., श्वेतपुष्परास्नाविशेषः
श्वेतलक्ष्मणा-स्त्री., श्वेतकण्टकारी (वै. निघ.)
श्वेतवर्णक-न., श्वेतरक्तचन्दनम् (वै. निघ.)
श्वेतवर्बरक-न., वर्बरचन्दनम् (रा. नि. व. १२)
श्वेतवर्बरिका-स्त्री., शुभ्रतुलसी (रा. नि. व. १०) रावणकृतसप्तमशतकम्
श्वेतवल्कल-पु., उदुम्बरवृक्षः (जटा.)
श्वेतवल्ली-स्त्री., शुक्लवास्तुकम् (वै. निघ.)
श्वेतविट्कता-स्त्री., कफाधिक्यजन्यशुक्लपुरीषता (वै. निघ.)
श्वेतवीज-पु., श्वेतकुलत्थः (रा. नि. व. १६)
श्वेतवुर्ना-स्त्री., स्वनामख्यातलताविशेषः
श्वेतवृन्ताक-पु., शुक्लवार्ताकी (वै. निघ.)
श्वेतवृक्ष-पु., वरुणवृक्षः (प. मु.)
श्वेतवेतस-पु., जलवेतसः (वै. निघ.)
श्वेतशरपुङ्खा-स्त्री., शुक्लपुष्पशरपुङ्खा (रा. नि. व. ४)
श्वेतशा(सा) रिवा-स्त्री., शारिवाभेदः
श्वेतशाल्मलि-पु., शुक्लपुष्पकिंशुकवृक्षः
श्वेतशिम्बा(विः) (बीकः)-स्त्री., राजशिम्बी (र. मा.)
श्वेतशिला-स्त्री., श्वेतपाषाणभेदः (रा. नि. व. ८)
श्वेतशुङ्ग-पु., यवः (जटा.)
श्वेतशूक-पु., यवः (रा. नि. व. २३)
श्वेतशूरण-पु., वनशूरणनामकन्दशाकः (रा. नि. व. ७)
श्वेतशेफालिका-स्त्री., शुक्लशेफालिकावृक्षः (संग्रहः)
श्वेतश्रेष्ठ-पु., चन्दनवृक्षः (वै. नि.)
श्वेतसर्ज-पु., श्वेतधूनकम् (संग्रहः)
श्वेतसर्षप-पु., शुक्लसर्षपः (प. मु.)
श्वेतसिंही-स्त्री., श्वेतबृहती (रा. नि. व. ४)
श्वेतहनु-पु., राजिमत्सर्पविशेषः (सु. कल्प ४ अ.)
श्वेतहर-पु., महाशालवृक्षः (वै. निघ.)
श्वेताक्षुद्रा-स्त्री., श्वेतकण्टकारी (वै. निघ.)
श्वेताञ्जन-न., शुक्लाञ्जनम् (वै. निघ.)
श्वेताढकी-स्त्री., श्वेतपुष्पाढकी (रा. नि. व. १६)
श्वेतात्रिवृत्-स्त्री., शुक्लमूलत्रिवृत् (भा.)
श्वेताद्रिकर्णिका-स्त्री., शुक्लगिरिकर्णिका (वा. उ. ५ अ.)
श्वेतापराजिता-स्त्री., शुक्लपुष्पापराजिता (रा. नि. व. ३)
श्वेताभद्रा-स्त्री., श्वेतगोकर्णी (वै. निघ.)
श्वेताभ्र-स्त्री., श्वेतवर्णाभ्रः (रा. नि. व. १३
श्वेताम्ब(व)र-पु. सुनिषणकशाकः (रा. नि. व. ४)
श्वेतारिरस-पु, श्वेतकुष्ठघ्नो रसः (रस. चि.)
श्वेतालु-पु., शुक्लवर्णालुकः । महिषकन्दः (रा. नि.व. ७)
श्वेतावलोकन-पु., शुक्लनेत्रतारूपकफजन्यरोगविशेषः (निदा.)
श्वेताश्व-पु. कैटर्यः (पमु.)
श्वेताह्वा-स्त्री., शुक्लगोकर्णी (वै. निघ.) सितपाटला (रा. नि. व. १०)
श्वेतोत्पल-न., शुक्लकुमुदपुष्पम्
श्वेतोन्मत्त-पु., शुक्लपुष्पधुस्तूरवृक्षः

ष

ष-पु., केशः (एका.)
षटि-(टी)-स्त्री., शठी (वा. चि. ६ अ.)
षट्क (कटु)-न., त्रिकटुचव्यचित्रकपिप्पलीमूलं च (वै. निघ.)
षट्कनिघंटु-.पु, वैद्यकनिघण्टुभेदः
षट्कोण-न., हीरकम् (वै. निघ.)
षट्चरण (पद)-पु., भ्रमरः (हला.) यूका (रा. नि. व. १९)
षट्चरणयोग- पु., षड्धरणयोगः (सि. यो.) (वा. व्या. चि,)
षट्पदघाती (इन्)-पु., स्वर्णचम्पकः (वै. निघ.)
षट्पददल-(प्रिय)-पु., सुरपुन्नागवृक्षः (वै. निघ.)
षट्प (पा) दा (दी)-स्त्री., कीटभेदः (हे. च.)
षट्पदाधार-कदम्बवृक्षः (वै. निघ.)

षट्पदालय-पु., सुरपुन्नागवृक्षः (वै. निघ.)
षट्पदीभक्ष-पु., गङ्गापतङ्गभक्षणजन्याश्वरोगः (ज. द.)
षड्भद्रिका-स्त्री., बालरोगघ्नं औषधम् (वा.)
षड्लवण-न., मृल्लवणोपेतानि पञ्चलवणानि (रा. नि. व. २२)
षड्लौहसम्भव-न., शिलाजतुः (वै. निघ.)
षड्ग-पु., मण्डलिसर्पविशेषः (सु. कल्प. ४)
षडङ्गयूष-पु., षडङ्गपानीयम् (भैष.)
षड्षण-न., समरिचपञ्चकोलम् (भा. प. १ भ.)
षड्गुणवलिजारितमकरध्वज-पु., षडगुणगन्धक जारितरसेन साधितः मकरध्वजः
षडग्रन्थिका-स्त्री., आमहरिद्रा (अम.)
षड्रसनिघण्टु-पु., वैद्यकग्रन्थविशेषः
षड्रेखा-स्त्री., षड्भुजा
षड्बिन्दुतैल-न., शिरःपीडायां तैलम् (भैष.)
षण्डाल (ला ली)-पु., स्त्री., तैलमानभेदः
षष्टिकान्न-न., षष्टिकभक्तम्
षष्टिवासरज-पु., षष्टिकशालिधान्यम् (रा. नि. व. १६)
षष्टिशालि-पु., षष्टिकशालिः (रा. नि. व. १६)
षष्टिहायन-पु., षष्टिकशालिः, हस्ती
षष्ठालुकाल-न., व्यन्तरव्यन्तरभुक्तम् (त्रिका.)
षोडशाङ्घ्रि-पु., कर्कटः
षोडशावर्त-पु., शङ्खः

स

स-पु., सर्पः । पक्षी
संक्ष-न., पीतकाष्ठम् । भावुकादिसप्तपीतकाष्ठम् (श.च.)
संय-न., अस्थिकङ्कालः (श. च.)
संयम-पु., भयम् (भा. म. ४ भ. ने. रो. चि.)
संयमन-न., निरोधः (मे.)
संयुक्ता-स्त्री., आवर्तकीलता (रा. नि. व. ३)
संलपन-न., प्रलापः (सु. सू. २५ अ.)
संलय-पु., निद्रा (हे. च.)
संवर-पु., सञ्चयः । मत्स्यभेदः । हरिणभेदः । न., जलम् (शब्दकल्पः)
संवर्ण-न., शिङ्घानकः
संवर्त्ति-(का)-स्त्री., पद्मस्य केशरसमीपस्थजलम् (भा.)
संवर्द्धक-न., त्रि., वृद्धिकारकः । दीपनम् (हे. च.)
संवहन-न., शरीरमर्दनम् (वा. चि. ७ अ.)
संवाटिका-स्त्री., शृङ्गाटकः (जटा.)
संवितिकाफल-न., सेवफलम् (वै. निघ.)
संवित्ति-स्त्री., चेतना (श. र.)
संविषा-स्त्री., अतिविषा (श. च.)
संवीत-पु., श्वेतकिणिहि (वै. निघ.)
संवेदन-पु., छिक्किका (वै. निघ.)
संवेश-पु., निद्रा (अम.)
संयमशमहेतु-पु., संशयच्छेदनहेतुः (च. वि. ८ अ.)
संशोषी-(इन्)-पु., सन्निपातज्वरविशेषः
संश्यान-स्त्री., शीतेन सङ्कुचितम् (व्याक.)
संसारमार्ग-पु., भगः (त्रिका.)
संस्काल-पु., मेषः (त्रिका.)
संस्वेदजशाक-न., शिलिन्ध्रकम् (भा.)
संहितच्छत्रिका-स्त्री., शतपुष्पा, मिश्रेया
सकट-पु., शाखोटवृक्षः (शब्दकल्पः)
सकण्टक-पु., शैवालः (श. च.) पूतिकरञ्जः (र. मा.)
सकण्डूक-पु., कर्णपालीगतरोगः (सु. सू. १६ अ.)
सकलप्रिय-पु., चणकवृक्षः
सकललक्षण-न., शालनिर्यासः (वै. निघ.)
सकुल-(ली [इन्])-पु., शीलमत्स्यः (श. र.)
सकुलादनी-स्त्री., महाराष्ट्रीलता (रा. नि. व ४) कटुकी (ज. द.) वृश्चिकः स्त्री., काकवन्ध्या । सिंही रा. नि. व. २३)
सकृत्पज (जा)-पु., स्त्री., काकः (अम.) वृश्चिकः (स्त्री.,) काकवन्ध्या । सिंही (रा. नि. व. २३)
सकृद्गर्भ-पु., अश्वतरः (रा. नि. व. १९)
सक्तुफलाली-स्त्री., शमीवृक्षः (अम.)
सक्थिमर्म-न., ऊरुमर्म (सु. शा. ६ अ)
सगन्धा-स्त्री., सुगन्धशालिः (रा. नि. व. १६)
सग्धि-स्त्री., सहभोजनम् (अम.)
सङ्कटाक्ष-पु., धववृक्षः
सङ्कटी-स्त्री., उपोदिका (वै. निघ.)
सङ्काशिग्रह-पु., अश्वस्य दुष्टग्रहभेदः (ज. द. ५७ अ.)
संक्रेद-पु., आर्द्रता
संक्लेद-पु., आर्द्रता । क्लिन्नता
सङ्कोचपिशुन-न., कुङ्कुमम् (भा.)
सङ्केपरत्नावली-स्त्री., श्यामलालकृतद्रव्याभिधानम्
सङ्कपुष्पी-स्त्री. धातकीवृक्षः (सं.)
सङ्किनी-स्त्री., चोरपुष्पी (च. सू. ४ अ.)
संङ्ख्यानिनादटीका-स्त्री., संख्यानिदानस्यटीका
सङ्कर-पु., विषम् (मे.)(न.) शमीवृक्षफलम् (मे.)

सङ्गम-पु., मैथुनम् । मिलनम्
सङ्गिनी-स्त्री., चोरपुष्पी
सग्रहक-त्रि., भिन्नमलसन्धारकः (च. सू. ४ अ.)
सग्रहण-स्त्री., संग्रहग्रहणी (निदा.)
सङ्ग्राहक-त्रि., अनिलगुणभूयिष्ठद्रव्यम् (सु. सू. ४१ अ.)
सङ्घचारी(इन्)-पु., मत्स्यमात्रः (हे. च.)
सङ्घट्टा-स्त्री., लता
सङ्घाटिका-स्त्री., शृङ्गाटकलता (मे. घ्राणे विश्वः)
सचर-पु., श्वेतझिण्टी (वै. निघ.)
सचिल्लक-त्रि., कुदर्शनम्, क्लिन्नचक्षुः (श. र.)
सचिव-पु., कृष्णधुस्तूरः (रा. नि. व. १०)
सचिवामय-पु., पाण्डुरोगः। विसर्पः (रा. नि. व.)
सचेष्ट-पु., आम्रवृक्षः (श. मा.) त्रि., चेष्टान्वितम्
सञ्चरा-स्त्री., हरिद्रा (श. च.)
सञ्चर-पु., शरीरम् (हे. च.)
सञ्चल-न., सौवर्चललवणम्
सञ्चलन-न., कल्पनम् (शब्दकल्पः)
सञ्चान-पु., श्येनपक्षी (शब्दकल्पः)
सञ्चारिका-स्त्री., घ्राणम् (मे.)
सञ्चाली-स्त्री., गुञ्जा (शब्दकल्पः)
सञ्चित्रा-स्त्री., मूषिककर्णी (शर.)
सञ्जर-पु., सन्तापः (रा. नि. व. २०)
सञ्जा-स्त्री., छागी (श. र.)
सञ्जीवनागद-पु., सर्पदष्टे अगदविशेषः (सु.कल्प५ अ.)
सटा-स्त्री., जटा । केशरम् (मे.) न., जटा (शर.)
सटि-स्त्री., शठी (श. र.)
सण्ड-पु., नपुंसकः (अ. टी.)
सण्डिश-पु., सन्दंशम् (शब्दकल्पः)
सतसा-नागवल्लीभेदः (रा. नि. व. ११)
सतिक्तका-स्त्री., चुञ्चुशाकः (भा. पू. १ भ.)
सती-स्त्री., सौराष्ट्रमृद् (हे. च.)
सतील(क)-पु., वंशः (हारा.) सतीनकः (रा. नि. व. १६) स्त्री., **ला**-विष्णुक्रान्ता (रा. नि. व. ५) कलायभेदः
सतेर-पु., तुषः (उणा.)
सत्कदम्ब-पु., केलिकदम्बवृक्षः (श. च.)
सत्काञ्चनार-पु., रक्तकाञ्चनम् (श. च.)
सत्काण्ड-पु., श्येनपक्षी (श. च.)
सत्त्वशुद्धि-स्त्री., धातुसारस्य निर्मलीकरणम् (र. स.) चि. ६ अ.)
सत्वावजय-त्रि., शरीरस्याहितकरूपादिभ्यः मनोवृत्ति-व्यावर्तकं औषधम् (च. सू. ११ अ.)
सत्वादिस्थान-न., हृदयम् (च.)
सत्पत्र न., पद्मस्य कोमलदलम् (श. च.)
सत्यफल-पु., बिल्ववृक्षः (रा. नि. व. ११)
सत्यवती-स्त्री., शमीवृक्षः, ब्राह्मी (वै. निघ.)
सत्यवाक्-पु., काकः (त्रिका.)
सत्याह्वा-स्त्री., ब्राह्मी (वै. निघ.)
सत्वक्-स्त्री., शिरा (रा. नि. व. १८)
सत्सार-पु., वृक्षविशेषः (शब्दकल्पः)
सत्सुकन्दक-पु., अष्टविधस्थावरविषान्यतमविषम् (अत्रि ३ स्थान ५६ अ.)
सथुत्कार-न., थुत्कारसहितवचनम् (हे. च.)
सदंशक-पु., कर्कटः (रा. नि. व. १८)
सदंशवदन-पु., कङ्कपक्षी (रा. नि. व. १८)
सदञ्जन-न., पुष्पाञ्जनम् (श. च.)
सदाकुसुम-न., धातकीवृक्षः (वै. निघ.)
सदागतिशत्रु-पु., एरण्डवृक्षः (चि. क. क. स्त्री. रो. चि अपरापातने)
सदातोया-स्त्री., एलापर्णी (श. च.)
सदानर्त-पु., खञ्जनपक्षी (श. च.)
सदापुर-पु., कैवर्तमुस्ता (वै. निघ.)
सदामण्डलपत्रक-पु., श्वेतपुनर्नवा (वै. निघ.)
सदारुह-पु., बिल्ववृक्षः (वै. निघ.)
सद्दशस्पन्दन-न., निष्पन्दम् (त्रिका.)
सद्यःप्राणकर-त्रि., सद्योहतमृगादिमांसनवान्नादिः
सद्यःप्रीणन-न., आहारः (वैद्यकम्)
सद्यःशाथा-स्त्री., शुकशिम्बी (श. च.)
सद्योमांस-न., अभिनवमांसम् (चाणक्यः)
सन-पु., घण्टापाटलवृक्षः (श. च.)
सनपर्णी-स्त्री., अपराजिता (श. र.) आसनपर्णीवृक्षः
सनाभा-स्त्री., श्वेतपाटलः (वै. निघ.)
सनायक-पु., शोभाञ्जनवृक्षः (श. च.)
सनिष्ठेव-न., अम्बुकृतः (अम.)
सन्ततज्वर-पु., निरन्तरज्वरः
सन्तमक-पु., तमकश्वासः (सु. उ. ५१ अ.)
सन्तर्पण-न., द्राक्षादाडिमखर्जूरीकदलीघृतमधुशर्करा-युक्तं लाजचूर्णम् (रा. नि. व. २२) अतिभोजनम् सु. सू. ४४ अ.) अतितृप्तिः, रसादिवर्द्धकनवान्नमद्या-तिसेवनम् (च. द. ज्व चि.)

सन्तान-पु., कल्पवृक्षः (अम.) स्त्री., (ना) नीलापराजिता (वै. निघ.)
सन्तानच्छेदिका-स्त्री.. नीलापराजिता (वै. निघ.)
सन्दंशिका-स्त्री., सन्दंशयन्त्रम् (मे.)
सन्दाह-पु., सम्यग्दाहः, ताल्वोष्ठमुखदाहः(रा.नि.व.२०)
सन्दीप्य-पु.. मयूरशिखावृक्षः (श. च.)
सन्दुष्टभोजन-न., संयोगविरुद्धभोजनम् (मा. नि. ग्रहणीचि.)
सन्धानिका-स्त्री., भोज्यद्रव्ये विशेषम्
सन्धानी-स्त्री., सन्धानम् (श. र.)
सन्धारणीय- स्त्री.,संग्रहणम् (च. सू. ४ अ.)
सन्धिग-पु., स्वनामख्यातसन्निपातज्वरविशेषः (भा. म. १ भ.)
सन्धिका (जा) स्त्री., त्रिसन्धिपुष्पवृक्षः (रा.नि.व.१०) मद्यसन्धानम् (श. र.)
सन्धिकुसुमा-स्त्री., त्रिसन्धिपुष्पवृक्षः (वै. निघ.) मद्यसन्धानम् (श. र.)
सन्धिनी-स्त्री., वृषाकाङ्क्षिणी गौः (भ.) अकालदुग्धा
सन्धिभङ्ग-पु., अस्थिभङ्गः (वैद्यकम्)
सन्धिमुक्तभग्न-न., द्विविधभग्नरोगान्यतरं भग्नम् (सु. नि. १५ अ.)
सन्धिला-स्त्री., मदिरा (मे.)
सन्नकद्रु-स्त्री., पियालवृक्षः (अम.)
सन्नाहमक्षिका-स्त्री., विरेचकमक्षिकाविशेषः (अर्क चि. रावणकृतनवमशतके).
सन्निकृष्ट-पु., सन्निकर्षविशिष्टः (मानि.)
सन्निपातकलिका-स्त्री., अश्विनीकृतसन्निपातचिकित्सा रुद्रटकृता चान्या
सन्निपातनाडी-स्त्री., दन्तमूलगतरोगः (मानि.)
सन्निपातहृत(हर)-पु., नेपालनिम्बः (वै. निघ.)
सन्निपातपट-पु., वैद्यकग्रन्थभेदः
सन्निपातमृत्युञ्जयरस-पु., सन्निपातज्वरे रसः (भैष.)
सन्निपातसूर्यरस-पु., सन्निपातज्वरे रसः (भैष)
सपत्नारि-पु , वंशभेदः
सपत्रकृत-त्रि., पीडितः दुस्थापितः शराहतमृगादिः (शब्दकल्प)
सपत्राकृति-स्त्री., अतिपीडनम् (हे. च.)
सपत्राकरण-न., अतिपीडनम् । अतिवेदना (हला.)
सपादमत्स्य-पु., पादविशिष्टमत्स्यविशेषः
सपीतिका-स्त्री., राजकोशातकी (रा. नि. व. ७)
सपुष्पका-स्त्री., तिलवासिनीशालिः

सपूजका-स्त्री., तिलवासिनीशालिः (रा. नि. व. १६)
सप्तदल-पु., सप्तपर्णवृक्षः । सारथीनामगन्धद्रव्यम्
सप्तदलपुष्प-न., मुद्गरपुष्पम् । सप्तच्छदपुष्पम् (रस. र. बाल. चि.)
सप्तधातु-पु., शरीरस्थरसादिधातवः रसरक्तमांसमेदोऽस्थिमज्जशुक्राणिधातवः (रा. नि. व. २२)
सप्तनाडिका-स्त्री., शृङ्गाटकः (वै. निघ.)
सप्तनामा-स्त्री., आदित्यभक्ता (रा. नि. व. ४)
सप्तप्रस्थमाषतैल न.,वातव्याधौ तैलं माषतैलं वा(रस.र.)
सप्तभद्र-पु., शिरीषवृक्षः (श. च.)
सप्तमुष्टिकयूष-पु., यूषविशेषः
सप्तरक्त-न., शरीरस्य बहिःस्थाःरक्तवर्णाः सप्तविधावयवाः (सामुद्रकम्)
सप्तविंशतिकगुग्गुलु-पु., भगन्दरे पक्वगुग्गुलुविशेषः
सप्ताङ्गगुग्गुलु- पु., नाडीव्रणे औषधम् (सा. कौ.)
सप्तामृतलौह-न.. नेत्ररोगे औषधम् (सा. कौ.)
सप्तार्चि-पु., चित्रकवृक्षः, अग्निः (अम.)
सप्ताश्व-पु., अर्कवृक्षः (अम.) श्वेतरोहीतकवृक्षः (रा. नि. व. ८) सूर्यः
सप्ताह्वा-स्त्री., सप्तपर्णवृक्षः (भैष.)
सप्ति-पु., अश्वः (अम.)
सफर-पु.. प्रोष्ठीमत्स्यः (अ. टी. भ.)
सफरी-स्त्री., प्रोष्ठीमत्स्यः (भा.)
समकश्रवण-पु., शालविशेषः (वै. निघ.)
समकृत्-पु., कफः (वै. निघ.)
समकोल-पु., सर्पः (त्रिका.)
समक्काथ-पु., अष्टमांशावशिष्टक्काथः (रा. नि.व. २०)
समङ्गिका-स्त्री., लज्जालुका (चि. क्र. क. (गर्भाधिकारे)
समठ-पु., न., शमठाख्यशाकभेदः
समण्ठ-पु., फलशाकविशेषः त्रपुषादिः
समत्र (त्रित) यम् (त्रयी)-(न., स्त्री.,) हरीतकीनागरगुडानां सममागः (रा. नि. व. २२)
समनृपति-पु., शोभाञ्जनवृक्षः (रस. र. बालचि. नागार्जुनचूर्णे)
समन्तदुग्धा-स्त्री., स्नुहीवृक्षः (प. मु.)
समन्वितकारी (इन्)-पु., आम्रवृक्षः (वै. निघ.)
समप्रकृति-स्त्री., समधातुप्रकृतिः (अत्रि. ५ अ.)
समयोनि-पु., कफः (वै. निघ.)
समल-न., विष्ठा (श. र.) (त्रि.) मलिनम् रजतताम्रत्रपुलौहेषु (च. सू. १ अ.)

समशर्करचूर्ण-न., ग्रहण्यादौ कासाधिकारे च चूर्णम् (रस. र. अजी. चि.)

समष्ठि (ष्ठी) ला-स्त्री., कटुशूरणम् । नद्याम्रः (वै. निघ.) गण्डीरः (अम.) शमठनामशाकविशेषः (सर्वानन्दः)

समालम्ब (म्बी)-पु., सुगन्धरोहिषतृणम् (रा. नि. व ८)

समालम्भ-पु., कुङ्कुमादिलेपनम (अम.)

समालम्भन-न., कषायः । कुङ्कुमादिविलेपनम् (त्रिका.)

समासवान्-पु., तुन्नवृक्षः (श. च.)

समाह्वा-स्त्री., गोजिह्वा (श. च.)

समित-(ता)-पु., स्त्री., गोधूमचूर्णम् (भा. । हेच.)

समिदुत्तम-पु., पलाशवृक्षः (वै. निघ.)

समिद्वर-पु., पलाशवृक्षः (वै. निघ.)

समीचक-पु., मैथुनम् (शब्दकल्पः)

समीची-स्त्री., स्त्रीमृगः

समीच्छदा-स्त्री., वराहक्रान्ता

समीद-पु., गोधूमचूर्णम (शब्दकल्पः)

समीनिका-स्त्री., प्रतिवर्षप्रसवा गौः (श. र.)

समोर-पु., शमीवृक्षः (रा. नि. व. ८)

समीरणा-स्त्री., गर्भाशयस्थितनाडीविशेषः

समुत्क्रोशा-स्त्री., कुररीपक्षी (श. र.)

समुत्क्लिष्ट-त्रि., स्वस्थानात् चलितं, बहिर्नीतम् (वा. चि. १ अ. अरुणः)

समुद्गीरण-न., वमनम् (वै. निघ.)

समुद्रकफ-पु., समुद्रफेनः (त्रिका.)

समुद्रकान्ता-स्त्री., स्पृक्का (रा. नि. व. १२)

समुद्रग्रह-न., जलयन्त्रगृहम् (त्रिका.)

समुद्रज-न., सामुद्रलवणम् (रस चि)

समुद्रजल-न., सागरसलिलम्

समुद्रनवनीत-न., अमृतम्

समुद्रपुष्प-न., कपित्थपुष्पम् (वै. निघ.)

समुद्रफल (क)-न., स्वनामख्यातवृक्षफलम्. कपित्थफलम् (वै. निघ.)

समुद्रफेण-(न) पु., न., घनीभूतसागरोत्थफेनपुञ्जः (वै. निघ.)

समुद्रमण्डूकी-स्त्री., जलशुक्तिः (सु. चि. १ अ.)

समुद्रलवण-न., सामुद्रलवणम् (भा.)

समुद्रशोष-पु., हिज्जलवृक्षः (वै. निघ.)

समुद्रा-स्त्री., शमीवृक्षः । शठी (रा. नि. व. ८)

समुद्रान्त-न., जातीफलम् (श. च.) पु., दुरालभा (रा. नि. व. ४) जातीफलवृक्षः (श. र.) स्त्री., (न्ता)-दुरालभा (अम.) स्पृक्का (मे) कार्पासः (रा. नि. व. ४) (भैष. शिरोरो. चि.-बृहत्किङ्किणीतैले)

समुद्रारु पु., तिमिङ्गिलमीनः । कुम्भीरः (मे.)

समुन्न (न)-न., आर्द्रता (अम.)

समूर-(रु)-पु., मृगभेदः । सम्बरमृगः (हे. च.)

समूह पु., सान्निपातिकः (रा. नि. व. २०)

समूहगन्ध-न, गन्धराजः (रा. नि. व. १२)

समूहनी-स्त्री., सम्मार्जनी (हे. च.)

समूहक्षार-पु., सर्वक्षारः, मलशोधककक्षारद्रव्यम् (वै. निघ.)

समोदक-न., अर्धजलघोलम् (अम.)

सम्पत् स्त्री., वृद्धिनामौषधम्

सम्पदाह्वा-स्त्री., ऋद्धिः (प. मु.)

सम्पाव-पु., न., रोटिकाभेदः

सम्पुट-न., कुरुवकवृक्षः (शब्दकल्पः)

सम्पुटाङ्ग-न., भव्यफलम् (प. मु.)

सम्फाल-पु., मेषः (हे. च.)

सम्बर-न., जलम् (जटा. अम.)

सम्बर-पु., मृगभेदः । मत्स्यविशेषः (मे.) स्त्री., री-शतावरी (श. र.) मण्डूकपर्णी (अम.)

सम्बाधन-पु., न., भगः (मे.)

सम्विदा-स्त्री., विजया

सम्विदामञ्जरी-स्त्री., गञ्जिका

सम्भरोद्भव-न., गाडलवणम् (रानि. व. ६)

सम्भव्य-पु., कपित्थवृक्षः (श. च.)

सम्मार्जक(नी) पु., स्त्री., मार्जनी (श. र.)

सम्मार्जन-न., शोधनम् (र. मा.)

सम्मिलितद्रुम-पु., रक्तपुनर्नवा (रा. नि. व. ५)

सम्मूर्च्छन-न., मूर्च्छा । मिश्रणम्

सम्मोहक-पु., प्रवृद्धमध्यहीनवातादिजसन्निपातज्वरः (भा. म. १ भ. ज्व. चि.)

सम्यक्संहित-त्रि., सम्यक्योजितम् (भा. म. ३भ.)

सम्यक्क्षार-पु., टङ्कणक्षारः (र. सा. सं.)

सम्यग्दग्ध-न., अग्निदाहविशेषः दाहप्रयोजने यथायोग्यदाहः (सु. सू.)

सरःकाक-पु., हंसः (त्रिका.) स्त्री., (की) हंसी (श. र.)

सरघा-स्त्री., मधुमक्षिका (अम.)

सरङ्ग–पु., पक्षी (उणा.)
सरजा–(स्) स्का) स्त्री., ऋतुमती स्त्री (त्रिका.)
सरट्ट–पु., कृकलासः (उणा.)
सरण न., माधवीमद्यम् (वै. निघ.) लोहमलः (हे. च.) स्त्री., (णा) प्रसारणी (रा. नि. व ५) विवृता (श.मा.) श्वेतत्रिवृत् । स्वर्णजीवन्ती (वै. निघ.)
सरणि–स्त्री., प्रसारणी (रा. नि. व ५)
सरण्ड–पु., कृकलासः (मे.) कामुकः । पक्षी (श. र.)
सरण्यु–पु.,जलम् । वायुः । मेघः (श. र.) अग्निः वसन्तः (उणा)
सरत्नि–पु., अरत्निः बद्धमुष्टिहस्तः (रा. नि. व. १८)
सरपत्रिका–स्त्री., पद्मपत्रम् (श. र.)
सरलतृण–न , सुगन्धतृणम् (वै. निघ.)
सरलद्रव–पु., धूपविशेषः, सरलवृक्षसारः (अम.)
सरलनिर्यास–पु., धूपविशेषः, सरलवृक्षसारः (अम.)
सरसम्प्रत–न., वज्रीवृक्षः (श. च.)
सरसिका–स्त्री., हिङ्गुपत्रिका (श. च.)
सरसीक–पु., सारसपक्षी (श. र.)
सरसीरुह–न., पद्मम् (अम.)
सराव–पु., शरावमानम् (भ. द्विरुपको.)
सरिका–स्त्री.,हिङ्गुपत्री (श. च.)
सरित्पतिकफ–पु., समुद्रफेनः (भा. म. ४ भ.) ने. रों. चि. नयनशोंथ्याञ्जने.)
सरिल–न., जलम् (अ. टी. भ.)
सरिषप–पु., सर्षपवृक्षः (त्रिका.)
सरोज–न., पद्मम् (हे. च.)
सरोजन्म (न्)–न., पद्मम् (हे. च.)
सरोजिनी–स्त्री., कमलिनी । पद्मम् (मे.)
सरोत्सव–पु., वकपक्षी । सारसपक्षी (श. र.)
सरोऽमृत–न., सरोवरजलम् (वै. निध.)
सरोरुट्–न., पद्मम् (हे. च.)
सरोबर–पु.. सरः
सर्क–पु,. मनः (उणा.)
सर्ग–पु., आत्यन्तिकदुःखनिवृत्तिरूपं सुखम्
सर्जगन्धा–स्त्री., रास्ना (र. मा.)
सर्जनामा (न्)–पु., सर्ज्जतरुः (सु. चि. १ अ.)
सर्जमणि–पु., शाल्मलीवेष्टः (त्रिका.)
सर्जशाल–पु., शालवृक्षः (र. मा.)
सर्जाख्य–(ह्व)–पु., सर्ज्जरसः (भैष. क्षुद्ररो. चि. मा. भ. ४ अ.)
सर्जी–स्त्री., सज्जिक्षारः (प. मु.)
सर्ज्य–पु., सर्ज्जरसः (र. मा.)
सर्पकङ्कालिका (ली)–स्त्री., स्वनामख्यातलता (र. मा.) गन्धरास्ना (प. मु.)
सर्पकञ्चुक–पु., सर्पनिर्मोकः
सर्पगन्धिनी–स्त्री., गन्धरास्ना (रा. नि. व. ७)
सर्पतृण–पु., नकुलः (हे. च.)
सर्पदंष्ट्र–पु., दन्तीवृक्षः (श. च.)
सर्पदंष्ट्रा–स्त्री., वृश्चिकाली (वै. निघ.)
सर्पदंष्ट्रिका–स्त्री., मेषशृङ्गी
सर्पदन्ता–स्त्री., सिंहपिप्पली (रा. नि. व. ६)
सर्पदष्टक–न., सर्पदंशनम् (सु. कल्प. ४ अ.)
सर्पनामा–स्त्री., सर्पाक्षी (प. मु.)
सर्पनेत्रा–स्त्री., सुगन्धरास्ना । सर्पाक्षी (रा. नि. व. ७)
सर्पपुष्पी–स्त्री., वन्ध्याकर्कोटकी । नागदन्ती (रा. नि. व.५)
सर्पप्रिय–पु., चन्दनवृक्षः (वै. निघ.)
सर्पफेण (न)–न., अहिफेनः (वै. निघ. २ भ.)
सर्पभक्षक–पु., नाकुलीकन्दः । मयूरः (हे. च.)
सर्पभुक्–पु., मयूरः (हे. च.) गृध्रः । राजसर्पः नाकुलीकन्दः (रा. नि. व. ७)
सर्पमाला–स्त्री., सर्पकङ्कालिकाभेदः (र. मा.)
सर्पमाला–स्त्री., नागवल्लीलता (रा. नि. व. ३)
सर्पलोचना–स्त्री., सर्पाक्षी (वा. उ. ३७ अ.) गन्धरास्ना (वै. निघ.)
सर्पविष–न., सर्पगरलः (बा. उ. ३६ अ.)
सर्पसहा–स्त्री., सर्पाक्षी (प. मु.)
सर्पसुगन्धिका–स्त्री., सर्पगन्धा (वै. निघ.)
सर्पहा (न्)–पु., नकुलः (हे. च.)
सर्पा–स्त्री., तन्नामकौषधम् (चचि. १ अ.)
सर्पाख्य–पु., नागकेशरवृक्षः (र. मा.) महिषकन्दः (रा. नि. व. ७) श्वेतालुकम् (वै. निघ.)
सर्पारि–पु., नकुलः । मयूरः (रा. नि. व. १९)
सर्पाशन–पु., मयूरः (हला.)
सर्पास्त्र–न., नासाकर्णाशिरश्छेदनयोग्यः अस्त्रभेदः
सर्पि–(स्)–न., दुग्धसम्भूतस्नेहः, घृतम् (रा. नि. व. १५)
सर्पिका–स्त्री., गोकर्णीलता (वै. निघ.)
सर्पिर्गर्भ–न., नवनीतकम् (वै. निघ.)
सर्पिष–न., घृतम् (वै. निघ.)
सर्पी–स्त्री., भुजंगी (श. र.)
सर्पी–(पैष्ट)–न., श्रीखण्डचन्दनम् (र. मा. जटा.)
सर्व्वेग–पु., जीवः । आत्मा (श. मा. न.) जलम् (मे.)

सर्व्वगा–स्त्री., प्रियङ्गुलता (श. च.)
सर्व्वग्रन्थि–पु., पिप्पलीमूलम् (रा. नि. व. ६)
सर्व्वग्रहापहा–स्त्री., नागदमनी (वै. निघ.)
सर्व्वजगत्प्रिया–स्त्री., ऋद्धिः वृद्धिः (वै. निघ.)
सर्व्वज्वरहरलौहः–पु., विषमज्वरे रसविशेषः (सा कौ.)
सर्व्वतःशुभा–स्त्री., पिप्पलीमूलम् । प्रियङ्गुः (श. च.)
सर्व्वतोभद्र–पु., निम्बवृक्षः (रा. नि. व. ९) न., आसनपर्यङ्काकारेण अश्मरीच्छेदनम् (सु. चि. ८ अ.)
सर्व्वतोभद्रलौह– न., अम्लपित्तकासश्वासादिनाशक-औषधविशेषः (भैषः)
सर्व्वधातुक–न., ताम्रम् (वै. निघ.)
सर्व्वपाचक–पु., टङ्कणक्षारः (वै. निघ.)
सर्व्वभक्ष्या–स्त्री., छागी (हे. च.)
सर्व्वभूमिक–पु., दारुचिनीतिख्यातपण्यद्रव्यम् (वै. निघ.)
सर्व्वमूल्य–न., (त्रिका.) कपर्दकः
सर्व्वयूष–पु., गोरसधान्याम्लफलाम्लैरेकत्रमिलीतैर्यो रसो भवति गुरुतरः (वै. निघ.,)
सर्व्वरस–पु., धूनकः (अम.) लवणरसः (हे. च. स्त्री.) (सा.)–लाजमण्डः (प. मु.) न., औषरलवणम् (हे. च.)
सर्व्वरसोत्तम–पु., लवणरसः (हे. च.)
सर्व्वलौह–न., ताम्रम् (वै. निघ.)
सर्व्ववर्चस–न., ताम्रम् (वै. निघ.)
सर्व्ववर्णिका–स्त्री., गाम्भारीवृक्षः (जटा.)
सर्व्वसंसर्गलवण–न., औषरलवणम् (रा. नि. व ६)
सर्व्वसङ्गत–पु., क्षिप्रवृद्धिधान्यविशेषः । षष्टिकधान्यम् (श. च.)
सर्व्वसाधन–न., स्वर्णम् (वै. निघ.)
सर्व्वसिद्धि–पु., श्रीफलम् (श. च.)
सर्व्वस्नेह–पु., चतुःस्नेहाः (सि. यो. वा. व्या. चि. शाल्वणभेदे)
सर्व्वाक्ष–पु., रुद्राक्षवृक्षः (वै. निघ. न.) रुद्राक्षफलम्
सर्व्वाक्षी–स्त्री., दुग्धिका (वै. निघ.)
सर्व्वाख्य–पु., पारदः (रस. कौ. भैष. वा. र. चि. द्वादशायसे)
सर्व्वाङ्गकम्पारिरस–पु., वातव्याध्यधिकारे रसः (रस. र.)
सर्व्वाङ्गसुन्दर–पु., रसोऽयं विरेचनाधिकारोक्तः (र. सा. सं.)

सर्व्वाङ्गसुन्दरी–स्त्री., वैद्यकग्रन्थविशेषः
सर्व्वान्नीन–त्रि., सर्वान्नभक्षकः (वा. चि. १अ.)
सर्व्वायनी–स्त्री., श्वेतत्रिवृता (वै. निघ)
सर्व्वाम्ल–न., सर्वविधप्रशस्ताम्लद्रव्येषु, काञ्जिका–सुरा-सौवीरक दधिमस्त्वादिषु (सि. यों. शाल्वणभेदे)
सर्व्वौषध(धि)गणः–पु., कुष्ठाद्योषधिवर्गः (रा. नि. व. २२)
सर्षपनाल–न., सर्षपदण्डः नालशाकमिदम् । (भा.)
सर्षपा–स्त्री., सर्वौषधिगणः
सर्षपाः–स्त्री., श्वेतसर्षपः (वै. निघ.)
सर्षपोद्भूत–न., श्वेतसर्षपः (वै. निघ.)
सल–न., जलम् (अ. टी. भ.)
सलकटुक–पु., वृत्तपत्रशाकः (प. मु.)
सलपत्र–न., दारुशर्करा (वै. निघ.)
सलिलकुन्तल–पु., न., शेवालः (त्रिका)
सलिलग्रह–पु., अश्वस्य ग्रहभेदः (ज. द. ५७ अ.)
सलिलधर–पु., मुस्ता (वै. निघ.)
सल्लकद्रु–पु.. प्रियालवृक्षः (रा. नि. व. ११)
सल्ली–स्त्री., स्वनामख्यातफलशाकलता (रा. नि. व. ११) सल्लक्यादिस्वरसः (सु. सू. २५ अ.)
सवर–न., जलम् (त्रिका.)
सवररोध्र–न., श्वेतरोध्रः (प. मु.)
सवहा–स्त्री., त्रिवृता (अ. टी. भ.)
सवित्र–न., प्रसवकरणम् (व्याक.) स्त्री., त्री., धात्री (अत्रि.)
सविभाल–न., नखीनामगन्धद्रव्यम् (वै. निघ.)
सवीर्या–स्त्री., शतावरी (रा. नि. व. ४)
सव्य–न., वामकायः (अम.)
सशल्य (ल्या, स्या)–(पु., स्त्री.,) भल्लूकः (रा. नि. व. १९) नागदन्ती (र. मा.)
सशाक–पु,. आर्द्रकम् (रा. नि. व. ६)
ससत्त्वा–स्त्री., गर्भवती स्त्री., (श. र.)
ससिद्ध–पु., सर्जवृक्षः (रा. नि. व. ९)
सत्यमारी (इन्)–पु., महामूषिकः (रा. नि. व. १९)
सस्यसंब(त्स)र–पु., लघुशालवृक्षः (अम.) सल्लकीवृक्षः (वै. निघ).
सस्यसंबरण–पु., अश्वकर्णशालः (रा नि. व. ९)
सहजकृति–न., सुवर्णम् (वै. निघ.)
सहजरस–पु., स्वरसः (रस. चि. ९ अ.)
सहण्डुक–न., मांसकृतव्यञ्जनविशेषः (भा.)
सहद्रक–न., सहण्डुकमांसम्

सहपान-न., एकत्रपानम् (हे. च)
सहभादली-स्त्री., प्रसारणी (भैष. आमवातचि.)
सहभोजन-न., एकत्रभोजनम् (अम.)
सहरसा-स्त्री., मुद्गपर्णी (श. र.)
सहसानु-पु., मयूरः (उणा.)
सहस्रजित्-स्त्री., कस्तूरी (वै. निघ.)
सहस्रदंष्ट्री(इन्)-पु., मत्स्यविशेषः (श. र.)
सहस्रधौता त्रि., सहस्रवारं क्षालितं घृतादिः (वा. चि. १ अ.)
सहस्रनुत्-पु., अम्लवेतसः (भा. पू. १ भ.)
सहस्रपाद्-पु., कारण्डवपक्षी (मे.)
सहस्रभित्-न., अम्लवेतसम् (भा.)
सहस्ररसा-स्त्री., मुद्गपर्णी (श. र.)
सहस्रवेध-धि-न., चुक्रनामककाञ्जिकभेदः (रा. नि. व. १५)
सहस्रवेधपाषाण-पु., हिङ्गुप्रस्तरः (वै. निघ.)
सहस्रवेधिका-स्त्री., मृगनाभिः (वै. निघ.)
सहस्राङ्गी-स्त्री., ह्रस्वपीलुवृक्षः (वै. निघ.)
सहस्रा(स्री) स्त्री., अम्बष्ठा (भा.) मयूरशिखा (वै. निघ.)
सहस्राङ्घ्रि-पु., मयूरशिखा
सहार-पु., आम्रवृक्षः (उणा.)
सहासार-पु., वीरास्रावः
सक्षीरा-स्त्री., क्षीरिणीवृक्षः (वै. निघ.)
सागरक-न., सामुद्रलवणम् (वै. निघ.)
सागरगामिनी-स्त्री., सूक्ष्मैला (रा. नि. व. ६)
सागरजमल-पु., समुद्रफेनः (वै. निघ.)
सागरफेन-पु., समुद्रफेनः
सागरोत्थ-न., सामुद्रलवणम् (रा नि. व. ६)
सागरोद्भूत-पु., शङ्खः (वै. निघ.)
साङ्कृत्य-पु., ऋषिविशेषः (च.)
साङ्गुष्ठा-स्त्री., गुञ्जालता (र. मा.)
साङ्घातिक-त्रि., मारात्मकः
साचिक्षार-पु., स्वर्जिकाक्षारः
साचिवाटिका-स्त्री., पुनर्नवा (र. मा.)
साञ्जन-पु., गृहगोधा । कृकलासः (श. च.)
सातीलक-पु., कलायभेदः (अ. टी. भ.)
साधारणमृग-पु., जाङ्गलानूपोभयदेशचारिजन्तुः । शूकरादिः (अत्रि २० अ.)
साधिका-स्त्री., सुषुप्तिः (हे. च.)
साधुपुष्प-न., स्थलपद्मम् (श. मा.)
साधुरसा-स्त्री., मदिरा
साधुवृत्त-त्रि., हिताहारविहारकारि
साध्वस-न., भयम् (अम.) लज्जा
साध्वी-स्त्री., मेदा (रा. नि. व. ५) दुग्धपाषाणः (प. मु.)
सानसि-पु., सुवर्णम् (उणा.)
सानुबाधन-त्रि., कालान्तरप्राणहरः (च. सू. १ अ.)
सानुमानक-पु., पुण्डरीकवृक्षः (वै. निघ.)
सान्दृष्टिक-न., तात्कालिकफलम् (वै. निघ.)
सान्द्रपुष्प-पु., विभीतकवृक्षः (श. च.)
सान्ध्यकुसुमा-स्त्री., त्रिसन्धिपुष्पवृक्षः (रा. नि. व. १०)
सान्नाय्य-न., घृतम् । हविः (त्रिका.)
सान्निपातिक-पु., त्रिदोषजरोगः (रा. नि. व. २१) त्रि., त्रिदोषसम्बन्धि ।
सान्निपातिकी-स्त्री., सन्निपातजन्ययोनिरोगः (वा. उ. ३३ अ.)
साब्दी-स्त्री., द्राक्षाविशेषः (शब्दकल्पः)
सामज (योनि)-पु., गजः (मे.)
सामत्रय-न., हरीतकी शुण्ठी गुडूची च (वै. निघ.)
सामवात-पु., आमयुक्तवातरोगः (मा. नि.)
सामान्य-न., एकत्वबुद्धिकरजातिः (च. सू. १ अ.)
सामिचन्द्र-पु., योनिरन्ध्रावरकं छदाख्यचर्म
सामुद्गक-पु., संपुटम् (वा. उ. ३९ अ.)
सामुद्गसन्धि-पु., ग्रीवोर्ध्वगतसन्धिः (भा.) अंसपीठ-गुदयोनिनितम्बेषु सन्धिः (सु. शा. ५ अ.)
सामुद्राद्यचूर्ण-न., उदराधिकारे चूर्णम् (सा. कौ.)
साम्ब(म्भ,न्धा)-न., गाढलवणम् (रा. नि. व.६)
साम्भरी-स्त्री., रक्तलोध्रवृक्षः (श. च.)
सायङ्काल-पु., सायाह्नः
सायोद्भिदुरा-स्त्री., मल्लिकाविशेषः (रा. नि. व. १०)
सारखदिर-पु., दुःखदिरः (रा. नि. व. ८)
सारगन्ध-पु., चन्दनवृक्षः (श. च.)
सारतरु-पु., कदलीवृक्षः (धनञ्जय) खदिरवृक्षः (वै. निघ.)
सारण्ड-पु., सर्पाण्डम् (जटा.)
सारपादप-पु., धामनवृक्षः (श. र.)
सारफल-पु., साराम्लम् (वै. निघ.)
सारबन्धका-स्त्री., मेथिका (वै. निघ.)
सारभाण्ड-न., कस्तूरीमृगाण्डम् (शब्दकल्प.)
सारमण्डूक-पु., मण्डूकजातीयकीटः (सु. कल्प. ८ अ.)
सारमेय-पु., कुक्कुरः (पमु.) (स्त्री.,) कुक्कुरी (श. र.)

सारलोह-न., लोहसारः (भा. पू. १ भ. धा. व.)
सारवर्ग-पु., क्षीरवृक्षवर्गः (भा म ३ भ. प्रमेहचि)
सारवृक्ष-पु., धामनवृक्षः (वै. निघ.)
सारशल्य-पु., श्वेतखदिरः (वै. निघ.)
सारसंग्रह-पु., वैद्यकग्रन्थभेदः चक्रपाणिकृतः
सारसंग्रहनिघण्टु-पु., वैद्यकनिघण्टुभेदः
सारसजल-न., सरोवरजलम् (वै. निघ.)
सारसाम्बु-न., सरोवरजलम् (वै. निघ.)
सारसैन्धव-न., सैन्धवम् (च. द. रतिवल्लभमोदके)
सारा-स्त्री., कृष्णत्रिवृता (श. र.) सातला (वै. निघ.) दूर्वा (श. च.)
सारामुख-पु., स्वादुपाकरसयुक्तंकृष्णशूकधान्यम् (वा. सू. ६ अ.)
साराम्ल-न., निम्बुभेदः (वै. निघ.)
साराल-पु., तिलः (श. च.)
सारिका-स्त्री., पक्षिविशेषः (अम.)
सारोद्धार-पु., वैद्यकग्रन्थविशेषः
सारोष्ट्रिक-पु., सौराष्ट्रदेशजविषम् (अ. टी. भ.)
सार्द्रवेर-न., शुण्ठी (रा. नि. व. ६)
सार्ज-पु., सर्जरसः (रमा.)
सार्द्र-पु., आर्द्रः (अम.)
सार्वभौम-पु., गजः (त्रिका.)
सार्षपतैल-न., सर्षपजतैलम्
सालज(क)-पु., सर्जरसः (प. मु.) सर्जतरुः (रा नि.व.९)
सालनिर्यास-पु., सर्जरसः (र. मा.)
सालपर्णी (र्णिका)-स्त्री., अंशुमती (श. र.)
सालपुष्प-न., स्थलपद्मपुष्पम् (श. र.) प्रपौण्डरीकः
सालरस-पु., शालनिर्यासः (रा. नि. व. १२)
सालवेष्ट-पु., सर्जरसः (शब्दकल्प. :)
सालसार-पु., शालभेदः (सु. सू. ३८ अ.)
सालावृक-पु., कुकुरः शृगालः (शब्दकल्पः)
सालिमकन्द-पु., कार्वलदेशीयकन्दभेदः (वै. निघ.)
सालूर-पु., भेकः (श. र.)
सालेय-पु., मधुरिका (अ. टी. भ.)
सालिक-पु., पक्षिविशेषः (श. च.)
सावर-पु., लोध्रविशेषः (श. र.) लोध्रः, तदाख्य-मृगभेदः
सावर्णलक्ष्य-न., चर्म (श. र.)
साशयन्दक-पु., गृहगोधा (शब्दकल्पः)
साशूक-पु., कम्बलम् (हारा.)
सास्थिताम्राद्ध-न., कांस्यम् (त्रिका.)

सास्ना-स्त्री., गोगलकम्बलम् (अम.) रास्ना (वै. निघ)
सास्राव-त्रि., अश्रुयुक्तम् स्रावयुक्तम् (मा. नि.)
सिंहकेश (स)र-पु., वकुलवृक्षः सिंहजटा (त्रिका)
सिंहचित्रा-स्त्री., माषपर्णी (वै. निघ.)
सिंहच्छदा-स्त्री., श्वेतदूर्वा (रा. नि. व. ८)
सिंहतुण्ड-पु., सेहुण्डवृक्षः, स्नुहीवृक्षः (रा.नि. व. ८)
सिंहनादगुग्गुलु-पु., आमवाते औषधम् (रस. र.)
सिंहनादिका-स्त्री., दुरालभा (श. च.)
सिंहपत्रा-स्त्री., माषपर्णी (वै. निघ.)
सिंहपर्णी-स्त्री., वासकवृक्षः (रा. नि. व. ४)
सिंहपिप्पली-स्त्री., सैंहलीपिप्पली (रा. नि. व. ६)
सिंहपुष्पी-स्त्री., पृश्निपर्णी (रा. नि. व. ४)
सिंहलस्थान-पु., तालतरुसदृशतरुः (श. मा.)
सिंहलाङ्गुली-स्त्री., पृश्निपर्णी
सिंहवदना-स्त्री., सिंहमुखी
सिंहवल्लभा-स्त्री., आटरूषवृक्षः (वै. निघ.)
सिंहविक्रान्त-पु., अश्वः (हारा)
सिंहवृन्ता-स्त्री., माषपर्णी (वै. निघ,)
सिंहा-स्त्री., बृहती (वै निघ) नाडी (रा. नि. व. १८)
सिंहाण-न., लौहमले (प. मु.) नासामलः (श. र.)
सिंहानन-पु , वासकवृक्षः (भा. म. १ भ. कण्ठकुब्जज्व. चि.)
सिंहामृतघृत-न., अर्शसि घृतम् (च. द.)
सिंहाली-स्त्री., सिंहली पिप्पली (वै. निघ.)
सिंहासन-न., लौहकिट्टम् (वै. निघ.)
सिंहास्य-पु., वासकवृक्षः (र. मा.)
सिंहास्यदल-न., वासकपत्रम्
सिंहास्यादि-पु., शोथे कषायविशेषः (भैष. शोथ चि.)
सिंहीफल न., बृहतीफलम् (च. द. वृष्याधिकारे अश्वगन्धाघृते)
सिंहीलता-स्त्री., लताबृहती (भा.) मुद्गपर्णी (रा. नि. व. ३)
सिकटी-स्त्री., स्वनामप्रसिद्धलताभेदः (मा. नि.)
सिकतिल-पु., सिकतामयभूमिः (रा. नि. व. २)
सिकासि-पु., उत्कासिका (प्रयोगा. श्वास. चि.)
सिकता-स्त्री., वालुका (वै. निघ.)। श्वेतकण्टकारी (त्रि.) आर्द्रा
सिक्य-पु., स्फटिकः (शब्दकल्पः)
सिङ्गान-पु., कुरण्डवृद्धिः (त्रिका.)
सिङ्घिनी स्त्री., नासिका (रा. नि. व. १८)
सिङ्खिता-स्त्री., पिप्पली । (श. च.)

सिञ्चितिका-स्त्री., सेव इति प्रसिद्धफलम् (वै. निघ)
सितकङ्गु-स्त्री., सर्जरसः (वै. निघ.) न., श्वेतकङ्गुधान्यम्
सितकटभी-स्त्री., श्वेतकटभीवृक्षः (रा. नि. व. ९)
सितकण्टकी-स्त्री., श्वेतपुष्पकण्टकारी (रा. नि. व. ४)
सितकण्ठ-पु., दात्यूहपक्षी (श. र.)
सितकर-पु., भीमसेनीकर्पूरः (रा. नि. व. १२) स्त्री., रा. नीलदूर्वा (वै. निघ.)
सितकर्णी-स्त्री., वासकवृक्षः । (रा. नि. व. १०)
सितकल्याणघृत न., स्त्रीरोगाधिकारे घृतम्
सितकाञ्चन-पु., श्वेतपुष्पकाञ्चनवृक्ष (र. मा.)
सितकारिका-स्त्री., ह्रस्ववाव्यालकः (वै. निघ.)
सितकुम्भी-स्त्री., श्वेतपाटला (रा. नि. व. १०)
सितक्षार-पु., श्वेतटङ्कणम् (वै. निघ.)
सितगुञ्जा-स्त्री., श्वेतगुञ्जा (रा. नि. व. २३)
सितचन्दन-न., श्रीखण्डचन्दनम् (च. द. खदिरवटी)
सितचिल्ली-स्त्री., श्वेतवास्तुकः (वै. निघ.)
सितचिह्न-पु., वल्लीगडकमत्स्यः (हारा.)
सितच्छत्रा-स्त्री., शतपुष्पा (अम.)
सितच्छद-पु., रक्तपुष्पशोभाञ्जनम् (वै. निघ.) हंसः (हे. च.)
सितज-पु., मधुशर्करा (रा. नि. व. २३)
सितजफल-पु., मधुनारिकेलवृक्षः (रा. नि. व. ११)
सितजलज-न., श्वेतपद्मम् (वै. निघ.)
सितजाम्रक-पु., बहुरसालाम्रवृक्षः (रा. नि. व. ११)
सितजाशर्करा स्त्री., मधुजातशर्करा
सितजीरक-न., शुक्लजीरकः (भैष. बाल. चि.)
सितदीप्य-पु., श्वेतयमानी श्वेतजीरकः (रा. नि. व. ६)
सितदूर्वा-स्त्री., श्वेतदूर्वा (प. मु.)
सितद्रु(म)-पु., मारटभद्रः (र. मा.) अर्जुनवृक्षः (वै. निघ.)
सितधातु पु., खटिका (रा नि व. १३)
सितपक्ष-पु., शुक्लपक्षः (शब्दकल्पः) हंसः (श. र.)
सितपद्म-न., श्वेतपद्मम् (वै. निघ.)
सितपर्णी-स्त्री., अर्कपुष्पिका (र. मा.)
सितपाटला-स्त्री., शुक्लपाटलवृक्षः । (रा. नि व १०)
सितपुङ्खा-स्त्री., श्वेतपुष्पशरपुङ्खा (रा. नि व. ४)
सितमाष-पु., राजमाषः (हा. रा.)
सितमोघा-स्त्री., श्वेतपाटलवृक्षः (वै. निघ.)
सितरज-पु., कर्पूरः (वै. निघ.)
सितराग-पु., रौप्यम (वै. निघ.)
सितलशुन-पु., शुक्लरसोनः (वै. निघ.)
सितला-स्त्री., अमृतस्रवालता
सितवर्णा-स्त्री., क्षीरिणीवृक्ष (प. मु.)
सितवर्षा-स्त्री., क्षीरिणीवृक्षः
सितवल्लरी-स्त्री., भूमिजम्बूवृक्षः (प. मु.)
सितवार(क)-पु., शालिञ्चवृक्षः (र. मा.)
सितशारिक-पु., सिंहलीपिप्पली (वै. निघ.)
सितशर्करा-स्त्री., धवलशर्करा (वै. निघ. क्षय. चि. लघुशिवगुट्याम्)
सितशा(सा)यका-स्त्री. श्वेतपुष्पशरपुङ्खा
सितशिंशपा स्त्री., श्वेतपुष्पशाल्मलीवृक्षः श्वेतशिंशपा (वै. निघ. रा. नि. व. ९)
सितशिम्बिक-पु., गोधूमः (हे. च.)
सितशिम्बी-स्त्री., श्वेतशिम्बी (वै. निघ.)
सितशि-(सि)व-न., सैन्धवलणम् (वै. निघ.)। स्त्री., शमीवृक्षः (प. मु.)
सितशूक-पु., यवः (प. मु. रा. नि व. १६)
सितशू(सू)रण-पु., श्वेतशूरणः (रा. नि. व. ७)
सितसर्षप-पु., गौरसर्षपः, सिद्धार्थः (रा नि. व. १६)
सितसार(क) पु., शालिञ्चशाकः
सितसूर्या-स्त्री., शुक्लसूर्यावर्तः (वै. सं. मू. कृ. चि.)
सितांशु पु., कर्पूरः । (शब्दकल्पः)
सितांशुतैल न., कर्पूरतैलम् (रा. नि. व. १५)
सिताख्य-पु., श्वेतमरिचः (वै. निघ.) श्वेतदूर्वा (रा. नि. व. ८)
सिताग्र-पु., कण्टकः (हारा.)
सिताङ्क-पु , वालुकागडमत्स्यः (हारा.)
सितात्रय-स्त्री., त्रिशर्करा (रा. नि. व. २२)
सितादि-पु., गुडः (रा. नि व. ४)
सितानन-पु., बिल्ववृक्षः । (वै. निघ.)
सितापाङ्ग पु., मयूरः (त्रिका)
सिताफल-न., स्वनामख्यातफलम्
सिताभ-पु., कर्पूरः (अ. टी. रा.)
सिताम्बुज-न., श्वेतकमलम् (अम.)
सितार्क(क)-पु., श्वेतार्कवृक्षः (रा. नि. व. १०)
सितालिकटभी-स्त्री., श्वेतकिणिहीवृक्षः (रा. नि. व. ९)
सितालिका-स्त्री., पङ्कशुक्तः (हारा.)
सितावर-पु., सुनिषण्णकः (रा. नि. व. ४)
सितावरी स्त्री., वाकुची (रा. नि. व. ४)

सिताश्मज–न., पाषाणोदकम् (वै. नि)
सितासित–त्रि., श्वेतकृष्णमिश्रवर्णः
सितासिता–स्त्री., वाकुची (वै. निघ)
सिताह्वया–स्त्री., श्वेततुलसी (रा. नि. व. १०) श्वेतपाटलवृक्षः (वै. निघ.)
सिति–पु., सुनिषण्णकशाकः (वै. निघ.) त्रि., श्वेतवर्णः कृष्णवर्णः
सितिकण्ठ–पु., दात्यूहपक्षी
सितिसारक–पु., शालिञ्चशाकः (च. द. अश्म चि.)
सितोच्चटा–स्त्री., श्वेतगुञ्जा (वै. निघ.)
सितोत्पला–न., श्वेतोत्पलम् (वै. निघ)
सितोदर–स्त्री., वराटिकाभेदः (रा. नि. व. १३)
सितोद्भव–न., श्वेतचन्दनम् (शब्दकल्पः)
सितोपल–न., शुक्लखडिका (त्रिका.) पु., स्फटिकः (रा. नि. व. १३)
सितोपलादिलेह–पु., राजयक्ष्माधिकारे लेहः
सिद्धखण्ड–पु., तवराजोद्भवखण्डः
सिद्धजल–न., काञ्जिकम् (हारा.) पक्वजलम्
सिद्धधातु–पु., पारदः (त्रिका.)
सिद्धनामक–पु., अश्मन्तकवृक्षः (वै. निघ.)
सिद्धप्राणेश्वर–पु., ज्वरातिसारे औषधम् (रस. चि. भैष.)
सिद्धमन्त्रप्रकाश–पु., वोपदेवकृतमन्त्रशास्त्रम्
सिद्धमोदक–पु., तवराजखण्डः (रा. नि. व. १४)
सिद्धयोगशतक–न. वृन्दकृतः प्रसिद्धवैद्यकसंग्रहभेदः
सिद्धरस–पु., पारदः (शब्दकल्पे अजयपालः) खनिजधात्वादिः (मे.)
सिद्धसलिल–न., काञ्जिकम् (हारा.)
सिद्धार्थयुग्म–न., पीतगौरसर्षपः कृष्णगौरसर्षपश्च (वा. ङ. ५ अ.)
सिद्धिली–स्त्री., क्षुद्रपिपीलिका (शब्दकल्पः)
सिद्धसाधक–न., श्वेतसर्षपः (रा. नि. व. १६) दमनकवृक्षः (वै. निघ.)
सिद्धोदक–न., काञ्जिकम् (हारा.)
सिद्धौषधि–पु., औषधिवर्गभेदः (रा. नि. व. २२)
सिध्मपुष्पिका–स्त्री., सिध्मरोगभेदः (त्रि. र.)
सिध्मल–त्रि., सिध्मकुष्ठार्तः (त्रिका.)
सिध्मला–स्त्री., शुष्कमीनः (त्रिका.) कुष्ठरोगी (वै. निघ.) मत्स्यविकृतिः (मे.)
सिध्मवान्–त्रि., सिध्मरोगी (वै. निघ.)
सिध्मा–स्त्री., किलासरोगः (हे. च.)

सिध्र–पु., वृक्षः (उणा.)
सिध्रका–स्त्री., सीधु इति ख्यातः वृक्षविशेषः
सिन–पु., ग्रासः (व्याक) न., शरीरम् (उणा.) स्त्री., (नी) एकनेत्रम् (शब्दकल्पः)
सिन्दुर–न., सिन्दूरम् (वै. निघ.)
सिन्दुवारच्छदा–स्त्री., वननिर्गुण्डी (वै. निघ.)
सिन्दु(न्धु)सहा–स्त्री., कृष्णनिर्गुण्डी (वै. निघ.)
सिन्दूरकारण–न., शीषधातुः (हे. च.)
सिन्दूरतिलका–स्त्री., नारी
सिन्दूरा–स्त्री., श्वेतनिर्गुण्डी (वै. निघ.)
सिन्धुक–पु., नीलसिन्धुवारवृक्षः (रा. नि. व. ४) श्वेतसिन्धुवारवृक्षः (श. च.)
सिन्धुकफ–पु., समुद्रफेनः (श. र.)
सिन्धुकर–न., श्वेतटङ्कणः (रा. नि. व. ६)
सिन्धुजन्म–न., सैन्धवलवणम् (अम. जटा.)
सिन्धुजात–न., मुक्ता (वै. निघ.)
सिन्धुदेशज–न., सैन्धवलवणम्
सिन्धुपुत्र–पु., मर्कटेन्दुवृक्षः
सिन्धुपुत्री–स्त्री., मौक्तिकशुक्तिः (वै. निघ.)
सिन्धुफल–पु., अग्निजारवृक्षः
सिन्धुमन्थज–न., सैन्धवलवणम् (र. मा.)
सिन्धुर–पु., हस्ती (हे. च.) निर्गुण्डीवृक्षः (र. सा. सं. जातीफलायाम्)
सिन्धुरद्वेषी (इन्)–पु., सिंहः (व्याक.)
सिन्धुलताग्र–न., प्रबालम् (वै. निघ.)
सिन्धुवल्ल्यग्र–न., प्रबालम् (वै. निघ.)
सिन्धुलवण–न., सामुद्रलवणम् । सैन्धवलवणम् (र. मा.)
सिन्धुवारदल–न., निर्गुण्डीपत्रम् (च. द. कफज्व. चि.)
सिन्धुवारिका–स्त्री., सिन्दुवारवृक्षः
सिन्धुवेषण–पु., गाम्भारीवृक्षः (श. च.)
सिन्धूत्प्लव–पु., अग्निजातवृक्षः (वै. निघ.)
सिन्धूपल–न., सैन्धवलवणम् (हारा.)
सिप्र–(व्र)–पु., घर्मः । स्वेदः (मे.)–स्त्री., (प्रा) महिषी
सिम्बा (म्बिः)–स्त्री., शमीधान्यम् (भ. द्विरूपको.) शिम्बी (भ.) नखीनामगन्धद्रव्यम् (रा. नि. व. १२)
सिम्बिजा–स्त्री., सिम्बिधान्यम् (भा.)
सिम्बितिका–स्त्री., सेववृक्षः (सु. सू. ४६ अ.)

सिम्बी-स्त्री., निष्पावी (रा. नि.व. ७) मुद्गपर्णी (रा. नि. व. ३०)
सिर-पु., पिप्पलीमूलम् (हे. च.)
सिरामातृका-स्त्री., तन्नामकोर्ध्वजत्रुमर्म (सु. शा. ६ अ.)
सिरिष्टिका-स्त्री., कुटुम्बिनीवृक्षः
सिरी-स्त्री., लाङ्गलिकालता (वै. निघ.)
सिली-स्त्री., गण्डूपदी पु., शिलिन्दमत्स्यः
सिलीन्ध्र-पु., मत्स्यविशेषः (वै. निघ.)
सिल्लकी-स्त्री., सल्लकीवृक्षः (अ. टी. भ.)
सिविका-स्त्री., सेवफलम् (वै. निघ.)
सिवितिकाफल-न., सेवफलम् (भा.)
सिहली-स्त्री., सिउलिछीप इति ख्यातं द्रव्यम् (प. मु.)
सिहुण्ड-पु., स्नुहीवृक्षः (अम.)
सिल्हकी-स्त्री., सल्लकी (श. र.)
सिल्हभूमिका-स्त्री., सल्लकी (श. र.)
सिल्हसार-पु., शिलारसः (वै. निघ.)
सिल्हहास- पु., सिल्हकः (रा. नि. व. १२)
सिह्लार- पु , गर्भतैलम् । शिलारसः (वै. निघ.)
सीत-पु., वेतसवृक्षः (वै. निघ.)
सीतजाम्र-पु., महाम्रवृक्षः (वै. निघ.)
सीतफेण-(न)-पु., रीठाकरञ्जः (वै. निघ.)
सीता-स्त्री., महासमङ्गा (रा. नि. व. ४) मदिरा
सीताफल-न., क्षातृप्याख्यफलविशेषः (वै. निघ.)
सीतीलक-पु., सतीलकः । शिम्बीधान्यविशेषः (अ. टी. रा.)
सीतोत्थ-न., श्वेतमरिचः (रा. नि. व. ६)
सीत्य-न., धान्यम् । शस्यम् (हे. च.)
सीद्य-न., आलस्यम्
सीधुपर्णी-स्त्री., गाम्भारीवृक्षः (रा. नि. व. ९)
सीधुपुष्प-पु., वकुलवृक्षः (रा. नि. व. १० कदम्बवृक्षे रा. नि. व. ९) स्त्री., (ष्पी)-धातकीवृक्षः (रा. नि. व. ६)
सीधुराक्ष-पु., मातुलुङ्गवृक्षः (वै. निघ.)
सीधुराक्षिक-न., काशीषम् (वै. निघ.)
सीधुवृक्ष-पु., स्नुहीवृक्षः (वै. निघ.)
सीधु (धू) संज्ञ-पु., वकुलवृक्षः (रा. नि. व. १०)
सीधूकफाणित-न., मधूकपुष्पोत्थफाणितम् (वै. निघ.)
सीधूरसा-स्त्री., आमलकी (वै. निघ.)
सीध्र-न., पायुः (शब्दकल्पः)
सीमा (अन्)-पु., अण्डकोषः (जटा.)

सीविक-पु., सूक्ष्मकृमिः । वल्मीकः । वृक्षविशेषः (उणा.)
सीमीक-पु., वृक्षविशेषः (शब्दकल्पः)
सीर-पु., अर्कवृक्षः (अम.)
सीरक-पु., शिशुमारकः (श. मा.)
सीरी (इन्)-पु., स्थूलदर्भः
सीलन्द (न्ध)-पु., मत्स्यभेदः (भा.)
सीषपत्रक-न., सीसधातुपत्रम् (हे. च.)
सीषभस्मन्-न., नागभस्म
सीसज-न., सिन्दूरम्
सीसपत्रक-न., सीसकम्
सीसोपधातु-पु., सिन्दूरम् (भा.)
सुकटु-पु., शिरीषवृक्षः (वै. निघ.)
सुकण्डु-पु., कण्डूरोगः (श. र.)
सुकन्दकरण-पु., श्वेतपलाण्डुः (वै. निघ.)
सुकर्णा-स्त्री., आखुकर्णीलता (रा. नि. व. ३)
सुकर्णिका-स्त्री., मूषिककर्णी (श. र.) महाबला (वै. निघ.)
सुकाण्डिका-स्त्री., कारवेल्ललता (रा. नि. व. ३)
सुकार्पास-पु., रक्तकार्पासी (र. सा. सं.) (चन्द्रोदयेरसे)
सुकुन्द-पु., सल्लकीनिर्यासः (वै. निघ.)
सुकुमारिका-स्त्री., कदलीवृक्षः (रा. नि. व. ११)
सुकेश (स) र-पु , बीजपूरवृक्षः (रा. नि. व. ११)
सुकेशिनी-स्त्री., शङ्खिनी (वै. निघ.)
सुकोमला-स्त्री., सिन्दूरपुष्पी वृक्षः
सुकोली-स्त्री., क्षीरकाकोली बदरीवृक्षः (र. मा.)
सुकोषा-स्त्री., कोशातकी (रा. नि. व. ७)
सुकोषक-पु., कोषाम्रः (भा.)
सुक्ता-(क्तिका) स्त्री., तिन्तिडी (वै. निघ.)
सुक्काडिचन्दन-न., स्वनामख्यात श्रीखण्डचन्दनान्यतर-चन्दनम् (रा. नि. व. १२)
सुखङ्करी-स्त्री., जीवन्तीलता (रा. नि. व. ३)
सुखदायिनी-स्त्री., रोहिणी (वै. निघ.)
सुखभक्ष-पु., श्वेतशिग्रुः (रा. नि. व. ७)
सुखमोद-पु., शोभाञ्जनवृक्षः (रा. नि. व. ७)
सुखमोदा-स्त्री., सल्लकीवृक्षः (रा. नि. व. ११)
सुखर-पु., सारसपक्षी (वै. निघ.)
सुखवर्चक-पु., सर्जिक्षारः (अम.)
सुखवास-पु., तरम्बुजः (त्रिका.)

सुखवासन-पु., सुखवासनसुगन्धद्रव्यम् (श. र.)
सुखा-स्त्री., वृद्धिनामौषधम् (वै. निघ.)
सुखात्मक-पु., शुक्लमरुबकवृक्षः (वै. निघ.)
सुखार्जिक-पु., सर्जिक्षारः (रा. नि. व. ६)
सुखाश (क) (स)-पु., चेलालफलवृक्षः (त्रिका.) राजतिनिशः-(श. मा.,) सुखभोजनम् (मे.)
सुग-न., विष्टा (श. च.)
सुगन्धक-पु., गन्धतुलसी (प. मु.) धरणीकन्दः-वै. निघ., रक्ततुलसी (र. मा.) बृहद्गन्धतृणम् (सु. सू. ३८ अ.) गन्धकः (र. मा.) द्रोणपुष्पी। नागरङ्गवृक्षः (त्रिका.) कर्कोटकः (हे. च.) शालिधान्यभेदः
सुगन्धगन्धक-पु., गन्धकः (वै. निघ.)
सुगन्धचन्द्री-स्त्री., सुगन्धशठी (वै. निघ.)
सुगन्धतृण-न.तृणभेदः (रा. नि. व. ८)
सुगन्धतैलनिर्यास-पु., यवादिनामगन्धद्रव्यम् (रा. नि. व. १२) (वै. सं.)
सुगन्धत्रय-न., चन्दनबालकनागकेसरं च
सुगन्धत्रिफला-स्त्री., जातिफललवङ्गैलाश्च (वै. निघ.) पूगजातीफललवङ्गाः (रा. नि. व. २२)
सुगन्धफल-न., कक्कोलम् (वै. निघ.)
सुगन्धमुख्या-स्त्री , कस्तूरिका (वै. निघ.)
सुगन्धमूत्रपतन-पु., सुगन्धमार्जारः (वै नित्र.)
सुगन्धमूषिका स्त्री., छुछुन्दरी (वै. निघ.)
सुगन्धवल्कल-न. त्वग् (वै. निघ.)
सुगन्धवैरजात्य-न. रोहिषतृणम् (वै. नित्र.)
सुगन्धशालि-पु., स्वनामकशालिधान्यविशेषः (रा. नि. व. १६)
सुगन्धषट्क-न. जातीफलकक्कोललवङ्गबालककर्पूरपूगाः (वै. निघ.)
सुगन्धसार-पु., शाकवृक्षः (वै. निघ.)
सुगन्धिकुसुम-पु., पीतपुष्पकरवीरः (रा. नि व.) (न.,) सुगन्धपुष्पम् (स्त्री.,) स्पृक्का (जटा.)
सुगन्धिकृत्- पु., शिलारसः (वै. नित्र.)
सुगन्धिपुष्प-पु., राजकदम्बवृक्षः (वै. निघ.)
सुगन्धिमूषिका-स्त्री., मूषिकविशेषः (रा. नि. व. १९)
सुगर-न., हिङ्गुलः (रा. नि. व. १३)
सुगर्भक-न., त्रपुषः (वै निघ.)
सुगुण्डा-स्त्री., गुण्डासिनीतृणम् (रा. नि. व. ८)
सुगुप्ता-स्त्री., कपिकच्छुः (प. मु.)
सुग्रीव-पु., राजहंसः (शब्दकल्पः)
सुच(चु)टी-स्त्री,. यन्त्रविशेषः
सुचन्दन-न., पत्राङ्गचन्दनम् (रा नि. व. १२)
सुचक्षु-पु., उदुम्बरवृक्षः
सुचित्रक-पु., मत्स्यरङ्कपक्षी
सुचिक्रका-स्त्री., तिन्तिडी
सुच्छिद्रिका-स्त्री., महामेदा (वै. निघ.)
सुजल-न., कमलम् (रा. नि. व. १०) निर्दोषजलम्
सुजातका-स्त्री., कुङ्कुमशालिः (रा. नि. व १६)
सुतङ्गी-स्त्री., महोपोदिका (वै. निघ.)
सुतर्कारी-स्त्री., देवदालीलता (रा. नि. व. ३)
सुतिन्तिड-पु., तिन्तिडीवृक्षः (वै. निघ.)
सुतुङ्ग-स्त्री., नारिकेलवृक्षः (रा. नि. व. ११)
सुतूर्य-पु., उलूकः (र. मा.)
सुतेजन-पु , धनुर्वृक्षः । (भा.)
सुदण्डिका (दण्डा)-स्त्री., गोरक्षी (रा. नि. व. ५) ब्रह्मदण्डी (वै. निघ.)
सुदधि-न., कपित्थफलम् (वै. निघ.)
सुदन्तिका-स्त्री., गौः (वै. नित्र.)
सुदमन-पु., आम्रवृक्षः (वै. निघ.)
सुदर्शन-पु., मत्स्यभेदः (रा. नि. व. ४) मत्स्यः (भा.)
सुदर्शनचूर्ण-न., विषमज्वरे औषधविशेषः
सुदर्शना-स्त्री., स्वनामख्यातलता (भा.)
सुदीर्घ पु., चिचण्डकः (भा. पू. १ भ. शा. व.)
सुदीर्घचर्मा-स्त्री., आसनपर्णी (श. च.)
सुदीर्घफला-स्त्री., बृहत्कर्कटिका (वै. निघ.)
सुदीर्घफलिका-स्त्री., दीर्घवृन्ताकभेदः (र. मा.)
सुदूरमूल-पु., यासक्षुपः (रा. नि. व. ४)
सुदृश-पु., मृगः
सुदृष्टि-(क)-पु., गृध्रः (वै. निघ.)
सुधांशु-पु., कर्पूरः
सुधांशुतैल-न., कर्पूरतैलम् (रा. नि. व. १५)
सुधांशुरत्न-न., मौक्तिकम् (रा. नि. व. १३)
सुधाक(धा)र-पु., कर्पूरः । चन्द्रः
सुधाक्षार-पु., चूर्णक्षारः (वै. निघ.)
सुधाङ्ग-पु., कर्पूरः
सुधानिधिरस-पु., रक्तपित्ते औषधम् (रस. चि.)
सुधापाणि-पु., धन्वन्तरी (शब्दकल्पः)
सुधापाषाण-पु., शुक्लखडिका (वै. निघ.)
सुधाभूति-पु., कर्पूरः
सुधामूली-स्त्री., सालममिछरीति ख्यातः कन्दभेदः
सुधामोदक-पु., यवासशर्करा (रा. नि. व. १४)

सुधामोदकज-पु., तवराजखण्डः (रा. नि. व. १४)
सुधालता-स्त्री., गुरुडवल्ली । गडूचीभेदः (वै. निघ. २ भ ज्व. चि.)
सुधावास-पु., त्रपुषफलम् (भ.) कर्कटिका (वै. निघ.)
सुधासूति-पु., पद्मम् (श. र.)
सुधाह्वय-पु., चूर्णकः (वै. निघ.)
सुधूम-पु., अगुरुसारः । स्वादुनामगन्धसारः (रा. नि. व. १२)
सुधोद्भव-पु., धन्वन्तरिः (त्रिका.) स्त्री., (वा) हरीतकी (त्रिका.) गुडूची (वै. निघ.)
सुनख-पु., कुकुरः (वै. निघ.)
सुनयन-पु., मृगः (श. च.) स्त्री., (ना) नारी
सुनाकृत-पु , कर्पूरः (श. च.)
सुनाद-पु., शङ्खः (वै. निघ.)
सुनाभा-स्त्री., श्वेतकिणिही
सुनामा-स्त्री., ब्राह्मी (वै. निघ.)
सुनामिका-स्त्री., त्रायमाणा लता (वै. निघ.)
सुनार-पु., चटकपक्षी । कुक्कुरीस्तन्यम् (मे.)
सुनालक-पु., वकपुष्पवृक्षः (श. च.)
सुनिर्घोषा-स्त्री., जिङ्गिनी (वै. निघ.)
सुनिर्यासा-स्त्री., जिङ्गिनी (भा.)
सुनिषण्णकच्छदा (पत्रिका)-स्त्री., चाङ्गेरी (वै. निघ.)
सुनेपाली-स्त्री., पिण्डीखर्जूरभेदः (भा.)
सुपक्व-पु., सुगन्धाम्रः (श. च.)
सुपत्रिन्-पु., पक्षी (वै. निघ.)
सुपथ्य-पु., आम्रवृक्षः (वै. निघ.) स्त्री., (थ्या) श्वेतचिल्लीशाकः । लघुवास्तुकः (रा. नि. व. ७)
सुपद्मा-स्त्री., वचा (श. च.)
सुपर्णाख्य-पु., नागकेशरवृक्षः (प. मु.)
सुपर्वा-(न्)-पु., वंशः । धूमः । पर्व (मे.) स्त्री., श्वेतदूर्वा (रा. नि. व. ८)
सुपुत्र-पु., जीवकद्रुमः (प. मु.) पुत्रजीववृक्षः
सुपुत्रिका-स्त्री., जतुकालता (रा. नि. व. ३)
सुपूर-पु., चूर्णकविशेषः । मातुलुङ्गवृक्षः (रा.नि. व.११)
सुप्तजन-पु., अर्धरात्रम् (जटा.)
सुप्तज्ञान-न., स्वप्नम् (जटा.)
सुप्रतिष्ठ-पु., उदुम्बरवृक्षः (र. मा.)
सुप्रतिष्ठा स्त्री., मद्यसामान्यम् (रा. नि. व. १४)
सुप्रतिष्ठिता-स्त्री., महाजम्बूवृक्षः (वै. निघ.)
सुप्रतीका-स्त्री., मद्यम् (वै. निघ.)

सुबन्ध-पु., तिलः (श. च.)
सुभगाह्वया-स्त्री., कैवर्तिका लता (रा. नि. व. ३) शालपर्णी (रा. नि. व. ४) हरिद्रा (रा. नि. व.६) सुवर्णकदली (रा. नि. व. ११) तुलसीवृक्षः (रा. नि. व. १०) नीलदूर्वा (रा. नि. व. ८)
सुभङ्ग-पु., नारिकेलवृक्षः (जटा.)
सुभ(भा)ञ्जन-पु., शोभाञ्जनवृक्षः (भा.) (द्विरूपको.)
सुभद्र-(क)-पु., बिल्ववृक्षः (श. च.) निम्बवृक्षः (वै. निघ.)
सुभद्राणी(ली)-स्त्री., त्रायमाणा लता (र. मा.)
सुभीर-(क)-पु., पलाशवृक्षः (हारा.)
सुभूतिक-पु., बिल्ववृक्षः (रा. नि. व. ११)
सुभ्रु(भ्रू)-स्त्री., नारी
सुम-न., पुष्पम् (अ. टी. भ.)
सुमकरन्द-पु , कुन्दवृक्षः (वै. निघ.)
सुमञ्जरी-स्त्री , कृष्णतुलसी (वै. निघ.)
सुमति-स्त्री., शारिका (वै. निघ.)
सुमधुर-पु., जीवशाकः (रा. नि. व. ७) गोधूमः (वै. निघ.)
सुमनःप्रबाल-(पल्लव)-पु., जातीपल्लवम् (च. द.)
सुमनोरज-(स्)-न., पुष्परजस् (अम.)
सुमेखल-पु., मुञ्जतृणम् (रा. नि. व. ८)
सुम्पलुण्ठ-पु., कर्पूरः (श. च.)
सुरकन्द-पु., कटुशूरणः (वै. निघ.)
सुरगण्ड-पु., अन्तर्विद्रधिविशेषः (निदा.)
सुरगोप-पु., इन्द्रगोपकीटः (च. द. स्त्री रो. चि.)
सुरज-न., लवणक्षारः (कश्चित्)
सुरजःफल-पु., पनसवृक्ष (शब्दकल्पः)
सुरजित-पु., लघुनिदाननामग्रन्थकर्ता
सुरञ्जन-पु., गुवाकवृक्षः (त्रिका.)
सुरञ्जी-स्त्री., श्वेतकाकमाची (वै. निघ.)
सुरतरु-पु., विकङ्कतवृक्षः (वै. निघ.) देवदारुवृक्षः (रा. नि. व. १२)
सुरतोषक-पु., कौस्तुभमणिः
सुरत्न-न., स्वर्णम् । माणिक्यम् (वै. निघ.)
सुरथकर्णिका-स्त्री., पुन्नागवृक्षः (वै. निघ.)
सुरदुन्दुभी-स्त्री., तुलसीवृक्षः (रा. नि. व. १०)
सुरनायिका-स्त्री., कर्पूरहरिद्रा
सुरनिर्गन्ध-न., पत्रकम् (रा. नि. व. ६)
सुरपत्री-स्त्री., सुगन्धपत्रशाकविशेषः (रा. नि. व. १०)

सुरपर्णिक-पु., सुरपुन्नागवृक्षः (रा. नि. व. २०) पुन्नागवृक्षः (वै. निघ.)
सुरपादप-पु., कल्पवृक्षः । देवदारुः (भूरिप्र.)
सुरभिका-स्त्री., स्वर्णकदली (रा. नि. व. ११)
सुरभिकान्ता-स्त्री., वासन्तीपुष्पवृक्षः (वै. निघ.)
सुरभिच्छद-पु., कपित्थवृक्षः (वै. निघ.)
सुरभित्रिफला-स्त्री., सुगन्धित्रिफला (रा. नि. व. २२)
सुरभिदारु (क)-पु., सरलदेवदारुवृक्षः (रा. नि. व. १२)
सुरभिनिम्बु-पु., सुगन्धनिम्बुकभेदः
सुरभिमञ्जरी-स्त्री., श्वेततुलसी (वै. निघ.)
सुरभिवल्कल-न., गुडत्वक् (श. र.)
सुरभिशाक-पु., सुगन्धशाकभेदः (रा. नि. व. १०)
सुरभीजल (मूत्र) न., गोमूत्रम् (अत्रि. ९ अ.)
सुरभीरसा-स्त्री., शल्लकीवृक्षः (अ. टी. भ.)
सुरभूरुह-पु., देवदारुवृक्षः (भा.)
सुरमुङ्ग-पु., सुरपुन्नागवृक्षः (रा. नि. व. १०)
सुरमेदस (स्भ) मुद्भवा-स्त्री., महामेदा (वै. निघ.)
सुररक्तज-पु., वैक्रान्तमणिः (वै. निघ.)
सुरवल्ली-स्त्री., तुलसीवृक्षः (रा. नि. व. १०) सुरकुञ्जरपारीन्द्ररसः
सुरवृक्ष-पु., देवदारुवृक्षः (वै. निघ.)
सुरशाखी-इन्-पु., कल्पवृक्षः (जटा.)
सुरश्रेष्ठ-पु., श्वेतकरवीरः (वै. निघ.)
सुरसमिध्-स्त्री., देवकाष्ठम् (चि. क. क.) स्तबकः
सुरसयुग-न., गौरकृष्णतुलसीद्वया (वा. सु. १५ अ.)
सुरसाग्र-न., सिंधुवारमञ्जरी (च. द.) (विष. चि.)
सुरसाग्रणी-स्त्री., श्वेततुलसी (वै. निघ.)
सुरसाष्ट-पु., तरुवर्गभेदः (श. च.)
सुरसुन्दरीगुडिका-स्त्री., रसायनाधिकारे औषधभेदः (रस.)
सुराकर-पु., नारिकेलवृक्षः (शब्दकल्पः)
सुराकिट्ट- न., सुराबीजः (भा. म. ४ भ.)
सुरागा (गिणी)-स्त्री., मनःशिला (वै. निघ.)
सुराज-पु., गोधूमः (वै. निघ.)
सुराजक-पु., भृङ्गराजः (श. मा.)
सुरापान-न., मद्यपानम् । अवदंशः (श. र.)
सुराभाग-पु., सुराया अग्रभागः (श. च.)
सुराल-पु., श्रेष्ठसर्जरसः (वा. सू. १५ अ.) (विरेचने)
सुरालिका-स्त्री., सातला (वै. निघ.)
सुराबीज-न., सुराकिण्वम् । पक्कसारमेदकः
सुरुङ्ग-पु., शोभाञ्जनवृक्षः (श. मा.)
सुरुद्रि-स्त्री., भारतवर्षीयनदीविशेषा (रा. नि. व. १४)
सुरूहक-पु ., गर्दभाश्वः (हे. च.)
सुरेन्द्रा-स्त्री., ह्रस्वेन्द्रवारुणी (वै. निघ.)
सुरेभ-न., वङ्गः (त्रिका.)
सुरेवट-पु., पूगवृक्षः रामपूगः (त्रिका.)
सुरोत्तर-पु., चन्दनवृक्षः (श. र.)
सुरोद्भव-न., पद्मकाष्ठम् (वै. निघ.)
सुरोहिष-न., सुगन्धरोहिषतृणम् (वै. निघ.)
सुलङ्घन-न., सुष्टु लङ्घनम् (सु.)
सुलेमानी-स्त्री.,स्वनामख्याते पिण्डीखर्जूरभेदः (भा.)
सुलोकिनी-स्त्री., भूम्यामलकी (वै. निघ.)
सुलोचन-पु., सुरङ्गमृगः (रा. नि. व. १९) चकोरः (वै. निघ.)
सुलोमनी-स्त्री., जटामांसी (वै. निघ.)
सुलोमशा-काकजङ्घा (रा. नि. व. ४) जटामांसी (वै. निघ.)
सुलोम्या-स्त्री., मांसरोहिणीभेदः (रा. वि. व. १२) ताम्रवल्लीलता मालवे प्रसिद्धा (रा. नि. व. ३)
सुलोमी-स्त्री., आखुकर्णीलता (वै. निघ.)
सुलोहक-न., पित्तलम् (हे. च.)
सुवया (स्)-स्त्री., दृष्टार्तवा मध्यमा स्त्री
सुवर्चक-पु., सर्जिकाक्षारः (जटा.)
सुवर्ची-स्त्री., सर्जिकाक्षारः (रा. नि. व. ६)
सुवर्णकमल-न., रक्तपद्मम् (वै. निघ.)
सुवर्णक्षीरिणी-स्त्री., स्वर्णक्षीरी (रा. नि. व. ५) कङ्कुष्ठः (सु. सू. ३८ अ.)
सुवर्णघ्न-न., वङ्गधातुः (वै. निघ.)
सुवर्णजाति- स्त्री., भूमिजलौहसङ्करजरसवेधज-सहज-कृति-खनिसम्भवज-वह्निजरसेन्द्रजतद्वेधजाः (वै. निघ.)
सुवर्णतिलका-स्त्री., ज्योतिष्मती लता (वै. निघ.)
सुवर्णदुग्धी-स्त्री., स्वर्णक्षीरिणीनामक्षुपः (रा. नि. व.५)
सुवर्णप्रसव-न., एलवालुकम् (वै. निघ.)
सुवर्णमाक्षिक-न., स्वर्णमाक्षिकम् (रा. नि व.)
सुवर्णमित्र-न., टङ्कणक्षारः (वै. निघ.)
सुवर्णयूथिका (थी) स्त्री., स्वर्णयूथिका (रा. नि. व. १०)

सुवर्णवर्णा (र्णी)-स्त्री., हरिद्रा (श. च.) कपर्दकभेदः (रा. नि. व. १३) जीवन्ती (प. मु.)

सुवर्णबीज-न., कनकधुत्तूरबीजम्

सुवर्णसंज्ञ-न., सुवर्णकर्षः

सुवर्णसिन्दूर-न., स्वर्णसिन्दूरम् (र. सा. सं.)

सुवर्णाख्य पु., नागकेशरवृक्षः (र. मा.)

सुवर्णाभ-पु., राजावर्तमणिः (वै. निघ.)

सुवर्णारि-न., सीसकम्

सुवर्तुल-न., तरम्बुजः (वै. निघ.)

सुवल्लि (ल्ली.)-स्त्री., सोमराजी (अ. टी. भ.) पुत्रदात्रीलता कटुकवल्ली (रा. नि. व ३)

सुवसन्तक-पु., वासन्ती पुष्पलता

सुवासरा-(स्त्री.,) चन्द्रशूरः (भा. नि.)

सुवासिनी-स्त्री., पितृभवनस्था नारी, चिरण्टी (अम.)

सुविद-पु., तिलकवृक्षः (वै. निघ.)

सुवीज-पु., बदरवृक्षः (रा. नि. व. ११) (न.) सुन्दरवीजः

सुवीर-(र्या)- पु., एकवीरवृक्षः(रा. नि. व. ८) बदरीवृक्षः (वै. निघ.) (न.) (क) सौवीराञ्जनम् (र. मा.) बदरः कृष्णाञ्जनम् (वै. निघ.)

सुवृत्त-पु., शूरणकन्दः (रा. नि. व. ७)मरिचः (वै निघ.)

सुशाक्या-स्त्री., शुकनासा (प. मु.)

सुश (ष, स) वी-स्त्री., कृष्णजीरकः कारवेल्लम् पानीयवल्ली (अम)

सुशीतला-स्त्री., ह्रस्वत्रपुषलता (भा.) कर्कटिका (वै. निघ.) (न.,) गन्धतृणम् (र. मा. अम.) नागदमनी (प. मु.)

सुशी (षी) म-पु., शैत्यम्, चन्द्रमणिः (जटा.) हिमम् । शीतलम्, सर्पविशेषः (मे.)

सुशीविका-स्त्री., वाराहीकन्दः (श. च.)

सुशुल्का- स्त्री., शुक्लजातीपुष्पवृक्षः (वै. निघ.)

सुशुभञ्जन-न., रक्तशोभाञ्जनवृक्षः (प. मु.)

सुश्वेत न., खण्डः (भा.)

सुषि-पु., छिद्रम् (अ. टी. भ.)

सुषिराख्य-पु., रन्ध्रवंशः (रा. नि. व. ७)

सुषीम-पु., सर्पभेदः । चन्द्रकान्तमणिः

सुषुप्ति-स्त्री., सत्वप्रधानम् अज्ञानम् आनन्दमयकोशः (वेदान्त). गाढनिद्रा

सुषुम्ना-स्त्री., शरीरान्तर्नाडीविशेषः (तन्त्रम्)

सुषेणा-स्त्री., त्रिवृता (रा. नि. व. ६)

सुषेणिका-स्त्री., कृष्णत्रिवृता (अम.)

सुषेवी-स्त्री., सुषवीजीरकः

सुष्टुन्धा-स्त्री., मदिरा (वै. निघ.)

सुसन्धिजा-स्त्री., त्रिसन्धिपुष्पवृक्षः (वै. निघ.)

सुसर्पण-पु., पारदः (रस. कौ.)

सुसारवत्-न., स्फटिकम् (त्रिका.)

सुसिकता-स्त्री., सुशर्करा (रा. नि. व. १४.)

सुसिर-पु., दन्तमूलगतरोगविशेषः (वा. उ. २१ अ.)

सुसीता-स्त्री., शतपत्री (वै. निघ.)

सुस्तनी-स्त्री., दृष्टार्तवा कन्या (रा. नि. व. १८)

सुस्थ-पु., स्वस्थः आरोग्यवान् (च. सु. १ अ.)

सुस्थता-स्त्री., स्वास्थ्यं, सुखम्, आरोग्यम् (श. च.)

सुस्थित-पु., अश्वस्य तन्नामकग्रहः (ज. द. ५७ अ.)

सुस्रा-स्त्री., शिम्बीधान्यविशेषः (रा. नि. व. १६)

सुस्वन-पु., शङ्खः (वै. निघ.)

सुस्वरा-स्त्री., ब्राह्मीशाकः (प. मु.)

सुहिता-स्त्री., रुद्रजटा (रा. नि. व. ३) अग्निजिह्वावृक्षः

सुहृत्राणा-स्त्री., त्रायमाणालता (वै. निघ.)

सूक-पु., उत्पलम् । वातम् (मे.)

सूकराह्वय-पु., न., ग्रन्थिपर्णवृक्षः (वै. निघ.)

सूक्ता-स्त्री., शारिकापक्षी (त्रिका.)

सूक्ष्मकृष्णफला-स्त्री., क्षुद्रजम्बूवृक्षः (र. मा.)

सूक्ष्मजिह्वा-स्त्री., तालुन उर्ध्वदेशवर्ति क्षुद्रजिह्वा (रा. नि. व १८)

सूक्ष्मजीरक-पु., क्षुद्रजीरकः

सूक्ष्मदल-पु., देवशिरीषः (रा. नि. व. ९) स्त्री., (**ला**)-दुरालभा (रा. नि. व. ४)

सूक्ष्मदारु-न., सूक्ष्मकाष्ठफलकः (त्रि. का.)

सूक्ष्मपत्रिका-स्त्री., क्षुद्रोपोदकी (रा. नि. व. ७) शताह्वा (रा. नि. व. ४) आकाशमांसी (रा. नि. व. १२) दुरालभा, लघुब्राह्मी (रा. नि. व. ४)

सूक्ष्मपर्णा-स्त्री., क्षुद्रशणपुष्पिका (रा. नि. व. ४) जीर्णफञी, बृहती (रा. नि. व. ४)

सूक्ष्मपिंडीतक-पु., क्षुद्रमदनवृक्षः (वै. निघ.)

सूक्ष्ममक्षिका-स्त्री., मशकः (रा. नि. व. १९)

सूक्ष्मवस्त्र-न., श्लक्ष्णवसनम् (शब्दकल्प.)

सूक्ष्मवीज-पु., खसखसः (रा. नि. व. ४)

सूक्ष्मशरीर-न., ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं वायुपञ्चकं बुद्धिमनसी चेति सप्तादशावयवाः (वेदान्तसार.)

सूक्ष्मशर्करा-स्त्री., वालुका (रा. नि. व. १४.)

सूक्ष्मशाक-पु., जालवर्बूरकः (रा. नि. व. ८)
सूक्ष्मषट्चरण-पु., पक्ष्माश्रयो कुणविशेषः(रा.नि.व.१९)
सूक्ष्मस्फोट-पु., विचर्चिका (रा. नि. व. २०)
सूक्ष्माम्ल-पु., क्षुद्राम्लः (वा. चि. १ अ.)
सूक्ष्माह्वा-स्त्री., महामेदा (वै. निघ.)
सूक्ष्मौषध-न., तैलादिः (वा.)
सूचि-स्त्री., सेवनी (अम.)
सूचिका-स्त्री., करिशुण्डा। सूची (शब्दकल्प.)
सूचिपर्ण-पु., शितावरक्षुपः (रा. नि. व. ४)
सूचिपुष्प-पु., केतकवृक्षः (प. मु.)
सूचिरोमा (न्)-पु., शूकरः (त्रिका.)
सूचिवदन-पु., मशकः, नकुलः (रा. नि. व. १९)
सूचीदल-पु., शितावरशाकक्षुपः (रा. नि. व. ४)
सूचीपत्रक (पर्ण)-पु., इक्षुविशेषः (सु. सू. ४५ अ.)
सूचीपुष्प-पु., केतकीवृक्षः (र. मा.)
सूचीवक्त्रा-स्त्री., योनिव्यापद्विशेषः (वा. उ. ३३ अ.)
सूचीरोमा (न्)-पु., शूकरः (त्रिका.)
सूचीवृक-पु., मृगविशेषः (वै. निघ.)
सूचोग्र-पु., तदाख्यगलरोगभेदः
सूच्य-पु., स्वल्पगोधूमः (वै. निघ.)
सूच्यग्र(स्थूलक)पु., उलुपतृणम् (र. मा.)
सूच्यास्य-पु., मूषिकः (हे. च.)
सूतका-स्त्री., सद्यःप्रसूता स्त्री (वै. निघ.)
सूतकागृह-न., प्रसवगृहम् (अ. टी. भ.)
सूतखोट-पु., रसजारणबीजम् । पारदजारणार्थं सिक्थकवद्द्रव्यम् रसपिष्टी (रस चि. ३ अ)
सूतमातृका-स्त्री., कुमारी (सा. कौ, अभ्रमारणे)
सूतसूर्य-पु., कृकलासः (बै. नि.)
सूतिकागृ (गे)ह-न., प्रसवगृहम् (सु. शा. १० अ.)
सूतिकाभवन-न., सूतिकागारः (हारा.)
सूतिकारिरस-पु., सूतिकारोगेरसः (रस. कौ.)
सूतिकावास-पु., सूतिकागारः(शब्दकल्पे) (शुद्धितत्त्वम्)
सूतिकाविनोदरस-पु., सूतिकारोगे रसः
सूतिकाषष्ठी-स्त्री., जातसन्तानस्य षष्ठदिने सूतिकागारे पूजनीयदेवीविशेषा
सूति (ती) गृह-न., सूतिकाभवनम् (श. र)
सूति (ती) मास-पु., प्रसवमासः नवमो दशमो वा मासः (जटा.)
सूत्कट-न., गुडत्वक्
सूत्पर-न., घर्घरशब्दः । सुरासन्धानम् (श. च.)
सूत्या-स्त्री., सोमलतारसपानम् (भ.)
सूत्रकण्ठ पु., नकुलः । वनकपोतः । पारावतः खञ्जरीटः (मे.)
सूत्रखण्डमोदक-पु., खण्डलड्डुकविशेषः (वै. निघ.)
सूत्रपुष्प-पु., कार्पासवृक्षः (त्रिका.)
सूत्रमध्यभू पु., यक्षधूपः कुन्दुरुः (श. च.)
सूत्रवर्ति-स्त्री., सूत्रकृतवर्तिः (भा. म. ना. व्र चि.)
सूत्राङ्ग-न., उत्तमकांस्यम् (वै. निघ.)
सूत्री(इन्)-पु., काकः (त्रिका.)
सूदज-पु., उपजिह्विका (वै. निघ.)
सूदशाला-स्त्री., पाकशाला (हे. च.)
सूदाध्यक्ष-पु., पाकशालाध्यक्षः । रसवत्यधिकारिवैद्यः (हे. च.)
सून-न., पुष्पम् । प्रसवम् (मे)
सूनु-पु., सूर्यः । पुत्रः (मे) अर्कवृक्षः (अम.)
सूपकार-पु., पाचकः (नीतिशास्त्रम्)
सूपधूपम्-न., हिङ्गुः (रा. नि. व. ६)
सूपपर्णी-स्त्री., मुद्गपर्णी (रा. नि. व. ३.)
सूपश्रेष्ठ-पु., मुद्गः (रा. नि. व. १६)
सूपाङ्ग-न., हिङ्गु (रा. नि. व. ६)
सूमम्-न., क्षीरम् (मे) जलम् (श. र.)
सूर-पु, मसूरः (रा. नि. व. १६) अर्कवृक्षः (अम.)
सूरणवटक-पु., शूरणकृतवटकः (वै. निघ.)
सूरसाधन-पु., सर्षपः (प. मु)
सूरसाधनक-पु., सिन्धुवारवृक्षः (रा. नि. व. ४)
सूरि-स्त्री., भुजङ्गघातीवृक्षः । राजसर्षपः
सूरी- स्त्री., राजसर्षपः (र. मा.)
सूर्यकान्ता (न्ति)-स्त्री., आदित्यपर्णीनामौषधम् । पुष्पवृक्षविशेषः (श. र.)
सूर्क्ष्य-पु., माषः (श. र.)
सूर्यनामका-स्त्री., सूर्यावर्तक्षुपः (वै. निघ.) पु., अर्कवृक्षः (ज. द.)
सूर्यपत्र-पु., अर्कपत्रवृक्षः (रा. नि. व. ४) पु., अर्कवृक्षः (सं) व्रणराक्षसतैले सूर्यावर्तक्षुपः (वै. निघ.)
सूर्यपर्णी-स्त्री., अर्कपत्रा (रा. नि. व. २३)
सूर्यपर्यायनाम-न., ताम्रम् (बै. निघ.)
सूर्यपाद-पु., सूर्यकिरणम् । सूर्यकान्तमणिः । निम्बवृक्षः (वै. निघ.)

सूर्यपुष्पक-पु., अर्कवृक्षः (वै. निघ.)
सूर्यप्रिया-स्त्री., पद्मिनी (वै. निघ.)
सूर्यभक्त-(क)-पु., बन्धूकवृक्षः (मे.)
सूर्यमणि-पु., पुष्पवृक्षविशेषः (श. र.)
सूर्यकान्तमणि. (हे. च.)
सूर्यमुखी-स्त्री., पुष्पवृक्षविशेषः (भूरिप्र.)
सूर्यवल्लभा-स्त्री., आदित्यभक्ता (रा. नि. व. ४)
पद्मिनी (वै नि. घ.)
सूर्यवृक्ष-पु., अर्कवृक्षः (वै. निघ.) अर्कपुष्पी (ज. द.)
सूर्यसंज्ञ-न., ताम्रम्, कुङ्कुमम् (त्रिका.)
सूर्याख्य-पु., सूर्यकान्तमणिः (व. निघ.)
सूर्याङ्ग-न., ताम्रधातुः
सूर्याश्मा (न्)-पु, सूर्यकान्तमणिः (हे. च.)
सूर्योदयरस-पु., शिरोरोगाधिकारे रसः (र. स. र.)
सृक-पु., वायुः पद्मम् कैरवम् (उणा.)
सृकण्डु-स्त्री., कण्डूयनम् (श. र.)
सृका (गा) ल-पु., शृगालः (श. च.)
सृका-स्त्री., अनन्ता (ज. द.)
सृज (जि) काक्षार-पु., सर्जिकाक्षारः (अ. टी. र.)
सृञ्जा-स्त्री., छागी (त्रिका.)
सृणि-(णी) का-स्त्री., लाला (रा. नि. व. १८)
सृत्वा-स्त्री., वीसर्परोगः वृद्धिः (उणा.)
सृपाटिका (टी) स्त्री., पक्षिचञ्चुः । मानविशेषः(वै.निघ.)
सृध्री-स्त्री., वृध्यौषधम् । पर्पटकः (वै. निघ.)
सृष्टिकृत्-पु., पर्पटकक्षुपः (रा. नि. व. ४)
सेका-स्त्री., श्यामालता (वै. निघ.)
सेकिम-न., मूलकः (हे. च.)
सेगुडी-स्त्री., क्षुद्रक्षुपविशेषः (वै. निघ.)
सेट्ठु-पु., धवलयावनालः (रा. नि. व. १६) नाटाम्रः(हारा)
सेतु(क)-पु., वरुणवृक्षः (अम.)
सेतुभेदी(इन्)-पु., दन्तीवृक्षः (श. च.)
सेतुवृक्ष-पु., वरुणवृक्षः (अम.)
सेत्र-न., स्नायुः । शृङ्खलः (व्याक.)
सेनिका-स्त्री., शतपुष्पी (वै. निघ.)
सेन्दु-पु., लतापनसः (त्रिका.)
सेन्धा स्त्री., सल्लकीवृक्षः (भा.)
सेफ-पु., शेफस् (जटा.)
सेफाली-स्त्री., सिन्धुवारवृक्षः (रा. नि. व. २३)
शेफालिका
सेमन्ती-स्त्री., पुष्पवृक्षभेदः (शब्दकल्पः)
सेमश-पु., मेषः (त्रिका.)

सेरीपूग-न., महाराष्ट्रकर्णाटकयोः खेरीति ख्यातं पूगम्
(रा. नि. व. ११)
सेलक-पु., पीतरोध्रः (वै. निघ.)
सेव(वि)-न., काबेलदेशीयतन्नामकफलविशेषः
(रा. नि. व. ११)
सेवकाल-(लु)-पु., दुग्धपेयावृक्षः (श. च.)
सेवती(न्तिका)(न्ती)-स्त्री., स्वनामख्यातपुष्पवृक्षः (भा.)
सेवनमोदक-पु., बसनमोदकाख्यलड्डुकभेदः
सेविका स्त्री., मिष्टान्नभेदः (भा.)
सेवित-न., सेविफलम् (रा. नि. व. ११)
सैहल-न., सुवर्णपित्तलम् । त्वक् (वै. निघ.)
सैकत-न., हिङ्गुलः (वै. निघ.)
सैक्य-न, शोणपित्तलम् (वै. निघ.)
सैन्धवादितैल-न., भगन्दराधिकारे तैलम् (रस. र.)
सैन्धी स्त्री., मद्यविशेषः तालरसकृतमद्यम् (वै. निघ.)
सैमन्तिक-न., सिन्दूरः (शब्दकल्पः)
सैरिभ-पु., महिषः (प. मु.)
सैरी-स्त्री., लाङ्गलिका (प. मु.)
सैरीयकद्वय-न., नीलपीतझिण्टीद्वया (सु. सू. ३८ अ.)
सैर्य-पु., श्वेतझिण्टीक्षुपः (वै. निघ.)
सैवाल-न., जलनीली (शब्दकल्पः)
सैह्लिक-पु., शिलारसः (सं.)
सोनह-पु., लसुनः (श. र.)
सोन्माद-त्रि., क्षिप्तः । उन्मत्तः (अ. टी. भ.)
सोभाञ्जन-पु., शोभाञ्जनवृक्षः (अ. टी. भ.)
सोमक-पु., सोमरोगः (निदा.)
सोमखण्डा-स्त्री., सोमराजी (वै. निघ.)
सोमगन्धक-न., रक्तोत्पलम् (वै निघ)
सोमगा-स्त्री., सोमराजी (वै. निघ.)
सोमगृष्टि (ष्टी) का-स्त्री., कूष्माण्डलता (वै. निघ.)
सोमग्रह-पु., अश्वस्य ग्रहविशेषः (ज. द. ५ अ.)
सोमघृत-न., गर्भोत्पादनघृतम् (भैष.)
सोमज-न., दुग्धम् (हे. च.)
सोमदा-स्त्री., गन्धशठी (वै. निघ.)
सोमद्भव-पु., हस्ती (वै. निघ.)
सोमनाथरस-पु., प्रमेहः । सोमरोगाधिकारे च रसविशेषः ।
सोमपत्र-पु., उलुपतृणम् (श. च.)
सोमपादप-पु, कायफलवृक्षः (वै. निघ.)
सोमप्रिय-पु., कुमुदपुष्पम् (वै निघ.)
सोमबन्धु-पु., कुमुदम् (श. र.)

सोममणि-पु., चन्द्रकान्तमणिः (भूरिप्र.)
सोमयोनि-पु., पीतचन्दनवृक्षः (श. र.)
सोमराजिका-स्त्री., सोमराजी (श. र.)
सोमराट्-पु., सोमराजी
सोमवल्कल-पु., कट्फलवृक्षः, श्वेतखदिरः (वै. निघ.)
सोमवल्लिका-स्त्री., सोमलता (भ.) सोमराजी (अम.)
सोमवृक्ष-पु., कट्फलवृक्षः (र. मा.) श्वेतखदिरः (रा. नि. व. ८)
सोमशकला-स्त्री., शशाण्डुली (रा. नि. व. ७)
सोमशल्य-पु., श्वेतखदिरः (रा. नि. व. ८)
सोमसंज्ञ-न., कर्पूरः (र. मा.)
सोमसट्टक-पु , सट्टकभेदः (द्रव्य. गु.)
सोमसम्भवा-स्त्री., गन्धशटी (वै. नि. घ.)
सोमस्कन्ध-पु., श्वेतखदिरः (वै. नि. घ.)
सोमाख्य-न., रक्तकैरवः (र. मा.)
सोमाह्वा-स्त्री., महासोमलता (रा. नि. व. ३.)
सोमाल-पु., सुकुमारः (हारा.)
सोरक-न., सूरक्षारभेदः (अत्रि. गन्धद्रावके.)
सोहरा-स्त्री., सोरा इति ख्यातं पण्यद्रव्यं (भैष. प्लीहचि. महाशंखद्रावके)
सौलिकिकेय-पु., तदाख्यविषभेदः
सौख्य-न., आरोग्यं, सुखम् (हे. च.)
सौगन्ध-न., कत्तृणम्, सुगन्धतृणम् (श. र.) (त्रि.) शुभगन्धम्
सौगन्धपत्रक-पु., श्वेतार्जकः (वै. निघ.)
सौगन्धिपत्रक-पु , श्वेतार्जकः (वै. निघ.)
सौण्डी-स्त्री., पिप्पली (श. च.)
सौध-पु., न., रौप्यम् (रा. नि. व. १३) राजभवनम् (अम.) पु., शुक्लखडिका (रा. नि. व. १४) स्त्री., धा-स्नुहीवृक्षः (च. द. ग्रन्थिरो. चि.)
सौधभूषण-न., चूर्णकम् (वै. नि.)
सौभद्रेय-पु., विभीतकवृक्षः (श. र.)
सौभाग्यचिन्तामणि-पु., विषमज्वरे औषधम् (सा. कौ.)
सौभाग्यमण्डन-न., हरितालः (वै. निघ.)
सौभिक्ष-पु., अश्वस्य शूलरोगभेदः (ज. द. ४३ अ.)
सौमनस (स्य) फल-न., जातीफलम् (वै. निघ.)
सौमनसा (स्या) स्त्री., जातीपत्री (रा. नि. व. १२)
सौमनस्यफला-स्त्री., महाजातिपुष्पवृक्षः (वै. निघ.)
सौमनस्यायनी-स्त्री., मालतीपुष्पकलिका (त्रिका.)
सौमित्र-न., ग्रन्थिपर्णभेदः (वै. निघ.)
सौमेरुक-न., सुवर्णम् (रा. नि. व. १३)
सौम्यगन्धी-स्त्री., शतपत्री (रा. नि. व. १०)
सौम्यगन्धिक-न., श्वेतरक्तकमलम् (वै. निघ.)
सौम्यज्वर-पु., ज्वरभेदः (च. सू. ३ अ.)
सौम्यलता-स्त्री., ब्राह्मी
सौरज-पु., तुम्बुरुफलवृक्षः (रा. नि. व. ११)
सौरभेयी-स्त्री., गाङ्गी गन्धपत्रा
सौरवनज-पु., तुम्बुरुवृक्षः (रा. नि. व. ११)
सौराष्ट्रक-न., पञ्चलौहः (हे. च.) कांस्यधातुः (प. मु.)
सौराष्ट्रमृत्तिका-स्त्री., सौराष्ट्री। अभावः (रा. नि. व.१३)
सौराष्ट्रसम्भूता-स्त्री., फटिकारिका (वै. निघ.)
सौरिक-पु , भल्लातकवृक्षः (वै. निघ.)
सौरिरत्न न., नीलमणिः (रा. नि. व १३)
सौरी-स्त्री., आदित्यभक्ता पु.-री-(इन्)-भल्लातकः (वै. निघ.)
सौरेय-(क)-पु., शुक्लपुष्पझिण्टी (भा.)
सौलिक-पु., ताम्रकुट्टकः (अ. टी.)
सौवर्णभेदिनी-स्त्री., प्रियङ्गुः (श. मा.)
सौविद(दल्ल)-पु.. अन्तःपुरिकाया रक्षकः (अ. म.)
सौवीरज-न., नीलाञ्जनम् (वै. निघ.)
सौवीरा-स्त्री., क्षीरकाकोली (वै. निघ.)
सौवीरिका-स्त्री., क्षुद्रबदरीभेदः (मद. व. ६)
स्कन्द(न्ध)तरु-पु., नारिकेलवृक्षः (रा. नि. व. ११)
स्कन्दसखा- पु., स्कन्दापस्मारः (सु. सू. ३७ अ.)
स्कन्दांशक-पु., पारदः (रा. नि. व. १३)
स्कन्धदेश-पु., हस्तिस्कन्धः। स्कन्धप्रदेशः (अम.)
स्कन्धफल-पु., नारिकेलवृक्षः (रा. नि. व. १०) उदुम्बरवृक्षः(श. च.) स्त्री., (ला)-खर्जूरवृक्षः (भा.)
स्कन्धबन्धना-स्त्री., मधुरिका
स्कन्धमल्लक-पु., कङ्कपक्षी (हे. च.)
स्कन्धवदना-स्त्री., मधुरिका (श. च.)
स्कन्धशृङ्ग पु , महिषः (शब्दकल्पः)
स्कन्धी(इन्)-पु., वृक्षः (र. मा.)
स्कोटिका-स्त्री., हापुत्रिका, खञ्जनिका (त्रिका.)
स्तनपायिका-स्त्री., बालिका (रा. नि. व. १८)
स्तनपीडा-स्त्री., स्तनरोगः (निदा.)
स्तनमुख-न., पु , चूचकः (रा. नि. व. १८)
स्तनवृन्त-न., चूचकः (हे. च.)
स्तनशिखा-स्त्री., चूचकः (हे. च.)
स्तनव्रण-पु., स्तनोपरिजातक्षतम् (रस. र. स्तनरो. चि.)

स्तनशोष-पु., स्तनशुष्कतारोगविशेषः (च. द. स्त्रीरो. चि.)
स्तनाग्र-स्तनवृन्तम्। चूचुकः
स्तनितोद्भव-पु., उदुम्बरवृक्षः। विकण्टकवृक्षः (रा. नि. व. ११)
स्तन्या-स्त्री., कलम्बीशाकः (प. मु.)
स्तब्धरोमा (अन्)-पु., शूकरः (अम.)
स्तभ-पु., छागः (श. र.)
स्तम्ब-पु., रोहितकवृक्षः। प्रकाण्डहीनतरुमात्रम् (अम.) तृणादीनां गुच्छम् (चामरः)
स्तम्बक-पु., क्षवकवृक्षः (वै. निघ.)
स्तम्बकरि-पु., धान्यम् (अम.) धान्यमात्रम् (श. र.)
स्तम्बेरम-पु., हस्ती (प. मु.)
स्तम्भक-पु., रक्तबोलः (वै. निघ.)
स्तवक (काष्ठ) कन्द-(क)-पु., गुलुच्छकन्दः (रा. नि. व. ७)
स्तवकफल-पु., तेजोवती (वै. निघ.)
स्तवकमञ्जरी-स्त्री., अशोकवृक्षः (वै. निघ.)
स्तवकशालिनी-स्त्री., घृतकुमारी (प. मु.)
स्तवकाढ्य-पु., स्तवकः, गुच्छम्
स्तीर-न., वङ्गम् (वै. निघ.)
स्तीर्वि-पु., रुधिरम्। तृणजातः (उणा.)
स्तुटि-पु., भरद्वाजपक्षीः (वै. नि. घ.)
स्तुनक-पु., छागः (श. च.)
स्तुभ-पु., छागः (अ. टी. भ.) छागी (भा.)
स्तूप-पु., एकत्रसञ्चितः पदार्थः। राशिः
स्तूपक-पु., वटकादिभक्ष्यद्रव्यम् (वै. निघ.)
स्तेम-पु., आर्द्रीभावः (अम.)
स्तेयफल-पु., तेजःफलम्
स्तेयी (इन्)-पु., वनमूषिकः (वै. निघ.)
स्तोक-पु., चातकपक्षी (रा. नि. व. १९)
स्तोम-न., शस्यं मस्तकम् (शब्दकल्पः)
स्त्येन-अमृतम् (उणा.)
स्त्रीचित्तहारी (इन्)-पु., शोभाञ्जनवृक्षः (त्रिका)
स्त्रीचिह्न-न., योनि (जटा.)
स्त्रीदुग्ध-न., नारीदुग्धम्
स्त्रीधर्म-पु., स्त्रीरजः (हे. च.)
स्त्रीधर्मिणी-स्त्री., रजस्वला (अम.)
स्त्रीनवनीत-न., मानुषीस्तन्यजातनवनीतम् (रा. नि. व. १५)

स्त्रीनिरीक्षणदोहद-पु., तिलकपुष्पवृक्षः (वै. निघ.)
स्त्रीपुंसलक्षणा-स्त्री., पोटास्त्री (अम.)
स्त्रीप्रिय-पु., आम्रवृक्षः (त्रिका.)
स्त्रीबीज-पु., श्यामाकतृणम् (वै. निघ.)
स्त्रीरञ्जन-न., ताम्बूलः (शब्दकल्पः)
स्त्रीरोग-पु, विंशतिविधयोनिरोगः
स्त्रीसंसर्ग-पु., स्त्रीसेवा
स्त्रीसुख-पु., शिग्रुवृक्षः (वै. निघ.)
स्थगु-न., कुब्जभागः (शब्दकल्पः)
स्थपुट-न., विषमोन्नतम् (हारा.)
स्थलकन्द-पु., आरण्यशूरणम् (र. मा.)
स्थलकमल-न., स्थलपद्मम् (रा. नि. व. १०)
स्थलकुमुद-पु., श्वेतकरवीरवृक्षः (रा. नि. व. १०)
स्थलजा-स्त्री., वल्लीयष्टिमधु (वै. निघ.)
स्थलतण्डुलगन्ध-पु., पक्षिराजशालिः (रा. नि. व. १६)
स्थलपद्म (क)-न., स्वनामख्यातपुष्पवृक्षविशेषः (भा.)
स्थलपद्मक-पु., मानकः (र. मा.)
स्थलपद्मिनी (द्मी)-स्त्री., स्थलपद्मवृक्षः
स्थलपुष्पा-स्त्री., झेण्डुकक्षुपः (रा. नि. व. ५)
स्थ (स्थू) लभण्टा (की)-स्त्री., बृहतिका (वै. निघ.)
स्थ (स्थू) लमञ्जरी-स्त्री., अपामार्गः (र. मा.)
स्थलमर्कट-पु., करमर्दकवृक्षः (वै. निघ.)
स्थ (स्थू) लरुहा-स्त्री., स्थलपद्मिनी (रा. नि. व. ५)
स्थविका-स्त्री., मक्षिकाभेदः (सु. कल्प. ८ अ)
स्थविरदारु-न., वृद्धदारुः (भा. म. १ भ. सन्धिकज्व. चि.)
स्थाणुकर्णी-स्त्री., महेन्द्रवारुणीलता (रा. नि. व. ३)
स्थाणुरोग-पु., अश्वस्य पादरोगविशेषः (ज. द. ३९ अ.)
स्थानक-न., आलवालम् (हे. च.) फेनः (शब्दकल्पः)
स्थानचञ्चला-स्त्री., वर्वरीवृक्षः (श. च.)
स्थानमृग-पु., कर्कटः मत्स्यः कच्छपः मकरः (वै. निघ.)
स्थाल-न., सुवर्णादिपात्रम् (अम.)
स्थालिकास्थि-न., अर्बुदाकारास्थि (च. शा.)
स्थालिद्रुम-पु., नन्दीवृक्षः (वै. निघ.)
स्थालिपर्णी-स्त्री., आरण्यगुञ्जा (वै. निघ.)
स्थालीपक-न., स्थालीपाचितान्नादिः (शब्दकल्पः)
स्थालीवृक्ष-पु., अश्वत्थविशेषः (भा.)
स्थावरादि-पु., वत्सनाभविशेषः (रा. नि. व. ६.)
स्थिक-पु., कटिप्रोथम्। स्फिग् (श. र.)
स्थिरक-पु., शाकवृक्षः (वै. निघ.)
स्थिरच्छद-(दा)-पु., स्त्री., भूर्जवृक्षः (र. मा.)
स्थिरच्छाय-पु., वटादौ, छायातरुः (त्रिका.)

स्थिरजिह्व-पु., मत्स्यः (हे. च.)
स्थिरजीविका (ता)-स्त्री., शाल्मलीवृक्षः
स्थिरदंष्ट्र-पु., सर्पः (मे.)
स्थिरपुष्पी (इन्)-पु., तिलकपुष्पवृक्षः (रा. नि. व. १०)
स्थिरमुद्रा-स्त्री., रक्तकुलत्थः (वै. निघ.)
स्थिरयोनि-पु., छायावृक्षः (शब्दकल्पः)
स्थिरराष्ट्र-पु., माषपर्णी (वै. निघ.)
स्थिरशाल्मली-स्त्री., शाल्मलीवृक्षः (वै. निघ.)
स्थिरसार-पु., शाकवृक्षः
स्थिरादि-पु., स्वल्पपञ्चमूली (च. द. परिणामशूले)
स्थिरायु-पु., शाल्मलीवृक्षः (अम.)
स्थूर-पु., वृषः (उणा.) मनुष्यः (व्याक.)
स्थूलक-पु., तृणविशेषम्
स्थूलकण्टकिका-स्त्री., शाल्मलीवृक्षः (श. च.)
स्थूलकण्टफल-पु., पनसवृक्षः (वै. निघ.)
स्थूलकण्टाली (ण्टी)-स्त्री., बृहती (रा. नि. व. ४)
स्थूलका-स्त्री., आम्रहरिद्रा (वै. निघ.)
स्थूलग्रन्थि-स्त्री., महाभरीवचा (वै. निघ.)
स्थूलचम्पक-पु., श्वेतचम्पकः (वै. निघ.)
स्थूलतिक्ता-स्त्री., दार्वी (वै. निघ.)
स्थूलतिन्दुक-पु., काकतिन्दुकः (वै. निघ.)
स्थूलनास (सिक)-पु., शूकरः (हे. च.)
स्थूलनिम्बु (क)-पु., महानिम्बुवृक्षः (वै. निघ.)
स्थूलनील-पु., रणगृध्रः (वै. निघ.)
स्थूलपट्ट-पु., कार्पासः (श. र.)
स्थूलपट्टाक-पु., स्थूलवस्त्रम् (श. र.)
स्थूलपत्र-पु., दमनवक्षुपः (रा. नि. व. १०)
सप्तपर्णवृक्षः (वै. निघ.)
स्थूलपर्णी-स्त्री., सप्तपर्णवृक्षः (वै. निघ.)
स्थूलपाद-पु., गजः (त्रि.) श्लीपदरोगी (वै. नि.घ)
स्थूलपुष्प-पु., बकवृक्षः (र. मा.) झुण्डक्षुपः। (रा. नि. व. ५)
स्थूलपुष्पी-स्त्री., यवतिक्ता लता (रा. नि. व. २३)
स्थूलप्रियङ्गु-पु., वरकाख्यधान्यम् (वै. निघ.)
स्थूलभण्टाकी-स्त्री., महाबृहतीक्षुपः (मद. व. १)
स्थूलमूल (क)-न., चाणक्यमूलकः (रा. नि. व. ७)
स्थूलवर्त्म (न्)-न., दुष्टव्रणरोगभेदः
स्थूलवर्त्मकृत् स्त्री., भार्गी (श. च.)
स्थूलवर्बूरिका-स्त्री., महाबर्बूरवृक्षः (शार्ङ्ग. म. १ भ.)
स्थूलवृक्ष-पु., महाबकुलवृक्षः (वै. निघ.)
स्थूलवृक्षफल-पु., स्निग्धपिण्डीतकवृक्षः (रा. नि. व.८)

स्थूलशिम्ब-पु., अग्निशिम्बी (रा. नि. व. ७)
स्थूलशीर्षिका-स्त्री., महामस्तकपिपीलिका, क्षुद्रपिपीलिका (हे. च.)
स्थूलषट्पद-पु., वरोलः (वै. निघ.)
स्थूलांशा-स्त्री., गन्धपत्रा (रा. नि. व. १०.)
स्थूलाङ्गी-स्त्री., स्थूलशालिः (वै. निघ.)
स्थूलाजाजी-स्त्री., स्थूलजीरकः (मद. व. २.)
स्थूलाम्र-पु., महाराजचूतवृक्षः (रा. नि. व. ११)
स्थूलास्य-पु., सर्पः (श. च.)
स्थूली (इन्)-पु., उष्ट्रः (शब्दकल्पः)
स्थूलोच्चय-पु., मुखव्रणम् (मे.)
स्नव-पु., क्षरणः (अम.)
स्नसा-स्त्री., वस्नसा (हे. च.)
स्नानतृण-न., कुशतृणम् (श. र.)
स्नायूर्मन्-न., शुक्लगतनेत्ररोगभेदः (सु. उ. ४. अ.)
स्नावी-स्त्री., अंसद्रव्यम् (वा. शा. ४ अ.)
स्निग्धकरञ्जक-पु., गुच्छकरञ्जः (वै. निघ.)
स्निग्धच्छद-पु., वटवृक्षः (वै. निघ.) (दा.) (स्त्री.) बदरीवृक्षः (वै निघ.)
स्निग्धतण्डुला-स्त्री., षष्टिकशालिधान्यम् (प. मु.)
स्निग्धनिर्मल-न., उत्तमकांस्यम् (वै. निघ.)
स्निग्धपत्री-स्त्री., बदरीवृक्षः (जटा.) पालङ्कशाकः (रा. नि. व. ७) लोणिका (वै. निघ.) गाम्भारीवृक्षः (रा. नि. व. ९)
स्निग्धपर्णिका-स्त्री., मूर्वा (रा. नि. व. ३) पृश्निपर्णी (वै. निघ.)
स्निग्धपिण्डीतक-पु., मदनवृक्षविशेषः (रा. नि.व.८)
स्निग्धमज्जक-पु., वातामवृक्षः (वै. निघ.)
स्नु-स्त्री., स्नायुः
स्नुकच्छद-पु., क्षीरीशवृक्षः (प. मु.) क्षीरकञ्चुकीवृक्षः (र. मा.)
स्नुकच्छदोपम-पु., वाराहीकन्दः (वै. निघ.)
स्नुग्दल-न., मनसापत्रम् (रस. र. बाल. चि.) पु., स्नुहीवृक्षः (श. च.)
स्नुषी-स्त्री., पुत्रभार्या (वा. चि. ९ अ.)
स्नुहा (हि)-स्त्री., स्वनामख्यातक्षीरसारवृक्षः (र. मा.)
स्नुहाद्यतैल-न., खालित्ये तैलम् (रस. र.)
स्नुहीदल-न., स्नुहीवृक्षपत्रम्
स्नुहीबीज न., स्नुहीवृक्षबीजम् (सं. कनकतैले.)
स्नुह्य-न., उत्पलम् (त्रिका.)

स्नेहकर-पु., शालवृक्षः (वै. निघ.)
स्नेहगर्भ-पु., तिलक्षुपः (प. मु.)
स्नेहचतुष्टय-न., सर्पिस्तैलवसामज्जा च (प. प्र. ३ ख.)
स्नेहपिण्डीतक-पु., पीतमदनवृक्षः (वै. निघ.)
स्नेहपूरफल-पु., तिलक्षुपः (वै. निघ.)
स्नेहभू-पु., कफः (हे. च.)
स्नेहमुख्य-न., तिलः (वै. निघ.)
स्नेहरङ्ग-पु., तिलः (श. र.)
स्नेहवती-स्त्री.; मेदा (रा. नि. व. ५)
स्नेहवृक्ष-पु., देवदारुः (वै. निघ.)
स्नेहबीज-पु., पियालवृक्षः (रा. नि. व. ११)
स्नेहा (न्) (हु)-पु., चन्द्रः । रोगः (उणा)
स्पन्दनाह्वय-पु., तिन्दुकवृक्षः
स्परिश-पु., स्पर्शम् (शब्दकल्पः)
स्पर्शमणि-पु., मणिविशेषः (शब्दकल्पः)
स्पर्शमणिप्रभव-न., स्वर्णम् (श. र.)
स्पर्शशुद्धा-स्त्री., शतमूली (श. च.)
स्पर्शस्यन्द-पु.. भेकः (शब्दकल्पः)
स्पृशा-स्त्री., सर्पकङ्कालिकावृक्षः (श. च.) (शा. शी.) कण्टकारी (ज. द.)
स्पष्टरोदनिका-स्त्री., समङ्गा (सु. चि. २)
स्पृष्टास्पृष्टि-व्य., परस्परस्पर्शनम् (शब्दकल्पः)
स्पृष्टि-स्त्री., स्पर्शनम् (अम.)
स्पृहा-स्त्री., इच्छा भुजङ्गघातिनीवृक्षः
स्पृह्य-पु., मातुलुङ्गवृक्षः (श. च.)
स्फट-(टा)-पु., स्त्री., सर्पफणा (अम.)
स्फटिकविष-न., दारुमोचभेदः (सं.)
स्फटिकाख्या स्त्री., स्फटिकारिका (भा.) (सं. रसकर्पूरे)
स्फटिकात्मा (न्)-पु.. स्फटिकम् (श.च.)
स्फटिकाद्रिभिद-पु., कर्पूरः (शब्दकल्पः)
स्फटिकाभ्र-पु., कर्पूरः (रा. नि. व. १२)
स्फटिकारि-पु., स्वनामख्यातखनिजोपरसः (भा. पू. १ भ. उ. रसव.)
स्फटिकोपम-पु., कर्पूरः । यशदः । चन्द्रकान्तमणिः (वै. निघ.)
स्फटिकोपल-पु., स्फटिकम् (वै. निघ.)
स्फटि-स्त्री., स्फटिकारी (भा.)
स्फाट (टी) क-न., स्फटिकम् (श. र.)
स्फाटिकोपल-पु., स्फटिकम् (त्रि. का.)
स्फिकघातनक-पु., कट्फलवृक्षः (श. च.)
स्फुट-न., ज्योतिष्मतीपत्रम् (च. द. बाल. चि.)

स्फुटत्वचा-स्त्री., ज्योतिष्मती (वै. निघ.)
स्फुटबन्धना (नी) स्त्री., पारावतपदी (प. मु.)
स्फुटवल्कली-स्त्री.. पारावतपादी (र. मा.)
स्फुटि-(टी)-स्त्री., स्फुटितकर्कटिका पादस्फोटरोगः (हा. रा. श. र.)
स्फुत्क (त्का)र-पु., अग्निः (श. च.) फुत्कारः
स्फूर्जनतरु-पु., नन्दीवृक्षः (वै. निघ.)
स्फूर्ति-स्त्री., स्फूरणम् । कम्पनम् (व्याक.)
स्फोटक-पु., पक्षिविशेषः । विस्फोटकः (रा. नि. व. २०)
स्फोटकर-पु.. भल्लातकवृक्षः (वै. निघ.)
स्फोटहेतु-(क)-पु., भल्लातकवृक्षः (वै निघ.)
स्फोटा-स्त्री., फणा (शब्दकल्पः)
स्फोटिका-स्त्री., स्फोटकः । हापुत्रिकापक्षी (त्रिका.)
स्फोटिनी-स्त्री., कर्कटिकालता (वै. निघ.)
स्फोता-स्त्री., श्वेतोत्पलशारिवा (भा. पू. १ भ.)
स्मरकूपक-(पिका)-पु., स्त्री., भगः
स्मरगृह (च्छत्र)-न., भगः । योनिः (जटा.)
स्मरण-न., स्मृतिः (हे. च,)
स्मरणापत्यतर्पक-पु., कच्छपः (शब्दकल्पः)
स्मरध्वज-न., योनिः (श. र.) शिश्नः
स्मरमन्दिर-न., भगः (रा. नि. व. १८)
स्मरलेखनी-स्त्री., सारिकापक्षी (श. र.)
स्मरसंज्ञ-पु., कामवृक्षः (रा. नि. व. ४)
स्मरस्तम्भ-पु., लिङ्गम् (त्रिका.)
स्मरस्मरा-वनमल्लिका (रत्ना.)
स्मरस्मर्य-पु., गर्दभः (त्रिका.)
स्मरागार-न., भगः योनिः (त्रिका.)
स्मराङ्कुश-पु., लिङ्गम् (त्रिका.) नखम् ।
स्मरासव-पु., तालसुरा (शब्दकल्प) लाला (त्रिका.)
स्मारणी-स्त्री., ब्राह्मी (वै. निघ.)
स्मृतिहिता-स्त्री., शङ्खपुष्पी लता (वै. निघ.)
स्मेरविष्किर-पु., मयूरः (शब्दकल्पः)
स्यद-पु., वेगः (अम.)
स्यन्दनद्रु-(म) पु., तिनिशद्रुमः (रा. नि. व. ९)
स्यन्दनाह्वय-पु., तिनिशवृक्षः तिन्दुकवृक्षः (वै. निघ.)
स्यन्दनि-पु., तिनिशवृक्षः
स्यन्द-(न्दि) नी-स्त्री., मुखलाला (रा. नि. व. १८) तिनिशवृक्षः (र. सा. सं.) मूत्रवहनाडी (कश्चित्)
स्यन्दिता-स्त्री., तिन्दुकवृक्षः

स्यमीक-पु., वल्मीकम् । तरुभेदः (मे.) (स्त्री)
का-नीलिका (मे.)
स्रम-न., जलम् (उणा.)
स्रंसिनीफल-पु., शिरीषवृक्षः (श. मा.)
स्रध्दू-स्त्री., अपानवायुनिःसरणम् । वातकर्म (शब्दकल्प)
स्रवद्गर्भा-स्त्री., पतितगर्भा गौः (अम.)
स्रवन्तीपतिफेन-पु., समुद्रफेनः (सं. प्लीह)
(चि. महाद्रावके)
स्रावक न., मरिचः (श. च.)
स्रावणिका (णी) स्त्री., ऋद्धिः (शब्दकल्पः)
मुण्डीरी (भा. म. कुष्ठ. चि.)
स्राव्युदर-न., परिस्राव्युदरनाम्ना प्रसिद्धः क्षतोदररोगः
स्रुद्दारु-पु., विकङ्कतवृक्षः (र. मा.)
स्रुघ्नी-स्त्री., खर्जिकाक्षारः (हे. च.)
स्रुता-स्त्री., हिङ्गुपत्री (श. च.)
स्रुवतरु-पु., विकङ्कतवृक्षः (वै. निघ.)
स्रुवा-स्त्री., शल्लकीवृक्षः (मे.) मूर्वा (प. मु.)
स्रोतःपाक-पु., मुखनासिकादिस्रावः (मा. नि.)
स्व-पु., आत्मा न., सत्वम् (त्रिका.)
स्वकुलक्षय-पु., मत्स्यः (हे. च.)
स्वगृह-पु., कलिकारपक्षी (जटा.)
स्वग्रह-पु., बालरोगभेदः (निदा.)
स्वच्छधातु-पु., कर्पूरकमणिः । रौप्यमाक्षिकम्
(वै. निघ.)
स्वच्छपत्र-न., अभ्रकधातुः (हे. च.)
स्वच्छवालुका-न., विमलधातुः (रा. नि. व. १३)
स्वच्छमणि-पु., स्फटिकम् (रा. नि. व. १३)
स्वत्र-पु., अन्धमनुष्यः (शब्दकल्प)
स्वदन-न., भोजनम् (हे. च.) लौहम् (रा. नि. व. १३)
स्वदि-स्त्री., भक्षणम् (रा. नि. व. २०)
स्वधाप्रिय-पु., कृष्णतिलः (श. र.)
स्वधालता-स्त्री., लताभेदः
स्वनोत्साह-पु., खड्गी (श. र.)
स्वपन-न., निद्रा (श. र.)
स्वपिण्डा-स्त्री., पिण्डखर्जूरः (रा. नि. व. ११)
स्वप्नकृत्-न., सुनिषणकशाकः
स्वप्नक्-त्रि., निद्रालुः (अम.)
स्वप्नदोष-पु., स्वप्ने रेतःस्खलनम् (शब्दकल्पः)
स्वप्ननित्य-त्रि., नित्यं निद्रागमनशीलः स्वप्न-
दर्शनशीलः (च. शा. ८ अ.)

स्वयम्भुव-पु., वनमुद्गः (वै. निघ.)
स्वरभङ्गिन्-पु., पक्षिविशेषः (श. र.)
स्वरसादि-त्रि., कषायः (वै. निघ.)
स्वरामक-पु., अक्षोटवृक्षः (वै. निघ.)
स्वरालु-पु., वचा (श. च.)
स्वरु-पु., वृश्चिकभेदः (शब्दकल्पः)
स्वर्गपुष्प-न., लवङ्गम् (वै. निघ.)
स्वर्गलोकेश-पु., शरीरम् (जटा.)
सर्ज-(क्षार)-पु., सर्जिक्षारः (च. द. परिणामशूले.)
सर्जिकापाक्य-पु., सर्जिक्षारः (वै. निघ.)
सर्जी (न्)-पु., सर्जिक्षारः (रा. नि. व. ६)
स्वर्णक-न., धत्तूरफलम् (भैष. शिरो. रो. चि. किंकि-
णीतैले.)
स्वर्णकण्डू-स्त्री., सर्जरसः (वै. निघ.)
स्वर्णकदली-स्त्री., स्वर्णवर्णकदलीफलम्
स्वर्णकमल-न., रक्तपद्मम् (वै. निघ.)
स्वर्णकेतकी स्त्री., रक्तकेतकीवृक्षः (रा. नि. व. १०)
स्वर्णचातक-पु., चाषपक्षी
स्वर्णचूड-पु., पक्षिविशेषः (जटा.)
स्वर्णज-न., स्वर्णमाक्षिकम् (वै. निघ.) वङ्गम् (हे.च.)
स्वर्णजातिका (ती)-स्त्री., पीतजातीपुष्पवृक्षः (वै. निघ.)
स्वर्णदी-स्त्री., स्वर्गगङ्गा(अम)वृश्चिकाली(रा. नि. व. ५)
स्वर्णनिभ-न., स्वर्णगैरिकम् (वै. निघ.)
स्वर्णपत्र-न., पत्तलसुवर्णपत्रम् (रस. चि.)
स्वर्णपत्रिका-स्त्री., सुवर्णमुखी
(भैष. शूल. चि. हरीतकीखण्डे)
स्वर्णपर्पटी-स्त्री., ग्रहण्यधिकारे रसः (भैष.)
स्वर्णपाचक-पु., टङ्कणक्षारः (र. मा.)
स्वर्णबीज-न., धत्तूरबीजम् (वै. निघ.)
स्वर्णभूमि-स्त्री., मधुरवल्कलम् (वै. निघ.)
स्वर्णभूषण-न., आरग्वधवृक्षः, स्वर्णगैरिकम् (वै. निघ.)
स्वर्णमण्डन-न., स्वर्णगैरिकम् (वै. निघ.)
स्वर्णमाक्षिक-न., स्वनामख्यातोपधातुविशेषः (योगर.)
स्वर्णयूथी-स्त्री., पीतयूथिका (श. र.)
स्वर्णरीति-(ती)-पु., स्त्री., राजपित्तलम् (वै. निघ.)
स्वर्णवङ्ग-न., मेहनाशक औषधविशेषः (भै.)
स्वर्णवर्ण-पु., कणगुग्गुलुः (रा. नि. व. १२.) वंशपत्र-
हरितालः । स्वर्णगैरिकम् (वै. निघ.)
स्वर्णवल्कल-पु., श्योणाकवृक्षः (श. च.)
स्वर्णवल्ली-स्त्री., स्वर्णलता (भा.) स्वर्णुलीवृक्षः (वै. निघ.)
स्वर्णजीवन्ती (रा. नि. व. ३)

स्वर्णशेफालिका-स्त्री., पीतशेफालिका (चि. क. क. स्त्रीरो. चि.) आरग्वधवृक्षः (श. मा.)
स्वर्णसिन्दूर-न., रसतिन्दूरविशेषः (भैष.)
स्वर्णहालि-पु., चतुरङ्गुलः (च. सू. ३ अ.)
स्वर्णाङ्ग-पु., महारग्वधवृक्षः (रा. नि. व. ९)
स्वर्णाभ-न., हरितालः (वै. निघ.)
स्वर्णाभा-स्त्री., पीतपुष्पयूथिका (वै. निघ.)
स्वर्णारि-पु., शीषकम् (वै. निघ.) गन्धकः
स्वर्णिका-स्त्री., धन्याकम् (वै. निघ.)
स्वर्भानव-पु., गोमेदरत्नम् (रा. नि. व. १३)
स्वर्यक-पु., तिन्दुकवृक्षः
स्वर्वैद्यौ-पु., अश्विनीकुमारौ (अ म.)
स्वल्प-पु., नखीनामगन्धद्रव्यम् (वै. निघ.)
स्वल्पकन्द-पु., कसेरुः (वै. निघ.)
स्वल्पकाष्ठ-पु., न., श्वेतालुः (वै. निघ.)
स्वल्पकेशर-री (इन्) पु; कोविदारवृक्षः (रा. नि. व. १०)
स्वल्पकेशी-स्त्री., भूतकेशः (श. च.)
स्वल्पघण्टा-स्त्री., आरण्यशणवृक्षः (वै. निघ.)
स्वल्पचटका-पु., क्षुद्रचटकः (वै. निघ.)
स्वल्पजम्बूक-पु., क्षुद्रशृगालः (वै. निघ.)
स्वल्पतरु-पु., वेत्तुककंदः (वै. निघ.)
स्वल्पदलक-पु., गौरशाकः मधूकविशेषः (र. मा.)
स्वल्परूपा-स्त्री., आरण्यशणवृक्षः (वै. निघ.)
स्वल्पवर्तुल-पु., कलावृक्षः (वै. निघ.)
स्वल्पवल्कला-स्त्री., तेजोवती (वै. निघ.)
स्वल्पविटप-पु., वेत्तुककन्दः (वै. निघ.)
स्वल्पशब्दा-स्त्री., ह्रस्वशणवृक्षः (वै. निघ.)
स्वल्पशृगाल-पु., रोहितवमृगः (वै. निघ.)
स्वल्पसङ्घातवीर्य-पु., स्वल्पचटकः (वै. निघ.)
स्ववहा-स्त्री., त्रिवृत (च. सू. ४ अ.)
स्वसंज्ञा-स्त्री., अन्यशास्त्रासामान्यसंज्ञा (सुउ. ६५ अ.)
स्वसा (सृ)-स्त्री., तेजोवती (वै. निघ.)
स्वस्ति-न., पुष्पम् (वै. निघ.)
स्वस्थारिष्ट-पु., अश्वस्य मृत्युचिह्नम् (ज. द. २३ अ.)
स्वाक्ष-पु., शल्लकीनिर्यासः (वै. निघ.)
स्वाद (न)-पु., न., आस्वादः। रसग्रहणम् (ज. द. २३ अ.)
स्वादुकोषातकी-स्त्री., मधुरकोशातकी (वै. निघ.)
स्वादुखण्ड-पु., गुडः, खण्डः (श. र.)
स्वादुगन्धच्छदा-स्त्री., कृष्णतुलसी (वै. निघ.)
स्वादुगन्धा-स्त्री., रक्तशोभाञ्जनवृक्षः (र. मा.) भूमिकूष्माण्डः (जटा.)
स्वादुगन्धि-पु., रक्तशिग्रुः (वै. निघ.)
स्वादुतिक्त-न., पीलुफलम् (वै. निघ.)
स्वादुतिक्तफल-पु., ऐरावतीवृक्षः (वै. निघ.)
स्वादुपटोलिका-स्त्री., मधुरपटोललता (वै. निघ.)
स्वादुपर्णी-स्त्री., दुग्धिका (रा. नि. व. ५)
स्वादुपात्रफला-स्त्री., काकमाचिका (वै. निघ.)
स्वादुपारे (ले) वत-पु., द्वीपान्तरखर्जूरीवृक्षः (वै. निघ.)
स्वादुपुष्प (ष्पी)-पु., स्त्री., कृष्णकटभीवृक्षः (रा. नि. व. ९)
स्वादुपुष्पिका-स्त्री., दुग्धिका (वै. निघ.)
स्वादुफल-न., बदरीफलम् (श. र.) पु., धन्वनवृक्षः (रा. नि. व. ९)
स्वादुबीज-पु., अश्वत्थवृक्षः (वै. निघ.)
स्वादुमाषा-स्त्री., माषपर्णी (वै. निघ.)
स्वादुल-पु., क्षीरमूर्वा (वै. निघ.)
स्वादुलङ्गी-स्त्री., मधुकर्कटिका। स्वादुमातुलुङ्गः (वै. निघ.)
स्वादुवीर्य-पु., पियालवृक्षः (वै. निघ.)
स्वादुशुण्ठी-स्त्री., श्वेतविण्ही (वै. निघ.)
स्वादुशुद्धी-(स्वच्छ) न., पार्वतलवणम् (शब्दकल्प.)
स्वादुशिञ्जितिकाफल-न., कावेलदेशीयफलम् (वै. निघ.)
स्वाद्वगुरु-पु., मधुररसागुरुवृक्षभेदः (राज.)
स्वाद्वन्न-न., खादुरसान्नम् (भा.)
स्वाद्वी-स्त्री., द्राक्षा कपिलद्राक्षा (अम.) चिर्भटिका (वै. निघ.) क्षुद्रखर्जूरीवृक्षः (भा.) गुडत्वग्
स्वाध्याय-पु., वेदाभ्यासः (वै. निघ.)
स्वान्त-न., मनः (रा. नि. व. १८)
स्वापतेय-न., द्रव्यम् (वै. निघ.)
स्वापाश्रय-न., शयनशय्या (च. सू. १५ अ.)
स्वामी (इन्) पु., पारदः (वै. निघ.)
स्वाम्युपकारक-पु., अश्वः (शब्दकल्पः)
स्वायम्भुवगुग्गुलु-पु., वातरक्ताधिकारोक्तपक्वगुग्गुलुः (रस. र.)
स्वायम्भुवी-स्त्री., ब्राह्मीशाकः (वै. निघ.)

स्वारामगुच्छक-न., ग्रन्थिपर्णम्
स्वेदक-पु., अयस्कान्तभेदः (रा. नि. व. ३)
स्वेदचूषक-पु., शीतलवायुः (शब्दकल्पः)
स्वेदजल-न., घर्मम् । बाष्पजनितफलम्
स्वेदजशाक-न., शाकभेदः (राज.)
स्वेदनयन्त्र-न., पारदस्वेदनयन्त्रम् (भा.)
स्वेदनाश-पु., वायुः (वै. निघ.)
स्वेदमाता (तृ)-स्त्री., शरीरस्थरसधातुः (रा. नि. व. २८)
स्वेदस्राव-पु., पित्तजरोगः (निदा.)
स्वेदाप्रवर्त्तन-न., घर्मातिशयः । घर्मनिग्रहः (मा. नि.)
स्वैरणी-स्त्री., वल्गुलापक्षी
स्वैरिता-स्त्री., स्वच्छन्दता (अम.)
स्वोरस-पु., स्वरसः । शिलापिष्टकल्कः (श. च.)

ह

ह-पु., जलम्, रक्तम् (एकाक्ष. को.)
हंसक-पु., राजहंसः (श. च.)
हंसकूट-पु., ककुदः (शब्दकल्पः)
हंसदाहन-न., अगुरुः (श. च.)
हंसपद-न., कर्षः (प. प्र. १ ख.)
हंसपाकाग्नि-पु., हंसपाकयन्त्रेण पाकयोग्याग्निः (रस. चि. ३ अ.)
हंसपाद (क)-न., हिङ्गुलः (हला.) सिन्दूरः (वै. निघ.)
हंसयोषिता-स्त्री., राजहंसी (वै. निघ.)
हंसलोमश-न., कासीसम् (रा. नि. व. १३)
हंसवती-स्त्री., हंसपदी (जटा.)
हंसवीज-न., हंसडिम्बम् (रा. नि. व. १९)
हँसाभिमुख्य-रौप्यधातुः (रा. नि. व. १३)
हंसाह्वया-स्त्री., हंसपादी (सु. चि. ८ अ.) (च. द. ग्रन्थि. चि. अमृताद्यतैले)
हंसिका (सी)-स्त्री., हंसपत्री (श. र.) मुद्गपर्णी (वै. निघ.) वराटकभेदः (रा. नि. व. २३)
हञ्जि-स्त्री., क्षुधा (जटा.)
हञ्जिका-स्त्री., भार्गी
हञ्जी-स्त्री., जिङ्गिनी (वै. निघ.)
हटतृण-न., शैवालः (सू. सु. ४५ अ.)
हट (ठ) पर्णी (र्णि) स्त्री., न., शैवालः (श. र.)
हट्टविलासिनी-स्त्री., नखीनाम गन्धद्रव्यम् (अम.) हरिद्रा (भा.)
हठालु-स्त्री., कुम्भिका (श. च.)
हठी-स्त्री., वारिपर्णी (धरणिः)
हड्डु-न., अस्थि (श. च.)
हड्डुज-न., मज्जा (श. च.)
हण्डी-स्त्री, मृत्पात्रविशेषः (शब्दकल्पः)
हण्डिकासुत-पु., क्षुद्रहण्डिका (त्रिका.)
हत्नु-पु., व्याधिः, शास्त्रम् (उणा.)
हदन-न., विष्ठात्यागः (व्याक.)
हनील-पु., केतकी (र. मा.)
हन्तु-पु., मृत्युः । वृषः
हन्न-त्रि., कृतपुरीषोत्सर्गः (अम.)
हमल-पु., कृकलासः (वै. नि. घ.)
हयकातरा (रिका)-स्त्री., अश्वकातरिकावृक्षः (रा. नि. व. ५)
हयघ्नी-स्त्री., तेजोवती (वै. निघ.)
हयपुच्छी-स्त्री., माषपर्णी (अम.)
हयप्रिय-पु., यवः (हे. च.) श्वेतकरवीरः (रा. नि. व.)
हयभङ्गया-स्त्री., पिण्डीखर्जूरिका (वै. नि.घ.)
हयमारण-पु., अश्वत्थवृक्षः (श. च.)
हयवरप्रिय-पु., कदम्बवृक्षः (वै निघ.)
हयवाहनशङ्कर-पु., रक्तकांचनवृक्षः (श. च.)
हयवैरि-पु., महिषः (वै. निघ.)
हयशाला-स्त्री., अश्वशाला
हया-स्त्री., अश्वगन्धा (रा. नि. व ४) घोटकी (जटा) खर्जूरिका
हयागार-पु., अश्वशाला (नकुल ७ अ.)
हयानन्द-पु., मुद्गः (रा. नि. व. १६)
हयायुर्वेद-पु., अश्ववैद्यकशास्त्रम्
हयाशना-स्त्री., शल्लकीवृक्षः (श. च.)
हयाह्वता-स्त्री., अश्वगन्धा (वै. निघ.)
हयाह्वा-स्त्री., अश्वगन्धा (वै. निघ.)
हय्यङ्गवीन-न., सद्योजातघृतम् (वै. निघ.)
हरज-पु., पारदः (भैष. ध्व. भ.)
हरहूरा-स्त्री., हारहूरा । द्राक्षा (शब्दकल्पः)
हरिक्रान्त-पु., घोटकः (त्रिका.)
हरिग्रह-पु., अश्वस्य ग्रहविशेषः (ज. द. ५७)
हरिजीवक-पु., चणकवृक्षः (वै. निघ.)
हरिणाक्षी-स्त्री., हट्टविलासिनीनामगन्धद्रव्यम् (श. च.)
हरितक-न., शाकः । आर्द्रकादिः (अम.)
हरितच्छद-पु., श्वेतशिग्रुः (मद. व. ७)
हरितयव पु. निःशूकयवः (वै. निघ.)
हरितक्षेत्रा-स्त्री., गङ्गापत्री (रा. नि. व. १०)

हरिताक्ष-पु., अश्वस्य दुष्टग्रहभेदः (ज. द. ५७)
हरितालिका (ली) स्त्री., दूर्वा (त्रिका.) खङ्गलता (विश्व.)
हरित्कन्द-पु., कन्दविशेषः (वै. निघ.)
हरिद्गर्भ-पु., हरिद्वर्णकुशः । शरपत्रकुशः (रा. नि. व. ८)
हरिदश्व-पु., सूर्यः । अर्कवृक्षः (अम.)
हरिद्दर्भ-पु., कुशभेदः (भा.)
हरिद्रव-पु., नागकेशरचूर्णम् (त्रिका.)
हरिद्राङ्ग-पु., हरितालपक्षी (श. च.)
हरिद्रापञ्चक-न., हरिद्राम्रहरिद्रादारुहरिद्राशटी-विकङ्कतानि (वै. निघ.)
हरिद्रापत्रकण्टका-स्त्री., दार्वी (वै. निघ.)
हरिनामा (न्)-पु., मुद्गः (त्रिका.)
हरिभद्र-न., एलवालुकम् (प. मु.)
हरिभद्रक (भव्यक)-न., कुष्ठौषधम् (वै. निघ.)
हरिमन्थ-पु., अग्निमन्थः (प. मु.) चणकः (रा. नि. व. १६)
हरिमन्थक (ज)-पु., चणकः (अ. टी. भ.) कृष्णमुद्गः (हे. च.)
हरिमुद्ग-पु., शारदमुद्गविशेषः
हरिमूला-स्त्री., शालपर्णी (वै. निघ.)
हरियाल-पु., हरितालपक्षी
हरिलोचन-पु., कर्कटः (त्रिका.) पेचकः (शब्दकल्पः)
हरिवासुक-न., एलवालुकम्
हरिवीज-न., हरितालः (जटा.)
हरिहर-पु., रसाधिकाररसमणिकारः
हरीतकीतैल-न., हरीतकीफलोद्भवतैलम् (रा. नि. व. १५)
हरीतकीवीज-न., हरीतक्यस्थि (वै. निघ.)
हरीन्द्रवैशेषिक-पु., वैद्यकग्रन्थभेदः (स्त्री.) (का) रेणुका (च. सू. २ अ.) शिरोविरोचनम् । निर्गुण्डी कम्पिल्लकः (वै. निघ. हिक्का चि. नस्ये.)
हरीषा (सा)-स्त्री., मांसव्यञ्जनभेदः
हर्म्म (न्)-न., जृम्भा (श. र.)
हर्म्मुट-पु., कच्छपः (शब्दकल्पः)
हर्य्य-पु., बिभीतकवृक्षः (वै. निघ.)
हर्षकीर्ति-पु., वैद्यकसारग्रन्थकारः
हर्ष (र्षि) णी-स्त्री., कपिकच्छुः (वै. निघ.) भङ्गा (शब्दकल्पः)
हर्षणीक्रिया-स्त्री., सुरापानजन्यहर्षोत्पादकक्रिया (वा. चि. ७ अ.)
हर्षयित्नु-पु., पुत्रः (न) स्वर्णम् (मे.) (त्रि) हर्षजनकः
हर्षसम्भव-न., शुक्रम् (वै. निघ.)
हर्षुल-पु., मृगः
हलच्छद-पु. कृष्णशिग्रुः (वै. निघ.)
हलराक्ष-न., आहुल्यक्षुपः (रा. नि. व. ४)
हललोमश-न., कासीसम् (रा. नि. व. १३)
हला-स्त्री., मद्यम् जलम्, (अनेकार्थकं ष) लाङ्गलकीवृक्षः (भैष. कुष्ठ. चि.)
हलिनक-पु., केतकवृक्षः (राज. ६ प.)
हलनीप्रिय-पु., कदम्बवृक्षः (प. मु.)
हलिप्रिय-पु., कदम्बवृक्षः (अम.)
हलिप्रिया-स्त्री., मदिरा (रा. नि. व. १४)
हलीन-पु., शाकवृक्षः (श.च.) केतकवृक्षः (प. मु.)
हलीमल-पु., पाण्डुरोगभेदः (मा. नि.)
हल्लक-न., रक्तकह्वारम्
हवि-पु., अग्निमन्थवृक्षः (र. मा.)
हविमण्डला-स्त्री. रक्तलज्जालुका (वै. निघ.)
हविर्गन्धा-स्त्री., शमीवृक्षः (रा. नि. व. ८)
हविर्मन्थ-पु., गणिकारिका (र. मा.)
हवुषा-स्त्री., स्वनामख्यातफलम् (रा. नि. व. ४)
हसन्ती-स्त्री., मल्लिका (मे.)
हस्तउयोडि (डी)-स्त्री., स्वनामख्यातमहाकन्दशाकः (रा. नि. व. ७)
हस्तपर्ण-पु., रक्तैरण्डम् (वै. निघ.)
हस्तपुच्छ-न., करपुच्छम् (त्रिका.)
हस्तमान-न., आमध्याङ्गुलिकूर्परं विस्तृतं पाणिः (रा. नि. व. १८)
हस्तसन्धि-स्त्री., मणिबन्धः
हस्ताङ्गुलि-पु., कराङ्गुली (भूरि प्र.)
हस्ताञ्जन-पु., पखाण्डवृक्षः (वै. निघ.)
हस्तामलक-न., करस्थामलकीफलम् (शब्दकल्पः)
हस्तिकर्णक-पु., किंशुकवृक्षः (श. र.)
हस्तिकर्णदल-पु., हस्तिकर्णपलाशः (प. मु.)
हस्तिकृष्णा-स्त्री., गजपिप्पली (वै. निघ.)
हस्तिकोल-पु., राजबदरः (वै. निघ.)
हस्तिकोलि (ली)-पु., स्त्री., बदरीभेदः (प. मु.)
हस्तिघोषातकी-स्त्री., हस्तिघोषा (र. मा.)
हस्तिनीदुग्ध-न., हस्तिनीजातक्षीरम् (रा. नि. व. १५.)

हस्तिनीनवनीत-न., हस्तिनीदुग्धभवनवनीतम् (रा. नि. व. १५)
हस्तिपर्ण-पु., महाकोषातकी (भा. पू. १ भ. शा. व.)
हस्तिपर्णिका-स्त्री., राजकोषातकी (रा. नि. व. ७)
हस्तिपात्-(द्) पु., पिण्डालुः (प. मु.)
हस्तिवुषा-स्त्री., कदलीवृक्षः (भा.)
हस्तिरुचि-पु., वैद्यवल्लभनामग्रन्थकारः
हस्तिलोध्रक-पु., लोध्रवृक्षः (रा. नि. व. ६)
हस्तिवारुणी-स्त्री., महाकरञ्जः (वै. निघ.)
हस्तिशुण्डा-स्त्री., स्वनामख्यातक्षुद्रक्षुपः (वै. निघ.)
हस्त्यायुर्वेद-पु., पालकीयगजचिकित्साशास्त्रम्
हस्त्यालुक-न., दीर्घालुकभेदः
हहल-न., हलाहलविषम् (श. च.)
हाङ्गर-पु., नक्रः । जलजन्तुविशेषः (श. च.)
हाटकमाक्षिक-न., स्वर्णमाक्षिकम् (वै. निघ.)
हानव्य-पु., हनुभवदन्तः (वै. निघ.)
हानु (लु) पु., दन्तः (त्रिका.)
हापुत्रिका-(त्री) स्त्री., स्वनामख्यातपक्षी (त्रिका.)
हाफिका-स्त्री., जृम्भा (हारा.)
हाफु-पु., अहिफेनः (प. मु.)
हारा-स्त्री., गाम्भारीवृक्षः
हारिकण्ठ-पु., कोकिलः (मे)
हारित (क)-पु., हारीतपक्षी (जटा.)
हारितक-न., शाकः (श. र.)
हारिद्रसंनिपात-पु., संनिपातज्वरभेदः (वै. निघ.)
हारिद्रु-पु., हरिद्रावृक्षः (वै. निघ.)
हारी (इन्) पु., कदम्बवृक्षः कोकिलः
(री)-स्त्री., मुक्ता (श. र.)
हार्यवृक्ष-पु., बिभीतकवृक्षः (रा. नि. व. ११)
हालह(हा)ल-न., विषभेदः (श. र.)
हालाहालगणा (हली) स्त्री., मद्यम् (वै. निघ.)
हालाहलधर-पु., सर्पः (श. र.)
हालाहला- स्त्री., क्षुद्रमूषिका (जटा.)
हालिनी-स्त्री., अञ्जनिका (हे, च.)
हाली-स्त्री., तालादिमद्यम् (रा.नि व १४) मद्यम् (अम.)
हालु-पु., दन्तः
हाह (हा) ल-न., हलाहलविषम् (श. च.)
हिंसारु-(सीर)-पु., व्याघ्रः (त्रिका.)
हिंसालुक-पु., स्वादुकुक्कुरः (हारा.)
हिंस्राह्वा स्त्री., जटामांसी (रा. नि. व. १२)
हिङ्गुफला-स्त्री., हिङ्गुपत्री (वै. निघ.)

हिङ्गुलिका-स्त्री., कण्टकारी (श. च.)
हिङ्गुली (इन्)-पु., हिङ्गुलः (स्त्री.,) वार्ताकी (प.मु.) बृहती (भा.)
हिङ्गुलु-पु., न., हिङ्गुलः (अम.)
हिङ्गुलोत्थरस-पु., हिङ्गुलनिष्काशितपारदः (र. सा.सं.)
हिज्ज-(ल)-पु., स्वनामख्यातवृक्षः (श. च.)
हिण्डि(ण्डी)र-पु., समुद्रफेनः (प. मु.) वार्ताकी (मे.) दाडिमवृक्षः (वै. निघ.) रुचकः (उणा.)
हितक-पु., शिशुः (रा. नि. व. १९)
हितलोहित-पु , तुबरयावनालः (रा. नि. व. १६)
हितावली-स्त्री., स्वनामख्यातवृक्षः (रा. नि. व. ९)
हितावल्ली-स्त्री., हितावलीवृक्षः (वै. निघ.)
हिताहित-न., पथ्यापथ्यम् (च. सू. १ अ.)
हिन्दोलन-न., भेषजेन गर्भपातनम् (सु. नि. ८ अ.)
हिमऋतु-पु., हेमन्तकालः
हिमक-पु., विकङ्कतवृक्षः (रा. नि. व. ४)
हिमकूट-पु., शिशिर ऋतुः (रा. नि. व. २१)
हिमज्झटि-पु., कुज्झटिका
हिमतैल-न., कर्पूरतैलम् (रा. नि. व. १५)
हिमपुष्प-पु., आरग्वधवृक्षः
हिमपूति त्रि., उग्रदुर्गन्धः (भा. म. ४ भ.)
हिमयुत-पु., भीमसेनीकर्पूरः (वै. निघ.)
हिमविधि-पु., द्रव्यपलं षट्पलजले क्षिप्तं विशोषितं हिम इत्युच्यते । स एव शीतकषायः । पाने च तस्य मानं पलद्वयम् (भा.)
हिमसंहति-स्त्री., हिमराशिः (अम.)
हिमहासक-पु., हिन्तालवृक्षः (श. र.)
हिमांश्वभिख्य-न., रौप्यम् (हे. च.)
हिमाद्रिजा-स्त्री., क्षीरिणी (रा. नि. व. ५)
हिमाब्द-न., उत्पलम् (रा. नि. व. १०)
हिमाराति-पु., चित्रकक्षुपः । अर्कवृक्षः (अम.)
हिमाली-स्त्री., यावनालीशर्करा (रा. नि. व. १४)
हिमावती (नी)-स्त्री., स्वनामख्यातौषधम् स्वर्णक्षीरी (वै. निघ.)
हिमाह्व (य)-पु., कर्पूरः (त्रिका.)
हिमिका-स्त्री., वर्षोपलम् । हिमसङ्घातः शिशिरबिन्दुः (शब्दकल्पः)
हिमोत्तरा-स्त्री., कपिलद्राक्षा (रा. नि. व. ११)
हिमोत्था-स्त्री., यावनालीशर्करा. (रा. नि. व. १४)
हिमोदक-न., हिमजलम् (वै. निघ.)

हिमोपम-पु , प्रवालः (वै. निघ.)
हिरणम्-न., स्वर्णम्। रजतम् । धुत्तूरः । वराटकः (त्रिका.)
हिरण्यकोष-पु., स्वर्णम्, रौप्यम् (वै. निघ.)
हिरण्यरेता-(स्) चित्रकवृक्षः (अम.)
हिरण्यक्षीरा-स्त्री., ब्रह्मसुवर्चलानामौषधम् (सु. चि. ३० अ.)
हिरण्यक्षीरि-स्त्री., स्वर्णक्षीरी
हिलमुची-स्त्री., हिलमोचिका (प. मु.)
हिलमोचि-स्त्री., हिलमोचिका (प. मु.)
हिल्ल-पु., शरारिनामपक्षिविशेषः
हीनाङ्ग-पु., विकलाङ्गः (जटा.)
हीनाङ्गी-स्त्री., क्षुद्रपिपीलिका (हे. च.)
हीन्ताल-पु., हिन्तालवृक्षः (अ. टी.)
हील-न., शुक्रम्
हीलक-न., गौडीमद्यम्
हुड-(डु)-पु., भेषः (त्रिका.) स्त्री., भेषी
हुडिका-स्त्री., अङ्कोलवृक्षः (वै. निघ.)
हुडुक्क-पु., दात्यूहपक्षी (मे.)
हुडुम्ब-पु., भ्रष्टचिपिटः (श. मा.)
हुण्ड-पु., व्याघ्रः, ग्राम्यशूकरः (शब्दकल्पः)
हुताशनरस-पु., अग्निमान्द्ये रसः (भा.)
हूरव-पु., शृगालः (त्रिका.)
हूलु-पु., भेषः
हृच्छूल-न.,वक्षः शूलम् (निदा.)
हृतगन्धा-स्त्री., कुस्तुम्बरी (वै. निघ.)
हृत्पद्म-पु., हृदयम्
हृत्पाषाण-पु., मनःशिला (भैष. कुष्ठ. चि.) (षडबिन्दुतैले)
हृदयदीपक-पु., वोपदेवकृतवैद्यकग्रन्थः
हृदयस्थान-न., वक्षः (हे. च.)
हृदयात्मा-(न्)-पु., कङ्कपक्षी (श. च.)
हृदयादक-पु., कफजकृमिः (निदा.)
हृदयोपशरण-न., हृदयोपद्रवणम् (च. सू. १५ अ.)
हृद्ग्रन्थि (न्थ)-पु., विद्रधिरोगः (रा. नि. व. २०)
हृद्यगन्धि-न., कणजीरकम् (र. मा.)
हृद्वर्ग-पु., हृदयहिते महाकषायवर्गः (च. सू. ४ अ.)
हृद्रुक्-पु., हृदयरोगः (रा. नि. व. २०)
हृद्रोगवैरी (इन्) पु., अर्जुनवृक्षः (श. च.)
हृद्रण्टक-पु., आमाशयः, जठरम् (श. च.)
हृद्रण-पु., विद्रधिः (रा. नि. व. २०)
हृल्लक्ष्मी-स्त्री., क्षुद्रतुलसी (वै. निघ.)

हृल्लास-पु., उपस्थितवमनत्ववत् उत्क्लेशः (भा.)
हृषीक-न., कर्मेन्द्रियम् (अम.)
हेक्का-स्त्री., हिक्का (हे. च.)
हेतुविपर्यस्तार्थकारी (त्रि.) हेतुविपरीतार्थकारि (मा. नि.)
हेतुव्याधिविपर्यस्तार्थकारी (इन्) (त्रि.) हेतुविपरीतार्थकारि व्याधिविपरीतार्थकारि हेतुव्याध्युभयविपरीतार्थकारि च औषधादिः (मा. नि.)
हेमकन्दल- पु. प्रवालः (हे. च.)
हेमकान्ति-स्त्री., दारुहरिद्रा (वै. निघ.)
हेमकृष्टि-स्त्री., स्वर्णकर्षणयोगः (रस. चि. ३ अ.)
हेमगन्धिनी-स्त्री., रेणुकनामगन्धद्रव्यम् (र. मा.)
हेमजीवन्ती-स्त्री., पीतजीवन्ती (रा. नि. व. ३)
हेमतार (क)-न., तुत्थम् (हे. च.)
हेमदुग्धी (इन्)-पु., यज्ञडुम्बुरवृक्षः (श. र.)
हेमधान्यक-पु., तिलवृक्षः (प. मु.)
हेमनिधि-पु., पारदः (वै. निघ.)
हेमन्तनाथ-पु., कपित्थवृक्षः (श. च.)
हेमपत्र-न., धुत्तूरफलम् (वै. निघ.) नागकेसरपुष्पम् (च. द. दाह. चि.) पद्मकाष्ठम् (वै. निघ.) स्वर्णपत्रम्
हेमपत्रिका (त्री)-स्त्री., स्वर्णपत्रिका
हेमपद्मक-न., पद्मकाष्ठम् (वै. निघ.)
हेमपुष्पिका-स्त्री., स्वर्णयूथिका (वै. निघ.)
हेमबल-न., मौक्तिकम् (रा. नि. व. १३)
हेमबीज-न., धुस्तूरबीजम् (वै. निध.)
हेममांसी-स्त्री., जटामांसी
हेममित्र-न., स्फटिकारिका (प. मु.)
हेमरागिणी-स्त्री., हरिद्रा (त्रिका.)
हेमलता-स्त्री., मधुनिष्पावः (प. मु.) कृकलासः (मे.)
हेमवल्ली-स्त्री., स्वर्णजीवन्ती (रा. नि. व. ३)
हेमशिखा-स्त्री., स्वर्णक्षीरी (प. मु.)
हेमशोधिनी-स्त्री., स्फटिकारिका (वै. निघ.)
हेमसार-न., तुत्थकम् (र. सा. सं. ज्वरकुञ्जरपारीन्द्ररसे) स्वर्णमाक्षिकम् (प्र. कस्तूरीभैरवरसे)
हेमाख्य-न., स्वर्णगैरिकम् (वै. निघ.)
हेमाङ्गा (ङ्गी)-स्त्री., स्वर्णक्षीरिणी (वै. निघ.)
हेमाद्रिजरणा-स्त्री., स्वर्णक्षीरिणी (र. मा.)
हेमाद्रिजा-स्त्री., स्वर्णक्षीरी (प. मु.)
हेमाभ-न., यशदः, नागकेसरम् (वै. निघ.)

हेर-न., हरिद्रा
हेरु-स्त्री., महाशतावरी
हेरम्ब-पु., महिषः (मे.)
हेलञ्ची-स्त्री., हिलमोचिका (श. च.)
हेषी (इन्)-पु., अश्वः (त्रिका.)
हेसनीया-स्त्री., नागवल्लीभेदः (रा. नि. व. १२)
हैमकान्ता-स्त्री., दार्वी (वै. निघ.)
हैमन-न., पु., शीतर्तुः (श. र.)
हैमन-पु., हेमन्तकालजषष्टिकधान्यम् (वै. निघ.)
हैमन्तबीज-न., रक्ताम्रादिबीजम् (वै. निघ.)
हैमाम्रबीज-न., रक्ताम्रादिबीजम् (वै. निघ.)
हैमन्तिक-पु., न., हेमन्तकालिकशालिधान्यम्
हैमपुष्पी-स्त्री., मुषली (वै. निघ.)
हैमल-पु., न., हेमन्तकालः (केचित्)
हैमा-स्त्री., स्वर्णकेतकी (रा. नि. व. १०) पीतयूथिका क्षीरिणी (रा. नि. व. ५) वटपत्री
होगल-पु., होगला इति ख्यातं तृणम् (चसू. ३ अ.)
होतानिका-स्त्री., वरकधान्यम्
होत्र-न., हविः (त्रिका.)
होमी-पु., घृतम् (मे.) जलम् (श. र.)
होलक-पु., तृणाग्निदग्धार्धपक्वशमीधान्यम् (भा.)
हैयङ्ग-न., घृतम् (रा. नि. व. १५)
हैयङ्गधान्यम्-न., तिलः (रा नि व १६)
ह्योष्टाम्बु-न., तण्डुलोदकम् (प. प्र. ३ ख.)
ह्रदग्रह-पु., कुम्भीरः (त्रिका)
ह्रदा-स्त्री , शल्लकीवृक्षः
ह्रसल्लक- प्रियालवृक्षः
ह्रस्वक-पु., पूगवृक्षः (र. मा.)
ह्रस्वकन्द-पु., तैलताहरिति ख्यातः कन्दः (प. मु.)
ह्रस्वकर्कन्धु-स्त्री., वनबदरः (वै निघ.)
ह्रस्वकुश-पु., श्वेतकुशः (रा. नि. व. ८)
ह्रस्वगर्भ-पु., कुशः (र. मा.)
ह्रस्वजम्बु-म्बू पु., क्षुद्रजम्बूवृक्षः (र. मा.)
ह्रस्वदृष्टि- पु., तन्नामकदृष्टिरोगः (मा. नि.)
ह्रस्वत्रिफला-स्त्री., गाम्भारीफलखर्जूरपरूषकफलानि (प. प्र. ३ ख.)
ह्रस्वतण्डुल-पु., क्षुद्रतण्डुलः, राजान्नम् (रा. नि. व. १६)
ह्रस्वदर्भ-पु., श्वेतकुशः (रा. नि व. ८)
ह्रस्वदा-स्त्री.,शल्लकीवृक्षः (रा. नि व. ९)
ह्रस्वपञ्चमूल-न., बृहती-कण्टकारी शालिपर्णी पृश्निपर्णी गोक्षुरश्चेति पञ्च (वा. सू. १५ अ.)
ह्रस्वपत्रक-पु., गिरिजमधूकवृक्षः (जटा.)
ह्रस्वपत्रिका-स्त्री., अश्वत्थिका (रा. नि. व. ११)
ह्रस्वपर्वा (न्)-पु., कृष्णेक्षुः (वै. निघ.)
ह्रस्वप्लक्ष-पु., क्षुद्रप्लक्षवृक्षः (रा. नि. व ११)
ह्रस्वबदर-न., पु., क्षुद्रबदरः (मद. व. ६)
ह्रस्ववृक्ष-पु., कुशः (प. मु.)
ह्रस्वशाखाशिफ-पु., क्षुपः (अम.)
ह्रस्वाग्नि-पु., अर्कवृक्षः चित्रकवृक्षभेदः (श. च.)
ह्रस्वोत्पल-न., कह्लारपद्मम् (वै. निघ.)
ह्रादिनी-स्त्री.,शल्लकीवृक्षः (श. र.)
ह्रीबेर-न., बालकः (श. र.)
ह्रीकु-पु., जतुकः त्रपुधातुः (उणा.)
ह्रीविल (क)-न ह्रीवेरम् (अ. टी. भ.)
ह्रीवेरादि-पु., ज्वरातिसारे कषायः (च. द.)
ह्लादिनी-स्त्री., शल्लकीवृक्षः (वै. निघ.)
ह्लीकु-पु.,जतुः त्रपुषः (अ. टी.)

आयुर्वेदीय शब्दकोशः पूरणिका

शीर्षक–शुद्धिपत्र

पृष्ठ	स्तंभ	अशुद्धम्	शुद्धम्
२७	२	अवल्गुजा	अवल्गुजबीज
२८	१	अवल्गुजबीज	अवल्गुजा
२९	२	अश्वत्थफलका	अश्वत्थक
३०	१	अश्वत्थभित्	अत्थत्थफलका
४३	२	इंदीवर	इन्दंवर
४८	शीर्षक	आयुर्वेदीय शब्दकोशः	आयुर्वेदीयशब्दकोशः-पूरणिका
७८	१	सङ्कर्षा	सङ्कर्षा
१०५	२	गण्डूषदी	गण्डूपदी
१०९	२	गान्धिक	गान्धार
११०	१	गाम्भारिका	गान्धिक
१३७	२	तपस्विप	तपस्विपत्र
१८३	२	षाटी	पाटी
१८५	२	पारसाकवचा	पारसीकवचा
१८८	२	पिपल्याद्यलेह	पिप्पल्याद्यलेह

पुरवणी कोशः

– शुद्धिपत्र –

पृष्ठ	स्तंभ	ओळ	अशुद्धम्	शुद्धम्
१	१ व २	सूचना	**अकलकर** शब्दांतर्गतं (मद) गुवाकशिरः– पर्णेनबिना– (रा. नि. व. ११) वर्णनमेतत् अग्रे **अकोट** शब्दांतर्गतरुप 'गुवाकवृक्ष, "मधुर गुरु च" वचनादनंतर पठनीयम् ।	
१	२	८	सा.	वा.
१	२	३३	चौल्यः	चील्यः
२	१	२	वल्लिगुल	वल्लीगुल्ल
२	१	११	वानभण्टी	वनभण्टी
४	१	२६	वरावटक	वराट
५	१	५	×	+इन्द्रगोपकीटः
५	१	९	पक्त्र	वक्त्र
५	१	१४	हः	हुः
५	१	१७	वर्धन	विवर्धन
५	२	३७	ङ्क	(ङ्की)
५	२	३८	(ता)	(वा)
६	२	३५	भृगराजः	भृङ्गराजः
७	१	११	×	+करञ्जविशेषः
७	२	२६	खालित्यम्ः	खालित्यम्
८	२	८	वुद्धः	वृन्दः
९	१	३५	रक्तपित्ता	रक्तपित्त
१०	२	३६	अटरूष	अटरूषक
११	१	२१	तश्च	तच्च
१३	१	१८	शुक्ति–	शुक्ति
१४	२	२	पाण्ड	पाण्डु
१५	१	२	कोष्ठेः	कोष्ठः
१५	१	३६	दिवससिका	दिवसिका
१६	१	१५	रूक्षश्च	रूक्षश्च
१६	१	२४	शरीरावयव	शरीरावयवः
१६	१	२८	वातव्याधि	वातव्याधिः
१८	२	३	×	+ वातव्याधिः
२१	१	२८	घेणे	आंबट माठ
२२	१	१०	वुत्	वृन्द
२४	२	२५	द्रव्यस	द्रव्यसं
२५	२	२८	व्या	व्या)
२५	२	२९	षडशीति) गुग्गुलुः	षडशीति गुग्गुलुः
२७	२	शीर्षक	अवल्गुजा	अवल्गुजबीज
३१	१	३५	शरावती	शतावरी
३१	२	१९	तेरणीः	तेरण्यः

पृष्ठ	स्तंभ	ओळ	अशुद्धम्	शुद्धम्
३१	२	३८	सांक्लन्नम्	संक्लिन्नम्
३१	१	१२	(चटा)	(जटा)
३२	२	३७	अस्थिङ्खला	अस्थिशृङ्खला
३३	१	२१	विकसतम्	विकसितम्
३४	२	१७	रुक्षा	रूक्षा
३८	१	३३	सान्ता	सन्ता
३९	१	३	माम्र	माम्रं
४१	१	१२	स	स—
४१	१	१६	स्वरस	सरस
४१	२	१३	लाके	लोके
४४	१	३४	लाङ्गलि	लाङ्गली
४४	२	२७	बुद्धी	बुद्धि
४५	१	३२	(नेन)	×
४८	१	१	लघुतालीशपत्रम्	×
४८	१	२	×	+ लघुतालीशपत्रम्
४८	२	२१	वालवी	वाळवी
४८	२	३४	(र) म् न	×
५१	२	२५	धातः	धौतम
५७	२	१०	ग्रहणीची	ग्रहणी चि
६०	१	११	शलकी	शल्लकी
६०	१	४१	बाबल	वावल
६१	२	३८	मापकाः	माषकाः
६३	१	२	आरण्व	आरण्य
६३	२	२	ग्रहण्या	ग्रहण्य
६५	१	१	स्वादुरुच्यश्च	स्वादू रुच्यश्च
६५	२	९	करजलं	करकजलम्
६८	२	३	तत्स्य	तस्य
६९	१	१३	भेदम्	भेदः
७०	१	२०	पिकीम्	पिकी
७३	१	३९	स्थात्	स्यात्
७३	२	३६	रोपित म्(पदार्थम्)	रोपितः पदार्थः
७६	२	५	प्रधाने	प्रधानम्
७७	१	१	तर्कः	तर्कुः + सूत्रनिर्माण यन्त्रम्
७७	२	२१	कङ्गुष्ठः	कङ्कुष्ठः
७७	२	३६	क्षीरकाकोलीः	क्षीरकाकोल्यौ
७८	२	१३	असिद्धा	प्रसिद्धा
७९	१	३४	हिङ्गिगुत्व	हिङ्गिंगुदीत्व
८०	१	२१	किञ्चिलिक-पु	किञ्चिलिक
		२२	किञ्चिलिक-	किञ्चुलिक —पु. गण्डूपदः (त्रिका)
		२३	किचलुक-त्रिका,	किञ्चुलुक

पान	स्तंभ	ओळ	अशुध्द	शुध्द
८०	२	९	प्रसिद्धे	प्रसिद्धं
८२	१	१५	सारघ्नश्च	सारघ्नश्च
८३	१	३१	(तस्य)	(तस्य) गृहगोधिका
८३	२	३७	आरग्ध	आरग्वध
			वृक्षयः	वृक्षः
८४	१	२०	पथ्यम्	' अपथ्यम्
८४	१	२३	प्रसिद्धायाम्	प्रसिद्धम
८६	१	३३	कुलयी	कुलयी }
		३४	कुली	कुली }
८६	२	अन्त्य		(हे. च)
८७	२	६	कुशाल्मली	कुशाल्मलि
८८	२	३५	क्रिडा	क्रीडा
९०	१	३६	(त्री. ज्वरसि)	(त्री) (ज्वरचि.)
	१	अन्त्य	कृमिशल	कृमिशैल
९४	२	३८	कोकड	कोकड }
		३९	कोकवाच	कोकवाच }
९४	१	१३	शोधनाथम्	शोधनार्थम
९४	२	१५	दाहहाः	दाहहः
९४	२	२०	कफाघ्न	कफघ्नं
९५	१	५	विशोष	विशेषः
९६	१	८	कुड्मशलः	कुड्मलः
९६	१	अन्त्य	काटी	कौटी
९८	२	२२	क्षारः	क्षारौ
९८	२	३१	निरुह	निरूह
९९	२	१६	खर्जुरीका	खर्जुरिका
१०१	२	१४	गण्डक	गण्डका
१०२	१	१६	खधि	खधिः
१०४	२	१९	वुक्षा	वृक्षः
१०५	१	८	चंद्र	×
१०६	२	अन्त्य	पारीषाश्वत्थ	पारीषाश्वत्थः
१०९	१	३५	(नै. नि.)	(वै. नि.)
११०	२	३७	लघूष्ण	लघूष्णं
११२	१	अन्त्य	त्राहिमान	त्राहिमान्
११३	२	२८	घत्रम्	छत्रम्
११४	१	१५	कफभेद	कफमेद
१२०	२	१६	भ्रमर	भ्रमरः
१२१	१	१२	चणाकम्लम्	चणकाम्लम्
१२१	२	२३	एकचतुष्टय	एकचतुष्टयं
१२१	२	३५	योगा	योग
१२२	१	१२	हितः	हितम्

पान	स्तंभ	ओळ	अशुध्द	शुध्द
१२५	२	१९	धानसपः	धानसर्पः
१२६	१	८	वासुक	वास्तूक
१२६	१	३८	वखी	नखी
१२८	२	२४	मासं	मांसं
१२९	२	२	परदि	परद्वी
१३२	२	१९	लाभज्जकः	लामज्जकः
१३३	२	७	पत्रिकाप	पत्रिका
१३४	१	१ व २	प. म. ज्योतमनी	(पमु.) ज्योत्स्ना
१३४	१	१२	जिवज्जीव	जीवञ्जीव
१३४	२	३	त.,	न.,
१३४	२	१५	इङ्गुती	इगुदी
१३५	२	३४	मत्स्य	मत्स्यः
१३७	१	१३	मास	मांस
१३७	१	१४	वधिः	विधिः
१३७	१	१९	पित्तलङ्किंचित्सर्वाहरास्य	पित्तलं किंचित्सर्वाहारस्य
१३८	१	१	ग्रीष्मतु	ग्रीष्मर्तुः
१४१	२	११	द्र्	दर
१४१	२	उपान्त्य	लड्डक	लड्डुक
१४२	१	२५	बाकू	वाक
१४२	१	३७	मद्यम	मद्यम्
१४२	१	३७	क्षार	क्षीर
१४२	२	१२	तुच्छद्रुं	तुच्छद्रुः
१४२	२	२३	लिङ्गिवी	लिङ्गिनी
१४३	१	३३	पू तं	पूतं
१४५	२	२३	त्रिशंता परमाणवः	त्रिशद्भिः परमाणुभिः
१४६	२	६	शोथैः	शोथे
१४६	२	९	अपरम्	अपरः
१४८	१	१२	ताम्नम्	ताम्रम्
१४८	२	३०	दृष्ट	द्रुष्ट
१५०	२	६	भेद (मनि.)	भेदः (मानि.
१५०	२	७	दर्द्रुघ्न	दद्रुघ्न
१५२	१	२६	त्रृक्षा	वृक्षः
१५४	१	अन्त्य	उत्साहः	उत्साह
१५४	२	११	सन्त	सन्ता
१६०	२	३	मेव	मेष-
१६१	२	११	भूच्छत्राक	भूच्छत्राकः
१६२	१	३८	कषाय	कषायः
१६३	२	२४	बुधै	बुधैः
१६४	२	८	ग्रहः	ग्राहः
१६७	२	२८	बृक्ष	वृक्षः

पान	स्तंभ	ओळ	अशुध्द	शुध्द
१६८	२	३	नागर्जुना	नागार्जुना
१६८	२	१४	पट्टशाक	पट्टशाकः
१६९	१	२८	व्यधौ	व्याधौ
१७२	२	१३	रजरका न्त्री	रजस्का स्त्री
१७३	२	३	जीरफः	जीरकः
१७६	१	७	नागफला	नागबला
१७६	१	१८	मूत्रान्	मूत्रम्
१७६	१	२६	व्रणस्य	व्रणस्य
१७६	१	३८	हिम	हिमं
१७६	२	६	यम्बुः	यम्बु
१७७	१	४	सनाभसा	सनाभसाः
१७७	१	६	पार्थिबा	पार्थिवाः
			पार्थियानवे	पार्थिवानेव
१७७	१	१०	विंशल्य	विंशत्य
१७९	१	१४	चक्रमर्द	चक्रमर्द
१७९	२	२२	परपृष्ठा	परपुष्टा
१८०	१	१६	परुषक	परूषक
१८०	२	२	भोजनार्थ	भोजनार्थं
१८१	१	३४	श्लेष्माम्ल	श्लेष्माम्ल
१८२	१	३१	परुषक	परूषक
१८२	१	३८	सप्तः	सप्त
१८३	२	३६	घृक्षः	वृक्षः
१८४	२	१६	यन्य	यन्त्र
१८५	१	३	पादास्थीवि	पादास्थीनि
१८५	२	३४	थमानीं	यमानी
१८६	१	१९	षारावर	पारावर
१८६	२	८	चरकोक्त;	चरकोक्तः
१८८	१	३२	ज्वर–	×
१८८	१	अन्त्य	षिण्डिरिका	पिण्डिरिका
१८८	२	८	जोजिष्मति	ज्योतिष्मति
१८८	२	१३	जनक	जनकं
१८८	२	१६	निर्गमम्	निर्गमः
१८८	२	३५	पिपल्याद्य	पिप्पल्याद्य
१८८	२	३६	ममधु	मधु
१९०	२	३४	स्त्राव	स्राव
१९०	२	३८	पुण्डरिक	पुण्डरीक
१९२	१	२१	ब्वादिः	ब्वादिः
१९३	१	४	करज	करञ्ज
१९३	१	३१	शात्मली	शाल्मली
१९३	१	३२	अन्यम्	अन्त्रम्

पान	स्तंभ	ओळ	अशुध्द	शुध्द
१९३	२	३६	पृथकील	पृथुकील
१९४	२	७	खण्डीकृत्	खण्डीकृतः
१९७	२	१७	प्रसदन	प्रसादन
१९८	१	१६	वायुः कोपः	वायुकोपः
१९८	२	अन्त्य	वा. ल.	वा.उ.
१९९	२	१९	×	+ सर्पः
२०१	१	१४	शालावृक्षः	शालावृकः
२०३	१	१६	मेषशृङ्ग	मेषशृङ्गी
२०३	१	१८	स्वर्णः	स्वर्णम्
२०३	१	२९ ३१	स्त्रीः	स्त्री
२०४	२	१२	भार्गी	भार्गी
२०६	२	१	पुष्या	पुष्य
२०८	१	४	शृगाल	शृगालः
२०८	२	२१	मीष्म	मीष्म
२०९	१	२७	कोशाम्न	कोशाम्र
२१०	२	३३	भृगराज	भृङ्गराज
२१३	१	२०	वृति	वृतिः
२१३	२	१	मस्त्यः	मत्स्यः
२१३	२	५	ज्रव.	ज्वर.
२१४	१	३७	ष्लेष्म	श्लेष्म
२१५	२	३	मधुच्छिष्टः	मधूच्छिष्टः
२१५	२	१७	पुष्टिछरौषधम्	पुष्टिकरौषधम्
२१५	२	३३	घुष्ट	पुष्ट
२१५	२	४०	तद्वि	तद्धि
२१६	२	१	भाक्षिकैः	माक्षिकैः
२१६	२	१४	पमु.	(पमु.)
२१६	२	३२	अममोदा	अजमोदा
२१७	१	३६	कारण्डव	कारण्डवः
२१७	२	११	म	न.,
२१७	२	२२	हृय	हृद्या
२१८	२	४०	हाक्लीतन	महाक्लीतन
२१८	२	४१	वृक्ष	वृक्षः
२२१	१	१	किङ्मुलुकः	किञ्जुलुकः
२२१	१	२२	अन्तबहिर्वा	अन्तर्बहिर्वा
२२१	१	२८	विद्यातू	विद्यात्
२२१	२	१४	तक्राद्दि	तक्रादिः
२२३	१	२६	रोचनत्र्चं	रोचनञ्च
२२३	२	१४	मङ्गालकर	मङ्गलकरः
२२४	२	२७	खर्पर	खर्परम्

पान	स्तंभ	ओळ	अशुध्द	शुध्द
२२५	१	२	रस	रसः
२२५	१	११	खञ्ज	खञ्ज
२२५	१	३८	कटु	कटुः
२२५	२	४	पलाण्डूः	पलाण्डुः
२२५	२	१०	ताम्बूल	ताम्बूलम्
२२५	२	११	शोभाज्जन	शोभाञ्जन
२२५	२	३८	भेद्	भेदः
२२६	१	शीर्षक	मुञ्जक	मुञ्जतृण
२२६	२	१		मुद्ग
२२८	२	१८	व्याधिः कष्ट चिकित्सितः	व्याधिः कष्टचिकित्सितः
२२८	२	२०	दुच्छ्वासते	दुच्छ्वसते
२२९	१	१८	गर्भ सन्धान	गर्भसन्धान
२३०	१	३१	कटुफलम्	कट्फलम्
२३०	१	३९	छर्दि	श्छर्दि
२३०	२	८	मेदोद्भवा	मेदोद्भवा
२३२	१	३०	सुख	मुख
२३३	१	१	पाण्डु	पाण्डुं
२३३	२	२५	तत्रष्ये	तत्राप्ये
२३३	२	४०	युवावस्था	युवावस्थ
२३३	२	४०	युवः	युवा
२३४	१	२३	मैष	भैष
२३४	२	२	वृक्ष	वृक्षः
२३४	२	३३	दूवा	दूर्वा
२३५	२	१२	सुकल्प	(सुकल्प
२३५	२	२०	मत्स्यम्	मत्स्यः
२३५	२	२५	मेइदी	मेहदी
२३८	१	४१	वृक्ष	वृक्षः
२३९	२	२३	ग्रन्थद	ग्रन्थ
२३९	२	१३	षित्ता	पित्त!
२३९	२	१५	ज्अरा	ज्वरा
२४०	१	११	मरख्या	मख्या
२४०	१	४०	तूराजधत्तु (स)	धु(त्तू) स्तू
२४१	२	२८	क्कुरः	कुक्कुरः
२४३	२	३७	करञ्ज	करञ्जः
२४४	१	१७	पाण्डू	पाण्डु
२४६	१	३५	रोंगः	रोगः
२४९	१	३७	व्याधौ	व्याधिः
२४९	१	३९	भूस्तृण	भूस्तृणं
२५१	१	३६	नागफेशर	नागकेशर
२५२	२	१२	वृक्ष	वृक्षः

पृष्ठ	स्तंभ	ओळ	अशुद्ध	शुद्ध
२५२	२	२७	घृक्षः	वृक्षः
२५३	१	५	मण्डूरे	मण्डूरः
२५४	१	३	शमि	शमी
२५४	१	६	गोरोचन	गोरोचनम्
२५४	१	२३	नकुलम्	नकुलः
२५४	२	८	वस्र	वस्त्र
२५४	२	२४	पस्थ	पस्थश्च
२५५	१	२८	कारव्या	कारव्य
२५७	१	४	ऋद्धि	ऋद्धिः
२५७	१	२०	मस्स्य	मत्स्य
२५८	२	१३	घृक्षः	वृक्षः
२५९	२	२४	वृक्ष	वृक्षः
२५९	२	३०	विट्ट	विट्
२५९	२	३१	विट्ट	विट्
२५९	२	३३	विट्ट	विट्
२६०	१	२६	रोम	रोग
२६०	१	२९	षिद्रधिः	विद्रधिः
२६३	२	३४	शल्यास्रम्	शल्यास्त्रम्
२६४	१	३४	(निसिन्दा)	निसिन्दा
२६४	२	३२	पार्श्वयोः	पार्श्वे
२६५	१	२१	हिते	हितः
२६६	१	२९	उन्दरुः	उन्दुरुः
२६६	१	३६	शृङ्गी	श्रृङ्गी
२६८	२	३३	वैयसिंही	वैयसिंही
२६९	१	१६	विकीर्य	विकीर्य
२६९	२	३५	स्थोल्य	स्थौल्य
२७०	१	१४	कारव्या	कारव्य
२७२	२	४	(च)	च
२७२	२	१३	कर्णी	कर्णी
२७३	१	२४	प्रमेह	प्रमेह
२७३	२	१९	भूतानि	भूतानि
२७५	१	१७	स्वनाप्र	स्वनामप्र
२७५	२	१७	खट्टाशाण्ड;	खट्टाशाण्डः
२७६	१	११	पाया	पाय
२७८	१	९	ब्रत्यी	ब्रह्मी
२७८	१	१३	कफः	कफः
२७८	१	४१	शि–; न,	शिश्न–न;

पृष्ठ	स्तम्भ	पंक्तिः	अशुद्धम्	शुद्धम्
२७८	२	३१	मयूखे	मयूख
२७९	२	२८	वृक्ष	वृक्षः
२८०	१	२९	जिहिका	जिव्हिका
२८१	२	३०	वट	वटः
२८२	१	१	वृक्ष	वृक्षः
२८३	१	३६	ख्याते	ख्यातः
२८३	२	१४	श्रव (स्)	श्रवस्
२८३	२	२७	सर्षष	सर्षप
२८७	२	११	शिलिन्घ्र	शिलिन्ध्र
२८८	१	३	सग्रहक	सङ्ग्रहक
२८८	१	४	सग्रहण	सङ्ग्रहण
२८८	२	३०	वृक्ष	वृक्षः
२८८	२	३४	कृतः	कृतम्
२८९	२	१२	सष्तरक्त	सप्तरक्त
२८९	२	२६	सर्पैः	सर्पः
२९०	१	३१	पुप्प	पुष्प
२९०	१	३८	शोप	शोष
२९०	२	२२	भदः	भेदः
२९१	१	१२	षद्म	पद्म
२९१	१	१५	धूष	धूप
२९१	२	२६	सर्पैसु	सर्पसु
२९२	१	२	पिप्प	पिप्प
२९२	१	२५	सर्व्वं	सर्व्व
२५२	२	९	सर्षपाः	सर्षपा
२९४	१	३१	कुकुरः	कुक्कुरः
२९५	२	४	वृक्ष	वृक्षः
३००	१	२९	द्वया	द्वयम्
३००	२	१५	ख्याते	ख्यातः
३०१	१	११	वासन्तीं	वासन्ती
३०१	२	३९	सप्ता	सप्त
३०५	१	१०	गुच्छम्	गुच्छः
३०५	१	२०	गुच्छम्	गुच्छः
३०६	१	१५	पणख	पनस

पृष्ठ	स्तम्भ	पंक्तिः	अशुध्दम्	शुध्दम्
३०६	२	१६	स्नाव्री	स्नान्नी
३०६	२	२७	योनि	योनिः ,
३०७	२	३१	पु पी	पुष्पी
३०८	२	१	मुद्रः	मुद्गः
३०९	१	३०	त्रिवृत	त्रिवृत्
३१०	२	३९	शिग्रु	शिग्रूः
३१२	२	५	शित	सित्
३१३	१	शीर्षक	हिभोपम	हिमोपम
३१३	१	१६	भेषः	मेषः
३१३	१	१६	भेषी	मेषी
३१३	१	२४	भेषः	मेषः
३१३	२	२६	निध	निघ
३१४	२	८	क्षुद्रण्डुलः	क्षुद्रतण्डुलः
३१४	२	१०	शालिपणी	शालिपर्णी